श्रीकृष्णाय नमः ।

वेदान्ताधिकरणमाला ।

दशदिगन्तविजयि-
श्रीमद्गोस्वामिश्रीपुरुषोत्तममहाराजप्रकटिता ।

संशोधकौ प्रकाशकौ च,

मोचन्द्र तुलसीदास तेलीवाला,
बी.ए., एल्.एल्.बी., वकील हाइ कोर्ट.

सुत्र गोकुलजी झाला वेदान्तप्राइझमेन ।

घेलाल व्रजदास सांकलीया,
बी.ए., एल्.एल्.बी., वकील हाइ कोर्ट.

पुष्टिभाब्दाः ४४०. सम्वत् १९७६.

मूल्यमेकमुद्रिका ।

श्रीमान् शेठ त्रिभुवनदास



जन्म-संवत् १९०४ फाल्गुन कृष्ण ४

सद्गत शेठ ईश्वरदास



जन्म-संवत् १९४५
चैत्र-कृष्ण ३०

अवसान-संवत् १९७[illegible]
ज्येष्ठ शुक्ल १

BHAR
LIBR
S. N.

EDITORS' NOTE.

The *Vedântâdhikarana-Mâlâ* has been published from *funds* supplied to us by *Seth Tribhuvandâs Varjivandâs of Madhav Baug* in order to perpetuate the memory of his *youngest and most beloved son Is'wardâs* who died prematurely in May 1919 and who was known for his amiable nature and religious tendencies.

Seth Tribhuvandâs has set apart a good sum for the memory of his deceased son Is'wardâs, and he has decided to devote a portion of the annual interest of this sum to the publication of the works of the Vallabhâchâryan literature according to the sentiments expressed by his deceased son during his life-time. All the publications from these funds will be included in the series to be named after his son Is'wardâs. For this act of judicious charity the literary world in general, and the Sampradâya in particular, will be very grateful to him.

Our obligations are also due to Paṇḍit Gaṭṭulâlâ's library, and the Bhâṇḍârkar Oriental Research Institute for the loan of MSS. of the present work. Our best thanks are due to Bâla Shâstrî of Kotah who very kindly sent to us his copy of this work, mostly copied and corrected by himself from the MSS. of the Nâthadwâra library.

Purushottamaji.

Purushottamaji, the author of this work, was born at Gokula in Muttra district on Bhadrapada S'ukla 11th, 1724 Samwat. He was 7th in descent from S'ree Vallabhacharya. He has written numerous works the bulk of which is said to equal nine Mahabharatas. They all bear the stamp of his masterly genious. Purushottamaji lived up to a very advanced age. In Samwat 1820 he is said to have had a religious discussion with one Venibhatta of Benaras. Serving his God S'ree Bâla-Krishnaji he lived at Surat in Gujarat, where he had come with his uncle Vrajarâjaji.

Vedântâdhikaranamâlâ.

The text of this work is based on four MSS., two from the late Paṇḍit Gaṭṭulâlâ's library, one from the government collection now placed in the charge of the Bhâṇḍârkar Oriental Research Institute, and one kindly sent to us by BâlaShâstrî of Kotah from S'ri Nâthadwâra. The MSS. from the Bhâṇḍârkar Institute contained the 3rd and 4th Adhyâyas only, while the rest did not contain the 4th

Adhyâya The 4th Adhyâya of this work seems to have been an extremely rare work. Yogi S'ree Gopes'warji did not get it and hence he wrote out the Adhikaranamâlâ of the fourth Adhyâya himself, as he says at the end of the appendix printed here. During our tour at Kotah, Kankaroli, Nâthadwâra, and Junâgadha we did not find the 4th Adhyâya in the libraries there. So it is a great satisfaction to us that we are able to publish the complete work here. Gopes'warji's Adhikaranamâlâ of the 4th Adhyâya has been therefore published here as an appendix. Gopes'warji is also a great master like Purushottamaji, but his style is not as vigorous and concise as that of Purushottamaji.

The object of this work as stated by Purushottamaji himself is to summarise the teaching of the sûtras as according to the Anu Bhâshya, and facilitate the understanding of the same by those who are unable to go through his Bhâshya Prakâs'a. It seems to have been composed by him at a very advanced age—after he had finished his magnum opus Bhâshya Prakâs'a, and the भावप्रकाशिकावृत्ति perhaps. These three works *viz* भाष्यप्रकाश, भावप्रकाशिका, and वेदान्ताधिकरणमाला deal directly with the Brahma-Sûtras. Of these we are concerned here chiefly with the वेदान्ताधिकरणमाला. It contains the last word of Purushottamaji on the Brahma Sûtras. Purushottamaji himself styles this work as न्यायमाला in the beginning and at the end and there is some meaning in it. In an ordinary अधिकरणमाला we should have found at best the purport of each अधिकरण with its so called five अंग *viz.* विषय, संशय, पूर्वपक्ष, उत्तरपक्ष, and संगति. Purushottamaji in addition to these gives also the purport of all the Sûtras except in the 3rd and 4th pâdas of the third अध्याय. In the beginning, he gives the purport of the whole शास्त्र, then he sets out the purport of the four pâdas of each अध्याय at its beginning. At the beginning of the पाद he gives in brief the purport of the same. In the beginning of the अधिकरण he states the object of the अधिकरण, and then mentions the विषय, संशय, पूर्वपक्ष, उत्तरपक्ष and at the end the संगति—that is shows the relation of the अधिकरण with what precedes and follows. The style here adopted throughout is explanatory, and not argumentative as in the भाष्यप्रकाश. The perusal of this will be very instructive and delightful.

With feelings of joy we offer this fruit of our labour of love at the lotus-feet of Lord Sree Krishna.

M. T. Telivala.
D. V. Sankalia

दशदिगन्तविजयिश्रीमद्गोस्वामि-
श्रीमत्पुरुषोत्तमचरणाः ।



प्रादुर्भाव सवत् १७२४ भाद्रपद शुक्ल दशमी ।

पूर्णवेत्तृश्रीमद्गोस्वामिश्रीगोपेश्वरचरणाः ।



प्रादुर्भाव सवत् १८३५ ज्येष्ठ शुक्ल पञ्चमी ।

श्रीकृष्णाय नमः ।

वेदान्ताधिकरणमाला ।

श्रीपुरुषोत्तमविरचिता ।

प्रथमोध्यायः ।

श्रीबालकृष्णमाचार्यान् प्रभून् श्रीविट्ठलेश्वरान् । व्यासाचार्यांस्तद्वचांसि प्रणमामि पुनः पुनः
भाष्यप्रकाशे विस्तीर्णोर्थोवगन्तुं न शक्यते । सर्वैरतोर्थं सङ्गृह्य न्यायमाला वितन्यते ॥२॥

तत्र तावद् व्यासचरणैरज्ञजनानुग्रहार्थं सर्ववेदार्थरूपस्य ब्रह्मणः स्वरूपसाधनफलमतान्तरनिराकरणभेदेन **चतुर्धा** विचारोत्र शास्त्रे क्रियते । तत्र सर्ववेदार्थरूपं ब्रह्मैवेति ज्ञापयितुं चतुर्लक्षण्यां तत्सम्बन्धि सर्वं विचारितम् । तत्र **प्रथमेध्याये** सर्वेषां वेदान्तानां ब्रह्मण्येव समन्वयः, वेदार्थनिश्चयश्च वेदान्तविचाराधीन इति सर्वोपि वेदो ब्रह्मण्येव **प्रमाण**मित्युक्तम् । **द्वितीये** च श्रुतीनां परस्परविरोधपरिहारेण विरुद्धस्मृतीनां दूषणेन च ब्रह्मैव **प्रमेय**मिति निर्णीतम् । ततस्तृ**तीये**न्तरङ्गं बहिरङ्गं च **साधनं** सोपकरणं विचारितम् । ततश्चतु**र्थे** फलप्राप्तिप्रकारस्तदनुभवप्रकारो ब्रह्मैव च फलमिति निर्णीतमिति **शास्त्रार्थसङ्ग्रहः** ।

तत्र **प्रथमे**ध्याये सर्वेषां वेदान्तानां ब्रह्मणि समन्वयश्चतु**र्भिः** पादैर्वक्तव्यः । तत्रासन्दिग्धेषु वेदान्तवाक्येषु विचारासञ्चारात्सन्दिग्धान्येव निर्णेतव्यानि । तानि चतुर्धा, कार्यप्रतिपादकानि, अन्तर्यामिप्रतिपादकानि, उपास्यरूपप्रतिपादकानि प्रकीर्णकानि चेत्यतश्चत्वारः पादाः ।

तत्र **प्रथमपादे** ब्रह्मसम्बन्धिविचारं प्रतिज्ञाय ब्रह्म लक्षयित्वा ततः कार्यवाक्यानि विचारितानि ।

तत्र **प्रथमे एकसूत्रे जिज्ञासाधिकरणे** षडङ्गैरेव वेदार्थनिश्चयस्य सम्भवाद्त्यन्तनिश्चयस्य तपःप्रभृतिभिरेव सम्भवात्तदर्थं किं वेदान्तविचारेणेत्याशङ्क्य, ऋषिभिर्नानाशास्त्राणां कृतत्वात्तच्छ्रवणेन बुद्धिदोषान्मन्दानां सन्देहसम्भवे तन्निवारणार्थं विचारशास्त्रं कर्तव्यम् । तत्र यद्यपि 'सर्वे वेदा यत्पदमामनन्ती'ति 'वेदैश्च सर्वैरहमेव वेद्य' इत्यादिश्रुतिस्मृतिभिर्ब्रह्मैव सर्ववेदार्थः, तथापीदं वाक्यं वेदान्ते श्रुतं 'तं त्वौपनिषदं पुरुषं पृच्छामी'ति, पुरुषरूपता च तत्रैव श्रुता, 'वेदान्तविज्ञानसुनिश्चितार्था' इतिवाक्येन वेदान्तानामर्थनिश्चायकत्वं च तत्रैव श्रुतम्, अत इदानीं तपःप्रभृतीनामसम्भवाद्वेदान्तविचारेणैव वेदार्थरूपब्रह्मस्वरूपनिश्चय इत्यभिसन्धाय ब्रह्मसम्बन्धिविचारः श्रीबादरायणाचार्यैः प्रस्तुत इत्युक्तम् । अतोग्रिमाणि यान्यधिकरणानि शास्त्रसमाप्तिपर्यन्तं तानि सर्वाण्यस्यैव विषय इति तेषामस्य च विषयविषयिभावः सङ्गतिरित्यपि बोधितम् ॥ १ ॥

ततो द्वितीये एकसूत्रे **जन्माद्यधिकरणे** ब्रह्म किंलक्षणकं किंप्रमाणकं चेत्याकाङ्क्षायां जगदुत्पत्तिस्थितिकारण ब्रह्मेति सूत्रांशेन लक्षितम् । ततोंशान्तरेण वेदरूपशास्त्रप्रमाणक ब्रह्मेत्युक्तम् । तेन कर्तृरूप निमित्ततया सिध्यति ॥ २ ॥

ततस्तृतीये एकसूत्रे **समन्वयाधिकरणे** ब्रह्म जगतः कर्तृ निमित्त चेति चेत्, किं जगत. समवायीत्याशङ्कायामनारोपितानागन्तुकरूपेण समनुगमाद्ब्रह्मैव जगत. समवायीति निर्णीतम् । तेनाभिन्ननिमित्तोपादानवादोस्मिन् शास्त्र इति बोधितम् ॥ ३ ॥

एव **त्रिसूत्र्या** ब्रह्मणो जिज्ञासा ब्रह्मलक्षण तद्विचारस्य कर्तव्यता च साधिता । ये पुनः कर्तृत्वे वैषम्यादयो दोषाः, समवायित्वे च विकृतत्वादयः, ते सर्वेऽग्रिमाध्याये परिहर्तव्या., विचारकर्तव्यतायाः प्रतिज्ञातत्वात् । तत्र सच्चिदानन्दरूपत्वस्य ब्रह्मणः स्वरूपलक्षणत्वात्पूर्वोक्त कार्यलक्षण त्रिष्वप्यनुगत वक्तव्यम्, अन्यथा लक्षणेऽव्याप्तिप्रसङ्गात् । अन्यतश्च निवारणीयम्, अन्यथातिव्याप्तिप्रसङ्गात् । असम्भवश्च निवारणीयः ।

तत्र द्वाभ्यामधिकरणाभ्या सद्रूपे तल्लक्षणं योजितम् । अत.पर चिद्रूपेऽव्याप्तिनिवारणाय प्रकृतिपरमाणवादावतिव्याप्तिनिवारणाय च चतुर्थं **ससस्सूत्रमीक्षत्यधिकरणमारभ्यते** । तत्र **प्रथमसूत्रे** 'यतो वाचो निवर्तन्त' इत्यादिश्रुत्या ब्रह्मण. सर्वव्यवहारातीतत्वेन सर्वप्रमाणागोचरतया तज्ज्ञानासम्भवाद्विचारो व्यर्थ इत्याशङ्क्य, ब्रह्म सर्ववेदान्तप्रतिपाद्यम्, 'सदेव सौम्येदमग्र आसी' दित्युपक्रम्य 'तदैक्षत' 'बहु स्यां प्रजायेये' त्यनेनेक्षणस्य बहुभवनस्य च श्रावणात् । अतः सृष्टे. पूर्वमव्यवहार्यत्वेपि तदनन्तर तत्कर्तृत्वेन तदुपादानत्वेन च व्यवहार्यत्व श्रुत्योच्यत इति तया तज्ज्ञानस्य सम्भवात्तद्विचारो न व्यर्थ इति बोधितम् । ईक्षणकर्तृत्वेन चेतने तस्मिन् पूर्वोक्तलक्षणसमन्वयाच्चिद्रूपे लक्षणाव्याप्तिरपि परिहृता । तेनैव प्रकृतिपरमाणवादावतिव्याप्तिरपि निवारिता, असम्भवश्च निवारितः । ततो **द्वितीयसूत्रे** तस्येक्षणकर्तुरात्मशब्दवाच्यत्वात्प्राकृतगुणवत्त्व निवारितम् । ततस्तृतीये तदुपासकस्य मोक्षरूपफलकथनादपि तन्निवारितम् । ततश्चतुर्थे जगद्धेयत्वस्याकथनादपि तन्निवारितम् । एव **चतुःसूत्र्यां** कार्यविधिमुखेन तद्विचार उक्तः । ततोग्रे **त्रिसूत्र्यां** कार्यनिषेधमुखेन तद्विचार्यते, निषेधश्च प्रलयात्मकः । तत्र **पञ्चमे** स्वाप्ययसूत्रे जीवसुषुप्तिर्ब्रह्मसम्बन्धेनोच्यते । सा च मोक्षभिन्नापि जाग्रदादिवत्कर्मसम्बन्धरहितेति प्रलयतुल्या । सा च स्वसम्बन्धेनैव जायत इति भगवतस्तत्कर्तृत्वम् । ततः **षष्ठे** मोक्षदशायां जीवस्य भगवत्तुल्यत्व श्रुत्योक्तम् । तत्र मैत्रेयीब्राह्मण आदिमध्यावसानेषु ब्रह्मण एव बोधनात् तदात्मत्व ब्रह्मण एवेति बोधितम् । ततः **सप्तमे** सर्वप्रलये ब्रह्मैवावशिष्यत इति श्रुत्या बोध्यते । अतः प्रलयो ब्रह्मकर्तृक एवेति बोधितम् । एवमनेनाधिकरणेन चित्स्वरूपे कार्यलक्षणयोजनादव्याप्तिः परिहृता । चित्स्वरूपत्वबोधनात्प्रकृत्यादावतिव्याप्तिरपि परिहृता ॥ ४ ॥

ततः पञ्चमेऽष्टसूत्रे आनन्दमयाधिकरणे आनन्दे लक्षणयोजनेन तत्राव्याप्तिः परिह्रियते । तत्र प्रथमसूत्रेऽविशेषेण पुनःकथनरूपादभ्यासादानन्दमयस्य ब्रह्मत्वं स्थापितम् । तत्र प्रथमवर्णके आनन्दस्यार्थतोऽभ्यासः शब्दतश्च । द्वितीयवर्णके तु 'तस्यैष एव शारीर आत्मा यः पूर्वस्ये'ति वाक्याभ्यास उक्तः । एवमभ्यासेन मयट्प्रवाहाद्भेदे साधिते आनन्दमयस्य ब्रह्मत्वम् । यथा पूर्वतन्त्रे यजत्यभ्यासात्कर्मभेदस्तद्वत् । ततो द्वितीयसूत्रे मयटो विकारार्थत्वादानन्दमयस्य न ब्रह्मत्वमिति सूत्रांशेनाशङ्का, मयटः प्राचुर्यार्थकत्वान्न मयट्श्रवणेनाब्रह्मत्वं वक्तुं शक्यत इत्यंशान्तरेण समाहितम् । ततस्तृतीये सूत्रे आनन्दजनकत्वेन तत्कारणत्वान्मयटो विकारार्थत्वं निवारितम् । ततश्चतुर्थसूत्रे 'सत्यं ज्ञान'मिति मन्त्रे योऽर्थ उक्तः स एव सम्पूर्णे प्रपाठके प्रपञ्च्य गीयते, अत आनन्दमयो ब्रह्मेति निर्णीतम् । ततः पुनरग्रिमया चतुःसूत्र्याप्ययमर्थो निषेधमुखेन निर्णीयते । तत्र प्रथमेन जीवस्यानन्दमयत्वं निराक्रियते, जीवे निरङ्कुशजगत्कर्तृत्वादिरूपस्य माहात्म्यस्यानुपपद्यमानत्वात् । द्वितीये 'यानन्दी भवती'त्यादिना जीवस्यानन्दनीयत्वमुच्यते, न त्वानन्दत्वम्, अतो भेदव्यपदेशादपि जीवस्य नानन्दमयत्वमित्युक्तम् । ततस्तृतीये 'सोऽकामयते'ति चेतनधर्मस्य कामस्य जडायां प्रकृतावनुपपद्यमानत्वात्सापि नानन्दमयीत्युच्यते । ततश्चतुर्थेऽस्य जीवस्यानन्दमये ब्रह्मणि योगमुपसङ्क्रमरूपं फलत्वेन कथयति श्रुतिः, तेन जीवापेक्षया उत्कृष्ट एवानन्दमयो, न तु जीवादपकृष्टः । तस्मादानन्दमयो ब्रह्मेति निरूपितम् । एवं चतुःसूत्र्यां जीवजडनिषेधमुखेनानन्दमयो विचारितः । एवमष्टसूत्र्यानन्दमयस्य ब्रह्मत्वे साधिते निरङ्कुशजगत्कारणत्वं तथा पर्यवसितमानन्देऽपि लक्षणमनन्यपाव्याप्त्याभिः परिहृता । जीवजडयोर्निरासादतिव्याप्तिश्च । एवमधिकरणचतुष्टयेन सच्चिदानन्देषु लक्षणसमन्वयादसम्भवोऽप्यत्र परिहृतः । तेन जन्माद्यधिकरणस्य शेषभूतमधिकरणपञ्चकमिति शेषशेषिभावः सङ्गतिः ॥ ५ ॥

नायाङ्गोपासनानां ब्रह्मपरत्वे तदुक्तभवान्तरफलं तत्क्रतुत्वरूपं मुख्यं फलं च भगवत एवेतिज्ञापनाय चाप्येतद् बोध्यम् ॥ ६ ॥

ततः **सप्तम एकसूत्रे तल्लिङ्गाधिकरणे, अष्टम एकसूत्रेतिदेशाधिकरणे** च ब्रह्मप्रकरणे आकाशप्राणादिशब्दैः ब्रह्मैवोच्यते, निरङ्कुशजगत्कारणत्वरूपब्रह्मलिङ्गादिति विचारितम् । तेन पूर्वोक्तलक्षणेतिव्याप्तिदोषः परिहियत इति पूर्वोक्तशेषभूतमिदमधिकरणद्वयम् । पञ्चमाद्यधिकरणद्वये प्रत्ययकृतसन्देहनिरासः, सप्तमाद्यधिकरणेषु तु प्रकृतिकृतसन्देहनिरास इति विशेषः, प्रकृतिप्रत्ययभेदेन शब्दस्य द्विविधत्वादिति । षष्ठाद्यधिकरणत्रयस्य विषयवाक्यान्युद्गीथविद्यास्थान्युक्तानि । तेन कर्माङ्गोपासनास्वपि ब्रह्मैव फलदम्, तज्ज्ञानेनैव च कर्मणो वीर्यवत्तरत्वमित्यपि बोधितम् । तेन प्रसङ्गोपि सङ्गतिः ॥ ७ ॥ ८ ॥

ततो **नवमे चतुःसूत्रे ज्योतिश्चरणाधिकरणे** 'अथ यदितः परो दिवो ज्योतिर्दीप्यत' इतिवाक्ये ज्योतिःशब्देन ब्रह्मैवोच्यत इति निर्णीतम् । तत्र **प्रथमसूत्रे** 'एतावानस्य महिमे'तिमन्त्रे भूतात्मकानां चरणानां ब्रह्मधर्मत्वाज्ज्योतिःशब्देन ब्रह्मैवोच्यत इति निर्णीतम् । ततो **द्वितीयसूत्र** एतत्सन्दर्भारम्भे गायत्रीछन्द एवोच्यत इति न चरणानां ब्रह्मधर्मत्वमिति सूत्रांशेनाशङ्क्यांशान्तरेण समाहितम् । भगवति चेतोर्पणार्थं सन्दर्भादौ गायत्री प्रस्तुता, तयोपासने ब्रह्मदर्शनं भवतीति । तस्माद्ब्रह्मण एव पादाः, न गायत्र्या इत्युक्तम् । ततस्तृतीये गायत्रीछन्दो हि शब्दरूपम्, भूतपृथिवीशरीरहृदयान्यर्थरूपाणि । तेषां शब्दरूपछन्दःपादत्वं न सङ्गच्छते । अतो ब्रह्मण एव पादा इत्युक्तम् । ततश्चतुर्थसूत्रे यद्यप्येवं पादानां ब्रह्मधर्मत्वमायाति, तथापि 'एतावानि'तिमन्त्रे 'दिवी'तिसप्तम्या पादानां द्युलोकाधारत्वकथनेन विवक्षितस्य ज्योतिषस्तदाधारत्वमुक्तम् । 'अथ यदतः परो दिव' इतिपञ्चम्यानाधारत्वमुच्यत इत्युपदेशभेदाज्ज्योतिर्न ब्रह्मेत्याशङ्क्य, यथा 'वृक्षे श्येनो वृक्षाग्रात्परतः श्येन' इतिविभक्तिभेदेपि यथैकार्थ्यप्रत्यभिज्ञा न विरुध्यते, तथात्रापीति न दोष इति समाहितम् । तस्मादत्र ज्योतिःशब्दवाच्यं ब्रह्मैवेति निर्णीतम् । यद्यपि पूर्वाधिकरणन्यायेन ज्योतिःशब्दस्य ब्रह्मवाचकत्वमायाति, तथाप्यत्र प्रकरणस्य लिङ्गस्य च सन्दिग्धत्वात्पुनर्विचारितम् । तेन सामान्यविशेषभावः पूर्वाधिकरणसङ्गतिः । एतेनान्या अपि पादसम्बद्धाः प्रणवादिविद्या अपि ब्रह्मपरा इत्यपि बोधितम् ॥ ९ ॥

ततो **दशमे चतुःसूत्रेनुगमाधिकरणे** कौशीतकिब्राह्मणस्थ इन्द्रप्रतर्दनसंवादे 'प्राणोहमस्मि प्रज्ञात्मे'त्यादिनोच्यमानः प्राणो ब्रह्मैव, नासन्यो, नापि जीवः, तस्य ब्रह्मत्वाङ्गीकार एव वाक्योक्तपदार्थसङ्गतेरित्युक्तम् । तदुपपादितं च भाष्ये। ततो द्वितीयसूत्रे यत्रेन्द्रेण प्रतर्दनं प्रति स्वात्मैव प्राणत्वेनोपदिश्यत इति न तस्य ब्रह्मबोधकत्वमिति सूत्रांशेनाशङ्क्य, ततोंशान्तरेण समाधानायास्मिन् प्रकरणे ब्रह्मसम्बन्ध एव भूयानुपलभ्यते, तस्मादत्र प्रतिपाद्यः प्राणः परमात्मेत्येवं प्रतिपादितम् । ततस्तृतीये यदि

ब्रह्मैवात्र प्रतिपाद्यं तदा 'मामेव विजानीही'तिस्वात्मोपदेशस्य का गतिरित्याशङ्कायामयमुपदेशः शास्त्रदृष्ट्या, न तु लोकदृष्ट्या । शास्त्रे च ब्रह्मज्ञाने सति ज्ञातुर्ब्रह्माभेदेन सर्वभाव उच्यते । यथा श्रुत्यन्तरे वामदेवस्य सर्वात्मभाव उच्यते, 'तद्धैतत्पश्यन्नृषिर्वामदेव' इत्यादिना, तद्वदत्रापि ज्ञानेन ब्रह्मात्मभावात्स्वस्योपास्यत्वेनोपदेश इत्युक्तम् । ततश्चतुर्थे नन्वस्मिन्प्रकरणे जीवधर्मा मुख्यप्राणधर्माश्च भूयांस उपदिश्यन्त इति नास्य ब्रह्मप्रकरणत्वमिति सूत्रांशेनाशङ्क्यांशान्तरेण समाधानमाह । यदि जीवप्राणब्रह्मणां धर्मदर्शनात्त्रयाणां मुख्यत्वं स्वीक्रियेत, तथा सत्युपासनात्रयप्रसङ्गाद्वाक्यभेद आपद्येत । स तु दुष्ट इति न युक्तः । तथा सति योऽत्र जीवधर्माणां प्राणधर्माणां चोपदेशः, सोऽत्र जीवस्य ब्रह्माश्रितत्वात्, प्राणस्य तु तद्योगात् । तस्मात्ते सर्वे ब्रह्मधर्मा एवेति प्राणो ब्रह्मैवेति प्रतिपादितम् । इदं चाधिकरणं पूर्वोक्तसर्वनिगमनार्थम् । इदं यथा तथा **भाष्यप्रकाशादवगन्तव्यम्** । **भाष्ये तु चिदचित्संश्लेषनिवारणार्थ**मित्युक्तम् । ब्रह्मवादे केवलस्यैव ब्रह्मणो जगत्कारणत्वेन चिदचिच्छरीरापेक्षाराहित्यादिति । तेन न पुनरुक्तिदोषः । कार्यप्रतिपादनद्वारा वाक्यानां स्वरूपपरत्वं नवस्वप्यधिकरणेषु स्पष्टम् ॥ १० ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां प्रथमाध्यायस्य प्रथमः पादः ॥

एवं **प्रथमपादे** कार्यप्रतिपादकानां वाक्यानां ब्रह्मणि समन्वयो विचारितः । प्रकृतिप्रत्ययभेदेन शब्दसाम्यपरत्वसन्देहे तन्निवारणं च कृतम् । अतःपरं द्वितीयादिष्वर्थसन्देहो निवारणीयः । जीवजडतत्समुदायभेदेनार्थस्य त्रैविध्यात् । तत्र **द्वितीयपादे** जीवपुरःसरेणार्थसन्देहो निवारणीयः । अन्तर्यामिप्रतिपादकानां वाक्यानां ब्रह्मणि समन्वयो वक्तव्यः । तेन पादानामेककार्यत्वं सङ्गतिः ।

तत्र **प्रथमे चतुःसूत्रे सर्वत्रप्रसिद्धोपदेशाधिकरणे** छान्दोग्यस्था शाण्डिल्यविद्या विचार्यते । तत्रास्यां विद्यायां 'मनोमयः प्राणशरीर'इत्यनेन विज्ञानमयस्य जीवस्य मनोमयत्वादिधर्मवैशिष्ट्ये तैरेव च धर्मैः कर्तृत्वनिर्वाहाद्ब्रह्मणो जगत्कर्तृत्वमपि नोपपद्यत इत्याशङ्कायां, जीवस्य ब्रह्मत्वेनोपासनं निवार्य, सर्ववेदान्तप्रसिद्धस्य ब्रह्मण एवोपदेशाद्ब्रह्मैवात्रोच्यत इति **प्रथमसूत्रे** आक्षेपनिवारणादाक्षेपोऽधिकरणसङ्गतिरित्युक्तम् । ततो **द्वितीयसूत्रे**स्यां विद्यायां फलत्वेन विवक्षिता ये गुणास्तेषां प्राप्तिर्भगवत्स्वरूपलाभात् तत्सारूप्यलाभाद्वोपपद्यते, अतोऽपि तथेत्युक्तम् । ततस्**तृतीयसूत्रे** तिरोहितानन्दत्वेन निराकारत्वादपि नात्र जीव उच्यते, किन्तु ब्रह्मैवेत्युक्तम् । ततस्**तुरीये** ब्रह्मात्र ध्येयत्वेन प्राप्यत्वेन च व्यपदिश्यते, जीवस्तु प्राप्तृत्वेन ध्यातृत्वेन च व्यपदिश्यत इत्युक्तम् । तेनाप्यन्तर्यामिभूतं ब्रह्मैवोच्यत इति साधितम् ॥ १ ॥

ततो द्वितीये चतुःसूत्रे शब्दविशेषाधिकरणे वाजिशाखास्थं 'यथा व्रीहिर्वा यवो वे'त्यादिविषयवाक्यमुपन्यस्य, तत्रान्तरात्मन्युक्तो हिरण्मय पुरुषो न जीव, किन्तु ब्रह्मैव, शब्देनोक्ताद्धिरण्मयत्वरूपाद्विशेषादित्युक्तम् । ततो द्वितीये सूत्रे 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती'तिगीतास्मृतेरपि हृद्देशे वर्तमानस्य ब्रह्मत्वमित्युक्तम् । ततस्तृतीयसूत्रे व्यापकस्येश्वरस्याल्पे हृदयस्थाने स्थितेरयुक्तत्वाच्छ्रुतौ व्रीह्यादितुल्यताश्रवणाच्च तस्य ब्रह्मत्वं न युक्तमिति सूत्रांशेनाशङ्क्यांशान्तरेण समाहितम् । हृदये निदिध्यासने कृते ब्रह्म ज्ञातुं शक्यते, तत्रैव साक्षात्कारात् । तस्माद् हृदयस्य स्थानत्वमुच्यते । अन्ये त्वत्र दृष्टान्तमप्याहुर्यथा सर्वलोकपतिरप्ययोध्यापतिरिति । तस्मान्न व्यापकत्वहानि । यत्पुनर्व्रीह्यादितुल्यत्वकथनं तत्तु चतुर्विधभूतान्तरवर्तित्वज्ञापनार्थम् । अतो व्योमवत्सर्वत्र स्थितिर्नोच्यते । तस्मान्न दोष इत्युक्तम् । ततश्चतुर्थसूत्रे तस्य हृदये वर्तमानत्वे जीववत्सुखदुःखभोगोपि सम्भवतीति सूत्रांशेनाशङ्क्यांशान्तरेण समाहितम् । तस्य स भोगो न सम्भवति, तस्य सर्वरूपत्वानन्दरूपत्वादिरूपाणां विशेषाणां विद्यमानत्वादिति । तस्माद्ब्रह्मैवात्रोच्यते । इदं चाधिकरणमन्तर्यामिणो रूपनिश्चायनार्थं हिरण्मयपुरुषरूपेणा-न्तस्तद्धर्माधिकरणविषयवाक्योक्ताकारस्य मासाग्निहोत्रे नित्याग्निहोत्रधर्मवद्वक्तुं शक्यत्वादिति मम प्रतिभाति । सङ्गतिरत्र प्रसङ्गो बोध्य ॥ २ ॥

ततस्तृतीये द्विसूत्रे अत्ता चराचरेत्यधिकरणे 'यस्य ब्रह्म च क्षत्रं च'ेति काठकवाक्योक्त ब्रह्मक्षत्रादृत्त्व न जीवस्य, किन्तु ब्रह्मण एवेति निर्धारितम् । तत्र प्रथमसूत्रे चराचरग्रहणं हेतुः, चरो मृत्युरचरं कस्याप्यचाल्यम्, ब्रह्मक्षत्राणां सम्पद्यमानानां भोगं साधितं, सर्वरूपत्वात्मकं वैशिष्ट्यं च । द्वितीयसूत्रे च प्रकरणं हेतुः । तथा च जीवाशक्यभोगस्य चराचरस्य ग्रहणरूपाल्लिङ्गादस्य वाक्यस्य ब्रह्मप्रकरणपठितत्वाच्चात्रोक्त ब्रह्मैवेति सिध्यति । मोक्षापेक्षिब्रह्मक्षत्रप्राणानामुत्क्रमणाभावेनान्तःप्रकटे भगवत्येव लया-दन्तर्यामित्वमपि सिद्धम् । पूर्वाधिकरणे ब्रह्मणो जीवविलक्षणस्य भोगस्योक्तत्वात्तत्साधना-यात्रोपोद्घातेनानन्दरूपाद्वैशिष्ट्यात्सम्पन्नजीवसाहाय्येन भोगो विचारित, अन्तर्यामिधर्मवि-चारस्यैव प्रकृतत्वादिति ॥ ३ ॥

ततश्चतुर्थे द्विसूत्रे गुहां प्रविष्टावित्यधिकरणे 'ऋतं पिबन्ता'विति काठकवाक्यं विषयत्वेनोपन्यस्यात्र जीवद्वयं नोच्यते, किन्तु जीवब्रह्मणी उच्येते । अत्र जीवब्रह्मणोरेव प्रतिपाद्यत्वदर्शनात् । इतः पूर्वं 'येयं प्रेते विचिकित्से'ति 'अन्यत्र धर्मा'दिति वाक्यद्वयेन तयोरेव पृष्टत्वादिति पूर्वसूत्र उक्तम् । ततो द्वितीयसूत्रे पूर्वप्रकरणोक्तविशेषणत्वादप्यत्र जीवब्रह्मणी एवोच्येते इति साधितम् । पूर्वाधिकरणोक्तब्रह्मक्षत्रभोगेनैवेतिज्ञापनार्थम् । तेनानुप्रसङ्ग सङ्गति ॥ ४ ॥

ततः पञ्चमे पञ्चसूत्रे अन्तर उपपत्तेरित्यधिकरणे छान्दोग्ये उपकोसल-

विद्यास्थं 'य एषोक्षिणि पुरुषो दृश्यत'इतिवाक्यं विषयत्वेनोपन्यस्य अक्षिपुरुषस्य ब्रह्मत्वं निर्धारितम्। तत्र **प्रथमसूत्रे** आर्षदर्शनस्योपपद्यमानत्वान्न तत्र प्रतिबिम्बस्य ब्रह्मत्वेनोपासना विधीयते, किन्तु ब्रह्मैवेत्युक्तम्। ततो **द्वितीयसूत्रे** सर्वलोकस्य भामवामनयनरूपस्थानादिव्यपदेशात्तदेव साधितम्। ततस्**तृतीये**ऽमृतादिपदकथनादपि तत्साधितम्। ततश्**चतुर्थसूत्रे** तदुपासकस्य ब्रह्मविद्गतिकथनादपि तत्साधितम्। ततः **पञ्चमसूत्रे** जीवो निवारितः। एवं चात्र **पञ्चसूत्र्यां** स्थानमाहात्म्यादिरूपं वैशेष्यं बोधितम्। अक्षिस्थितस्य भोगस्तु वाजिनां मण्डलब्राह्मणे प्रसिद्धः। एवमधिकरणत्रयेण भोगदोषासंसर्गहेतुभूतं वैशेष्यमक्षिस्थितस्य पुरुषस्यान्तर्यामित्वं च विचारितम्॥ ५॥

ततः **षष्ठे त्रिसूत्रे अन्तर्याम्यधिकरणे** बृहदारण्यकस्थमन्तर्यामिब्राह्मणं विषयवाक्यत्वेनोपन्यस्तम्। अन्तर्यामी सर्वत्रैकः, अथवाधिदैवादिशब्दभेदाद्भिन्नः, तत्तदभिमानी जीवो वेत्याशङ्क्य **प्रथमसूत्रे** पृथिव्यादीनां तदभिमानिनां च ये धर्मास्तेषां भगवत्प्रयुक्तत्वबोधनादन्तर्यामी सर्वत्र भगवानेवेति निर्णीतम्। आधिदैवादिसञ्ज्ञोपि स एवेति च। *ततो **द्वितीयसूत्रे**ऽन्तर्यामी ब्रह्मवादे न प्रसिद्धः, जीवब्रह्मजडानामेव प्रसिद्धत्वात्।* ततोऽन्तर्यामी साङ्ख्यपरिकल्पितः कश्चिद्भविष्यतीत्याशङ्क्य, नात्र साङ्ख्यमतम्, तद्धर्माणामनभिलापात्, अतोऽन्तर्यामी *भगवानेवेति* ब्रह्मवादसिद्ध इत्युक्तम्। ततस्**तृतीयसूत्रे**ऽन्तर्यामी जीवो न सम्भवति, काण्वशाखायां 'यो विज्ञाने तिष्ठ'न्निति माध्यन्दिनिशाखायां च 'य आत्मनि तिष्ठ'न्नितिवाक्याभ्यां जीवाद्भेदस्य श्रावणादित्युक्तम्। अस्मिन्नधिकरणे स्थितिकर्तृत्वनिर्वाहकतयोपोद्घातेन सर्वनियमनं विचारितम्। गुहांप्रविष्टावित्यधिकरणे प्रतिगुहं भिन्नतया प्रवेशादन्तर्यामिणां भेदे प्राप्ते तदभावाय तस्यैक्यमत्र साधितम्। तेन रूपभेदाद्भिन्नोप्येक एवान्तर्यामी नामेत्युक्तं भवति॥ ६॥

ततः **सप्तमे त्रिसूत्रे अदृश्यत्वाधिकरणे** 'अथ परा यया तदक्षरमधिगम्यत' इति मुण्डकस्थं वाक्यं विषयत्वेनोपन्यस्येयमुपनिषत् साङ्ख्यविद्या ब्रह्मविद्या वेत्याशङ्क्येयं ब्रह्मविद्यैव। यद्यप्यत्राक्षरं पुरुषश्चेत्युभयमुच्यते, पुरुषस्याक्षरात्परत्वं चोच्यते, एवं परापरभावेप्यक्षरं परमात्मैवेति निर्णीतम्। तत्र **प्रथमसूत्रे** अदृश्यत्वादिगुणकोऽक्षरत्वेनोक्तः परमात्मैव, विश्वजनकत्वरूपस्य ब्रह्मधर्मस्य तत्रोक्तेरित्युक्तम्। ततो **द्वितीयसूत्रे** अत्राक्षरपुरुषौ साङ्ख्यविद्यासिद्धप्रकृतिपुरुषावेवेत्याशङ्क्य, तौ नात्र सम्भवतः, अक्षरस्य सर्वज्ञत्वादिना पुरुषत्वेन च विशेषणात्, पुरुषस्य च दिव्यत्वादिना प्राणादिजनकत्वेन च विशेषणात्। न हीदं साङ्ख्ये सिध्यति। किञ्च, अत्र हि समाप्तावादौ मध्ये च ब्रह्मविद्या इति विद्याविशेषणमुक्तम्। तस्मादपि नात्र साङ्ख्यसिद्धौ प्रकृतिपुरुषावित्युक्तम्। ततस्**तृतीयसूत्रे** 'अग्निर्मूर्धे'त्यादिना यद्रूपमुक्तं तद्विश्वकायस्य ब्रह्मण एव सङ्गच्छते, न तु साङ्ख्यसिद्धस्येत्युक्तम्। तेन सृष्टिपूर्वदशायामप्यक्षरनियामकत्वाद्भगवतोऽन्तर्यामित्वं नित्यमित्युपोद्घातेन बोधितम्॥ ७॥

ततोऽष्टमे **नवसूत्रे वैश्वानराधिकरणे** पूर्वाधिकरणोक्तं रूपं साङ्ख्यसिद्धस्य कार्येश्वरस्य कुतो न ? अक्षरपरमपुरुषयोर्भेदाभेदौ च कथमित्याकाङ्क्षायां, छान्दोग्यस्थां वैश्वानरविद्यां विषयवाक्यत्वेनोपन्यस्य, रूपस्य नित्यत्वं विरुद्धधर्माश्रयत्वं च तत्रोपोद्घातेन विचारितम् । तत्र **प्रथमसूत्रे** वैश्वानरशब्दवाच्यो हिरण्यगर्भादिः परमात्मा वेति संशये, हिरण्यगर्भादिबोधकसाधारणशब्दाद्यो विशेषः प्रादेशमात्रत्वेनाभितो विगतमानस्वरूपः, तस्मादित्युक्तम् । ततो **द्वितीयसूत्रे** 'केचित्स्वदेहान्तर्हृदयावकाश'इत्यादिस्मृत्युक्तस्यानुमापकत्वम् । अतः प्रादेशमात्रो द्युमूर्धत्वादिविशिष्टः परमात्मैवेत्युक्तम् । ततस्तृतीयसूत्रे ननु प्रादेशमात्रस्मृत्या वैश्वानरपदस्य भगवत्परत्वं निर्णेतुं न शक्यम्, 'अहं वैश्वानरो भूत्वे'ति जाठराग्निपरत्वस्यापि स्मरणात्, समानप्रकरण 'एष वा अग्निर्वैश्वानर' इत्यग्निसमभिव्याहारेण श्रावणाद् भगवद्विभूतित्वाच्च । अत्राप्यग्नेः 'हृदयं गार्हपत्य' इत्यादिना त्रेताग्निकल्पनश्रावणात् पुरुषेऽन्तःप्रतिष्ठितत्वश्रावणाच्च न भगवत्परत्वं शक्यवचनमिति सूत्रांशेनाशङ्क्य, नात्र भगवत्परत्वं निषेद्धुं शक्यम्, भगवतो भोक्तृत्वं वक्तुं श्रुतावग्निरूपोपदेशाज्जाठरे द्युमूर्धत्वादिधर्माणामसम्भवाच्च । नच तदुपासनार्थमिति शक्यम्, वाजसनेयिभिः पुरुषत्वस्य श्रावणादित्येवमंशान्तरेण समाहितम् । तस्माद्वैश्वानरः परमात्मैव । ततश्चतुर्थे उक्तहेतुभ्य एव जाठरोऽग्निर्देवतारूपोऽग्निश्च न सम्भवतीत्युक्तम् । एवं **चतुर्भिः** सूत्रैर्वैश्वानरस्य ब्रह्मत्वं निर्णीतम् । ततोऽग्रिमैः **पञ्चभिः** सूत्रैस्तस्य परिमाणं विचार्यते, ब्रह्मित्वादिनिवृत्त्यर्थम् । तत्र **पञ्चमे** जैमिनिमतेन परिमाणविरोधपरिहारमाह, व्यापकस्य प्रादेशमात्रत्वं कल्पनां विना साक्षादपि सम्भवति, यथाकाशस्य । तथा च 'प्रादेशमात्रमभिविमान'मित्यत्र शाब्दक्रमादर्थक्रमो बलिष्ठ इति जैमिनेराशयो बोधितः । ततः **षष्ठे** निराकारमेव ब्रह्म मायाजवनिकाच्छन्नं विष्ण्वादिदेवताधिष्ठितेन पुरुषाकारेणाभिव्यक्तः पुरुषविधोऽन्तर्यामी, न तु स्वाभाविकस्तस्याकार इत्याश्मरथ्यस्य मतमुक्तम् । ततः **सप्तमे**ऽनुस्मृतिवशात्पुरुषाकारो 'यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाये'तिस्मृतेः साधकानुग्रहार्थमिति बादरिमतमुक्तम् । ततोऽष्टमे पूर्वोक्तं नियतपरिमाणवादबोधकं जैमिनिमतं तदेकदेशिनो, न तस्येतिबोधनार्थं पुनर्जैमिनिमतमाह । श्रुतौ 'प्रादेशमात्रमिह वै देवा' इत्यारभ्य 'अभिसम्पादयिष्यामी'तिकथनात्सम्पत्तिनिमित्तं प्रादेशमात्रत्वम्, न तु वास्तवमिति तदाशय उक्तः । ततो **नवमे** 'आमनन्ति चैनमस्मि'न्निति सूत्र 'एनं वैश्वानरमस्मिन्मूर्धचिबुकान्तराले जाबालाः समामनन्ति 'एषोऽभ्यक्त' इत्यादिना । तस्मात्प्रादेशमात्र एव व्यापकः, अतो वस्तुभावादेव विरुद्धधर्माश्रय इति वैश्वानरो भगवानेवेति स्वसिद्धान्त उक्तः । एवमस्मिन्पादे स्थितिरूपकार्यनिर्वाहार्थमन्तर्यामिप्रतिपादकानि वाक्यानि विचारितानि ॥ ८ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां प्रथमाध्यायस्य द्वितीयः पादः ॥

अतःपरं मोक्षदातृत्वार्थमुपास्यरूपप्रतिपादकानि वाक्यान्यस्मिन्पादे विचार्यन्ते, साधनाध्याये गुणोपसंहारपादे तत्तन्मार्गभेदेनोपासनाया एव साधनत्वेन वक्ष्यमाणत्वात् ।

तत्र **प्रथमे सप्तसूत्रे द्युभ्वाधिकरणे** 'यस्मिन् द्यौः पृथिवी'तिमुण्डकवाक्यं विषयत्वेनोपन्यस्य, तत्र किं साङ्ख्यसिद्धं प्रधानमुच्यते, ब्रह्म वेति संशये, प्रधानं निरस्य ब्रह्मैवेति साध्यते । तत्र **प्रथमसूत्रे** स्वशब्दो हेतुत्वेन, स च श्रुतिस्थ'स्वात्मान'मित्यात्मशब्दस्य वाचकः । तथा च द्युभ्वादीनां भारत्वं तदा स्याद्यदि तेषां सूत्रे मणिगणवत् प्रोतत्वं स्यात्, न तु तथा, तेषां कार्यतयैतदात्मकत्वेनैतस्य स्वरूपान्तःपातित्वात् । न च सेतुत्वेन साधनत्वबोधनात्फलरूपत्वाभावे सति न ब्रह्मत्वमिति शङ्क्यम् । 'अमृतस्य सेतु'रित्यत्र षष्ठ्याऽभेदबोधकत्वेन फलरूपत्वानपायात् । तस्माद् द्युभ्वाद्यायतनं ब्रह्मैव । ब्रह्मणो व्यापकत्वव्युत्पादनं तु पूर्वमन्त्रे 'लक्ष्यं सर्वगतं चैवे'त्यनेन ब्रह्मणः सर्वगतत्वकथनात् तद्बोधनार्थमित्युक्तम् । ततो **द्वितीयसूत्रे** ननु भवतु ब्रह्मत्वं तथापि तज्ज्ञानेन सर्वविज्ञानस्योपक्रान्तत्वादन्यवाग्विमोकः कथं सङ्गत इत्याशङ्क्य, ब्रह्मणि मुक्तोपसृप्यत्वं वक्तुं शररूपस्य जीवस्य पूर्वमन्त्रे ब्रह्मणि योजनस्योक्तत्वात् तस्य निरध्यस्तस्वरूपं मुक्तत्वमन्यवाग्विमोकेन बोध्यत इति तदपि सङ्गच्छत इत्युक्तम् । ततस्**तृतीयसूत्रे** एतत्प्रकरणे जडधर्मबाहुल्यस्य जडदृष्टान्तस्य चोक्तत्वादत्र प्रधानमेवाङ्गीकार्यमित्याशङ्क्य, तद्बोधकानां निःसन्दिग्धानां धर्माणामदर्शनाद्ब्रह्मबोधकानामात्मसर्वज्ञानन्दरूपादिशब्दानां निःसन्दिग्धानां दर्शनान्न प्रधानमङ्गीकर्तुं शक्यम्, किन्तु परमात्मैवेत्युक्तम् । ततश्च**तुर्थसूत्रे** तर्हि जडजीवविशिष्टः साङ्ख्यवादोऽत्रास्त्वित्याशङ्क्य, तद्वाचकनिःसन्दिग्धशब्दाभावात् न जीवो, नापि प्रधानम्, किन्तु सर्वज्ञत्वादीनां ब्रह्मधर्माणां निःसन्दिग्धानां दर्शनाद्ब्रह्मैव । ततः **पञ्चमसूत्रे** 'तमेवैकं जानथात्मान'मिति ब्रह्मणि ज्ञानकर्मत्वस्य जीवे ज्ञानकर्तृत्वस्य बोधनेन भेदव्यपदेशात् न जीवपरत्वं तस्येत्युक्तम् । ततः **षष्ठे सूत्रे** अस्य वाक्यस्य ब्रह्मप्रकरणपठितत्वादपि न जीवपरत्वमित्युक्तम् । ततः **सप्तमे सूत्रे** 'द्वा सुपर्णा'वितिश्रुतौ परमात्मनः शरीरे स्थितिमात्रं प्रकाशकत्वं च श्राव्यते, जीवस्य तु कर्मफलभोगोपीति स्थित्यदनाभ्यां ब्रह्मजीवौ पृथगेव निर्णीयेते । तस्मादपीदं ब्रह्मवाक्यमेव, न तु प्रधानजीवसन्देहात् साङ्ख्यपरमिति निर्णीतम् । तेन पूर्वपादोक्तमन्तर्यामिरूपमपि व्यापकत्वसर्वात्मकत्वादिगुणविशिष्टमेवोपासनीयमिति साधितम् । अत्र शरधनुर्यायश्रावणात्पृथगुपासनं ज्ञानमार्गीयाणामपि कर्तव्यत्वेन बोधितम् ॥ १ ॥

ततो **द्वितीये द्विसूत्रे भूमाधिकरणे** 'यो वै भूमा तत्सुख'मिति छान्दोग्यस्थसनत्कुमारनारदसंवादगतं वाक्यं विषयत्वेनोपन्यस्य, तत्र बाहुल्यं सुषुप्तिश्च नोच्यते, किन्तु ब्रह्मैवेति साधितम् । तत्र **प्रथमसूत्रे** सुषुप्तेः सकाशादाधिक्यस्य 'स एवाधस्तादि'त्यादिना बोधनात् मुख्यवृत्त्यात्मशब्दपरिग्रहसम्भवाद् ब्रह्मणः सर्वशब्दवाचकत्वेन भाववाचक-

शब्दानामपि ब्रह्मपरत्वसम्भवाच्च भूमा भगवानेवेत्युक्तम् । ततो **द्वितीयसूत्रे** 'नान्यत्पश्यती'त्यादिनोक्ता अन्यादर्शनादयो धर्मा अध्याविर्भूते परस्मिन् भगवति तद्दर्शनेन तदैक्यात्तदविभागाद्वा तदेकतानतायां सम्भवन्तीति भूमा ब्रह्मैवेति साधितम् । तेन नित्यनिरवध्यानन्दरूप एवान्तर्याम्युपास्य इति पृथगपि भक्तिमार्गीयैरुपास्य इति बुद्धिस्थ प्रसङ्गाद्बोधितम् ॥ २ ॥

ततस्तृतीये **त्रिसूत्रे अक्षराधिकरणे** बृहदारण्यकस्थ'मेतद्वै तदक्षरं गार्गी'तिवाक्य विषयत्वेनोपन्यस्य, **सूत्रद्वयेनाज्ञया** पृथिव्याद्यम्बरान्तधारकत्वेनाक्षरस्य ब्रह्मत्व साधितम् । ततस्तृतीये **सूत्रे** तस्य प्रशासनस्य जीवधर्मत्वव्यावृत्त्याक्षरज्ञानफलबोधनेन च ब्रह्मत्वम् । अत्र च पूर्वपादेऽदृश्यत्वाधिकरणेन विचारितस्याक्षरस्य निरुद्धधर्मत्वबोधनमिति बुद्धिस्थोपोद्घातः सङ्गतिः । अक्षरोपासन च ज्ञानमार्गीयाणां केषाञ्चिन्मुख्यम्, 'ये त्वक्षरमनिर्देश्य'मित्यादिगीतावाक्यात् । भक्तिमार्गीयाणां त्वक्षरज्ञानमङ्गत्वेन प्रविशतीत्यग्रे 'अक्षरधिया'मित्यत्र वाच्यम् । तेनेद मार्गद्वयोपयोगीति तदुभयोरन्तर प्रसङ्गत उक्तम् । तेनात्र क्रमनियामिका प्रसङ्गः सङ्गतिः ॥ ३ ॥

ततश्चतुर्थ **एकसूत्र ईक्षतिकर्माधिकरणे** प्रश्नोपनिषत्पञ्चमप्रश्नस्थ 'मेतद्वै सत्यकाम पर चापर च ब्रह्म यदोङ्कार'इतिवाक्य विषयत्वेनोपन्यस्य, अत्र ध्येयः परमात्मैव, न तु विराड्, ब्रह्मा वा । 'परात्परं पुरिशय पुरुषमीक्षत' इतिवाक्यशेषे ईक्षतिकर्मत्वेन जीवघनादक्षरात्परस्यैवोक्तत्वात् । अत्र ध्यानविषयस्येक्षतिकर्मत्वप्रतिपादनेनोपासनानां फल साक्षात्कार इत्यप्यनेन साधितम् । तेन प्रसङ्गः सङ्गतिरिति बोधितम् ॥ ४ ॥

ततः **पञ्चमे अष्टसूत्रे दहराधिकरणे** 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्मे'त्यादि छान्दोग्यस्थ वाक्य विषयत्वेनोपन्यस्य, तत्र दहरशब्दवाच्य आकाशः परमात्मैव, न जीव इति निर्णीयते । तत्र **प्रथमसूत्रे** उक्तछान्दोग्यवाक्ये वक्ष्यमाणेभ्यो हेतुभ्यो दहरः परमात्मैवेत्युक्तम् । ततो **द्वितीयसूत्रे** 'यथा सुवर्णनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तोपि न विदु एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एत ब्रह्मलोक न विन्दन्ती'त्यनेनोक्त प्रजाशब्दवाच्याना जीवानां यद् ब्रह्मलोके गमन सा गतिः 'एष आत्मापहतपाप्मा सत्यसङ्कल्प'इत्यत्रापहतपाप्मत्वादिविशिष्ट आत्मशब्दः पूर्वोक्तो ब्रह्मलोकशब्दश्च ताभ्यां हेतुभ्या दहरः परमात्मैव । न च जीवपरमात्मनोस्ततो भेदाभावात्स्वप्नदशायामज्ञानकल्पितानामेव ब्रह्मलोकगमनमात्मशब्दश्च जीवसाधारण इति न ताभ्या परमात्मसिद्धिरिति शङ्क्यम् । यत्र हि प्रजानां ब्रह्मलोके गच्छन्तीनां 'अनृतेन प्रत्यूढा' इति विशेषण दृश्यते । तदर्थस्तु अनृतेन विहितत्वम् । 'अनृतापिधाना' इतिश्रुत्यन्तरे तथादर्शनात् । तच्च सुषुप्तौ 'सुखमहमस्वाप्सम्, न किञ्चिदवेदिष'मित्यनुभवस्तासां प्रजानामज्ञत्व साधयति, न त्वज्ञानकल्पितत्वम्, अज्ञानकल्पितत्वे सति ब्रह्मलोकगतिर्न

सङ्गच्छते, तथापहतपाप्मत्वादिविशेषणादात्मशब्दश्च न सङ्गच्छते, अतो गतिशब्दयोर्ब्रह्मपरत्वाद्दहरः परमात्मैव। किञ्च, अत्र 'तद्य इहात्मानमननुविद्य व्रजन्ती'त्यात्माज्ञानं लोकक्षयहेतुत्वेनोच्यते। यद्यात्मा ब्रह्माभिन्नः स्यात्तदापहतपाप्मादिगुणकत्वात्स्वस्य स्वाज्ञानं न स्यात्। अत इदमज्ञानं जीवस्य ब्रह्मभिन्नत्वं बोधयद् गतेर्ब्रह्मविषयत्वे लिङ्गम्। एवमपहतपाप्मत्वादिविशेषणान्यप्यात्मशब्दस्य ब्रह्मपरत्वे लिङ्गमिति प्रागेवोक्तम्। अतो दहरः परमात्मैवेति साधितम्। ततः **तृतीयसूत्रे** 'य आत्मा सेतुर्विधृति'रितिश्रुतेः सर्वलोकविधारकत्वात्स्वयं साधनीभूय संसारपारप्रापकत्वात् एकस्यैवाकाशवाताग्निपृथिव्यादेरन्तर्बहिःस्थापनेन तस्य सर्वलोकधारणस्य महिमरूपत्वात् तस्य महिम्नो विरुद्धधर्माश्रयत्वरूपतया श्रीयशोदादिभिरन्तर्बहिरुपलब्धश्च दहरः परमात्मैवेत्युक्तम्। ततश्चतुर्थे आकाशशब्दवाच्यत्वप्रसिद्धेरपहतपाप्मत्वादिप्रसिद्धेः प्रकरणोक्तसर्वधर्मप्रसिद्धेश्च दहरः परमात्मैवेत्युक्तम्। एवं **चतुःसूत्र्या** विधिमुखेन दहरस्य परमात्मत्वं विचारितम्।

अतः परमग्रिमचतुःसूत्र्येतरनिषेधमुखेन तस्यैव परमात्मत्वं पुनः साधयति। ततः **पञ्चमे** अस्मिन् प्रकरण आदिमध्यावसानेषु सम्प्रसादादिशब्दैर्जीवस्य परामर्शाज्जीव एव दहर इति सूत्रांशेनाशङ्क्य, जीवे जगदाधारत्वादेरसम्भवात् स न दहर इत्युक्तम्। ततः **षष्ठ** एतदनन्तरमुक्त इन्द्रप्रजापतिप्रकरणे जीवस्यैवामृताभयत्वादिरूपेणोक्ततयात्रापि स एव परामृश्यतामिति सूत्रांशेनाशङ्क्य, तत्र प्रजापतिरुपदेशसमय आविर्भूतब्रह्मरूपो जातः, यथा नृसिंहोपासको नृसिंहाविष्टो भवति, अतस्तथाभूतत्वात्सर्वत्रात्मानं पश्यन्नुपदिष्टवान्, अतो न तत्र जीवः प्रकरणार्थः। अतस्तदनुरोधेनात्र जीवस्य ब्रह्माभिन्नत्वं न वक्तुं शक्यम्। तस्माद्दहरः परमात्मैव। ततः **सप्तमे** तर्हि तत्र जीवपरामर्शस्य किं प्रयोजनमित्याकाङ्क्षायां पूर्वप्रकरणे सत्यनामकस्य ब्रह्मणो ज्ञानेन ब्रह्मसुखरूपं फलमुक्तम्। तदपेक्षायां तादृशं ब्रह्मज्ञानमावश्यकम्। तत्र सच्छब्देनामृतस्य जीवस्य, तिशब्देन मर्त्यस्य जडस्य, यशब्देनोभयनियामकस्य ब्रह्मण उक्तत्वात्। नियम्यद्वयज्ञानाभावे नियामकस्य ब्रह्मणो ज्ञानासम्भवात्। तदर्थं शब्दोक्तस्य नियम्यस्य जीवस्य स्वरूपज्ञानाय जीवपरामर्शः, न तु प्रकरणित्वेनेत्युक्तम्। ततोऽष्टमे भवत्वेवं तथाप्यल्पे हृदयपुण्डरीके आकाशरूपस्य ज्यायसो ब्रह्मणः स्थितिर्न सम्भवतीत्यतो जीव एवोच्यतामित्याशङ्कायां 'निचाय्यत्वादेवं व्योमवच्चे'त्यत्र विरुद्धधर्माश्रयत्वेन ब्रह्मणः स्थितिर्वक्तुं शक्येत्युक्तम्। तादृशत्वस्यात्राप्यनुसन्धेयत्वात्तेन तत्समाधिसिद्धिरिति दहरः परमात्मैव। अत्र बुद्धिस्थस्य विचारादुपोद्घातगर्भः प्रसङ्गः सङ्गतिः। किञ्च, परामर्शसूत्रे जीवस्य सर्वावस्थासु ब्रह्मनियम्यत्वस्यैव सिद्धत्वात्, अतो जीवस्य परममुक्तिदशायामपि ब्रह्मनियम्यत्वमेव सिध्यति। वेदस्तुतावपि 'अजनि च यन्मयं तदविमुच्य नियन्तृ भवे'दित्यत्र तथैव सिद्धत्वाच्च ॥ ५ ॥

ततः षष्ठे द्विसूत्रे अनुकृत्यधिकरणे 'न तत्र सूर्यो भाती'ति कठवल्लीस्थं वाक्यं विषयत्वेनोदाहृत्य, लोकप्रकाशकानां सूर्यादीनां दहरान्तःस्थत्वकथनात् कठवल्लीस्थमुक्तवाक्य तद्विरुद्धमित्याशङ्क्य, तेषां स्वतो न प्रकाशकत्वम्, किन्तु भगवदनुकारित्वाद्भगवत्प्रकाशेनैव प्रकाशकत्व सर्वत्र सर्वदेतिप्रसङ्गान्निर्णीतम् । तेन जीवस्य मुक्तिदशायां तदनुकारित्वरूपमेव साम्यम्, न तु परममित्यपि बोधितम् । अन्यथैतद्विचारस्यान निष्प्रयोजनत्वापत्तेरिति ॥ ६ ॥

ततः सप्तमे द्विसूत्रे शब्दादेव प्रमित इत्यधिकरणे कठवल्लीस्थमङ्गुष्ठमात्रवाक्य विषयत्वेनोदाहृत्याङ्गुष्ठमात्रस्य भूतभव्येशानत्व शब्दादेव प्रमीयते इति प्रथमसूत्रे निर्णीतम् । द्वितीये च तस्य तत्र स्थितिर्मनुष्याणामधिकारार्थेति निर्णीतम् । अत्रापि प्रसङ्ग एव सङ्गतिः । इद च जीवस्य मुक्तिदशाया ब्रह्माविर्भावेन विरुद्धधर्माश्रयत्वे फलिष्यति ॥ ७ ॥

ततोऽष्टमेऽष्टसूत्रे तदुपर्यपीत्यधिकरणे प्रसङ्गाद्देवादीनां ब्रह्मविद्यायामधिकारो विचारित. । तत्र प्रथमे सूत्रे मनुष्येषु त्रैवर्णिकानामुपनयनादिसंस्कारवतां कर्माधिकाराद् ब्रह्मविद्यायामप्यधिकार इति पूर्वतन्त्रादेव सिध्यति । ततो मनुष्याद्धीनजातीयानां तु योग्यताऽभावादेव नाधिकारः । अत. परं मनुष्यादुत्कृष्टानां ब्रह्मविद्यायामधिकारः सम्भवादुक्त. । यद्यपि देवादीनामुपनयनादिक न प्रसिद्धम्, तथापि यज्ञोपवीतमन्त्रे 'प्रजापतेर्यत्सहज पुरस्तादि'तिश्रावणात्तन्न्यायेनान्यत्रापि जन्मानुग्रहविशेषतप.प्रभृतिभिर्मतङ्गविश्वामित्रादीनामिवाधिकार. सम्भवति । तस्मादप्यधिकार इत्युक्तम । ततो द्वितीयसूत्रे पूर्वसूत्रोक्तस्य देवादीनामधिकारस्य विप्रतिपन्नतया तद्बलेन तेषु ब्राह्मण्यादेर्वक्तुमशक्यत्वात्, तेषा स्वर्गस्थत्वेन पृथिवीरूपदेशस्य, व्रीह्यादिरूपद्रव्यस्य तत्र सूर्यगत्यभावेन दर्शादिरूपकालस्य च, तदतिरिक्तदेवाभावेनोद्देश्यदेवतान्तरस्यापि वक्तुमशक्यतया तदभावेपि कर्मकरणे श्रुतिविरोध इति सूत्रांशेनाशङ्क्य, अंशान्तरेण प्रजापतिन्यायाद् वर्णसत्ताया. साधितप्रायत्वात्, 'इन्द्रो द्वात्रिंशद्वर्षाणि प्रजापतौ ब्रह्मचर्यमुवासे'तिश्रावणादाश्रमसत्ताया., 'साध्या वै देवा. सुवर्गकामा एतऽ षड्रात्रमपश्यन् तमाहरन् तेनायजन्ते'तियज्ञकरणश्रावणाद्, 'देवा वै सत्रमासते'त्यादौ भूमावागत्य ऋषीन् वृत्वा यज्ञकरणश्रावणाच्चानेकधोपयोगो देवाना वेदे दृश्यते । भगवदवयवरूपा ये देवास्ते तेषामुद्देश्या अपि भवन्ति । 'उभौ वै देवानाऽ शमितारौ अध्रुगुश्चापापश्चे'त्यादौ ऋत्विजोपि श्राव्यन्ते । तस्मान्न श्रुतिविरोध इत्युक्तम् । ततस्तृतीये ननु वेदात् कर्म ज्ञात्वा पश्चात् कर्तव्य देवैः, तत्र देवानां कर्मकरण वदन् वेदो देवानामधिकार वदेत् । देवाश्च जन्या इति वेदार्थज्ञानसमये तेषामभावाद्, ज्ञप्तौ चात्माश्रय इति कर्मकर्तॄणा ज्ञातृत्वेन वक्तुमशक्यत्वात् कर्मकर्तृविरोधः । वेदश्च तेषा वृत्तान्त वदन् स्वय कथ नित्यो भवेत् । अतो वेदानित्यत्वापादक-

त्वादयं देवाधिकारपक्षो न सङ्गत इति सूत्रांशेनाशङ्क्य, अंशान्तरेण समाधिमाह, शब्दोक्ताः पदार्थाः सर्वे एवाधिदैविका भगवदवयवरूपाः, शब्द एव विद्यन्ते, नित्यास्तैः सह पदानां सम्बन्धोपि नित्य इति न वेदस्यानित्यत्वम्। इदमेव **चतुर्थेन सूत्रेण** वक्तव्यम्। न च वैदिकपदार्थानामतिरिक्तत्वाङ्गीकारे प्रत्यक्षविरोधः शङ्क्यः। इदानीमपि यजमानर्त्विक्प्रभृतीनां वेदादेव सपरिकरकर्मावगतेर्वृद्धव्यवहारादिना दर्शनेन वैदिकपदार्थान्तरेष्वपि तेनैवावगतिसम्भवात्। अतो यैर्भगवान् दृष्टस्तेषां तु तत्रैव सर्वपदार्थदर्शनात्तेष्वेव सङ्केतग्रहः, ततोर्वाचीनानामिदानीन्तनपर्यन्तानां तूपमानात्तेषु सङ्केतग्रहः, भगवतः सर्वानुकारित्वात्। किञ्च, यथा 'जमदग्नीनां पञ्चावत्त'मित्यत्र स्वस्मिन् जामदग्न्य इति प्रत्यक्षज्ञानाभावेपि परोक्षानुभवो भवति, तथा वैदिकप्रपञ्चस्यापि परोक्षानुभवो भवत्येवेति वैदिकप्रपञ्चोतिरिक्त एव। तस्मान्न ज्ञाने कर्मकर्तृविरोध इति सूत्रद्वयेनोक्तम्। ततः **पञ्चमे** ननु भवत्वेवं वैदिकसृष्टिरतिरिक्ता, तथापि 'यतो वा इमानि भूतानि जायन्ते'इत्यादिषु सृष्ट्यादिरुच्यते इति तदनुरोधेनानित्यापि सृष्टिर्वेदे उच्यते इत्यङ्गीकार्यम्। तथा ये देवाः कर्म कुर्वन्ति तेप्यनित्या इति च। एवं सति वेदस्य तद्वाचकत्वे शब्दार्थयोर्नित्यसम्बन्धविरोधः, अतस्तदभावार्थमाकृतावेव सम्बन्धो वक्तव्यः। तथासति किं जैमिनिमतदूषणेनेत्याशङ्क्य, लोकदृष्टिमङ्गीकृत्य तद्रीत्यापि समाधानमाह। यद्यपि सर्वस्य भगवद्रूपत्वादुत्पत्तिप्रलययोः सञ्चरप्रतिसञ्चररूपत्वेन वस्तुनित्यत्वाबाधकतया दर्शनादर्शनयोरेव नित्यानित्यत्वपर्यवसानम्, न तु वस्तुनीति न काचिदाशङ्का। तथापि लोकदृष्ट्या प्रपञ्चस्य देवादीनां चानित्यत्वाङ्गीकारे तत्तत्प्रवाहे एव शब्दसम्बन्धः। लोकेपि शरीरगङ्गाप्रभृतिषु प्रवाहे एव शब्दसम्बन्धदर्शनात्। अतो देवादीनां तत्कर्मणां चानित्यत्वेपि तत्प्रवाहस्य नित्यत्वात् तद्बोधके वेदेपि नानित्यत्वं शङ्कितुं शक्यते इति। ततः **षष्ठसूत्रे** ननु यद्यपि श्रुतिविरोधपरिहारेण कर्मण्युपासने च देवानामधिकारः प्रतिपादितस्तथापि छान्दोग्ये 'असौ वा आदित्यो देवमध्वि'त्यादिनोक्तायां मधुविद्यायां स न सङ्गच्छते। तत्र मधुत्वेनोपवर्ण्यमानस्यादित्यस्य विद्याविषयत्वात् स कमन्यमादित्यमुपासीत। एवं संवर्गविद्यादिषु वाय्वादीनां विषयत्वात्तेषामप्यनधिकारो बोध्य इत्याद्युक्तम्। ततः **सप्तमे** 'अग्निः पुच्छस्य प्रथमं काण्ड'मित्यादिश्रुतिष्वग्न्यादीनां देवानां ज्योतिर्गणे विद्यमानत्वकथनात्तेषां च तत्र महाभोगकथनात्प्राप्तफलत्वेनोपासनायामधिकारो न सङ्गत इत्येवं जैमिनिमतेनाशङ्कितम्। **ततोऽष्टमे** तत्परिहारमाह, वेदे हि प्रजापत्यादीनां कर्माधिकारो निरूप्यते, 'प्रजापतिरकामयत प्रजायेयेति', 'स एतमग्निहोत्रमिथुनमपश्यत्, तदुदिते सूर्येऽजुहोदि'त्यादिषु। तथा ज्ञानेपि श्रूयते, 'तद्यो यो देवानां प्रत्यबुध्यत स एव तत्तदभव'दित्यादिषु। अत्र च भूतार्थवादः, तेन स्वार्थे प्रमाणं न स्यात् तदा तादृशाग्निहोत्रहोमेन तादृशज्ञानेनान्यस्यापि फलं न

---

१ आदित्यानामिति पाठः। २ विषयतया देवानामधिकार इति पाठः।

स्यात् । अतः कर्मणि ज्ञाने चाधिकारोऽयमवश्यमभ्युपेयः । ये पुनरुपास्यत्वेन तत्रोक्तास्ते भगवदंशा एव । 'न ह वै देवा अश्नन्ति न पिबन्ती'त्यनशनतादिरूपालिंगात् । इदं च पूर्वमेव साधितम्, तथापि जैमिनिमतनिराकरणाय पुनरुक्तम् । एवमष्टभिः सूत्रैर्देवानामधिकारो वेदनित्यत्वं च प्रसङ्गान्निर्णीतम् ॥ ८ ॥

ततो **नवमे पञ्चसूत्रे शुगस्येत्यधिकरणे** शूद्राणां ब्रह्मविद्यायामधिकारोऽनुप्रसङ्गान्निराकृतः । तत्र **प्रथमसूत्रे** छान्दोग्यस्था संवर्गविद्या विषयत्वेनोपन्यस्ता । तत्र च जानश्रुतिं 'हा शूद्रे'त्येवं सम्बोध्य पश्चात् संवर्गविद्योपदिष्टा । तस्माज्जातिशूद्रस्याप्यधिकार इत्याशङ्कायाम्, नात्र शूद्रशब्दो जातिवाची, किन्तु शुचा आद्रवतीति शूद्र इति यौगिकः । अतो योगेन जानश्रुतेर्मत्सरित्वं बोधयति । तेन पूर्वं धिकारः, पश्चाच्चोपसरणेन मत्सरत्यागे विद्योपदेश इति नात्र जातिशूद्रस्याप्यधिकार इत्युक्तम् । ततो **द्वितीयसूत्रे** जानश्रुतिजातेः श्रुतावनुक्तत्वात् योगापेक्षया च रूढेः प्रबलत्वादत्र शूद्रशब्दो रूढ एव सन् जानश्रुतिजातिं बोधयतीति जातिशूद्रस्याप्यधिकारोऽस्त्वित्याशङ्कायां जानश्रुतेः क्षत्रियत्वमुत्तरत्र प्रकरणान्तरे काक्षसेनिपदादवगम्यते । कक्षा स्पर्धास्थानं सेना रथा यस्येति कक्षसेनस्तस्यापत्यं काक्षसेनिरिति क्षत्रियलिङ्गात् । यद्यपि तत् प्रकरणान्तरम्, तथापि छन्दोगानां द्विरात्रे 'एतेन वै चैत्ररथं कापेया अयाजय'न्निति श्रवणात् 'समानान्वयानां समानान्वया एव याजका भवन्ती'ति कापेयसम्बन्धेन काक्षसेनेः क्षत्रियत्वमवगतम् । अतो लिङ्गबलादस्य क्षत्रियत्वावगतेः जानश्रुतेः जातिर्निर्धार्यते । तस्माज्जातिशूद्रस्य नाधिकारः । यत्र परम्परितब्रह्मविद्यायामपि नाधिकारस्तत्र साक्षाद्ब्रह्मविद्यायां तु शङ्कितुमपि न शक्यते इत्युक्तम् । ततस्तृतीये श्रौतेषु साधनेषु सर्वत्रोपनयनसंस्कारपरामर्शाच्छूद्रे च तदभावान्नाधिकार इत्युक्तम् । ततश्चतुर्थे 'सत्यकामो ह जाबाल' इत्यत्र जाबाले शूद्रत्वाभावनिर्धारण एव गौतमेन तस्मिन् शिष्यभावः प्रवर्तितः । तस्मादपि जातिशूद्रस्य नाधिकार इत्युक्तम् । ततः पञ्चमे शूद्रस्य वेदे श्रवणाध्ययनार्थज्ञानानां निषेधश्रावणात् स्मृतिष्वपि वेदाक्षरविचारेण शूद्रस्य पातकथनाच्च नाधिकार इत्युक्तम् । एवमिदं प्रासङ्गिकमधिकरणद्वयम् ॥ ९ ॥

ततो **दशमे एकसूत्रे कम्पनाधिकरणे** कठवल्लीस्थं 'यदिदं किञ्च जगत् सर्व'मितिवाक्यं विषयत्वेनोदाहृत्य, किमत्रेन्द्रः प्राणो ब्रह्म वा निरूप्यते इति सन्देहे, प्राणेन्द्रौ निवार्य, सर्वजगत्कम्पनाद्धेतोर्ब्रह्मैवात्रोच्यते इति निर्धारितम् । तेनावतारदशायामपि भगवतो दण्डपाणित्वबोधनाय तत्र जीवानां सन्नतये च भगवत इदं कार्यं प्रसङ्गेनावसरेण वा विचारितम् ॥ १० ॥

तत **एकादशे एकसूत्रे ज्योतिर्दर्शनाधिकरणे** दहरविद्यास्थं 'परं ज्योतिरुपसम्पद्ये'तिवाक्यं विषयत्वेनोपन्यस्य, ज्योतिःशब्देन महाभूतरूपं ज्योतिरुच्यते, उत ब्रह्म वेति सन्देहे, महाभूतरूपं ज्योतिर्निवार्य, सम्पत्तिरूपाद्दर्शनाद्ब्रह्मैवात्र निरूप्यते इति प्रस-

ज्ञाद्विचारितम् । तत्प्रयोजनं तूपसम्पत्तव्यत्वोपसम्पन्नस्वरूपाभिनिष्पादकत्वपूर्ववाक्यगतहृदयत्वोत्तरवाक्यगतसत्यपदोक्तमर्त्यामृतनियामकत्वरूपाणां चतुर्णां धर्माणां निष्कर्षार्थत्वान्न ज्योतिश्चरणाधिकरणेन गतार्थता ॥ ११ ॥

ततो **द्वादशे एकसूत्रेऽर्थान्तरव्यपदेशाधिकरणे** छान्दोग्यसमाप्तिस्थ'माकाशो वै नाम नामरूपयोर्निर्वहिते'तिवाक्यं विषयत्वेनोपन्यस्य, तत्र भूताकाशो ब्रह्म वेति सन्देहे, भूताकाशस्य यत्प्रयोजनं वायुजननं तस्माद्भिन्नस्य प्रयोजनस्य नामरूपनिर्वाहकत्वरूपस्य कथनाद्, ब्रह्मादिश्रुतीनां च कथनाद्, ब्रह्मैवाकाश इत्युक्तम् । **तेनान्यवाचकपदवाच्यस्य यत्रैव तद्धर्मातिरिक्तधर्मकथनं तत्रान्यवाचकपदस्य ब्रह्मपरत्वमिति** न्यायबोधकमिदमधिकरणमिति प्रसङ्गादुक्तम् । अतो न तद्धर्माद्यधिकरणादिना गतार्थता ॥ १२ ॥

ततस्त्रयोदशे द्विसूत्रे सुषुप्त्युत्क्रान्त्योरित्यधिकरणे बृहदारण्यकस्थं ज्योतिर्ब्राह्मणं शारीरब्राह्मणं चेत्युभयं विषयत्वेनोपन्यस्य, तयोः किं जीववाक्यत्वमुत ब्रह्मवाक्यत्वमिति सन्देहे, उपक्रमस्यासञ्जातविरोधत्वेन प्राबल्यात्, तत्र च 'कतम आत्मे' तिप्रश्ने 'योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष' इति शारीरलिङ्गात्, 'योयं विज्ञानमयः प्राणे' ष्विति काण्वपाठे उपसंहारे च तादृशवाक्याद्, यद्यपि संसारी प्रतीयते, तथापि मध्ये 'ध्यायतीवे'त्यादिसंसारिधर्मनिराकरणादुपसंहारे च 'स वा एष महानज आत्मे'ति-संसारधर्मरहितपरमेश्वरात्मबोधनादन्यैश्च हेतुभिः परमात्माभिन्नो संसारी मुक्तो जीवः प्रतिपाद्यते इति पूर्वपक्षे, यदि मुक्तो जीवो ब्रह्माभेदेनात्र प्रतिपाद्यः स्यात्तदावस्थाभेदस्याप्रयोजकत्वात्सुषुप्त्युत्क्रान्त्यौ च जीवं परमेश्वरान्न भिन्द्यात्, प्रतिपिपादयिषितेऽभेदे अवस्थया भेदकथनस्य निष्प्रयोजनतया वैयर्थ्यप्रसङ्गात्, जाग्रत्स्वप्नयोरज्ञत्वादिवैशिष्ट्यस्य प्रत्यक्षसिद्धत्वेन सुषुप्तिमरणयोस्तमोभिभवादज्ञानादिवैशिष्ट्याज्ञानेपि सौषुप्तिकस्मरणेन मृतानां भूतादिभावदर्शनेन चानुमानसिद्धतया तत्कथनवैयर्थ्यानपायाच्च । अतो यत् ज्ञायमानावस्थासिद्धं भेदमनुवदति तदसंसार्यवस्थायामपि भेदबोधनायैवानुवदति । 'यथोदकं शुद्धं शुद्धे आसिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमे'ति काठकेपि तथैव श्रावणात् । न च तदुपक्रमाद्यनुरोधादसंसारी परमेश्वरसमानधर्मा जीवो वाच्योस्त्विति शङ्क्यम् । उपक्रमादिष्वपि तथार्थाभावात् । तथाहि । उपक्रमे 'किं ज्योतिरयं पुरुष'इति प्रकाशकप्रश्ने 'आदित्यायनन्तरमात्मज्योति'रित्युत्तरे संसारिणः पुरुषस्य प्रकाशापेक्षित्वेनाप्रकाशकत्वात् 'प्रकाशक आत्मा क' इत्याशयेन पृच्छति 'कतम आत्मेति?' । तत्र स्पष्टतया वक्तव्येप्युत्तरे याज्ञवल्क्यो 'न वदिष्ये' इति स्वामिसन्धेर्वरदानस्य चानुरोधात् क्लिष्टमेवोत्तरं दत्तवान् । अतस्तद्विचारे 'अत्रायं पुरुषः स्वयं ज्योतिर्भवती'ति निगमनवाक्ये परमात्मैव स्वयंपदवाच्यः सिध्यतीत्युपक्रमगतः प्रश्नः सामान्योप्युत्तरे तत्पर एव पर्यवस्यति ।

तथापि क्लिष्टप्रयोगात् जनकेन सोर्थः सम्यङ् न ज्ञातः, किन्त्वेतावत् ज्ञातं संसारिव्यतिरिक्त आत्मा प्रकाशक इति। ततस्तत्सन्देहवारणाय पृच्छति 'विमोक्षाय ब्रूही'ति । तदापि पूर्वोक्तानुरोधात् 'स वा एष एतस्मिन् सम्प्रसादे रत्वा चरित्वे'त्यादि क्लिष्टमेवोत्तरं दत्तवान् । तदा सुषुप्तौ जीवस्यासङ्गत्वे उक्तेपि जनकस्य सन्देहो न निवृत्त इति पुनर्मोक्षाय पृच्छति । तदा पुनरपि तथैव वदन् मत्स्यादिदृष्टान्तेन स्वप्नसुषुप्ती अवस्थे उक्त्वा, सुषुप्तौ असङ्गादपि जीवात् परमात्मानं भेदेनाह, सम्परिष्वक्तस्त्रीपुंदृष्टान्तेन। तदापि जनकस्य प्रकाशकसन्देहो न निवृत्त इति पुनर्मोक्षाय पृच्छति । तदा पुनरपि क्लिष्टवाक्यैनैवोत्तरे, पुनरपि मोक्षाय पप्रच्छ । तदा याज्ञवल्क्यो राज्ञो मेधावित्वाद्भीतः ससारिणो जीवस्य मरणावस्थां वदन् परमेश्वराज्जीवस्य भेदमाह। तदापि क्लिष्टप्रयोगात्तस्य सन्देहो न निवृत्त इति तदानीमकामयमानस्य सद्योमुक्तिमाह । तत्र 'ब्रह्मैव सन् ब्रह्माप्येती'तिश्रुतेः 'प्राज्ञ आत्मा ब्रह्मैवे'ति च श्रुतेर्जीवस्य ब्रह्मभाव एव मुक्तिः । प्राज्ञ आत्मा ब्रह्म योस्ति स एव प्रकाशकस्तज्ज्योतिषैवायं जीवः सर्वं करोतीति ज्ञात्वा जनकः 'सोहं भगवते सहस्रं ददामी'त्युक्तवान् । तदा याज्ञवल्क्यः श्लोकैः सर्वं शास्त्रार्थमुक्त्वा 'स एष आत्मे'त्यादिना तमेवार्थं स्पष्टमुक्तवान् । तदा जनको विदेहान् स्वात्मानं च तस्मै दत्तवान्। याज्ञवल्क्योपि तथा विद्यां समापितवान् । अत उपक्रमोपसंहारयोः परमात्मन एव प्रकृतत्वसिद्ध्या तस्यैव प्रकरणित्वम्, न तु ब्रह्मभावापन्नस्य जीवस्येति सिध्यति, समासौ पत्यादिशब्देभ्यश्च । तस्मादिदं ब्रह्मवाक्यमेवेति ।

अत्र पादे उपास्यरूपाण्याधाररूपाणि च विचार्य ब्रह्मातिरिक्तानामनुकारित्वं च विचार्य समाप्तौ यत् जीवब्रह्मणोर्भेदः साधितः, तेन मुक्तिदशायामपि जीवस्यानुकारित्वमेव, तदात्मकत्वात्, न त्वत्यन्ताभेदः, सर्वथा तौल्य वेति प्रसङ्गादुपोद्घाताद्वेति विचारितम् १३

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां प्रथमाध्यायस्य तृतीयः पादः ॥

अतीतेषु पादेषु प्रथमे कार्यरूपवाक्यानि, द्वितीये अन्तर्यामिवाक्यानि, तृतीये उपास्यरूपवाक्यानि विचार्य, सर्वेषां वेदान्तानां ब्रह्मणि समन्वयः प्रतिपादितः । तद्वार्ढ्यार्थं प्रकीर्णकानि वाक्यानि विचार्यन्ते । तेषां च जीवजडसमुदायात्मकार्यनिरूपकतया कापिलमतश्रौतताभ्रमजनकत्वं प्रकीर्णत्वमिति तद्भ्रमनिरासायोपोद्घाततया तेषां विचारः ।

तत्र प्रथमस्य सप्तसूत्रस्यानुमानिकाधिकरणस्य प्रथमसूत्रे 'इन्द्रियेभ्यः परा ह्यर्था' इति काठकवाक्यं विषयत्वेनोपन्यस्य, तत्र ज्ञानकर्ममयाणि दशेन्द्रियाणि भूतमात्राभेदभिन्ना दशार्था मनोबुद्ध्यहङ्कारमहत्तत्त्वाव्यक्तपुरुषाः साङ्ख्यमतसिद्धाः पदार्थास्तत्रोच्यन्ते इति कापिलमतमपि श्रौतमिति 'आनुमानिकमप्येकेषामिति चेदि'तिसूत्रांशेनाशङ्क्य, अंशान्तरेण समाधानमाह । नात्र तन्मतसिद्धाः पदार्था उच्यन्ते, किन्तु पूर्वं'मात्मानं रथिनं

विद्धी'त्यादिना शरीररूपकं यदुक्तं तत्रत्या ये रथादिभावेन पदार्था निविष्टास्ते एवात्रास्मिन् वाक्ये गृह्यन्ते। एतद्धि जीवप्रकरणम्। अत्र च तस्य मुक्त्युपायो निरूप्यते। 'योग्यं शरीरमारुह्य हरेः पदं गच्छे'दिति। तत्र योग्यं शरीरं रथः, आत्मा रथी, इन्द्रियाणि हयाः, बुद्धिः सारथिः, मनः प्रग्रहः, भगवदीया विषयाः, तेषां हयानामात्मरूपाः सम्यक्त्वेन भावितत्वात्। बुद्धेरात्मा ब्रह्मविषयं विज्ञानं तन्महत्तत्त्वेनोच्यते। अव्यक्तं तु भगवत्कृपैव, पुरुषस्तु भगवानेवेति ब्रह्मवाद एवात्र सिध्यति, न साङ्ख्यमतम्। यतोग्रे 'एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभि'रितिमन्त्रेणात्मदर्शनपरिकरतयैव त उच्यन्ते। तस्माद्ब्रह्मवाद एवात्रेत्युक्तम्। ततो द्वितीये सूत्रे अव्यक्तशब्देन भगवत्कृपा वक्तुं न शक्यते, अत्र धर्मिप्रवाहमध्ये धर्मरूपायास्तस्या वक्तुमशक्यत्वादित्याशङ्क्य, अत्राव्यक्तशब्देन सूक्ष्ममुच्यते, तच्च ब्रह्मैव, धर्मधर्मिणोश्चाविनाभावेन स्थितत्वादभेद इति तदभिन्ना कृपैवात्रोच्यते इत्यदोष इत्युक्तम्, योग्यताबलात्। तथा च न प्रायपाठविरोध इत्युक्तम्। ततस्तृतीये ननु यद्युक्तयुक्त्या कृपाया ब्रह्मत्वम्, तदाऽभिन्नत्वे ब्रह्मभिन्नत्वमसङ्गतम्। अथ कयाचिद्युक्त्या तस्या धर्मत्वम्, तदा धर्मिप्रायपाठविरोध इत्युभयथापि दोषात्पूर्वसूत्रोक्तमसङ्गतमित्याशङ्क्य, कृपाया ब्रह्माभिन्नत्वेपि ब्रह्माधीनत्वाद्ब्रह्मभिन्नत्वम्, ब्रह्मभिन्नत्वात् ब्रह्मनियम्यत्वम्। अतो यथैकरूप्येण ग्रहणमभेदे युक्तिः, तथा नियम्यनियामकभावोपि भेदे युक्तिरित्युभयथाप्युपपन्नम्। न चाभेदेनैकत्वे नियम्यनियामकभावानुपपत्तिरिति शङ्क्यम्। 'ब्रह्मविदाप्नोति पर'मित्यत्रैकस्यैव ब्रह्मणः सच्चिद्रूपेण विषयत्वम्, आनन्दरूपेण फलत्वमितिवदुपपत्तेः। तथा च कृपाविष्टः साधनम्, आनन्दरूपः फलम्। अथवा, अव्यक्तं सच्चिद्रूपमक्षरम्, आनन्दरूपः पुरुष इति तयोरभेदेपि परापरभावो युक्तः। अदृश्यत्वाद्यधिकरणे तथा साधितत्वात्। तस्या'दिन्द्रियेभ्यः परा' इतिवाक्ये आनुमानिकं न किञ्चिदस्तीत्युक्तम्। एवं त्रिभिः सूत्रैर्वाक्यानां पूर्वापरसम्बन्धेन मतान्तरं निराकृत्य ब्रह्मवादः प्रतिपादितः। इदानीं तु केवलैतद्वाक्यविचारेण मतान्तरं निराकरोति। ततश्चतुर्थेऽस्मिन् वाक्येऽव्यक्तं ज्ञेयत्वेनोच्यते। कापिलमते तु 'गुणपुरुषान्तरज्ञानात्कैवल्य'मितिप्रवचनसूत्रात् प्रकृतिपुरुषयोरन्तरं मोक्षार्थं ज्ञेयम्, न त्वव्यक्तरूपा प्रकृतिः। अतो ज्ञेयत्वावचनादपि नात्र तन्मतसिद्धिरित्युक्तम्। ततः पञ्चमे ननु ज्ञेयत्वावचनमसिद्धम्, एतदुत्तरवाक्ये 'अशब्दमस्पर्शमरूपमव्यय'मित्यत्राव्ययस्य 'महतः परमव्यक्त'मित्यत्र महतः परस्याव्यक्तस्य ज्ञानान्मुक्तिश्रावणादितिसूत्रांशेनाशङ्क्य, अंशान्तरेण समाधानमाह। अत्र सन्दर्भे श्रुतिलिङ्गवाक्यानां सन्दिग्धत्वात्र निर्णायकत्वम्, अतो 'महतः पर'मितिवाक्यस्य'शब्दमस्पर्श'मितिवाक्यस्य चेति द्वयोरेकवाक्यत्वम्, नान्येषामित्यत्र नियामकाभावेन प्रकरणस्यैव निर्णायकत्वं वक्तव्यम्। तच्च 'ऋतं पिबन्ता'वित्यारभ्य 'नाचिकेतमुपाख्यान'मित्यन्तमेकं प्रकरणम्। तत्र चात्मानावेव परा-

मृश्य जीवात्मनो रथित्वं तदुपकरणं फलं चोक्त्वा, अग्रे 'एष सर्वेषु भूतेष्वि'त्यारभ्यासमाप्ति परमात्मैव ज्ञेयत्वेन परामृश्यते इति मृत्युमुखात्प्रमोकरूपं फलं चोच्यते। अतः प्राज्ञः परमेश्वर एवात्रार्थः, नाव्यक्तं प्रधानम्। अतो ज्ञेयत्वावचनं नासिद्धमित्युक्तम्। तेन प्रकरणस्य नियामकत्वादशब्दवाक्यमपि भगवत्परमेवेत्युक्तम्। ततः **षष्ठे** ननु नेदमेकं प्रकरणम्, किन्त्वि'न्द्रियेभ्यः परा' इत्यारभ्य 'नाचिकेतमुपाख्यान'मित्येकं भिन्नं प्रकरणम्। तत्र प्रथमं पदार्थान्निर्दिश्य, ततोग्रे पुरुषज्ञानं चोच्यते इति साङ्ख्यमतस्यापि निरूपणात्तस्याश्रौतत्वमसङ्गतमित्याशङ्क्य, तत्र परिहारमाह। अत्र हि त्रयः प्रश्नाः, अग्निजीवब्रह्मविषयकाः। तेषामुत्तराणि च त्रीणि। तत्र 'स त्वमग्नि'मितिप्रश्ने 'प्रतिब्रवीमी'त्याद्युत्तरम्, ततो 'येयं प्रेते' इतिजीवप्रश्ने 'देवैरत्रापी'त्याद्युत्तरम्। ततो'न्यत्रधर्मादि'तिब्रह्मप्रश्ने 'सर्वे वेदा' इत्याद्युत्तरम्। अतस्त्रय एव प्रश्नाः त्रीण्येवोत्तराणि च। यदि साङ्ख्यमत'मिन्द्रियेभ्य'इत्यादि स्यात्तदा चतुर्थे प्रश्नोत्तरे स्याताम्। ते तु न स्त इति नात्र तन्मतसिद्धिरित्युक्तम्। ततः **सप्तमे** ननु मतान्तरेन्यत्र प्रसिद्धाः शब्दा ब्रह्मवादे ब्रह्मपरतया कथं योजयितुं शक्या इत्याशङ्क्य, महद्दृष्टान्त उक्तः। यथा महच्छब्दो 'महान्तं विभुमात्मान'मित्यादौ ब्रह्मपरः, तथाव्यक्तशब्दोप्यक्षरपरः। तस्मादिन्द्रियादिवाक्येन न साङ्ख्यमतसिद्धिः, किन्तु ब्रह्मवाद एवात्र सिध्यतीत्युक्तम्॥ १॥

ततो **द्वितीये त्रिसूत्रे चमसवदित्यधिकरणे** 'अजामेका'मित्यादीनि श्वेताश्वतरवाक्यानि विषयत्वेनोपन्यस्य, एतेषु मन्त्रेष्वजादिशब्दैः प्रकृतिः परामृश्यते, मुक्तामुक्तभेदेन जीवद्वैविध्यमजायाः प्रकृतेरेकत्वमग्रे कपिलस्य नाम च पठ्यते। यद्यपि किंकारणेत्युपक्रमाद्ब्रह्मविद्यात्वेनोपनिषत् प्रतीयते, तथापि पूर्वकाण्डे यथा प्रणवादिमन्त्राणां नानास्थले विनियोगान्न प्रकरणानुरोधः, तथैतेष्वपि मन्त्रेषु कपिलमतप्रत्यभिज्ञानान्नोपक्रमाद्यनुरोध इति साङ्ख्यमतमपि वैदिकमितिशङ्कायाम्, पूर्वसूत्रेण समाधिमाह। यथा 'अर्वाग्बिलश्चमस' इतिबृहदारण्यकमन्त्रे कर्मविशेषः। तत्रार्वाग्बिलं चमसं यशोरूपं सोमं सप्त होतारो भक्षयेयुरिति कल्पयितुं न शक्यते, तथा प्रकृतमन्त्रे लोहितशुक्लादिशब्दैः रजःसत्त्वादि कल्पयित्वा तद्दर्शनं सर्वमेव मतं कल्पयितुं न शक्यते, विशेषाभावात्। कपिलवाक्येपि कपिलशब्देन ब्रह्मैवोच्यते, न त्वनित्यर्षिः, नित्यानित्यसंयोगप्रसङ्गादित्युक्तम्। ततो **द्वितीयसूत्रे** ननूक्तस्य चमसमन्त्रस्य व्याख्यानं 'शिरश्चमस'इत्यादिना श्रुतौ क्रियते, तथात्र मन्त्रव्याख्यानाभावात्तद्दृष्टान्तोत्र न युक्त इत्याशङ्कां तुशब्देन परिहरन्नजाशब्दार्थकथनमुखेन समाधत्ते। अत्राजाशब्देन ज्योतिरुच्यते, प्रथमकार्यरूपत्वाच्चतुर्मुखाजत्वन्यायेन। यथाजाल्पदोग्ध्री, तथैवेयं नश्वरफलदात्रीतिबोधनाय चाजाशब्देनोच्यते। सत्यकामब्राह्मणेग्निसोमसूर्यविद्युद्रूपचरणरूपतया हंसेनोक्तश्चतुष्कलो यो ब्रह्मणः पादस्तद्रूपत्वात् ज्योतीरूपा निवृत्कृतत्वात्रिवर्णा ज्योतिरेवाजाशब्देनोच्यते। अत्रोपक्रमे ब्रह्मणः प्रकृतत्वात् 'तदेवाग्नि-

स्तद्वायुस्तदादित्यस्तदु चन्द्रमा'इतिकथनाच्च । सा च चेतनाधिष्ठिता, मध्ये 'द्वासुपर्णे'ति मन्त्रकथनात्, अजद्वयं च जीवब्रह्मरूपं ताभ्यामधिष्ठिता । सा च प्रथमसृष्टिरवादिजननेन चहुप्रजास्रष्ट्री चेति । एतच्छन्दोगशाखायामधीयते । अतस्तदनुसारेणायमेवार्थः, न तु मतान्तररूप इत्युक्तम् । ततस्तृतीये ननु शब्दस्य वृत्तिद्वयं योगो रूढिर्वा । तत्र न जायते इति योगः प्रथमसृष्टौ न सङ्गच्छते, जननात् । रूढिस्तु छाग्याम्, साप्यत्र न सङ्गच्छते, तदाकाराभावात् । अतः कथमजाशब्देन प्रथमसृष्टिप्राप्तिः । साङ्ख्यमते तु प्रधानस्य जननानङ्गीकाराद्योगो निर्बाधः । तस्मात्साङ्ख्यमतमेवादर्तव्यमित्याशङ्कायां समाधिमाह । अत्र हि किञ्चित्कार्यार्थं परोक्षवादेनाजाशब्दस्तस्यां कल्पनयोपदिश्यते । यथाजा वर्करसहिता सवत्सा स्वामिहिता, तथेयं जीवविशिष्टा कार्यवती भगवल्लीलोपयोगायेति भगवतः परोक्षप्रियत्वाच्चेति । तथा च यथा मध्वादिविद्यायां 'असावादित्यो देवमध्वि' त्यादौ (कल्पना, तथैवात्र) । अतो गौण्या तथोपदिश्यते । तस्मान्नाजामन्त्रेण साङ्ख्यमतसिद्धिरित्युक्तम् ॥ २ ॥

ततस्तृतीये त्रिसूत्रे **न सङ्ख्योपसङ्ग्रहाधिकरणे** 'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठित'इतिवाक्यं विषयत्वेनोपन्यस्य, तत्र 'पञ्च पञ्चजना' इतिशब्दे पञ्च च ते पञ्च च पञ्चपञ्च, तादृशाश्च ते जनाश्च पञ्चपञ्चजना इत्येवं समस्य, अनेन शब्देन पञ्चविंशतिसङ्ख्यासङ्ग्रहादत्र साङ्ख्यसिद्धानि पञ्चविंशतितत्त्वान्युच्यन्ते इति साङ्ख्यमतसिद्धिरित्याशङ्क्य निषेधति । अत्रानेन समासेन पञ्चानां समूहानां पञ्चतया तदुक्ता सङ्ख्या सिध्यति, न त्वन्यथा । तेषां तु न समूहाः पञ्च । 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुष' इतिभिन्नप्रकारेण सङ्ख्याव्युत्पादनात् । मन्त्रे आकाशस्यात्मनश्च ततोतिरेकेणोक्तत्वाच्च । तस्मान्न तन्मतसिद्धिरिति **प्रथमसूत्र** उक्तम् । ततो **द्वितीयसूत्रे** तर्हि को वा मन्त्रार्थः, किं च तत्र प्रमाणमित्याकाङ्क्षायां बुद्धेः संशयाद्याः पञ्च वृत्तीर्जनयन्तीति पञ्चजनास्तादृशा ये प्राणादयः पञ्च तेत्र पञ्च पञ्चजनशब्देनोच्यन्ते । अत्र 'प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदु'रितिवाक्यशेषः प्रमाणम्, 'सन्दिग्धेषु वाक्यशेषा'दितिन्यायात् । तस्मान्न तन्मतसिद्धिरित्युक्तम् । ततस्तृतीयसूत्रे ननु वाक्यशेषे काण्वशाखायां 'अन्नस्यान्न'मिति पाठाभावात् पञ्चवृत्तिजनकानां प्राणादीनां पञ्चसङ्ख्याकत्वं नास्तीति न वाक्यशेषस्य निर्णायकत्वमितिशङ्कायाम्, 'तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृत'मिति पञ्चमस्य ज्योतिषः पाठात्तेन सङ्ख्यापूर्तिरिति वाक्यशेषस्य निर्णायकत्वमक्षुण्णम् । तस्माद्ब्रह्मवाद एवात्र, न साङ्ख्यमतसिद्धिरित्युक्तम् । एवमेतैस्त्रिभिरधिकरणैः श्रुतीनां ब्रह्मणि समन्वयार्थमुपोद्घातेन साङ्ख्यमतस्य श्रौतत्वं निराकृतम् ॥ ३ ॥

अतः परमग्रिमैः श्रुतिविप्रतिषेधं निराकरोति । तत्र चतुर्थे एकसूत्रे यथाव्यपदि-

ष्टाधिकरणे ननु श्रुतौ सृष्टिप्रकारा बहुधा दृश्यन्ते, क्वचिदाकाशादिका, क्वचित्तेजआदिका, क्वचिच्च युगपत् सर्वसृष्टिः । तत्रैकस्य पदार्थस्य नानाप्रकारतया वक्तुमशक्यत्वात्सृष्टिवाक्यानामर्थवादत्वेन ब्रह्मस्वरूपमात्रज्ञापकत्वं वक्तव्यम्, न तु सृष्टौ तत्प्रकारे वा तात्पर्यम् । अतोध्यारोपापवादेन ब्रह्मणस्तटस्थत्वसिद्ध्या न पूर्वोक्तरूपं कारणत्वं सिध्यतीति श्रुतिं विहाय कपिलस्मृत्युक्तप्रकारेणैव जगद्व्यवस्थाङ्गीकार्येत्याशङ्कायाम्, आकाशादिवाक्येषु यद्यपि क्रमादिविप्रतिपत्तिः, तथापि ब्रह्मणः कारणत्वविप्रतिपत्तिर्नास्ति । एकत्र यादृशं ब्रह्मोच्यते तादृशमेव सर्वेषु सृष्टिवाक्येषु कारणत्वेनाभिप्रेयते । क्रमप्रकारादिभेदस्तु माहात्म्यस्यैव सूचकः । तस्मात् श्रुत्यैव निर्णय इति कारणत्वांशे स्मृतिर्न ग्राह्येत्युक्तम् ॥ ४ ॥

ततः **पञ्चमे एकसूत्रे समाकर्षाधिकरणे** ननु श्रुतौ क्वचित्सतः कारणत्वमुच्यते, क्वचिदसतः, क्वचिदुभौ निषिध्य तमसः, क्वचिदव्याकृतस्येत्येवं विप्रतिषेधाद् ब्रह्मणोपि कारणत्वं न सिध्यति। तस्मात्स्मृतिरेव कारणबोधिका ग्राह्येत्याशङ्कायाम्, असदादिशब्देषु न निरात्मकत्वाद्यर्था उच्यन्ते, किन्तु ततः समाकृष्य सर्वैः शब्दैर्ब्रह्मैवोच्यते। सर्वेषां शब्दानां प्रणवविकृतित्वेन प्रणवार्थे एव पर्यवसानात् । प्रणवस्य च ब्रह्मवाचकत्वात् । तस्मान्न विप्रतिषेध इत्युक्तम् । एवं **द्वाभ्यां** श्रुतौ शब्दविप्रतिषेध उपोद्घातेन परिहृतः ॥ ५ ॥

ततः **षष्ठे त्रिसूत्रे जगद्वाचित्वाधिकरणे** कौषीतकिब्राह्मणषष्ठाध्यायस्थं बालाक्यजातशत्रुसंवादं विषयत्वेनोपन्यस्य तत्र किं ब्रह्मसहितो जीवः कर्तृत्वेनोच्यते, उत ब्रह्मैव वेतिसन्देहे, ब्रह्मसहितस्य जीवस्यैव कर्तृत्वमाशङ्क्य, 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्म स वै वेदितव्य' इत्यजातशत्रुणा सिद्धान्तकथनोपक्रमे एतच्छब्देनादित्यमण्डलादिजडोल्लेखात्पुरुषशब्देन च जीवोल्लेखात् जीवजडात्मकं जगद्यत्कर्तृकं तस्य वेदितव्यत्वकथनेन श्रुत्यन्तरसिद्धब्रह्मण एव कर्तृत्वम्, न प्रकृत्यभिमानिजीवस्येति **प्रथमसूत्रे** उक्तम् । ततो **द्वितीयसूत्रे** जीवमुख्यप्राणलिङ्गदर्शनान्न ब्रह्मणः कर्तृत्वमितिसूत्रांशेनाशङ्क्य, अंशान्तरेण पूर्वमनुगमाधिकरणे उक्तं समाधानं स्मारयामास । जीवस्य ब्रह्माश्रितत्वान्मुख्यप्राणस्य च ब्रह्मयोगादत्र तथात्वेन कथनं न स्वेन रूपेण । तस्माद्ब्रह्मैव कर्त्रित्युक्तम् । **ततस्तृतीये सूत्रे** प्रकृत्यभिमानिजीवस्य कर्तृत्वमप्यस्मिन् वाक्येऽनभिमतम्, जीवलयोद्गमयोर्ब्रह्मप्रतिपत्त्यर्थत्वात् । प्रश्नव्याख्यानाभ्यां तथावसायात् । वाजसनेयिनामेतत्समानप्रकरणेपि तथावसायाच्चेत्युक्तम् । एवमत्र जीवब्रह्मवादनिराकरणेन जीवविशिष्टा प्रकृतिरेव कारणमित्येतदुपोद्घातेन निराकृतम् ॥ ६ ॥

ततः **सप्तमे चतुःसूत्रे वाक्यान्वयाधिकरणे** जीवब्रह्मवादनिराकरणेन प्रकृतिकारणवादो निराक्रियते। तत्र बृहदारण्यकस्थं मैत्रेयीब्राह्मणद्वयं विषयत्वेनोपन्यस्य, तत्र जीवस्य प्रकरणित्वं ब्रह्मणो वेति संशये, वेदरूपमहावाक्यस्य ब्रह्मण्येवान्वयदर्शनात्, पुत्ररूपभगवदन्वयेनैव जीवस्यापि प्रियत्वात्, सर्वोपनिषदनुरोधेनास्यापि वाक्यस्य ब्रह्म-

ण्येवान्वयादत्रापि ब्रह्मैवोच्यत इत्युक्तम् । ततो द्वितीयसूत्रेऽस्मिन् वाक्ये ब्रह्मैवोच्यते इत्यत्रान्येषां ब्रह्मवादैकदेशिनां सम्मतिं वक्तुं प्रथममाश्मरथ्यमतेनाह । तन्मते हि ब्रह्मणा स्वस्य भोगनिष्पत्त्यर्थं विस्फुलिङ्गवत्प्रकटीकृतः स्वांशो जीवः, तेन जीवेनोपक्रमः, तस्यैव प्रियत्वेन संसूचनात्, उपक्रमस्य च बलिष्ठत्वात् जीवात्मैव प्रकरणीति स एव ज्ञेयत्वेनोपदिश्यते इतिशङ्कायाम्, नात्र जीवात्मनो ज्ञेयत्वेनोपदेशः, किन्तु परमात्मन एव । जीवेनोपक्रमस्तु 'आत्मनि वा विज्ञाते सर्वमिदं विज्ञातं भवती'तिप्रतिज्ञायाः सिद्धिः तस्याः लिङ्गम्, यदि हि जीवः परमात्मनः सकाशाद्भिन्नः स्यात्, तदा परमात्मज्ञाने तदज्ञानादात्मज्ञानेन सर्वज्ञानप्रतिज्ञा न सिध्येत् । अतस्तदर्थमुपक्रमे जीवः परामृश्यते, न तु प्रकृतिसंसृष्टस्य जीवस्य कारणत्वार्थमित्याश्मरथ्यमतमुक्तम् । ततस्तृतीये सूत्रे, यदत्रोपक्रमे गौणप्रियवैराग्यार्थं जीवकथनं, तत्त्वनादिसिद्धस्यापि जीवस्य संसारभावादुत्क्रमिष्यतो मुक्तौ जीवो भगवानेव भविष्यतीति बोधनार्थं लिङ्गम्, नतु प्रकृतिसंसृष्टजीवस्य कारणत्वार्थम् । तस्मान्नात्र प्रकृतिसंसृष्टजीवकारणवाद इत्यौडुलोमिमतमुक्तम् । ततश्चतुर्थे सूत्रे कयाचिदवस्थयावस्थितं ब्रह्मैव जीवः । अतः संसारदशायामपि जीवो ब्रह्मैवेति ज्ञापनार्थं तदुपक्रमो, नतु प्रकृतिसंसृष्टस्य जीवस्य कारणत्वार्थमितिकाशकृत्स्नमतमुक्तम् । तस्माद्ब्रह्मैवात्र कारणत्वेनोच्यते ॥ ७ ॥

ततोऽष्टमे पञ्चसूत्रे प्रकृतिश्चेत्यधिकरणे प्रकृतिः समवायिकारणम्, ब्रह्म तु निमित्तादिकारणमित्येवमाशङ्क्य, प्रकृतिशब्दवाच्यं ब्रह्मैवेति साधितम् । छान्दोग्ये एकविज्ञानेन सर्वविज्ञानं यत् प्रतिज्ञातं, मृत्पिण्डादिदृष्टान्तत्रयं च यदुक्तं, तदनुपरोधादितिहेतुश्च प्रथमसूत्रे उक्तः । तथा च यदि मूलकारणे ब्रह्मणि समवायिकारणत्वरूपं प्रकृतित्वं न स्वीक्रियेत, तदा प्रतिज्ञादिसामञ्जस्यं न स्यात्, अतस्तथेत्युक्तम् । ततो द्वितीयसूत्रे सृष्टौ भगवत्कृतमभिध्यानं 'बहु स्यां प्रजायेये'ति स्वस्य बहुरूपत्वेन उच्चनीचभावेन च यद्विचारणं तद्धेतुत्वेनोक्तम् । तेन स्वयमेव तत्तद्रूप इति सिध्यति । किञ्च, 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इत्येवमुपासनाप्युपदिश्यते । अतोपि प्रकृतिशब्दवाच्यं ब्रह्मैव । ततस्तृतीये 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते । आकाशं प्रत्यस्तं यन्ती'तिश्रुत्या ब्रह्मणः प्रपञ्चोत्पत्तिलयाधारत्वं साक्षादेवोच्यते । तच्च समवायित्वस्यैव लिङ्गम् । अतोपि प्रकृतिशब्दवाच्यं ब्रह्मैव । ततश्चतुर्थे 'तदात्मानं स्वयमकुरुते'तिश्रुतिः ब्रह्मणः परिणाममाह । परिणामश्चोपादानसमसत्ताककार्यापत्तिरूपः । अतोपि ब्रह्मैव प्रकृतिशब्दवाच्यम् । ततः पञ्चमे ननु जडस्य समवायिकारणं ब्रह्मास्तु, यत्तु चेतनाधिष्ठितं शरीरं तस्य शुक्रशोणितजन्यत्वदर्शनात् तत्र ब्रह्मणो निमित्तत्वम्, प्रधानस्य तु समवायित्वमित्यस्त्वित्याशङ्कायाम्, 'सदेव सौम्येद'मित्यादिषु सृष्टिबोधकश्रुतिष्ववधारणदर्शनात् ब्रह्मैवोभयरूपम्, अन्यथावधारणविरोधापत्तेः । किञ्च, 'कर्तारमीशं पुरुषं ब्रह्मयोनि'

मित्यादिषु योनित्वमपि ब्रह्मण एवोच्यते, पुरुषत्वं च । तस्मादक्षरपुरुषभावेनोभयरूपो भगवानेव, योनिर्बीजं च । अतः कथञ्चिदपि न प्रकृतिप्रवेशः । एवं त्रिभिरधिकरणैरुपोद्घातेनार्थविप्रतिषेधः परिहृतः । अतः साङ्ख्यमतमशब्दमेव ॥ ८ ॥

ततो **नवमेऽधिकरणे एकसूत्रे** अन्येऽपि स्मार्ता वादाः येषु ब्रह्मणः सर्वविधं कारणत्वं नोच्यते, ते सर्वे अश्रौता एवेत्यतिदिष्टम् । तदेवाग्रिमाध्याये विस्तरेण वक्ष्यते ॥ ९ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां प्रथमाध्यायस्य चतुर्थः पादः ।

प्रथमाध्यायः समाप्तः ।

द्वितीयोऽध्यायः ।

प्रथमाध्याये सर्वासां श्रुतीनां ब्रह्मणि समन्वयः प्रतिपादितः । स तदा स्थिरो भवति यदा श्रुतीनां **परस्परविरोधः** परिह्रियते, अन्ये **विरुद्धाः स्मार्ता** वादाश्च निराक्रियन्ते । अतस्तदर्थं **द्वितीयेऽध्याये** श्रुत्यविरोधं प्रतिपादयति, विरुद्धवादांश्च निराकरोति ।

तत्र **प्रथमे पादे** युक्त्या श्रुतिविरोधपरिहारः । ततो **द्वितीयपादे** स्मृतीनां वेदबोधकत्वाभावेऽपि ताभिः **स्वातन्त्र्येण** कश्चित् पुरुषार्थः सेत्स्यतीत्याशङ्कानिवृत्त्यर्थं बाह्याबाह्यमतान्येकीकृत्य तेषां निराकरणम् । मतैकीकरणं च भ्रान्तेस्तुल्यत्वबोधनार्थम् । **तृतीयपादे** प्रथमं भूतानामुत्पत्तिस्वरूपमुत्पत्तिक्रमश्च विचार्यते, ततो **जीवात्मस्वरूपं** तद्धर्माश्च । **चतुर्थे** च इन्द्रियोत्पत्तिक्रमस्तत्स्वरूपादिकं च विचार्यते ।

तत्र **प्रथमाध्याये** 'अपि स्मर्यते, स्मृतेश्च'तिकथनेन स्मृतिप्रामाण्याङ्गीकारात् तयैव श्रुत्यर्थनिर्णयः कार्यः, अन्यथा तद्वैयर्थ्यप्रसङ्ग इत्याशङ्कानिवृत्त्यर्थं प्रथमं **सूत्रत्रयेण** साङ्ख्ययोगस्मृत्योर्नित्यानुमेयश्रुतिमूलकत्वाभावाय प्रामाण्यमुपोद्घातेन निराकृतम् । ततः **प्रथमे सूत्रे** साङ्ख्यस्मृतेर्मोक्षैकोपयोगित्वात् तत्प्रामाण्यमङ्गीकृत्य तदनुरोधेनैव श्रुतिविप्रतिषेधः परिहार्यः, अन्यथा तद्वैयर्थ्यप्रसङ्गादितिसूत्रांशेनाशङ्क्य, तत्प्रामाण्याङ्गीकारे 'अहं सर्वस्य जगतः प्रभवः प्रलयस्तथे'त्यादिगीतास्मृतिविरोधः । तत्प्रामाण्याङ्गीकारे च ब्रह्मकारणत्वबोधकश्रुतिविरोधः । अतो गीतास्मृतिप्रामाण्यमावश्यकम् । तेन श्रुतिविप्रतिषेधनिराकरणे कपिलस्मृतेर्न प्रामाण्यमित्युक्तम् । ततो **द्वितीये सूत्रे** प्रकृतिव्यतिरिक्तानां महदादीनां लोके वेदे चानुपलम्भात् तदुक्तयुक्तीनामप्रयोजकत्वमित्युक्तम् । ततस्तृतीये **सूत्रे** पूर्वोक्तश्रुतिस्मृतिविरोधात् योगस्मृतिरपि साङ्ख्यवत् प्रधानकारणत्वांशेऽप्रमाणमित्युक्तम् । एतेषु पूर्वपादोक्तस्यैवार्थस्य परामर्शात् तदुपोद्घातगर्भः प्रसङ्गः सङ्गतिः । एवमग्रेऽपि बोध्यम् । त्रीण्येतानि प्रत्येकमधिकरणानीति **भाष्यप्रकाशादवगन्तव्यम्** ॥ १,२,३ ॥

ततश्चतुर्थे त्रिसूत्रे न **विलक्षणत्वाधिकरणे प्रथमसूत्रद्वयेन** पूर्वः पक्षः ।

एकेनाग्रे सिद्धान्तः । तत्र प्रथमसूत्रे चेतनं ब्रह्म जगदुपादानं न भवति, जगतो जडत्वेन ब्रह्मणस्तद्विलक्षणत्वात् । विलक्षणत्वस्य 'विज्ञानं चाविज्ञानं चे'तिश्रौतशब्दादेव प्रतीतेरित्युक्तम् । ततो द्वितीये सूत्रे ननु 'मृदब्रवी'दितिश्रुतौ मृदादेर्वक्तृत्वादिकथनेन मृदादिष्वपि चेतनत्वस्य श्रुत्यभिप्रेतत्वात् जगतोऽपि चेतनतया ब्रह्मसालक्षण्याद् ब्रह्मकार्यत्वमिति सिद्धान्तिनाशङ्किते, अत्र मृदाद्यभिमानिनी देवतैव वक्तृत्वादिरूपेण व्यपदिश्यते, अन्यथा 'विज्ञानं चाविज्ञानं चे'तिचेतनाचेतनविभागरूपो विशेषो नोच्येत । 'अग्निर्वाग्भूत्वा मुखं प्राविश'दितिश्रुतौ देवताप्रवेशो वागादिषु नोच्येत । तस्माच्चेतनाचेतनात्मकं जगत् न ब्रह्मोपादेयमिति सूत्रद्वयेन पूर्वपक्ष उक्तः । ततस्तृतीये समाधिमाह । कार्यकारणयोर्वैलक्षण्यं लोके गोमयवृश्चिकादौ देहकेशादौ च दृश्यते । अतो विलक्षणत्वेन हेतुना जगति ब्रह्मोपादेयत्वबाधन न शक्यवचनम् । सदंशस्य कार्यकारणयोस्तुल्यत्वेन सालक्षण्याच्च । तस्मान्न जगतो ब्रह्मकार्यत्वप्रतिषेधः ॥ ४ ॥

ततः पञ्चमे पञ्चसूत्रे असदिति चेदित्यधिकरणे असत्कारणत्वसत्कारणत्वबोधकश्रुत्योः परस्परविरोधः परिह्रियते । तत्र प्रथमे सूत्रे 'असद्वा इदमग्र आसी'दितिश्रुतावसतः कारणत्वमुच्यते । 'सदेव सौम्येद'मित्यत्र च सतः कारणत्वमुच्यते, तयोः कथं विरोधपरिहार इत्याशङ्क्य, उक्तश्रुतौ 'असदि'ति यत् कथनं तत् छान्दोग्ये 'कथमसतः सज्जायेते'तिकथनात् असतः कारणत्वनिषेधार्थम् । यत् पुनस्तैत्तिरीये तथावचनं तत् वक्ष्यमाणापेक्षया पूर्वस्यासाधुत्वार्थम्, असाधुन्यप्यसदितिप्रयोगात् । कार्यस्थूलरूपसत्ताभावार्थं वा । अतो न श्रुत्योर्विरोध इत्युक्तम् । ततो द्वितीये सूत्रे ब्रह्मकारणवादे पूर्वपक्ष उच्यते । ब्रह्मकारणवादे यदा कार्यस्य ब्रह्मणि लयः, तदा कार्यधर्माः परिच्छिन्नत्वाशुद्धत्वादयो ब्रह्मणि भविष्यन्तीत्यसङ्गतं ब्रह्मकारणत्वमित्येवं शङ्काकरणात् । ततोऽग्रिमेषु तत्परिहार उक्तः । ततस्तृतीये ब्रह्मकारणवादो नासंगतः । कार्यस्य कारणे लये कार्यधर्मा न कारणे दृश्यन्ते, शरावरुचकादीनां मृदि लये शरावादिधर्मादर्शनादित्युक्तम् । ततश्चतुर्थे प्रतिबन्दी उक्तः । तवापि सत्कार्यवादित्वात्सविशेषस्य कार्यस्य ये धर्माः परिच्छिन्नत्वव्यक्तत्वादयस्ते अव्यक्ते प्रधाने भविष्यन्ति । अतो न वयं पर्यनुयोक्तव्या इत्युक्तम । ततः पञ्चमे सावद्यतर्कस्याप्रतिष्ठितत्वात्प्रतिवादिना तदनङ्गीकारेण दोषादविमोक इत्युक्तम् ॥ ५ ॥

ततः षष्ठे एकसूत्रे एतेनेत्यधिकरणे सांख्यनिराकरणेनान्येऽपि वादा निराकृता इत्युक्तम् ॥ ६ ॥

ततः सप्तमे एकसूत्रे भोक्त्रापत्तेरित्यधिकरणे ननु प्रलये सर्वस्य कार्यस्य कारणरूपतया एकरूपत्वे जाते पुनरुत्पत्तिदशायां भोग्यस्य स्रक्चन्दनादेः भोक्तृत्वापत्तिः, भोक्तुश्चेतनस्य भोग्यत्वापत्तिरित्येवमविभागः स्यादितिसूत्रांशेनाशंक्य, अंशान्तरेण समाहितम् । यथा लोके कटकमुपमृद्य रुचके क्रियमाणे कटकत्वं न भवति, तयोरुत्पत्तिदशायां भोग्यस्य भोग्य-

त्वेनैवोत्पत्तिः, भोक्तुर्भोक्तृत्वेनैवेति न विभागाभावः। कारणस्य चेतनत्वेन तस्य तस्य तथैवोत्पादनादित्युक्तम्। तेन 'विज्ञानं चाविज्ञानं चे'ति श्रुतौ कार्ये विभागाभावरूपो दोषः परिहृतः ॥ ७ ॥

ततोऽष्टमे त्रिसूत्रे **तदनन्यत्वाधिकरणे** छान्दोग्यस्थे वाचारम्भणवाक्ये कार्यस्य कारणाभिन्नत्वं प्रतिपादितम्, न तु कार्यमिथ्यात्वमित्युक्तं **प्रथमसूत्रे**। ततो **द्वितीयसूत्रे** कार्यस्य घटादेर्विद्यमानत्व एवोपलम्भः। नत्वविद्यमानत्वे। अतः श्रुत्यविरुद्धं प्रत्यक्षमपि कार्यस्य कारणानन्यत्वे प्रमाणमित्युक्तम्। **ततस्तृतीये** प्रपञ्चस्य सदैव सत्त्वम्, 'सदेव सौम्येदमग्र आसी'दित्यादिश्रुतौ परिदृश्यमानबोधकादिदंपदात्। 'तदेतदक्षयं नित्यं जगन्मुनिवराखिलम्। आविर्भावतिरोभावजन्मनाशविकल्पव' दितिविष्णुपुराणवाक्याच्च। एवमनेनाधिकरणेन श्रुतिप्रत्यक्षाभ्यां कार्यस्य सदात्मकत्वेन ब्रह्मानन्यत्वं साधितम् ॥ ८ ॥

ततो **नवमे चतुःसूत्रे असद्व्यपदेशाधिकरणे** असत्कार्यवादो निराकृतः। ततः **प्रथमसूत्रे** 'असद्वा इदमग्र आसी'दितिश्रुतौ कार्यमसदितिव्यपदेशात् असत्कार्यवाद आस्थेय इतिसूत्रांशेनाशंक्य, सूत्रांशेन समाहितम्। एतद्वाक्यशेषे 'स आत्मानं स्वयमकुरुते'-तिश्रावणात् कार्यस्य प्रागुत्पत्तेरात्मत्वेनैव रूपेण सत्त्वम्, नतु व्याकृतस्वरूपेण। तस्मादसत्त्वमुच्यते, न त्वसत्त्वेनेत्युक्तम्। ततो **द्वितीयसूत्रे** सत्कार्यवादस्याभियुक्तिमिरात्मानमितिशब्दान्तराच्च नासत्कार्यवाद आस्थेय इत्युक्तम्। युक्तयस्तु भाष्यप्रकाशादवगन्तव्याः। **ततस्तृतीये** पटदृष्टान्त उक्तः। यथा पटः संवेष्टितो न तावान् प्रतीयते, तथा कारणे कार्यं सूक्ष्मरूपत्वान्न प्रतीयते, प्रकटं तु प्रतीयत इत्युक्तम्। **ततश्चतुर्थे** प्राणादिदृष्टान्त उक्तः। यथा प्राणादीनां नियमने जीवनमात्रम्, अनियमने त्वाकुञ्चनादिः संभवति, तथा जगदपि कारणे प्रविष्टं सन्मात्रं तिष्ठति, बहिःप्रकटं कार्यं करोति। अतोऽसत्कार्यवादो न प्रामाणिक इत्युक्तम् ॥ ९ ॥

ततो **दशमे त्रिसूत्रे इतरव्यपदेशाधिकरणे** चेतनकारणतायां प्राप्ता दोषाः परिह्रियन्ते। तत्र **प्रथमे** चेतनस्य जीवस्यापि ब्रह्मत्वात्सृष्टौ तस्य प्रवेशे दुःखित्वादिकं भवति। तच्च ब्रह्मणो हिताकरणत्वादिदोषप्रसक्त्या असंगतमित्याशंक्य, अग्रिमसूत्रद्वये परिहारमाह। तत्र **द्वितीये** ब्रह्म जीवादधिकम्, न तु जीवमात्रम्, तेन तद्दोषेपि न दुष्यति। यथा सुवर्णखण्डस्यान्यमेलनेन दुष्टत्वेपि न सुवर्णस्य दुष्टत्वम्, तद्धिताहितं च करोति, लोके स्वदेहेपि नखनिकृन्तनकेशप्रसाधनादिदर्शनात्। जीवपरमात्मनोर्भेदस्तु विज्ञानानन्दप्राधान्यभेदात्। आनन्दस्याधिक्यं तु भूमविद्यायां तत्रैव ज्ञेयत्वस्य पर्यवसानात्। **ततस्तृतीये** यथा पार्थिवत्वाविशेषेपि हीरकपाषाणयोश्चन्दननिम्बयोश्च स्वभावभेदः, तथा जीवानामपि। तथा च ब्रह्मवादे लोकन्यायेन प्रत्यवस्थानं नोचितमिति साधितम् ॥ १० ॥

तत **एकादशे षट्सूत्रे उपसंहारदर्शनाधिकरणे** तत्रैकस्यैव ब्रह्मणः सर्वविध-

कारणत्वे ये दोषास्ते परिह्रियन्ते । तत्र **प्रथमसूत्रे** लोके मृत्कुलालचक्रचीवरादीनामुपादानकर्तृनिमित्तान्तराणां परस्परभिन्नानां दर्शनादेकस्यैव सर्वविधकारणत्वमसंगतमिति सूत्रांशेनाशंक्य, क्षीरं यथा यदा दध्याकारेण परिणमति, तदा नान्यत्किञ्चिदपेक्षते, तथा ब्रह्मापीत्यंशान्तरेण समाहितम् । ततो **द्वितीयसूत्रे** यथा देवर्षिपितर इतरनिरपेक्षा योगबलेन सर्वं कुर्वन्ति, तथा ब्रह्मापीच्छयेति समाधानान्तरमुक्तम् । ततस्**तृतीये** ब्रह्मण उपादानत्वे कृत्स्नप्रसक्त्यादिर्दोष आशंकितः । ततश्**चतुर्थे** ब्रह्मणः स्वरूपं कारणत्वं च न लोकगम्यं येनैवमाशंक्येत, किन्तु श्रुत्येकसमधिगम्यम् । सा च स्वत एव प्रमाणम् । सा च यथा वदति, तथैवांगीकार्यमित्येवं समाहितम् । ततः **पंचमे** ब्रह्मणः सर्वविधकारणत्वेपि देशकालाधिकरणापेक्षा त्वावश्यकीत्याशंक्य, 'परास्य शक्ति'रिति श्रुतेर्ब्रह्मणो विचित्रशक्तित्वाद्देशकालाद्यनपेक्षा युक्ता । 'आत्मन्येवात्मनात्मानं सृजेहमनुपालय' इत्यात्मन्यपि सृष्टिर्युक्तेत्युक्तम् । ततः **षष्ठे** प्रधानकारणवादेपि ते दोषास्तुल्या ये ब्रह्मकारणवादे दीयन्ते । तस्मात्पर्यनुयोगो न युक्त इत्युक्तम् ॥ ११ ॥

ततो **द्वादशेष्टसूत्रे सर्वोपेता इत्यधिकरणे** भगवतः कर्तृत्वे दोषान् परिहरति । तत्र 'स विश्वकृ'दिति श्रुतौ कर्तृत्वं बोध्यते, निर्वाहकाभावे तत्कथं संगच्छत इत्याकांक्षायां **प्रथमसूत्रे** सर्वशक्तियुक्तत्वं साधितम् । ततो **द्वितीयसूत्रे** ब्रह्मणो निरिन्द्रियकत्वात्कथं कर्तृत्वम् । ततस्**तृतीयसूत्रे** ब्रह्मणः प्रयोजनाभावात्किमर्थं कर्तृत्वमित्येवमाशंकितम् । ततश्**चतुर्थे** लोकवल्लीलया समाहितम् । ततः **पञ्चमे** ब्रह्मणः सृष्टिकरणे जीवानां सुखदुःखसंभवात् वैषम्यनैर्घृण्ये स्यातामित्याशंक्य, जीवकर्मसापेक्षत्वान्न ब्रह्मणि दोष इत्युक्तम् । कर्मसापेक्षत्वेपि नेश्वरत्वहानिरिति चोक्तम् । ततः **षष्ठे** जीवानां प्रपञ्चप्रलयदशायां ब्रह्माविभागात्कथं कर्मसत्तेति[1] सूत्रांशेनाशंक्य, बीजाङ्कुरवत्प्रवाहानादित्वादिति सूत्रांशेन समाहितम् । ततः **सप्तमे** उपपत्त्या श्रुतिस्मृत्योस्तदुपलम्भाच्च जीवस्यानादित्वं समर्थितम् । ततो**ष्टमे** ब्रह्मणः सर्वसमर्थत्वात्सर्वं संगच्छत इत्युक्तम् । एवं चास्मिन्पादे पूर्वाध्यायचतुर्थपादस्थितं हृदिकृत्य सर्वं चिन्तितम् । तेन बुद्धिस्थानात्मकोपोद्घातात्तदर्भः प्रसङ्गः सङ्गतिरिति ॥१२॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां द्वितीयाध्यायस्य प्रथमः पादः ।

अथ **द्वितीयपादे** वेदविरुद्धा बाह्या अबाह्याश्च स्मृतयो दूष्यन्ते, तासां न परमफलसाधकत्वमिति ज्ञापनार्थम् ।

तत्र **प्रथमे षट्सूत्रे रचनानुपपत्तेरित्यधिकरणे** प्रधानस्य कर्तृत्वं दूष्यते । तत्र **प्रथमसूत्रे** अचेतनस्य प्रधानस्य बुद्धिपूर्वकक्रियारूपा या रचना सा नोपपद्यते, प्रधानस्याचेतनत्वेन क्रियाकारणभूताया बुद्धेस्तत्र वक्तुमशक्यत्वादित्युक्तम् । ततो

१ कर्मसत्तेति मूले पाठः ।

द्वितीये सूत्रे लोकरचना यथा केवलादचेतनान्नोपपद्यते, तथा शुक्रशोणितजन्या शरीररचनापि । तत्र मातापित्रोरुभयोश्चेतनयोः प्रवृत्तिदर्शनात्, अचेतने केवले तादृश-प्रवृत्त्यदर्शनादित्युक्तम् । ततस्तृतीये ननु केवलाचेतनेपि दुग्धे फेनरचनादयो विचित्रा दृश्यन्ते, तादृशे नदीजले च स्पन्दनादयः । तद्दृष्टान्तेनाचेतनस्य केवलस्य प्रधानस्यापि रचनाकर्तृत्वं प्रवृत्तिश्चास्त्विति सूत्रांशेनाशंक्य, अशांतरेण समाधत्ते । तत्रापि दोह-नाधिश्रयणयोश्चेतनकर्तृकयोर्निमित्तत्वेन दर्शनात् । नदीजले च मेघानां चेतनानां निमि-त्तत्वेन दर्शनादित्युक्तम् । ततश्चतुर्थे एवं त्रिभिः सूत्रैः केवलप्रधानस्य कर्तृत्वं दूषयित्वा केवलस्य तस्य परिणामं दूषयति । केवलं प्रधानं चेत् स्वतः परिणमेत्, सर्वदैव परिण-मेत्, तथा सति प्रलयो न स्यात् । गुणाश्च साम्यावस्थयावस्थिताः स्वत एव संक्षुभ्येरन्, तदा सृष्टिस्थितिप्रलया युगपदेव स्युः, कार्यं च सात्त्विकादिभेदेन न विभज्येतेत्युक्तम् । ततः **पञ्चमे** ननु तृणपल्लवादयः पशुभक्षिताः स्वभावादेव क्षीरभावेन परिणमन्ते इत्याशङ्कायां समाधीयते । यदि तृणादिकं स्वभावत एव क्षीरभावेन परिणमेत, तदा शृङ्गेपि क्षीरं लभ्येत, तत्तु न लभ्यते, धेन्वादिकृता भक्षणक्रिया च तत्र सहकरोतीति न केवलस्य प्रधा-नस्य परिणामः शक्यवचन इत्युक्तम् । ततः **षष्ठे** 'तुष्यतु दुर्जन' इति न्यायेन केवलस्य प्रधानस्य परिणाममभ्युपगम्य पुनर्दूषयति । यदि केवलस्य प्रधानस्य परिणामोऽभ्युपगम्यते, तदापि स किमर्थः । न च पुरुषार्थ इति वक्तव्यम् । प्रयोजनप्रेक्षापूर्वकप्रवृत्तेश्चेतनधर्मत्वेन केवले प्रधाने सा न वक्तुं शक्यते । तस्माद् दूषणतादवस्थ्यम् । एवमनेनाधिकरणेन केवल-प्रधानकारणवादो निराकृतः ॥ १ ॥

ततो **द्वितीये चतुःसूत्रे पुरुषाश्मवदित्यधिकरणे** पुरुषप्रेरितप्रधानकार-णवादो निराक्रियते । पंग्वारूढोन्धो यथा गच्छति, तथा पुरुषाश्लिष्टं तत्प्रेरितं प्रधानं मह-दादिसृष्टिं करोतीत्येकं मतम् । अन्यच्च, यथा अयःकान्तसन्निधौ लोहस्य क्रिया, तथा पुरुषसन्निधानमात्रेण प्रधानस्य महदादिकर्तृत्वमिति द्वितीयम् । तत्पुनः सूत्रांशेनाशंक्य, अंशान्तरेण दूषयति । प्रधानपुरुषयोर्व्यापकत्वेन संसर्गस्य सन्निधेश्च सार्वदिकत्वात्पूर्वोक्त-दोषस्तदवस्थः । अनिर्मोक्षश्चाधिकः । तस्मान्मतद्वयमप्यसंगतमिति पूर्वसूत्रे उक्तम् । ततो **द्वितीयसूत्रे** प्रधानपुरुषयोर्मध्ये किं पुरुषस्यांगित्वं प्रधानस्य वा । तत्र नाद्यः, सर्वेषां पुरुषाणां समत्वेनैकस्य नियामकत्वम्, नान्येषामिति विभागो न स्यात् । न द्वितीयः, स्वत-न्त्रेण प्रधानेन पुरुषाय स्वदोषा न प्रदर्शनीयाः । तथा सति दुःखाभावेन वैराग्याभावात् मोक्षार्थं प्रयत्न उच्छिद्येत । तस्मादंगित्वमनुपपन्नमित्युक्तम् । ततस्तृतीये ननु गुणा एवं विभागशः प्रवृत्तिमन्तः, चलस्वभावत्वात्, चलद्दलदलवदित्येवमनुमाने पूर्वोक्ताः सर्वे दोषाः निराकृताः स्युरित्याशङ्क्य, तत्र दूषणमाह । एवं प्रकारान्तरेणानुमितावपि न दोष-परिहारः, कार्यक्रमानुपपत्त्यादिदूषणग्रासात् । नहि गुणैः कालो ज्ञायते, येन प्रथमं रजः

क्षुभ्यति, ततः सत्त्वम्, ततस्तम इति । अतो गुणेषु ज्ञानशक्तिवियोगात् सर्वमसमञ्जसमित्युक्तम् । ततश्चतुर्थे सांख्यमतवर्तिनां नानाविधानि मतानि लोके दृश्यन्ते । एकादशस्कन्धे उद्धवप्रश्ने भगवता चानूदितानि । अतः परस्परविरोधादपि तन्मतमसंगतमित्युक्तम् । एवं दशभिः सूत्रैरधिकरणद्वयेन प्रधानकारणवादो निराकृतः ॥ २ ॥

ततस्तृतीये सप्तसूत्रे महद्दीर्घवद्वेत्यधिकरणे न्यायवैशेषिकादिमतमवसरसंगत्या दूष्यते । ते हि परमाणूनां समवायित्वमंगीकृत्य, ईश्वरकृतात्तत्संयोगाद्भूतादिसृष्टिमंगीकुर्वन्ति । तत्र संयोगप्रकारो दूष्यते । परमाणूनां स्वरूपं ह्रस्वं परिमण्डलं च । तयोर्यद्युपर्युपरि संयोगः, तदा कार्यं यष्टिवन्महत्स्यात् । यदि तिर्यक्, तदा नौकादिवद्दीर्घं स्यात् । पुञ्जसंयोगस्तु तैर्नेष्यते । अतस्तन्मतमसंगतमिति प्रथमसूत्रेणोक्तम् । ततो **द्वितीयसूत्रे** परमाणुद्वयसंयोगः सार्वदेशिको वैकदेशिको वा । नान्त्यः । प्रदेशाङ्गीकारे प्रदेशवत्त्वस्य सावयवत्वव्याप्यत्वात्परमाणोः सावयवत्वमनित्यत्वं चापद्येत । नाद्यः । संयोगस्याव्याप्यवृत्तित्वनियमात् । किञ्च, कर्मजोऽवयवजश्च संयोगो द्विविधः । तत्र निरवयवत्वान्नावयवज इत्युक्तम् । अथ कर्मजः । तत्र किं स्वभावादुत्पद्यते, ईश्वरसिसृक्षया वा । तयोरुभयोरपि नित्यत्वात्सर्वदा सृष्टिप्रसङ्गः । तस्मान्न स वक्तुं शक्यते इत्युक्तम् । **ततस्तृतीये** समवायो दूष्यते । स हि संबन्धः, संबन्धिद्वयनिरूप्यः । तथा सति द्व्यणुकस्य पूर्वमभावेन स कथं वक्तुं शक्यत इत्युक्तम् । **ततश्चतुर्थे, किञ्च,** परमाणोः समवायिन ईश्वरेच्छाजीवादृष्टयोर्निमित्तयोश्च सृष्टिप्राक्काले सत्त्वात् सामग्रीसमवधानजन्यस्य परमाणुकर्मणस्तज्जन्यस्य संयोगस्य च सर्वदा आपत्त्या तयोरपि नित्यत्वापत्तिरित्युक्तम् । ततः **पञ्चमे** परमाणुनित्यत्वं दूष्यते । परमाणुषु तै रूपाद्यंगीक्रियते । यच्च रूपादिमत्, तदनित्यं लोके दृष्टम् । अतः परमाणुरनित्य इत्युक्तम् । ततः **षष्ठे** यदि परमाणुषु रूपादिकं नांगीक्रियते, तदा द्व्यणुकादिषु रूपाद्यभावापत्तिः । कारणगुणाः कार्यगुणारंभका इति तन्नियमात् । अतो रूपाद्यंगीकारे तदनंगीकारे च दोषादसङ्गतः परमाणुकारणवाद इत्युक्तम् । ततः **सप्तमे** सर्ववैदिकानादृतत्वादप्यसङ्गतः परमाणुकारणवाद इत्युक्तम् ॥ ३ ॥

ततश्चतुर्थे दशसूत्रे समुदाय उभयहेतुकेपीत्यधिकरणे। एकोनविंशतिसूत्रैर्बौद्धमतान्यवसरसंगत्या निराक्रियन्ते । तत्र सौगताश्चतुर्विधाः, वैभाषिकसौत्रान्तिकविज्ञानवादिमाध्यमिकभेदात् । तत्र पूर्वं वैभाषिकमतं निराक्रियते । तेषां मते समुदायद्वयं जीवभोगार्थं संहन्यते । तत्र पृथिव्यादिपरमाणुसमुदाय एकः । रूपादिस्कन्धसमुदायश्चापरः । रूपविज्ञानवेदनासंज्ञासंस्कारनामकाः पञ्चस्कन्धाः । तदुभयसंबन्धे जीवस्य संसारः, तदपगमे मोक्ष इति तेषां मतं प्रथमसूत्रे दूषयति । जीवस्य क्षणिकत्वेन तदुभयसमुदायाप्राप्तिः, तेन तदुक्तः संसारप्रकारो मोक्षश्चासंगत इत्युक्तम् । ततो **द्वितीये** क्षणिकत्वदूषणपरिहारं सूत्रांशेनोद्भाव्य, अंशान्तरेण दूषयति । तन्मते प्रत्ययः कारणसमुदायः । तत्र संस्कारः ।

सर्वक्षणिकत्वेपि मध्यपातिभ्योऽविद्यादिभ्यः स्कन्धप्रत्ययेभ्यो जन्मादयः, जन्मादिभ्यः प्रत्ययेभ्यश्चाविद्यादय इत्येवं चक्रवत्परिवृत्तावपि न कारणव्यक्तिं प्रति कार्यव्यक्तेः प्रत्ययता, किन्तु पूर्वपूर्वप्रत्ययस्योत्तरोत्तरप्रत्ययं प्रति कारणत्वम्। उत्तरोत्तरक्षणिकविज्ञानसंततेरेव जीवत्वम्, तादृशार्थ संततेरेव जडत्वम्। अतः क्षणिकविज्ञानसंतत्यात्मकस्य जीवस्य क्षणिकार्थ संतत्यात्मकस्य विषयेन्द्रियशरीराख्यरूपस्कन्धसंवन्ध इति संसारः। रागादिरूपसंस्कारस्कन्धविरामादेव तदभावरूपो मोक्षः। अतो न काप्यनुपपत्तिरितिसूत्रांशेनाशंक्य, अंशांतरेण तद्दूषयति। ये हि प्रत्यया उक्तास्ते सदृशीं संततिमुत्पाद्य नश्यन्ति। तथा सति विज्ञानसंततिरूपस्य जीवस्य पूर्वकालीनप्रियाप्रियसंस्पर्शाननुसन्धानात् कथं वेदनादिस्कन्धात्मसंसारसिद्धिः, कथं च तदभावसिद्धिः, स्थिरस्य कस्याप्यभावात्। तस्मादसंगतं तन्मतम्। ततस्तृतीये। किञ्च, तन्मते स्थितिक्षणस्याभावात्प्रथमक्षणे उत्पत्तिः, द्वितीयक्षणे नाश इति प्रत्ययत्वस्यैवासंभवः, संघातस्य चासंभव इत्युक्तम्। एवं त्रिभिः सूत्रैः पुञ्जस्य कारणता दूषिता। ततश्चतुर्थे। असत्ये हेतौ फलोत्पत्तिरित्याकस्मिकत्वपक्षं दूषयति। तेषां हि प्रतिज्ञाद्वयम्। एका तु सर्वं क्षणिकमिति प्रतिज्ञा। द्वितीया तु आलंबनप्रत्ययसमनंतरप्रत्ययाधिपतिप्रत्ययसहकारिप्रत्ययाख्यांश्चतुर्विधान् हेतून् प्राप्य विज्ञानस्कन्धात्मकं चित्तं वेदनास्कन्धात्मकाश्चैत्ता उत्पद्यन्त इति। तत्र द्वितीयांगीकारे वस्तुनः क्षणान्तरसंवन्धात्प्रथमप्रतिज्ञा नश्यति। द्वितीया चेन्नांगीक्रियते, तदा प्रतिनियतहेत्वभावात्सर्वं सर्वतो युगपदेव स्यात्। तस्मात्तदसंगतमित्युक्तम्। ततः पञ्चमे एवं तदुक्तमुत्पत्तिप्रकारं दूषयित्वा नाशप्रकारं दूषयति च। तत्र तेषां मते पञ्चपदार्थाः। एनं नाशयामीति बुद्धिपूर्वको विनाशः प्रतिसंख्यानिरोधः। तां विना यो नाशः स अप्रतिसंख्यानिरोधः। आकाशश्च। एतत्त्रयं निरूपाख्यम्। अवस्त्विति यावत्। तत्राकाशस्वरूपं तद्दूषणसूत्रे वाच्यम्। क्षणिकं संस्कृतं चेति पञ्च। तत्र क्षणिकं संस्कृतं चेति द्वयं पूर्वसूत्रेषु दूषितम्। अधुना निरोधद्वयं दूष्यते। तन्मते पदार्थाः सर्वे क्षणिकाः सदृशसंतानंजननस्वभावाः। क्षणिकानां च नाशकसंवन्धो न पूर्वं दृष्ट इत्यन्त्यानामपि पदार्थानां नाशकसंवन्धाभावात्पूर्ववदेव संततिप्रतिबंधाभाव इत्यविच्छेदादित्युक्तम्। एवमत्र कार्यविचारेण निरोधद्वयं दूषितम्। ततः षष्ठे तद्द्वयस्वरूपविचारेण तद्दूषयति। तत्र वैभाषिकाः सौत्रान्तिकाः योगाचाराश्च उक्तनिरोधैकदेशभूतेऽविद्याविनाशे मोक्षस्वदर्शनोक्तरीतिको भवतीति मन्यन्ते। तदसंगतम्। अविद्या(या)निर्हेतुके नाशेंगीक्रियमाणे तन्मतीयसाधनविधायकशास्त्रवैफल्यम्। सहेतुकनाशांगीकारे निर्हेतुकत्वप्रतिज्ञाहानिरित्युभयथापि दोष इत्युक्तम्। एवं सूत्रद्वयेन तदुक्तनाशप्रकारो दूषितः। ततः सप्तमे आकाशं दूषयति। तेषां मते आवरणाभाव एवाकाशः। सोपि निरूपाख्यः। तादृशेपि भूतान्तरवद्वस्तुत्वव्यवहारस्याविशिष्टत्वात्। अत्र श्येनः, अत्र श्येन इत्यादिव्यवहारस्य तत्रापि दर्शनात्। अवकाशरूपेण प्रत्यक्षत्वाच्चावस्तु-

त्वमसंगतमित्युक्तम् । ततोऽष्टमे पुनःसंक्षेपेण क्षणिकवादं निराकरोति । सर्वत्र स एवाय-मिति प्रत्यभिज्ञा दृश्यते । क्षणिकत्वे तु तस्य नष्टत्वात्कालान्तरे प्रत्यभिज्ञा बाध्येत । तस्माद-सङ्गतः क्षणिकवाद इत्युक्तम् । ततो **नवमे** तदभिमतामभावाद्भावोत्पत्तिं निराकरोति । ते हि बीजोपमर्दं विनांकुरोत्पत्तिं, दुग्धोपमर्दं विना दध्युत्पत्तिमपश्यन्तो नष्टेभ्य एव बीजा-दिभ्यस्तत्तदुत्पत्तिं पश्यन्तः केवलादभावादेव भावोत्पत्तिं मन्यन्ते । तथाचालीकादेवोत्पत्ति-रिति सिध्यति । तदसंगतम् । दृष्टविरोधात् । यदि ह्यलीकादभावादेव केवलात्कार्यं स्या-त्तदा बीजाद्दधि स्यात्, दुग्धादङ्कुरं च । तत्तु न दृश्यते । तस्मान्नाभावाद्भावोत्पत्तिरित्युक्तम् । ततो **दशमे** यद्यभावादेव सर्वं स्यात्, तदा तस्य सर्वत्र सुलभत्वात् कृषिहलादिसाध-नरहितानामपि धान्यादिः सिध्येत् । तत्तु न दृश्यते । अतोपि नाभावाद् भावोत्पत्तिरि-त्युक्तम् । एवं दशभिः सूत्रैः वैभाषिकसौत्रान्तिकयोर्मतं निराकृतम् ॥ ४ ॥

ततः **पञ्चमे पञ्चसूत्रे नाभाव उपलब्धेरित्यधिकरणे** कारणांशे पूर्वं निराकृतो-पि विज्ञानवादी कार्यांशे निराक्रियते । विज्ञानवाद्येव योगाचारः । स हि बाह्यं प्रपञ्चं नीलं पीतं घट इत्येतत्सर्वं विज्ञानाकारं मन्यते, न तु बाह्यार्थोस्तीति । अनादिवासनयैव च भासत इति तन्मतम् । एवं यस्तेन बाह्यार्थाभाव उक्तः, स न युक्तः । यदि सर्वं ज्ञाना-कारमेवानादिवासनया भासेत, तदा वासनाया अन्तः विद्यमानत्वात् सर्वं सर्वदा सर्वत्र भासेत । तत्तु नास्ति । अतः कदाचित्क्वचिदुपलंभात् बाह्यार्थोस्तीति मन्तव्यमित्युक्तम् । ततो **द्वितीये** उपलब्धिमात्रेण वस्तुसत्त्वं चेत्तदा स्वप्नमायाभ्रमादिषु ये उपलब्धास्तेपि सत्याः स्युः । तस्मान्नोपलब्धिमात्रेण वस्तुसत्त्वं वक्तुं शक्यमित्याशङ्क्य निराकरोति । बाह्यः प्रपञ्चः स्वप्नादिविलक्षणः, बहुकालस्थायित्वात् । नहि तथा स्वप्नादिषु दृश्यते । तस्मात्तद्दृष्टान्तो-प्यसङ्गत इत्युक्तम् । ततस्**तृतीये** यत्तैर्बाह्यार्थं विनैव वासनया ज्ञानवैचित्र्यमंगीक्रियते, तत्र बाह्यार्थं विना वासनैवानुपपन्ना, बाह्यार्थस्यैव वासनाजनकत्वात् । तस्य च तन्मतेऽ-भावादित्युक्तम् । ततश्**चतुर्थे** वासनाया आधारभूतस्य, अहमित्याकारो रूपादिविषय इन्द्रियादिजन्योयं क्षणिकविज्ञानसंतानः कर्ता भोक्तेत्यभिमानवान् आलयविज्ञानाख्यः, तस्य क्षणिकत्वाद्वासनायाः आधारोपि न वक्तुं शक्यः । तस्मादपि तन्मतमसङ्गतमित्युक्तम् । ततः **पञ्चमे** सर्वथानुपपन्नत्वादपि तन्मतमसङ्गतम् । तेन माध्यमिकोप्यसंबद्धभाषित्वादु-पेक्षित इत्यपि सूचितम् । एवं पञ्चदशभिः सौगता निराकृताः ॥ ५ ॥

ततः **षष्ठे चतुःसूत्रे नैकस्मिन्नसंभवादित्यधिकरणे** विवसनस्य स्याद्वादिनो निराकरणम् । स हि स्यादस्ति, स्यान्नास्ति, स्यादस्ति नास्ति, स्यादवक्तव्यः, स्यादस्ति चाव-क्तव्यः, स्यान्नास्ति चावक्तव्यः, स्यादस्ति नास्ति चावक्तव्य इत्येवं सप्तभङ्गीं मन्यते । सप्तभङ्गी नाम सप्तानां भंगानां समाहारः । सा च सार्वत्रिकी । तदिदं प्रत्यक्षविरुद्धम् । न ह्यस्तिनास्त्यादिभंग एककालं सर्वेषां दर्शनगोचरीभवतीति । तस्मादसंभवन्नसङ्गतः ।

किञ्चेयं सप्तभंगी सार्वत्रिकीति तदुक्तसाधनेषु तदुपदेष्टृषु तीर्थंकरेषु तदुक्ते मोक्षरूपे फले चानुवर्तमाना सर्वेष्वेव तदुक्तेष्वनाश्वासं जनयतीत्यतोऽप्यसङ्गतस्तद्वाद इत्युक्तम् । ततो द्वितीयसूत्रे तदुक्तमात्मस्वरूपं दूष्यते । स हि आत्मानं कृत्स्नं मन्यते । सृष्टिं च परमाणुभ्योऽङ्गीकरोति । मोक्षे च निरावरण आत्मा तिष्ठतीति । तदिदं दूष्यते । परमाणुभ्य एव सृष्टयङ्गीकारेणात्मनो वस्तुपरिच्छेदाङ्गीकारादकात्स्न्यं सर्वत्वं न भवति । तथा च मोक्षदशायामवलोकाकाशवर्तित्वेन तत्कृतावरणसंभवान्निरावरणप्रतिज्ञाहानिः । किञ्च, सर्ववस्तुष्वात्माभावादात्मनामस्तिकायत्वप्रतिज्ञाहानिश्चेत्यर्थ इत्युक्तम् । ततस्तृतीये तदभ्युपगतो देहपरिमाणात्मवादो दूष्यते । स हि देहपरिमाण आत्मेति मन्यते । सूक्ष्मदेहे सूक्ष्मः । स एव स्थूलदेहे स्थूल इति । एवं पर्यायेण तत्तत्परिमाणांगीकारे अवयवोपचयापचयाभ्यामात्मनोपि विकारापत्तिः । संकोचविकाशेपि विकारस्य दुःपरिहारत्वादित्युक्तम् । ततश्चतुर्थे तदुक्तमात्मपरिमाणमेव दूष्यते । स हि मोक्षावस्थावस्थितजीवस्य परिमाणं नित्यं वदति । तदग्रे देहाभावात् । संसारावस्थायां त्वनित्यम् । तथा सति संसारावस्थायां चार्वाकवदात्मन अनित्यत्वापत्तिः । तथा सति मोक्षः कस्य स्यात् । अतः संसारावस्थायामपि तस्य नित्यं परिमाणमङ्गीकार्यम् । अणु वा महद्वा । तथा सति देहपरिमाणात्मवादस्त्वसङ्गत इत्येवं दूषितमित्युक्तम् ।

एतेषु षट्स्वप्यधिकरणेषु ब्रह्म जगदुपादानं न वेति सन्देहः, तत्तन्मतविरोधः सन्देहबीजम्, नेति पूर्वः पक्षः, सर्वसमयानामयुक्तत्वाद् ब्रह्मैवोपादानमिति सिद्धान्तो ज्ञेयः । षष्ठे तु ब्रह्मैव विरुद्धधर्माधारम्, नेतरदिति नियमो युक्तो न वेति सन्देहे, स्याद्वादिभिः सर्वत्र तथाभ्युपगमान्नेति पूर्वः पक्षः, स्याद्वादस्यासंगतत्वाद्ब्रह्मैव तथेति नियमो युक्त एव, श्रुत्या भक्तप्रत्यक्षेण च प्रमितत्वादिति सिद्धान्त इति प्रकारान्तरमधिकं ज्ञेयम् ॥ ६ ॥

ततः **सप्तमे पञ्चसूत्रे पत्युरसामञ्जस्यादित्यधिकरणे** नैयायिकवैशेषिकहैरण्यगर्भपातञ्जलकापालिककालामुखपाशुपतशैवा ईश्वरस्य निमित्तमात्रत्वं मन्यन्ते, न तूपादानत्वम्, तद्दूषयति । यदीश्वरः निमित्तमात्रं स्यात्तदा केषाञ्चित्सुखं केषाञ्चिद्दुःखं ददद्विषमो निर्घृणश्च स्यात् । अतोसामञ्जस्यात्तन्मतमसङ्गतम् । ततो द्वितीये तन्मते जीवब्रह्मणोर्विभुत्वादजसंयोगस्य वक्तुमयुक्तत्वेन पतित्वानुपपत्तिः । यदि च संबन्धोऽङ्गीक्रियेत, तदापि विभुत्वनित्यत्वाभ्यां तुल्यत्वापत्त्या नियम्यनियामकभावानुपपत्तेः संबन्धानुपपत्तिरित्युक्तम् । ततस्तृतीये ईश्वरः शरीरं किञ्चिदाधारं चाधिष्ठाय करोति, तद्विना वा । आद्ये तन्नित्यमनित्यं वा । आद्ये परमाणुपुञ्जरूपस्य तस्य कार्यानिर्वाहकत्वम्, अवयवित्वाभावात् । द्वितीये तु जन्यत्वम् । तथा सति तत्कर्तुर्निर्वक्तुमशक्यत्वादनवस्थापत्तिः । अथाशरीर एव करोतीति मतम्, तदा तु मुक्तानामिव तस्यापि कर्तृत्वानुपपत्तिः । अतोधिष्ठानानुपपत्त्या तन्मतमसङ्गतम् । ततश्चतुर्थे यथा जीवोऽशरीर एवेन्द्रियादीनि करणान्यधितिष्ठति, निय-

मयति, तथेश्वरोप्यशरीर एव जीवान् नियमयिष्यतीति सूत्रांशेनाशङ्क्य, सूत्रांशेन समाहितम्। यदि जीवदृष्टान्तेन तथाङ्गीक्रियते, तदा तद्दृष्टान्तेनैव तस्य सुखदुःखभोगाद्यापत्तिः। (ततः पञ्चमे तैर्जडजीवनियमनार्थं हीश्वरोऽभ्युपगम्यते। नियमनं चेयत्तायां संभवति। ततश्च तेषामियत्तापत्तिः। तथा सति तेषामन्तवत्त्वम्। इयत्तापरिच्छिन्नेषु घटादिष्वन्तवत्त्वस्य दृष्टत्वात्। एतद्दोषपरिहाराय जीवानां व्यापकत्वमसंख्येयत्वं चाङ्गीक्रियते, तदा असंख्येयत्वस्य सर्वाज्ञेयत्वनियमात् सर्वतद्विषयकज्ञानस्येश्वरेऽभावेनासर्वज्ञता स्यात्।) तदनापत्तौ नियामकाभावादित्युक्तम्। तेनेश्वरविषयेपि तन्मतमसङ्गतमित्युक्तं भवति ७॥

ततोऽष्टमे चतुःसूत्रे **उत्पत्त्यसंभवादित्यधिकरणे** पाञ्चरात्रमते योंशो हि श्रुतिविरुद्धः सोंशो दूष्यते। पञ्चरात्रस्य भगवत्प्रणीतत्वेपि तावतोंशस्य बुद्धिपूर्वकमेव गौतमशसानामृषीणामर्थे स्थापनात्। सोंशस्त्वयम्। ते हि परब्रह्मणो वासुदेवात् संकर्षणस्य जीवस्य, तस्मात्प्रद्युम्नस्य मनसः, ततोऽनिरुद्धस्याहंकारस्योत्पत्तिं वदन्ति। तेषां चतुर्णां व्यूहतां च वदन्ति। तदेतच्छ्रुतिविरुद्धम्। एवमुत्पत्तौ व्यूहत्वासंभवात्। व्यूहत्वे चैवमुत्पत्त्यसंभवात्। जीवोत्पत्तौ मोक्षस्याप्यसंभवात्। तस्मादयमंशो विरुद्ध इति पूर्वसूत्रे दूषितः। ततो द्वितीये संकर्षणात्प्रद्युम्नोत्पत्तिर्दूष्यते। कर्तुर्जीवात् करणस्य उत्पत्तिर्लोकविरुद्धा; मनसः करणादहंकारोत्पत्तिरपि तथा। अतः प्रद्युम्नादनिरुद्धोत्पत्तिरप्यसंगता। ततस्तृतीये तेषां सर्वेषां परमेश्वरत्वं चेदङ्गीक्रियते, तदा अनेकेश्वरत्वापत्तिरित्युक्तम्। ततश्चतुर्थे शाण्डिल्यश्चतुर्षु वेदेषु परं श्रेयः अलब्ध्वा इदं शास्त्रमधीतवान्। तथा तप्तचक्रादिधारणं च तत्र विहितम्। तदेतच्छ्रुतिविरुद्धम्। तप्तचक्रादिधारणस्य पुराणेषु शूद्रधर्मत्वेनोक्तत्वात्। वेदेषु परमश्रेयोलाभाभावकथनस्यापि तथात्वात्। तस्मादेतत्सूत्रचतुष्टयोक्तं दूष्यं यत् तद्वेदविरुद्धम्। एवं स्मृतिषु वेदविरुद्धांशदूषणेन सर्वाण्येव वेदविरुद्धानि शास्त्राण्युपलक्षणविधया दूषितानि ज्ञेयानि॥ ८॥

इति श्रीवल्लभाचार्यचरणदासस्य पीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां द्वितीयाध्यायस्य द्वितीयः पादः।

अथ ततस्तृतीये पादे पूर्वं क्रमसृष्टौ भूतोत्पत्तिप्रकारस्तत्स्वरूपं च विचार्यते।

तत्र प्रथमे सप्तसूत्रे **न वियदित्यधिकरणे** आकाशोत्पत्तिर्विचारिता। तत्र छान्दोग्ये तेजआदिका सृष्टिः, तैत्तिरीयके आकाशादिका, तत्रासृजतेति पदाभावादाकाशस्योत्पत्तिः संदिग्धा। तत्र प्रथमसूत्रे आकाशस्योत्पत्तिः छान्दोग्ये न श्रूयते। तस्मान्नोत्पत्तिरित्याशंकितम्। ततो द्वितीये तैत्तिरीये द्वितीये सृष्टिप्रकरणे 'इदं सर्वमसृजते'ति श्रावणात् पूर्वं 'चात्मन आकाशः संभूत' इति कथनादस्त्युत्पत्तिरित्युक्तम्। तेन छान्दोग्येपि तत्सृष्टिरनुमातव्येति सिध्यति। ततस्तृतीये आकाशस्य निरवयवत्वेन व्यापकत्वेन चाकाशस्यो-

त्पत्तिर्न सभवति। तस्मादाकाशोत्पत्तिर्गौणीत्याशङ्कितम्। ततश्चतुर्थे 'वायुश्चान्तरिक्ष चे'ति श्रुतावमृतत्वश्रवणादपि नोत्पत्ति सभवतीत्युक्तम्। तत पञ्चमे ननु तैत्तिरीये सभूत इतिपदस्य सर्वत्रानुवृत्तिदर्शनादेकत्र गौणी, अन्यत्र मुख्या, सभूतिपदस्य वृत्तिरिरिति न वक्तु शक्यम्। युगपद्वृत्तिद्वयविरोधादित्याशक्य, यथा 'तपसा ब्रह्म विजिज्ञासस्व, तपो ब्रह्मे' तिश्रुतो एकस्येव ब्रह्मशब्दस्यैकत्र मुख्या, तपसि गौणी, तथात्रापि पदावृत्त्या विरोधाभावो भविष्यतीत्युक्तम्। एव त्रिभि सूत्रे पूर्वपक्षमुक्त्वा, **षष्ठे सप्तमे** च समाधानमाह। तत्र स्यादेव यदि छान्दोग्योक्ता एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा न बाध्येत। तत्रैकविज्ञानेन सर्वविज्ञान प्रतिज्ञाय दृष्टान्ते कार्यकारणभावेन तद्युत्पादितम्। तदनङ्गीकारे तद्बाध्येत। तस्मादाकाशोत्पत्तिरङ्गीकार्यैवेत्युक्तम्। तत **सप्तमे** ननु निरवयवत्वादीना बाधकानामुक्तत्वात्सा कथ सभवतीत्याशङ्कायाम्, आकाशो नोत्पद्यते, निरवयवत्वादित्येव साधने, उत्पद्यते लौकिकव्यवहारविषयत्वादित्येव साधने, उत्पद्यते, लौकिकव्यवहारविषयत्वादित्येव सत्प्रतिपक्षत्वेन युक्तीनामप्रयोजकत्वमुक्तम्। तस्माच्छ्रुत्युक्ता आकाशोत्पत्तिरङ्गीकार्येत्युक्तम् ॥ १ ॥

ततो **द्वितीये एकसूत्रे एतेन मातरिश्वेत्यधिकरणे** एवमेव वायूत्पत्तिरिति साधितम् ॥ २ ॥

ततोग्रिमसूत्रे ब्रह्मणोप्युत्पत्तिरस्त्विति वितण्डयाशङ्क्य, मूलभूतस्य सत नित्यत्वव्यापकत्वयोर्निरङ्कुशत्वादुत्पत्तिर्न सभवतीत्युक्तम् ॥ ३ ॥

ततश्चतुर्थे **एकसूत्रे तेजोत इत्यधिकरणे** वायुतस्तेजस उत्पत्ति समर्थिता ॥४॥

तत **पञ्चमे एकसूत्रे आप इत्यधिकरणे** तेजसं अपामुत्पत्ति समर्थिता ॥ ५ ॥

तत **षष्ठे एकसूत्रे पृथिव्यधिकारेत्यधिकरणे** छान्दोग्ये अद्भ्य सकाशादन्नोत्पत्तिरुक्ता, तैत्तिरीये च पृथिव्युत्पत्तिरिति विरोधपरिहारार्थमन्नशब्देन पृथिव्येवोच्यते। छान्दोग्ये भूताधिकारात् 'यत्कृष्ण तदन्नस्ये'ति नीलरूपकथनात्तैत्तिरीये अद्भ्य पृथिवीति शब्दान्तराच्चेत्युक्तम् ॥ ६ ॥

तत **सप्तमे एकसूत्रे तदभिध्यानादेवेत्यधिकरणे** आकाशभावापन्नात्परमेश्वराद्वायोरुत्पत्ति, एव वाय्वादिभावापन्नादग्रेपि तेजआदीना ज्ञेया। सर्वकर्तृत्वस्य ब्रह्मलिङ्गत्वादित्युक्तम् ॥ ७ ॥

ततोष्टमे **एकसूत्रे विपर्ययेणेत्यधिकरणे** प्रसङ्गात्प्रलयप्रकारो विचारित। क्रमसृष्टौ येन क्रमेणोत्पत्तिस्तद्विपरीतक्रमेण प्रलय इत्युक्तम् ॥ ८ ॥

ततो **नवमे द्विसूत्रे अन्तरा विज्ञानमनसीत्यधिकरणे** विज्ञानशब्देन जीव मनश्च एतयोरपि क्रमेण मध्ये उत्पत्तिरिति सूत्राशेनाशक्य, अशातरेण समाहितम्। विज्ञानमयो जीवात्मक, मनोमयस्तु वेदात्मकस्तैत्तिरीये उक्त। अतस्तयोरुत्पत्तिर्न वेदामि-

प्रेता। नामरूपव्याकरणात्मिकायां सृष्टौ जीवस्य करणत्वेन वेदस्य च द्वारत्वेन तत्पूर्वभावितया सृष्टावुत्पत्त्यभावात् । यद्यपि न्यूनांशपूरणाय प्राणेन्द्रियमनसां क्वचिदुत्पत्तिर्वक्तव्येति चेत् ? पुराणानां श्रुत्युपबृंहणत्वात्तदनुसारेणाकाशात्पूर्वमेव तत्कारणभावापन्नाद्ब्रह्मण एवेति जानीहि। ततो द्वितीये ननु विज्ञानमयस्य जीवस्यानुत्पत्तौ सर्वव्यवहारोच्छेदप्रसङ्ग इत्याशंक्य, जीवस्यापि स्थावरजंगमशरीरे समागमरूपोत्पत्तिस्तु भवत्येव, न तु स्वरूपोत्पत्तिरूपा । अतो न व्यवहारोच्छेद इत्युक्तम् । तेन जीवोत्पत्तिर्मौक्तेति सूचितम् ॥ ९ ॥

ततो दशमे एकसूत्रे **नात्माऽश्रुतेरित्यधिकरणे** जीवस्य स्वरूपत उत्पत्तिर्निवारिता । देवदत्तो जात इत्यादौ देहोत्पत्तेरेव श्रवणेन जीवोत्पत्त्यश्रवणात् । 'न जायते न म्रियते वा विपश्चि'दित्यादिषु जन्ममरणाभावश्रावणेन नित्यत्वबोधनाच्चेति ॥ १० ॥

तत एकादशे एकसूत्रे **ज्ञोत एवेत्यधिकरणे** जीवो ज्ञानस्वरूपो ज्ञानधर्मा च विज्ञानमयः, 'विज्ञानं यज्ञं तनुते' इत्यादिस्वरूपबोधकश्रुतिभ्यः । 'न पश्यो मृत्युं पश्यति' 'द्रष्टा श्रोता मन्ते'त्यादिज्ञानधर्मत्वबोधकश्रुतिभ्यश्चेत्युक्तम् ॥ ११ ॥

ततो द्वादशे दशसूत्रे **उत्क्रान्तिगत्यागतीनामित्यधिकरणे** तत्र जीवस्य नित्यत्वेन मध्यमपरिमाणस्य वक्तुमशक्यत्वात्परमाणु वा परिमाणं महद्वा संभवति। तत्र किं युक्तमित्याकांक्षायां परिमाणं विचारितम्। तत्र **प्रथमसूत्रे** 'स यदास्माच्छरीरादुत्क्रामती'ति 'ये के चास्माल्लोकात्प्रयान्ती'ति 'तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण' इति श्रुतिषु उत्क्रान्तिगत्यागतिश्रावणात् जीवोऽणुरित्युक्तम् । ततो द्वितीये 'ऊर्णनाभिर्यथा तन्तून्सृजते हरत्यपि, जाग्रत्स्वप्ने तथा जीवो गच्छत्यागच्छते पुन'रिति श्रुताविन्द्रियरहितस्य केवलस्यैव गत्यागतिश्रवणादपि तथेत्युक्तम् । ततस्तृतीये जीवोऽणुर्भवितुं नार्हति, 'स वा एष महानज आत्मा योयं विज्ञानमयः प्राणेष्वि'ति विज्ञानमयस्य जीवस्य महत्त्वश्रावणात् जीवो नाणुरिति सूत्रांशेनाशंक्य, अंशान्तरेण समाहितम् । उक्तश्रुतेर्ब्रह्मप्रकरणपठितत्वान्न तया जीवमहत्त्वसिद्धिरित्युक्तम् । ततश्चतुर्थे 'स्वयं विहत्य स्वयं निर्माये'ति स्वप्नविषयकश्रुतौ स्वशब्दः जीवस्याणुत्वं बोधयति । स्वप्ने शरीरमध्ये तावत्परिमाणस्य व्यापकस्य च विहारकर्तृत्वासंभवात् । 'वालाग्रशतभागस्य शतधा कल्पितस्य तु भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते' इतिश्रुतौ जीवमुपक्रम्य तत्परिमाणबोधनाच्चाणुरित्युक्तम् । ततः **पञ्चमे** अणोर्जीवस्य सर्वशरीरव्याप्तिः कथं संगच्छते इत्याशंकायां यथा स्वल्पश्चन्दनखण्डः महाकटाहे तप्ततैले निक्षिप्तस्तैलं शीतलं करोति, तथा जीवोपि सामर्थ्यात्करोतीति व्याप्तौ युक्तिरुक्ता । ततः **षष्ठे** ननु चन्दनस्यावस्थानं प्रत्यक्षतो निश्चितम्, तेन तस्य तथात्वम् । जीवस्य स्थितिस्तु नैकत्र निश्चितेति स दृष्टान्तो न वक्तुं शक्यते इति सूत्रांशेनाशंक्य, 'गुहां प्रविष्टा'वितिश्रुत्या जीवस्य हृदि स्थितिः शास्त्रान्निश्चितेति न दृष्टान्तवैषम्यमित्युक्तम् । ततः **सप्तमे** जीवस्य यो गुणश्चैतन्यं तेन जीवः सर्वशरीरं व्याप्नोति । यथा मणेः कान्ति-

देहुदेशव्यापिनी, तद्वदित्युक्तम् । ततोऽष्टमे चैतन्यगुणस्य स्वाश्रयाधिकदेशवृत्तित्व चम्पकादिगन्धवदवगन्तव्यमित्युक्तम् । ततो **नवमे** चैतन्यगुणेन सर्वशरीरव्याप्तौ कौशीतकिब्राह्मणे 'हिता नाम पुरुषस्य नाड्य' इत्यादिना तासा नाडीनामणुत्व तासु जीवस्य स्थितिं चाभिधाय, स एष इह प्रविष्ट 'आलोमभ्य आनखाग्रेभ्य' इत्यनेन व्याप्तिं प्रदर्शयति । तस्मात्सामर्थ्येन गुणेन च व्याप्तिरुपपन्नेत्युक्तम् । ततो **दशमे** 'प्रज्ञया शरीर समारुह्ये'ति श्रुतौ प्रज्ञाया करणत्वनिदेशात्स्वरूपचैतन्याद्भिन्न गुणरूप चैतन्य निरूपितम् । अतो गुणेन व्याप्तिरुपपन्नेति साधितम् ॥ १२ ॥

ततस्त्रयोदशे चतुःसूत्रे **तद्गुणसारत्वादित्यधिकरणे** जीवे ब्रह्मत्वव्यपदेशो मुख्यो गौणो वेत्याशङ्कायाम् सुषुप्तिसाक्षिणि प्राज्ञे यथा ब्रह्मत्वव्यपदेशो गोणस्तथा 'प्रज्ञानघनस्तत्त्वमसी'त्यादावपि ब्रह्मगुणसारत्वाद्ब्रह्मत्वव्यपदेशो गोण इत्युक्तम् । ततो **द्वितीये** ननु नीचस्यात्युत्कृष्टत्वव्यपदेशो न युक्त । न च प्राज्ञवदिति वाच्यम् । तथा सति प्राज्ञवत्तिरोहित स्यात् । तथा सति किं व्यपदेशेनेत्याशङ्क्य, समाधानमाह । यावदात्मा वर्तते, तावत्सर्वोत्कृष्टत्व तस्य स्फुरति । अर्थादात्मा नित्य इति सर्वदैव स्फुरति । तस्मान्न दोष इत्युक्तम् । ततस्तृतीये (ननु) जीवे आनन्दांशाभिव्यक्त्या ब्रह्मधर्माविर्भाव इत्युक्तम् । तन्न युक्तम् । आनन्दांशस्य पूर्वमसत्त्वेन पश्चाज्जन्यत्वात्, जन्यत्वेन नश्वरत्वेन च व्याप्त्या तस्य नश्वरत्वप्रसङ्गादित्याशङ्क्य, यथा बालकस्य सदेव पुंस्त्व यौवनेऽभिव्यज्यते, तथा पूर्वं सूक्ष्मरूपेण वर्तमान एवानन्दो ब्रह्मभावे सत्यभिव्यज्यते । अतो न तस्य नश्वरत्वमित्युक्तम् । ततश्चतुर्थे नन्विदानीं सच्चिदंशावेव प्रकटौ, मोक्षे त्वानन्दांशोऽपि प्रकटो भवतीत्येवमवस्थाभेदेन विभागे को हेतुरित्याशङ्क्य, तत्र हेतुमाह । यदीदानीमप्यानन्द प्रकट स्यात्तदा सच्चिदंशवदिदानीमप्यानन्द उपलभ्येत, संसारश्च न स्यात् । यदि कदापि न स्यात्तदा मोक्षावस्था निरुध्येत । नित्यनिरतिशयसुखाभिव्यक्तेरेव मोक्षत्वात् । यदि जीवो निरानन्द एव, ब्रह्मैवानन्दमयमिति नियमोऽङ्गीक्रियते, तदा 'ब्रह्मैव सन् ब्रह्माप्येती'तिश्रुतिर्निरुध्येत । अत प्रमाणाद्यविरोध एवमङ्गीकारे हेतुरित्युक्तम् ॥ १३ ॥

ततश्चतुर्दशेऽष्टसूत्रे **कर्ता शास्त्रार्थवत्त्वादित्यधिकरणे** जीवस्य कर्तृत्व व्यवस्थापितम् । सांख्यै प्रकृतिगतमेव जीवे तत् प्रतीयत इत्यङ्गीक्रियते, तन्निवृत्त्यर्थम् । तत्र **प्रथमसूत्रे** शास्त्रार्थवत्त्व हेतुरुक्त । वेदादिषु जीवमेवाधिकृत्याभ्युदयनिःश्रेयसफलाना यज्ञोपासनारूपाणा कर्मणा विज्ञानदर्शनादित्युक्तम् । ततो **द्वितीये** जीवस्य स्वतः कर्तृत्वाभावेऽपि समारदशाया प्रकृतिसंसृष्टत्वेन विवेकाग्रहात्प्राकृतकर्तृत्वग्रहणेऽपि न शास्त्रानर्थक्यमित्याशङ्क्य, विहारोपदेशादिति हेतुरुक्त । विहार स्वेच्छाक्रीडात्मकभोगरूपो दहरविद्यायामुपदिश्यते, स च दहरविद कर्तृत्वमाक्षिपतीति जीव एव कर्ता इत्युक्तम् । ततस्तृतीये 'तदेषा प्राणाना विज्ञानेन विज्ञानमादाये'तिश्रुतौ विज्ञानादानकथनेन जीवस्य

स्वातन्त्र्यबोधनात्तस्यैव कर्तृत्वमित्युक्तम् । ततश्चतुर्थे 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि चे'तिश्रुतौ साक्षादेव कर्मकर्तृत्वव्यपदेशात् । तच्चेन्नाङ्गीक्रियते, तदा श्रुतौ प्रथमानिर्देशो विरुध्येत । प्रथमानिर्देशाद्विपरीतस्तृतीयाविभक्तिनिर्देशश्चापद्येतेत्युक्तम् । ततः **पञ्चमे** यदि जीवस्य कर्तृत्वं स्यात्तदा स्वतन्त्रत्वात्स्वाहितं न कुर्यादित्याशंक्य, यथा चक्षुपेष्टमनिष्टं चोपलभते, तथैवेन्द्रियैः कर्म कुर्वन्निष्टमनिष्टं चाप्नोति । तथाच सांख्यवत् केवलभोक्तृत्वांगीकारेप्ययं दोपस्तुल्य इति कर्तृत्वे पर्यनुयोगो न कार्य इत्युक्तम् । ततः **षष्ठे** ननु स्वतन्त्रश्चेदीश्वरवत् स्वार्थमन्यथा न कुर्यादित्याशंक्य, अस्य शक्तिस्तिरोहितेति तथा करोति । तावता न कर्तृत्वहानिरित्युक्तम् । ततः **सप्तमे** जीवस्य शक्तितिरोभाव एव कुत इत्याशंक्य, जीवस्य क्रियाज्ञानशक्तियोगेन घृतद्रवत्ववत् सिध्यति । अतस्तदभावाच्छक्तितिरोभाव इत्युक्तम् । **ततोष्टमे** ननु कर्तृत्वभोक्तृत्वयोर्भिन्नधर्मत्वं दृष्टम्, यथैको गृहं निर्मिमीते, अन्यस्तु तद्भुंक्ते, तस्मान्नेदं साधीय इत्याशंक्य, यथा तक्षा रथं पीठं वा निर्माय तत्रारूढो विहरति, तथा तयोरैकाधिकरण्यस्यापि दर्शनान्न दोप इत्युक्तम् । एवमनेनाधिकरणेन जीवस्य कर्तृत्वं साधितम् ॥१४॥

ततः **पञ्चदशे द्विसूत्रे परात्तु तच्छ्रुतेरित्यधिकरणे** जीवस्य कर्तृत्वं स्वतो वा भगवतो वेत्याशंकायां भगवद्दत्तमेव कर्तृत्वं भगवदंशत्वाज्जीवे भासते । 'एप एव साधु कर्म कारयती'तिश्रुतेः । ब्रह्मणः सर्वरूपत्वान्न वैपम्यनैर्घृण्यादिदोप इति **प्रथमसूत्रे** उक्तम् । ततो **द्वितीयसूत्रे** क्रीडार्थं यो भगवता उद्यमः कृतो वर्तते, तदपेक्ष एव भगवान् स्वांशं जीवं तत्र तत्र तथा प्रवर्तयतीत्युक्तम् । दोपपरिहारस्तु सर्वरूपत्वादेव कृतः ॥ १५ ॥

ततः **षोडशे एकादशसूत्रे अंशो नानाव्यपदेशादित्यधिकरणे** जीवस्य ब्रह्मसंबन्धिरूपमुच्यते । तत्र **प्रथमसूत्रे** जीवो ब्रह्मणोंश एव । 'सर्व एवात्मानो व्युचरन्ति, कपूयचरणा रमणीयचरणा'इतिश्रुतौ बहुत्वेन व्यपदेशाद् 'ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा उते'तिश्रुतौ ब्रह्मत्वेन च व्यपदेशाच्च । नह्येकस्य जीवस्य बहुत्वं ब्रह्मरूपत्वं चेत्युभयमंशत्वं विना संगच्छते । तस्मादंश इत्युक्तम् । ततो **द्वितीये** 'पादोऽस्य विश्वा भूतानी'तिमन्त्रवर्णे जीवस्य पादत्वादप्यंशत्वमित्युक्तम् । ततस्तृतीये 'ममैवांशो जीवलोके जीवभूतः सनातन'इति स्मृतौ कण्ठत एवांशत्वमुक्तम् । एवं त्रिभिः सूत्रैर्जीवस्य ब्रह्मसंबन्धिरूपमुक्तम् । ततश्चतुर्थे जीवस्य ब्रह्मांशत्वे तद्द्वारा ब्रह्मण्यपि या दोपसंबन्धशंका सा द्वाभ्यां परिहृता इति न वक्तुं शक्यम् । जीवस्य दुःखित्वेन तदंशिभूते ब्रह्मण्यपि दुःखित्वादिप्रसंगात् । पाददुःखे पुरुपदुःखवदित्याशंक्य, तस्य परिहार उक्तः । तथाहि प्रकाशादीनां दुष्टप्रकाश्यसंसर्गेपि न सूर्यादेर्दुष्टत्वम्, तथा ब्रह्मणोपि । वस्तुतस्तु दुष्टप्रकाश्यसंसर्गेपि प्रकाशस्यापि न दुष्टत्वम् । कुतः सूर्यादेः,तथा जीवस्य ब्रह्मणश्चेत्यदोप इति । ततः **पंचमे** स्मृत्यादिदोपपरिहार उक्तः'तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः । न लिप्यते फलैश्चापि पद्मपत्रमिवांभसे'ति । 'कर्मात्माप्यपरो योसौ मोक्षबन्धैः स युज्यते' इति जीवस्य दोपसंसर्गो, न ब्रह्मण इति । ततः **षष्ठे**

ननु जीवस्य यदि ब्रह्मांशत्वम्, तदा विधिविषयत्वाभावात्कर्मसंबन्धाभावः फलासंबन्धश्चेत्याशंक्य, जीवस्यापि न स्वतो विध्यादिविषयत्वम्, किन्तु देहयोगादेव विधिनिषेधाधीनत्वमपि। तत एव यथा शवाग्निश्चण्डालोदकं तद्घटादिश्च परिह्रियते, शिष्टसंबन्धिनस्ते गृह्यन्ते, एवं जीवस्य देहसंबन्धकृतौ गुणदोषौ न स्वत इत्युक्तम्। तेनैव फलसंबन्धश्चेत्यपि साधितम्। ततः सप्तमे जीवस्य देहसंबन्धाद्गुणदोषसंसर्गकथनं न युक्तम्, कालिकनित्यप्रलयेन देहस्य प्रतिक्षणमन्यान्यत्वादाधानकाले ब्राह्मण्यस्य वक्तुमशक्यत्वेन कर्मानधिकारप्रसक्तेर्जीवैक्यमादायाधिकारसाधने तु देहान्तरेपि तदापत्तेरित्याशंक्य, देहान्तरे पूर्वदेहसंतत्यभावान्न पूर्वदैहिककर्मापत्तिः। एकस्मिन् देहे तु संततिसामान्यात्कर्माधिकारः सुघटः। ततः सिद्धे देहसंतत्यैक्ये तद्द्वारा जीवस्य गुणदोषसंसर्गौ न दुर्घटावित्युक्तम्। ततोऽष्टमे सच्चिदानन्दस्य ब्रह्मणोंशोपि तादृश एव वक्तव्यः तथासति कथं तस्य देहसंबन्ध इत्याशंक्य, जीवो ब्रह्माभास इत्युक्तम्। यथा अनाचारी ब्राह्मणो ब्राह्मणाभासः, अखिलब्राह्मणधर्माणामभावात्, एवमानन्दांशस्य तिरोधानेन ऐश्वर्यादीनां ब्रह्मधर्माणामभावात् तादृशाकारस्य चाभावात् जीवोपि ब्रह्माभासः। तथा चानन्दांशाभावाद्देहसंबन्ध इत्युक्तम्। एवं त्रिभिः सूत्रैर्जीवस्य स्वतो निर्दुष्टत्वे देहसंबन्धाद्दोषसंबन्धो देहसंबन्धहेतुश्च साधितः।

ततोऽग्रिमेषु त्रिषु यन्नैयायिकादिभिर्भोगव्यवस्थया जीवनानात्वं व्यापकत्वं चांगीकृतं तद्दूष्यते। तत्र प्रथमे तेषामात्मनां व्यापकत्वेन सर्वमनइन्द्रियदेहसंबन्धाद्येनकेनचित्करणग्रामेण यत् कर्म क्रियते, तज्जन्यादृष्टस्य सर्वत्र तुल्यत्वाददृष्टनियमो न स्यात्। तस्मात्तदुक्तप्रकारेण जीवव्यापकत्वनानात्वस्थापनमसंगतमित्यर्थः। ततो द्वितीये विलक्षणमनःसंयोगेन पूर्वोक्तं सर्वं साधयन्ति। तद्दूष्यते। तत्र दृष्टादृष्टकारणकलापसामान्ये एकस्यैव वैलक्षण्यम्, नान्यस्येत्यत्र हेतोर्वक्तुमशक्यत्वादिति बोधितम्। ततस्तृतीये जीवस्य व्यापकत्वेपि प्रदेशभेदान्न दोष इति ते वदन्ति। तद्दूष्यते। यदि तथांगीक्रियते, तदा यत्र कर्मकरणेन यस्मिन्प्रदेशेऽदृष्टमुत्पन्नं, तस्य प्रदेशस्य देशान्तरेऽभावात् तत्रोत्पन्नानां वस्तूनां भोगो न स्यात्, अदृष्टस्याचलत्वात्। तस्मान्न तदुक्तरीत्या तन्मतसिद्धिरिति त्रिभिः सूत्रैरुक्तम्। एवमेकादशभिः सूत्रैर्जीवस्य ब्रह्मसंबन्धिरूपमुक्तम् ॥ १६ ॥

इति श्रीवल्लभाचार्यचरणदासस्य पीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां द्वितीयाध्यायस्य तृतीयः पादः।

पूर्वपादे जीवस्य स्थूलशरीरनिष्पादकानां भूतानां स्वरूपमुत्पत्त्यादिकं च विचारितम्। अस्मिन् पादे इन्द्रियादीनां तदवसरसंगत्या विचार्यते।

तत्र प्रथमे पञ्चसूत्रे तथा प्राणा इत्यधिकरणे इन्द्रियाणां भूतवत् कार्यत्वं वा, जीववदंशत्वं वेति संदेहे जीववदंशत्वमिति निर्णीतम्। तत्र प्रथमसूत्रे पूर्वपादे नि-

१. प्रस्तुत इति पाठः।

रूपितजीवस्य ये चिदंशत्वातिरिक्ता धर्मा उत्क्रान्त्यादयस्ते सर्वैतिदिश्यन्ते । ततो **द्वितीये** ननु प्राणेषु नित्यत्वाश्रवणादुत्क्रान्त्यादिश्रुतिर्गौणी भविष्यतीत्याशंक्य, एकैव श्रुतिर्जीवे मुख्या, प्राणादौ गौणीति वक्तुं न शक्यत इत्युक्तम् । ततस्तृ**तीये** सृष्टेः पूर्वमपि प्राणादीनां स्थितिः श्रूयते । 'असद्वा इदमग्र आसी'दित्यारभ्य, 'प्राणा वा ऋषय' इत्यन्तेन तन्निगमनात् । ततश्च**तुर्थे** मनःपूर्वो वागुत्तर' इतिश्रुतेर्मनसो वाक्पूर्वरूपत्वात् । वाचश्च वेदरूपाया 'वाचा विरूपनित्यये'ति श्रुत्या नित्यत्वश्रावणात्तत्पूर्वरूपस्य मनसः कथमनित्यत्वं भवेत् । ततः **पञ्चमे** 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामती'तिश्रुतौ सप्तानां गतिभिर्जीवगतिर्विशेष्यते । अतो जीवसमानयोगक्षेमत्वात्तेषामपि जीवतुल्यत्वमित्युक्तम् ॥१॥

ततो **द्वितीये एकसूत्रे हस्तादय इत्यधिकरणे** उत्क्रान्तिश्रुतौ प्राणानां जीवेन सहोत्क्रमणकथनात् तेषां नित्यत्वमंशत्वं चांगीकृतम् । अतः परं ते कतीति विचार्यते । श्रुतौ क्वचित् सप्तोक्ताः, क्वचिदष्टौ, क्वचिन्नव, क्वचिद्दश, क्वचिदेकादशेति नानापक्षाः श्रूयन्ते । तद्विप्रतिपेधपरिहारार्थं विचारः । तत्र 'हस्तौ चादातव्यं चे'ति श्रुतौ हस्तोपस्थपायुपादानां सप्तभ्योधिकानां कथनात् चक्षुस्त्वग्घ्राणरसनश्रवणमनोवाचां सप्तानां पूर्वं कथनाच्चैकादश, न तु सप्तैवेत्युक्तम् । तेषु पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, उभयनायकमन्तःकरणं मन इत्येवं तेषां विभागो ज्ञेयः ॥ २ ॥

ततस्तृ**तीये एकसूत्रे अणवश्चेत्यधिकरणे** तेषां जीववत् परमाणुपरिमाणं विचारितम् ।

ततश्च**तुर्थे द्विसूत्रे श्रेष्ठश्चेत्यधिकरणे** मुख्यप्राणस्याणुत्वं विचारितम् । 'आनीदवातं स्वधया तदेक'मितिश्रुत्या अननात्मकत्वेन सृष्टेः पूर्वं सत्ता च प्रदर्शिता । ततो **द्वितीयसूत्रे** वायुर्वा, इन्द्रियक्रिया वा, मुख्यः प्राणोस्त्वित्याशंक्य, 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च, खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी'तिश्रुतौ वायुभिन्नत्वेन पृथगुपदेशात् । वृत्तिवृत्तिमतोरभेदेन क्रियाया इन्द्रियान्तःपातित्वे सिद्धे तेभ्योपि प्राणस्य पृथक्त्वात् भिन्न एवास्य इति साधितम् ॥ ४ ॥

ततः **पञ्चमे चतुःसूत्रे चक्षुरादिवत्त्वित्यधिकरणे** प्राणः स्वतन्त्रः, परतन्त्रो वेति शंकायाम्, मुख्यः प्राणोपि आसन्यत्वाद्भगवदधीनः । व्यवहारे तु जीवाधीनः । श्वेताश्वतरे इन्द्रियादिजयवत् तज्जयस्याप्यनुशासनादित्युक्तम् । ततो **द्वितीये** प्राणश्चेज्जीवाधीनः, तदा करणवत् किञ्चिद्व्यापारं कुर्वन् जीवोपकरणरूपो भवेत् । तत्तु न करोतीति कथं तस्य जीवोपकरणत्वमित्याशंक्य, मुख्यप्राणस्य यः व्यापाराभावः सः करणत्वाभावात् । उपकरणत्वं तु देहस्थितिरूपकार्यस्य करणात् । अतो व्यापाराभावेपि तस्य जीवोपकरणत्वं न विरुद्धमित्युक्तम् । ततस्तृ**तीये** ननु व्यापाराभावे तस्य जीवोपकारित्वमसमञ्जसमित्याशंक्य, श्रुतौ 'अहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामी'ति व्यपदिश्यते । अतो यथा मनसो द्वारभेदेन स्वरूपत एकादशवृत्तयस्तथा प्राणेपि पञ्चवृत्तयो व्यपदेशप्रामाण्यादंगीक्रियन्ते ।

ताभिरेव देहं स्थापयञ्जीवस्योपकरणं संभवतीत्युक्तम् । ततश्चतुर्थे तस्याप्यणुत्वं साधितम् ॥५

ततः **षष्ठे एकसूत्रे ज्योतिराद्यधिष्ठानं त्वित्यधिकरणे** वागादयः किं देवताधिष्ठानेन स्वस्वकार्यं प्रवर्तन्ते, स्वत एवेत्याशंक्य, आधिभौतिकाः आध्यात्मिकास्ते स्वस्वाधिदैविकाधीना इत्यग्न्यादिस्वस्वदेवताधिष्ठानेनैव प्रवर्तन्ते, न तु स्वत इति निर्णीतम् ॥ ६ ॥

ततः **सप्तमे द्विसूत्रे प्राणवतेत्यधिकरणे** अग्न्यादिदेवताः किं स्वत एव केवला वागादीनधितिष्ठन्ति, मुख्यप्राणसहिता वेत्याशङ्क्य, मुख्यप्राणसहिता एवाधितिष्ठन्ति । 'सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यत' इतिश्रुतेरित्युक्तम् । ततो **द्वितीये** प्राणस्य तत्संबन्धस्य च नित्यत्वमुक्तम् । तेन प्राणसहिता एव देवा वागादीनधितिष्ठन्ति । तेनैव जीवस्य भोगसिद्धिः, तेषां जीवोपकारकत्वं च सिद्धमित्युक्तम् ॥ ७ ॥

ततोऽष्टमे त्रिसूत्रे इन्द्रियाणि तद्व्यपदेशादित्यधिकरणे इन्द्रियाणां प्राणाधीनसर्वव्यापारत्वात् प्राणशब्दवाच्यत्वाच्च प्राणवृत्तिरूपाणीन्द्रियाणीत्याशंक्य, तत्त्वान्तराणीति सिद्धान्तितम् । 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च'ेति तत्त्वोत्पत्तिबोधकश्रुतौ प्राणाद्भिन्नतयेन्द्रियत्वेन व्यपदेशात् । नन्वेवं व्यपदेशमात्रेण भेदे सति प्राणापानादिव्यपदेशभेदादासन्योपि प्राणादिभ्यो भिन्नः स्यादिति नाशकनीयम् । प्राणादिशब्दानां पाचकपाठकादिवदासन्ये यौगिकत्वान्न तद्भेदकत्वम् । इन्द्रियशब्दस्य तु न यौगिकत्वम् । अतो नैतद्दृष्टान्तेनाशंकनीयमित्युक्तम् । ततोऽग्रिमसूत्रद्वये हेत्वन्तरमित्युक्तम् । यत्रापि प्राणशब्दप्रयोगस्तत्रापि भेदेन श्रूयते । 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामती'ति 'प्राणमुत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती'ति । वैलक्षण्यं च, प्राणस्य चेन्द्रियाणां च । 'सुप्तेषु वागादिषु प्राणो जागर्ति । स्वामिसेवकवचानेक वैलक्षण्यम्' ॥ ८ ॥

ततो **नवमे एकसूत्रे संज्ञामूर्तिक्लृप्तिरित्यधिकरणे** भूतभौतिकसृष्टिः परमेश्वरादेवेति निर्णीय, नामरूपव्याकरणमपि परमेश्वरादेवेति निर्णीयते । तत्र नामरूपव्याकरण लोके जीवानामेव दृष्टमिति हिरण्यगर्भादेव तद्व्याकरणमित्याशक्य, नामरूपव्याकर्ता परमेश्वर एव । छान्दोग्ये 'हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी'तिश्रुतौ नामरूपव्याकर्तृत्वेन त्रिवृत्कुर्वतः परमेश्वरस्यैवोक्तत्वात् । नामव्याकरणं हि वाक्साध्यम् । रूपव्याकरण क्रियासाध्यम् । वाक्क्रिये च शरीरं विना जीवस्य न संभवतः । शरीर नामरूपव्याकरणोत्तर भावि । तस्मान्न जीवस्तत्कर्ता, किन्तु परमेश्वर एव तत्कर्तेत्युक्तम् ॥ ९ ॥

ततो **दशमे द्विसूत्रे मांसादिभौममित्यधिकरणे** 'एतस्माज्जायते प्राण' इतिश्रुतौ प्राणस्येन्द्रियाणां च भगवतः सकाशात्सृष्टिरुक्ता । छान्दोग्ये तु 'अन्नमशितं त्रेधा विधीयत' इतिश्रुतौ मनःप्राणवाचां भौतिकत्वं श्राव्यते । 'अन्नमयं हि सौम्य मनः, आपोमयः प्राणः, तेजोमयी वागि'त्यनेन, 'एतस्माज्जायत' इतिश्रुत्युक्ताया उत्पत्तेः परम्पर-

याप्युपपद्यमानत्वात् । 'अन्नमय'मित्यादिश्रुतेस्तु मांसादिसाहचर्येण विशेषबोधकत्वात् । मनआदीनां भौतिकत्वमेवेति **प्रथमसूत्रेणा**शंक्य, **द्वितीयसूत्रे** तेषां तत्वान्तरत्वमेवेति स्थापितम् । मनःप्रभृतीनामन्नमयत्वादिकं तु अन्नादिपोषितत्वेनाप्युपपद्यते । 'पञ्चदशाहानि माशी'रित्याद्युपपादकदर्शनात् । सर्ववाक्ये साक्षात्सृष्टेरुक्तत्वेन तत्र परम्परायाः प्रवेष्टुमशक्यत्वात् । तस्मात्तत्त्वरूपाणि तानि भगवत एवेति सिद्धान्तितम् । एवमस्मिन्नध्याये सर्वोपि विरोधः परिहृतः ॥ १० ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां द्वितीयाध्यायस्य चतुर्थः पादः ।

द्वितीयाध्यायः समाप्तः ।

तृतीयोध्यायः ।

तृतीयाध्यायस्याधिकरणार्थसंग्रहः । ततस्तृतीयेऽध्याये जघन्यमध्यमाधिकारिणां साधनसंपत्तावुपनिषदां विद्याजनकता, अन्यथा तु सत्संप्रदायेपि परोक्षज्ञानजनकतैवेत्यतः **प्रथमे** पादेऽधिकारिणो जन्मनिर्धारः क्रियते । तत्र पञ्चाग्निविद्यया निष्पन्नदेहः स्वरूपतोऽधिकारीति तदर्थं तद्विद्यास्थाः पञ्चाप्याहुतयो विचार्यन्ते । तत्र ब्रह्मसंबन्धिविचारविशेषरूपत्वाच्छास्त्रसंगतिः । साधनविचारशेषत्वादध्यायसंगतिः । तत्राष्टावधिकरणानि ।

तत्र **प्रथमेऽधिकरणे** जीवेन्द्रियाणां होमाभावेनाशुद्धिमाशङ्क्य, तेषामपि शुद्ध्यर्थं जीवस्येतो लोकान्तरगमनावसरे संस्कृतभूतसूक्ष्मेन्द्रियसाहित्यं सप्तभिः सूत्रैः साध्यते । तत्र **प्रथमसूत्रे** संस्कृतभूतसूक्ष्मैः संपरिष्वक्त एव परलोकं गच्छतीत्युच्यते । ततो **द्वितीये सूत्रे** श्रुत्युक्तप्रश्ननिरूपणाभ्यामद्भिः संपरिष्वक्त एव गच्छतीति ज्ञायते, नतु भूतान्तरसंपरिष्वक्त इत्याशंक्य, अपां भूतत्रयात्मकत्वं साध्यते । ततस्**तृतीयसूत्रे**, प्राणस्यापि गमनं चोध्यते । ततश्चतुर्थे प्राणगमनस्याग्न्यादिभावश्रुत्या बाधमाशंक्य, तन्निवारणेन प्राणानां परलोकगतिः साध्यते । ततः **पञ्चमे** श्रुतौ श्रद्धापदान्नापां होम इत्याशङ्क्य, श्रद्धापदेनाप एवोच्यन्ते इति निर्धार्यते । ततः **षष्ठे** सूत्रे, सर्वे जीवास्तथा गच्छन्ति, उत ज्ञानोपयोगिन एवेत्याशंक्य, ज्ञानोपयोगिनो यज्ञादिकृतो गच्छन्तीति निर्णीयते । ततः **सप्तमे** तेषां होमेन सोमभावेऽनिष्टमाशंक्य, तन्निवार्यत इति । एवं प्रथमाहुतिः सफला विचारिता भवति ॥ १ ॥

ततो **द्वितीये चतुःसूत्रे कृतात्ययाधिकरणे**ऽवसरसंगत्या सोमभावोत्तरं वृष्टिभावं प्राप्नोतीति द्वितीयाहुतिर्विचार्यते । तत्र **प्रथमसूत्रे** सानुशयो वृष्टिभावं प्राप्नोतीति बोधनार्थमनुशयो विचार्यते । अनुशयो द्विविधः । 'यद्यत्र नः स्वर्गसुखावशेषित'मिति श्रीभागवतवाक्याद्भोगसाधकसामग्रीशेषरूपं यत् फलं तदात्मकः सुखलेशरूप एकः, कर्मशेषरूपो द्वितीय इति निर्णीतम् । ततो **द्वितीयसूत्रे** आचरणात्तत्तद्योनिप्राप्तिमाशंक्य,

चरणस्य पूर्वजन्मीनकर्मोपलक्षकत्वम्, नत्वग्रिमजन्मनि समीचीनकरणाहेतुत्वम्। तस्मादग्रिमार्थं कर्मशेषरूपोऽनुशयोऽवश्यमपेक्षणीय इत्युच्यते। ततस्तृतीयसूत्रे चरणस्य पूर्वजन्मीनकर्मोपलक्षकत्वे प्रयोजनाभावेन चरणश्रुतेरानर्थक्यप्राप्तौ तस्याः जन्मविधायकत्वमङ्गीकर्तव्यम्। तथा सति कर्मशेषरूपानुशयवैयर्थ्यमित्याशंक्य, निष्कामसकामभेदेन द्विविधानां कर्मिणां मध्ये निष्कामस्य पूर्वोक्तफलशेषरूपोनुशयः। द्वितीयस्य तु सुकृतदुःकृतकर्मशेषरूप इति तस्य दुःशरीरप्राप्तिः, 'सुखानन्तरं दुःख'मितिन्यायेनोपपद्यते, तन्निवारणार्थं चरणश्रुत्या शरीरप्राप्तिरिति बोध्यत इति दुःशरीरनिषेधार्थं सा धूममार्गमुपक्रम्योक्ता। अतो धूममार्गस्य तदपेक्षत्वान्न सा कर्मशेषरूपानुशयप्रतिषेधिका। तस्मान्न सोमभावापन्नस्य वृष्टिभाववाधः, अन्यथा तादृशशरीरप्राप्तेराकस्मिकता स्यात्, अतोनुशय आवश्यक इति निर्णीयते। ततश्चतुर्थे द्विविधकर्मशेषरूप एवानुशय इति बादरिमतम्। तेन मोक्षपर्यन्तमनुशयानुवृत्तिरिति बोध्यते। एवं द्वितीयाहुतिः सफला विचारिता॥ २॥

ततोऽ**निष्टादिकारिणामिति पञ्चसूत्रे तृतीयाधिकरणे** इष्टादिकारिव्यतिरिक्तानां पञ्चाहुतिधूममार्गयोः संबन्ध इति **प्रथमसूत्रे** आशंक्यते। तेन सर्वेषां सोमभावप्राप्त्यनन्तरं जन्मेत्याशंक्यते। ततो **द्वितीयसूत्रे** तन्निषिध्यते। यदि सर्वेषां सः स्यात्तदा यमगतिश्रुतिर्विरुध्येत। तस्मान्न सर्वेषां सोमभावः। ततः सूत्रद्वयेन स्मृत्यापि यमगतिः स्थाप्यते। ततः **पञ्चमे सूत्रे** चित्रगुप्तादीनामपि यमसेवकत्वं निर्णीयते। तेन यमगतेरपि सत्वान्न सर्वेषां सोमभावः, किन्तु मार्गद्वयस्थानामेवेत्युपोद्घातप्रसगाभ्यां निर्णीयते॥ ३॥

ततश्चतुर्थे चतुःसूत्रे **विद्याकर्मणोरित्यधिकरणे**। सर्वेषां चन्द्रलोकप्राप्तिः श्रुता। पञ्चाग्निविद्याप्रस्तावे यमगतिस्तु नोक्ता। अतो विद्यया कर्मणा सोममार्ग इति न यममार्ग इति आशंक्य, वेदान्ते गौणमुख्यफलभेदार्थं तत्कारणत्वेन विद्याकर्मणोरुक्तत्वान्न तृतीयमार्गबाधकत्वमिति **प्रथमसूत्रे** निर्णीयते। ततो **द्वितीये सूत्रे** 'जायस्व म्रियस्वे'तिश्रुत्युक्तस्य तृतीयमार्गत्वमाशंक्य, तस्मिन्मार्गे पुण्यपापभोगस्यातिस्वल्पत्वान्न तेन यममार्गबाध इत्युक्तम्। अयं च पञ्चाहुतिनियमो मर्यादामार्गे एव, न सर्वत्र चेति निर्णीतम्। ततः सूत्रद्वये स्मृतिलौकिकदर्शनाभ्यां यममार्गसत्ता साधिता। तेन 'जायस्वे'ति मार्गो विवेचकसापेक्षत्वात् यममार्गे एव प्रविशतीति साधितम्॥ ४॥

ततः **पञ्चमे त्रिसूत्रे तृतीयशब्दावरोध इत्यधिकरणे**। वृष्टेरन्नभावस्तृतीयाहुतेः फलम्। तत्र बीजावाप विना केवलवृष्टेरन्नासंभवात्प्रत्यक्षविरोधमाशङ्क्य, तृतीयाहुतौ देवहोमात्कारणभूतमेव जलं वर्षतीत्युच्यते। तस्माच्चान्नं श्रुतावेवोक्तम्। 'ता आप अन्नमसृजन्ते'ति। तस्मात्प्रत्यक्षस्य लौकिकत्वात्तद्विरोधो न दोषायेत्युक्तम्। ततो **द्वितीयसूत्रे**, 'वायुर्भूत्वा धूमो भवती'तिश्रावणात्ते वाय्वादयो जन्या इति तदनन्तरभाविनी वृष्टिरपि जन्या, अपामिवेति कारणभूतं जलं न वक्तुं शक्यत इत्याशङ्क्य, वाय्वाद्याकृतिमानेन स्वरूपान्य-

थाभावाभावाद्वायुभवनाद्युक्तिर्गौणी । अतस्तदनुरोधेन वृष्टौ जन्या आपो वक्तुमशक्याः । तस्मात्कारणभूता एव ता आप इति निर्बाधमित्युक्तम् । ततस्तृतीये सूत्रे, शीघ्रमेव वृष्टेः सकाशादन्नरूपो भवतीत्युक्तम् । तेन तृतीयाहुतिः सफला विचारिता ॥ ५ ॥

ततः **षष्ठे द्विसूत्रे, अन्याधिष्ठित** इत्यधिकरणे, अन्नाद्रेतोभवनरूपा चतुर्थी आहुतिर्विचार्यते । तत्रान्नस्य कण्डनपाकादौ क्रियमाणे जीवस्यापगमात्कथं जीवस्य रेतोभाव इत्याशंक्य, उप्ते बीजे पापिजीवान्तराधिष्ठितेऽन्नरूपेण जायमाने पश्चाद्वृष्टौ देवहुतौ जीवोऽन्ने प्रविश्यातिथिवन्निरभिमानस्तत्र तिष्ठतीति न तस्य कण्डनादिक्लेशः, किन्तु पापिन एव सः । न च तस्यापगमः शंकनीयः । सिद्धान्नादेर्बहुकालपर्युषितत्वे कृमिभावदर्शनात् । एवं तस्यान्नस्य भक्षणेपि पापिन एवान्नभूतस्य जरणादिक्लेशः, नास्य निरभिमानस्येति तस्य रेतोभावो युक्त इत्युक्तम् । ततो **द्वितीये सूत्रे** तस्मिन्नन्ने पापिजीवसहभावादन्नस्याशुद्धौ कथं तेन योग्यदेहसंपत्तिरित्याशंक्य, यथा वैदिकेन प्रोक्षणादिसंस्कारेण लौकिकव्रीहीणां शुद्धिः, तथा वैदिकेन देवकृतहोमरूपसंस्कारेण तस्यान्नस्य शुद्धिरिति । तेन योग्यदेहनिष्पत्तिः निष्प्रत्यूहेत्युक्तम् ॥ ६ ॥

ततः **सप्तमे एकसूत्रे रेतःसिगधिकरणे**, रेतसः पुरुषभावो विचारितः ॥ ७ ॥

ततोष्टमे **एकसूत्रे योनेःशरीरमित्यधिकरणे**, गर्भस्य न पुरुषत्वम्, किन्तु बहिर्निर्गतस्यैव पुरुषत्वमिति निर्णीतम् । अत्र सर्वत्रावसर एव संगतिरिति बोध्यम् ॥ ८ ॥

तेन जघन्याधिकारिणो देहनिष्पत्तिविचारः, मध्यमस्य च योगादिना देहसंपत्तौ पुनर्विचालनाभावाय वैराग्यविचारः पादार्थत्वेन सिध्यति । मुख्याधिकारिणां तु वरणादेव तत्सिद्धिरिति नात्र तद्विचार इति बोध्यम् ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां तृतीयाध्यायस्य प्रथमः पादः ।

अथ **द्वितीये पादे** जीवस्य स्वरूपतो मुक्तियोग्यता विचार्यते । प्रथमपादोक्ताया योग्यताया ज्ञानोक्तिरूपे साधने एव पर्यवसानात् । तदुत्तरं विषयनिश्चयश्च क्रियते । तेनाधिकारसिद्ध्यनन्तरं विषयस्य निश्चयो वेदान्तार्थरूपब्रह्मस्वरूपस्य शाब्दं परोक्षज्ञानं हृदि स्थिरीभवतीत्येतदर्थं पादारम्भः । तथा सति पादयोरेककार्यत्वं सङ्गतिः । आनन्तर्यनियामक उपजीव्योपजीवकभावश्चेति बोध्यम् । **अत्रैकादशाधिकरणानि** । तत्र प्रथमैस्त्रिभिः जीवस्य स्वप्नसुषुप्तिजाग्रदवस्था मुक्तियोग्यताज्ञापनार्थमुपोद्घातेन विचार्यन्ते । अन्तिमैरष्टभिः ब्रह्मस्वरूपम् ।

तत्र **प्रथमे षट्सूत्रे सन्ध्याधिकरणे** द्वाभ्यां स्वप्नसृष्टेर्भगवतस्तत्कर्तृत्वं च यद्बृहदारण्यके काठके च श्रावितं तत्सृष्टिसंबन्धो जीवस्य भवतीति निरूपिता शुद्धिर्व्यर्थेत्या-

शंक्य, तृतीये तस्याः सृष्टेः मायामात्रत्वेन मिथ्यात्वं साध्यते । तेन जीवस्य तत्कृतगुणदोषसंबन्धाभावान्न पूर्वोक्तशुद्धिनिरूपणस्य वैयर्थ्यम् । ततश्चतुर्थे स्वप्नसृष्टेर्मिथ्यात्वे तत्करणस्य किं प्रयोजनमित्याकांक्षाया स्वप्नस्य क्वचित् शुभाशुभसूचकत्वात्फलतः सत्यत्वम्, अन्यत्र तु तादृशभगवल्लीलाप्रदर्शनमात्रं प्रयोजनमित्युच्यते, तच्च वैराग्याय फलिष्यति । ततः पञ्चमे जीवस्यापि भगवदंशत्वात्कथं स्वप्ने दुःखसंबन्धः, दुःखाद्यभिमानो वेत्याकांक्षायां भगवदभिध्यानात् जीवस्यैश्वर्यादिषड्धर्मतिरोभावेन जीवस्य बन्धो भगवद्धर्मविपरीतधर्मवत्त्वं च भवति । तेन दुःखित्वादिकं तदभिमानश्च । ततो भगवदिच्छया कथञ्चिन्मोक्षश्चेति स्वमतमुक्तम् । ततः षष्ठे देहयोगाद्वा ऐश्वर्यादितिरोभावो बन्धदुःखादिकं चेति मतान्तरमुक्तम् । अस्मिन्पक्षे देहवियोगे सत्येवैश्वर्याद्याविर्भावः, पूर्वस्मिन्पक्षे तु देहसद्भावेऽपि भगवदिच्छया ऐश्वर्याद्याविर्भावो बन्धाभावश्चेत्यैश्वर्याद्याविर्भावदशायां दुःखित्वादिसर्वदोषाभावाद् मुक्तियोग्यता निष्प्रत्यूहेति सिद्धम् ॥ १ ॥

ततः **द्वितीये एकसूत्रे तदभावो नाडीष्वित्यधिकरणे** जीवस्य द्विविधा सुषुप्तिः । एका नाडीषु, द्वितीया सत्संपत्तौ । तत्र प्रथमायां दुःखाभावमात्रम्, द्वितीयायां तु सुखमपीति द्विविधायामपि सुषुप्तौ न प्रपञ्चसृष्टिरिति प्रसंगाद्विचारितम् ॥ २ ॥

ततस्तृतीये त्रिसूत्रे अतःप्रबोध इत्यधिकरणे प्रथमसूत्रे जाग्रदवस्थापि भगवत एव भवतीति, यत्र स्वपिति तत्रैव जागर्ति, पश्चाद्धृदयं समागच्छति चेति निरूपितम् । ततो द्वितीये सूत्रे स एव जीवः समायाति, अन्यो वेत्याशंक्य, कर्मानुस्मृत्यादिभिर्हेतुभिः स एव समायातीति निर्णीतम् । ततस्तृतीये सूत्रे मूर्च्छाविशेषेऽतिमुग्धे कर्मानुस्मृत्यादयो न संभवन्ति । तत्र स एवान्यो वेत्याशंक्य, तत्र स वाऽन्यो वेति संदेह एव पर्यवसतीति सिद्धान्तितम् । अयं च विचारः प्रसंगानुप्रसंगायात एव ।

एवमधिकरणत्रयेण स्वप्नसुषुप्तिजाग्रद्रूपावस्थात्रयं भगवत्कृतमेव । तत्र जाग्रति जीवस्य मात्रासंसर्गवारणार्थमुपनिषदर्थनिश्चय आवश्यक इति सूचितम् । एताश्च गुणतो बुद्ध्यवस्थाः । तत्र स्वप्नो राजसः, सुषुप्तिः तामसी, जाग्रदवस्था सात्त्विकी । जीवस्तु देहयोगेन स्वस्मिन्नभिमन्यते, तस्मादेक एव जीवः स्वप्नादिदोषसंबन्धरहितस्तादृशजन्मयुक्तो भगवज्ज्ञानरहितो ज्ञानाधिकारीति त्रिभिरधिकरणैः सिद्धमिति ज्ञेयम् ॥ ३ ॥

ततश्चतुर्थे त्रिसूत्रे उभयलिङ्गाधिकरणे ब्रह्मणः साकारत्वं निराकारत्वं चेत्युभयं सर्वत्र श्रूयत इति स्थानोपाधिकं तत्तदवच्छेदभेदेन च न वक्तुं शक्यत इत्युच्यते । न चोक्तप्रकारेण ब्रह्मभेदेङ्गीकृते न दोष इति वक्तुं शक्यम्, सर्वत्र ब्रह्मण एकस्यैव कथनाद्, भेददर्शने दोषकथनाच्च । एवमुभयलिङ्गविरोधे सिद्धे उपनिषदां पूर्वाध्यायद्वयोक्ता ब्रह्मबोधकता वक्तुं न शक्यत इत्याक्षेपसंगत्योक्तम् ॥ ४ ॥

१ दोषसंबन्धाभावादमन्नस्यादिति पाठः ।

ततः पञ्चमे पञ्चसूत्रे अरूपवदेव हीत्यधिकरणे एकदेशिमतेन समाधानमुच्यते । सत्यमुभयलिंगविरोधस्तथापि 'सर्वकामः सर्वगन्धः' इत्यादयो जडजीवधर्मा ब्रह्मण्युपदिश्यमाना उपसनार्था भवन्ति । न च जडस्य भगवत्कार्यत्वाज्जीवस्य भगवदंशत्वात्तद्धर्मा अपि भगवद्धर्मा एवेति कथमुपासनार्थत्वमिति शंक्यम् । 'बहु स्या'मितीच्छया भगवत एव कार्यरूपतयांशरूपतया चैकदेशेन भवनात्कारणरूपस्य, ततो भिन्नतया तस्मिन् रूपे जडजीवधर्मनिषेध एव युक्तः । तथा चाद्वैतपक्षे, जडजीवधर्माणामपि ब्रह्मात्मकत्वाद् ब्रह्मत्वमेव, न तु ब्रह्मधर्मत्वम्, अतः सर्वकर्मत्वादीनां ब्रह्मण्युपचार एव, अरूपवतः सर्वप्रपञ्चविलक्षणस्यैवास्थूलादिवाक्यैः प्रधानत्वेन निरूपणात् । ततो द्वितीयसूत्रे एवं ब्रह्मणः सर्वव्यवहारातीतत्वे शास्त्रवैफल्यम्, 'मनसैवैतदाप्तव्य'मित्यादिश्रुतिविरोधश्चेत्याशंक्य, यथा सौरः प्रकाशो व्यवहार्योऽव्यवहार्यश्च स्वतो न कर्तुं शक्यते, आगते तु सूर्ये मेघाद्यभावेन सान्निध्यात् व्यवहर्तुं शक्यते, तथा लौकिकवाङ्मनोभिर्ब्रह्म स्वतो न व्यवहर्तुं शक्यते, ईश्वरसंनिधाने तु शक्यते, अतोऽसन्निधाने सर्वव्यवहारातीतत्वम्, सन्निधाने तु धर्मवत्त्वेन व्यवहार्यत्वमिति न शास्त्रवैफल्यम् । नापि श्रुतिविरोधः । अन्यथा 'तं त्वौपनिषदं पुरुषं पृच्छामि' 'यतो वाचो निवर्तन्त' इत्यादिष्वन्यतरवैयर्थ्यं स्यात् । अतः सन्निधानासन्निधानाभ्यां सधर्मकत्वनिर्धर्मकत्वबोधनव्यवस्था मन्तव्येत्युक्तम् । ततस्तृतीयसूत्रे 'आसीनो दूरं व्रजति,' 'अपाणिपादो जवनो ग्रहीते'त्यादौ परस्परविरुद्धा अलौकिकधर्माः अकारणककार्यवचनान्विताः श्राव्यन्त इत्यव्यवहार्येपि तादृशधर्मसिद्ध्या शास्त्रवैफल्यनिरास इति किमर्थं सन्निधानासन्निधानाभ्यां व्यवस्थांगीक्रियते, अलौकिकानीन्द्रियाण्येव कुतो नांगीक्रियन्त इत्याशंक्य, बृहदारण्यके 'स यथा सैन्धवघन' इत्यादिना कृत्स्नस्य ब्रह्मणः प्रज्ञानघनत्वश्रावणान्नेन्द्रियाणि कल्पयितुं शक्यानि । नच क्रियाभावोपि । तत्रैव वेदानां निःश्वसितत्वस्य भूतसमुत्थानादेश्च श्रावणेन, तत्रैव निःश्वासोत्थानक्रिययोरुक्तत्वात् । अतो ब्रह्मैव सर्वाकारस्वरूपं, कृत्स्नत्वश्रावणात् । तस्मादिन्द्रियकल्पनया विरोधपरिहारो न युक्त इत्युक्तम् । ततश्चतुर्थे सूत्रे नन्वभिन्ननिमित्तोपादानतया ब्रह्म जगत्कारणत्वेन सिद्धम्, कारणधर्मा एव च कार्ये भवन्ति, कामादयस्तु श्राव्यन्ते निषिध्यन्ते च, वेदवादिभिस्त्वेवमप्यन्यथा न कल्पनीयम्, अतः कथं विरोधपरिहार इत्याशंक्य, मूर्तामूर्तब्राह्मणे ब्रह्मणो रूपद्वयमुक्त्वा, 'अथात आदेशो नेति नेती'तिवाक्यद्वयं कथनेन कार्यकारणयोः समानप्रकारनिषेधः, कारणस्य ब्रह्मण एव त्वनिषेधश्च क्रियते । एवं रूपं निरूप्य 'सत्यस्य सत्य'मिति नाम च श्राव्यते, तेन प्रपञ्चातिरिक्तस्य ब्रह्मणो विद्यमानत्वात् तस्मिन् जडजीवधर्माणामौपचारिकत्वमेव युक्तम् । गीतास्मृतावपि 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जित'मिति 'अनादिमत्परं ब्रह्म न सत् तन्नासदुच्यते' इति चोच्यते । तेन श्रुतिस्मृतिभ्यां जडजीवधर्मरहितं ब्रह्मेति सिध्यतीत्युक्तम् । ततः पञ्चमे प्रपञ्चधर्मा ब्रह्मण्यौपचारिका इत्यत्र

निदर्शनान्तरमप्युच्यते, 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन्, उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मे'तिस्मृतौ उपाधिना रूपभेदकथनात्, 'सम सुपिणे'त्यादावपि निरुपमस्य भगवतो यत्तु सुप्यादिकमुपमानं तदप्युपाधिसंबन्धादेव जलसूर्यन्यायेन संभवति । तस्मात् साकारेपि ब्रह्मणि ते धर्मा न सन्तीत्यौपचारिका मन्तव्याः, उपासनार्थमिति नोभयलिंगविरोध इत्येकदेशिमतेन समाधानम् । एतस्य मतस्य किञ्चिदंशेनोपादेयत्वाय प्रसंगादुक्तम् ॥ ५ ॥

ततः षष्ठे चतुःसूत्रे **अम्बुवदग्रहणादित्यधिकरणे** एकदेशिमतं दूषयित्वा स्वमतेन विरोधः समाधीयते । यदुक्तं समवाय्यतिरिक्तस्य ब्रह्मणः समवेतजडजीवसंबन्धात् सर्वकामत्वादयः प्रतिबिम्बे बिम्बधर्मवत् प्रतीयन्ते, तस्मादौपचारिका इति । तदयुक्तम् । तथाहि । समवाय्यतिरिक्तस्य ब्रह्मणो जडजीवेषु प्रतिबिम्बो न वक्तुं शक्यः, तेषामस्वच्छत्वेन प्रतिबिम्बाग्राहकत्वात् । ब्रह्मणो व्यापकत्वेन तत्र विद्यमानत्वाच्च । यदि ह्यस्वच्छे व्यापकस्य प्रतिबिम्बः स्यात्, दारुण्याकाशस्य स्यात्, स तु न दृश्यत इति । तस्मादुक्तरीत्यौपचारिकत्वमंगीकृत्य समाधानमसंगतमिति **प्रथमसूत्रे** उक्तम् । ततो **द्वितीयसूत्रे** यथा व्यापकस्याप्याकाशस्य करकादिप्रवेशे वृद्धिह्रासभाक्त्वं, महानाकाशः स्वल्प आकाश इत्याद्यभ्रमप्रतीतेः । नच महत्वाल्पत्वादीनामौपाधिकत्वम् । करकादीनां व्यञ्जकत्वेन जनकत्वानङ्गीकारात् । तथा च यथाकाशे सदोदितव्यंग्यभेदेन व्यापकत्वाल्पत्वयोः सामञ्जस्यम्, तथा ब्रह्मणि निर्धर्मकत्वसधर्मकत्वयोरपि सामञ्जस्यात् ब्रह्मगता एव सर्वकामत्वादयो जडजीवाभ्यामभिव्यज्यन्ते । तस्मात्ते ब्रह्मगता एवेति आकाशधर्मवदुभयलिङ्गत्वविरोधपरिहारः । ततस्तृतीये **सूत्रे** दर्शनादपि विरोधपरिहारः क्रियते । न हि दृष्टेऽनुपपन्नं नाम, व्याघातात्, अतो विरुद्धधर्माश्रयमेव ब्रह्मेत्यवगन्तव्यम् । दर्शनं च मृत्स्नाभक्षणोलूखलबन्धनादिषु स्पष्टमिति परमार्थतः स्वरूपविचारेण ब्रह्मस्वभावादेव विरोधपरिहारः । ततश्चतुर्थे युक्त्यापि विरोधः परिह्रियते । प्रकृते ब्रह्मणि लौकिका जडजीवधर्माः निषिध्यन्ते । अस्थूलादिवाक्येषु स्थूलादिपर्युदासस्यैव दर्शनात् । तथा च पर्युदासः सदृग्ग्राहीति स्थूलसदृशं ब्रह्मेत्येवं सर्वत्र ब्रह्मस्वरूपं ग्राहयति । तथा सति सदोदितमेव तत् । न च व्यंग्यमेव तदिति वाच्यम् । यतो यत्रैव धर्मान् निषेधति, तत्रैवालौकिकान् वक्ति, यथाऽस्थूलादिवाक्ये 'एतस्यैवाक्षरस्य प्रशासने गार्गी'त्यादिनालौकिकं प्रशासितृत्वादिकं वदति, तथा सति तत्सहचरितत्वात् स्थूलत्वादयोप्यलौकिका एव सदोदिताः सेत्स्यन्तीति लौकिकानां निषेधः, अलौकिकानां सत्ता, इति युक्त्या विरोधपरिहार इति मतेन शब्दबलविचारेण द्वेधा समाधानम् ॥ ६ ॥

ततः सप्तमे **द्विसूत्रे तदव्यक्तमाह हीत्यधिकरणे**ऽर्थबलविचारेण विरोधः परिह्रियते, अन्यथा अर्थबलेन विचारकाणामृषीणामाक्षेप उत्तिष्ठेदिति तन्निवारणायायमारंभः ।

तत्र सर्वाणि विरुद्धवाक्यान्युदाहृत्य चिन्त्यन्ते, 'न चक्षुषा गृह्यते,' 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत,' 'अपाणिपादः,' 'विश्वतश्चक्षु'रित्यादीनि विरुद्धवाक्यानि श्रौतत्वात् प्रमाणानि । वस्तुविचारे तु एकं वस्तु द्विरूपं न संभवति । अतः प्रमाणान्तरानुरोधेन एकस्य स्वार्थे प्रामाण्यमन्यस्योपचरितार्थत्वं वक्तव्यम् । तत्र कस्य स्वार्थत्वं, कस्योपचरितार्थत्वमित्याकांक्षायां 'अगृह्यो नहि गृह्यते,' इति श्रुतिः प्रत्यक्षानुरोधिनी । नहि ब्रह्म केनचित् चक्षुषा वा मनसा वा दृष्टमस्ति, सर्व(स्व)रूपत्वे तु सर्वैर्द्रष्टुं शक्येत, तस्मात् सर्वधर्मवत्त्वेन प्रतिपादकानि वचनान्युपचरितार्थानि, अनुभवविरोधात्, अव्यक्तत्वबोधकानि तु स्वार्थप्रतिपादकानि, अनुभवसंवादादिति **प्रथमसूत्रे** पूर्वपक्षमुक्त्वा,**अपि संराधन** इति **द्वितीयेन** समाधानमाह । 'श्रद्धाभक्तिज्ञानयोगादवैहि,' 'यमेवैष वृणुते' इत्यादिश्रुतिभिः, 'भक्त्या त्वनन्यया शक्य' इत्यादिस्मृतिभिश्च साकारब्रह्मणो दर्शनमुच्यते । 'ततस्तु तं पश्यते निष्कलं ध्यायमान' इत्यनेन निष्कलस्यापि दर्शनमुच्यते । अतः प्रत्यक्षस्य रूपद्वयसाधारणत्वात् साकारमनन्तगुणपरिपूर्णं निर्गुणं विरुद्धधर्माश्रयं ब्रह्मेति साक्षात्क्रियमाणार्थबलेन साक्षात्काररूपार्थबलेन वा निर्णय इति साधितम् ॥ ७ ॥

ततोऽष्टमे त्रिसूत्रे **प्रकाशादिवच्चेत्यधिकरणे** पूर्वोक्त एवार्थः प्रकारान्तरेण स्थिरीक्रियते । तत्र यथा सूर्यचन्द्रमणिप्रकाशादिषूष्णशीतौ उभयरूपाः स्पर्शाः प्रतीयमाना अपि तेजसि तावन्तो नाङ्गीक्रियन्ते, किन्तूष्ण एव स्पर्शोंगीक्रियते, एवं हिमतप्तकुण्डादिषु प्रतीयमाना अपि जले तावन्तो नांगीक्रियन्ते, किन्तु शीतस्पर्श एवाङ्गीक्रियते, एवं सुवर्णे वर्णभेदा अपि, अतो न ते स्वाभाविकाः, तेजस्त्वादिस्वभावहानिप्रसङ्गात्, तथा ब्रह्मणोऽपि निर्विशेषत्वमेवाङ्गीकर्तव्यं, सर्वत्र निर्विशेषं ब्रह्मेत्येव प्रसिद्धेः । अत एव 'अगृह्यो नहि गृह्यते' इत्यादिश्रुतयोऽपि सङ्गच्छन्ते । न च पूर्वोक्तश्रुतिप्रत्यक्षादेः का गतिरिति शंकनीयम् । तपःप्रणिधानादिकर्मणि यथा तेषामुपासकानां कामस्तथा प्रकटीभवतीति तत्कामहेतुकं तादृशप्रत्यक्षम् । अतएव क्वचित्प्रत्यक्षं क्वचिदन्यथाप्रत्यक्षं च । यद्येकवारमेकरूप एव प्रकटः स्यात्तादृशरूपमङ्गीक्रियेतापि, किन्तु वारंवारं किञ्चिद्वैलक्ष्यण्येन प्रकटीभवति । अतः प्रकाशोऽपि कृत्रिम एव, दीपप्रकाशवदित्येका शंका । तस्मान्न भक्तप्रत्यक्षेण निर्णय इति **प्रथमसूत्रे** उक्तम् । ततो **द्वितीयसूत्रे** एकस्य वस्तुनः निमित्तं विना प्रतिक्षणमन्यान्यादृशत्वं न वक्तुं शक्यते, अतोनन्तरूपेणाविर्भावे भक्तकाम एव निमित्तम् । तथा सति तद्विग्रह एव, न तु ब्रह्मस्वरूपम् । अतएव 'यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाये'ति तृतीयस्कन्धे ब्रह्मणाप्युक्तम् । अतस्तच्छरीरमेव, न तु ब्रह्मस्वरूपमिति द्वितीया शंका । तस्मान्न श्रुत्या निर्णयः, नापि भक्तप्रत्यक्षेणेति सूत्रद्वयेनाशंक्य, **तृतीयसूत्रेण** सिद्धान्तमाह । नैवं केवलयुक्त्या लौकिकदृष्टान्तेन निर्णयः कर्तुं शक्यः,

१ विरुद्धधर्माश्रयत्वरूपप्रत्यक्षप्रामाण्यं स्वीक्रियते । २ शीतादुभयरूपा इति पाठ. ।

शास्त्रवैयर्थ्यप्रसंगात् । अत्र हि वेदादेव ब्रह्मस्वरूपमवगम्यते, तत्कथं स्वरूपशक्त्यैकतरनिर्णयः, वेदे निर्गुणत्वेनानन्तगुणपूर्णत्वेन च व्यपदेशात् । तर्ह्येकस्यानेकधाभानं कथमिति तु न शंक्यम् । यथा एक एव सर्प ऋजुरनेकाकारः कुण्डलश्च भवति, तद्वदुभयरूपताया उपपत्तेः । न चैवं यथाश्रुताङ्गीकारे शास्त्रवैफल्यं शङ्क्यम्, नानास्वभावैः सूरिव्यामोहे तन्निवारणार्थत्वेन शास्त्रसाफल्यात् । तस्माच्छ्रुतिप्रत्यक्षाभ्यां यत्पूर्वं निर्णय उक्तः, स एव सिद्धान्त इत्युक्तम् ॥ ८ ॥

ततो **नवमे त्रिसूत्रे प्रकाशाश्रयवद्वे**त्यधिकरणे धर्मस्वरूपविचारेण ब्रह्म सगुणं निर्गुणमिति पक्षद्वयमपि स्थाप्यते । तत्र धर्मा यदि ब्रह्मस्वरूपाद्भिन्नास्तदा कार्याः, यद्यभिन्नास्तदा ब्रह्मैवेत्याशंक्य, प्रकाशाश्रयवत् भिन्नाभिन्ना इति सिद्धान्त उक्तः । यथा प्रकाशाश्रयाः सूर्यादयस्तेजःप्रकाशाद्भिन्नाः प्रकाशधर्मकत्वात्, अभिन्नाश्च तेजस्त्वात्, एवं 'परास्य शक्ति'रित्यादौ षष्ठीनिर्देशाद्भिन्नाः, सच्चिदानन्दरूपत्वेनाभिन्नाश्च । तथा च धर्माणां भिन्नत्वेन ब्रह्मणोनन्तगुणपूर्णत्वं, तेषामपि सच्चिदानन्दरूपत्वेन ब्रह्माभिन्नत्वाद्ब्रह्मणो निर्गुणत्वमित्युभयमप्युपपन्नमिति स्वमतम् । ततः पूर्वं ब्रह्म निर्गुणमेव, पश्चादिच्छारूपेण, ततो धर्मरूपेण, ततः प्रपञ्चरूपेणाविर्भवतीत्युत्पत्तिविचारेण धर्माणां पश्चाद्भिन्नत्वेपि कार्यत्वाद्ब्रह्मत्वं कटककुण्डलादीनां सुवर्णत्ववदित्येकदेशिमतमपि सूत्रद्वयेनांगीकृतम् । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अत्राप्युपपत्तेरिति । एतयोः प्रथममेव न्याय इति भाष्यप्रकाशादवगन्तव्यम् । एतेषां पञ्चानामप्यधिकरणानामेककार्यकारित्वं संगतिरवगन्तव्या । पञ्चभिरपि श्रुतेर्बोधकताप्रकारस्यैव निश्चायनात् ॥ ९ ॥

ततो **दशमे सप्तसूत्रे परमतः सेतून्माने**त्यधिकरणे, 'य आत्मा स सेतुर्विधरण' इत्यादिभिः श्रुतिभिर्ब्रह्मणः सेतुत्वादिकमुक्तम्, ब्रह्मणस्तथात्वे परत्वं न संगच्छते, सेत्वादीनां साधनादिरूपत्वात् । अतो देशकालवस्तुस्वरूपकृतचतुर्विधपरिच्छेदरहितं ब्रह्मणोऽन्यदेव किञ्चित्परं वक्तव्यमिति **प्रथमसूत्रे** आशंक्य, द्वितीये 'सेत्वादिसामान्यात्सेत्वादिव्यपदेशार्थः । संसारसागरतरणोपायत्वात्सेतुत्वम्, निर्लेपत्वायाकाशत्वमित्यादिकं गौण्या व्यपदिश्यते । यथा कुण्डपायिनामयने 'मासमग्निहोत्रं जुहोती'ति, तस्मात् गुणार्थमेव तदुक्तिः, न तु सर्वप्रकारकसाम्यार्थम् । अतः सेत्वादिदोषाभावात् ब्रह्मैव परम्, नान्यदिति समाहितम् । ततस्तृतीये यथा भूतादि पादवत्त्वेनोपासनीयम्, तथा गौण्यान्यसमानधर्मवत्त्वव्यपदेशस्य किंप्रयोजनमित्याकांक्षायां सेत्वादिधर्मवत्त्वेनोपासनीयमित्युपासनार्थत्वं प्रयोजनमुक्तम् । ततश्चतुर्थे स एवायमित्यतिदेशेप्युपासनासंपत्तेः किमर्थो धर्मातिदेश इत्याशंक्य, यथा चन्द्रादित्याग्नितेजसां तेजस्त्वेनैक्येपि स्थानविशेषाच्च समानप्रकाशकत्वम्, तथा स एवायमित्यतिदेशेऽपि न समानधर्मवत्त्वमिति ज्ञानसंभवात्, तन्निवृत्त्यर्थं धर्मातिदेश इति प्रयोजनमित्युक्तम् । तेन ब्रह्मैव सर्वत्रोत्कृष्ट-

मिति साधितम् । ततः पञ्चमे ब्रह्मणोऽन्यत् परमितिमतस्य दूषणार्थं, यदि हि सत्यज्ञानाद्युक्तधर्मविशिष्टब्रह्मणोऽन्यत्किञ्चित्परं स्यात्, तदा येनकेनचित्प्रमाणेन प्रमितं स्यात्, यतो नैवमतो नैवमितिप्रमाणाभावरूपा युक्तिरुक्ता । ततः षष्ठे यथा ब्रह्मणि सेतुत्वादिकं श्रुत्योक्तम्, तथा 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति श्रुत्या समाभ्यधिकनिषेधोप्युक्तः । यदि ब्रह्मणः सकाशादधिकं परमन्यत्स्यात्तदा तन्निषेधेत्, यत एवमतो नैवमिति युक्त्यन्तरमुक्तम् । तस्मात्सेत्वाद्युक्तिर्गौण्येवेति साधितम् । ततः सप्तमे ब्रह्मणोन्यस्य परत्वनिरासेन 'आकाशवत्सर्वगतश्च नित्य' इत्यादिश्रुतिभ्य एव ब्रह्मणः सर्वगतत्वम्, नत्वनुमानैकशरणम् । अनुमानं तु श्रुतिसंवादित्वात्प्रमाणमस्त्विति फलितमुक्तम् । तेन ब्रह्मण एव परत्वम्, नान्यस्य । यद्यपि समन्वयविचार एवैताः श्रुतीः विचार्य दोषाः परिहृताः, तथापि स्वरूपविरोधपरिहारप्रस्तावात्पुनरुच्यन्ते । सर्ववाक्यप्रतिपाद्यमेकमेव ब्रह्मेत्यपि अर्थबलविचारेण न सिद्धम्, अतो विशिष्टज्ञानोत्पादनार्थं पुनः अर्थबलेन विचारितम्; अतो न दोष इति ज्ञेयम् । अर्थबलं च समाभ्यधिकरहितं यत्स्वरूपं तद्बलम् । एवं सर्वोत्तमत्वनिरूपणेनोत्तमाधिकारिणां भजनीयत्वप्रयोजकं रूपं वक्ष्यमाणोपोद्घाततया निरूपितम् । एवमग्रेऽपि ॥ १० ॥

तत एकादशे चतुःसूत्रे फलमत इत्यधिकरणे जघन्यमध्यमानामर्थे ब्रह्मणः फलदत्वं सूत्रद्वयेनोच्यते । ततस्तृतीये श्रुत्युपपत्तिभ्यां जैमिनिमतेन धर्मस्य फलदातृत्वमाशंक्य, चतुर्थेन भगवत एव कर्मकारयितृत्वान्न धर्मस्य फलदाने स्वातन्त्र्यम्, किन्तु ब्रह्मण एव इत्येवं तन्मतं दूष्यते ॥ ११ ॥

एवमष्टभिरधिकरणैः श्रुतीनां बोधकताप्रकारविचारेण तत्तदधिकारिणं प्रति श्रुतीनां तादृशतादृशबोधजनकत्वमित्यस्मिन्पादे निर्णीतमिति बोध्यम् ।

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां तृतीयाध्यायस्य द्वितीयः पादः ।

अत्र पूर्वपादे श्रुतीनां बोधकताप्रकारनिरूपणेन यथा परोक्षज्ञानजनकत्वं तथा निरूपितम् । अतःपरं यथा साक्षात्कारो भवति, तथा तत्साधनमुपासनारूपं वक्तव्यम् । उपासनायां च क्रियमाणायां धारणासिद्धौ मानसी मूर्तिरभिव्यक्ता भवति । तत उपासनापरिपाके साक्षात्कार इति तदर्थमस्मिन्पादे गुणोपसंहारोन्तरङ्गविचारेण कर्तव्यतया विचार्यते । तत्र किमन्तरङ्गमित्याकांक्षायां 'योगास्त्रयो मया प्रोक्ता' इति भगवदुक्तेषु त्रिषु साधनेषु ज्ञानभक्ती अन्तरङ्गे । तत्र निर्विण्णाधिकारकत्वात् ज्ञानस्यान्तरङ्गता । निर्वेदाभावेपि लौकिकात्यासक्तिरहिताधिकारकत्वाद्भक्तेरन्तरङ्गतेति भेदः । कर्म तु कामाधिकारकत्वाद्बहिरङ्गसाधनम् । अतः कर्मोपसंहारात्पूर्वं ज्ञानभक्त्युपयोगित्वात् पूर्वं गुणोपसंहारो विचार्यते ।

स कथं कर्तव्य इत्याकांक्षायां ज्ञानभक्त्योः सविषयत्वात् पूर्वं विषयो विचारणीयः। तत्र विषयः पूर्वसिद्धं ब्रह्म, तदेव च फलदाने समर्थमिति द्वितीयपादान्ते स्थितम्। तदेतत्स्मारयितुमुपसंहारोपोद्घातत्वेन ज्ञानभक्त्योर्विषयतया ब्रह्मणः ज्ञानभक्तिषु युक्ततयोपासनायाश्च सर्ववेदान्तप्रत्ययत्वं सूत्रद्वयेन विचारितम्। तेन ज्ञानाधिकारिभिस्तथैवोपासना कार्येति सेत्स्यति ॥ १ ॥

तत इदानीन्तनानां सर्वशाखाज्ञानाभावेन सर्ववेदान्तप्रत्ययत्वस्यावधारयितुमशक्यत्वात्तेषामुपकाराय भक्तिमार्गीयोपासनोपकाराय काम्योपासनोपकाराय च तत्तच्छाखानुरुद्धशिष्टाचारमनुरुध्य, तत्तद्भक्तिमनुरुध्य, तत्तत्काममनुरुध्य च स्वाध्यायादिसूत्रद्वयेऽनुपसंहारहेतुकथनेन तत्तद्गुणोपसंहाररूपः संकोचो विचारितः ॥ २ ॥

ततो गुणोपसंहार एवास्य पादस्यार्थ इति बोधयितुमुपसंहारसूत्रेण सर्वोपसंहारतत्संकोचयोः काम्योपासनोपयुक्तोपसंहारस्य च बीजमुक्तम्। ततोऽन्यथात्वादिसूत्रत्रयमध्ये प्रथमेन सर्वोपसंहारपक्षेऽब्रह्मत्वरूपं बाधकं निवारितम्। ततो द्वाभ्यां संकोचपक्षे तदेव बाधकान्तरेण भक्तिमार्गीयोपासकानामर्थे निवारितम्। ततश्च अनित्यत्वेन प्रतीयमानानां स्वरूपधर्माणामेकेन नित्यत्वं, तदग्रिमे तदुपपत्त्यर्थं भक्तनित्यत्वं, लीलापदार्थानां भगवदभेदश्चोपपादितः। एवं लीलापदार्थानां भगवदभेदे सति भगवत्तुल्यत्वं स्यादिति तन्निवृत्त्यर्थं पूर्णानन्दत्वादीनां भगवदसाधारणधर्माणां तेष्वभाव आनन्दादिसूत्रेण प्रतिपादितः। तेन भक्तेषु तदनुपसंहारः सिध्यति। ततः प्रियशिरस्त्वसूत्रे अधिकारिभेदेन स्वरूपोपासकस्य प्रियत्वादीनां शिरस्त्वादिरूपेणानुपसंहारस्तदुपसंहारश्च प्रतिपादितः। तत एकेनोपसंहारपक्षे बीजमुक्तम्। तत आध्यानादिसूत्रद्वये उपसंहारसंकोचे बीजमुक्तम्। एवमस्मिन्नधिकरणे पादार्थरूप उपसंहारप्रकारः सपरिकरो विचारितः। भगवतः कैवल्यरूपं मुख्यत्वरूपमैक्यं च समर्थितम्। ततोग्रे एतस्यैव प्रपञ्चः ॥ १ ॥

ततोग्रे चतुर्भिरधिकरणैरुपासनानियामकसंबन्धिभेदे रूपात्मकः संबन्धो विचार्यते। तत्रादौ द्वितीये द्विसूत्रे आत्मगृहीत्यधिकरणे तद्गुणोपसंहारनियमनाय तत्तद्विभूतिद्वारा ब्रह्मण एव फलदातृत्वसमर्थनाय भक्तिज्ञानमार्गोपकारकशान्त्युत्पादनाय विभूतीनां ब्रह्मात्मकत्वभावनाय च अन्नमयादिषु विभूतिष्वानन्दमयस्यैव शरीराभिमानित्वं विचारितम्।

ततस्तृतीये षट्सूत्रे कार्याख्यानादित्यधिकरणे प्रथमसूत्रवर्णकद्वयमध्ये प्रथमवर्णकेन विभूत्युपासनेषु आनन्दमयस्याध्यात्मिकरूपेणैव फलदातृत्वरूपविशेषसमर्थनाय पूर्वोक्तविभूतीनामन्नमयादीनां चतुर्णां पुरुषाणामाधिभौतिकत्वनिराकरणेनाध्यात्मिकत्वं समर्थितम्। द्वितीयेन वर्णकेन सर्वगुणोपसंहारायानाविर्भूतपुरुषोत्तमविग्रहस्यैवात्मत्वं ज्ञानभक्तिमार्गीयसाधारण्येन विचारितम्। ततो द्वितीयसूत्र आविर्भूतस्य श्रीकृष्णा-

१ प्रथमेति मूलपाठः। २ सर्ववेदान्तप्रत्ययत्वेन।

दिरूपसाप्यात्मत्वमेवेति व्यापकत्वैकरसत्वसच्चिदानन्दत्वादयः सर्वे धर्मा उपसंहर्तव्या इति केवलभक्तार्थं विचारितम् । ततस्तृतीयसूत्रे आवेशिनि गुर्वादावाविष्टे रूपे सर्वभगवद्गुणोपसंहारः ज्ञानिभक्तार्थं विचारितः । ततस्त्रिभिरावेशिनि गुरुप्रतिमादावाविष्टे रूपे तदनुपसंहारः केवलभक्तार्थं विचारितः ॥ ३ ॥

ततश्चतुर्थे एकसूत्रे पुरुषविद्यायामित्यधिकरणे उत्तमाधिकारिभिरशेषगुणपूर्णं परं ब्रह्मैवोपास्यम्, न विभूतिरूपमिति साधितम् । आध्यात्मिकेषु विभूतिरूपेषु सर्वगुणानुपसंहारेऽसाधारणगुणानाम्ज्ञानरूपो हेतुश्चोक्तः ॥ ४ ॥

ततः पञ्चमे द्विसूत्रे वेधाद्यधिकरणे पूर्वसूत्रेणासन्यरूपे चेतनविभूतौ भगवत्संबन्धाद्दोषाभावनिरूपणात्कैमुतिकन्यायेन मूलरूपस्य निर्दोषत्वं समर्थितम्, आधिभौतिकरूपाणां जीवानां सदोषत्वं च बोधितम् । ततो द्वितीये सूत्रे तत्सदोषत्वं भगवत्सकाशात् विभागदशायामेव, तथा सति मुक्तिदशायां तारतम्याभावे प्राप्ते भगवत्तुल्यतापि स्यादिति तन्निवारणार्थं तदापि न्यूनगुणकत्वं स्थापितम् । तेनाध्यात्मिकरूपेषु कतिपयगुणोपसंहारः, मूलरूपे सर्वगुणोपसंहारः । लौकिकरूपेषु मुक्तिदशायामेव निर्दोषत्वपरिमितगुणोपसंहारौ, न संसारदशायामिति निर्णीतम् । एवं चतुर्भिरधिकरणैः रूपभेदः प्रपञ्चितः ॥ ५ ॥

ततः षष्ठाधिकरणमारभ्य पञ्चदशभिरधिकरणैरुपसंहारनियामकस्तत्तन्मार्गरूपः संबन्धिभेदस्तत्तदधिकारनियामकं मार्गतारतम्यं च निरूप्यते ।

तत्र षष्ठे द्विसूत्रे संपरायाधिकरणे अन्तरङ्गसाधनयोर्ज्ञानभक्त्योर्मूलरूपोपासनासंभवादविशेषे प्राप्तेवसरसङ्गत्या स्वरूपतो मर्यादाभक्तेर्ज्ञानाज्ज्यायस्त्वस्य भक्तौ दोषाभावस्य च निरूपणेनान्तरङ्गतरत्वं निरूपितम् ॥ ६ ॥

ततः सप्तमे एकसूत्रे गतेरर्थवत्त्वमित्यधिकरणे हेतुबोधनेन तदेव दृढीकृतम्, मार्गभेदेन पुष्टिभक्तेरन्तरङ्गतमत्वं च निरूपितम् ॥ ७ ॥

ततोऽष्टमे उपपन्नाधिकरणे पुष्टिभक्तेरन्तरङ्गतमत्वं दृढीकृतम् । एवं त्रिभिरधिकरणैरन्तरङ्गसाधनानां त्रैविध्ये निर्णीते पूर्वं 'इतरे त्वर्थसामान्या'दित्यादिसूत्रत्रयेणोपसंहारानुपसंहारबीजबोधने कृते किमीयोपासनायां के के गुणा उपसंहार्या इत्याकांक्षापि पूरिता । ज्ञानमार्गीयोपासनायां तदुपयोगिनः सर्वे, तत्तद्भक्तिमार्गीयोपासनायां तु तत्तदुपयोगिनस्ते ते इत्यर्थादेव सिद्धेरिति ॥ ८ ॥

ततो नवमेऽनियमाधिकरणे ज्ञानापेक्षयान्तरङ्गाणां भक्तीनां मुक्तिसाधने समुच्चयविकल्पयोरनियमः प्रसङ्गेन विचारितः । पादार्थसङ्गतिस्तु पूर्वसिद्धैवात्रापि ॥ ९ ॥

ततो दशमे आधिकारिकाधिकरणे आधिकारिकाणां मुक्तिसाधने प्रवृत्त्यर्थमाधिकारिकाणां भगवद्धर्माणां मुक्तिसाधनत्वाभाव उपोद्घातगर्भप्रसङ्गसङ्गत्या प्रतिपादितः ।

---

१ भौतिक इति पाठः । २ भक्ति इति पाठः ।

आर्विकारिकाणां धर्माणां भगवत्संबन्धितया साधनत्वप्राप्तावपवादसङ्गत्या उपोद्घातगर्भप्रसङ्गसङ्गत्या वा मुक्तिसाधनत्वाभावः प्रतिपादितः । उपसंहारस्तु ज्ञानादिमार्गानुरोधीति तदनुसारेणायातीति पादार्थेनापि संगतिः ॥ १० ॥

ततः पूर्वं संपरायाद्यधिकरणेषु ज्ञानभक्त्योः स्वरूपतस्तारतम्यसाधनेपि विषयफलयोरविशेषादन्तरङ्गतरत्वादिकस्याप्रयोजकत्वं प्राप्तमिति तन्निवारणार्थमेकादशे द्विसूत्रेऽक्षरधियामित्यधिकरणे ज्ञानभक्तिसंबन्धिविषयफलयोर्भेदबोधनात् भक्त्यपेक्षया ज्ञानस्यापकर्षबोधनेन भक्तावन्तरङ्गतरत्वादिकं तयैव सङ्गत्या दृढीकृतम् । उपसंहारस्तु तत्तदुपयोगी प्रागेव सिद्धः ।

ततो द्वादशे त्रिसूत्रेन्तरा भूतग्रामवदित्यधिकरणे श्रुतावहंग्रहोपासनस्य मुख्यत्वकथनात् ज्ञाने भक्तौ च तस्य तुल्यत्वादुभयोस्तौल्यस्य ज्ञानाधिक्यस्य वा प्राप्तौ तस्या उपासनाया भक्त्येकदेशत्वकथनेन ज्ञानापेक्षया मुख्यभक्तेर्विरहरूपान्तरङ्गसाधनत उत्कर्षः पूर्वोक्तसङ्गत्या प्रतिपादितः ॥ १२ ॥

ततस्त्रयोदशे द्विसूत्रे सैव हीत्यधिकरणे प्रथमसूत्रेण विहिताविहितरूपाया द्विविधाया अपि मध्यमभक्तेः पूर्वोक्तसङ्गत्या साधनत उत्कर्षः प्रतिपादितः । द्वितीयसूत्रेण भगवद्विषयककामादीनामपि मुक्तिफलकत्वकथनेन मुक्तौ भगवद्विषयकत्वरूपसाक्षात्संबन्धस्यैव मुक्तिसाधनतावच्छेदकत्वम्, न तु ज्ञानत्वं भक्तित्वं वेति निरूपितम् ॥ १३ ॥

ततश्चतुर्दशे द्विसूत्रे आदरादित्यधिकरणे कैमुतिकन्यायेन कर्मापेक्षया भक्तिसाधनानामुत्कर्षः कर्मिप्रत्यवस्थाननिवृत्त्यर्थं प्रतिपादितः ॥ १४ ॥

ततः पञ्चदशे एकसूत्रे तन्निर्धारणाधिकरणे स्वकृतवेदमर्यादारक्षार्थं विहिताविहितभक्तिमार्गीयस्य कर्मकरणाकरणयोर्हेतुफले बोधिते । द्वितीयपक्षेपि मुख्यभक्तेः पूर्वोक्तभक्तिद्वयादुत्कर्षः साधनतः फलतश्च प्रसङ्गात् प्रतिपादितः ॥ १५ ॥

ततः षोडशे प्रदानवदित्यधिकरणे सर्वात्मभावात्मकमुख्यभक्तेर्विहितयावत्साधनसाध्यत्वनिराकरणेन वरदानवत्प्राप्तिरित्युक्तम् ॥ १६ ॥

ततः सप्तदशे दशसूत्रात्मके लिङ्गभूयस्त्वाधिकरणे सर्वात्मभावात्मकमुख्यभक्तेः स्वरूपमन्तरङ्गतमत्वकाष्ठाबोधनार्थं श्रुतिवाक्यैः प्रपञ्चितम् ॥ १७ ॥

ततोऽष्टादशे त्रिसूत्रे व्यतिरेकाधिकरणे ज्ञानिनां पूर्णाक्षरज्ञानाभावस्य प्रतिपादनेन अग्रिमसूत्रद्वये निदर्शनकथनेन च भक्तानां पूर्णतज्ज्ञानकथनात्सर्वात्मभावरूपमुख्यभक्तिफलस्य भोग्यस्य पुरुषोत्तमज्ञानमध्यमभक्तिफलरूपपुरुषोत्तमसायुज्यादाधिक्यमर्थतः प्रतिपादितम् ।

तत ऊनविंशे एकसूत्रे भूम्न इत्यधिकरणे फलविचारेण सर्वात्मभावस्य साधनदशायां दुःखरूपदोषः परिहृतः ॥ १९ ॥

एवम् पञ्चदशभिरधिकरणैः संबन्धिरूपमार्गस्तत्तारतम्यं च निरूपितम् । एवं स्वरूपपरासूपासनासु तारतम्यबोधनेन तासु तासु तत्तद्ध्यानोपयोगिनो गुणा उपसंहार्या इति पादार्थसङ्गतिः ।

ततो विंशे एकसूत्रे नानाशब्दादिभेदादित्यधिकरणे ततो न्यूनासु सत्त्वोपहितावतारूपोपासनासु नानात्वं विचारितम् ॥ २० ॥

ततोग्रिमे एकसूत्रे एकविंशे तासां तासां विकल्पो विचारितः । गुणोपसंहारस्तु तत्तद्ध्यानोपयोग्येवेति पूर्वोक्तैव व्यवस्था ॥ २१ ॥

ततो द्वाविंशे काम्योपासनासु समुच्चयविकल्पौ यथाकामं विचारितौ, तेन तासु तत्तत्कामोपयोगी गुणोपसंहारो बोधितः ॥ २२ ॥

ततस्त्रयोविंशे द्विसूत्रे अङ्गेष्वित्यधिकरणे उपासनाङ्गानां व्रतानामाश्रयनित्यत्वं प्रसङ्गाद्विचारितम् ॥ २३ ॥

ततोऽग्रिमे द्विद्विसूत्रे समाहारादित्यधिकरणद्वये ज्ञानमार्गीयोपासनासु सर्वगुणोपसंहारानुपसंहारावधिकारिभेदेन विचारतौ । तेन ज्ञानमार्गीयो विचार एवात्र मुख्यो, भक्तिमार्गविचारस्तु भक्तौ भगवत्कृपारूपस्याधिकस्य साधनस्य प्रवेशान्न सर्वोपयोगी यद्यपि, तथापि शास्त्रारंभे ब्रह्मसंबन्धिजिज्ञासाप्रतिज्ञानुरोधात्कृनः, तत्प्रयोजनं त्वग्रिमपादे 'भक्तिमार्गप्रचारैकहृदयो बादरायण' इति श्लोकेन वक्तव्यमिति ॥ २४,२५ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां तृतीयाध्यायस्य तृतीयः पादः ।

वेदान्तेषु कर्माङ्गभूता उद्गीथाद्युपासना उक्ताः । आचार्येणापि अङ्गेषु यथाश्रयभाव इत्यादिना पूर्वपादान्ते ता विचारिताः । भाष्यकारैरपि प्राचीनवृत्तिकारादिसंमतं पूर्वोत्तरकाण्डयोरैकशास्त्र्यमङ्गीकृतम् । तृतीयाध्यायारम्भे च चतुर्थपादस्य कर्मोपसंहारोर्थ उक्तः । तथा सति ज्ञानेपि कर्मापेक्षास्तीति सिद्धम् । प्रकृतपादारम्भे च प्रथमसूत्रेण स्वमतमुक्त्वा, ततः पट्सूत्रैरीश्वरस्य ज्ञानस्य च कर्मशेषबोधकं जैमिनिमतं पूर्वपक्षत्वेनोपन्यस्य, अधिकोपदेशादित्यादिभिर्नवभिः सूत्रैर्ज्ञानस्येश्वरस्य च यज्ञादिकर्मशेषत्वं निराकृतम् । ततः ऊर्ध्वरेतःसु चेति सूत्रेण ज्ञानस्य संन्यासाश्रमिणः कर्मशेषत्वमपि निराकृतम् । तेन ज्ञानस्य न कर्मशेषत्वम् । तेन पूर्वकाण्डवैयर्थ्यापत्तौ यज्ञादिकर्मणां यथाकथञ्चित्परंपरया मोक्ष एव फलत्वेन परामृश्यत इति नैकशास्त्र्यादिहानिरित्यभिसंहितम् । ततः परामर्शसूत्रे तदपवादं पूर्वपक्षीकृत्य, अनुष्ठेयसूत्रे ज्ञानसाधनत्वेन तत्करणमंगीकृत्य कर्मस्वातन्त्र्यं निवारितम् । अग्रिमैः पञ्चभिः सूत्रैस्तदेव समर्थयित्वा ज्ञानस्योत्कृष्टत्वं साधितम् । एवं पञ्चविंशतिसूत्रात्मकेनाद्याधिकरणेन उपसंहारोपोद्घातत्वेन कर्मणः स्वातन्त्र्यास्वातन्त्र्ये विचारिते । तत्र भगवत्प्राप्तिरूपस्य पुरुषार्थस्य सर्वात्मभावरूपपुरुषोत्तमज्ञानैकलभ्यत्वमिति स्थितम् ॥ १ ॥

ततः कर्मणः किं परोक्षज्ञानसाधनत्वमपरोक्षज्ञानसाधनत्वं वेत्यपेक्षायां सर्वापेक्षेति पट्सूत्रे द्वितीयाधिकरणे साक्षात्कारस्य स्वरूपोपकारार्थं कर्मज्ञानमत्त्यपेक्षां प्रति-

ज्ञाय तत्तन्मार्गोक्तकर्मसापेक्षत्वं साधितम् । पूर्वपाद एवान्तरङ्गसाधनविचारे ज्ञानभक्त्यावश्यकताया निरूपितत्वात् । ततो द्वितीयसूत्रे शमदमादीनां सत्त्वशोधकत्वे तैरेव ज्ञानसिद्ध्या यज्ञादिकर्मनिरपेक्षत्वमाशंक्य, तेषां विशेषानुष्ठेयत्वम्, न तु कर्मनिवारकत्वमिति तदानीमपि यज्ञादिकर्म कर्तव्यमेवेति सिद्धान्तितम् । ततः ज्ञानिनः सर्वान्नभक्षणस्यानुज्ञानात्कामतः सर्वभक्षणे प्राप्ते आहारशुद्ध्यभावेन शमाद्यसंभवात् पयोव्रताद्यभावेन यज्ञादेरप्यसंभवाद्यज्ञशमदमादीनां साक्षात्कारजनकत्वमसङ्गतमित्याशंक्य, सर्वान्नानुमतेः प्राणात्ययाद्यापत्तिविषयत्वेनान्यदा तदप्राप्त्या तदानीं कामचाराभावात् यज्ञशमदमादिसम्भवेन तेषां ज्ञानप्रतिबन्धनिवर्तकतया कारणत्वं निर्बाधम् । यद्यपि पूर्णस्य ज्ञानस्य कर्मनाशकत्वम्, तथापि साधनदशायां तदपेक्षास्तीत्युपसंहारहेतुतया सर्वान्नानुमत्यादिसूत्रचतुष्टये साधितम् ॥ २ ॥

ततस्तृतीयेऽष्टसूत्रे **विहितत्वाचाश्रमकर्मे**त्यधिकरणे प्रथमसूत्रद्वयेन जातज्ञानस्यापि ज्ञानमार्गीयस्याश्रमधर्माणां नित्यत्वेन प्रत्यवायपरिहारकतया शमदमादिसहकारितया च कर्तव्यत्वं निर्णीतम् । तेनैव कर्ममार्गीयस्य निष्कामतायामपि तदावश्यकत्वमित्यर्थादेव बोधितम् । ततोऽग्रिमैः **सर्वथापी**त्यादिभिः षड्भिः सूत्रैर्विहितानां भगवच्छ्रवणादीनां पूर्वोक्तेभ्यः सर्वेभ्य आधिक्यं, तदविरोधेनैवाश्रमधर्माणां कर्तव्यत्वं, भगवद्धर्मकर्तुरनभिभवं, आश्रमधर्माणां फलसिद्धावन्तरायरूपत्वादविरोधेनैव कार्यत्वं, भगवद्धर्माणां भक्तेस्तत्फलस्य च ज्ञानादिफलाज्ज्यायस्त्वमन्तरङ्गतरविचारेण निरूपितम्, तेन भगवद्धर्माविरोधेनैव ते कर्तव्या इत्युपसंहारप्रकारो दर्शितः ॥ ३ ॥

ततस्तत्फलं किं, कथं च तस्य ज्ञानफलादाधिक्यमित्याकांक्षायां **चतुर्थे एकसूत्रे तद्भूतस्ये**त्यधिकरणे भगवद्धर्माणां साधनदशायामुत्कृष्टत्वेपि फलदशायां मुक्तिभवने फलतो न कश्चिद्विशेष इत्याशंक्य, नियमादिभिर्हेतुभिस्तस्य नित्यत्वं, भक्तानां मुक्त्यनिच्छया तत आधिक्यं च मुख्यभक्तिमार्गस्योत्कर्षार्थं प्रसङ्गात्प्रतिपादितम् ॥ ४ ॥

ततः **पञ्चमे द्विसूत्रे न चाधिकारिक**मित्यधिकरणे मर्यादापुष्टस्यापि यत् भगवदीयत्वरूपमन्तर्निष्ठारूपं यत्फलं तन्नित्यं, ज्ञानमार्गीयमुक्तेः सकाशादधिकमित्यनुप्रसङ्गेन निरूपितम् । एवमधिकरणद्वयेन पूर्वोक्तकर्मोपसंहारप्रकारे बीजं बोधितम् ॥ ५ ॥

ततः **षष्ठे चतुःसूत्रे बहिस्तूभयथे**त्यधिकरणे सर्वविधस्य पुष्टिमार्गीयस्य आश्रमरूपसंन्यासधर्मानुपसंहारार्थं साधनत उत्कर्षबोधनायानुप्रसङ्गेन गृहत्यागो विचारितः । स च मध्यमाधिकारे एवेति फलति ॥ ६ ॥

ततः **सप्तमे एकसूत्रे सहकार्यन्तराधिकरणे** गृहत्यागिनो मर्यादापुष्टिमार्गीयस्य शमादिकं भावनासहकारित्वेन कर्तव्यम्, पुष्ट्यंशबाहुल्ये तु तेनापि भावनामात्रमेव कर्तव्यमिति साधनव्यवस्थानुप्रसङ्गाद् दर्शिता ॥ ७ ॥

ततोऽष्टमे **चतुःसूत्रे** गृहिणोपसंहाराधिकरणे, प्रथमसूत्रेण पूर्वोक्तेभ्यो जघन्याधिकारिणां त्यागानुकल्परूपं गृहे स्थित्वा भगवद्भजनं कर्तव्यमिति विचार्य, द्वितीयादिभिस्तस्य करणप्रकारस्तदाधिक्यं, भगवद्भावस्य लोकेष्वप्रकटनं, भगवद्भजनव्यतिरिक्तसमये लौकिककरणं, गृहिणोपसंहारश्रुतिमनुसृत्यानुप्रसङ्गाद्विचारितम् । तेन **विहितत्वाच्चाश्रमकर्मापी**त्यनेन यत्पूर्वमुक्तं तस्य प्रकारो बोधितः ॥ ८ ॥

ततः **नवमे एकसूत्रे एवं मुक्तिफलानियम** इत्यधिकरणे तादृशस्य देहपातोत्तरं मुक्तिर्वा भगवदीयत्वं वेति संशये मुक्तिस्तु नियतैव, भगवदीयत्वं तु भगवत्कृपाधीनमित्यनियमो निर्णीतः । तेनानुकल्पोपि मर्यादामार्गादधिकः, निरवध्यानन्दपुरुषोत्तमसायुज्यादिति ॥ ९ ॥

एवमस्मिन्पादे बहिरङ्गविचारेण सप्रकारः कर्मोपसंहारो दर्शितः । एवमस्मिन्नध्याये चतुर्भिः पादैः सर्वसाधनं सप्रकारमुपदिष्टम् ॥

इति श्रीवल्लभाचार्यचरणदासस्य पीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां तृतीयाध्यायस्य चतुर्थः पादः समाप्तः ।

तृतीयाध्यायः समाप्तः ।

चतुर्थोध्यायः ।

अथ **चतुर्थाध्याये**वसरसङ्गत्या फलं निरूप्यते । तच्च फलं ब्रह्मविद इति चतुर्भिः पादैर्जीवतो म्रियमाणस्य गच्छतः प्राप्तफलस्य च क्रमेण तस्य यथाधिकारमवस्था निरूप्यन्ते ।

तत्र **प्रथमपादस्य द्विसूत्रे प्रथमेधिकरणे** प्रथमवर्णकेन श्रवणादीनामवान्तरफलत्वाय तेषामावृत्तिः कर्तव्येत्युच्यते । तेन पूर्वपादान्ते गृहिणोपसंहारे सर्वेन्द्रियाणामात्मनि प्रतिष्ठापनमुक्तम्, तत्प्रकारोत्र दर्शित इति पूर्वेण सह प्रकारप्रकारिभावः सङ्गतिरिति बोध्यम् । द्वितीयवर्णकेन तु ज्ञानभक्त्योः फलत उत्कृष्टत्वाय कर्ममार्गे आवृत्तिव्युत्पादनेन फलजघन्यत्वमपि बोधितम् । तेन कर्मणि तत्फले चानासक्तिरपि तत्प्रकारत्वेन बोध्यत इति सैव पूर्वेण सह सङ्गतिरिति बोध्यम् ॥ १ ॥

ततो **द्वितीये त्रिसूत्रे आत्मेतीत्यधिकरणे** प्रथमवर्णकेन ज्ञानफलं द्विविधं विचार्यते । मुख्यं त्वात्मप्रवेशरूपमनश्वरम्, द्वितीयं त्वधिकारिषूपस्थितेषु तेभ्यो ज्ञानोपदेशरूपमवान्तरफलम्, भगवदाज्ञापरिपालनात्मकम्, न त्वाचार्यत्वकामनाकृतमित्युच्यते । द्वितीये ननु 'न स पुनरावर्तते' इतिश्रुत्युक्तो ज्ञानभक्त्योः फलरूपः पुनरावृत्त्यभावः किं सावधिक उत निरवधिक इत्याशङ्कायाम्, निरवधिक इति सिद्धान्त उच्यते । नित्ये भगवद्रूप आत्मनि ब्रह्मविदो जीवात्मनः शुद्धजले जलस्येव प्रवेशेन तादृक्त्वस्यैव श्रुतावुक्तत्वादिति, भक्तिमार्गे च भगवतो मुक्तोपसृप्यत्वेन सेवार्थं तन्निकटस्थितेरपि

नित्यत्वादिति। एवमात्मोपदेशस्यावान्तरफलत्वं त्वत्रापि समानम्। ततो **द्वितीयसूत्रे** प्रतीकोपासकानां न मोक्षः, अतद्रूपे तत्त्वेनोपासनादिति। अतः सा न कर्तव्येति बोधितम्। **तृतीये** सर्वत्र ब्रह्मदृष्टिः कर्तव्येति बोधितम्। तथा च सर्वत्रात्मभावनात् तथा स्फुरणाच्च दुःखस्य निवृत्तेस्तस्याप्यवान्तरफलत्वम्। पूर्वपाद उक्तानां गृहत्यागिनां यदान्तरं बाह्यं च साधनं तदत्रोपदिश्यत इत्यत्रापि तेन सह प्रकारप्रकारिभाव एव सङ्गतिरिति बोधितम्॥२॥

- ततस्तृतीये पञ्चसूत्रे **आदित्यादिमतय इत्यधिकरणे प्रथमसूत्रे** प्रतीकोपासना न कर्तव्या एव चेत्, ताः किमर्थमुपदिश्यन्ते, (नन्वेवमङ्गोपासना एव?) सिद्धान्ते प्रतीकोपासनाः इत्याकांक्षायाम्, अवसरसङ्गत्या सिद्धान्ते अङ्गोपासना एव प्रतीकोपासना इति तत्स्वरूपमुच्यते। ताश्चोपासना जघन्याधिकारिणां फलदानद्वारा माहात्म्यज्ञापनेन भक्तिद्वारा आधिभौतिकसर्वात्मभावरूपज्ञान एवोपकुर्वन्तीत्युच्यते, अग्रिमसूत्रैस्तथैव प्रतिपादनात्। ततो **द्वितीयसूत्रे** भावनौत्कट्ये बहिर्भगवदध्यासरूपं प्राकट्यं फलमुच्यते। ततस्**तृतीये** ध्यानात्मनो मानसीमूर्तिसिद्धिरूपं फलमुच्यते। ततश्च**तुर्थे** लीला अपि भगवान् तथा प्रकटयतीत्युच्यते। ततः **पञ्चमे** अधिकारौत्कर्ष्येन तेषां तत्रैव फलत्वं भासत इति श्रीभागवतोक्तस्मृतिबलेनोच्यते। तस्मात् तासां ज्ञानोपकार एव फलमिति सिध्यति॥ ३॥

ततश्चतुर्थे **एकसूत्रे यत्रैकाग्रतेत्यधिकरणे** बहिरन्तर्भगवत्प्राकट्यवतोरुपासकयोर्न तारतम्यमिति सिद्धान्तः प्रसङ्गेन क्रियते॥ ४॥

ततः **पञ्चमे एकसूत्रे आप्रायणेत्यधिकरणे** भगवत्प्राप्तिरूपपरमफलपर्यन्तं तस्यैवावस्था तिष्ठति। परमफलं च तस्य साक्षाद्भगवत्सेवनरूपं सिध्यतीत्यनुप्रसङ्गेन पुष्टिमार्गीयस्योक्तम्। इदमेव च पूर्वं तद्भूताधिकरणे प्रतिपादितमत्राङ्गोपासनाविषयेपि स्मार्यते। तेन पुष्टिमार्गीयस्य जीवत इदमवान्तरफलमिति बोधितम्॥ ५॥

ततः **षष्ठे चतुःसूत्रे तदधिगम इत्यधिकरणे** मर्यादामार्गीयस्यावान्तरफलमवसरसङ्गत्योच्यते। तत्र **प्रथमसूत्रे** (चित्तशुद्धौ) ज्ञानोदये सति पूर्वपापनाशः, तदनन्तरं पापस्यानुत्पत्तिः। **द्वितीयसूत्रे** पूर्वपुण्यस्य नाशः, तदनन्तरं तदनुत्पत्तिः। कदाचित् प्रारब्धवशाद्भगवद्भावाच्च्युतौ उत्तरकर्मण उत्पत्तिरित्युक्तम्। ततस्**तृतीये** ज्ञानात् कर्मनाशे सति कर्मजन्यदेहस्यापि नाशादाचार्याभावेन ज्ञानादिसंप्रदायोच्छेद इत्याशंक्य, अनारब्धकार्याणामेव तेषां नाशः, न प्रारब्धकार्याणामिति, तेषां भोगैकनाश्यत्वादित्युक्तम्। ततश्च**तुर्थे** ब्रह्मविदोग्निहोत्रादिकरणमपि प्रारब्धभोगरूपकार्यायैव, येषामग्निहोत्रकरणरूपं प्रारब्धमस्ति तेषां तत्करणरूपेण भोगेन तन्निवृत्तेः, न तु तस्य कर्मणः संश्लेष इत्युक्तम्। तेन मर्यादामार्गीयस्य कर्मसंसर्गाभाव इत्यनेनाधिकरणेनावसराद्वा प्रसङ्गाद्वा साधितम्॥६॥

ततः **सप्तमे त्रिसूत्रे अतोन्यापीत्यधिकरणे** पुष्टिमार्गीयस्य 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्याम् द्विषन्तः पापकृत्या'मिति श्रुतिबलात् विनैव भोगं प्रारब्ध-

निवृत्तिरिति **प्रथमसूत्र** उच्यते। ततो **द्वितीये** 'यदेव विद्यये'ति श्रुत्या ब्रह्मविदः कर्मकरणप्राप्तौ तत्संश्लेषमाशङ्क्य, इदं वाक्यं कर्माङ्गभूतोद्गीथोपासनाविषयम्, न तु ब्रह्मविद्याविषयम्, अतो न तस्य आपादयितुं शक्यते कर्मसंश्लेषो ब्रह्मविदः। किञ्च, यद्यनया कर्मकरणं प्रसक्तं क्रियते, तदा ब्रह्मवित्कर्ममोक्षायैव कर्म करोतीति तच्छ्लेषाभावायैव तत् फलिष्यतीति तु मर्यादामार्गरीत्या समाधानम्। पुष्टिमार्गीयस्तु केवलं भगवदासक्तः, भगवद्गुणानां च जीवगुणाः अंशाः, जीवनिष्ठं विद्यारूपं यज्ज्ञानं तद्भगवज्ज्ञानस्य अंश इति सिध्यति। तथा सति जीवनिष्ठविद्ययापि चेत् न मर्यादामार्गीयस्य कर्मश्लेषः, तदा भगवत्स्वरूपासक्तस्य पुष्टिमार्गीयस्य कर्मश्लेषः कैमुतिकन्यायेनैवापास्त इत्युक्तम्। ततस्तृतीये पुष्टिमार्गीयः पूर्वोक्तप्रकारेण स्थूललिङ्गशरीरे क्षपयित्वा ततो यथाधिकारं भगवत्साक्षात्कारादिरूपेण फलेन सम्पद्यत इति परमफलमुक्तम्। अत्र क्षपणं च कुरुक्षेत्रप्रसङ्गे व्रजभक्तानां जीवकोशध्वंसरूपम्। भोगश्च तदनन्तरदर्शनादिरूपो जीवद्दशायामेव भवतीत्यवान्तरफलपरिसमाप्तिरिति मम प्रतिभाति।

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां चतुर्थाध्यायस्य प्रथमः पादः।

अथ **द्वितीयपादे** म्रियमाणस्य ब्रह्मविदोवान्तरफलव्यवस्था अवसरसङ्गत्योच्यते।

तत्र **प्रथमे चतुःसूत्रे वाङ्मनसीत्यधिकरणे** तत्र **प्रथमसूत्रे** 'अथाकामयमान' इति वाजसनेयिश्रुतिमालम्ब्य म्रियमाणस्य पुष्टिमार्गीयस्य म्रियमाणदशायां बहिर्मनसि वा दर्शनं वेणुनादश्रवणं वा भवति, तदा तस्य वाङ्मनसि संपन्ना भवतीत्युक्तम्। ततो **द्वितीयसूत्रे** पूर्वोक्तेनैव हेतुना अन्यान्यपीन्द्रियाणि मनसा सह सङ्गतानि भवन्तीत्युक्तम्। ततस्तृतीये सर्वेन्द्रियविशिष्टं मनः प्राणे सङ्गतं भवतीत्युच्यते। ततश्चतुर्थे तत्सर्वविशिष्टप्राणो हृदि वा बहिर्वा प्रकटे भगवति लीनो भवतीत्युच्यते। तथा चानेन क्रमेण तस्येन्द्रियाणि भगवति लीयन्ते, आत्मापि लीयते, 'न तस्मात्प्राणा उत्क्रामन्ति, अत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुतेरित्युच्यते। तस्यालौकिकदेहप्राप्तिश्चतुर्थे पादे वक्ष्यते॥१॥

ततो **द्विसूत्रे द्वितीये भूतेष्वित्यधिकरणे** म्रियमाणस्य मर्यादामार्गीयस्य व्यवस्था अवसरगर्भेण प्रसङ्गेनोच्यते। तत्र **प्रथमसूत्रे** तस्येन्द्रियाणि भूतेषु लीयन्त इत्युच्यते, स्वयं तु हृद्येवं भगवन्तं प्राप्य मुक्तो भवतीत्यपि तेन सूच्यते। ततो **द्वितीये सूत्रे** भक्तो ज्ञानी च मर्यादामार्गीयौ भवतः। तत्रोभयोरियं व्यवस्था, उत भक्तस्य पुष्टिमार्गे प्रवेश इत्याशङ्क्य, द्वयोरपीयं व्यवस्थेत्युच्यते॥ २॥

ततस्तृतीये **नवसूत्रे समाना चासृतीत्यधिकरणे** उभयोर्मुच्यमानत्वेपि प्राणादिलयप्रकारे पुष्टिमर्यादास्थयोः कुत एवं (विशेपादेव) विशेप इति वक्तुं पुष्टिमार्गीयस्य मर्या-

दामार्गादाधिक्यमुपोद्घातेन विचारितम् । तत्र **प्रथमसूत्रे** साधनद्वारा मोचनेच्छा हि मर्यादामार्गीया मर्यादा, विहितसाधन विनैव मोचनेच्छा पुष्टिमार्गमर्यादा । अतस्तयो सकर कदापि न भवतीति विशिष्टेच्छया आधिक्यमुक्तम् । ततो **द्वितीये** पुष्टिमार्गीयमुक्तिदशाया मर्यादामार्गीयमुक्ते ससारतौल्यव्यपदेश इत्युक्तम्, तेन पुष्टिमार्गस्याधिक्य सूच्यते । ततस्**तृतीये** यदि तस्या ससारतुल्यत्व तदा तस्या हेयत्व स्यात्, तद्बोधकश्रुते प्रतारकत्व चेत्याशङ्कायाम्, पुष्टिमार्गीय तत्त्व दुर्ज्ञेयम् । अतस्तदज्ञानान्मर्यादामार्गीय मुक्तिर्यपामीप्सिता तान् प्रति तामेवोपादेयत्वेन श्रुतिर्वदति, रागिण प्रति स्वर्गादि उपदिश्यते (तद्वत् । ततश्च**तुर्थे** तर्हि ब्रह्मविदामिव तादृशाना भक्तानामपि स्वमार्गोपदेशन क्वचिच्छ्रूयेत), यतो नैवम्, अतो नैवमित्याशङ्कायाम्, तदनुपदेशने बीजमाह । पुष्टिमार्गीयाणा हि अवस्थाद्वयम्, विरह प्रियसङ्गो वा । तत्राद्ये स्वास्थ्याभावान्नोपदेश । द्वितीये तु भगवत्सन्निधानेन तदग्रे धार्ष्ट्यस्य कर्तुमशक्यत्वान्नोपदेश । अत उपदेशाभावान्न तस्या सत्ता वक्तु शक्येत्युक्तम् । तत **पञ्चमे** भगवदीयाना विरह एव कथमित्याशङ्कायाम्, पुष्टिमार्गे भगवतो रसात्मकत्वस्यैव प्राकट्यात् तेनैव तदुपपत्तिरिति युक्त्या समाहितम् । तत **षष्ठे** विरहाङ्गीकारे श्रुतिविरोधमाशक्य, श्रुतौ शरीरसबन्धिन एव दु खस्य निषेधो, न भगवद्विरहजन्यस्येत्येव समाहितम्। तत **सप्तमे** श्रुत्या, **अष्टमे** च स्मृत्या तद्दृढीकृतम् । ततो **नवमे** सर्वासा रसावस्थाना सत्ता श्रीगोकुल एव विद्यत इति श्रुत्या व्यवस्थापितम् । एव पञ्चभि सूत्रै प्रमाणपूर्वक रसावस्थास्थापनेन पुष्टिमार्गस्य सर्वोत्कृष्टत्व व्यवस्थापितम् । अत पुष्टिमर्यादायामुपदेशेऽपि न कश्चिद् दोष इत्यर्थात् सूचित भवति ॥ ३ ॥

ततश्च**तुर्थे एकसूत्रे अविभागो वचनादित्यधिकरणे** प्रसङ्गात् पुष्टिमार्गीयस्य नित्यलीलारूपफलानुभवस्य नित्यत्व मर्यादामार्गात् फलतो विशेषप्रतिपादनाय विचारितम् ।

तत **पञ्चमे एकसूत्रे तदोकोग्रज्वलनाधिकरणे** मर्यादामार्गीयस्य ब्रह्माण्डमध्ये सद्यो मुक्तिप्रकारो विचारित । तदग्रिमे च अवसरसङ्गत्या मर्यादामार्गीयस्य जीवोत्क्रान्त्यनन्तर क्रममुक्तिप्रकार उच्यते । तत्र साधारणस्यापि जीवस्य इन्द्रियरूपाभिस्तेजोमात्राभि सहैव येन केनचिद्द्वारेण निर्गमनम्, तथापि यस्य साधनेन (परमात्मा तुष्ट ,) स जीवस्तु एकशतनाडीषु या शताधिका मूर्धन्या नाडी, तया ऊर्ध्व स 'क्त्वा' निष्क्रामति, साधनेन तुष्टे यो हृदयवर्ती परमात्मा तदनुग्रहाद्विद्यासामर्थ्याच्च या भगवत्स्मृतिपरपरा, तया तस्यानुग्रह, तेन मूर्धन्यनाड्या निष्क्रमणमित्युक्तम् ॥ ५ ॥

तत **षष्ठे चतुःसूत्रे रश्म्यनुसार्यधिकरणे** । तत्र **प्रथमसूत्रे** य क्रमेण मोक्षाधिकारी रश्म्यनुसारी मूर्धन्यनाड्या नि सरति तस्यापि हृदयाग्रे प्रकाश इत्युक्तम् । ततो **द्वितीये तृतीये** च रात्रिकृतोऽयनकृतो विशेषश्च नास्तीत्युक्तम् । ततश्चतुर्थे

१ विहारान्तर्गतपङ्क्तिका त्रुटितेति प्रतिभाति । २ इत पर सूत्रत्रय भिन्नाधिकरणत्वेन श्रीगपेश्वरा स्पष्टीकृत, भावप्रकाशिकाकारा श्रीकृष्णचन्द्राश्च ।

स्मृतौ धूममार्गस्याप्युक्तत्वात् तत्र च रात्रिदक्षिणायनादीनामुक्तत्वादर्चिरादिमार्गे च ज्योतिरुत्तरायणादीनामुक्तत्वान्मुच्यमानस्य कथं न विशेष इत्याशंक्य, स विशेषो योगिन एव, गती च ते स्मार्ते, अतो न ज्ञानिनः, तेन ज्ञानिन उत्क्रमणे सर्वोपि कालः समान इत्युक्तम्। एतस्य करणग्रामनिष्पत्तिस्तु यत्र प्रारब्धसमाप्तिस्तत्र भूतेष्वेव भविष्यतीति ज्ञेयम् । उपक्रमे तथैवोक्तत्वादिति ॥ ६ ॥

एवमस्मिन् पादे पुष्टिमर्यादामार्गीययोर्म्रियमाणावस्था विचारिता॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां चतुर्थाध्यायस्य द्वितीयः पादः ।

अथ **तृतीयपादे** क्रममुक्त्यधिकारिणो ब्रह्मविदोर्चिरादिमार्गेण गच्छतो व्यवस्थावसरप्राप्तोच्यते ।

तत्र प्रथमे चतुःसूत्रे अर्चिरादीत्यधिकरणे ज्ञानमार्गीयस्य भक्तस्य चेत्युभयोरर्चिरादिमार्गेण गमनम्, उत सद्योमुक्तिरितिसंशये, यथा ज्ञानिनो नियमाभावस्तथा भक्तस्यापीति पूर्वपक्षे, पञ्चाग्निविद्यायां ज्ञानमार्गीयाणामेवोपक्रान्तत्वात्तेषामेव तेन मार्गेण गतिः, न तु भक्तस्यापीति निश्चीयते । ततस्त्रिभिः सूत्रैस्तन्मार्गपर्वनिर्धारः क्रियते । श्रुतिभेदेन पर्वभेदानामनेकधोक्तत्वात् मार्गभेदे प्राप्ते देवयानस्य मार्गस्य श्रुत्यन्तरे यदैक्यमुक्तं तद्विरोधसंभवात् । पर्वसु निर्धारितेषु तु यस्य यत्पर्वभोगो भावी तं प्रति तत् पर्व, अन्यंप्रत्यन्यत् । यथा महामार्गे नानाग्रामेषु सत्स्वपि कस्यचित् कस्मिंश्चिद् ग्रामे अवान्तरनिवासः, अन्यस्यान्यस्मिन् ग्रामे सः, तद्वत् । एवं पर्वभेदेप्युपपत्तौ ब्रह्मलोकगमनस्यैक एवार्चिरादिमार्गो देवयानाख्यः सिध्यतीति निर्णीतम् ॥ १ ॥

ततो **द्वितीये त्रिसूत्रे आतिवाहिकाधिकरणे** तेन मार्गेण कथं गच्छतीत्याकांक्षायामवसरगर्भेण प्रसङ्गेन गमनप्रकारो निर्धार्यते । तत्र पर्वभूतविद्युल्लोकपर्यन्तं विद्यासामर्थ्येनैव गच्छति । ततो विद्युल्लोके अमानवः पुरुषो ब्रह्मलोकगमयिता तत्रागत्य तं विद्युल्लोकस्थं गन्तारं ब्रह्मलोकं प्रापयतीति श्रावितम् । एवं सति येषां विद्युल्लोकभोगोस्ति ते वरुणादिलोकं गच्छन्ति । तत्र सः ब्रह्मलोकप्रापयिता आयाति न वेति संशये, तत्राप्यायाति, श्रुत्यन्तरे प्रजापतिलोकानन्तरमपि ब्रह्मलोकस्योक्तत्वात्, ब्रह्मलोकप्रापयितॄणां पुरुषाणां च बहुत्वात्, यस्य यल्लोकभोगेन प्रारब्धसमाप्तिस्तं तत एव लोकाद्ब्रह्म प्रापयन्तीति **प्रथमसूत्रे** निर्णीतम् । तेषां ब्रह्मलोकप्रापका ये पुरुषास्ते आतिवाहिकशब्देनोच्यन्त इत्यपि । ततो **द्वितीये सूत्रे** अपुनरावृत्तिश्रुत्या देवयानं पन्थानं प्राप्तानां ब्रह्मवित्त्वात्तेषां सद्योमुक्तिरेवोचितेति तेषामवान्तरलोकभोगजनिका कामनैव कुतः । किञ्च, 'यत्कर्मभिर्यत्तपसे'ति भगवद्वाक्ये मर्यादाभक्तस्य या लोकान्तरकामनोक्ता सापि कुतः । तेषां

सद्योमुक्तेरेव प्रथमाधिकरणे निर्धारादित्याशङ्क्य, केषाञ्चित् ज्ञानिनां मर्यादाभक्तानां व्यामोहितत्वात् सा । व्यामोहश्च लीलासिद्ध्यर्थं, येऽवान्तर्लोकाः कृतास्तत्स्फूर्तिसार्थकत्वाय भगवतैव क्रियते । अतो नानुपपत्तिरित्युक्तम् । ततस्तृतीयसूत्रे ये वरुणादिलोकं गतास्तेषां स्वत एव ब्रह्मप्राप्तिरस्तु । आतिवाहिकस्य विद्युल्लोकीयत्वश्रावणेन तेषु लोकेषु तदभावादित्याशङ्क्य, श्रुतावातिवाहिकस्य न विद्युल्लोकीयत्वमभिप्रेतम् । 'पुरुषोऽमानव एत्ये'ति श्रावणाद्ब्रह्मलोकीयत्वम् । वैद्युतत्वं तु तस्य विद्युल्लोकपर्यन्तमागमनात् । अतो लोकान्तरादपि ब्रह्मलोकप्राप्तावातिवाहिकापेक्षास्तीत्युक्तम् । किञ्च, वाजसनेयके 'ब्रह्मलोकान् गमयती'ति श्रावितम् । छान्दोग्ये तु 'ब्रह्म गमयती'ति श्रावितम् । तेन मर्यादामार्गीयं भक्तं वैकुण्ठलोकान् गमयति । ज्ञानमार्गीयं त्वक्षरब्रह्म गमयतीत्यपि तत्र निर्णीतम् । एवमेतेन गमनप्रकारो निर्णीतः ॥ २ ॥

ततस्तृतीये अष्टसूत्रे **कार्यं बादरिरित्यधिकरणे** पूर्वसूत्राधिकरणश्रुत्युक्तस्य प्राप्तव्यस्य ब्रह्मणः किमविकृतब्रह्मत्वम्, उत कार्यब्रह्मलोकत्वमिति संशये, प्रथमं पञ्चसूत्रैर्बादरिमतमुक्तम्, तत्राविकृतस्य परब्रह्मणो व्यापकत्वादत्रोक्तं गमनं न सङ्गच्छते तस्मात् । किञ्च, श्रुत्यन्तरे 'ब्रह्मलोका'निति 'तेषु वसन्ती'ति च बहुत्वेन वासाधिकरणत्वेन च विशेषितत्वादपि तथा । तत्र ब्रह्मत्वव्यपदेशस्तु ब्रह्मसामीप्यात् । कल्पसमाप्तौ कार्यब्रह्मलोकस्य नाशे चतुर्मुखेन ब्रह्मणा सह तस्यापि चतुर्मुखवत् परब्रह्मप्राप्तेः श्रुतौ स्मृतौ चाभिधानादपि प्राप्यब्रह्मलोकोऽपर एव, न तु परब्रह्मेति पूर्वपक्षत्वेनोक्तम् । ततस्त्रिभिः सूत्रैर्जैमिनिमतं सिद्धान्तत्वेनोक्तम् । तत्र प्रथमसूत्रे ब्रह्मशब्दस्य बृहत्त्वादिगुणविशिष्टत्वेन परस्मिन्नेव मुख्यवृत्तत्वात् गौण्याऽपरब्रह्माङ्गीकारो न युक्त इत्युक्तम् । ततो द्वितीये कौषीतकिश्रुतौ प्रजापतिलोकाद्ब्रह्मलोकस्य पार्थक्येनोक्तत्वात् छान्दोग्ये अर्चिरादिमार्गप्राप्यत्वेन समाप्तौ 'ब्रह्म गमयती'त्युक्तत्वात् प्रजापतिलोकादन्यस्य कार्यब्रह्मलोकस्य कुत्राप्यश्रवणाद्गमनस्य प्रारब्धहेतुकत्वेन विलम्ब्यप्राप्तेः संभवाच्च न गमनादिश्रुतिस्मृतिविरोध इत्युक्तम् । ततस्तृतीये 'ब्रह्मविदाप्नोति पर'मिति श्रुतौ परप्राप्तिर्या उक्ता सैवाग्निमर्चा विवृण्यते । तस्यां च ब्रह्मणा सह सर्वकामभोगलक्षणा या प्रतिपत्तिरुच्यते, सा परेणैव सह । कुत्रापि श्रुतौ कार्यरूपे प्रतिपत्तेरनभिप्रेतत्वात् । अतो ब्रह्मशब्देन परब्रह्मैवोच्यत इति सिद्धान्तितम् । एवमष्टभिः सूत्रैः गन्तव्यब्रह्मस्वरूपं प्रसङ्गान्निरूपितम् ॥ ३ ॥

ततश्चतुर्थे एकसूत्रे **अप्रतीकालम्बनाधिकरणे** पूर्वोक्तप्रकारेणातिवाहिकप्रापिता ब्रह्मप्राप्तिः किं सर्वेषामुपासकानाम्, उत केषाञ्चिदेवेति संशये, अप्रतीकालम्बनानेवातिवाहको नयतीति निश्चीयते । तत्र प्रतीकोपासका द्विधा । केचिदतस्मिंस्तत्त्वेनोपासकाः, अन्ये तु तदङ्गेषु तत्त्वेनोपासकाः । तत्राद्यानामुपासनैव व्यङ्गा । 'योऽन्यथा सन्तमात्मान'मिति वाक्योक्तदोषप्रसङ्गात् । द्वितीयानां तूपासनाव्यङ्गत्वाभावेपि 'याव-

न्मनसो गतं तत्रास्य कामचारो भवती'त्यादिश्रावणेन तत्क्रतुन्यायतस्तत्रैव पर्यवसानेन तेषां ब्रह्मप्राप्तेरनभिप्रेतत्वात् । पञ्चाग्निविद्यायास्तु अङ्गोपासनात्वेन प्रतीकत्वेऽपि वाचनिकत्वात् तेषां नयनम् । तस्मात् ये परब्रह्मोपासकास्तानेव नयतीति ज्ञानमार्गीया व्यवस्था । भक्तिमार्गीयस्तु निष्कामाङ्गोपासनकर्ता भक्तः सन् भक्तिबलादेवातिवाहिकं विनैव स्वयं गच्छतीति तत्क्रतुश्चेति सूत्रशेषेण निश्चीयत इत्युक्तम् । एवमत्र चतुर्भिरधिकरणैः सप्रकारा गच्छद्ब्रह्मविद्व्यवस्थोक्ता । सङ्गतिस्तत्रावसर एव ॥ ४ ॥

ततः **पञ्चमे एकसूत्रे विशेषं च दर्शयतीत्यधिकरणे** भक्तिमार्गीयाणां ज्ञानमार्गीयाणां चाविशेषेणैव ब्रह्मप्राप्तिः, उत गमने विशेषात् फलप्राप्तावपि कश्चिद्विशेषोऽस्तीति सन्देहे, 'ब्रह्मविदाप्नोति पर'मिति यजुर्व्याख्यानरूपायां 'सत्यं ज्ञान'मित्यस्यामृचि ज्ञानमार्गीयस्य अक्षरप्राप्तिरेव, भक्तिमार्गीयस्य तु 'यमेवैष वृणुते' इति श्रुत्युक्तवरणेन भक्त्या हृदि अक्षरब्रह्मप्रादुर्भावात्तत्र स्थितेन पुरुषोत्तमेन सह भोग उच्यते । तत्र भक्तिमार्गः पुष्टिमर्यादाकेवलपुष्टिभेदेन द्विविधः । तत्राद्यस्य यथाधिकारं पुरुषोत्तमानुभवरूपो भोगः । द्वितीयस्य तु यथाधिकारं ब्रह्मणा सह सर्वकामाशनरूप इति विशेषं श्रुतिर्दर्शयति । तस्मात् ब्रह्मप्राप्तावस्ति तयोर्विशेष इति प्रसङ्गगर्भया पूर्वोक्तसङ्गत्यैव निर्णीतम् ॥ ५ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां चतुर्थाध्यायस्य तृतीयः पादः ।

ततश्चतुर्थे **पादे** पञ्चभिरधिकरणैः प्राप्तफलस्य ब्रह्मविदो व्यवस्था वक्तव्या । तत्र ब्रह्मविदो भक्तिज्ञानमार्गभेदेन द्विविधाः । भक्तिमार्गीया अपि मर्यादापुष्टिकेवलपुष्टिभेदेन द्विविधाः । अवान्तरभेदास्त्वनेके । तत्र ज्ञानमार्गीयाः पुष्टिमर्यादामार्गीयाश्च प्रायशः क्रमेणैव मुच्यन्ते । अतिकृपया तु केचित् सद्योऽपि । पुष्टिमार्गीयास्तु सद्य एव । एवमेतेषु ब्रह्मवित्सु ज्ञानमार्गीया अक्षरोपासकत्वात्तत्रैव पर्यवसन्नाः सद्यः क्रमेण वा तमेव प्रविशन्ति । पुष्टिमर्यादामार्गीयास्तु सद्यः क्रमेण वा नित्यं ब्रह्मलोकं प्राप्नुवन्ति । तेषां लौकिक्यामेव गुहायामक्षरम् । तत्र स्थितं पुरुषोत्तमं चानुभूय पुरुषोत्तमस्वरूपे प्रविशन्तीत्येतावत्पूर्वपादान्ते सिद्धम् । ये पुनः क्रमेण नित्यं भगवल्लोकं प्राप्नुवन्ति, ते तत्रैव भगवन्तं भिन्नमीश्वरत्वेनानुभवन्तो यथाधिकारं सेवौपयिकदेहं प्राप्नुवन्तीत्यर्थात् सिध्यति । तदपि तृतीयस्कन्धे 'अथो विभूतिं मम मायाविनस्ता'मिति कपिलदेववाक्यादवसीयते ।

अतःपरं पुष्टिमार्गीयस्य प्राप्तफलस्य 'सोऽश्नुते सर्वान् कामान्' इति श्रुत्युक्ता व्यवस्थावशिष्यते । सा विशेषदर्शनसूत्रे संक्षेपेण सिद्धास्मिन्पादे प्रपञ्च्यते ।

ततः **सम्पद्याविर्भाव इति चतुःसूत्रे प्रथमाधिकरणे प्रथमसूत्रे** भगवत्स्वरूपे लीनस्य पुष्टिमार्गीयस्य स्वलीलानुभवनार्थं भगवता बहिराविर्भावः क्रियते, अनुगृ-

ह्रीतत्वात् । स चाविर्भावो भगवत्स्वरूपबलेनैव लीलाधिकरणे भवति, न तु प्रपञ्च इति श्रुतिबलादुक्तम् । ततो द्वितीये तस्यैवमाविर्भावेपि मुक्तत्वं नापैतीत्युक्तम् । ततस्तृतीये एवं फलदातुः परमात्मत्वमेवेत्युक्तम् । ततश्चतुर्थे 'सत्यं ज्ञान'मित्यस्या ऋचः 'ब्रह्मविदाप्नोती' त्यनेनैकवाक्यत्वं व्याख्यानव्याख्येयभावादस्ति, तस्मादयमेनार्थ इति निर्धारितम् ॥

ततो द्वितीये अष्टसूत्रे ब्राह्मेणेत्यधिकरणे येन देहेनायं जीवो लीलानुभवं करोति तादृशो देह उपोद्घातेनावसरेण वा विचारितः । तत्र प्रथमसूत्रे सच्चिदानन्दात्मकेनैव देहेन ब्रह्मणा सह भोगान् भुङ्क्त इति स देहस्तादृशो ब्रह्मणा सम्पादित इति साधितम् । तत्प्रकरणे ब्रह्मात्मकानामेवान्नमयादिविभूतीनामुपन्यासादिति जैमिनिमतकथनमुखेन तत्सम्मतिश्च प्रदर्शिता । ततो द्वितीयसूत्रे प्रज्ञानघनश्रुत्या केवलज्ञानात्मको ब्रह्मणो विग्रहो बोध्यते । अतस्तादृशेन सह भोगकर्त्रा ज्ञानात्मकेनैव भवितव्यम् । नचैवमानन्दानुभवेन सर्वकामाशनबाधः शङ्कनीयः । भगवतः पूर्णानन्दत्वात् तत्सम्बन्धेनैवानन्दानुभवः सिद्धः । तस्माद्विग्रहं विनैव केवलस्वरूपेण भुङ्क्त इत्यौडुलोमिमतमुक्तम् । ततस्तृतीये सूत्रे 'सत्यं ज्ञान'मित्यस्यामृचि गुहाया उक्तत्वात् तस्याश्च विग्रह एव संभवात् श्रुतौ विग्रहत्वेनैवोपन्यासः । ते च विग्रहा भगवद्धाम्नि पूर्वमेव वर्तन्ते भगवद्धर्मरूपाः । तेषु कस्मिंश्चिदयं चिन्मात्र एवाविश्याभिमानं कृत्वा भगवदिच्छानुरूपलीलात्मकान् भोगान् भुङ्क्ते । तस्मान्न चिन्मात्रत्वस्य नित्यविग्रहवत्त्वस्य च विरोध इति मतद्वयं संगृह्य तादृशविग्रहेणैव भुङ्क्त इति स्वमतमुक्तम् । ततश्चतुर्थे सूत्रे तादृशदेहप्राप्तौ भक्ते भगवदनुग्रह एव हेतुरित्युक्तम् । तेन तादृशो भोगो न सर्वेषाम्, किन्त्वत्यन्तभगवदनुगृहीतानामेवेति वरणश्रुत्या सिध्यति । ततः पञ्चमसूत्रे अतो हेतोः भगवाननन्याधिपतिः । अनन्याश्च त एव ये साधनत्वेन (फलत्वेन) च भगवन्तमेव जानन्ति । तस्मात्तदर्थमेवं भगवतः सङ्कल्प इत्युक्तम् । तेन तदेकतानतया तदाश्रयतया च ते सर्वदा तिष्ठन्तीति सिध्यति । ततः षष्ठे सूत्रे मुक्तस्य देहाङ्गीकारप्रतिकूलं बादरिमतमाह । 'यत्र हि द्वैतमिव भवती'त्यादिश्रुतिरमुक्तिदशायां द्वैतदर्शनमुक्त्वा 'यत्र त्वस्य सर्वमात्मैवाभू'दित्यादिना मुक्तस्य द्वैतदर्शनं निषेधति । तथा सति द्वितीयदर्शनाभावे कामभोगवार्तैव दूरेति तदाक्षेप्यो देहोपि दूरतरः । एतन्मते 'ब्रह्मविदाप्नोति पर'मित्यादिश्रुतिः पूर्वकक्षाविश्रान्ता । ततः सप्तमे बादरिविरुद्धं जैमिनिमतमाह । जैमिनिस्तु मुक्तस्य देहसत्तां मन्यते । 'ब्रह्मविदाप्नोती'ति श्रुतिः पूर्वकक्षाविश्रान्तेत्यत्र मानाभावान्न बादरिमतं साधीयः । अनेन श्रुतिविरोधापत्तेः । श्रुतौ हि 'ब्रह्मविदाप्नोती'त्यत्र ज्ञानस्य तत्प्राप्तिसाधनत्वमुच्यते, 'नायमात्मे'त्यत्र वरणैकप्राप्यत्वम् । अतः साधनबोधकश्रुत्योः परस्परविरोधः । 'सोश्नुत' इत्यादिना परप्राप्तिरुपन्यस्यते । 'ब्रह्मैव सन् ब्रह्माप्येती'त्यत्र ब्रह्मणि जीवस्य लय उच्यते । अतः फलबोधकश्रुत्योर्विरोधः । एवं विरोधे सति तदभावाय

गतिरवश्यं कल्पनीया । तत्र पुष्टिमर्यादाभ्यां मार्गभेदस्य सिद्धत्वात् तत्तन्मार्गीयस्य तत्तदेव फलं परममिति व्यवस्थितविकल्प एव ज्यायानिति नैकतरादरणं युक्तमिति । ततोष्टमे भगवान् व्यासः स्वसिद्धान्तमाह । लोके हि शरीरं भूतजन्यं भोगायतनं च दृष्टम् । मुक्तस्य तु शरीरतदभावावाक्षेपलभ्यौ न निवारयितुं शक्यौ । अतः शरीरमेव तादृश कल्पनीयं येन श्रुत्यविरोधः । तत्र भूमविद्याया 'आत्मतः प्राण' इत्युपक्रम्य 'आत्मत एवेदं सर्व'-मित्यन्तेन भगवत एव सकाशाद्भोगोपयोगिसर्वसामग्रीश्रावणान्मुक्तस्य शरीरं न भूतजन्यम्, तस्मादशरीरम् । तत्रैव 'आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्द' इति श्रावणात्तच्छरीरं भोगायतनम् । तस्माच्छरीरमपि । एवमुभयविधत्व आस्थिते श्रुतीनां न कश्चिद्विरोधः ॥

ततस्तृतीये द्विसूत्रे **तत्त्वभावाधिकरणे** गुणोपसंहारपादोक्तं निर्दोषपूर्णगुणं भगवत्स्वरूपमेव फलमिति विचारितम् । तत्र **पूर्वसूत्रे** दोषरूपाणामज्ञत्वादीनां भगवति या प्रतीतिः, सा भ्रान्ता, स्वप्नवदर्थाभावेपि प्रतीयते । तस्माद् ब्रह्म निर्दोषमित्युक्तम् । ततो **द्वितीये सूत्रे** याः पौगण्डादयोवस्थाः, ये च गुणास्ते सर्वे सन्त एव मायापसारणाद्भक्तानां प्रतीयन्ते । तस्माद् ब्रह्मानन्तगुणपूर्णमवतारेपीत्युक्तम् । तथा चावसर एव सङ्गतिरित्यर्थः ॥३॥

ततश्चतुर्थे द्विसूत्रे **प्रदीपवदित्यधिकरणे** फलानुभवोपकरणं प्रकृतत्वाद्विचार्यते । पूर्वाधिकरणयोः फलप्राप्त्युपकरणस्य फलस्वरूपस्य च विचारितत्वात् । अतोवसरोत्र सङ्गतिः । तत्र **प्रथमसूत्रे** मुक्तस्य भगवत्कृपयाभिव्यक्ताभ्यां जैवज्ञानक्रियाभ्यां योगेपि न ताभ्यां भगवता सह कामभोगकरणसमर्थो भवति, किन्तु यथा प्राचीनः प्रकृष्टो दीपः स्नेहयुक्तायामर्वाचीनायां वर्त्यां प्रविष्टस्तां समानकार्यक्षमां करोति, तथा भगवानपि स्वदत्ते मुक्तदेहे जीवेन सह प्रविष्टस्तं देहं स्वभोगरूपकार्यक्षमं करोति । यतो 'भर्ता स' न्निति भर्तृसूक्तारम्भमन्त्रे भगवतः क्रीडार्थं बहुधा आवेश उक्तः । तेनैवं ज्ञायते क्रीडोपयोगिभगवदावेश एव फलानुभवोपकरणमिति । ततो **द्वितीयसूत्रे** अस्थूलादिश्रुतेः सर्वकामभोगश्रुतेश्च यो विरोधः स सुषुप्तिमोक्षभेदेन भगवदाविर्भावप्रकारभेदात् परिहृतः ॥

ततः पञ्चमे **षट्सूत्रे जगद्व्यापाराधिकरणे** भोगप्रकारो विचारितः । तत्र **प्रथमसूत्रे** 'सोश्नुते सर्वान् कामा'निति श्रुतिर्मुक्तिप्रकरणस्था । तस्मात्तत्र न जगत्संबन्धः । किञ्च, भगवल्लीला कालमायाद्यतीता । तेन प्राकृतं जगत् ततो दूरतरमिति न तत्संबन्धः । अतो लौकिकव्यापाररहितमेव मुक्तस्य भोगकरणमित्युक्तम् । ततो **द्वितीयसूत्रे** 'सर्वं हि पश्यः पश्यती'तिश्रुत्युक्तप्रत्यक्षोपदेशेन तस्य जगद्व्यापारसाहित्यमाशङ्क्य, श्रुतौ सर्वपदेन न जगदुच्यते, किन्तु लीलास्थाः पदार्था एवोच्यन्ते । तेषामेव दर्शनम् । अतो न श्रुतिविरोधः । किञ्च, पूर्वोक्तश्रुत्यनन्तरं 'स एकधा भवती'ति भक्तस्य नानारूपबोधिका श्रुतिः पठ्यते । तेन नानारूपैर्नानालीलां भगवदनुभावितामनुभवतीति न लीलानामनित्यत्वम्, नापि काचिदन्यानुपपत्तिरित्युक्तम् । ततस्तृतीये **सूत्रे** 'आयास' इत्यागमन-

मविष्यत्त्वबोधकभगवद्वाक्याल्लीलाना भक्तरूपाणा चानित्यत्वमाशङ्क्य, भगवल्लीला प्राकृत-विलक्षणा भगवदिच्छयैवोपपद्यमाना न कुतर्कैरन्यथा भाव्या, किन्तु श्रुत्या नित्यत्वेनो क्तत्वादलौकिकानुसरणमेव कर्तव्यमित्युक्तम् । ततश्चतुर्थसूत्रे अस्मिन् सूत्रे कुतर्केणा न्यथाभानन न कर्तव्यमिति यदुक्त तदेव श्रुतिप्रत्यक्षाभ्या साधितम् । तत पञ्चमसूत्रे जीवस्य भोगमात्र एव भगवत्साम्यम्, न तु सर्वथेति 'न तत्समश्चाभ्यधिकश्च दृश्यते' इतिश्रुतेर्न विरोध इत्युक्तम् । एवमत्र पञ्चसूत्र्या भगवत परमफलत्वमर्थादुक्त भवति । तत षष्ठे ईदृश परमफल प्राप्य भक्ताना ज्ञानिना चावृत्तिर्नास्ति । तत्र प्रमाण च शब्द• श्रुतिरूप स्मृतिरूपश्चेत्युक्तम् । एव षड्भि सूत्रैर्फलभोगप्रकारो विचारित• ॥ ५ ॥

वेदान्तीयन्यायमालामणुभाष्यानुसारिणीम् । सौकर्यायार्थबोधस्य चकार पुरुषोत्तम• ॥ १ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां चतुर्थाध्यायस्य चतुर्थः पादः ।

चतुर्थाध्यायः समाप्तः ॥

परिशिष्टम् ।

श्रीगोपेश्वरकृता चतुर्थाध्यायाधिकरणमाला ।

पूर्वाध्याये साधन निरूपितम्, इदानीं मुख्यमवान्तर चेति द्विविध फलमत्र निरू• प्यते, कार्यकारणभावसङ्गत्यावसरसङ्गत्या च । तेन ब्रह्मणस्तत्सम्बन्धिप्राप्तेर्वा फलत्वेन ब्रह्मविचाराद्ब्रह्मसम्बन्धिन्या विचाराद्वा शास्त्रसङ्गतिर्विषयविषयिभाव ।अध्यायसङ्गती तूक्ते । सूत्रपादाधिकरणाना सङ्गतयोऽग्रे स्फुटा । तत्र **प्रथमे द्विसूत्रे आवृत्त्यधिकरणे** अवान्तरफलमुच्यते । तत्र प्रथमसूत्रे 'आत्मा वा अरे द्रष्टव्य श्रोतव्य' इत्यादिवाक्यैर्वि हित श्रवणादिक किं सकृदेव कर्तव्यमुतासकृदिति सशये, सकृदेव कर्तव्यम्, तावतैव शास्त्रार्थस्य कृतत्वसिद्धेरिति पूर्वपक्षे, छान्दोग्ये 'ऐतदात्म्यमिद सर्व तत्सत्य स आत्मा तत्त्वमसि श्वेतकेतो' इति वाक्येन जडजीवयोर्ब्रह्मात्मकत्वस्य नवकृत्व उपदेशाच्छ्रवणा दीनामावृत्ति कर्तव्येति सिद्धान्त । ततो द्वितीयसूत्रे 'यथात्मा परिमृज्यतेऽसौ मत्पुण्य गाथाश्रवणाभिधानै । तथा तथा पश्यति वस्तु सूक्ष्म चक्षुर्यथैवाञ्जनसम्प्रयुक्तम्' इति स्मृतिरप्युक्तार्थ लिङ्गम् । श्रुत्यनुमापकत्वात्स्मृतिर्लिङ्गम् । अत्र च परिमार्गस्य दृष्टद्वारता क्षालनदृष्टान्तेन बोध्यत इत्युक्तम् । तेनात्र श्रवणादीना स्वेन स्वरूपेण साधनत्वेपि तेषामा वर्तमानत्वेन रूपेण फलत्वम् । 'आत्मा वा अरे' इति वाक्ये दर्शनकथनानन्तर श्रवणा दिकथनात् । तेनात्मन परोक्षज्ञानमप्यवान्तर फलमिति सिध्यति । ततो द्वितीयवर्णके श्रुतौ कर्मज्ञानभक्तीनामुक्तत्वेऽपि न त्रयाणा फलतस्तौल्यम्, किन्तु ज्ञानभक्ती फलत

उत्कृष्टे इति ज्ञापयितुं कर्मफलजाघन्यमप्यत्र बोध्यत इत्याशयेन आवृत्तिः पुनः पुनर्जन्म कर्मफलं तत्सकृदसकृद्वेति संशये, सकृदिति पूर्वपक्षे, बृहदारण्यके 'तद्यथा तृणजलायुके'त्युपक्रम्य 'एवमेवायं पुरुष इदं शरीरं निहत्याविद्यां गमयित्वान्यन्नवतरं कल्याणतरं रूपं तनुते, पित्र्यं वा गान्धर्वं वा ब्राह्मं वा प्राजापत्यं वा दैवं वा मानुषं वान्येभ्यो वा भूतेभ्यः' इत्युक्त्वा 'प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययं, तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण' इत्येवं पुनरुपदेशादसकृदिति सिद्धान्तः । द्वितीयसूत्रे च 'त्रैविद्या मां सोमपाः पूतपापा' इत्यारभ्य 'एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्त' इत्यादिस्मृतिर्लिङ्गमित्युक्तम् ॥१॥ ततो द्वितीये त्रिसूत्रे **आत्माधिकरणे** प्रथमसूत्रे ज्ञानभक्त्योरनावृत्तिसाधकत्वेनोत्तमत्वाय यत्कर्मणो जाघन्यमावृत्तिसाधकत्वादुक्तं, ज्ञानाद्यङ्गकर्मणस्तच्छेषत्वादनावर्तकत्वं च, तच्च 'न स पुनरावर्तत' इति श्रुतिबलेनोक्तम् । सा श्रुतिः ज्ञानिनां सर्वथानावृत्तिमाहोत सावधिकींताममरशब्देन तन्निवृत्तिमिवेति संशये, सावधिकीमेवेति पूर्वपक्षे, सर्वथाऽनावृत्तिमाहेति सिद्धान्तः । एवं विद्याया अवान्तरं फलं स्वतन्त्रकर्मफलं च विचार्य ज्ञानभक्त्योः आत्मत्वेन ज्ञानान्मोक्षरूपं फलं विचारितम् । अगृह्यत्वस्य गृह्यत्वस्य च विरोधपरिहारस्तु जीवसामर्थ्येश्वरेच्छाभ्यां पुरैव कृत इति नाधिकमत्र निरूप्यम् । सर्वधर्माश्रयत्वेपि यदा यं धर्मं पुरस्कृत्य लीलां करोति तत्कार्यमेव तदा सम्पद्यते, आत्मत्वेन हितकारिस्वभावात्तस्य । ततो द्वितीयसूत्रे आत्मत्वेन ज्ञानस्य न मोक्षसाधकत्वं, आत्मेत्येवोपासीतेत्यत्र तस्योपासनार्थत्वावगतेरित्याशङ्क्य, तदाशय उच्यते । अतद्रूपे तत्त्वेनोपासनं हि प्रतीकमित्युच्यते । तथा च तादृशेन तेन मोक्षो न भवतीति श्रुत्या बोध्यते, न तु आत्मत्वेन ज्ञानान्मोक्षो न भवतीत्युच्यते । ततस्तृतीयसूत्रे 'आत्मैवेदं सर्व'मिति प्रपञ्चे आत्मदृष्टेर्मोक्षफलमुक्तम्, सा च प्रतीकरूपैव कार्यविषयककारणदृष्टित्वेनातस्मिंस्तद्दृष्टिरूपत्वादित्याशङ्क्य, प्रपञ्चस्य ब्रह्मात्मकत्वेन न सा प्रतीकरूपेत्युक्तम् ॥ २ ॥ ततस्तृतीये **आदित्याद्यधिकरणे** पञ्चसूत्रे अङ्गोपासनफलमुच्यते । तत्र प्रथमसूत्रे छान्दोग्ये 'अथ होवाच सत्ययज्ञं पौलुषि'मित्यादौ आदित्यवायुप्रभृतीनामात्मत्वेनोपासना उक्ता । तत्र प्रतीकोपासनत्वमस्ति न वेति संशये, आदित्यादीनां प्रत्येकमुपास्यश्रुतेस्तद्रूपान्योक्तमुपासनं प्रतीकं भवितुं युक्तम् । न च सर्वत्र ब्रह्मदृष्टेर्न प्रतीकत्वमिति पूर्वमुक्तं तद्विरोधः शङ्क्यः । उक्तश्रुतिविरोधात् । न च तच्छ्रुत्यनुरोधेनेदमेवायुक्तमिति वाच्यम्, ब्रह्मण एकत्वादेकप्रकारकेणाप्युपासनेन सर्वेषां फलसिद्धेः पृथक्पृथगुक्तौ गौरवात् प्रयोजनविशेषाभावाच्च । अतः सर्वस्य ब्रह्मत्वं नाभिमतम्, किन्तु यथा आदित्यादीनां प्रतीकत्वम्, तथा सर्वस्यापीति प्रतीकोपासनादेव तत्तत्फलमिति पूर्वपक्षे, वैश्वानरविद्यायां 'तस्य मूर्धैव सुतेजा' इत्यादिनादित्यादीनामङ्गतोक्ता । अङ्गस्य च ब्रह्मत्वान्नेयं प्रतीकोपासनेति । तेनात्र फलदानोपपादनेन भक्त्यङ्गभूतमाहात्म्यं ज्ञापितात्फलदात् भगवत एव फलत्वमिति दृढीकृतम् । द्वितीयसूत्रे च बहिःप्राकट्यबोधनेन

पूर्वोक्त एव सिद्धान्तः ससाधनः प्रकाशितः। ततस्तृतीये भावनौत्कट्यदशायां सततस्मृतिरूपध्यानादपि हृदि प्रकट सन्नासीनो भवतीत्युक्तम् । तेन स्थैर्यमुक्त भवति । ततश्चतुर्थसूत्रे भक्तेच्छामपेक्ष्याचलत्व चकाराचलत्वमपीत्युक्तम् । तथा च पूर्व भक्तेच्छया प्राकट्य निरूपितम्; अत्र तु तदिच्छानुसारेण लीलानामपि तदुक्तम् । ततः पञ्चमे सूत्रे 'अथ ह वाव तव महिमे'ति स्मृत्युक्तमपवर्गान्तविस्मरणरूप फलान्तरमप्युक्तम् । अथवा 'अहं भक्तपराधीन' इत्यादिस्मृतिः पूर्वोक्ते प्रमाणमित्युक्तम् । तेनाङ्गोपासनफलं निर्णीतम् ॥ ३ ॥ तत **एकसूत्रे यत्रैकाग्रताधिकरणे** बहिराविर्भावो येभ्यो येभ्यश्चान्तस्तेषा तेषा भावद्वैविध्य सूचितम्, पूर्वनाधिकरणे तत्र तयोर्द्वैविध्ये भावभेद एव हेतुरिति तयोर्मिथस्तारतम्यमस्ति, किंवा भावविषयस्य रूपस्यैक्यात्तत् न वेति सशये, विषयैक्येपि प्राकट्यप्रकारभेदस्य भावभेदकृतत्वादस्तीति पूर्वपक्षे, उक्तभक्तयोर्मध्ये यस्यैकाग्रता तत्र भक्तेन्तस्त्ववहिष्कृतविशेषाभावात्तयोर्भक्तयोरपि न तारतम्यम्, किन्तु तौल्यमेव । तेनानैकाग्र्ये एव भावतारतम्यम्, तेन तयोस्तारतम्यम्, न तु प्राकट्यप्रकारभेदादिति साधितम् ॥४॥ ततो ह्येकसूत्रे **पञ्चमे आप्रायणाधिकरणे** उक्तेर्थे एव अन्त प्राकट्यवतो यदा बहि सवेदने सत्यपि पूर्वानुभूतभगवत्स्वरूपानुभवस्तदा पूर्वमन्तरन्वभूवमधुना बहिरनुभवामीत्यनुव्यवसायो भवति न वेति सशये, देशकालात्मकविशेषणप्रयुक्तवैलक्षण्याद्भवितुमर्हतीति पूर्वपक्षे, एकैवावस्था सार्वदिकी, न तु बहि प्राकट्येपि बहिष्ट्वानुसन्धानमिति सिद्धान्त· । तत प्रायणरूपे परमफले सायुज्यमवश्य भविष्यतीति सशये, प्रभुणा सममालापावलोकनश्री चरणनलिनस्पर्शादिक दृष्टमेव फलम्, नत्वदृष्ट सायुज्यमिति अनुप्रसङ्गान्निर्णीतम् । तेन पुष्टिमार्गीयस्य फल निरूपितम् ॥५॥ ततः **षष्ठे चतुःसूत्रे तदधिगमाधिकरणे** प्रथमसूत्रे मर्यादामार्गे ज्ञानानन्तर भक्तिरिति तादृशज्ञानार्थं चित्तशुद्धि । चित्तशुद्ध्यर्थं कर्म । तच्च 'नाभुक्त क्षीयते कर्मे'ति वाक्यादभुक्त न क्षीयत इति भोगो वक्तव्य· । एव च भोगानुकूलकर्मणा स्वसजातीयकर्मजननात्तत्सन्ताने चित्तशुद्ध्यभाव, तेन च ज्ञानाभावाद्भक्त्यभावे मुक्त्यभाव इति पूर्वपक्षे, ज्ञानेनैवोत्तराघस्यानुत्पाद, पूर्वाघस्य च नाशः, तेन मुक्तिरिति सिद्धान्तः । ततो द्वितीयसूत्रे पुण्यस्याप्यसश्लेष उक्त· । ततस्तृतीयसूत्रे उभयकर्मनाशे देहनाशापत्त्या प्रवचनानुपपत्तिस्तदभावे च ज्ञानभक्त्योरप्यनुत्पाद इत्याङ्क्य, अनुत्पादितशरीरे एव पुण्यपापे ज्ञानेन नाश्येते । तेन देहजनककर्मसद्भावान्न तदनुपपत्ति । यद्यपि सर्वकर्मनाशः श्रुत्युक्तस्तथापि भगवदिच्छातोऽय सङ्कोचः । ततश्चतुर्थसूत्रे वसिष्ठादिभिर्ब्रह्मविद्भिः कर्मकरणादुत्तरस्य कर्मण· सश्लेषमाशङ्क्य, तेषा तत्तु प्रारब्धनाशायैवेति । येषामग्निहोत्रादिकारक प्रारब्धमस्ति तैरेव भोगनचत्तन्नियते, न तु सनकादितुल्यैरतो न तेनादृष्टान्तरसश्लेष इत्युक्तम् ॥ ६ ॥ तत **सप्तमे त्रिसूत्रे अतोन्याधिकरणे** प्रथमसूत्रे पुष्टिमार्गीयस्य विनैव भोग प्रारब्ध नश्यत्युत भोगेन वेति सशये, प्रारब्धस्य भोगैकनाश्यस्वभावत्वात्त विना न नश्यतीति

पूर्वपक्षे, पुष्टिमार्गीयाणां आरब्धाप्रारब्धे 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्या'मिति श्रुतेर्भोगं विनैव नश्यतीति सिद्धान्तः। ततो द्वितीयसूत्रे 'यदेव विद्यये'ति श्रुतौ ज्ञानिना कृतस्य कर्मणो वीर्यवत्तोक्त्या ज्ञानिनोपि कर्मफलस्यावश्यं वाच्यत्वेन कर्मश्लेषमाशङ्क्य, अन्यकृतात्कर्मणस्तत्कृतकर्म वीर्यवत्तरमतः कर्मान्तरं निवार्य स्वयमपि निरिन्धनवह्निवन्नश्यतीति न तेन श्लेष इत्युक्तम्। ततस्तृतीयसूत्रे पुष्टिमार्गीयफलप्राप्तिप्रतिबन्धाभावमुक्त्वा तत्प्राप्तिप्रकार उच्यते। इतरे अग्रे प्राप्यालौकिकदेहाद्भिन्ने स्थूललिङ्गशरीरे क्षपयित्वा पूर्वोक्तरीत्या कर्मनिवर्तनेन दूरीकृत्य अथ भगवल्लीलोपयोगिदेहप्राप्त्यनन्तरं भोगेन सम्पद्यते इत्युक्तम्। तेनास्मिन्पादे ब्रह्मज्ञानवतस्तत्तन्मार्गभेदात्प्रकारभेदेन कर्मक्षये स्थूलसूक्ष्मशरीरक्षपणोत्तरं ब्रह्मप्राप्तिरुक्ता भवति ॥ ७ ॥

इति श्रीविद्वन्मण्डनगोकुलोत्सवात्मजगोपेश्वरविरचितायामधिकरणमालायां चतुर्थाध्यायस्य प्रथमः पादः ॥

इदानीं स्थूलशरीरत्यागस्य स्फुटत्वात्सूक्ष्मशरीरत्यागप्रकारोऽस्मिन्पाद उच्यते। तत्र **प्रथमे चतुःसूत्रे वाङ्मनोधिकरणे** प्रथमसूत्रे भगवत्कृपारूपस्य साधनद्वारा तद्रूपस्य वा साधनस्य भेदात् द्विधा सद्योमुक्तिः। तत्र प्रथमायां किं प्राणा युगपल्लीयन्त उत क्रमेणेति संशये विलंबे हेत्वभावाद्युगपदेवेति प्राप्ते क्रमेणेति वक्तुं वाङ्मनसि लीयत इत्युक्तम्। ततो द्वितीयसूत्रे अन्येन्द्रियाणां मनसि लय उक्तः। ततस्तृतीयसूत्रे सर्वेन्द्रियविशिष्टमनसः प्राणे लय उक्तः। ततश्चतुर्थेसूत्रे सर्वेन्द्रियविशिष्टमनोविशिष्टस्य प्राणस्य हृदि प्रत्यक्षविषये भगवति लय उक्तः। एवं पुष्टिमार्गीयवागादिलयप्रकार उक्तः ॥ १ ॥ ततो **द्वितीये द्विसूत्रे भूताधिकरणे** ननु मर्यादामार्गीयाणामपि एवमेव वागादिलय उतान्यथेति संशये एवमेवेति पूर्वपक्षे तेषां ते भूतेषु लीयन्ते न तु भगवति। ततो द्वितीयसूत्रे ननु मर्यादामार्गीयो भक्तो ज्ञानी च भवतः, उक्तनिर्णयस्तु ज्ञानमार्गीयविषय एव। भक्तं तु तादृशमपि कदाचित्पुष्टावपि प्रवेशयतीति आशङ्क्य एकस्मिन् ज्ञानिनि भक्ते वा मर्यादानियमो न किन्तूभयोरपि ॥२॥ **ततस्तृतीये नवसूत्रे समानाधिकरणे** अतीताधिकरणद्वयेन पुष्टिमर्यादास्थयोः क्रमेण वागादिलयव्युत्पादनात्तद्दार्ढ्यार्थं तास्ताः शङ्का निराक्रियन्ते। तत्र प्रथमे सूत्रे पुष्टिमर्यादयोर्न कदाचिदन्यथाभाव इत्यत्र हेतुः क इत्याशङ्का निराक्रियते। साधनक्रमेण मोचनेच्छा हि मर्यादामार्गीया मर्यादा। विहितसाधनं विनैव मोचनेच्छा पुष्टिमार्गमर्यादा। तथा सति सदैकरूपत्वं तयोर्युक्तमिति। एवं च 'एष उ एवे'ति श्रुत्युक्तेच्छाविषय'स्ते नाधीतश्रुतिगणा' इति वाक्यविषयस्तत्तन्मार्गस्वरूपमेव हेतुः, यथैकनगरप्रापकयोर्मार्गयोस्तत्प्रापकत्वे मार्गत्वे च समानेपि कस्यचित्केवलपान्थप्रापकत्वं कस्यचित्सपरिकरपान्थप्रापकत्वं तद्वदित्युक्तम्। ततो द्वितीयसूत्रे पुष्टिमार्गीयमुक्तिदशायां मर्यादामार्गीयाया मुक्तेः संसार इत्येव

व्यपदेशो भजनानन्दानुभवाभावात्, 'नारायणपराः सर्वे न कुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन' इति वाक्यात् । ततस्तृतीयसूत्रे एतादृशवाक्यानां पुष्टिमार्गस्तुतिपरत्वमाशङ्क्य तत्र 'यतो वे'ति श्रुतिरपि प्रमाणमित्युक्तम् । ततश्चतुर्थे तर्हि ब्रह्मविदामिव तादृशानां भक्तानामपि स्वमार्गोपदेशकत्वं क्वचित् श्रूयेत, न चैवमतः पूर्वोक्तं न साधीय इति भातीत्युत्सूत्रमाशङ्क्य तत्र हेतुरुच्यते । ज्ञानिनामिव भक्तानां स्वास्थ्याभावान्नोपदेश सम्भवति । यतस्तेषां विरहिदशा प्रियसङ्गमदशा चेति दशाद्वयमेव । तत्र पूर्वस्यास्तस्यास्तु अतिदुःसहत्वेन सर्वेषां भावानामुपमर्देन तिरोधानात् उपदेशो न सम्भवति । सङ्गमे तु पुरःप्रकटपरमानन्दस्वरूपाद्भगवत एव अन्यस्मै उपदेशो न सम्भवति । न हि भगवदग्रे उपदेशः सम्भवतीत्युक्तम् । ततः पञ्चमे सूत्रे आनन्दप्राप्त्यनन्तरं विरहस्य दुःसहत्वेनाशक्यवचनत्वं, किञ्च तदानन्दतिरोभाव एव सिद्ध इति नित्यनिरतिशयसुखाभिव्यक्तिरूपादक्षरैक्यरूपाद्वा मोक्षात्कथं तस्याधिक्यमित्याशङ्क्यानन्दस्यैवायं धर्मो विरहतापरूपः इत्युक्तम् । ततः षष्ठे सूत्रे 'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखता'मिति दुःखनिषेधकश्रुतिविरोधमाशङ्क्य तत्र कर्मजन्यतापस्यैव निषेधो न तु कर्माजन्यविरहस्य । यदि चास्य दुःखत्वेन कर्मजन्यत्वमनुमीयते, तदा मोक्षसुखस्यापि सुखत्वेन कर्मजन्यत्वशङ्कया मोक्षसुखस्यापि विप्लव इत्युक्तम् । ततः सप्तमे लौकिकत्वस्य उपाधित्वसमर्थनाय विरहस्य कर्माजन्यस्य श्रुतिमूलकमित्युक्तम् । ततोऽष्टमे सूत्रे 'धारयन्त्यतिकृच्छ्रेणे'ति वाक्येनोपष्टम्भ च तदित्युक्तम् । ततो नवमे सूत्रे तादृशरसानुभवस्य फलत्वं क्वापि न श्रुतमिति साधनत्वमस्त्वित्याशङ्क्य 'ता वां वास्तूनी'ति श्रुतावुश्मसीति काम्यत्वलिङ्गात्फलत्वमित्युक्तम् । तेन मर्यादामार्गीयतत्त्वात्पुष्टिमार्गीयतत्त्वमुत्कृष्टमिति साधितम् ॥ ३ ॥ ततश्चतुर्थे एकसूत्रे **अविभागाधिकरणे** तादृशलीलाया नित्यत्वेन तन्मध्यपातिनां तद्दर्शनं यथा नित्यं तथा तादृक्साधनाभावेपि निजानुकम्पया कदाचित्कमपि भक्तं तत्र नयति चेत् तदा कंचित्कालं स्थापयित्वा ततस्तं वियोजयति न वेति संशये, तोषस्य कादाचित्कत्वात् तत्साध्या स्थितिरपि तथैवेति नियोजयतीति पूर्वपक्षे, नैव नियोजयतीति सिद्धान्तः । एतेनापि लीलानित्यत्वं सिध्यति । एतद्यथा तथा रश्मिभाष्यप्रकाशाभ्यामवगन्तव्यम् ॥ ४ ॥ ततः पञ्चमे एकसूत्रे **तदोकोधिकरणे** पुष्टिमार्गीयव्यवस्थायां द्विविधं सद्यो मुक्तिप्रकारं च दर्शयित्वा ज्ञानमार्गीयस्य क्रममुक्तौ निर्गमनप्रकार उच्यते । हृदयाग्रप्रद्योतनपर्यन्तं विद्वदविद्वतोस्तुल्यं । निर्गमनमार्गः प्रकारश्च विदुषो भिन्नः । तथा हि । जीवस्थानस्य हृदयस्य यदग्रं नाडीमुखं तस्य ज्वलनं प्रकाशनं क्रियते । चक्षुरादिभिरिन्द्रियैः स्वस्वकार्यं विहाय पराडावर्तनेनैकीभूतैः, अन्यथा श्रुतिस्तेषां तेजोमात्रत्वं न वदेत् । तदा जीवस्तत्प्रकाशितनिर्गमनमार्गः सन् देहान्निर्गच्छति चक्षुषो वा अन्येभ्यो वा शरीरप्रदेशेभ्यः । इदं च सकलजीवसाधारणम् । विदुषस्त्वेतावान्विशेषः । उपासनासामर्थ्यात् संन्यासाङ्गभगवदनुस्मृतिनैरन्तर्याच्च हृदि स्थितेन परमात्मनानुगृहीतः

सन् एकशततम्या मूर्धन्यया नाड्या निष्क्रामतीति ॥ ५ ॥ ततः **षष्ठे एकसूत्रे रश्म्यधिकरणे** छान्दोग्ये 'या एता हृदयस्य नाड्य' इत्यारभ्य पठ्यते 'असौ वा आदित्यः पिङ्गल' इत्यादि। अग्रे च 'अथैतैरेव रश्मिभिरूर्द्ध्वमाक्रमत' इति । अत्र ज्ञानिनो यथा विलक्षणा गतिरुक्ता, तथा रश्म्यनुसारित्वमपि लोकसाधारणं वा विदुष एवेति, संशये, रश्म्यनुसारी विद्वानेव निःक्रामतीति निर्णयः॥ ६ ॥ ततः **सप्तमे त्रिसूत्रे निश्यधिकरणे** विदुष उत्क्रमणे हार्दानुग्रहकृतविशेषवत्कालकृतविशेषोस्ति न वेति संशयेस्तीति पूर्वपक्षे, पूर्वोक्तभगवदनुस्मृतिसम्बन्धस्य देहस्थितिपर्यन्तं सत्त्वात्तत्कार्यस्यानुग्रहस्यापि तथात्वेन कालोऽप्रयोजको नापेक्षणीय इत्युक्तम् । ततो द्वितीयसूत्रे दक्षिणायनं कृष्णपक्षश्च न बाधकमित्युक्तम् । ततस्तृतीये सूत्रे ननु गीतायामुत्तरायणादिकं गत्यनुकूलत्वेनोच्यते इत्याशङ्क्य ज्ञानमार्गाद्योगमार्गो भिन्नः । तथा च योगिनमुद्दिश्यैव कालविशेषस्य गतिविशेषहेतुत्वं स्मर्यतेऽतः कालप्रतीक्षावत्यौ गती स्मार्ते स्मार्तस्यैव, न तु ज्ञानमार्गीयस्य श्रौतस्य, इतरनिरपेक्षत्वात् । तेन विद्यावतः क्रमेण मुक्तिं प्राप्नुवतोपि न साधनान्तरापेक्षेत्युक्तम् । तेनास्मिन्पादे पुष्टिमार्गीयस्य ततो मर्यादामार्गीयस्य सद्योमुक्तिप्रकारः क्रममुक्तौ निर्गमनप्रकारादिकं च दर्शितम् ॥ ७ ॥

इति श्रीविद्वन्मण्डनगोकुलोत्सवात्मजगोपेश्वरविरचितायामधिकरणमालायां चतुर्थाध्यायस्य द्वितीयः पादः ॥

अस्मिन्पादे तु तेन द्वारेण निर्गतस्य ब्रह्मप्राप्तिमार्गः तल्लोकः तत्प्राप्तिप्रकारश्चोच्यते । तत्र **प्रथमे चतुःसूत्रे अर्चिराद्यधिकरणे** प्रथमसूत्रे ज्ञानमार्गीयस्येव मर्यादामार्गीयभक्तस्याप्यर्चिरादिमार्गेणैव गमनमुत सद्योमुक्तिरेव भवतीति संशयः । तत्र यथा ज्ञानिनो नियमाभावस्तथाऽत्रापीति पूर्वपक्षे ज्ञानी एव तेन मार्गेण गच्छति, भक्तस्तु प्रायशः सद्य एव मुच्यत इति सिद्धान्तः । ततश्च क्रममुक्तिबोधकतत्तदुपासनावाक्ये 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोक'मित्येवं भिन्नभिन्नपर्वकथनान्नानामार्गतास्त्वित्याशङ्काऽर्चिरादिनैलेकवचनेन नानापर्वविशिष्ट एको मार्ग इति ज्ञापनात् एक एव मार्ग इति बोधनान्निरस्तेति च । ततो द्वितीयसूत्रे वायोरप्रवेशेन मार्गभेदमाशङ्क्य संवत्सरलोकानन्तरं वायुलोको निवेशनीय इति न मार्गभेद इत्युक्तम् । ततस्तृतीयसूत्रे पूर्ववदाशङ्कायां तडिल्लोकोपरि वरुणलोको निवेशनीय इत्युक्तम् । ततश्चतुर्थेपि पूर्ववदेवाशङ्क्य वरुणलोकोपरि इन्द्रप्रजापतिलोको निवेशनीय इत्युक्तम् ॥ १ ॥ ततो **द्वितीये त्रिसूत्रे आतिवाहिकाधिकरणे** प्रथमसूत्रे विद्युदनन्तरं 'तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयती'त्यत्र भवति संशयः । उक्तश्रुतेर्गमयित्रैव ब्रह्मप्राप्तिरिति निश्चीयते । एवं सति यस्य वरुणादिलोकगमनं तस्य वचनाभावेन गमयितृप्राप्त्यभावात् ब्रह्मप्राप्तिर्भवति नवेति । वचनाभावेन

ज्ञापकाभावात् सा न भवतीति पूर्वपक्षे तत्राप्यातिवाहको भगवदीय एव ब्रह्म प्रापयति । प्रजापतिलोकोत्तर ब्रह्मलोकस्य सत्त्वात्तत्प्राप्तिरपि मार्गैक्यात् प्रापकममानव पुरुषमपेक्षतेऽतो यत्र स नोक्तस्तत्रापि सोवगन्तव्य इति । ततो द्वितीये सूत्रे अर्चिरादिमार्गगतानामपुनरावृत्तिश्रवणात् देवयाने पथि ब्रह्मविदामेवाधिकाराच्च तादृशब्रह्मज्ञानेन सद्योमुक्तिसम्भवे क्षपिष्णूना लोकानां परप्राप्तिविलम्बजनकाना वाञ्छायां 'यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च य'दि-त्युपक्रम्य 'सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा । स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि वाञ्छती'ति वाक्योक्तभक्तिसुख हित्वान्यवाञ्छायां को हेतुरित्याकाङ्क्षायां स्वसृष्टदेवयानमार्गानर्थक्य-परिजिहीर्षया काश्चिज्ज्ञानिनो भक्तांश्च व्यामोहयतीति व्यामोह एव हेतुरित्युक्तम् । ततस्तृतीये तडिल्लोकाद्वरुणलोकादिप्राप्त्यनन्तरं यस्य ब्रह्मप्राप्तिस्तस्य तल्लोकसम्बन्धी ब्रह्मप्रापकः पुरुषोस्ति न वेत्याशङ्काया विद्युल्लोकस्य ब्रह्मपुरुषेणैव वरुणादिलोकगतस्यापि ब्रह्मप्राप्ति' न तु तल्लोकस्थात्, नापि पुरुष विना 'तान् वैद्युतात्पुरुषो मानस एत्य ब्रह्मलोकान् गमयती'ति श्रुतेरित्युक्तम् । वृत्तौ त्वितरलोकन्यायेन विद्युल्लोकस्यातिक्रान्तत्वाद्वरुणलोकादि-स्थस्यैव ग्राह्यत्वेनास्तीति पूर्वपक्षोप्युक्तस्तेनाधिकरणान्तरत्व सूचितम् । भाष्ये तु पूर्व-पक्षो न दृश्यते । इय च वाजसनेयके ब्रह्मलोकान् गमयतीति पठ्यते । छान्दोग्ये तु ब्रह्मेति पाठभेदेन पठ्यते । तत्रायं भावः । भक्त तु वैकुण्ठलोक नयति, ते वैकुण्ठा बहु-विधा इति ब्रह्मलोकानित्युक्तम् । ज्ञानमार्गीय त्वक्षरब्रह्म प्रापयतीति ब्रह्मेत्युक्तम् । तेन क्रममुक्तये मार्गो विचारितः ॥ २ ॥ ततस्तृतीये षट्सूत्रे **कार्याधिकरणे** क्रममुक्तौ फल चिन्त्यते । तत्र प्रथमे सूत्रे 'स एतान् ब्रह्म गमयती'त्यत्र ब्रह्मपदेनाविकृत परब्रह्मोच्यत उत कार्यरूपो ब्रह्मलोक इति सशये ब्रह्मपदेन परब्रह्मात्र नोच्यते, तस्य व्यापकत्वेन देशविशेष-गमयिनोरनपेक्षितत्वात्कार्यब्रह्मलोकोत्र वक्तव्य इति बादरिराचार्यो मन्यते इत्युक्तम् । ततो द्वितीयसूत्रे 'ब्रह्मलोकान्गमयति तेषु तेषु लोकेषु परा परावतो वसन्ती'ति श्रुतौ बहु-त्वेन वासाधिकरणत्वेन च विशेषितत्वादपि कार्यरूप इत्युक्तम् । ततस्तृतीयसूत्रे उपा-सनाप्राप्यस्य कार्यत्वे ब्रह्मपदव्याकोपमाशङ्क्य ब्रह्मसामीप्याद्ब्रह्मत्वव्यपदेश. । तल्लोकस्थि-ताना ब्रह्मप्राप्त्यानन्यलोकाव्यवधानात्सामीप्य, तेन लक्षणया ब्रह्मपदप्रयोग इत्युक्तम् । तत-श्चतुर्थसूत्रे तस्य कार्यत्वे 'आब्रह्मभवनाल्लोका' पुनरावर्तिनोऽर्जुने'ति वाक्यातत्त. पुनरा-वर्तन्ते । अत्र तु 'न तेषामिह पुनरावृत्तिरस्ती'त्युच्यत इति कथ तस्य कार्यत्वमित्याशङ्क्य कल्पसमाप्तौ कार्यस्य ब्रह्मलोकस्य नाशे चतुर्मुखेन ब्रह्मणा सह ततोऽपि पर ब्रह्म प्राप्नु-वन्ति । 'वेदान्तविज्ञानसुनिश्चितार्था सन्यासयोगाद्यतयः शुद्धसत्त्वाः । ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे' इति श्रुतेरित्युक्तम् । तत पञ्चमे 'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मान प्रविशन्ति पर पदमि'ति स्मृतिरपि प्रमा-णत्वेनोक्ता । एत पञ्चसूत्र्या पूर्वपक्ष. । तत षष्ठे सूत्रे गौण्या मुख्यवृत्त्यपेक्षया निर्बलत्वेन

मुख्यया वृत्त्या परमेव ब्रह्मात्रोच्यत इति 'जैमिनिसिद्धान्त उक्तः । ततः सप्तमे सूत्रे कौशीतकिश्रुतौ अग्न्यादिलोकवत्प्रजापतिलोकप्राप्तिमुक्त्वाग्रे स ब्रह्मलोकमिति ब्रह्मलोकस्य चतुर्मुखलोकातिरेकेण दर्शनान्न ब्रह्मलोकः प्रजापतिलोक इत्युक्तम्। तेन 'वेदान्तविज्ञाने'ति श्रुतेः 'ब्रह्मणा सह ते सर्वे' इति स्मृतेश्च प्रलयविषयत्वेनात्र तद्विषयाभावान्न ताभ्यां 'न स पुनरावर्तते' इति श्रुतिविरोध इति सिद्धम्। ततोऽष्टमे 'ब्रह्मविदाप्नोति पर'मित्यस्य विवरणर्चि परेणैव ब्रह्मणा सह कामभोगलक्षणा प्राप्तिः फलत्वेन सिद्धा, अतः परप्राप्तावेव श्रुतितात्पर्यमित्यस्या अपि श्रुतेर्न कार्यलोके तात्पर्यम्, किन्तु नित्यलोक इति युक्तिरुक्ता । बादरिमतं पूर्वपक्षत्वेनोक्त्वा सिद्धान्तत्वेन जैमिनिमतकथनादयमेव पक्षो वेदव्याससम्मतः।तेनादावर्चिषं ततोऽहस्ततः सितं पक्षं तत उदगयनं ततः संवत्सरं ततो वायुं ततो देवलोकं तत आदित्यं ततश्चन्द्रमसं ततो विद्युतं ततो वरुणं तत इन्द्रं ततः प्रजापतिं ततश्चामानवेन पुरुषेण ब्रह्मप्राप्तिरिति निर्णयः सम्पद्यते ॥३॥ ततश्चतुर्थे एकसूत्रे **अप्रतीकाधिकरणे** अर्चिरादिलोकप्राप्तिर्हि उपासनाफलम्। एवं सत्यमानवः पुरुषस्तान् सर्वान् ब्रह्म प्रापयत्युत कांश्चिदेवेति संशये अविशेषेण सर्वानेवेति पूर्वपक्षे, ये हि उपास्येषु भगवद्विभूतित्वं ज्ञात्वोपासते तान्नयति, न तु श्रुतिर्ब्रह्मत्वेनोपासनायाः फलसाधनत्वमाह, न तूपास्येषु ब्रह्मत्वमित्येवं ज्ञात्वोपासते तान्न वाऽसत्त्वमनुसन्धायाप्युपासनायाः फलत्वाय ब्रह्मत्वेन भावकान्नयतीति बादरायण आचार्यो मन्यते । भक्तस्य तु अमानवपुमपेक्षाभावात् स्वयमेव ब्रह्मलोकान् प्राप्नोति इत्युक्तम्। तेनात्रोपास्यानां लिङ्गबलेन ब्रह्मत्वं, तथा तदुपासने परम्परया साक्षाद्वा ब्रह्मप्राप्तिरिति सिद्धम् ॥ ४॥ ततः **पञ्चमे एकसूत्रे विशेषाधिकरणे** ज्ञानमार्गीयाणां भक्तिमार्गीयाणां चाविशेषेणैव परप्राप्तिरुत कश्चिद्विशेषोऽस्तीति संशये, विशेषो नास्ति, उभयोरपि परब्रह्मोपासकत्वादिति पूर्वपक्षे, 'ब्रह्मविदाप्नोति परं सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इति श्रुतिर्विशेषं दर्शयति । तथा हि ब्रह्मविदक्षरब्रह्मविदाप्नोति सान्निध्यादक्षरमेवाप्नोति एतावानर्थो यो वेदेत्यन्तर्चयोक्तः । अथ परमाप्नोतीत्यस्यार्थ उच्यते निहितमित्यादिना । अत एव मध्ये क्रियापदमुभयसम्बन्धित्वज्ञापकमुक्तम् । तत्प्राप्तिश्च मर्यादापुष्टिभेदेन द्वेधा । तत्रादौ मर्यादायामुच्यते । इहायमाशयो ज्ञेयः । 'नायमात्मा प्रवचनेने'ति श्रुत्या भगवद्वरणातिरिक्तसाधननिरासः क्रियते पुरुषोत्तमप्राप्तौ । एवं सत्यक्षरब्रह्मज्ञानस्य तत्साधनत्व उच्यमाने तद्विरोधः स्यात्, तेनैवमर्थो निरूप्यते । ज्ञानमार्गीयाणामक्षरज्ञानेनाक्षरप्राप्तिस्तेषां तदेकपर्यवसायित्वात् । भक्तानामेव पुरुषोत्तमपर्यवसायित्वात् । तथा च ब्रह्मविदं चेद्भगवान् वृणुते तदा भक्तिरुदेति । तत्प्रचुरभावे सति स्वयं तद्धृदि प्रकटीभविष्णुः स्वस्थानभूतं व्यापिवैकुण्ठं तद्गुहायां हृदयाकाशे प्रकटीकरोति तत्परमव्योमशब्देनोच्यते । तथा च गुहायां परमे व्योम्नि निहितं यो वेद स परमाप्नोतीत्यर्थः सम्पद्यते । अथ शुद्धपुष्टिमार्गेऽङ्गीकृतस्य व्यवस्थामाह—सोऽश्नुत इत्यादिना । अत्रायमभिसन्धिः । यथा स्वयम्प्रकटी-

भूय लोके लीलां करोति, तथात्यनुग्रहवशात् स्वान्तःस्थितमपि भक्तं प्रकटीकृत्य तत्स्नेहातिशयेन तद्वशः सन् स्वलीलारसानुभवं कारयतीति स भक्तो ब्रह्मणा परब्रह्मणा पुरुषोत्तमेन सह सर्वान्कामानश्नुत इति । चकारा'देवं सततयुक्ता ये' इति प्रश्ने 'मय्यावेश्य मनो ये मां' 'ये त्वक्षरमनिर्देश्यमि'त्यादिस्मृतिसङ्ग्रहः । एवं सति ज्ञानमार्गीयाणामक्षरप्राप्तिरेव, भक्तानामेव पुरुषोत्तमप्राप्तिरिति सिद्धम् ॥ ५ ॥

इति श्रीविद्वन्मण्डनगोकुलोत्सवात्मजगोपेश्वरविरचितायामधिकरणमालायां चतुर्थाध्यायस्य तृतीयः पादः ॥

द्वितीयपादे सद्योमुक्तिक्रममुक्त्योः प्रकारं दर्शयित्वा तृतीये प्राप्यस्वरूपं प्राप्तिप्रकारश्च क्रममुक्तौ दर्शितः । समासौ च ज्ञानमार्गीयभक्तिमार्गीययोः सद्योमुक्तावपि तत्क्रतुन्यायादक्षरप्राप्तिपुरुषोत्तमप्राप्तिरूपो विशेषः फले दर्शितः । इदानीं तादृशफलानुभवे प्रकारश्चिन्त्यते । तत्र **प्रथमे चतुःसूत्रे सम्पद्याविर्भावाधिकरणे** 'ब्रह्मविदाप्नोति पर'मित्युपक्रम्य 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'त्यत्रेदं सन्दिह्यते । किमन्तःस्थित एवाश्नुत उत पुनर्जन्म प्राप्येति । 'न स पुनरावर्तत' इति श्रुतेरन्तःस्थित एवेति पूर्वपक्षे प्रभोरत्यनुग्रहवशात् स्वरूपात्मकभजनानन्ददित्सायां तत्कृत आविर्भावो मुक्तानामपि भवत्येव । भूमविद्यायां आत्मत आविर्भावतिरोभावाविति श्रावणात् । न चापुनरावृत्तिश्रुतिविरोधः । तत्रेहेतिपदेन प्रपञ्च एव तन्निषेधात् । लीलायाश्च प्रपञ्चातीतत्वात् । तेनास्यां श्रुतौ ब्रह्मणा सह भोगो जीवस्य शरीरमन्तरानुपपद्यमानस्तदाक्षिपतीत्युक्तम् । ततो द्वितीयसूत्रे आविर्भूतस्य सृष्ट्यादाविव बन्धसम्भवमाशङ्क्य 'ब्रह्मविदाप्नोति पर'मित्यत्र मुक्तिप्रतिज्ञानादाविर्भूतो मुक्त एवेत्युक्तम् । ततस्तृतीयसूत्रे ब्रह्मणा सहेत्यत्र ब्रह्मपदं सगुणपरमेव युक्तं, भोगस्य गुणसाध्यत्वादित्याशङ्क्य 'ब्रह्मविदाप्नोति पर'मित्युपक्रम्य तत्पाठाद्गुणातीतस्यैव प्रकरणमिति ब्रह्मपदं गुणातीततत्परमेव । ततश्चतुर्थसूत्रे ब्रह्मविदिति भिन्नं[1] 'सत्यं ज्ञानमनन्त'मिति भिन्नं वाक्यमतः कथं साकाङ्क्षत्वमित्याशङ्क्यैतयोर्मध्ये तदेषाभ्युक्तेति श्रुतिदर्शनादस्ति साकाङ्क्षत्वमित्युभयोरैकार्थ्यमविवादमित्युक्तम् । तेन ब्रह्मसायुज्यं प्राप्तोऽप्यतिकृपया बहिराविर्भूतो ब्रह्मणा सह सर्वान्कामानश्नुत इति पूर्वसूत्रद्वये सिद्धम् । अग्रिमसूत्रद्वये च तद्ब्रह्म न सगुणं किन्तु परमेवेति सिद्धम् ॥१॥ ततो **द्वितीयेऽष्टसूत्रे ब्राह्माधिकरणे** प्रथमसूत्रे आविर्भूतो जीवः प्राकृतेन शरीरेण भजनानन्दं भुङ्क्ते उताप्राकृतेनेति संशये, भोगस्य लौकिकत्वात्तदायतनमपि प्राकृतमेव युक्तमतः प्राकृतेनेति पूर्वपक्षे, अप्राकृतेनैव सत्यज्ञानानन्दात्मकेन शरीरेण पूर्वोक्तानश्नुते इति जैमिनिराचार्यो मन्यते । अक्षरब्रह्मणः पुरुषोत्तमायतनरूपत्वात् तदात्मकमेव शरीरं तस्य वक्तुमुचितं, न तु प्राकृतम् । ततो द्वितीयसूत्रे चिन्मात्रेण रूपेण कामान् भुङ्क्ते, न तु विग्रहेणेति औडुलो-

---

[1] विषयवाक्यं पूर्वोक्तमेव । [2] भाष्योपन्यस्तश्रुत्या तथेत्यर्थं नन्विदं विषयवाक्यम् ।

मिराचार्यो मनुते । ततस्तृतीयसूत्रे 'कृत्स्नः प्रज्ञानघनः' 'ब्रह्मविदाप्नोति परम्' इति श्रुत्योरविशेषेण प्रामाण्याद्ब्राह्मत्वचिन्मात्रत्वाभ्यां युक्तेन शरीरेणेति बादरायणाचार्यो मन्यत इति सिद्धान्त उक्तः । ततश्चतुर्थे तादृशविग्रहप्राप्तौ ब्रह्मसङ्कल्परूपो हेतुरुक्तः । तथा च यस्य तादृशसङ्कल्पविषयत्वं तस्य तादृशविग्रहप्राप्तिर्न सर्वस्य, 'यमेवैष वृणुते तेन लभ्य' इति श्रुतेरित्युक्तम् । ततः पञ्चमे सूत्रे पुष्टिमार्गीयस्यैव तादृशविग्रहदाने अनन्याधिपतित्वरूपो हेतुरुक्तः । ततः षष्ठे सूत्रे 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इति श्रुतिर्ब्रह्मविदो द्वितीयज्ञाननिषेधमाहेति कामभोगासम्भवात्तदाक्षेप्यो देहोपि न सम्भवतीति बादरिराचार्यो मनुत इत्युक्तम् । ततः सप्तमसूत्रे 'ब्रह्मविदाप्नोति परम्' इति श्रुत्या ब्रह्मज्ञानं परप्राप्तिसाधनमित्युच्यते, 'नायमात्मे'ति श्रुत्या तु वरणं तत्प्राप्तिसाधनमित्युच्यते । तथे'हैव समवनीयन्ते ब्रह्मैव सन्ब्रह्माप्येती'ति श्रुत्या लयः फलमुच्यते, सोश्नुत इत्यत्र कामभोगः फलमुच्यते । एवं सति श्रुतिविरोधपरिहाराय ज्ञानमार्गीयस्य ब्रह्मज्ञानेनाक्षरप्राप्तिः सा लयरूपा । पुष्टिमार्गीयस्य तु भक्तस्य 'सोश्नुत' इत्यादिनोक्ता पुरुषोत्तमप्राप्तिरूपा । सा च वरणेन तत्सहितया भक्त्या वेति श्रुतिव्यवस्थया पुष्टिमार्गीयस्य भक्तस्य भोगसाधनभूतविग्रहो निष्प्रत्यूहः । 'तत्केन कं पश्येत्' इति श्रुतिस्तु मर्यादामार्गीयस्य ब्रह्मज्ञानसामयिकीमवस्थामाहेति जैमिनिः शरीरसद्भावं मनुते । ततोष्टमे सूत्रे तच्छरीरं कीदृशमित्यपेक्षायां 'आत्मतः प्राण आत्मत आशे'त्यादिना प्राणाशास्मराकाशतेजोवाविर्भावतिरोभावान्नबलविज्ञानध्यानचित्तसङ्कल्पमनोवाग्नामसन्त्रकर्मैतत्सर्वान्तानामुक्तत्वाद्ब्रह्मजन्यं केवलानन्दप्रधानमिति बादरायणाचार्यो मन्यते । तथा च मुक्तस्य यच्छरीरं तदेवमात्मजन्यत्वेन भूताजन्यत्वादशरीरं, विषयश्रुतौ तदायतनत्वाच्च शरीरमित्युभयविधमिति न पूर्वोक्तश्रुतिविरोधः । नन्वेकस्य मुक्तजीवदेहस्य विरुद्धोभयधर्मवत्त्वं कथमिति चेन्न । द्वादशाहस्य 'यः कामयेत प्रजायेयेति स द्वादशरात्रेण यजेते'ति यजतिचोदनया द्विरात्रादिवदहीनत्वं, 'द्वादशाहमृद्धिकामा उपेयु'रित्युपैतिचोदनया च सत्रत्वं तद्वदविरोधादित्युक्तम् । तेनास्मिन्नधिकरणे सम्पद्याविर्भावसूत्रोक्तो मुक्तस्याविर्भावो विचारितः ॥२॥ ततस्तृतीये **द्विसूत्रे तत्त्वभावाधिकरणे** आत्माप्रकरणादिति सूत्रद्वयोक्तब्रह्मस्वरूपं विचार्यते । तत्र प्रथमसूत्रे भगवच्छरीरे अप्राकृतत्वं निर्णीयते । स्वप्ने यथा वासनावशादविद्यमानानामप्यर्थानां दर्शनं भवति तथा भगवदिच्छावशात्तत्रापि प्राकृतानां व्रणश्रमादीनां दर्शनमिति ज्ञेयम् । भगवान् आसुराणां प्राकृतगुणे तमस्येव दुःखात्मके लयं चिकीर्षुः स्वस्मिन् प्राकृतत्वबुद्धिसम्पादनाय तादृशीमिव लीलां प्रदर्शयत्यतो न प्राकृतत्वशङ्कागन्धोप्यत्र । भगवति विपरीतलीलादर्शनं तु आसुरव्यामोहाय । 'निर्दोषश्चेत्कथं विष्णुर्मनुष्येषु प्रजायते । चिन्ताश्रमव्रणाज्ञानदुःखयुग्दृश्यते कथम् । एवं मे संशयो ब्रह्मन् हृदि शल्य इवार्पित' इति नारदप्रश्ने 'स्त्रीपुंमलानुपङ्गात्मा देहो नास्य विजायते । किन्तु निर्दोषचैतन्यसुखनित्यां स्वकां तनुम् । प्रकाशयति सैवेयं जनिर्विष्णोर्न चापरा ।

तथाप्यासुरमोहार्थं परेषां च क्वचित् क्वचित् । दुःखाज्ञानश्रमादींश्च दर्शयेच्छुद्धसद्गुणः । क्व व्रणादि क्व चाज्ञानं स्वतन्त्राचिन्त्यसद्गुणे । दौर्लभ्याच्चैव मोक्षस्य दर्शयेत्तानजो हरिः । कृष्णो ह्यत्यक्तदेहोपि त्यक्तदेहस्य देहवत् । लोकानां दर्शयामास स्वरूपसदृशाकृतिम्' इति ब्रह्माण्डपुराणे ब्रह्मवाक्येभ्य इत्युक्तम् । ततो द्वितीयसूत्रे एवमन्येषामपि धर्माणां दर्शनमस्त्वित्याशङ्क्य 'लोकवत्तु लीलाकैवल्य'मिति न्यायेन ते सन्त एव प्रतीयन्ते, ये रिंगणादिलीलासु परिच्छिन्नत्वादयः तेषां कैवल्य एव प्रवेशश्चेत्युक्तम् ॥ ३ ॥ ततश्चतुर्थे द्विसूत्रे **प्रदीपाधिकरणे** प्रथमसूत्रे ननु पूर्णज्ञानक्रियाशक्तिमता ब्रह्मणा सह अतादृशस्य भक्तस्य भोगकरणं सम्भवति नवेति संशये 'न तत्सम' इति श्रुत्या ब्रह्मसाम्यस्य क्वाप्यभावान्न सम्भवतीति पूर्वपक्षे भगवांस्तस्मिन्नाविशति यदा तदाऽयमपि तथैव भवतीति ब्रह्मावेशेन तौल्यसम्पादनात्सर्वमुपपद्यते । यथा प्राचीनः प्रकृष्टो दीपः स्नेहयुक्तायां वर्त्यामर्वाचीनायामाविष्टः स्वसमानकार्यक्षमां तां करोति, स्नेहाधीनस्थितिश्च भवति स्वयं तथात्रापीत्यर्थः । तथा च श्रुतिः 'भर्ता सन् भ्रियमाणो बिभर्ति एको देवो बहुधा निविष्ट'इति । न चात्रान्तर्यामिरूपेण प्रवेशः शङ्कनीयः । तस्यैकविधत्वेन बहुधेतिपदव्याकोपात् । अतः 'सोश्नुत' इति श्रुत्युक्तफलभोगो यथा भवति तदनुरूपो यः प्रवेशः सोत्र बहुधेति पदेन अभिप्रेयते । अत एव देवपदम् । स्वरूपानन्ददानाद्भावोद्दीपनात् पूतनादिमुक्तिदानेन स्वमाहात्म्यद्योतनाद्वैकुण्ठादिस्थितेश्च । तदुक्तं निरुक्ते 'दिवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देव' इति । किञ्च, भक्तानां कामभोजनार्थं क्रीडाकरणात्क्रीडायामेव जयेच्छाकरणाद्भक्तैः सह व्यवहारकरणाद्भक्तेषु स्वमाहात्म्येच्छादिद्योतना'न्न पारयेऽहं त्वादृशीं प्रणयिनी'मित्यादिभिः स्तुतिकरणाद्भक्तप्रतिपत्तिदर्शनेन कालीयदमनादौ मोदकरणात् तेष्वेव भक्तिमदकरणात् ते स्वप्नेपि प्रियमेव पश्यन्तीति स्वप्नकरणात्तेषां कान्तिकरणादिच्छाकरणाद्वा तन्निकटे गमनादपि देवः । तदुक्तं धातुपाठे 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु' इति । ततो द्वितीयसूत्रे तादृशभोगाङ्गीकारे 'न तदश्नोति कश्चन न तदश्नोति कश्चन' इति श्रुतौ भोगाभावकथनात्तद्विरोधमाशङ्क्य सुषुप्तौ ब्रह्मप्राप्तौ च ब्रह्माविर्भावात् सुषुप्तिरस्या विषयः, न तु ब्रह्मप्राप्तिरिति विषयभेदान्न श्रुत्योर्विरोध इत्युक्तम् ॥ ४ ॥ ततः पञ्चमे षट्सूत्रे **जगद्व्यापाराधिकरणे** प्रथमसूत्रे ब्रह्मणा सह भोगकरणं लौकिकव्यापारयुतमुत नेति संशये भोगस्य सर्वत्र लौकिकव्यापारयुतत्वादिदमपि तद्युतमिति पूर्वपक्षे 'ब्रह्मविदाप्नोति परम्' इति मुक्तेः प्रकरणात् 'न यत्र कालोनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान्प्रधान'मिति वान्यजगतोसन्निहितत्वाच्च लोकसम्बन्धिव्यापाररहितमित्युक्तम् । ततो द्वितीयसूत्रे 'सर्वं ह पश्यः पश्यती'ति मुक्तिप्रकरणे सर्वविषयकदर्शनमुच्यते इति मुक्तस्य जगद्व्यापाराहित्यं नोपपद्यते इत्याशङ्क्यात्र सर्वपदं लीलासम्बन्धि यत्सर्वं तत्परं,

सर्वे ब्राह्मणा भोजयितव्या इतिवदिति जगद्व्यापारराहित्यं सूपपन्नम् । तेन मुक्तिप्रकरणप्रवेशाल्लीलानामपि नित्यत्वं सूचितम् । ततस्तृतीयसूत्रे लीलाविशेषणीभूतानां तत्तद्देशतत्तत्कालतत्तद्भक्तदेहानां नित्यत्वेन 'श्वस्त्वद्वहमायास्' इति प्रभुणोक्ते तदाशया तस्य भक्तस्य स्थितिर्नोपपद्यते । लीलानां नित्यत्वेन द्वितीयदिनरूपस्य कालस्य तदागमनस्य पूर्वदिवस उक्तिसमयेपि सत्त्वात् । तथा श्व इति प्रभूक्तिरपि तत एव नोपपद्यत इत्याशङ्क्य 'सर्वमाप्नोति सर्वशः' इति श्रुतिरेकस्यैव भक्तस्य सर्वैः प्रकारैः सर्वलीलारसाप्तिं वदति । तथा चैतच्छ्रुतिप्रामाण्याद्यरस्वरूपं प्रति 'श्वस्त्वद्वहमायास्' इति वदति तस्य स्वगेहे प्रथमदिने भगवत्स्थितिज्ञानं न भवति । यथा नित्यव्यापकशब्दवादिजैमिनीयमते व्यञ्जकस्य वायोर्ध्वनेर्वाऽभावेन न वर्णात्मकशब्दस्य सर्वत्र सदा ज्ञानं, तथात्र लीलादिव्यञ्जकभगवदिच्छाभावेन न भगवत्स्थित्यादिज्ञानं भवतीत्युक्तम् । ततश्चतुर्थे सूत्रे एतद्रूपे युक्तिगम्यत्वाभाव इत्याशङ्क्य 'नैषा तर्केण मतिरपनेया, परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे'त्यादिश्रुतिः 'अलौकिकास्तु ये भावा न तांस्तर्केण योजयेत्' 'न हि विरोध उभयं भगवती'ति स्मृतिश्च तमेवार्थमाहेतीष्टापत्तिरित्युक्तम् । तेन लीलाविशिष्टमेव ब्रह्म परमफलं 'रसो वै सः रसᳬह्येवायं लब्ध्वानन्दी भवती'ति श्रुतेश्चेति साधितम् । ततः पञ्चमे सूत्रे लीलाविशिष्टस्यैव परमफलत्वे हेत्वन्तरमुच्यते । सोऽश्नुत इति श्रुतौ भक्तस्य सर्वकामभोगे ब्रह्मणः सहभावः श्राव्यते । स च भोगमात्रे, भोग एव यत्साम्यं भक्तानुरूपत्वेन तत्तौल्यं तस्य ज्ञापकम् । अतोपि फलं लीलाविशिष्टं ब्रह्मैवेति सिद्धम् । मात्रपदेन 'न तत्समश्चाभ्यधिकश्च दृश्यत' इति श्रुतिविरोधोपास्तः । ततः षष्ठे सूत्रे कर्मफलभोगानन्तरमावृत्तिवदत्राप्यावृत्तिर्भविष्यतीत्याशङ्क्य 'न तेषां पुनरावृत्तिरस्ती'ति श्रुतेर्ज्ञानिनां न सा, 'यमेवैष वृणुत' इति श्रुतेर्वरणलभ्यः पुरुषोत्तमः फलं, स चाक्षरात्परतः पर इति श्रुतेरक्षरात्परस्तत्प्राप्तिर्ब्रह्मविदित्यनेन बोध्यते । अत इदं वाक्यं परप्राप्तिप्रकाशनसामर्थ्येन भक्तानामनावृत्तिं बोधयतीत्युक्तम् ।

अत्र मायावादिनो मोक्षे भोगं नाङ्गीकुर्वन्ति, ते त्वेवं निरसनीयाः । 'ससम्बोधं मोक्षं श्रुतिसिद्धं निश्चित्याचार्येणायं विभागो दर्शितस्तमिमं नास्तिक्यमवलम्ब्य भ्रान्त्या वा सूत्रार्थान्यथाकरणेन मान्यथन्तु । श्रुतीनां नार्थवादत्वम्, सर्वत्रार्थवादत्वप्रसङ्गात् । निःसम्बोधे तु मोक्षे न प्रेक्षापूर्वकारी प्रवर्तते । संसारावस्थायां तावद्देवलोकादिषु पर्यायेण सुखतारतम्यं लभन्ते, मुक्तः पुनः सुषुप्तवन्न किञ्चित् । स्वरूपचैतन्यं तु विद्यमानमप्यसत्समेव । न हि तच्चैतन्यान्तरेण संवेद्यते । तस्यैवाभावात् । न च स्वचैतन्यतः संविदस्तु । चैतन्यव्यतिरिक्तसंविदनभ्युपगमात् । अभ्युपगमे च भेदप्रसङ्गेन मायावादहानिरेव स्यात् । ससम्बोधे तु मोक्षे सर्वमाविर्भूतं सल्लक्षणं बोधस्य रूपम् । मनः सर्वज्ञं सर्वशक्तिभिन्नाभिन्नरूपं च । तेन तदवगतिर्नातोन्यथेति' । 'अत्रैतत्सिद्धम् । ज्ञानमार्गीयाणां तद्रीत्याऽदृश्यत्वादिगुणकाक्षरोपासने तत्क्रतुन्यायेन तादृशेक्षरे ब्रह्मैव सन् ब्रह्माप्येतीति श्रुत्यु-

क्तो लयः। अक्षरस्य 'तद्धाम परमं मम' इति वाक्योक्तभगवद्धामत्वज्ञानपूर्वकं नित्यभगवल्लोकत्वेन भगवदभिन्नत्वेन दहराद्युक्तरीत्योपासने यथाधिकारं सालोक्यादिचतुष्टयप्राप्तिः। आदित्याद्युपासनानामङ्गोपासनात्वादर्चिरादिक्रमेण गत्वाऽमानवेन पुरुषेण भगवल्लोकप्राप्तिरैश्वर्यादिभोगश्च। उपासनायां मर्यादाभक्तिसाहित्ये वैकुण्ठादिलोकेषु भगवत्सेवकत्वमधिकम्। तदा भगवदनुभवः। तत्रापि भक्तेरुत्कटत्वे तु भगवच्चरणे कौस्तुभादौ वा प्रवेशेन भगवत्सायुज्यम्। अनुग्रहविशेषेण पुष्टिभक्तौ तु 'भक्त्या मामभिजानाति' इत्युक्तरीत्या स्वस्मिन्प्रवेश्य भूमविद्योक्तरीत्या पुनः पृथगाविर्भाव्य भजनानन्दानुभावने 'सोश्नुत' इति श्रुत्युक्तरीतिकं भोगं कारयतीति'।

आचार्यकृपयैवायमध्यायार्थः प्रकाशितः। अतो विशेषजिज्ञासा प्रकाशेन प्रपूर्यताम् ॥ १ ॥
फलमालामलब्ध्वास्य रचितां पुरुषोत्तमैः। कृता गोपेश्वरेणेयं नातो व्यर्थः परिश्रमः ॥ २ ॥

इति श्रीविद्वन्मण्डनगोकुलोत्सवात्मजगोपेश्वरविरचितायामधिकरणमालायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

मुद्रितपुस्तकानि ।

१	सेवाफलम् । द्वादशविवरणसमेतम् ।	रु. १- ०-०
२	निरोधलक्षणम् । पञ्चविवरणसमेतम् ।	रु. १- ०-०
३	संन्यासनिर्णयः । अष्टविवरणसमेतः ।	रु. १- ०-०
४	जलभेदः । चतुर्विवरणसमेतः । पञ्चपद्यानि । विवरणद्वयसमेतानि । सेवाफलम् । विवरणत्रयम् ।	रु. १- ०-०
५	श्रीपुरुषोत्तमनामसहस्रम् । नामचन्द्रिकायुतम् ।	रु. ०-१०-०
६	तैत्तिरीयोपनिषद्भाष्यम् । जयगोपालभट्टकृतम् ।	रु. १- ०-०
७	शृङ्गाररसमण्डनम् । श्रीविट्ठलेश्वरप्रकटितम् ।	रु. २- ८-०
८	श्रीमधुराष्टकम् । पञ्चविवरणसमेतम् ।	अमूल्यम् ।
९	प्रेमामृतम् । श्रीविट्ठलेश्वरकृतविवृतिसमेतम् । परिवृढाष्टकम् । श्रीगोपेश्वरकृतटीकासमेतम् ।	रु. ०- ८-०
१०	वेदान्ताधिकरणमाला । श्रीमत्पुरुषोत्तमप्रणीता ।	रु. १- ०-०
११	भक्तिवर्धिनी । चतुर्दशटीकासमेता ।	रु. २- ०-०
१२	त्रिविधनामावली । टीकासमेता ।	रु. १- ४-०
१३	श्रीमती टिप्पणी । श्रीमद्विट्ठलेश्वरप्रणीता ।	रु. २- ०-०
१४	रासपञ्चाध्यायीप्रकाशः ।	रु. १- ०-०
15	Discuss how far S'aṅkaracharya truly represents the view of the author of the Brahma-Sûtras. (Zala Vedanta prize Essay)	Rs. 1 0 0

प्रापणस्थानम्—

१. चुनीलाल बुकसेलर, बडामंदिर भूलेश्वर, मुंबई.
२. नडीयाद पुष्टिमार्गीय पुस्तकालयः, नडीयाद.
३. पंडित मुख्याजी गोकुलदासजी,
श्रीविट्ठलनाथ पाठशाला, कोटा, राजपुताना.
४. पंडित गट्टूलालनी पाठशाला, फेणिवाडस्ट्रीट भूलेश्वर, मुंबई

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya sagar' Press, 23, Kolbhat Lane, Bombay.

Published by Mulachandra Tulsidas Telivala B. A., LL. B., Vakil, High Court, Khakkar Buildings, C. P. Tank Road, Girgaon, Bombay

श्रीकृष्णाय नमः ।

श्रीमद्भागवतप्रथमस्कन्ध-श्रीसुबोधिनीप्रकाशः ।

श्रीमद्गोस्वामिश्रीमत्पुरुषोत्तमचरणविरचितः ।

सुरतिस्थश्रीमद्गोस्वामिश्रीव्रजरत्नचरणप्रेरणया 'सुरतना शेठ गंगाराम
व्रजदास भरतीया' इत्यस्य द्रव्येण 'भृगुपुरस्थ मूलचन्द्र
तुलसीदास तेलीवाला बी. ए., एल्. एल्. बी.
वकील हाइ कोर्ट' इत्यनेन संशोध्य
'गुजराती न्यूस' मुद्रणालये
मुद्रयित्वा प्रकटीकृत ।

श्रीवल्लभाब्दा ४४८. संवत् १९८३.

मूल्यमेकमुद्रिका ।

मुद्रितपुस्तकानि ।

१	सेवाफलम् । द्वादशविवरणसमेतम् ।	रु. १— ०—०
२	निरोधलक्षणम् । पञ्चविवरणसमेतम् ।	रु. १— ०—०
३	संन्यासनिर्णयः । अष्टविवरणसमेतः ।	रु. १— ०—०
४	जलभेदः । चतुर्विवरणसमेतः । पञ्चपद्यानि । विवरणद्वयसमेतानि । सेवाफलम् । विवरणत्रयम् ।	रु. १— ०—०
५	श्रीपुरुषोत्तमनामसहस्रम् । नामचन्द्रिकायुतम् ।	रु. ०—१०—०
६	तैत्तिरीयोपनिषद्भाष्यम् । जयगोपालभट्टकृतम् ।	रु. १— ०—०
७	शृङ्गाररसमण्डनम् । श्रीविट्ठलेश्वरप्रकटितम् ।	रु. २— ८—०
८	श्रीमधुराष्टकम् । पञ्चविवरणसमेतम् ।	अमूल्यम् ।
९	प्रेमामृतम् । श्रीविट्ठलेश्वरकृतविवृतिसमेतम् । परिवृढाष्टकम् । श्रीगोपेश्वरकृतटीकासमेतम् ।	रु. ०— ८—०
१०	वेदान्ताधिकरणमाला । श्रीमत्पुरुषोत्तमप्रणीता ।	रु. १— ०—०
११	भक्तिवर्धिनी । चतुर्दशटीकासमेता ।	रु. २— ०—०
१२	त्रिविधनामावली । टीकासमेता ।	रु. १— ४—०
१३	श्रीमती टिप्पणी । श्रीमद्विट्ठलेश्वरप्रणीता ।	रु. २— ०—०
१४	रासपञ्चाध्यायीप्रकाशः ।	रु. १— ०—०
15	Discuss how far S'aṅkaracharya truly represents the view of the author of the Brahma-Sûtras. (Zala Vedanta prize Essay)	Rs. 1 0 0

प्रापणस्थानम्—

१. चुनीलाल बुकसेलर, वडामंदिर भूलेश्वर, मुंबई.
२. नडीयाद पुष्टिमार्गीय पुस्तकालयः, नडीयाद.
३. पंडित मुख्याजी गोकुलदासजी,
श्रीविट्ठलनाथ पाठशाला, कोटा, राजपुताना.
४. पंडित गट्टूलालनी पाठशाला, फेथिडूलस्ट्रीट भूलेश्वर, मुंबई.

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya sagar' Press, 23, Kolbhat Lane, Bombay

Published by Mulachandra Tulsidas Telivala B. A., L L. B., Vakil, High Court, Khakhar Buildings, C. P. Tank Road, Girgaon, Bombay

श्रीकृष्णाय नमः ।

प्रास्ताविकम् ।

श्रीमदाचार्यश्रीमद्वल्लभाधीश्वरप्रणीतग्रन्थेषु श्रीसुबोधिनी मूर्धन्येति बहूनां विदुषामभिप्रायः । श्रीसुबोधिनी श्रीमदाचार्यचरणैः प्रणीता प्रथम-द्वितीय-तृतीय-दशमस्कन्धेषु उपलभ्यते । एकादशस्कन्धस्याध्यायचतुष्टयोपर्यपि दृश्यते । एतन्मूलश्रीसुबोधिन्या मुद्रणं नित्यस्वरूपब्रह्मचारिणा कृतमेव पूर्वम् । तदनन्तरं श्रीमद्गोस्वामिकुलतिलकश्रीगोवर्धनलालजीमहाराजचरणानामाश्रयेण पण्डितप्रकाण्डेन कविकाव्यरत्नाकरेण भट्टवलभद्रशर्मणा प्रथमसुबोधिनीमुद्रणं कृतम्, तथापि तत्र श्रीमद्गोस्वामिवर्यश्रीनृसिंहलालजीमहाराजचरणाश्रितशास्त्रिपङ्कुणलालस्य पूर्वं मुद्रितस्य पुस्तकस्योपयोगो न कृत इति प्रतिभाति। यतः प्रकाशादिटीकासु स्वीकृताः शुद्धाः पाठाः टिप्पणेषु प्रायो निवेशिताः, अनावश्यकानि क्वचित् भ्रमोत्पादकानि च प्रश्नचिह्नानि मध्येमध्ये निक्षिप्तानि। अतः श्रीसुबोधिन्या अध्ययनं कथं साम्प्रदायिकैः कर्तव्यमिति प्रश्न उपस्थितः । साहित्यं विना तदध्ययनं तन्मुद्रणं च नैव संतोषप्रदमिति निश्चित्य तत्साहित्यसम्पादनायास्माभिः प्रयत्नः कृतः । श्रीमदाचार्यकृपया प्रथमस्कन्धसुबोधिन्या विवरणचतुष्टयमुपलब्धम् । एकं चाचाश्रीगोपेशानाम्, द्वितीयं श्रीपुरुषोत्तमानाम्, तृतीयं श्रीवल्लभानाम्, चतुर्थं श्रीगोकुलोत्सवानां च । केचित् स्वतन्त्रलेखा अपि प्राप्ताः । श्रीसुबोधिन्याः सम्यगध्ययने एतत्साहित्यमाकल्प्यमत्यन्तमुपकरिष्यतीत्यत्र नैव स्वल्पोपि संदेहोस्माकम् । श्रीमत्प्रभुचरणकृपया कदाचित् तदपि सेत्स्यतीति विश्वासः । एतेषु विवरणेषु श्रीपुरुषोत्तमानां प्रकाशो विस्तृतत्वात् शास्त्रदृष्ट्या योजितत्वात् एतस्मिंश्च चाचाश्रीगोपेशकृतायाः टीकायाः प्रायः समग्राया अपि समावेशितत्वात् तन्मुद्रणस्यात्यावश्यकत्वाच्च प्रथमं मुद्रणे स्वीकृतः । श्रीसुबोधिन्या अवगाहनेऽप्यमत्यन्तमनुगृह्णातीति तु निर्विवादं तदध्येतॄणाम् । एतन्मुद्रणार्थः द्रव्यप्रबन्धः सुरतिस्थश्रीमद्गोस्वामिश्रीव्रजरत्नलालकृपया जातः । तेषामेव प्रेरणया सुरतिस्थवैष्णवश्रेष्ठिव्रजदासमूनुगंगारामेण भरतीयेत्याख्येन प्रथमसुबोधिनीप्रकाशमुद्रणव्ययो दत्तः ।

प्रथमसुबोधिनीप्रकाशमुद्रणं संवत् १९७८ वर्षे प्रारब्धम् । तथापि प्रकाशपुस्तकानां यावत्प्राप्तानां संदिग्धत्वादशुद्धत्वात् त्रुटिभूयस्त्वाच्च मुद्रणकार्यं त्यक्तव्यमासीत् । संवत् १९८१ वर्षे अस्मन्मित्रधैर्यलालस्य श्रीनाथद्वारे गमनं जातम् । तत्रत्यसंग्रहात् शीघ्रकविनन्दकिशोरैरेकं प्राचीनं प्रथमप्रकाशपुस्तकं श्रीमद्गोवर्धनलालजीमहाराजानामनुज्ञया

दत्तम् । तत्पुस्तकोपरि श्रीपुरुषोत्तमानां श्रीहस्ताक्षरेषु कृतः शोधोपि एकस्मिन् पत्रे दृष्टः । तत्पुस्तकं प्रामाणिकमिति स्वीकृत्यास्माभिः पाठादियोजनं प्रायः तदाधारेणास्मिन् मुद्रणे कृतम्, तथापि यत्र तत्पुस्तकं संदिग्धं प्राप्तम्, तत्र निम्नलिखितानामन्यपुस्तकानामुपयोगः कृतः । तानि चेमानि ।

(१) एतत्पुस्तकं संवत् १८३७ वर्षे कार्तिकमासे कृष्णपञ्चम्यां लिखितम् । 'त्रवाडी भट्टप्राणजीवणेन' 'गुसांईजीश्रीश्रीश्रीगोविन्दरायाणां तस्यात्मजौ लालजीश्रीविट्ठलेशरायजीलालजीश्रीगोकुलोत्सवरायजीवाचनार्थम्' । एतत्पण्डितगट्टूलालाजीसंग्रहस्थम् । अन्यत्रादृष्टो भूयान् शोधोऽस्मिन् प्राप्तः ।

(२) नटपुरस्थ-पुष्टिमार्गीय-पुस्तकालय-संग्रहस्थम्, भगवदीयत्रिभुवनदासपौत्रांबरदासद्वारा प्राप्तम् । संवत् १७९७ वर्षे पौषमासे कृष्णपक्षे चतुर्थ्यां गुरुवासरे लिखितम् । उमरेठग्रामनिवासि-औदिच्यटोलकीयाज्ञातीय-व्यास-हृदयरामात्मजजीवरामेण लिखितमिदम् । इदं प्रायः शुद्धम्, तथापि नैव केनचिदपि वाचितं दृश्यते ।

(३) कंकरपल्लीस्थश्रीमद्गोस्वामिश्रीव्रजभूषणानाम् । संवत् १८२४ वर्षे पौषकृष्णसप्तम्यां शनिवारे लिखितम् । इदं पुस्तकं कंकरपल्लीस्थश्रीमद्गोस्वामिनीश्रीसौन्दर्यवतीवहुजीमहाराजकृपया तद्वारभट्टकरञ्जीछन्नुलालाजीद्वारा प्राप्तम् । प्रायः शुद्धम् ।

(४) 'शास्त्रिकल्याणजी कानजी' इत्येतैः स्वयं लिखितं शोधितं च । एतत् पुस्तकं मुम्बास्थश्रीगोकुलाधीशजीमन्दिरस्थसंग्रहात् श्रीमद्गोस्वामिमगनलालकृपया प्राप्तम् ।

(५) श्रीमद्गोस्वामिरणछोडलालानाम् । नूतनमिदं श्रीमद्गोस्वामिश्रीजीवनेशैः स्ववाचनार्थं संपादितम् ।

(६) श्रीमद्गोस्वामिविद्वन्महाराजश्रीगोकुलनाथानाम् । नूतनमिदम् ।

(७) पं. गट्टूलालाजीसंग्रहस्थम् ।

श्रीनाथद्वारीयपुस्तकोपरि श्रीपुरुषोत्तमानां श्रीहस्ताक्षरेषु 'ग्रन्थसंख्या ३०००' इति लिखितं दृश्यते । 'श्रीव्रजोत्सवानामिदं'मित्यपि तत्रैव दृश्यते । सप्तमलालश्रीघनश्यामानां श्रीगोपेशनामानः सूनव आसन् । तत्पुत्राश्च श्रीव्रजोत्सवाः । संभवति च श्रीपुरुषोत्तमैरेतत्पुस्तकं निजमित्रत्वात् श्रीव्रजोत्सवेभ्यः समर्पितम् । एतेन श्रीपुरुषोत्तमानां श्रीगोपेशानां बहुमानपुरःसरं 'चाचा'त्वेनोपन्यासो स्पष्टो भवति । यद्येतदनुमानं न युक्तम्, तदा तु तृतीयलालश्रीबालकृष्णानां वंश्यश्रीव्रजोत्सवानामिदं पुस्तकं स्यादिति ।

श्रीकङ्करपल्लीस्थश्रीमन्मातृचरणश्रीमद्गोस्वामिनीश्रीसौन्दर्यवतीनां परमोदारानुग्रहेण श्रीश्रीद्वारकानाथमन्दिरस्थसंग्रहात् श्रीपुरुषोत्तमानां प्राचीनं चित्रं समुपलब्धम्। तत् तादृशमेव सिद्धमत्र निवेशितमिति ।

अत्रापि 'धैर्यलाल व्रजदास सांकलीया' 'जमनादास कानजी' 'पुरुषोत्तमदास कानजी' 'हीरालाल मूळजीभाई' 'गोवर्धनदास प्रागजी' 'वल्लभदास गीरारजी' इत्यादीनां मित्राणामुपकारस्तु स्मर्तव्य एव। तथैवोपरिनिर्दिष्टानां श्रीमद्गोस्वामिबालकानां तदाश्रितपण्डितानां चोपकारः प्राचीनशुद्धहस्तलिखितपुस्तकप्रदानेन प्राचीनचित्रवितरणेन च जातोऽविस्मर्तव्य एव।

एवमष्टपुस्तकाधारेणायं ग्रन्थः शोधितः। शोधनस्य जीवकार्यत्वात् तस्य च स्वभावतो दुष्टत्वात् दोषा अत्रापि न स्युरिति वक्तुमस्माकं नैव शक्यम्, तथापि पुस्तकस्यास्य प्रामाणिकत्वसम्पादने यावान् प्रयासो मानुषः सुलभः, स सर्वोपि कृत इति ।

स च कस्यचिदपि भगवदीयस्य प्रथमस्कन्धश्रीसुबोधिन्याः शास्त्रदृष्ट्या अध्ययने किञ्चिदपि सौकर्यं करिष्यतीति विचारेण, तं परमपरिश्रमेण शोधितं श्रीमत्प्रभुचरणकमलेषु समर्पयाम इति ।

पौषशुक्लप्रतिपद्
संवत् १९८३
मुंबई.

मूलचन्द्र तेलीवाला.

शोधपत्रम् ।

तदुपपादयन्ति अधिकारीत्यादि । तया च सेवाधिकारे सम्पन्ने भगवान् स्वयमायाति, तदा चरणक्षालनमेव प्रथमत इति तत्करणत्वं च गंगाया इति साक्षात् चरणसम्बन्धात्मकः फलरूप उपयोग इत्यर्थः । ननु भवत्वेवम्, तथापि योग्यदेहसाधने कथमस्य हेतुत्वमित्यत आहुः भावनायामित्यादि । तस्यामिति । सेवायाम् । अभिज्ञापिकेति । स्मारिका । तथा च तत्स्मारणेन कर्ममयमनःसंस्कारकतया तदित्यर्थः । ननु ब्रह्मणा चरणक्षालनमात्रस्य कृतत्वात् कथं सेवाभिज्ञापकतेत्यत आहुः तस्या इत्यादि । ननु भगवतो मोचकस्वभावत्वात् तत्संबन्धिन्या मोचकत्वमेवोचितम्, न तु योग्यशरीरसाधकत्वमित्यत आहुः भक्तकार्येत्यादि । भक्ता बलिर्देवाश्च । तत्कार्यमुद्धारः स्वर्गप्राप्तिश्च, तदर्थं व्यापृतस्य उत्क्षेपादिक्रियां तन्वानस्य, हेतुगर्भं विशेषणं, भगवतश्चरणस्य वा । भूतसंस्कारपक्षम् । भावप्रधानः । भूतसंस्कारकत्वपक्षमाश्रित्य उक्तव्यापारवत्त्वात् तदनुसंधाय प्रकृते कथं तत्संस्कारकत्वमित्यपेक्षायां तदन्तरेति साधनाध्यायारंभसूत्रोक्तन्यायेन । तत्र हि पूर्वजन्मनि निष्कामयज्ञकर्तुर्ज्ञानरहितस्य मरणे यज्ञात्मकभगवदभिव्यक्त्यभावात् भूतसंस्कारक एव यज्ञो जात इति निष्कामत्वाच्च यज्ञसचिवा देवास्तुष्टा इति तदधीनान्येव च भूतानीति ते देवास्तस्याग्रे ज्ञानयोग्यदेहसिद्ध्यर्थं तत्र तत्र हुत्वा पञ्चाग्निविद्याप्रकारेण रेतो निष्पाद्य तस्य शरीरं संपादयन्तीति प्रतिपादितम्। तेन न्यायेन कृतप्राणिपुण्यपुञ्जस्य पूर्वजन्मनि कृतो यः पुण्यपुञ्जः श्रवणादीनां साधनभक्तीनां साक्षात् मोक्षसाधनत्वं ज्ञात्वा तान्त्रिकीदीक्षापूर्वकं विहितत्वेन कृतं यदुपासनामार्गीय श्रवणादिनवकम् । तत्पूर्वोक्तयज्ञवत् भूतसंस्कारकमेव जातमिति यथा तस्य यज्ञस्य स्वव्यापारभूतदेवाधीनानि देहजनकानि भूतानीति विद्यायोग्यदेहनिष्पादनार्थं देवसम्बन्धं प्राप्य पञ्चाग्निविद्योक्तहोमरूपेण स यज्ञस्तिष्ठति, तथा पूर्वोक्तनवकमपि सम्बन्धिनां निषेक्तृपोषकरूपाणां पित्रादीनां भक्तत्वे सति तद्द्वारा भगवदीयशरीरनिष्पादनार्थं तुलसीचरणामृतचरणरेणुरूपाणि भूतानि संस्कुर्वद् गंगासंबन्धिनि भगवच्चरणे संबन्धं प्राप्य विहितत्वेन रूपेण तिष्ठतीति भक्तानां तादृशपुण्यश्रवणादिकृतां तत्संबन्धितादृशशरीरं निष्पादयितुं चरणामृतचरणरेणुसंबन्धिनं साक्षात् सेवायोग्यं देहं निष्पादयितुं स्थितस्य नवकस्य गंगातोषकत्वात् चरणप्राप्तेः पूर्वमेव तत्प्राप्तिसाधकं चरणामृतचरणरेणुप्राप्तिसाधकत्वं गंगायाः व्यासः सूतश्च वदतीत्येतादृशचरणसंबन्धेन तस्याः तादृशं सामर्थ्यमित्यर्थः । भक्त्योरिति । विहिताविहितभक्त्योः । सेशानिति । अस्मिन् पक्षे उभयत्रेत्यस्य स्थितिदशायां संहारदशायां चेत्यर्थौ बोध्यः ।

---

१ ३८ शोधपत्र १०७ पृष्ठे कोष्ठे १-१९ ६ इत्यत्र वाचनीयमिति ।

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणाः।



प्राकट्य संवत् १७२४ भाद्र-शुक्ल-एकादशी।

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमद्भागवतप्रथमस्कन्धसुबोधिनीप्रकाशः ।

श्रीमद्गोस्वामिश्रीमत्पुरुषोत्तमचरणविरचितः ।

नमः श्रीवल्लभाचार्यचरणाब्जनखेन्दवे ।
यत्प्रकाशितहृद्देशा भक्त्यम्भोधितरङ्गिताः ॥ १ ॥
प्रभञ्जनशिलाशनिव्यथितसर्वदिङ्मण्डले
सुरेश्वरनिदेशतः प्रलयवारिदे वर्षति ।
क्षितिध्रविमर्दीकृतक्षितिधरद्रुहः स्वीकृत-
व्रजेक्षितसुधाम्बुधेर्भगवतः कृपायै नमः ॥ २ ॥

अथ श्रीमद्भागवतं व्याचिख्यासवः श्रीमदाचार्यचरणास्तत्प्रतिपाद्यं भगवन्तमिष्ट-
सिद्ध्यर्थं नमस्यन्ति वन्दे श्रीकृष्णदेवमिति । 'कृषिर्भूवाचकः शब्दो
१-१-० णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत' इति
श्रुतेः कृष्णशब्देन परं वस्तूच्यते । श्रिया सहितः कृष्णः स चासौ देवश्च तं वन्देऽभिवा-
दये स्तौमि चेत्यर्थः । श्रीपदेन ब्रह्मानन्दरूपायाश्चिच्छक्तेर्देवीरूपाया मायायाश्च सङ्ग्रहः ।
कृष्णपदेनावताररूपस्यापि सङ्ग्रहः । देवपदेन लीलावैशिष्ट्यम् । तेन यः परपुरुषो
द्विविधया श्रिया चतुर्भिर्व्यूहैर्नानावतारैः क्रीडति, स भजनीय इति सर्वस्य श्रीभागवत-
स्यार्थः । 'अपश्यत् पुरुषं पूर्ण'मित्यादिसन्दर्भेण तथा निश्चयात् । यद्यपि तेषु तेषु
तन्त्रेषु तत्तद्व्यूहो भगवान् प्रतिपाद्यते, तथापि श्रीभागवते साक्षान्नारायणोदितपञ्चरात्र-
रीतिकश्चतुर्व्यूह एव प्रतिपादित इति तान् वदन्तः प्रथमप्रनिष्टनिवारणार्थं तत इष्टप्राप्त्यर्थं
च सङ्कर्षणवासुदेवव्यूहरूपत्वं विशेषणाभ्यां बोधयन्ति सुरनरकभिदं वेदवेदान्तवेद्य-
मिति । श्रीभागवते हि प्रादुर्भूत एव भगवानुच्यते । तत्रोक्तव्यूहाभ्यां कार्यसिद्धौ पूर्णावि-
र्भावः किमर्थमिति शङ्कानिवृत्त्यर्थमाहुः लोक इत्यादि । अपारो यः प्रादुरासीदित्यन्वयः ।
'तथा परमहंसाना'मिति वाक्यमत्रानुसन्धेयम् । अधिकरणनिर्देशेन प्रद्युम्नव्यूहरूपताप्य-
प्रोक्ता, तस्यैव वंशसम्बन्धात् । अनिरुद्धव्यूहत्वमाहुः यस्यासीद्रूपमेव त्रिभुवनतरण

१ दैत्यसंहारकत्वात् सङ्कर्षणस्य सुरनरकभिदमिति विशेषणेन तद्बोधनम्, वेदवेदान्तवेद्यस्यैव मोक्ष-
दातृत्वात् द्वितीयविशेषणेन वासुदेवव्यूहबोधनमिति भावः ।

इति । त्रिभुवनसहितं तरणं त्रिभुवनतरणम् । निमित्ते सप्तमी । तन्निमित्तम् । प्रवृत्ति-निवृत्तिभेदेन द्विविधस्य धर्मस्य फलं त्रिलोकी मोक्षश्च तदुभयनिमित्तभूतं यस्य रूपमेवा-सीत् । अस्तित्वपरत्वर्थः । 'हरितो रोहितादासी'दित्यादिप्रयोगात् । कुण्ठिते त्रिलोक्या-दिहेतौ धर्मे तद्रक्षार्थं प्रकटमित्यर्थः । 'यदा यदा ही'त्यादिवाक्यमत्रानुसन्धेयम् । एवं रूपावतरणप्रयोजनमुक्त्वा नामावतरणप्रयोजनमाहुः भक्तीत्यादि । प्रथमश्चोऽवधारणे, द्वितीयोऽप्यर्थे । तथा च, यथा मुदा स्वार्थं स्वतन्त्रभक्तिं प्रकटितवान्, तथा शास्त्रात्मकं रूपमपि मुदैव प्रकटितवानित्यर्थः । एतेन श्रीभागवतप्रकटने भगवदानन्द एव सङ्गतिरि-त्युक्तम् । एतत्कथनप्रयोजनमाहुः **स नो भूतिहेतुरिति** । व्याख्यानरूपसम्पद्धेतुः सोऽस्माकमस्त्वित्यर्थः ॥ १ ॥

आनुकूल्यमात्रेण व्याख्यानसम्पत्संभवेऽपि तत्र भगवदनधिष्ठाने तस्य लौकिकतु-ल्यतासंभवात् तन्निवारणाय तत्र पतित्वेन भगवत्स्थितिं प्रार्थयन्तः पूर्वमपि वाचि स्थितिं बोधयितुं श्रुतिसूत्रादिप्रतिपाद्यं तत्स्वरूपमाहुः **कर्ता ज्ञ** इत्यादि । य ईदृशो विजयते, य एवं वितनुते, स मम वाचि पतिरस्त्विति सम्बन्धः । 'कर्ता ज्ञः सकलस्ये'त्यनेन 'यतो वा इमानी'ति 'जन्माद्यस्य यत' इति श्रुतिसूत्रोक्तरूपत्वमुक्तम् । 'निगमभू'रित्यनेन शास्त्रयोनित्वसूत्रोक्तरूपत्वमुक्तम् । **सर्वस्वरूपोपि सन् सर्वस्यापि विधारण** इत्यने-नोपादानत्वमात्मत्वं सेतुत्वं चोक्तम् । तेन वाच्यपि स्थितिः साधिता । अन्तर्यामिब्राह्मणे 'यो वाचि तिष्ठ'न्निति श्रावणात् । प्रार्थितपूरकत्वायाहुः **निर्दोषसर्वेष्टद** इति । निर्दो-षाणां सर्वेष्टदातेत्यर्थः । तेन प्रार्थितप्राप्तौ जीवधर्म एव हेतुः, न तु भगवद्धर्म इत्यपि बोधितम् । इष्टदाने प्रकारमाहुः **यो लीलाभिरित्यादि** । तापनीयानुसारेण मूलरूप-तुल्यत्वं बोधयितुमाहुः **पूर्णगुणभूरिति** । एवं मूलरूपमवताररूपं च श्रीभागवतप्रति-पाद्यं निरूपितम् ॥ २ ॥

अतः परं शिष्टाचारप्राप्तं पितृनमस्कारं कुर्वन्ति **श्रीमदित्यादि** । अत्र श्रीगोपी-पतिवन्दिन इत्यनेन परंपरया विष्णुस्वामिमतानुवर्तिगोपालोपासकत्वं सूचितम् । सुम-नसीत्यादिना ज्ञानोपदेशकथनादहंग्रहोपासकत्वम् । नाममाहात्म्यकथनेनाहंग्रहोपासना-जनितसामर्थ्यवत्त्वम् । पूर्णोपासकत्वबोधनाय **हरय** इति ॥ ३ ॥

एवं कृतं मङ्गलं शिष्यशिक्षार्थमुपनिबध्य मुख्यमध्यमजघन्याधिकारिणां यथार्हफल-दातृत्वस्यारम्भे स्फुटमनुक्तत्वात् सर्वेषां श्रवणे प्रवृत्तिः कुण्ठिता भवेदिति तन्निवृत्त्यर्थं तत्त-त्फलानुकूलं श्रीभागवतस्वरूपमिति निरूपयन्ति **श्रीमद्भागवतेति** । **लोके** इति । दैव-सृष्टौ । नन्वेकस्यैवागमत्वं सुरतरुत्वं फलत्वं चेति त्रिरूपत्वं कथमित्याशङ्कायां समादधते

---

१ धर्मरक्षारूपानिरुद्धकार्यदर्शनेन तद्रूपत्वमित्यर्थः । २ व्याख्यानरूपस्ववचने ।

भाषेत्यादि । 'भाषास्तु त्रिविधाः प्रोक्ता' इति वाक्यात् भाषाणां लौकिकीमतान्तरसमाधिभाषाणां यो भेदो नानात्वं तेन यो विभेदस्तारतम्यं तस्माद्धेतोस्त्रयं पूर्वोक्तरूपत्रयं विरुद्धं नो स्यात्, यत इदं पुराणं महत् । मह पूजायाम् । पूजितमतो हेतोरित्यर्थः । नन्वेवं सत्यंशेन तथात्वम्, न तु सर्वस्य, ततश्च त्रिरूपत्वं भज्येतैव, यथा हि नखकेशनेत्रादिषु रूपान्तरसत्त्वेपि पुरुषो गौर एव व्यपदिश्यते, न तु नानारूप इति तद्वदिति शङ्कायां प्रतियोगिभेदेन पुरुषस्य पितृपुत्रादिरूपत्ववत् तत्तदधिकारिभेदे फलभेदात्तथात्वं समर्थयन्ति भक्त्यंश इत्यादि । 'यस्यां वै श्रूयमाणाया'मिति वाक्ये भक्त्युत्पादकत्वकथनात् तस्यां जातायां स्वतन्त्रपुरुषार्थत्वेन श्रवणादिना आस्वाद्यमाने भक्त्यंशे तं प्रति सम्पूर्णस्यैव फलता फलरूपत्वम् । 'इदं भगवता पूर्व'मितिवाक्ये भगवत्प्रकाशितत्वकथनात् 'सर्ववेदेतिहासाना'मितिवाक्ये सारत्वकथनात् तदनुसंदधानान् प्रति प्रमाणसुबले, प्रमाणस्य शब्दस्य सुष्ठु यद्बलमनपेक्षत्वरूपं तस्मिन्नंशे संपूर्णस्यैव वेदत्वं वेदरूपत्वम् । 'त्रिमोधीरयामुपात्मज्ञा'मित्यादिवाक्यार्थमनुसन्दधानान् प्रति अर्थे, तत्तत्पुरुषार्थे सुरतरुस्तत्तत्कामपूरणात् । अतस्त्रिरूपत्वं संपूर्णस्यैवोपपन्नमित्यर्थः । एवञ्च 'कैवल्यैकप्रयोजन'मित्यत्रैकशब्दो मुख्यवाचीति बोध्यम् । तथा कैवल्यपदमपि लीलामोक्षोभयपरम्, 'लोकवत्तु लीलाकैवल्य'मितिसूत्रे लीलाया अपि तथात्वेनोक्तेः । अतो न कोपि शङ्कालेशः ।

प्रक्षिप्ताध्यायनिवृत्त्यर्थं शाखासङ्ख्यामाहुः शाखाद्विवह्निव्यम् । ३३२ । अङ्कानां वामतो गतिः । इयमेव सङ्ख्या श्रीधरीयेपि, 'द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखा' इति कथनात् । यद्यपि काव्यवदलङ्कारा आचार्यैर्नादृताः, तथापि केचन श्रुतौ सूत्रेप्यादृताः, यथा 'असावादित्यो देवमधु' इत्यत्र, 'शरीररूपकविन्यस्तगृहीते'रित्यत्र । अतस्तद्बोधनायात्र रूपकमादृतमिति ज्ञेयम् । इदं च मूलेप्यभिप्रेतम्, अन्यथा भागेषु स्कन्धपदं व्यासचरणा न प्रयुञ्ज्युः ॥ ४ ॥

एवं तत्तत्फलानुकूलं श्रीभागवतस्वरूपं निरूप्य पूर्वं बहुभिर्व्याख्यातत्वेपि स्वस्य तत्र प्रवृत्तौ सङ्गतिं वदन्तो व्याख्यानं प्रतिजानते अर्थमित्यादि । विवे विगतं वं सुखं यस्मादिति विवस्तादृशे लोके सति तस्य श्रीभागवतस्यार्थं अर्चितुम्, 'अर्च पूजने' 'अच इत्येके' इति पाणिनिना पठितत्वात् पूजितं वक्ष्यमाणरीत्या सप्तार्थाविरोधेन प्रकटीकरणमेव पूजनं तत्कर्तुम्, हि यतो हेतोः वैश्वानरादन्यो विभुर्न । विभुत्वे हेतुः वाक्पतेरिति । 'उत त्वः पश्यन्न ददर्श वाच'मित्यत्र यथा जाया स्वतनुं पत्ये प्रकटयति, एवं

१ निरूपत्वम् । २ अर्थमित्यादि । वस्तुतस्तु यङ्लुगन्ताद्विचेः पर्याप्तरचनेष्वलमर्थेष्विति सूत्रेण तुमुन् । न च गुणो यङ्लुकोरित्यभ्यासस्य गुणे सति वेवेचितुमिति रूपं शंक्यम् । मंगपूर्वकविधेरनित्यत्वात् । नाप्येकाच उपदेशेनुदात्तादितीण्निषेधः शंक्यः । 'श्तिपा शपानुबन्धेन निर्दिष्ट यद्गणेन च । यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकी'त्यनुशासनेन तन्निषेधादिति ।

वागपि कस्मैचिदेव स्वार्थं प्रकटयतीति श्रावणात् । तत्र दृष्टान्तानुरोधेन दार्ष्टान्तिकेपि स्वपतावेव प्रकटयतीति ज्ञायते । पतित्वं वक्तावेव । 'तस्याग्निरास्यं निर्भिन्नं लोकपालोविशत्पदम् । वाचा स्वांशेने'ति वाक्ये वाचोऽग्न्यंशत्वस्य स्मरणात् । तत्र तादृशेऽर्थार्चनहेतौ विभुत्वे सति श्रीपतिर्भगवान् व्यासवत्, स्वांशं मां मानुषतनुं विधाय, आज्ञां च अर्थात् तत्कर्तुं दत्त्वा, यस्मात्कृपावलोकनपटुर्जातः, अत उक्तहेतोर्व्यासस्य विष्णोः प्रियं गूढार्थं मुदा बहुधा प्रकटीकरोमि । अत्र गूढार्थप्रकटीकरणे आज्ञाजनिता मुद्धेतुः । बहुधा प्रकटने उभयप्रियत्वं हेतुः । अतस्तथेत्यर्थः ॥ ५ ॥

प्रकटने प्रकारमाहुः लक्षणानां नैवेति । सप्तानामिति । शास्त्रस्कन्धप्रकरणाध्यायवाक्यपदाक्षरीयाणाम् । इहेति । अस्मिन् व्याख्याने । सङ्कोचत इति । व्यवहारप्रयोजनकाच्छक्तिसङ्कोचात् । अर्थत्रयं तु वक्ष्यामीति । सोपपत्तिकमत्र वक्ष्यामि । निबन्धेस्ति चतुष्टयमिति । शास्त्रस्कन्धप्रकरणाध्यायानां येर्थास्तच्चतुष्टयं निबन्धे सोपपत्तिकमस्तीत्यतोत्र त्रयं वक्ष्यामीत्यर्थः । शेषं स्फुटम् ।

प्रथमे श्लोके । भगवदाज्ञयेति । 'दूतानामिव वर्णित'मिति न्यायकेन नारदोपदेशेनेत्यर्थः । ननु बीजभावेनैवोपनिबबन्धेत्यत्र किं प्रमाणमित्याकाङ्क्षायां
१-१-१ प्रसङ्गतः श्लोकत्रयसङ्गतिं व्युत्पादयन्ति अत्र हीत्यादि । ततश्च श्लोकत्रयार्थापत्तिरेव प्रमाणत्वेन फलिष्यति । गायत्र्यर्थस्य बीजत्वमुपपादयितुं प्रथमं लक्षणवाक्ये वृत्रासुरवधकथनप्रयोजनमाहुः यथा हीत्यादि । यज्ञात्मकत्वं तु 'तत्त्वष्टाहवनीयमुपप्रावर्तयत् स्वाहेन्द्रशत्रुर्वर्धस्वे'ति श्रुतेराहुत्युत्पन्नत्वाद्बोध्यम् । भक्त्यात्मकत्वं च 'अहं हरे तवे'त्यादिषु तद्वाक्येष्वेव प्रकटम् । न चायं श्रौतानुवादः । 'जज्ञे त्वष्टुर्दक्षिणाग्नौ' इत्युत्पत्तिस्थानभेदकथनादिविरोधात् । तथा च प्रतिबन्धकनिवृत्त्यै वेदवदत्र तन्निरूपणमित्यर्थः । गायत्र्यारंभकथनप्रयोजनमाहुः गायत्रीत्यादि । ततश्च यदि बीजत्वाय गायत्र्यर्थनिरूपणं न स्यात्, तदा लक्षणवाक्ये 'गायत्रीमधिकृत्य धर्मविस्तारो वर्ण्यते' इत्यादिकं नोक्तं स्यात् । अतस्तथेति भावः । एवं चात्र लक्षणवाक्ये उभयोक्त्या भक्तिजन-

---

१ येनासौ वक्तव्य प्रतिपद्यत इति । २ अर्थो भागवतार्थः तस्यार्चनं पूजनम्, तत्र हेतुः, सतार्थप्रकटनम्, तत्र विभुत्वे सतीत्यर्थः । ३ व्यवहारः प्रयोजनम्, यस्यैतादृशाच्छक्तिसंकोचात् । यथा शास्त्रार्थपदशक्तिः समग्रा भागवतार्थेऽस्ति, एवं स्कन्धार्थपदशक्तिर्न, किन्तु स्कन्धार्थे एव । एवमुत्तरत्रापि शक्तिसंकोचोऽवधेय. । ४ स यज्ञवेशस कृत्वा प्रासहा सोममपिबत्, तस्य यदत्यशिष्यत्, तत् त्वष्टाहवनीयमुपप्रावर्तयत् । स्वाहेन्द्रशत्रुर्वर्धस्वेति यदवर्तयत् तद्वृत्रस्य वृत्रत्वम् । यदब्रवीत् स्वाहेन्द्रशत्रुर्वर्धस्वेति तस्मादस्य इन्द्रः शत्रुरभवदिति श्रुतेः । आहवनीयहोमं कृत्वा उप समीपे पश्चाद् दक्षिणाग्नौ प्रावर्तयत्, पराग्लं दक्षिणाग्नौ होमं कृतवान् । आभिचारिकास्त्वत्रैव हुताः । ५ भक्तित्वम् ।

कथर्मनिरूपकत्वं भक्तिप्रतिबन्धनिवर्तकतन्निरूपकत्वं च लक्षणत्वेनोक्तं ज्ञेयम्। एवं प्रथमश्लोकसङ्गतिर्हेतुतारूपोक्ता।

द्वितीयस्याहुः किञ्चेत्यादि, संहितेत्यन्तम्। एषेति। व्यासानुभूतरूपा। किं तेनेत्याहुः तत्र हीत्यादि। तथा च धर्मपदेन भक्त्यर्थः प्रयत्न उच्यते। वेद्यमित्यादिना ज्ञानस्य कथनेन ज्ञानस्य व्यापारता निरूप्यते। अयमेव च वेदार्थः। द्वितीयस्कन्धे 'भगवान् ब्रह्म कार्त्स्न्येने'तिवाक्यप्रमाणत्वात्। तावता वेदस्य वृक्षरूपताभिसन्धीयते। सुदृढ इत्यादि। एतेन दशस्कन्धानामर्थः सङ्गृहीतो ज्ञेयः। द्वादशे आश्रयनिरूपणेनात्मतत्त्वस्य, शेषैश्च नवभिः प्रत्येकं त्रिविधानामुत्पत्तिस्थितिप्रलयानां निरूपणेन माहात्म्यज्ञानपूर्वकसुदृढसर्वाधिकस्नेह एव पर्यवसानात्।

तृतीयस्याहुः यथा हि यज्ञा इत्यादि। अन्योन्यहेतुभूत इति। परस्परोपकारकः। भक्तिहेतुरिति। साक्षात्परंपरया च तथा। निरूप्यत इति। तृतीये पानोपदेशान्निरूप्यते। अत इत्यादि। तथा चोपोद्घातसङ्गत्या श्लोकत्रयनिरूपणमित्यर्थः। ननु द्वादशे स्कन्धे ॐकारं प्रकृत्य 'स सर्वमन्त्रोपनिषद्वेदबीजं सनातन'मिति कथनात् बीजता प्रणवस्य स्फुटा। 'ॐमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यान'मित्यादिश्रुतेश्च। एवं व्याहृतिष्वपि स्मर्यते इति तत्सर्वमतिहाय कुतो गायत्र्या एवार्थो निरूप्यत इत्यत आहुः यद्यपीत्यादि। नन्वेवं सति गायत्र्येव कुतो नोपनिबद्धेत्यत आहुः किञ्चेत्यादि। तथा च विनियोगद्वयदर्शनेनार्थे सन्देहात् तन्निरासायार्थमेवोक्तवान्। ततश्चोपस्थानस्थले 'एकं सद्विप्रा' इति श्रुतिस्वारस्येन तत्राप्यग्न्यन्तर्यामिणि तद्वदने तद्रूपके भगवत्येव तात्पर्यम्, नत्वग्नौ। भगवत्सामर्थ्येनैव च मन्देहादिनिवारणम्। 'ऐन्द्र्या गार्हपत्यमुपतिष्ठत'इतिवद्वाक्यमात्रेणापि विनियोगसंभवेनार्थसन्देहानपायात्। निवारणे चेत्यत्र चोनुक्तसमुच्चायकः। तेनोपनयने विनियोगोपि सङ्गृह्यते। अत एवमर्थकथने विनियोगत्रयस्यापि परस्परानुगुण्यमिति बोधयितुमर्थकथनमिति भावः।

एवमर्थकथने उपपत्तिमुक्त्वा श्लोकं व्याख्यातुं प्रथमं गायत्र्यर्थमाहुः तत्रेत्यादि। अत्र षष्ठ्यन्तद्वयस्यार्थोक्त्या सूर्यो निवारितः। भर्गःशब्दस्यासुनन्तत्वबोधनेन शिवो निवारितः। धीपदव्याख्याने निरङ्कुशसर्वेन्द्रियप्रेरकत्वबोधनादितरवारणे ब्रह्मपरत्वे चोपपत्तिरुक्ता ज्ञेया। इदं यथा तथा प्रहस्ताख्ये वादे प्रपञ्चितं मयेति नात्रोपपाद्यते। जन्म आद्यस्येति पक्षस्येतरैरुक्तत्वात् तत्र प्रमाणमाहुः तस्माद्धेत्यादि। ननु जन्मादित्रयमनादृत्य जन्मैवात्र किमिति गृह्यते इत्यत आहुः गायत्र्यर्थ इत्यादि। तथा च गायत्र्यनुरोधात्त-

१ भूर्भुवः सुवरिति लोकत्रयं व्याहृतिशब्देनोच्यते। भूर्भुवःसुवरिति वा तिस्रो व्याहृतय इति तैत्तिरीयश्रुतेः। २ मन्देहादिराक्षसनाम्नैव द्वीपप्रसिद्धिः। अत उक्तं 'मन्देहारुणे द्वीप' इति श्रुतौ।

इत्यर्थः । तत्र दृष्टान्तार्थं स्पष्टयन्ति प्रवृत्तीत्यादि । तेनान्यत्र सतां संसर्गिणां ब्रह्मणि संसर्ग एव मिथ्येति साधयित्वा संसर्गबोधकानि पद्यान्याहुः केचिदित्यादिना । चले कृष्ण इति । आविष्टे कृष्ण इत्यर्थः । ननु यद्येवं तर्हि कथं भगवति देहादिव्यवहार इत्यत आहुः यथेत्यादि । उत्तरत्रेति । एवमित्यादि । तथा चाध्यासराहित्येनाविद्यत्ताविद्यत्वात् तन्निवारकत्वरूपो भर्गःशब्दार्थ उक्त इत्यर्थः । शिष्टमिति । यथाधिकारमभयम् । उभयत्रेति । गायत्र्यामत्र चेत्यर्थः ॥ १ ॥

धर्मः प्रोज्झितेत्यत्र । मध्यमभावमिति । बीजफलयोरन्तरा वर्तमानं वृक्षभावमित्यर्थः । कण्ठतः कल्पद्रुमत्वानुक्तेः कथं तत्प्रत्ययः इत्यतस्तदुप-
१-१-२ पादयन्ति धर्म इत्यादिना । धर्म इति । श्रवणादिरूपः । ज्ञानमिति । भगवज्ज्ञानम् । विशिष्टकल्पद्रुमत्वमिति । कामिताधिकदानात् तथा । वेदश्चेति । चो वेदाविरुद्धसमुच्चायकः । पूर्वोक्तन्यायेनेति । सूरिमोहकत्वेन । उक्तरूपेणेति । विधिबोधितत्वरूपेण । भागवत एवेत्येवकारेण भारतेपि कैतवं बोधितम् । 'भारते भगवद्धर्माणामप्यतिफलवचनात् कैतवम्, अत्र तु न क्वापि प्ररोचने'ति सूक्ष्मटीकायां कथनात् । कृपालुत्वेत्यादि । एकादशे भगवता साधुलक्षणत्वेन तेषामेवोक्तत्वात्तथेत्यर्थः । अविद्यावद्विषयत्वमिति । वेद्यस्येत्यनुषज्यते । शिवपदं विवृण्वन्ति यज्ञादिष्वित्यादि । नन्वत्र व्यासैर्मत्कृतमित्येव कुतो नोक्तम्, अत आहुः समाधावित्यादि । तथा च भगवत्प्रेरणया कृतत्वेन स्वस्यास्वातन्त्र्यज्ञापनाय तथोक्तिरितिभावः । उपासनाकाण्डोत्कर्षमिति । अत्र पञ्चमीतत्पुरुषः । स्थानाधिष्ठानेष्विति । मथुरादिष्वपि तत्त्वाविष्टत्वादिरूपेणैव स्वाधीनतेत्यर्थः । प्रतिपादकानामिति । ब्रह्मनारदादीनाम् । वस्तुनिर्देश इति । मङ्गलरूप इत्यर्थः ।

निगमकल्पतरोरित्यत्र । रूपकादरणे निगमकल्पतरुपदे उपमितसमासादन्यत्र च सादृश्याद्गौणीप्रसक्त्या कैतवे जातेऽन्यत्रापि तथा शङ्का स्यादिति
१-१-३ तन्निवृत्तयेऽत्रोक्तस्यार्थस्य वाच्यत्वमुपपादयितुं रूपकानादरे हेतुमाहुः काव्यवदित्यादिना । बुद्धिपरिकल्पितमिति । व्याकरणे व्युत्पत्तिपक्षवत्पुराणादिषु लोकसिद्धानुवादेपि शब्दार्थयोः सहजसम्बन्धाभावेन तथेत्यर्थः । प्रमेयस्वरूपमाहुः तत्र व्यापीत्यादि । ननु शब्दस्य मूर्तिभूतत्वं रसात्मकत्वं चाप्रयोजकमित्याशङ्कायां वेदात्मकस्य शब्दस्य तथात्वं स्पष्टयन्ति तत्रेत्यादि । तथा च यथा 'सैषा त्रय्येव विद्या तपती'ति श्रुत्या वेदात्मकत्वेन निश्चितस्याप्यादित्यस्य मधुविद्यायां मूर्तिभूतत्वं रसात्मकत्वं च सिद्धम्, तथेहापीत्यर्थः । न च 'ज्योतिरुपक्रमात्तु'... 'कल्पनोपदेशाच्च मध्वादिवदविरोध'इतिसूत्रे

१ तत्त्वादिरूपेणेति पाठः ।

व्यासपादैर्मधुविद्यायां गौणी प्रतिपादितेति तद्विरोधात् कथमत्र वाच्यार्थप्रतिपत्तिरिति वाच्यम्। 'वैषम्यनैर्घृण्य'सूत्रस्य लोकबुद्ध्यनुसारित्ववदस्य वादिबुद्ध्यनुसारित्वात्। पञ्चशिखमणीतसाङ्ख्यसमासवृत्तौ सूर्यस्य चक्षुरधिदैवतत्वेन सिद्धस्य श्रुत्युक्तमधुत्वासंभवे तेनापि तत्र गौण्येवादरणीयेति तद्वदजाशब्देपि गौण्यादरणीयेति बोधनार्थत्वात्। अन्यथा ईक्षत्यादिष्वपि गौणीप्रसक्त्या सिद्धान्तभङ्गप्रसङ्गात्। 'श्रुतेस्तु शब्दमूलत्वा'दित्यादिसूत्रवैयर्थ्यापातात्। अतो 'वैषम्य'सूत्रस्य तथात्वे 'आत्मकृति'सूत्रवदेतस्य तथात्वे ईक्षत्यादिसूत्राणामेव गमकत्वान्न तद्विरोधः। नापि भाष्यविरोधः। 'कल्पनोपदेशाच्चे'ति चकारस्य परोक्षवादबोधकत्वेन व्याख्याततयास्यैवार्थस्यादरणादिति। अतःपरं प्रत्यक्षविरोधोऽवशिष्यते, तं परिहर्तुमाहुः तथेत्यादि। तथाच विरोधाल्लक्षणाङ्गीकारे स्वाप्रत्यक्षमात्रे तथापत्त्या शक्त्युच्छेदे शास्त्रमेव विप्लूयेतेत्यन्यथानुपपत्त्यात्र शक्तिरेवादरणीयेत्यर्थः। ननु श्रीभागवतस्य वेदफलत्वमुक्तम्, तत्र फलं द्विविधम्, जघन्यं शिरस्यं च, आद्यं पनसादि, द्वितीयमाम्रादि, वेदे च काण्डद्वयम्, तत्र पूर्वकाण्डफलत्वे 'त्रैगुण्यविषया वेदा' इत्यस्यापि जघन्यत्वं स्यादिति तन्निवारणाय निगमपदस्यार्थमाहुः वेदस्येत्यादि। परमोपनिषदित्यनेन बृहज्जाबालादिरूपा निवार्यते। तत्र भस्मग्रहणविध्यादिनिरूपणेन नितरां ब्रह्मगमकत्वाभावादिति। शिरस्यस्यापि फलस्यापक्वत्वे तथारसाभावादस्यापि तथात्वे एतत्प्रतिपादितार्थस्याप्युत्कृष्टत्वं न स्यादिति तदभावाय गलितपदतात्पर्यमाहुः अतीत्यादि। अनधिकारिणी वृक इव, देवकार्यार्थं बलाविव, भगवद्वाक्यत्वाच्छलत्वादोपि संभवतीति तदभावायाहुः शुक इत्यादि। पिता हीत्यादि च। अमृत इवेत्यादेस्तात्पर्यमाहुः तच्चेत्यादि। तच्चेति। श्रीभागवतम्। चोप्यर्थः प्रेमसमुच्चायकः। तदेकीभूतमित्यत्र तत्पदेन प्रेम बोध्यम्। अयमर्थः। सञ्जातभक्तीनामेव हृद्यारोहतीति तदितरेषामर्थे 'भगवान् ब्रह्म कार्त्स्न्येने'ति वक्ष्यमाणमनुसन्धाय पक्षान्तरमाहुः अथवेत्यादि। तादृशशब्दराशिप्रतिपाद्यार्थरूपं फलमाहुः शुद्धा इत्यादि। तथा चैतमर्थे बुद्धे मन्दानामपि प्रवृत्तिर्भवतीत्यर्थः। तादृशशब्दप्रकाशे हेतुमाहुः अयमित्यादि। फलप्राप्तौ निदर्शनमाहुः अन्य इत्यादि। संयुतत्वेपि निदर्शनमाहुः सम्यगित्यादि। इनिवदिति। आवश्यकत्वायेत्यर्थः। 'फलस्य रसात्मकत्वे प्रत्यक्षविरोधपरिहाराय दृष्टान्तमाहुः निर्बीजेत्यादि। कानिचिदिति। द्राक्षाविशेषपीलतूदादीनि। ननु तथापि पेयत्वं तु दुर्घटमित्यत आहुः यथेत्यादि, भावुका भविष्णव इति। 'लषपतपदस्थाभूवृषे'त्यनेन ताच्छील्यार्थे भुव उकञ्। भुवश्चेत्यत्र चकारेण भाषायाः समुच्चये इष्णुच्। 'भूष्णुर्भविष्णुर्भविते'त्यमरः। तथा च भवनसाधुकारिण इत्यर्थः। णिजन्तादेतमंगीकृत्य पक्षान्तरमाहुः भावनेत्यादि। भाग्यवाचिभावुकशब्दादर्श आद्यचि कृतेप्येवं प्रयोगो भवतीति तमप्यर्थं सङ्गृह्णन्ति भाग्यवतामिति॥ २॥

नैमिष इत्यत्र । न कार्यत्व इति । अत एवोपनिषदादिभ्यो न भक्तिः, तेषु सृष्ट्या-
दीनां कार्यत्वेनैव श्रावणादिति भावः । अनायासत्वेनेति । न विद्यते
१-१-४ आयासो यस्येत्यनायासस्तत्त्वेनेत्यर्थः । स्वरूप सङ्गतिभेदेनेति । प्रश्न-
कर्तृस्वरूपवक्तृसङ्गत्योः कथनेनेत्यर्थः । शीर्यत इति । अत्रेति शेषः । प्रजापतीत्यादि ।
तदुक्तं वायवीये 'भ्रमतोऽधर्मचक्रस्य यत्र नेमिरशीर्यत । कर्मणा तेन विख्यातं नैमिशं
मुनिपूजित'मिति । निमिषमात्रेणेत्यादि । तदुक्तं वाराहे भगवता गौरमुखमुनिं प्रति
'उवाच निमिषेणेदं निहितं दानवं बलम् । अरण्येऽस्मिन् ततस्त्वेतन्नैमिषारण्यसंज्ञितम् ।
भविष्यती'त्यादिना । सहस्रसंवत्सरसाध्यमिति । एतेनास्मिन् सत्रे सहस्रदिनसाध्यत्वं
वदन्तो भाट्टा निरस्ता वेदितव्याः । श्रीबलदेवतीर्थयात्रायां 'यावत्सत्रं समाप्यत' इति वाक्ये
सत्र एव सूतवधात् । तस्यैवेदानीमप्यनुवर्तमानत्वात् । न च 'कलिमागतमाज्ञाये'ति वाक्ये
आरम्भस्यैव बोधनादिदं सत्रमन्यदेवेति वाच्यम् । तथापि परीक्षिद्राजस्य त्रिवर्षत्वाभा-
वात्तुष्मदभिमतासिद्धेः । 'त्रिवृतः संवत्सरा' इत्यादौ लक्षणां विनैव निर्वाहाच्चेति ।
तत्र भगवदाविर्भावस्तु तृतीयस्कन्धीये सत्रे 'पुरा विश्वसृजां वसूना'मिति श्लोके सुबो-
धिन्यां प्रदर्शितः । भगवन्दानन्दांशभून इति । 'एतस्यैवानन्दस्यान्यानि भूतानि
मात्रामुपजीवन्ती'ति श्रुतेः । श्रीधरमतं दूषयन्ति न तु स्वर्गीयतेत्यादि । लोकात्म-
कस्य स्वरूपमाहुः स चेत्यादि । तेन गृहविमानात्मके विद्यमानेपि यदभावे तत्र न
सुखं तादृशो देवविशेषो लोकाधिदैविक इत्यर्थः ॥ ४ ॥

त एकदेत्यत्र । ननु 'नाडिकाः षट्पञ्चाशत् प्रात'रिति वाक्ये यदा षट्पञ्चा-
शच्च नाडिका व्यतियन्ति, ततः प्रातः । तत्र होमो वेदोदितसूर्योदया-
१-१-५ नन्तरहोमं विरुणद्धीति तत्राहुः न चेत्यादि । पक्षान्तरस्वीकारा-
दिति । 'पूर्वात् परबलीयस्त्व'न्यायेन वैष्णवपक्षस्वीकारादित्यर्थः । 'उमिति प्रतिपद्यते'
इतिश्रुतौ स्फुटमिदमिति 'आदरादलोपा'धिकरणाज्ज्ञेयम् । तदुपपादयन्ति नथे-
त्यादिना । अन्येषामिति । क्षत्रधर्मोपजीवित्ववैश्यस्वरूपमध्यमजघन्यवृत्तिसूतानाम् ।
सूतोत्पत्तिवृत्ती तु वायवीये उक्ते । 'वैन्यस्य हि पृथोर्यज्ञे वर्तमाने महात्मनः । सूत्यायां'
समभवत्सूतः प्रथमं वर्णवैकृतम् । ऐन्द्रेण हविषा तत्र हविः पृक्तं बृहस्पतेः । जुहावेन्द्राय
देवाय ततः सूतो व्यजायत ।' तस्य मुख्यां वृत्तिं पौराणिकीमुक्त्वा 'मध्यमो ह्येष सूतानां
क्षत्रधर्मोपजीवनम् । रथनागाश्वचरितं जघन्यं च चिकित्सित'मिति । न्यूनभावा-
दिति । अनादरादित्यर्थः । भगवदादरादिति । 'ल्यब्लोपे पञ्चमी' । भगवदादरं
वीक्ष्येत्यर्थः । आदरोक्तितात्पर्यमाहुः सर्वत्रेत्यादि ॥ ५ ॥

---

१ दिन ।

१-१-६ त्वयेत्यत्र। आकरस्थानीति। शतकोटिप्रविस्तरस्थानि। मूलसंहिताचतुष्टयमिति। सांख्ययोगपाशुपतवैष्णवरूपमिति प्रतिभाति॥ ६॥

१-१-७ अन्ये चेत्यत्र। विंतपदासङ्गत्या पक्षान्तरमाहुः भूतभविष्यत्काला इति। भूता भविष्यन्तश्चार्थाः कालश्चेत्यर्थः॥ ७॥

१-१-१० प्रायेणेत्यत्र। अनेनेति। अल्पायुष्ट्वकथनेन। आद्य इति। सहस्रसमादिरूपः। धर्मबोधनायेति। अस्मिन् वाक्ये सभाप्रविष्टस्य जानतस्तूष्णींभावेपि दोषकथनात्तद्बोधनायेत्यर्थः। साधनत्व इति। उत्तरकथनस्येति शेषः। पूज्यत्वायेति। 'कलौ खलु भविष्यन्ति नारायणपरायणा' इति वाक्यात्तथेत्यर्थः॥ १०॥

१-१-११ अत इत्यत्र। यदिति प्रसिद्धं वा सारमिति। 'प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दं नापेक्षत' इति न्यायस्य यच्छब्देपि तुल्यत्वात् पक्षान्तरमाहुः यदित्यादि। पारम्पर्यफलव्यभिचारेति। व्यभिचारशब्दो द्वन्द्वान्ते श्रूयमाणत्वादुभयत्र सम्बध्यते। ईषेति। 'ईष गतिहिंसादानेषु'। महत्सुखावाप्तिरिति। अत्र षष्ठीतत्पुरुषात् परममहत्परिमाणमितिवद्दोषाभावः॥११॥

१-१-१२ सूत जानासीत्यत्र। जीवधर्मा इति। अविद्याकामकर्माणि। मुक्ता वेति। सनकादय इत्यर्थः॥ १२॥

१-१-१३ यस्यावतार इत्यत्र। भवशब्दस्य संसारवाचित्वेन प्रसिद्धस्यान्यैः संपत्त्यर्थकत्वेन व्याख्यातस्याप्यत्र प्रकरणानुरोधात् मोक्षवाचित्वे उपपत्तिमाहुः भू सत्तायामित्यादि। मोक्षे सत्यविद्यानिवृत्तेरर्थादेव सिद्धेश्चकारवैयर्थ्यमित्यरुच्या पक्षान्तरमाहुः चितीत्यादि। चैतन्येऽनुप्रवेशः परममोक्षः॥ १३॥

१-१-१४ आपन्न इत्यत्र। तन्माहात्म्यमाहेति। अवतारस्य मोक्षार्थत्वं समर्थयितुमाहेत्यर्थः॥ १४॥

१-१-१५ यत्पादेत्यत्र। तयोरिति। ज्ञानकर्मणोः। तत्र हेतुः कालेत्यादि। अग्रेण वा सम्बन्ध इति। उपस्पृष्टा इति। अस्येति शेषः। तत्र हेतुः तेषामित्यादि। 'सा राजन् दर्शनादेव ब्रह्महत्यापहारिणी'त्यस्य यमुनासङ्गमोत्तरकालविषयत्वात्। 'अनुसेवये'त्युपलक्षणे तृतीया, 'जटाभिस्तापस' इतिवदित्याशयेनाहुः भगवदित्यादि। पुनन्तीति। आप इत्यर्थात्। एवं व्यतिरेकेऽङ्गीक्रियमाणे योजना क्लिष्टा भवतीति पक्षान्तरमाहुः अथवेत्यादि। नन्वेवं बहुषु वाक्येषु लक्षणादिक्लेशः प्रसज्यत इत्याशङ्क्य तद्दोषनिवृत्तय आहुः आपातत इत्यादि। तथा च न क्वापि वाक्ये क्लेश इत्यर्थः॥ १५॥

को वेत्यत्र । स्वतन्त्रव्यावृत्त्यर्थमिति । स्वाभाविकाश्रोतृव्यावृत्त्यर्थमित्यर्थः ।
पुण्यश्लोका ईड्यकर्माणो येनेति समासमभिमेत्यार्थान्तरमाहुः तानि-
१-१-१६ त्यादि । ईड्यकर्मण इत्यर्थः । अस्यापुष्टार्थत्वमाशङ्क्य प्रथमपक्षस्यैव
तात्पर्यान्तरमाहुः तेषामित्यादि । कीर्तिरिति । ईड्यपदबोधिता सेत्यर्थः । यशो लक्ष-
यन्ति आधारेत्यादि । प्रतापवारणाय सर्वलोकाह्लादकेति । चन्द्रकिरणादिवारणाय
गुण इति । विसर्पीति तु स्वभावकथनम् ॥ १६ ॥

तस्य कर्माणीत्यत्र । अवान्तरफलेति । अवान्तरफलं शुद्धिरूपम् । तथाचा-
१-१-१७ विचारेण सर्वेषां शुद्धिदानार्थमुदारत्वोक्तिरित्यर्थः ॥ १७ ॥
वयं त्वित्यत्र । पदशब्दस्याक्षरवाचकत्वाय योगमाहुः पद्यत
१-१-१९ इत्यादि ॥ १८ ॥
१-१-२० कृतवानित्यत्र । येभ्य इति हेतौ पञ्चमी बोध्या ॥ २० ॥

कलिमित्यत्र । सर्वदोषनिवर्तक इति । विहितकर्मादिरूपप्रतिबन्धकनिवर्तक
१-१-२१ इत्यर्थः ॥ २१ ॥

इति सुबोधिनीप्रकाशे प्रथमस्कन्धे प्रथमाध्यायविवृतिः ॥ १ ॥

द्वितीयोऽध्यायः ।

अथ द्वितीयाध्यायं विवरिषवः सङ्गतिमाहुः कथेतिद्वाभ्याम् । तथा च प्रश्नो-
त्तरभावः प्रथमाग्रिमाणां द्वितीयतृतीययोरवसरः शेषशेषिभावो वा सङ्ग-
१-२-० तिरित्यर्थः । फलसाधनरूपाणामिति । फलं च साधनरूपाणि चेति
द्वन्द्वः । रूपाणि प्रकाराः । शेषिणामिति । संसर्गे मत्वर्थीयः । शिष्टानामवतारार्थधर्मिणाम् ।
यं प्रव्रजन्तमित्यत्र । दूरादाह्वाने दूराद्धूते चेत्यनेन प्लुते जाते 'प्लुतप्रगृह्या'
इत्यनेन प्रकृतिभावात्सन्ध्यनुपपत्तिमाशङ्क्याहुः प्रेम्णेत्यादि । तथा चात्र
१-२-२ सन्धेरार्षत्वं वदतः श्रीधरस्य विरहकातरपदतात्पर्याज्ञानमित्यर्थः । अभि-
नेदुरित्यनेनोक्तस्य प्रतिध्वानरूपस्याभिनन्दनस्य वृक्षयुक्ते देशे प्रभाव इति तत्र तमुपपाद-
यितुमाहुः स सर्वेत्यादि । तथा चातो वृक्षेष्वप्युत्तरदानरूपः प्रतिध्वनिर्युक्त इत्यर्थः ।
नन्वत्र तन्मयतया प्रतिध्वनिरुक्तः, सः कः, ज्ञानयोगयोः शुके व्यासे च सत्त्वादित्याश-
ङ्कायामाहुः कर्तुरित्यादि । एतदुपष्टम्भायैतन्नियामकं शुकनिष्ठमाहुः विष्णोरित्यादि ।
एवं व्याख्यानं श्रीधरीयेपि । परमेवं व्याख्याने शुकस्तद्रूपेणोत्तरं दत्तवानिति भवति ।

तथा सति मूलोक्तं तरूणामभिनादकर्तृत्वं च विरुध्यत इत्यरुच्या पक्षान्तरमाहुः अथ-
वेत्यादि । अस्मिन् पक्षे तन्मयतयेत्यस्याजुहावेत्यनेन सम्बन्धः । अर्थस्तु शुकमय-
त्वमेव । तथा सति मूलेऽभिनादकथनप्रयोजनाभाव इति शङ्कायामाहुः तेषामित्यादि ।
तथा च सर्वभूतहृदयपदेन तदर्थसिद्धिः । अन्यथैतस्यानतिप्रयोजनत्वम् । अत इदमेव
व्याख्यानं युक्तमिति भावः ॥ २ ॥

य इत्यत्र । विशेषमाहेति । इतरेष्वपि ज्ञानदातृत्वेन गुरुत्वरूपं विशेषमाहेत्यर्थः ।
एतस्येति । सूतस्येत्यर्थः । तादृशानामिति । पुराणानाम् । 'सूत त्वं
१-२-३
पूजितोस्माभिः सारात्सारं वदस्व न' इत्येवंजातीयवाक्यानां तत्रापि
सत्त्वादिति । तथा च तद्व्यावृत्त्यर्थमेकपदमित्यर्थः ॥ ३ ॥

मुनय इत्यत्र । द्वितीयप्रश्न इत्यादि । 'येनात्मा सुप्रसीदती'त्युक्ते प्रश्ने द्विती-
यमन्तःकरणप्रसादरूपं फलमेभ्य एव मुन्यर्थमेव भवतीत्यर्थः । सामा-
१-२-५
न्योत्तरमिति । इदं चतुर्थपादेन गम्यते । तस्य प्रश्नानुवादरूपत्वादिति ।

स वा इत्यत्र । निरूपयतीति । प्रथमपद्ये सामान्यत उक्तं विशेषाकारेण वक्ती-
त्यर्थः । स चेति । भगवत्प्रसाद इत्यर्थः । तत्परम्परायामित्यादि ।
१-२-६
साधनपरम्परायां धर्मवैराग्ययोर्यथायोग्यं निवेशनमुच्यत इत्यर्थः ।
आहेति । द्वाभ्यामाहेत्यर्थः । स चेति । स्वर्गादिसाधक इत्यर्थः । तेन तत्र धर्मत्वसन्देहस्त-
द्विचारे ज्ञातो भविष्यतीति भावः । व्यावर्तकमित्यादि । श्रीधरमतमिदम् । श्रवणादि-
लक्षणभक्तिजनकस्य परत्वमन्यत्र स एवैकान्तिकं श्रेय इति तत्र व्याख्यानात् । साधन-
त्वेनेति । फलदानसाधनत्वेन ॥ ६ ॥

१-२-७ वासुदेवेत्यत्र । अन्य इति । मूर्तिरूपोऽवतारस्रो वेत्यर्थः ॥ ७ ॥

धर्म इत्यत्र । वक्तुमिति । 'धर्मस्य ह्यापवर्ग्यस्ये'त्यादिभिश्चतुर्भिर्वक्तुमित्यर्थः ।
अन्यव्यावृत्त्यर्थमिति । धर्मत्वव्यावृत्त्यर्थम् । एतेन पूर्वं स्वर्गादिसाधके
१-२-८
धर्मत्वं सन्दिग्धमिति यदुक्तं तत्साधितम् । साधारणधर्मस्येति । सर्वे-
षामावश्यकस्य नित्यस्य ॥ ८ ॥

धर्मस्येत्यत्र । ननु भवतु सामान्यधर्मस्य तथात्वम्, तस्य 'इतो धावती'त्या-
दिवत्फलसंस्कारत्वेन स्वतःफलवत्त्वाभावात्, मुख्यरूपाभावे केवलस्य
१-२-९
तस्याप्रयोजकत्वाच्च, परन्तु फलसाधकत्वेन विहितस्य काम्यस्य
कथं न धर्मत्वमित्याकाङ्क्षायां तस्य तथात्वमुपपादयन्ति पुत्रादीन्यादि । फलस्ये-
त्यादि । तस्मिन् पुत्रादिरूपेण फलत्वाभिमानस्याविद्याकार्यत्वेन तस्य तथात्वादि-
त्यर्थः । तथाचानर्थसाधकत्वेनार्थत्वाभावान्न धर्म इति भावः । तन्नत्वं किमित्याश-

ङ्कायां तत्परिच्छिन्दन्ति किन्त्वित्यादि । भित्त्यादिकृतिवदिति । यथा कामनाविशेषरूपे निमित्ते भित्त्यादिकरणेन स्वसम्बन्धो नियम्यते, तथा तादृशधर्मेणापि कामनाविशेषरूपे निमित्ते स्वस्य सम्बन्धो नियम्यत इति तथेत्यर्थः। 'काम्ये नैमित्तिकत्वम्, नैमित्तिके विकारः स्या'दिति सूत्रात् सिद्धम् । ननु यथा 'यस्याहिताग्नेरग्निर्गृहान् दहेत्, सोऽग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपे'दित्यादौ नैमित्तिकस्यापि निर्वापस्य धर्मत्वम्, एवं 'चित्रया यजेत पशुकामः' 'देविकया निर्वपेत् प्रजाकाम' इत्यादावपि चोदनारूपस्य धर्मलक्षणस्य सत्त्वात् कथं न धर्मत्वमित्यत आहुः तत्रेत्यादि । ननु तत्र 'देवांश्च याभिर्यजत' इतिवद्यदुपबन्धाद्यभावात् कथमनुवादत्वनिश्चय इत्यत आहुः चित्तेत्यादि । 'क्षुत आचामे'दित्यादिना शुद्धिविधायकशास्त्रेण, 'शुद्धः कर्माचरे'दित्यादिना च शुद्धेरङ्गत्वावगमात् तस्या बाह्याया इवान्तर्याया अप्यावश्यकत्वात् तदभावेनाधिकाराभावात् 'यदेव विद्यया करोति तत्तदेवास्य वीर्यवत्तरं भवति' 'विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवे'दित्यादिभिश्च ज्ञानस्याप्यङ्गतया वाक्यतात्पर्यज्ञानस्याप्यावश्यकत्वात् तदभावेनान्यथाकरणे देवताधिष्ठानाभावात् क्रियाया लौकिकत्वम् । तथा च शुष्केष्टिवदनुकरणरूपत्वात् यजतिवैयर्थ्यमित्यर्थः । हेत्वन्तरमाहुः फलमित्यादि । तथा च यथा 'देवांश्चे'त्यत्र वाक्यान्तरसिद्धानुवादकत्वम्, तथा तेषु लोकसिद्धानुवादकत्वमिति यजतिवैयर्थ्यमित्यर्थः । ननु कामितमित्यादि । 'चोदनालक्षणोऽर्थो धर्म' इति सूत्रस्य 'वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्म' इत्यर्थकथनात् कामितमित्यकथनात् कामितस्यैव प्रयोजनत्वात् तत्साधकस्य कथं न धर्मत्वमित्यर्थः । ननु वाक्येषु तत्तत्फलोद्देशेनैव तस्य तस्य यागादेर्विधानदर्शनात् कथं विधिस्पर्शाभावोऽवगन्तुं शक्य इत्यत आहुः अन्यथेत्यादि । लौकिकेपि विधिस्पर्शो यद्यभ्युपेयते, तदा तथा स्यात्, अतस्तत्र तृतीयाबोधितकरणत्वेन फलसिद्धिः, न तु धर्मत्वमपि तत्र प्रयोजकम्, अतस्तदनुरोधेन लक्षणार्थस्तथा न शक्यवचन इत्यर्थः । ननु तया क्रियया अपूर्वजननात् कथं न तस्या धर्मत्वमित्यत आहुः अपूर्वेत्यादि । आरोग्यधनादिरूपदृष्टफललाभेनादृष्टस्यापूर्वस्य कल्पनमप्रयोजकम्, अतो नेत्यर्थः । ननु यागोत्तरं कालविलम्बेन फलजननात् मध्येऽपूर्वं क्रिययैवोत्पद्यत इत्यवश्यमङ्गीकर्तव्यम्, अन्यथा तदैव फलं स्यात्, नैव स्याद्वा । तत्राद्ये प्रत्यक्षविरोधः, अन्त्ये श्रुतौ दोषप्रसक्तिः, तदुत्पद्यत एवेति कथं न धर्मत्वमितिशङ्कायां तदुत्पत्तिमुपगम्य दूषणान्तरमाहुः किञ्चैते हीत्यादि । एवं रैरूपस्यार्थस्य धर्मकार्यत्वं खण्डितम् । शेषं खण्डयन्ति तथा नेत्यादि । अपरत्वान्न परमार्थरूपाः । 'प्रकर्षेण युज्यते' इति 'युज्यतेऽनेने'ति वा प्रयोजनं तदुभयरूपत्वाभावान्न प्रयोजनरूपा इत्यर्थः । नन्वेवं सति काम्येष्टिप्रभृतिकाण्डस्य धर्मपरत्वहानिः, तथा च 'वेदोऽखिलो धर्ममूल'मित्यखिलविरोध इत्याशङ्कायां गौणधर्मत्वं तत्रोपगम्याहुः किञ्च धर्म इत्यादि । तथा चेयमत्र व्यवस्था,

साधनतेति । कामसाधनता । तथा चार्थस्यार्थान्तरसाधकतया कामजनकत्वं यद्युपेयते, तदापि स्त्रिया पुत्ररूपार्थप्राप्तौ स्त्रीरूपनाशदर्शनात् विषयनाशनद्वारा कामनाशकत्वरूपं पूर्वोक्तमेव वैपरीत्यमापतितमित्यर्थः । सिद्धमाहुः तथा चेत्यादि । अर्थरूपा इति । अर्थ्यते अभीप्स्यते इत्यर्थ इति योगेनार्थरूपा इत्यर्थः । लोकेत्यादि । 'रूढियोगमपहरती'तिन्यायात्तथेत्यर्थः । अर्थेत्यादि । एवं प्रयोजकत्वेनार्थस्य कामजनकत्वाङ्गीकारेऽर्थस्य धर्मजनकत्वदर्शनादर्थसाधकस्य करदण्डचौर्यादेरपि धर्मजनकत्वापत्तेरित्यर्थः । तर्हि लोके कथं साधनत्वप्रत्यय इत्यत आहुः लोक इत्यादि । तर्हि प्रसिद्धेः सार्वजनीनत्वात्तादृशप्रतीतेः भ्रान्तत्वं कथं वक्तुं शक्यमित्यत आहुः कदर्यस्येत्यादि । ननु कदर्यत्वस्य प्रतिबन्धकत्वात् नान्वयव्यभिचार इत्यत आहुः पश्वादीनामित्यादि । ननु तृणारणिमणिन्यायेन पशुत्वस्यापि व्यक्तिविशेषं प्रति कारणत्वे व्यतिरेकव्यभिचारोपि नेत्यत आहुः तथेत्यादि । तथा चान्वयव्यतिरेकव्यभिचारदर्शनात् प्रसिद्धिर्देहात्मप्रसिद्धिवद्भ्रान्तेत्यर्थः। तथाचेत्यादि। घटादिरूपा पृथिवी, लोहलेख्या, पार्थिवत्वात्, वृक्षादिवदित्यत्र लोहलेख्यत्वपार्थिवत्वयोरिव साहचर्यमात्रमप्रयोजकमित्यर्थः । एवं कामो लाभायेति व्याख्यातम्। ननु मास्तु कामार्थयोरवच्छेदकावच्छेदेन कार्यकारणभावः, परं तत्तद्व्यक्तित्वावच्छिन्नः सः प्रत्यक्षेण वसनालङ्कारवनितादिषु प्रमितः केन वार्यतामित्याकाङ्क्षायां कामस्य नेत्यर्थं व्याकुर्वन्ति किञ्चेत्यादि। जीवनमात्रपर्यवसित इति । 'शरीरस्थितिहेतुत्वादाहारसधर्माणो हि कामा' इति वात्स्यायनसूत्रसिद्धः । अनशनादिना रोगादिदर्शनात् तन्निवृत्त्या जीवनमात्रसाधक इत्यर्थः। स्वतः सिद्ध इति । ईश्वरनिर्मितः। मतान्तरे अदृष्टनियतः। सुखात्मकस्य कामस्यात्र ग्रहणे साध्यसाधनभावव्याघातात्कामपदमत्र लाक्षणिकत्वेन व्याकुर्वन्ति विषयभोग इति। उभयत्रेति । पूर्वार्धोत्तरार्धयोः। क्रम इति। उच्यमानोऽङ्गीकार्य इति शेषः। अर्थो वेति । स जीवनस्यार्थो न इति शेषः॥९।१०॥

१-२-११ वदन्तीत्यत्र । समुदायपक्ष इति । तेषां भावस्तत्त्वमिति पक्षे । सर्वोपजीवकत्वादिति । सर्वे उपजीवका यस्य तस्य तथात्वात्, सर्वोपजीव्यत्वादित्यर्थः ॥ ११ ॥

१-२-१२ तच्छ्रद्दधाना इत्यत्र । तच्छब्दस्य पूर्वपरामर्शित्वात् पूर्वश्लोकोक्तं धर्ममादाय श्लोकोक्तसाधनानां क्रमं वदन्ति तदर्थमित्यादि ॥ १२ ॥

अतः पुम्भिरित्यत्र । वीजेत्यादि । पञ्चाग्निविद्याप्रकारेण सिद्धशरीरास्तादृशं
१-२-१३ धर्मं कुर्वन्तीत्यर्थः । तादृशशरीराभावेपि केचन तादृशधर्मकर्तारो दृश्यन्ते, तत्र कारणाकाङ्क्षायामाहुः धर्मेत्यादि । ममैष काम इति । इदं षष्ठस्कन्धे प्राचेतसं दक्षं प्रति भगवद्वाक्यम् । 'प्रीतोहं ते प्रजानाथ यत्तेस्योद्बृंहणं तपः ।

ममैष कामो भूतानां यद् भूयासुर्विभूतय' इति। अत्र दक्षकृततपःपोषकत्वेन प्रकृतार्थसिद्धिः। कर्मणि प्रयोग इत्यादि। कर्मणि प्रयोगे हि 'देवदत्तेन तण्डुलः पच्यत' इत्यादौ क्रियाजन्यं विक्लृतिरूपं फलं कर्मरूपे तण्डुल एव, न तु कर्तरि देवदत्ते। तथात्रानुष्ठाने सुष्ठुत्वेन धर्म एव यदोपक्षीणो भवति विक्लृत्या तण्डुल इव सुष्ठुत्वेन व्याप्तो भवति, न तु कर्तापि तज्जन्यप्रतिष्ठादिना, प्रतिष्ठादिफलेप्सुर्न भवतीत्यर्थ इति। फलमिति। कर्तृकामितम्, न भगवत्प्रसाद इत्यर्थः। शमादय इति। 'शमो दमः तपः शौच'मिति गीताद्युक्ताः। कालद्रव्ययज्ञादिभेदा इति। कालयज्ञभेदा अग्निहोत्रादयः। द्रव्ययज्ञादिभेदाः 'द्रव्ययज्ञास्तपोयज्ञा' इतिवाक्योक्ताः। शास्त्रप्रत्ययेनेति। मङ्गलवचन एव शास्त्रप्रत्ययस्य प्राचुर्येण प्रयोगात् तेन तयेत्यर्थः। स एव वा धर्म इति। यः स्वनुष्ठितः स एव धर्म इत्युद्देश्यविधेयभावादित्यर्थः। सुबोधिन्यां संसिद्धिर्ह्यात्मतोपणमितिपाठो भाति॥१३॥

यदनुध्यासिनेत्यत्र। तद्धेतुनेति। क्षयहेतुना भोगेनेत्यर्थः। विद्यमानस्येति।

१-२-१५ चिदचिद्ग्रन्थेर्मोहग्रन्थेश्चेत्यर्थः। घुणाक्षरन्यायमिति। घुणः कीटः, तच्चरणेन यदृच्छया कदाचिद्यथा अक्षराणि भवन्ति, तन्न्यायमित्यर्थः। बहुवचनमिति। यद्येक एव यदनुध्यानेन कर्मग्रन्थिनिबन्धनं छिनत्ति, तदायं न्यायः प्रसरेत्, किन्तु बहव इति कोविदा इत्यर्थः। स्वन इति। ध्यानत्वेन रूपेण। तद्धर्मेणेति। ध्यानरूपेणेत्यर्थः॥ १५॥

एवमित्यादि। कामादिभगवच्चोपान्तया श्रवणादिधर्मपरम्परया। शुश्रूषोरित्यत्र। निरूपयतीति। गृहत्यागादिशुश्रूषान्तकथनेन निरूपयतीत्यर्थः।

१-२-१६ सूचितमिति। वाक्येन सूचितम्। अस्याङ्गीकारायेति। 'किरातहूणा-न्ध्रे'तिवाक्यात् भगवदाश्रिताश्रयणे शुद्धिरिति महत्पदेन भगवदाश्रिता एव गृह्यन्ते, तथा च तत्सेवने अस्याप्यङ्गीकारो भवतीति ज्ञापनाय तथा प्रयोग इत्यर्थः॥ १६॥

शृण्वतामित्यत्र। स्वशब्दस्यात्मीयेपि रूढत्वात्तद्विहाय कुत एवं व्याख्यायते

इत्यत आहुः स्वीयेत्यादि। स्वीया इति व्याख्याने स्वस्येमा इत्यर्थात्

१-२-१७ कथासम्बन्धिनो भगवतः स्वातन्त्र्यमायातीति स्वातन्त्र्यबुद्धिः आयाति, नायाति वा, ततश्चाभद्रधूननमपि सन्दिग्धं स्यात्, अतस्तद्विहायैवं व्याख्यायते इत्यर्थः। पुण्यशब्दार्थमाहुः अपहतेत्यादि। कामादीनीति। आदिपदेनाविद्या कर्म च। क्रमेणेति। शुश्रूषोः, शृण्वताम्, नष्टप्रायेष्विति श्लोकक्रमेणेत्यर्थः॥ १७॥

१-२-१८ नष्टप्रायेष्वित्यत्र। भगवद्भक्तानां चेति। चकारेण तत्कथा समुच्चीयते॥ १८॥

तदेत्यत्र। कामलोभादीनां मिश्रसत्त्वभावस्यानुभाविकत्वादाहुः कामक्रोधादय

इति । तटस्थतयेति । तद्वाचकशब्दाकथनात्तथेत्यर्थः । यत्पदस्य कामा-
१-२-१९ दिविशेषणत्वे तत्पदाध्याहारापत्तिः, अतस्तन्निवृत्तये यत्पदार्थमाहुः ये
चेति । कामक्रोधादि कामलोभादि मोहादयः, एतैरनाविद्धमिति योजना । गतगृहा-
निचेति । गृहाणि रजस्तमसी, तद्रहितानि चेत्यर्थः । कथमित्यत आहुः अत एवेत्यादि ।
रजस्तमोरूपगृहाभावादेव तद्धर्माणां सत्ताभावाद्भवन्तीति न क्रियासम्बन्ध इत्यर्थः । मूल-
गुणसूचित्वव्यतिरेकेणेति । अन्तःस्थो भगवानभद्राणि धुन्वंस्तानपि कुण्ठितान् करो-
तीति तेषां सूचित्वाभावो ज्ञेयः । तदा लयावस्थामित्यादि । रजस्तमोरूपमूलगुणकौण्ठ्ये
भगवता कृते सत्त्वस्थे भगवति लीयमानमित्यर्थः । सत्त्वनिमित्तमिति । सत्त्वार्थम् ।
सत्त्व इति । मूलस्थसप्तम्या व्याख्यानमिदम् । तेनेति । चित्तेन ॥ १९ ॥

भिद्यत इत्यत्र । विद्यया अविद्यानाश इव पुनरविद्यया विद्यानाशोपि भवती-
त्याहुः आत्मनो हीत्यादि । 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य
१-२-२१ बन्धविपर्ययौ'विति जाताः पदार्था इत्यर्थः । न निवर्तन्त इति ।
नारदेन तथात्वस्याग्रे वक्ष्यमाणत्वात् । जातेपीति । न निवर्तत इति पूर्वेण सम्बन्धः ।

अतो वै इत्यत्र । कृतेरनित्यत्वात् नित्यं कृत्यसंभवेन यावज्जीवाग्निहोत्रे सायंप्रा-
तःकालवदत्र कालविशेषो विवक्षितस्तस्य वाक्येऽदर्शनात् सदापदव्या-
१-२-२२ ख्यातमपि कालं पुनर्व्याकुर्वन्ति क्षणे क्षण इति । एवमप्यपुष्टार्थत्वमित्य-
तो मुदपदेन तद्योजयन्ति प्रतिक्षणमित्यादि । सूतादीनामधिकारस्य स्वरूपमाहुः विषय
इत्यादि । विषय इति । भक्तिविषयः ॥ २२ ॥

सत्त्वमित्यत्र । ब्रह्मणोपीत्यत्राविः शङ्कागर्हायाम् । शेषत्वाभावेपीति । गुण-
शेषत्वाभावेपि । उपाधीत्यादि । तथा चोपाधीना सत्त्वादीनां प्रयो-
१-२-२३ जकत्वात्तथेत्यतो नियम इत्यर्थः । केषाञ्चिदिति । माध्वानाम् । इवेति ।
वैधर्म्ये दृष्टान्तः । न ब्रह्मण इति । 'निर्गुणस्य गुणात्मन' इत्यत्र द्वितीयस्कन्धे वक्ष्यमाणा
नेत्यर्थः । अत्र चैतन्यस्वरूपभेदवादी शङ्कते नन्वित्यादि । पुरुष इति । शारीरः ।
गुणप्रेरणयेति । गुणकृतप्रेरणया । साङ्ख्यास्त्वित्यादि । तेषां कार्येश्वरवादात् प्रकृत्या
नित्यसम्बद्धं चैतन्यमेवेश्वर इति तेषां मतम् । अन्ये इति । पातञ्जला मायावादिनश्च ।
भ्रमादिति । उपधानप्रयुक्तात् भ्रमात् । किञ्चिद्रूपमिति । कूटस्थचैतन्यस्याक्षरात्मन
एकदेशः । ननु प्रकृतिपुरुषौ विना कार्यादर्शनात्करणरूपौ तौ विना तयोर्निर्माणासंभवात्
तौ नित्यावेव स्वीकार्यौ, तत्रश्च साङ्ख्यवत्तत्रैव विश्रान्तिरापद्येतेति को विशेषः साङ्ख्यात्,
अथ भ्रमात्सम्बन्धो वाच्यः, तर्हि को विशेषो मायावादिभ्य इत्याकाङ्क्षायां तौ विनापि
सर्पोत्पत्तिं दृष्टान्तेन समर्थयन्ति यथेत्यादि । प्रकृत्यपेक्षेति । न प्रकृतिपुरुषनिर्माण इति

शेषः । नैतावतेति । न तज्जननोत्तरं सत्येनापि तत्सम्बन्धेन । लुग्वेति । हर्यादिशब्दाज्जातस्य सोर्लुक् । न प्रत्ययोत्पत्तिरिति । डुदाञ् दाने । अत सातत्यगमन इत्यादाविव द्वन्द्वान्तादपि स नेत्यर्थः । सम्पादयतीति । तत्क्रतुन्यायेन संपादयति । तानीति । सत्त्वादीनि । नाशशङ्काभावादिति । सत्त्वोपाधेः स्थापकत्वात्तथेत्यर्थः । मुख्यपक्षमाहुः यदीत्यादि । तेन सहोपाधिरिति । यादृशं यं भजन्ति तेन सह स एवोपाधिस्तेषामपि भवति । तथा च तस्योपाधिनिवृत्तौ तत्सायुज्यं प्राप्तानां तेषामप्युपाधिनिवृत्तिः, न तु ततः पूर्वमित्यर्थः ॥ २३ ॥

पार्थिवादित्यत्र । अयमर्थो गूढ इत्यादि । स्वरूपैक्येपि उपाधिवैशिष्ट्येन फलवै-
शिष्ट्यरूपोऽर्थ उपाधेरप्रयोजकत्वस्फूर्त्या सन्देहेन ज्ञातुमशक्य इति दृष्टोपा-
१-२-२४ धित्वेन तत्तत्कार्यजनकत्वे दृष्टान्तमाहेत्यर्थः । तत्रापीति । तेजोमार्गणेपि ।
तेषामिति । तेजोदृष्टोपाधिभूतानां दारूणाम् । इतीति । उपाधिभूतानां तेषां एवं स्वनिष्ठोपाधिवशेन तत्तत्कार्यजनकत्वम् । तत्रापीति । तदुपहितेष्वपि । एवं तेजोदृष्टोपाधिभूतानां दारूणां स्वावान्तरोपाधिवशेन त्रयीमयत्वपर्यन्तं हीनमध्यमोत्तमकार्यजनकत्वं व्याख्यातम् । एवं व्याख्याने उपाधेरेव कार्यजनकत्वमायाति, न तूपहितस्य, इत्यतः प्रकारान्तरेणाहुः तत्र लोक इत्यादि । तदिति । सामान्ये नपुंसकम् । अधूमः शुष्क इति । सङ्ग्रह इति शेषः । पूर्वं रूपमिति । अग्नेः प्राथमिकं रूपम् । अस्मिन्नपि पक्षे प्राथमिकरूपस्य तथोपकारकत्वं नायातीत्यतः पक्षान्तरमाहुः अथवा जल इत्यादि । भूयसो जलस्य स्वल्पाग्निनाशकत्वादार्द्रामघटे विद्यमानेपि जले तस्य घटस्याप्युपकारकत्वं दारु संपादयतीत्यर्थः । पूर्वोक्तरूपतेति । दृष्टोपाधिरूपता । कार्यमिति । सेवककार्यम् । जीवपुरःसरेणेति । नृणामित्युक्त्या तथेत्यर्थः ।

भेजिरे इत्यत्र । सत्त्वमुक्तमिति । कार्योक्त्यानुमापितमित्यर्थः । सामानाधिकर-
ण्येन प्रतिपादनमिति । विरुद्धार्थयोरभेदान्वये समानविभक्तिकत्वस्य
१-२-२५ तन्त्रत्वात्तथेत्यर्थः । स्वरूपानन्दायेति । जीवानन्दाय ।

मुमुक्षव इत्यत्र । तथा सतीति । धर्मे सति । नेति । शान्तत्वसन्देहाने-
१-२-२६ त्यर्थः । भजनीयानीति । भक्ताभयङ्करत्वाद्भजनीयानीत्यर्थः ।

रज इत्यत्र । निश्चयार्थ इति । वैशब्द इत्यर्थः । ईश्वरभजन इति ।
१-२-२७ भूतेशभजने ।

वासुदेवेत्यत्र । सर्वगुणमयमिति । सत्त्वमित्यर्थात् । गुणशब्दोऽत्र दोषविरुद्धपरः ।
युक्तेः प्राधान्यादिति । प्रथमाधिकारे युक्तेः प्राधान्यादित्यन्वयः ।
१-२-२८ सर्वाणि पञ्चेति । 'साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथेति' मोक्ष-

धर्मवाक्यात्तथेत्यर्थः । परमतोपन्यासेनेति । 'एकं साङ्ख्यं च योगं च वेदारण्यकमेव च । परस्पराङ्गान्येतानि पञ्चरात्रं च कथ्यते' इति परस्पराङ्गकथने तत्रैव पाशुपतानुक्तेस्तथेत्यर्थः । अपेक्षितरूपेणेति । 'सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते । यथागतं तथा ज्ञानं निष्ठा नारायणः परः' इति तत्रैव वाक्यात् पाशुपतस्यापि वासुदेवपरत्वे सिद्धे पुरःस्फूर्तिकस्य पशुपतिभजनस्य प्रथमाधिकारत्वबोधकेन रूपेणेत्यर्थः । वासुदेवपरमिति । पूर्वोक्तरीत्या प्रमाणप्रमेयसाधनानां सत्त्वेन फलस्य सुखांशत्वेन च वासुदेवतात्पर्यकम् ।

एवमिति । फलसाधनयोर्बोधकत्वेन परम्परात्रयेण विषयादिबोधनेन चेत्यर्थः । निर्णातमिति । फलं वासुदेवसाक्षात्कारः सर्वेषां श्रेयस्तत्साधनं च

१-२-३० धर्मादि कथारत्यन्तमात्मप्रसादनमिति निर्णीतमित्यर्थः । अवतारतुल्यत्वेनेति । अवतारान्तरतुल्यत्वज्ञानेन । कथयिष्यतीति । अवसरसङ्गत्यात्र वक्तुमुचितमिति तत्र कथयिष्यतीत्यर्थः । स एवेदमित्यत्र । पञ्चभिरिति । एतेन पञ्चमः श्लोकः कृष्णावतारप्रयोजनप्रश्नोत्तररूप इति श्रीधरमतं निवारितम् । तत्र सामान्यतः कथनेन विशेषाकाङ्क्षाया अपूरणात् । सृष्टिस्त्वगुणादेवेति । मूलसृष्टिः प्राथमिकी सा तथा, अगुणादेव गुणसृष्टेर्वक्तव्यत्वादित्यर्थः । गुणत्रयेणापीत्यादि । ब्रह्मणः शिवस्य विष्णोश्च शुद्धरजस्तमःसत्त्वरूपत्वात्तादृशेभ्यः प्रत्येकं रजस्तमःसत्त्वमिश्रणे सृष्टिसंहारपालनानि भवन्तीत्यर्थः । एतच्च वायुसंहितादौ ब्रह्मा पुरुषकालविराड्भिः, विष्णुरनिरुद्धप्रद्युम्नसंकर्षणैः, शिवो भवमृडहरैः सृष्टिस्थितिसंहारान् करोतीत्येवं प्रकारेण बोधितम् । कौर्मेपि । 'एका भगवतो मूर्तिर्ज्ञानरूपा शिवामला । वासुदेवाभिधाना सा गुणातीता सुनिष्कला । द्वितीया रुद्रसंज्ञा स्यात्तामसी शेषसंज्ञिता । विहन्ति सकलं चान्या वैष्णवी परमा तनुः । सत्त्वोद्रिक्ता तृतीयान्या प्रद्युम्नेति च संज्ञिता । जगत्पालयते सर्वं सा विष्णुप्रकृतिर्ध्रुवा । चतुर्थी वासुदेवस्य मूर्तिर्ब्रह्मेति संज्ञिता । राजसी चानिरुद्धाख्या पुरुषः सृष्टिकारिके'ति । एतेनैव सगुणनिर्गुणयोरभेदोपि सिद्धो ज्ञेयः । गुणस्यासत्त्वस्फूर्तावगुणत्वात्तदभिमानितिरस्कृतौ तस्यैव सगुणत्वादिति । एवमेव ब्रह्मशिवयोरपि निर्गुणसगुणभावो ज्ञेयः । ननु त्रिभ्योपि कार्यत्रये शुद्धा गुणाः कथं बोद्धव्या इत्यत आहुः शुद्धा इत्यादि । इयमिति । मायाकरणिका । वैदिकप्रथमसृष्टेः सकाशादस्याः को भेद इत्यत आहुः वैदिके त्वित्यादि । तथा च वेदे शक्तेर्जननम्, अस्यां तु सा करणम्, तेन सा सृष्टिरितः प्राथमिकीत्यर्थः । प्रतिकृतिरूपेति । सञ्चायकरूपा । संयोज्येति । पूरयित्वा । चकारसूचितमर्थं वक्तुं प्रसङ्गादाहुः निद्रापीत्यादि । वैदिकपौराणिकजगतोर्भगवद्रूपत्वाविशेषेपि यो भेदस्तं प्रकारं बोधयितुमाहुः वेदे त्वित्यादि । स्वस्यानन्तेत्यादि । वैदिक्यां सृष्टावुत्पन्ना सा भगवत्स्पर्शेन सद्कान्तभगवद्गुणा सती गुणमयी

भवतीत्यर्थः । गुणाकृतित्वमिति । पूरितमात्रन्यायेन तथात्वम् । प्राकृतगुणरहित इति । गुणानां प्राकृतत्वस्य भगवत्सम्बन्धानन्तरभावित्वात्तथेत्यर्थः ॥ ३० ॥

तथेत्यत्र । अन्तर्यामिणोन्तःप्रविष्टस्य क्वचिद्दीपत्वक्वचिद्भूयः स्फुरणे दृष्टान्तद्वयमाहुः
स्वदिरित्यादि । तथा च प्रेरकत्वस्य तद्धर्मत्वाद्यत्र स्वल्पं तद्यथास्मदादिषु
१-२-३१ तत्रैषद्भानम्, यत्र भूयस्तत्रासमन्ताद्भानम्, यथा नृगादिष्विति भावः ।
प्रथमे आक्षेपद्दर्थः । स्फुरणमिति । तत्तज्ज्ञानस्य प्रकाशः । अस्मिन् मते जीववदुपाधि-
वशेनैकस्यैवान्तर्यामिणोपि नानात्वं ज्ञेयम् ॥ ३१ ॥

असावित्यत्र । स्वांशरूपतेति । गुणानां भगवदंशत्वात्तथेत्यर्थः । नितरा-
मिति । एनेन निर्विष्टपदे वर्णागमो बोधितः । कर्तृकरणयोर्भेदेन सृष्टि-
१-२-३३ भेदं समर्थयन्ति साक्षादित्यादिना । हेतु इत्यत्र 'इह तु' इति पाठो
भाति । सप्तमीसमासे चतुर्थीसमासे च करणत्वम्, तृतीयासमासे कर्तृत्वमिति त्रिधापि
सृष्ट्योर्भेद एवेत्यर्थः । मुख्यतया स्थिताविति । दृढाभ्यासे ॥ ३३ ॥

भावयतीत्यत्र । उभयत्र हेतुमाहेति । एनेन लीलाभिरवतारैरिति
१-२-३४ तृतीययोर्लुक्ता पदभेदो बोधितः ॥ ३४ ॥

इति प्रथमस्कन्धसुबोधिनीप्रकाशे द्वितीयाध्यायविवरणम् ॥ २ ॥

अथ तृतीयाध्यायविवरणम् ।

अथ तृतीयाध्यायं विवरिषवः सङ्गतिं वदन्तः कृष्णावतारप्रयोजनस्यानुक्तत्वं
ज्ञापयितुं पूर्वोक्तमनुवदन्ति निरूपिता इत्यादि । निर्णय उच्यत इति
१-३-० शेषः । अवतारेति । अवतारा रामादयः अर्थाः, सर्वनाथो भगवान्
धर्मी पुरुषस्तेषामित्यर्थः । नेनावसरः सङ्गतिरित्यर्थः । अनुक्तत्वे श्रोतृजिज्ञासापूर्तिः कथमित्याकाङ्क्षायामाहुः कृष्णेत्यादिमार्धम् । साधारणमिति । सामान्यमुत्तर'यसा'विति-श्लोके । निर्णय इति । देवतिर्यङ्नरादिषु अवतारनिर्णयोऽधिकः विशेष इति पूर्वश्लोके इत्यर्थः । तेनेति । निर्णयेन । पष्ठस्योत्तरमत्राध्याये कथ्यत इत्यत आहुः वस्तुत इति ।

जगृहे इत्यत्र । अवतारकथोत्तरस्य पुरुषप्रारम्भेणैव कथने बीजमाहुः यद्यपीति ।
'अव्यक्तोक्षर इत्युक्त' इति गीतावाक्ये परमधामत्वकथनादक्षरं व्यापिवैकु-
१-३-१ ण्ठात्मकं तस्याधिभौतिकमाध्यात्मिकं वा प्रकृतिपुरुषजनकं तदंशाः काल-
कर्मस्वभावाः कार्याणि तत्त्वानि तेषु 'मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्' 'काल-

रूपेणावतीर्ण' इत्यादिवाक्यैरवतरणमस्ति, तथापि द्विरूपता योनित्वाधिकारित्वादिरूपता वर्तत इति तथेत्यर्थः। द्वैतरूपतेत्यपि पाठोऽयमेवार्थः। ननु मनुष्यत्वादिना द्विरूपताग्रे वक्ष्यमाणेषु कुमाराद्यवतारेषु वर्तते इति द्विरूपता नाक्षरादित्यागबीजत्वेन शक्यवचनेत्यरुच्या पक्षान्तरमाहुः लीला इत्यादि। केचिदत्र विराड्जीवान्तर्यामिणो भगवतो विराड्रूपेणोपासनार्थं ब्रह्माण्डस्य भगवच्छरीरत्वं कल्पनयोच्यत इत्याहुः, तथा सति 'जगृहे' इति भूतप्रयोगो विरुध्येत इति, तदभावाय विराजो वस्तुतो भगवच्छरीरं वक्तुं पीठिकामाहुः भूतेत्यादि। अत्र साक्षाल्लीला 'एतस्माज्जायते प्राण' इत्यादिश्रुत्युक्ता। द्वितीया तु 'तस्माद्वा एतस्मादात्मन आकाशः संभूत' इत्याद्युक्ता। ब्रह्माण्डं विराड्रूपम्। निर्माणपक्षः पुरुषसूक्ते। अनिर्माणस्तूक्तश्रुतिषु ज्ञेयः। ननु पुंसूक्ते ब्रह्माण्डस्य जीवशरीरताप्युच्यते, तस्य का गतिरित्यत आहुः निर्माणपक्ष इत्यादि। कश्चिन्नेति। भारते सभापर्वाणि यमसभायां दाशरथे रामस्य कथनात्कस्मिंश्चित्कल्पे रामोवतारो नेत्यर्थः। मुक्तिः सुलभेति। भगवत्त्वेन ज्ञानादि दत्वापि मोचयतीति सुलभा। जीवत्वे तु 'मुक्तं भर्गः स्वैरितरत्र चाध्रुवे'रिति ध्रुवत्वाभावादेकांशस्थितविश्वो ददातीत्येतदपेक्षया सा मुक्तिर्न सुलभा। किञ्च। तत्तद्रूपस्थानां श्रीकृष्णावतारातिरिक्तोपासकानां जीवोपासकतया न मुक्तिः सुलभा। 'एतन्नानावताराणां निधानं बीजमव्यय'मिति श्रीकृष्णावतारातिरिक्तावताराणां पुरुषावतारनिधानत्वात्। ब्रह्मत्वे तु ब्रह्मनिधानत्वादवताराणामिति तदुपासकानां मुक्तिः सुलभेत्यर्थः। अस्त्वेवं द्वैविध्यम्, तथाप्यत्र ब्रह्मशरीरत्वं कुत इत्यपेक्षायामाहुः अत्रेत्यादि। प्रमाणमत्राहुः विष्णोरित्यादि। इदं वाक्यं श्रीधरीये, 'विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः। प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम्। तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत' इति। रूपत्रित्वे बीजमाहुः पुरुषशब्द इत्यादि। एतास्तिस्रोपि व्युत्पत्तयः श्रौत्यः। 'पुरा आसे'ति 'पुरमुपती'ति द्वयं बृहदारण्यके पुरुषविधब्राह्मणे 'स यत्पूर्वोस्मात् सर्वस्मात् सर्वान् पाप्मन औषत् तस्मादुच्यते पुरुष इति'। तृतीयापि तत्रैव मधुब्राह्मणे 'पुरः पुरुष आविशत्' इति। अस्मिन् पक्ष इति। तृतीयपक्षे देहाध्यासो नेत्यर्थः। पुरा विद्यमानत्वेन शरीरोत्पत्तेः पूर्वमेव तत्सत्ताज्ञापनात्। मधुब्राह्मणश्रुतेः, अध्यासस्तु परमाणूनां रेतःकणाश्रयजीवेन मिलने रजस्वला''''करणे भवति, मकरे तु तदभावः। 'उष दाह इती'ति पक्षे त्वमितिशेषः। जीवोपीति। पुरिशयनसम्भवाज्जीवोपि भवतीत्यर्थः। भगवानेवेति। पुरदाहपुरासनयोर्जीवे अभावादिति भावः। द्वितीय एवात्रोच्यत इत्यत्र गमकमाहुः अण्डजत्वादित्यादि। प्रकरणानुरोधेन मुक्त्यर्थमेवावतारकथाप्रश्नस्यापि सिद्धेस्तदर्थकस्यैवोत्तरस्य वाच्यत्वादन्तर्निर्माणस्य खगादिष्वन्तरेव दृष्टत्वात्। अतोत्र द्वितीय एवोच्यत इत्यर्थः। नन्वेवं सति तृतीयपक्ष एवाङ्गीकार्य इत्यत आहुः अस्येत्यादि। मूले 'पौरुषं रूप'मित्यनेन पुरुषस-

म्वन्धित्वमुच्यते । तेन पुरुषविधमभिमेतम् । तदेवैकादशेपि 'तन्मायाफलरूपेणे'त्यादिना भगवता निरूपितमतस्तथेत्यर्थः । यदि तृतीयपक्षः स्यात्, अन्तर्यामीव प्रविशेत्, प्रकृते तु सर्वनिर्माणं भोगश्चेति द्वितीयपक्ष एवेति भावः । अधिकारीति । अधिकारी जीवो नास्तीति बोधनार्थम् । व्याख्याने तु वाक्यार्थ उक्त इत्यपौनरुक्त्यम् । अप्स्विति । तृतीयस्कन्धे षष्ठे ' हिरण्मयः स पुरुषः सहस्रपरिवत्सरान् । आण्डकोशमुवासाप्सु सर्वसत्त्वोपबृंहितः । स वै विश्वसृजां गर्भो देवकर्मात्मशक्तिमान् । विबभाजात्मनात्मानमेकधा दशधा त्रिधा । एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः । आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यत' इत्यत्रोक्ताप्सु बीजत्रह्माण्डम् । एवं त्रयोविंशे सिद्धे सत्त्वादिगुणानां पुरुषस्य च ब्रह्माण्डे न्यूनतां परिहरन्ति अस्यां सृष्टाविति । स्वयमिति । 'आसीज्ज्ञानमयो ह्यर्थ' इत्यादिवाक्येभ्यः । न किञ्चिदिति । प्रकृतेरंशत्रयं पुरुषः स्वयं चेत्यष्टाविंशतितत्त्वेषु न किञ्चिदवशिष्टमित्यर्थः । अवशिष्टानामत्रैवान्तर्भावे वा । अधिकारीति । ब्रह्मादीनामित्यर्थः ॥ १ ॥

यस्याम्भसीत्यत्र । नतु केति । देहपरिग्रहं विना केत्यर्थः । दैनंदिनेति । ब्रह्मकल्पान्ते नैमित्तिकप्रलयेत्यर्थः । सायुज्यसृष्टिवदिति । सायु-

१-३-२ ज्योत्तरं पुनस्तेषां सृष्टिवदित्यर्थः । योगभूतत्वं तस्याः स्फुटीकुर्वन्ति गुह्यं चेत्यादि । यथा योगो गुप्तं जीवं प्रकटीकरोति, तथेयं सुषुप्तौ प्राज्ञसम्बन्धानन्दं प्रकटीकरोतीति तथेत्यर्थः । तदर्थमिति । आनन्दार्थं योगार्थं वेत्यर्थः ॥ २ ॥

यस्यावयवेत्यत्र । स चेति । विराड्देहः । मध्यभाव इति । वृक्षभावे जरायुभावे वेति प्रतिभाति । बीजं पूर्वभावः, वृक्षो मध्यभावः, फलमुत्तर-

१-३-३ भावः । बीजं पूर्वभावः, जरायुर्मध्यभावः, देह उत्तरभाव इति जरायुभावे जरायोरन्तरव्याप्तावत्रापि तथात्वसिद्ध्या 'अवयवसंस्थानैः कल्पित' इति विरुद्धं स्यात्, अत आहुः वस्तुतस्त्विति । उक्तोपपत्तिरिति । बीजत्वरूपेत्यर्थः । तथा च भगवतो रूपं तत्, भगवतो बीजत्वादिति भावः । रजोनुवेधाभावेपि कार्योन्मुखत्वे हेतुं व्याकुर्वन्ति हर्षेणेत्यादि ॥ ३ ॥

पश्यन्तीत्यत्र । करणत्वेनेति । लोकरचनायां करणत्वेन, यतो लोकरचना ब्रह्माण्डेन जायत इति । अतो न पुरुषो नावतार इत्यर्थः । रूपमिति ।

१-३-४ करादिविशिष्टं रूपं व्यवहारयोग्यम् । साकारता चानन्दयोगात् । तथा च सदानन्दमित्यर्थः । सृष्टिजननमिति । गुदादिस्थानानां गुरुदेवैर्ग्रहणात् तत्र सृष्टिजननमुक्तम् । न नानात्वमिति । श्रोत्रातिरिक्तेन्द्रियाण्यपेक्ष्यापि न नानात्वम्, त्विन्द्रियस्यैव, सर्वत्र स्पर्शोपलब्धेरित्यर्थः । पादपदेन भुजपदेन चोपलक्षितं न

नानात्वमिति । तथा चासङ्ग्रहेप्यर्थादेव त्वगिन्द्रियमपि सिद्धमित्यर्थः । एवमेव शिष्टं कर्मेन्द्रियं बोध्यम् ॥ ४ ॥

१-३-५ एतन्नानेत्यत्र । जघनादय इति । ब्रह्मणोंशा जघनादयः, तेभ्योपि सृष्टिस्मरणात् ॥ ५ ॥

स एव प्रथममित्यत्र । स्मृत इति । अवतारत्वेन पञ्चरात्रस्मृतावुक्तः । अशुद्धशुद्धभावेनेति । शुद्धसत्त्वात्मकमिश्रसत्त्वात्मकभावेन । द्वैविध्यमिति
१-३-६ शेषः । द्विधेति । अवतारो द्विधा । परमिति अवतरणम् । नन्वत्राविशेषेण कथनादवतारावेशभेदः कुतो निश्चेय इत्यत आहुः तत्र निर्णय इत्यादि । नारायण इति । धर्मपुत्रः । कृष्णस्तापस इति । कूर्मपुराणादौ साम्बजननार्थं तपः कुर्वाणः । मनुरिति । स्वायंभुवः । कामकामपुत्रौ व्यूहरूपौ । नरो धर्मपुत्रः । विशेषावेशिन इत्यत्र विशेषपदं सूतादिव्यावृत्त्यर्थम्, कथावदनादिकाले तेष्वप्यावेशादिति । अविशेषेणेति । सङ्क्रमणतौल्येन, न तु कालविचारेणेत्यर्थः । तत्र गमकमाहुः स्फुटमिति । 'अन्ये चांशकला'इत्यत्र पदद्वयोक्त्या निर्णयात्तथेत्यर्थः ॥ ६ ॥

द्वितीयमित्यत्र । एतस्यावतारिका स्वर्गादावित्यादि । न भवेदिति । स्वर्गादेः कर्मभूमित्वाभावान्न भवेदित्यर्थः । द्वितीयस्कन्ध इति । सप्तमाध्याये ।
१-३-७ आदिवराह इत्यादि । एतच्च तृतीयस्कन्धे त्रयोदशाध्याये वर्तते । आदिस्तु सर्वेषां च कल्पानामाधिदैविकं रूपम् । 'स गतोर्मीशनिर्वाभिः एज्ञाव्यमाना रसां गते'ति वाक्यात् । अग्र इति । तृतीयस्कन्धत्रयोदशाध्याये । वराहकल्पे वराहजन्मदिने निर्मिते । विरोधेति । अत्र विराजो वाराहोत्पत्तिः, तत्र ब्रह्मण इति विरोधस्तत्परिहारम् । अत्र प्रथमद्वितीयादिशब्दो निर्देशमात्रापेक्षया श्रीधरीय उक्तः, तन्न, किन्तु हेत्वन्तरेणेति तं बोधयितुमाहुः अयं मन्युरूप इत्यादि । 'पशूनां वा एष मन्युर्यद्वराह' इति श्रुतेस्तद्रूप अश्वमेधादिरूपेण क्षत्रिये प्रतिष्ठित इति ब्राह्मणोत्तरभावित्वात् द्वितीयत्वमित्यर्थः । नारदस्य पूर्वभावित्वात् सङ्ख्या विरुध्यत इत्यत एवमुक्तम् । एवमग्रेपि बोद्धव्यम् ॥ ७ ॥

तृतीयमित्यत्र । इति तृतीयत्वमिति । अधिकरणकर्मणोरपेक्षतया तथेत्यर्थः ।
१-३-८ अधिकरणत्वस्य नारदेपि सत्त्वात् पक्षान्तरमाहुः द्रव्येत्यादि । तेनेति । परिचरणेन ॥ ८ ॥

तुर्ये धर्मकलेति श्लोकं व्याचक्षते । नरनारायणेत्यादि । अत्र तुरीयत्वोपपा-
१-३-९ दनाय ब्रह्मचर्येत्यादि फक्किकापेक्षिता, तदग्रे अथवेत्यादि । धर्माकरा इत्यत्र धर्मकलेत्येवं क्रमः पाठश्च प्रतिभाति । पक्षान्तरमुपपादयन्ति

श्रद्धेत्यादिना, द्विविध इत्यन्तैः । श्रद्धादयः स्वायंभुवदक्षसुताः धर्मपत्न्यस्ताश्च धर्मकलाः, 'अर्द्धो वा एष आत्मनो यत्पत्नी'ति श्रुतेः । द्विविध इति । भक्तियुक्त एकः, वैराग्ययुक्तोपर इति तथा । तथा च धर्मचातुर्विध्यात्तुरीयत्वमित्यर्थः । अन्यत्रेति । नात्र तद्विवक्षितमित्यर्थः । ज्ञानसाध्येति । सुखरूपा ।

१-३-११ तादृशमिति । कपीन् विषयात्मकान् लातीति । स्त्रीशूद्रयोः पापयोनित्वेन विषयात्मकत्वात् तयोर्हितमिति ज्ञापनाय कपिल इति नामेत्यर्थः ११

ततः सप्तम इत्यत्र । ब्राह्मणानां षड्विधत्वमिति । यद्यपि वाराहस्य क्षत्रिये प्रतिष्ठितत्वम्, तथापि प्राकट्यं ब्रह्मणः सकाशात् ब्रह्ममार्गेणेति
१-३१-२ सङ्ख्यापूर्तिः ॥ १२ ॥

अष्टम इत्यत्र । प्रतिपक्षशङ्कामिति । बुद्धावतारवद्वेदविरुद्धशङ्काम् । अन्त्याश्रमित्वाचेति । श्वेताश्वतरोपनिषदि अन्त्याश्रमः प्रसिद्धस्तद्वत्त्वाच ।
१-३-१३ चकारेण धैर्यात् । सर्वाश्रमनमस्कृतत्वे बीजमाहुः एषा हीत्यादिना।१३।

ऋषिभिरित्यत्र । कर्मद्वयस्येत्यादि । 'अकथितं चे'ति सूत्रेऽपादानादिविशेषैरविवक्षितस्य कर्मसंज्ञाविधानेष्वुदासीनस्य कर्मत्वादर्शनादकथितेपीप्सि-
१-३-१४ तत्वमिष्यते एव, अन्यथा योगस्यापि कर्मत्वेन ग्रहणापत्तेरतस्तथेत्यर्थः॥

रूपं स इत्यत्र । एकमिति । रूपम् । अपरमिति । वचनम् । विपरीतमिति । वैश्याद्विपरीतम् । वैश्ये हि रूपमवञ्चकं वचनं वञ्चकम् । मत्स्ये तु रूपं
१-३-१५ वञ्चकम्, वचनं मात्स्यकौर्मादिपुर्वेदरूपमवञ्चकमतस्तथेत्यर्थः। बाधित इति। कल्पसमाप्तौ दैनन्दिनप्रलयात् कल्पस्य च चतुर्दशमन्वन्तरात्मकत्वात् तत्समाप्तिश्चतुर्दशमन्वन्तरोत्तरं भवति । चाक्षुषस्तु षष्ठ इत्यतो बाधित इत्यर्थः । केचिदिति । श्रीधरादयः । क्रमनियमेनेति । वैवस्वतोत्तरं सावर्णिरौच्यभौत्यमेकसावर्णिकऋतुऋतुधामविष्वक्सेना मात्स्ये । तथैव 'सावर्णाः पञ्च रौच्यश्च भौत्यस्त्वागामिनस्त्वमी'ति मार्कण्डेये चान्येषां क्रमान्तरेण दर्शनात् । अधिकारिणामिति । भक्तत्वादिति शेषः । तथा चोक्तं मात्स्ये 'स्वकीर्तये सर्वमिदमुत्पाद्य सचराचरम् । कल्पक्षये विनिर्वृत्ते मुच्यन्ते ब्रह्मणा सहे'ति । तथापि चाक्षुषस्य चतुर्दशत्वे का वा युक्तिरित्यत आहुः कल्पेष्वित्यादि । तथा च सात्त्विके सात्त्विकमन्वन्तरस्य राजसे राजसस्येत्येवं साम्ये कदाचिद्राजसस्यापि साम्यात् चाक्षुषस्यापि चतुर्दशत्वमविरुद्धमित्यर्थः । मन्वन्तरान्तरे उत्पन्न इति । उत्पत्ताभसत्त्वादित्यर्थः । भाविनी संज्ञेति । वाग्दानोत्तरं विवाहाभावेपि स्नुषेतिवदित्यर्थः ॥१५॥

सुरासुराणामित्यत्र । ननु मत्स्यस्य वञ्चकहितकारित्वे मूले स्पष्टेन कूर्मस्येति कथमस्य वैश्यकोटौ निवेश इत्यत आहुः कापट्येनेत्यादि । कापट्ये-
१-३-१६ नेति । 'क्लेशभाजो भविष्यन्ति दैत्या यूयं फलग्रहा' इति बोधितेन । ननु

मत्स्यानतारं चाक्षुषे प्रलय उक्त्वा कूर्म एकादश उक्तः, ततश्च दशमत्वं मत्स्य आयाति, नवमसङ्ख्यासंदंशाच्च । ततश्च क्रमविचारे चाक्षुषमन्वन्तरीयस्य कूर्मस्य पाश्चात्यत्वात् पूर्वप्रलयो मायिक एव सेत्स्यति न वास्तवः, क्रमेण वायादिरयत आहुः पूर्वेत्यादि । तथा च कल्पान्तरे कूर्मावतार इति न प्रलयो मायिक इति भावः । वचनाधिक्यादिति। पूर्वमहिमुखग्रहणादिना तथात्वादित्यर्थः ॥ १६ ॥

धान्वन्तरमित्यत्र । धन्वन्तर्यवतारस्य किं प्रयोजनममृतपानादेर्मोहिन्यवतार-
कार्यत्वेनाष्टमे कथितत्वादित्याशंकायामाहुः धन्वन्तरीत्यादि । तथा
१-३-१७ चायुर्वेदप्रवर्तनादिकमेव प्रयोजनमित्यर्थः । स्फुटं तर्हि मकृते कुतो नोक्तमित्यत आहुः प्रकृत इत्यादि । आयुर्वेदस्य जीवार्थत्वेन तदवतारेऽनुपयोगात्तत्त्वेन स्फुटमुक्तमित्यर्थः । ननु पानकर्मत्वेनामृते वक्तव्ये देवा एव किमित्युक्ता इत्यपेक्षायामाहुः देवेत्यादि । न भगवत्कार्यमिति । तत्पानमिति शेषः । प्रयोजककर्त्रीति । पाययितरि मोहिनीरूपे । कर्मत्वेनेति । कर्तुरीप्सिततमत्वेनेति भावः । सर्वैर्न इत्यत इत्यत्र मानमाहुः सुरैरित्यादि । मूले 'मोहिन्याऽन्यानमोहय'दित्युक्त्वा देवानां मोहाभावात् तथेत्यर्थः । ननु मोहस्य भावजनकत्वेनोक्तत्वात्तदभाव एव सुराणामस्तु, स्त्रीरूपादर्शने किं मानमत आहुः राहुसूचनादिति । यदि चन्द्रार्काभ्यां स्त्रीरूपं दृष्टं स्यात्, तदा तस्यां राहुदण्डसामर्थ्याभावात्तस्यै सूचनमसङ्गतं स्यात्, अतस्तदन्यथानुपपत्तिरेव तथेत्यर्थः । नन्वेवं सत्येकमेव रूपमिति संख्याविरोध इत्यत आहुः अमृतेत्यादि । विच्छेदेनेति । विभागेन । तथा च धन्वन्तरिविभक्तत्वेन दैत्यैर्दर्शनात्संख्याया अविरोध इत्यर्थः ॥ १७ ॥

चतुर्दशमित्यत्र । नारायणवदिति । यथा नारायणः साक्षाद्भगवदवतारः, तथा
नृसिंह इत्यर्थः । स्वीयमिति । द्वारपालम् । तदीयमिति पुत्रम् ।
१-३-१८ ऊर्जितमिति । अवध्यत्वदर्पेण भिन्नमर्यादम् । ननु पुनर्मूलरूपनिरूपणेऽस्य किं प्रयोजनमित्याकांक्षायां तदाहुः भक्तिरित्यादि । मूलरूपे जातभक्तिर्मूलरूपानवच्छिन्ना अंशमात्रपर्यवसानेन निवर्तत इति ज्ञापनाय पुनस्तदुक्तिरित्यर्थः । कल्केर्मूलरूपत्वं कथमित्यत उपपत्तिमाहुः सायुज्य इत्यादि । भगवत्स्वरूपैश्वर्ये सेव्यसेवकभावनिवृत्तावपि भगवत्सामर्थ्येनैव पुनर्भेदाद्यथा सेवारम्भः, तथात्र सकलसाधननिवृत्तावपि भगवदङ्गरागसुगन्धसंसर्गमात्रेण पुनः कृतारम्भ इति तादृशसामर्थ्यमेव मूलत्वे हेतुरित्यर्थः ॥ १८ ॥

पञ्चदशमित्यत्र । धर्मस्येति । ऐश्वर्यस्येत्यर्थः । पूर्वस्मादिति । नृसिंहस्वरू
पात्पूर्वोक्तेभ्यश्चतुर्दशेभ्यो वा । इह परात्मान इति । इहलोकपर
१-३-१९ लोकदेहः ॥ १९ ॥

ततः सप्तदश इत्यत्र । (प्रकृत इति । ब्रह्मभावेन निरूपणे तृतीय इत्यर्थः) ।
१-३-२१ प्रमेयबलमालम्ब्येति । प्रमेयस्य यद्ब्रह्मरूपस्य बलं भुक्तिमुक्तिदातृत्वरूपमालम्ब्य विचार्येत्यर्थः । भक्त्यर्थमित्यनेनं प्रयोजनान्तरमुक्तम् । (अपरश्चेति । स्वशाखातिरिक्तो वेदभागः) ॥ २१ ॥

१-३-२३ एकोनविंश इत्यत्र । अत्र तकारलोप इति । विंशतिपशब्दे तमप्प्रत्ययतकारलोपः ॥ २३ ॥

(अथासावित्यत्र । आदिकूर्मस्येति । 'विलोक्य विघ्नेशविधिं तदेश्वरो दुरन्तवीर्यो वितथाभिसन्धिः । कृत्वा वपुः काच्छपमद्भुतं महत्प्रविश्य तोयं
१-३-२५ गिरिमुज्जहारे'त्यष्टमे पुरुषोत्तमस्योक्तः, तथापि भक्तिदानाद्यभावादादिकूर्मस्येति, स तु पञ्चमेऽष्टादशे 'हिरण्मयेऽपि भगवान्निवसति कूर्मतनुं बिभ्राण' इत्यादिना स्तुतोस्ति । विष्णोरिति । आयुर्वेदप्रणेतृत्वेन पालकत्वाद्विष्णोरित्यर्थः । एवमग्रेपि) ॥२५॥

एतद्रूपमित्यत्र । विचारमाहेति । ऊहापोहेन विवक्षितसाधनं विचारः । तथा चोहापोहेन तस्य भगवत्त्वशासनप्रकारमाहेत्यर्थः । रूपमिति । शरीरमित्यर्थः । तेनाधिदैवादिकवादो विशिष्टाद्वैतापरपर्यायोत्र ज्ञाप्यते, तदाहुः अरूपवदिति ।
१-३-३० अयं न्याय उत्तरतन्त्रे साधनाध्याये द्वितीयपाद उभयलिङ्गाधिकरणेऽस्ति, तदर्थस्तु—तद्ब्रह्म अरूपवदेव हि । रूप्यते निरूप्यते व्यवह्रियत इति रूपं सर्वव्यवहारविषयत्वं तद्युक्तं रूपवद्विश्वम्, ब्रह्म तु तद्विलक्षणमेव, कार्यांदशाच्च कारणस्यांशिनो वैलक्षण्यस्य युक्तत्वात् । ननु कारणरूपादवैलक्षण्यमपि युक्तमत आह । तत्प्रधानत्वात् । तस्य प्रकरणिनः प्रधानत्वात् । मुख्यत्वात् । यत्र हि यत् प्रतिपाद्यते, तत्र तदेव हि मुख्यम्, अत्र ब्रह्म प्रतिपाद्यत इति ब्रह्मधर्माः प्रशासनादय एव, नतु जडजीवधर्मा इति । अत्र शरीरप्रकरणाद्रूपपदेन शरीरमुच्यते । इदं चैकदेशिमतं सूत्राधिकारानुसारेणोच्यते, सिद्धान्ते त्वहिकुण्डलन्यायः । स तु मुख्यसिद्धान्ते वक्ष्यते । तस्या एवेति । जाता इत्यर्थः । नतु सात्र गुणमयी । निष्पादितमिति । मन्दिरवन्निष्पादितम् । सन्निहिन इत्यस्यैव व्याख्यानमाविर्भूत इत्यादि ॥ ३० ॥

यथा नभसीत्यत्र । तथा सतीति । ब्रह्मणो वह्निवदाविर्भूतत्वे सति । ततश्चेति । प्रतीतिविरोधात् । अयमिति । एतच्छरीरविशिष्टो भगवान् । तद्व्य-
१-३-३१ तिरिक्तस्येति । द्रष्टृव्यतिरिक्तस्य । कथमिति । अदृश्येऽध्यारोपासम्भवात्कथमित्यर्थः । वस्तुत इत्यादि । तथा चादृश्य आकाशे यथा मेघा आरोपिताः, तथा ब्रह्मशरीरे ब्रह्माण्डे दृश्यत्वमप्यारोपितम् । ततश्च यथा मेघद्रष्टृणामाकाशधर्मोऽवकाशो न प्रतीयते, तथा प्राकृतत्वेन द्रष्टृणां चेतनत्वमपि न प्रतीयत इति तदप्रत्ययमात्रेण भग-

चक्षुरनाविष्टत्वस्य न सिद्धिरित्यर्थः । ननु 'पराञ्चि खानी'ति श्रुतेर्भगवान् पराचामदृश्यः, आकाशस्तु केषाञ्चिन्मते पराचामपि दृश्य इति विरुद्धो दृष्टान्त इत्यत आहुः येषामित्यादि । तथा चाकाशेऽसम्भवद्धर्माणां वायुस्थितानामाकाशस्थत्वप्रतीतिवत्स्वविषयस्थितदृश्यत्वस्य ब्रह्मशरीरे प्रतीतिरित्यस्मिन्नंशे दृष्टान्त इत्यर्थः । तर्हि द्वितीयदृष्टान्तस्य किं प्रयोजनमत आहुः अत्रेत्यादि । अत्रेति । उक्तदृष्टान्ते । तथा नास्तीति । दार्ष्टान्तिकसमाना नास्ति । दृष्टान्ते ह्यदृश्यधर्मो दृश्ये आरोप्यते, दार्ष्टान्तिके तु दृश्यधर्मस्यादृश्ये आरोपो विवक्षित इत्यसमानता, तेनास्वरसेन दृष्टान्तान्तरमुच्यत इत्यर्थः । यथा वात्येत्यादि । वायुः सर्वपक्षेऽप्यदृश्यः, तत्र यथा पृथिव्या दृश्याया रेणुरारोपितस्तथेत्यर्थः । तथा च यदि वाचो धेनुत्ववत् भगवतो ब्रह्माण्डत्वेनोपासनार्थं ब्रह्माण्डं भगवत्यारोपितमित्यभिप्रेयात्, तदा द्रष्टरि दृश्यमारोपितमिति ब्रूयात् । ननु दृश्यमिति । तेन दृश्यत्वादिधर्मकं शरीरमारोपितमिति व्याख्यानं न युक्तम्, दृश्यपदे लक्षणाप्रसंगात् । जगृह इति भूतार्थवादस्य योजनधर्मीयदर्शनादेव बाधप्रसंगादित्यर्थः ॥ ३१ ॥

अतः परमित्यत्र । इति निरूपयतीति । इति वक्तुं भगवदुपाध्यन्तरं जीवं निरूपयतीत्यर्थः । वस्तुत्वादिति । चेष्टाद्यनुमेयवस्तुत्वात् । केचनेत्यादि ।
१-३-३२ श्रीधराद्याः । 'जीवो जीवेन निर्मुक्त' इत्यादौ जीवोपाधौ लिङ्गशरीरेऽपि जीवपदप्रयोगदर्शनाज्जीवपदेन लिङ्गशरीरं मन्यन्त इत्यर्थः । तत् दूषयन्ति तथेत्यादि । तथा सति भासाभासविवेकेन भगवानुपक्रान्तत्वात्भासः, जीवस्त्वनुपक्रान्तत्वादाभास इति तद्विचारेण तथेति नात्र लिङ्गशरीरमुच्यत इत्यर्थः । तथा च ब्रह्मणोंऽशतो लिङ्गशरीरसम्बन्धोऽनुचितो जीवतुल्यतामतिश्चेति भावः । पुनर्भव इति । अस्तीति शेषः । तथा च 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' इत्यादिना श्रुतौ लिङ्गभूतानामनूत्क्रमः श्राव्यते, न तूत्क्रमः, अत उत्क्रमणलिङ्गेनापि न जीवोपाधिरत्रोच्यत इति तथेत्यर्थः । भगवदुपाधिरिति । भगवतान्तर्यामिरूपेणोप समीपे धीयते पोष्यत इति तथा ॥ ३२ ॥

यत्रेयमित्यत्र । न निस्स्वभावत्वमिति । नासत्त्वम् । तस्याः पूर्वावस्थामाहुः यदेति । मतिरिति, विद्या । स्वाराज्यं करोतीति । इति विदुस्तत्त्वज्ञा इति शेषः । तथा च मायया विद्यारूपेण परिणामे जीवोऽयं
१-३-३४ जडोऽयमिति भेदबुद्धिर्गच्छति, तावता स्वरूपलाभोऽस्य भवतीत्यवतारकथायां शुभं फलमुक्तम् । सर्वं हरिरित्येतदर्थमिति । द्वितीयाध्याये 'सत्त्वं यद्ब्रह्मदर्शन'मित्यनेन सत्त्वस्याद्वारत्वेन ब्रह्मानुभवरूपत्वं यदुक्तमासीत्, तस्यानुभवस्याकारः 'सर्वं हरि'रिति, तत्प्रदर्शनार्थमित्यर्थः ॥ ३४ ॥

एवं जन्मानीत्यत्र । अन्यत्रापीति । अवतारान्तरेऽपि । उपदेशातिदेशयोरि-

त्यादि । उपदेशः प्राथमिकं कथनम्, अतिदेशस्तु अन्यत्र प्रसिद्धस्य
१-३-३५ धर्मस्यान्यत्र कार्यत्वेनाप्तिः । प्रकृते तु पुरुषावतारजन्मादिकथनमुपदेशः, 'एवं जन्मानी'त्यनेनान्यत्र तदतिदेशस्तयोः । को विशेष इति । अवतारकथाप्रश्नेन भगवत्त्वादेरपृष्टत्वात्तत्कथनस्य किं प्रयोजनमित्यर्थः । नास्तीति । 'न हि विरोध उभय'मिति वाक्यान्नास्तीत्यर्थः । अनेकविधो भवतीति । तेन मायिकरूपमायावादयोरप्येकदेशत्वेन संग्रहः, अथवा प्रेरणाविशेषरूपधर्मभेदादनेकविधो भवतीत्यर्थः ॥ ३५ ॥

स वा इत्यत्र । वर्णयन्तीति यदुक्तं तस्यैवाग्रिमश्लोकत्रयं प्रपञ्च इति बोधयन्ति कथं वर्णयन्तीत्यादि । तथा च जगत्कर्तृत्वादिना वर्णयन्ति ।
१-३-३६ सृजतीति । सर्गादिलीलाः । अमोघलील इति । स्वरूपं सृष्टिद्वारा च ज्ञायत इति बोध्यम् । ननु द्वितीयाध्याये 'स एवेद'मित्यादिना लीलानामुक्तत्वात्पुनस्तत्कथने प्रयोजनं तथा न दृश्यत इति षट्प्रश्नपूरणं च न जातमिति चारुच्योर्निवृत्तये पक्षान्तरमाहुः अथवेत्यादि । अत्र तच्छब्दः प्रसिद्धार्थविषयः, नतु प्रक्रान्तविषय इत्याशयेनाहुः पुरुषोत्तम इति । 'अतोऽस्मि लोके वेदे चे'ति वाक्यात् । अत्रापि पूर्वं 'कृष्णस्तु भगवान् स्वय'मिति कथनात्, अवसरस्यापि सत्त्वाच्च । इदमिति । परिदृश्यमाने विश्वत्वस्य । निवारित इति । समभिव्याहारेण भगवत्कृतपरिदृश्यमानयोर्विधेयत्वबोधनान्निवारितः । व्यर्था स्यादिति । फलासिद्ध्या तथा, नात्रानित्यत्वं जगतो भविष्यति, तत्कृता फलासिद्धिरपि तु भगवतीवाक्षरादिषु ह्यमोघलीलत्वं न भवतीति निष्फललीलया फलासिद्धिरिति भावः । हेतुमाहुः कार्येति । कालाक्षरपुरुषाणां स्यात् । लीलासेति । तेन सम्यक्स्फुरणमित्यर्थः । अन्येषामिति । अक्षरकालपुरुषाणां कार्यव्यापृतत्वेनेत्यर्थः । तथात्वेनेति । भोक्तृत्वेनेत्यर्थः । सज्जन्ते, भगवाँस्त्वभिचाकशीति, अतो न सज्जत इति जीवेभ्यो वैलक्षण्यम् । प्रमाणमिवेति । मूतः स्वानुभवं कथयन्नित्यर्थः । उक्तेति । तथा च देहेषु जीवानामध्यासः सम्बन्धः । न दृष्टसम्भव इति । न दृष्टे निरंकुशकारणत्वसम्भव इत्यर्थः । तदा भोगे दोष इति । अत्तीत्यनेन भोगस्याप्युक्तत्वात्समये भोगे जीवतुल्यत्वम् । अभावत्वापत्तिरित्याशंक्याहेति । क्षयादसत्त्वापत्तिरित्याशंक्य तदुभयाभावप्रकारमाहेत्यर्थः । भोग इति । जीवकर्तृकभोगः । तत्रेत्यादि । जीवकर्तृके भोगे । केवलानां धर्मरहितानां धर्मिणां ग्रहणं जीवैरशक्यम्, तथा च धर्मरहिता धर्मिणो धर्मिरहिता धर्माश्च भगवद्भोग्याः, इतरेतरसंसृष्टा गन्धवत्पुष्परूपा धर्मधर्मिणस्तु जीवभोग्या इति भोग्यभेद इत्यर्थः । प्रकारभेदमाहुः इन्द्रियाणामित्यादि । भोग इति । सर्वांशेन भोगः । जिघ्रतीत्यादि । तथा च गन्धमुपाददातीत्यर्थात्केवलधर्ममात्रं गृह्णातीत्यर्थः । लक्षणां वारयितुमाहुः लोक इत्यादि । इत्युक्तमिति । इतिहेतोर्जिघ्रतीत्युक्तम् । तथा च केवलधर्मग्रहणस्यानुभवसंवादित्वाय धर्मग्रहणबोधकः शब्दोऽत्र प्रयुक्तोऽतो न लाक्ष-

णिक इत्यर्थः । एवकारेण रसनादयो व्यवच्छिद्यन्ते, तत्र धर्मिणोपि ग्रहात् । पडिन्द्रियाणां वर्गत्वं साधयित्वा तद्विषयाणां तावत्त्वं बोधयन्ति अष्टाविंशतीत्यादि। अष्टाविंशतिभेदानीति पाठे तत्त्वानीति शेषः । तेषु भगवद्भोग्यमाहुः तेषां रसानिति। सारभूतानंशान्। तथा च प्रकारभेदान्न जीववत्तुल्यत्वम्, भोग्यभेदान्न क्षय इत्यर्थः। जीवानामेकदेशसम्बन्धे हेतुमाहुः ज्ञानसहितानामित्यादि । मुख्यतया मनोग्राह्यं ज्ञानमेवेत्यतो रूपादीनां तत्साहित्यमत्रोक्तम् । तदधीनत्वमिति । ईश एव रसाधीन इत्यर्थः । एवं चास्मिञ्श्लोके प्रथमावतरणिकोक्तं वर्णनं लीला च प्रतिपादिता । द्वितीयपक्षे तु रसभोगात्मकमवतारप्रयोजनमुक्तं ज्ञेयम् ॥ ३५ ॥

न चास्येत्यत्र । वस्तुतस्त्विति । 'अविज्ञातं विजानता'मितिश्रुतेरित्यर्थः । स्वतः आम्रादयः कर्कटीविशेषप्रभृतयः अधिकरणतः श्वदतौ भृतं दुग्धादि,
१-२-३७ अधिकारिभेदेन कीटादिदूषितान्नादि । द्वितीयापि कोटिरिति । नानुभूयन्त इति कोटिः। तथा च साकारव्यापकत्वाद्रूपान्तरेणानुभूयन्ते, नतु स्वेनेत्यर्थः। प्रमाणान्तरस्येति । 'यस्य ब्रह्म च क्षत्रं चे'ति शब्दादतिरिक्तस्य । तथा च कालरूपेण ब्रह्मक्षत्रादि भुनक्ति, नतु स्वयमिति भावः । कस्मै प्रयोजनायेत्यादि । 'अर्वाग्देवा अस्य विसर्जनेनाथ को वेद यत आबभूवे'ति श्रुतेरित्यर्थः । कौशल्येति । ब्राह्मणादेराकृतिगणत्वात्ष्यञ् । कौशलेनेति वा पाठः । ऊतीरिति । ऊतयः कर्मवासनाः कर्माभिव्यंग्या दृष्टरूपा इत्यर्थः । निपातेत्यादि । ऊतियूतीत्यादिना ऊतिशब्दो निपातितः, तत्र यथा उशब्द इति धातोरपूर्वस्य क्तिनि ऊतिरिति भवति ज्वरत्वरेत्यूठ् अवते रूपं तथापि नितरां विचारात्पातनादज्ञानं तद्भेदानां प्रेमपरवशतां वा द्योतयत्ययं ग्रन्थः। अथवा लीलापदं स्वरूपदं वा परितःज्योतिरिदं प्रयुक्तं कर्मवासनावान्तरभेदा न ज्ञायन्ते यथा, तथा भगवतोऽपीति बोधयति। अथवा। सूत्रकृता स्वरप्रक्रियायामूतिरुदात्त इत्यनुक्तान पठिता सूत्रकृदादिमते प्रकृतिप्रत्ययभेदाज्ञानं द्योतयति तद्वदित्यर्थः। विस्तारयत इति । तथा च वेदादीनामप्यर्वाचीनतया न तैरपि ज्ञायते इत्यज्ञाने हेतुरित्यर्थः। चतुर्भिरिति । धातृपदसूचितार्वाचीनत्वजन्तुत्वकुमनीषित्वाज्ञत्वैः । अत्रापि यथायथं स्वरूपाज्ञानं कथं करोति, किमर्थं वा करोति, कथं किमर्थं वा जिघ्रतीति भोगादिप्रकाराज्ञानं चोक्तं ज्ञेयम् ॥ ३७ ॥

स वेदेत्यत्र । ननु धातृत्वादज्ञानेऽपि कार्यलिङ्गकानुमानेन ज्ञातो भविष्यतीत्यत आहुः कार्यं तु लौकिकमिति । 'कर्मगुणप्रवाह' इति वाक्यात्कार्यं
१-२-३८ लोकान्तःपाति, अतो यथाकथञ्चिज्ज्ञापकम्, नतु वस्तुत इदमित्थंतनमनकमित्यर्थः । तर्हि कथं ज्ञानमित्याकांक्षायां तदुपायमाहुः तदित्यादि । तत्कार्य

मार्गपरिज्ञाने सति ज्ञापकं भवतीति शेषः। तन्मार्गेति । अनेन पदवीपदप्रयोगतात्पर्यमुक्तं भवति। मार्गो भक्तिः । कथमेवमित्यपेक्षायां तत्प्रकारमाहुः समेत्यादि । सहभावादिति । गतिसहभावात् । तथा च गत्याधारभूतो मार्गः कार्यभूत इति गतिज्ञाने तदाधारभूतकार्यतत्त्वज्ञानं भवति, तेन ज्ञानेन धूममितया वह्नेरिव भगवतो ज्ञानं भवतीति तदर्थं गतिः मार्गपदवीपदोक्तो ज्ञातुमावश्यकमित्यर्थः । मन आदौ भगवत आविर्भावे तत्प्राप्तिरित्यर्थः । ननु विवर्ते मन आदौ आविर्भूतमपि तथेति किमनेनेत्यत आहुः बुद्ध्येति । बुद्ध्या सहभावं प्राप्य कार्याणां तत्त्वं परमार्थतत्त्वं ज्ञायेनेत्यर्थः । तस्येत्यादि । 'धातुः पदवीं वेदे'त्यस्य तात्पर्यम् । प्रमाणाज्ञानभाव इति । प्रमाणैरज्ञानसत्तायामित्यर्थः । ननु वैकुण्ठादिस्थैर्ज्ञातो भगवानुपदेष्टव्य इति वक्तुमाहुः कदाचिदिति। न समाप्यत इति । तथा चातिवेगवशान्मनोवत्साकारोऽपि न ज्ञायतेऽप्यधिकाराभावाच नोपदिश्यत इत्यर्थः। प्रलय एवेति । जगदनुकूलक्रियाभावात्प्रलय इत्यर्थः । ननु गतिज्ञानाय किमिति साधनोपदेशः, 'गतिर्वेव' इतिवाक्यात्कालस्य गतित्वेन तस्यैव गत्यन्तरस्याप्यनुमानेन शक्यज्ञानत्वादित्यत आहुः किञ्चेत्यादि । तथा च कालोऽपि दुर्ज्ञेयश्चेत्तद्दृष्टान्तेन गत्यन्तरज्ञानं दुर्घटमिति साधनोपदेश आवश्यक एवेत्यर्थः । कालस्य दुर्ज्ञेयत्वं तु ब्रह्मपुराणोपान्त्ये मायानुकीर्तनाध्याये द्रष्टव्यम् । अथवा । कालरूपदृष्टान्ताभावादेव न तद्ज्ञानमित्यर्थः । कालशब्दाभिजप्यस्य सत्त्वात्पक्षान्तरमाहुः अथवेति । हस्तेत्यादि । लोके तथा प्रसिद्धिः । अवयवित्वेन हस्ताधारो विरुद्धधर्मवत्त्वज्ञापनायेदम् । शकटस्थैरिति । शकटं जगत् । गतीति । मायाज्ञानपक्षाद्भात इत्यर्थः । बोधिताविति । सन्ततानुवृत्तिपदाभ्यां बोधितौ ।चरणेति । यस्तत्पादसरोजगन्धं भजेत, स तत्पदवीं वेदेति तथा। लोकेऽप्येवम् । स चेति । 'स वेदे'त्यादेरर्थः । भक्तिपक्षे त्वित्यादि । अस्मिन्पक्षे परोक्षवाद इति लक्षणा न दोषायेति ज्ञेयम् । भक्तिमार्ग इति । 'भवत्पदाम्भोरुहनाव'-मित्यत्र व्याख्यातः ॥ ३८ ॥

अथेत्यत्र । हीनमपीति । सूतम् । 'यानि वेदविदां श्रेष्ठ' इत्यत्र, 'कथायां सक्षणा हरे'रित्यत्र च सिध्यति । एवं प्रकार इति । धन्यत्वस्येत्यर्थात् ।

२-३-३९ मूलस्थसर्वात्मकपदे ऐकान्तिकमित्यर्थः श्रीधरीये व्याख्यातः, अत्र तु सर्वात्मक इति सप्तम्यन्तं वेदान्तवेद्यतां चेत्यनेन व्याख्यातम् । सर्वात्मक एव वेदान्तवेद्यता, आकाशादिपदानां श्रवणात् । तथा च सर्वात्मक आत्मभाव मिति पाठः । सुदृढेति । वेदान्तवेद्य एव सुदृढत्वेन इति बोधार्थम् । प्रयुज्येति । तथा चात्मनि भाव आत्मभाव इति समासे एकदेशान्वयः सप्तम्यन्तानाम् । पुनः शब्दार्थ इति । अर्थैक्यात्पुनःशब्दः ॥ ३९ ॥

१-३-४० इदमित्यत्र । जातिशब्द इति । पुराणत्वं जातिरित्यर्थः ॥ ४० ॥

निःश्रेयसायेत्यत्र । लक्ष्म्या इति । लक्ष्म्याः श्रवणात् । भागवते भगवतः श्रवण-
मार्शक्याहुः सर्वगताया इति । तथा च भगवच्छ्रवणेऽपि लक्ष्मीश्रवण-
१-३-४१ मिति भावः । कथं कल्याणहेतुत्वं लक्ष्म्याः श्रवणस्येत्यत आहुः
भक्ताया इति । तथा च भक्तायाः श्रवणाद्भक्त्या कल्याणमित्यर्थः । स्वत इति । 'सारं
सारं समुद्धृत'मितिश्लोकात् । गुणत इति । वास्तववस्तुवेद्यत्वतः । अर्थत इति । अर्थो
हि भगवान्ततः ॥ ४१ ॥

१-३-४३ कृष्ण इत्यत्र । स्थिन इति । धर्मे स्थिते धर्मस्य शरणचिन्ता ॥४३॥
तत्रेत्यत्र । पूरितवानिति । भगवद्रसेन शुकं पूरितवान् ।

१-३-४४ अहं चेत्यत्र । यस्येति । श्रीभागवतस्येत्यर्थः ॥

इति श्रीप्रथमस्कन्धे सुबोधिनीप्रकाशे तृतीयाध्यायविवरणम् ॥ ३ ॥

अथ चतुर्थाध्यायविवरणम् ।

अथ चतुर्थाध्यायं विवरिषवः पूर्वप्रकरणस्य समाप्तत्वादग्रिमस्य प्रारप्स्यमा-णत्वात्तयोः पूर्वापरीभावे हेतुं स्फुटीकर्तुं द्वयोरर्थमाहुः एवमित्यादि । स्वाधिकारत इति । ल्यब्लोपे पञ्चमी, स्वाधिकारमाश्रित्येत्यर्थः । त्रिभिरिति । अध्यायैः । त्याज्य-समत्वत इति । अदृष्टद्वारेणोपकारी धर्मः । फलव्यभिचारित्वात्त्याज्यः, तस्यात्रापि तेन रूपेण तुल्यत्वात् । शास्त्रमिति । उपदेशः । त्याज्यसाम्यादत्र प्रथमत्वं वा अवता-रादुत्तमत्वं वा वक्तव्यम्, न तु मध्यमत्वमित्याशङ्क्य मध्यमत्व उपपत्तिमाहुःनारदेत्यादि । नारं नरसम्बन्धिज्ञानं ददातीति नारदः इति निरुक्त्या ज्ञानदाने नारदस्याधिकारो ज्ञेयः । स चाध्यायसमाप्तौ स्फुटिष्यति । तथा चोत्तमत्वस्यौचित्येप्युक्तहेतुभ्यां मध्यमत्वमित्यर्थः । एतेन पूर्वापरीभावे हेतुरप्युक्त एव । तेन व्यासोक्तिविचारे प्रसङ्गः सङ्गतिः स्फुटति । अतः-परं सूतोक्तौ सङ्गतिं वदिष्यन्तोऽध्यायार्थमाहुः तत्रेत्यादि । हेतुर्वैराग्यम् । 'तस्य पुत्रो' 'दृष्ट्वानुयान्त'मित्यादिभिः शुकस्यापि विरक्ततावोधनात् स्वापेक्षयाप्यस्योत्कृष्टत्वाच्च तत्कथाया मध्यमत्वं तत्रापि स्फुटतीति तद्विचारेपि स एवार्थ इत्यर्थः ।

इतीत्यत्र । पृच्छन्तीत्याह । व्यास इति । एतेन प्रसङ्गः प्रश्नः सङ्गतिरित्युक्तम् ।
१-४-१ पृष्ट इति भावेक्तः ॥ १ ॥

सूत सूतेत्यत्र । निर्धारणादित्यादि । 'न निर्धारणे'ति सूत्रेण समासनिषे-
१-४-२ धात्तथेत्यर्थः ॥ २ ॥

---

१ शुकस्याविरक्तेति पाठ. । २ आयास इत्यत्र व्यास इति पाठः उचितः ।

कस्मिन् युग इत्यत्र । हेतुनेति । निमित्तेन प्रयोजकेन च । उदाहरणेन तं
स्फुटीकुर्वन्ति यथेत्यादि । श्रीभागवतप्रवृत्तौ चित्तवैयग्र्यं निमित्तं तद-
१-४-३ भावः प्रयोजक इति । भवत्विति । प्रेरणं भवतु, तथापि प्रेरकः कुतः
प्रेरितवानित्यर्थः । एक इति । प्रेरकप्रश्नः ॥ ३ ॥

तस्य पुत्र इत्यत्र । स्वप्नदृष्टेत्यादि । इदं ब्रह्मवित्त्वपोषकम् । ब्रह्मविदः स्वप्ना-
भावस्य तृतीयस्कन्धनिबन्ध उपपादितत्वात् श्रुत्युक्तासु हिताख्यासु
१-४-४ नाडीषु जीवस्येन्द्रियैः सह प्रवेशे 'तत्रैनं घ्नन्तीव जिनन्तीवे'त्यादि-
श्रुत्युक्तानि यानि स्वप्नदृष्टान्यरिष्टानि तान्यपि 'मन एव मनुष्याणां पूर्वरूपाणि शंसति।
भविष्याणि च भद्रं ते' इति वाक्याद्भूतभावीन्येव, तथा तेषां ज्ञाने तन्निवृत्त्यपेक्षा स्यात्,
जाते ज्ञाने तु मूलाविद्यानाशात् तदाधिभौतिक्या निद्राया अपि निवृत्तेर्मनसा तेषामशं-
सने तन्निवृत्तिज्ञानात् तदपेक्षारहित इत्यर्थः ॥ ४ ॥

कथमित्यस्याभासे । कथयतीति न मन्तव्यमिति । कथयतीति सम्भवति,
तथापि न मन्तव्यमित्यर्थः । विवृतौ । बहिःस्थैर्यादिनेति । बाह्यायां
१-४-६ स्थिरचेष्टायाम् ॥ ६ ॥

१-४-७ कथं वेत्यस्याभासः । अस्तु वा नगर इत्यादि ॥ ७ ॥

स गोदोहनेत्यत्र । अस्तु वेति । संवाद इति शेषः । तीर्थीकरणप्रयोजनमाहुः
तथेत्यादिना । तथेति । यथेदानीमतिप्रवृत्तिनिष्ठा, तथेत्यर्थः । सङ्ग-
१-४-८ दोषादिति । 'गृहेष्वि'त्यनेन सूचितात् । धर्मदोहार्थमिति । अग्निहो-
त्रोपयोगिदोहार्थम् ॥ ८ ॥

शिवाय लोकस्येत्यत्र । पराश्रयमिति । परेषां शरणभूतम् । निर्वेदहेतुरित्यादि ।
राज्ञां वृत्तिं करादानदण्डशुल्कादिदारुणाम् । मन्यमानो दीर्घसत्र-
१-४-१२ व्याजेन विससर्ज हे'तिवत् स त्यक्तव्य इत्यर्थः । ननु राजधर्मस्यापि द्विप-
क्षयजनकत्वादस्ति निर्वेदहेतुत्वमिति चेत्, तत्राहुः कस्येत्यादि । हेतुत्वमिति । निर्वेद-
हेतुत्वम् । तथा च तद्विचारेपि शस्त्रसंन्यास उचितः, न तु देहत्याग इत्यर्थः । देहस्या-
त्याज्यत्वे हेतुमाहुः कल इत्यादि ॥ १२ ॥

द्वापर इत्यत्र । कर्तृप्रश्ने सपरिकरः कर्ता वक्तव्यः, न तु तज्जन्मापीतिशङ्कायां
जन्मकथनप्रयोजनमाहुः भागवतेत्यादि । ब्रह्मकल्पस्येत्यादि ।
१-४-१४ अत्रायमाशयः । मूले 'तृतीये युगपर्यय' इति कथनादष्टाविंशतिपर्या
यद्वापरस्य निवृत्तौ तत्रोत्पन्नायाः सत्यवत्या एतन्मन्वन्तरीयतृतीयपर्यायद्वापरेऽभावात्

तस्यापि निवृत्तौ तस्याः सोमवंशीयत्वेन तद्वहितमन्वन्तराणामपि निवृत्तावेतत्कल्पस्यैव निवृत्तेर्भूतस्य कल्पान्तरस्यावश्यं मृग्यत्वात् तस्मिन् विचार्यमाणे रजोगुणस्यैव प्रथमं क्षोभात् 'प्रथमः कल्पो राजस' इति ब्रह्मकल्पस्य राजसत्वे 'चाक्षुषो दधिसम्प्लव' इत्यत्रोक्तन्यायेन तत्र राजसमन्वन्तरप्राथम्ये प्राप्ते, तत्र सूर्याद्यपेक्षासत्त्वात् 'मृतेण्ड एष एतस्मिन् यद्भूत्ततो मार्तण्ड' इति निरुक्त्या जगतोऽग्निषोमात्मकत्वेन च सोमस्यापि तदा सत्त्वेन तद्वंशे जाते तृतीयपर्यायद्वापर एव सत्यवत्या उत्पत्तौ वक्ष्यमाणयुक्त्या पराशरस्यापि तदानीं सत्त्वात् तृतीयपर्यावृत्तौ व्यासजन्मेत्यर्थः । तृतीय इत्यादिकथनस्य प्रयोजनमाहुः प्रथममित्यादि । तथा च भक्तिप्रचारार्थत्वात्तृतीये पर्याये जन्मेति भावः । माध्वास्तु 'अधीतवान् द्वापरादा'वित्यस्य व्याख्याने 'व्यासः षट्शतवर्षीयो धृतराष्ट्रमजीजन'दिति वाक्यादस्मिन् कल्पे व्यासजन्माहुः । द्वापरस्य तात्पर्यमाहुः तथापीत्यादि । धर्माणां बाधकत्वादिति । कृतत्रेतयोर्धर्मसन्देहाभावेनासन्दिग्धतया क्रियमाणानां तेषां भक्तिबोधकत्वात् । द्विपरतायां सन्देह इति । 'द्वापरौ युगसंशया'विति कोशात् द्वापरशब्द उभयार्थः, प्रकृते शक्तिनियन्त्रणाभावादेकयोक्त्या पुष्पवच्छब्दवदुभयं वक्ति । द्विपरता तूक्ता मात्स्ये 'द्वैधमुत्पद्यते चैव युगे तस्मिन् श्रुतौ स्मृता'वित्यादिना । एवञ्च द्वापरान्ते व्यासावतार आयाति, तदाहुः सर्वेषामिति । ऋषीणाम् । एवं जन्मकालस्वरूपं निर्णीयाधिकरणस्वरूपमाहुः पराशरस्येत्यादि । पुराणान्तरेष्विति । विष्णुपुराणादिषु । मातुर्भक्तत्वायाहुः उपरीत्यादि । उपरिचरस्य वैष्णवत्वं मात्स्य एव प्रसिद्धम् । बीजधर्मयुक्तेति । वैष्णवत्वयुक्ता । तथा चैतयोरेतादृशत्वात्तत्र व्यासावतार इत्यर्थः । ज्ञानस्य त्विति । प्रवृत्तिरिति शेषः । प्रयोजनमिति । अवतारप्रयोजनम् ॥ १४ ॥

स कदाचिदित्यत्र । प्रासङ्गिकमिति । अवतारकार्यम् । अनेनेति । पापपराजितसरस्वतीजलोपस्पर्शनेन । पुण्यनक्षत्रस्येत्यादि । 'यत्पुण्यं नक्षत्र'-
१-४-१५ मित्यत्र श्रुतौ आदिमजघन्यपुण्यनक्षत्राङ्कितमार्गे यावत्सूर्यगतिः, तावत्कालस्य पुण्याहरूपस्य ज्ञापकं कालगुणा आर्तवास्तेषां च ज्ञापकमित्यर्थः ॥ १५ ॥

परावरेत्यत्र । अवतार इति । व्यासावतारः । व्यतिकरशब्दस्य नाशे प्रसि-
द्ध्यभावात् पक्षान्तरमाहुः अनधीत्यादि । तथा चानधिकारसम्मि-
१-४-१६ श्रणमित्यर्थेऽङ्गीकृतेऽर्थादेव नाशप्राप्तिरित्यर्थः ॥ १६ ॥
१-४-१७ अश्रद्दधानानित्यत्र । इत्याहेति । 'हसितायुष' इति विशेषणमाहेत्यर्थः ।

चातुर्होत्रमित्यत्र । ननु कालकृते दोषे तदधीनस्य यज्ञस्य कथं सर्वहितकरत्व-
मित्यत आहुः आर्षेत्यादि । तथापि मन्दबोधनाय तामाहुः युक्तिरिति ।
१-४-१९ तदुभयात्मकत्वादिति । 'स विष्णवाख्योऽधियज्ञोऽसौ कालः कल्प्यतां

१ नक्षत्रान्दिकेति पाठः ।

वर' इतिवाक्यादित्यर्थः । स चेति । यज्ञश्च । 'यज्ञो वै विष्णु'रिति श्रुतेः । तथा च प्रमाणतः प्रमेयतश्च यज्ञस्य बलिष्ठत्वं युक्तिरित्यर्थः । सर्ववेदैकवाक्यतामित्यादि । यज्ञस्य सर्ववेदार्थतां वक्तुं यज्ञस्य स्वरूपमाहेत्यर्थः । त इति, अध्वर्यूद्गातृहोतृब्रह्माणः । एवं व्याख्याने सोममात्रप्रतिपादकत्वं स्यात्, नत्वग्निहोत्रादिप्रतिपादकत्वमपीत्यरुच्या पक्षान्तरमाहुः अथवेत्यादि । 'चित्तिः स्रु'गित्यादिः 'सामाध्वर्यु'रित्यन्तो दशहोतृमन्त्रः । 'पृथिवी होते'त्यादि'रूपवक्ते'त्यन्तश्चतुर्होत्राख्यः । 'अग्निर्होते'त्या'द्युपवक्ते'त्यन्तः पञ्चहोत्राख्यः । 'सूर्यं ते चक्षु'रित्यादिः 'शरीरे'रित्यन्तः 'वाग्घोते'त्यादि 'जुहोमी'त्यन्तश्चेति द्वौ षड्ढोतृमन्त्रौ । 'महाहवि'रित्यादिरुद्गातान्तो मन्त्रः सप्तहोत्राख्यः । एतेषां मन्त्राणां यज्ञहेतुत्वं चातुर्होतृशब्दवाच्यत्वं च ब्राह्मणे दर्शितम् । 'चतुर्होतृभ्योधियज्ञो निर्मित' इत्यादिना । 'त्वं वै मे हूतः प्रत्यश्रौषी'रित्यादि च तत्र हि ।' तदेतदभिसन्धायोक्तं ते अग्निहोत्रादीनां मूलमिति । ननु कर्मणस्त्रिक्षणावस्थायित्वनियमदर्शनात् प्रत्यक्षविरोध इत्यत आहुः कर्मेति । नामधेयमित्यादि । तथा च स्वरूपस्य भेदान्न तस्य तथात्वम् । लौकिकक्रियायां तु तदभिव्यञ्जकत्वेन यागादिप्रयोगो भाक्त इत्यदोषः । अक्रूरतयेति । तत्तद्यागप्रकरणभेदेनामिश्रतया । एवं सति पञ्चविधत्वं स्यात्, ततश्च चतुर्विधपदं विरुध्येतेति पक्षान्तरमाहुः अभिन्नेत्यादि ॥ १९ ॥

१-४-२० ऋग्यजुरित्यत्र । वेदशब्देत्यादि । वेदानां लक्षणमेवं ज्ञेयम् । सच्छन्दस्कं वाक्यं ऋक्, तद्भूयिष्ठो वेदः ऋग्वेदः । एवमग्रेपि । तद्रहितं यजुः । गानमयुक्तमुभयं साम । वेदत्रितयभिन्नो वेदोऽथर्व इति । तस्यैभ्य एव निर्गतत्वात् पृथग्लक्षणं प्रसिद्धं नास्ति ॥ २० ॥

१-४-२१ तत्रेत्यत्र । ननु धर्मस्य चोदनालक्षणत्वात्तस्याश्च यजुर्वेदसिद्धत्वात् पूर्वं यजुर्वेदः कुतो नोक्तः, किञ्च, विभागोक्तौ ऋग्यजुःसामेति क्रमः, अत्र तु 'ऋक्सामयजुषा'मिति विरोध इत्यत आहुः अत्र त्वित्यादि । तथा च 'आदित्यो वा एष एतन्मण्डल' मित्यत्र ऋक्सामयजुषामेव क्रम उक्त इति तं मन्त्रक्रममादायात्र तथोक्तमित्यर्थः ॥ २१ ॥

१-४-२३ त एत इत्यत्र । खण्डशो व्यास इति । खण्डशो विस्तारे ।

१-४-२४ त एव वेदा इत्यत्र । लक्षणैः समानादिभिरिति । लक्षणैः प्रातिशाख्यग्रन्थैस्तत्रोक्तैः समानादिभिरित्यर्थः । व्यासत्वादिति । तदर्थमधिकारित्वात् ॥ २४ ॥

स्त्रीशूद्रेत्यत्र । अवीरवतीनामिति । पतिपुत्रहीनानाम् । अस्मिन्नर्थ इति ।

मनसि विचारित एवार्थ इत्यर्थः । ननु त्रयीसाध्यस्य फलस्य भारतेन
१-४-२५ कथं सिद्धिरित्याकाङ्क्षायामेवंपदोक्तं विचारितप्रकारमाहुः यद्यपीत्यादि । अर्धलौकिकन्यायेन भट्टेष्विति । भट्टमते यथा लौकिकक्रियारूपस्य यागस्यापूर्वरूपालौकिकव्यापारवत्तयार्धलौकिकत्वम्, तथा पुराणेषु भारते च सर्वाधिकारिकत्वाद्वेदव्याख्यानरूपत्वाच्च तथेति तेन न्यायेनेत्यर्थः । अन्यार्थमिति । प्रकथनार्थम् । तथात्वावगतिरिति । अलौकिकत्वावगतिः ॥ २५ ॥

एवं प्रवृत्तस्येत्यत्र । वेदव्यास इति । भारतरूपे वेदव्याख्याने । श्रीधरोक्तं व्याख्यानं सङ्गृह्णन्ते अथवेत्यादि । तथा च सर्वप्रकारेण (दया) यथा
१-४-२६ कृता, तथा अत्रानुक्ता अपि धर्मस्य प्रकारास्तदर्थं कृता इति धर्मस्यैव सर्वात्मकत्वमिति भावः ॥ २६ ॥

नातिप्रसीदद्दित्यत्र । अधिकारित्वादित्यादि । यो हि यत्राधिकृतः, तस्य पूर्णे स्वकार्ये निष्पन्ने तोष इति तदभावात्फलाभाव इत्यर्थः । महा-
१-४-२७ धिकारित्वादिति । एकान्तस्थित्यभावे धर्मादिप्रश्नकर्तॄणां बहूनामागमनादिना वैयग्र्यापत्तेरितिभावः ॥ २७ ॥

भारतव्यपदेशेनेत्यत्र । कल्पसूत्रवन्मुख्यवेदार्थप्रतिपादकत्वे शूद्रादीनां द्रष्टृत्वं न स्यात्, अन्यप्रतिपादकत्वे आम्नायार्थदर्शकत्वं भारते न स्यादित्युभ-
१-४-२९ यसामञ्जस्यार्थं यादृशो धर्मो, भारते प्रतिपादितस्तमाहुः आम्नाय इत्यादिना । तथा चातएवार्धालौकिकत्वं तदुक्तधर्मस्येति भावः ॥ २९ ॥

अथापीत्यत्र । फलव्यभिचारमुपपादयन्ति आत्मनामित्यादि । अयमर्थः । सत्त्वशुद्धौ कैवल्यस्फूर्तेस्तदभावे भेदस्फुरणाद्देहाद्युपाधिभेदमादायात्मनां
१-४-३० भेदं मन्यते । तथा च देह इत्यादिप्रयोगेण सर्वात्मभावतिरोभावो ज्ञाप्यते । तेन फलव्यभिचार उपपन्न इति भावः । देहत्व उपपत्तिमाहुः ब्राह्मणेत्यादि । नन्वात्मनो देहत्वं देहात्मस्फूर्तौ, व्यासस्य तु योगित्वात् तदभाव इति कथमियमुक्तिरित्यत आहुः मानसश्च योगीति । मनसि साधुर्मानसः । तथा च योगिनो मानसत्वेन योगिमतेपि पुरुषभेदाङ्गीकारात् ततोपि न सर्वात्मभाव इति भावः । तन्मतेपि पुरुषाणां व्यापकत्वाद्विवक्षितो भेदो नोपपन्न इत्यरुच्या पक्षान्तरमाहुः अत्रेत्यादि । श्रौतविचारे अन्नांशभेदान्नैयायिकविचारे द्रव्यान्तरत्वान्मनसो भेद इति तमुपाधीकृत्य वा आत्मभेद इत्यर्थः । एवमप्येकस्यात्मन एकस्यैव मनस उपाधित्वा'न्मे देह' इति स्वस्य देहाद्भेदो न सङ्गच्छत इत्यतः पक्षद्वयमन्यदाहुः अध्यासेनेत्यादि । अग्निवत्सङ्क्रमणं नाम चिदात्मनस्तत्तद्वृत्त्युपारोहः । तथा सति तत्तद्वृत्तिभेदात्सङ्क्रान्तस्यापि भेद इति प्रयोगोपपत्ति-

रित्यर्थः । तत्रेति, देहे । तथास्फुरणादिति । असम्पन्नस्वस्फुरणात् । स्वस्मिन्निति । मे इत्यनेनोक्ते सङ्घातरूपात्मनि । ब्रह्मवर्चस्येनेति । 'ब्रह्मवर्चसादुपसङ्ख्यान'मिति वार्तिकेन निमित्तार्थे यत् । निमित्तं चात्र संयोगः । तथा च वेदाध्ययनाध्यापनाद्युत्कर्ष-जन्या चेतनकान्तिर्ब्रह्मवर्चसं तत्संयोगेनेत्यर्थः ॥ ३० ॥

किं वेत्यत्र । त एवेत्यत्र त इत्यनेन धर्मा एवोच्यन्ते, न तु सन्निहिता अपि
१-४-३१ परमहंसा इत्याहुः यदीत्यादि । पारम्पर्यादक्षरनिष्ठत्वाद्गौणता, न तु
मुख्यत्वम् । तथा च तेष्वच्युतप्रियत्वस्यासम्भवान्मूलविरोधः स्यादिति
तच्छब्दस्य व्यवहितपरामर्शित्वमेव युक्तमित्यर्थः ॥ ३१ ॥

आश्रमपदप्रयोग इति । परमहंसपदप्रयोगः । ननुभागवतधर्माणां सर्वाधिकार-
त्वात् कथं परमहंसपदप्रयोग इत्यत आहुः मुख्येत्यादि । एतादृश-
१-४-३२ इति । योग्याज्ञानदानरूपे । तस्येत्यत्र । कथमिति । किमर्थमित्यर्थः ।
न विरोध इति । पश्चाज्ज्ञानेन कथनान्न विरोधः ॥ ३२ ॥

तमित्यत्र । साकाङ्क्षस्येति । खेदनिवृत्तिसाकाङ्क्षस्य । अभिज्ञायास्त्रिविधं स्वरू-
पमाहुः नारदेत्यादि । स्व इति । आत्मीयः । अत्रेति । उक्तविधे
१-४-३३ खेदे । अलौकिकमिति । अदृष्टार्थम् ॥ ३३ ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे चतुर्थाध्यायविवरणम् ।

अथ पञ्चमाध्यायविवरणम् ।

अथ पञ्चमाध्यायं विवरिषवः सङ्गतिं वक्तुं पूर्वाध्यायार्थानुवादपूर्वकं तामाहुः
चतुर्थ इत्यादि । सन्देह इति । फलाजननाद्धर्मस्यापरत्वं यथोक्तरीत्या
१-५-१ करणात्परत्वं चावगाहमानः स्वरूपविषयकः संशय इत्यर्थः । निर्णय
इति । अपरत्वरूपः सः । तेन सूतोक्तौ शेषशेषिभावः, व्यासोक्तौ तु सामान्यविशेषभावः सङ्गतिरित्यर्थः । अवान्तरवाक्यसङ्गतिमाहुः उट्टङ्कणमित्यादि । मध्यमत्वमधिकारित्वं तस्मादुट्टङ्कणं न खेददूरीकरणाय तर्ककरणं 'पाराशर्ये'त्यादिभिस्त्रिभिरादौ दृष्टान्तस्य स्वदृष्टान्तस्य 'अहंपुरे'त्यादिभिरन्ते यन्निरूपणं तद्धि यतो हेतोः उत्तरस्य हेतुत्वान्निर्णयहेतुत्वादस्ति तेन हेतुता उपोद्घातश्च सङ्गतिरित्यर्थः ॥ १ ॥

पाराशर्येत्यत्र । सन्दिग्ध इति । तिङन्तमिदम् । सम्बोधनमात्रेण कथमुद्बोध
इत्यत आहुः समर्थस्येत्यादि । अधिकार इति । योग्यतायाम् । कृता-
१-५-२ र्थत्वमिति । कृतकार्यत्वम् । समुदाय इति । व्यासचिन्तायां 'मे देह'

इत्यत्र 'म' इत्यनेन यथा सङ्घातः परामृश्यते, तथात्र ' भवत ' इत्यनेन सङ्घातः परामृश्यत इत्यर्थः । स्वेनैवेत्यादि । सङ्घाताभिमानिनैवापरितोष इत्यर्थः । अस्मिन् पक्षे तुशब्दकथनेनाग्रिमे पक्षे विषयप्राप्त्यपरितोषो बोध्यते । अनेनेति । अर्थद्वयसङ्ग्राहकेणास्मनेति पदेन । एवं मानस इति । उभयथा परितुष्यतीति शेषः । पूर्वरूप इति । शारीररूपे ॥ २ ॥

१-५-३ जिज्ञासितं सुसम्पन्नमित्यत्र । पाठान्तरमाहुः इति ते महदिति ॥ ३ ॥

जिज्ञासितमधीतं चेत्यत्र । धर्माध्यापने गमकमाहुः जैमिनिरित्यादि । औत्पत्तिकसूत्रादौ व्यासोक्तानुवादादित्यर्थः । द्वितीया वेदस्येति । एतेन
१-५-४ पूर्वमीमांसासूत्राण्यपि प्रणीतानि बोध्यन्ते । सनातनपदवैयर्थ्यपरिहारायाहुः बृहत्त्वमेवोक्तमिति । अनीहयेति । धर्माभिव्यञ्जकचेष्टाराहित्येन । इति चेति । इति श्रुतेश्चेत्यर्थः ॥ ४ ॥

अस्तीत्यत्र । तन्मूलपदं व्याकुर्वन्ति साधनेत्यादि । प्रमेयबलादिति । भगवन्निष्ठत्वेन भगवन्नैकट्यतस्तत्स्वरूपबलादित्यर्थः । असाधनफलस-
१-५-५ म्बन्ध इति । साधनाभावेपि भगवदैक्यप्राप्तिरित्यर्थः । श्रुतिविरोधमिवाशङ्क्य पक्षान्तरमाहुः भगवत्सेवकमिति ॥ ५ ॥

स वै भवानित्यत्र । कालादिनिरपेक्ष इति । इदं वेदगुह्यत्वज्ञापक-
१-५-६ मित्यर्थः ॥ ६ ॥

त्वमित्यत्र । स्वतोपीति । भगवदवतारत्वादित्यर्थः । अपेक्षितरूपमिति । व्यासस्य नारदे यादृशं ज्ञानं स्वखेदनिवृत्त्यर्थमपेक्षितम्, तादृग्रूपं ज्ञानं
१-५-७ नारदे वर्तत इत्यर्थः ॥ ७ ॥

भवतेत्यत्र । सिद्धवत्कारेणाहेति । हेतुपूर्वकं तज्ज्ञानन्यूनत्वस्य कारणमाहेत्यर्थः । न्यूनत्वहेतुं व्याकर्तुमुपपादयन्ति अग्निहोत्रेत्यादि । तथा च
१-५-८ यथाग्निहोत्रादिवाक्यविषयकज्ञानस्य सत्त्वेपि दीपादिव्यतिरेकेण तद्लाभात् सतोपि ज्ञानस्य खिलता, तथान्तःप्रकाशकव्यतिरेकेणान्तरार्थालाभात्तज्ज्ञानस्यापि सेति यशःकथनाभावो न्यूनत्वहेतुरित्यर्थः । ननु तदकथनाभावेपि ज्ञानादिभिरान्तराणामहमादीनां प्रकाशान्न तस्य न्यूनत्वहेतुतेत्यत आहुः भगवदीयेत्यादि । कुत इत्याकाङ्क्षायामाहुः ते चेत्यादि । तथा च यथा स्वल्पेन दीपेन न महागृहादिप्रकाशः, तथा स्वल्पेन ज्ञानेन तेषामिति तथेत्यर्थः । ननु यशस्तु गीतम्, अतः कथमप्रकाशः, कथं वा दर्शनस्य खिलत्वमत आहुः यद्यपीत्यादि । व्यामोहकलीलात्वेपीति । सारथ्या-

देरित्यर्थः। अत एव 'यच्चावहासार्थ' मित्याद्यर्जुनवाक्यम्। तथैवेति। व्यामोहकत्वेनेत्यर्थः। दृष्टान्तमाहुः पूर्वेत्यादि। आहेति। अनुदितप्रायपदेनाह। खिलत्वस्वरूपमाहुः अमलमित्यादिना। अमलमिति। मलमावरकं तद्रहितम्। तथा च भारते इतरशेषत्वाद्यावरकसत्त्वाद्यशसोऽमलत्वाभावः खिलत्वहेतुरिति तेन तथेत्यर्थः॥ ८॥

न यदित्यत्र। प्रतिपादकानामिति। इतरशेषत्वेन यशःप्रतिपादकानाम्।
प्रमाणेत्यादि। भारतस्याम्नायार्थत्वान्नैवमिति शङ्कायामिति शेषः।
१-५-१० विषयत्रैर्भोजनवदिति। तैर्भोजने तृप्तिमात्रम्, परमग्रेऽनिष्टम्, तथात्र अन्यशेषत्वेन श्रवणे श्रवणाभिमानमात्रम्, परमग्रे न कृतार्थत्वादिकम्, किन्तु धर्मादय एवेत्यर्थः। कथमर्थविशेषाभाव इत्यत आहुः तत्रत्यमित्यादि। हरेर्यश इति। हरेर्यशो न, किन्तु तत्त्वेन प्रतिपादितम्, वाचो धेनुवदित्यर्थः। प्रकारान्तरेणापि फलाभावं व्युत्पादयन्ति वच इत्यादि। तथा च साम्नो भगवत्प्रियत्वाद्रागादीनां च मोक्षमार्गत्वात्तदभावेनापि तथेत्यर्थः। मुख्येत्यादि। भारतानां प्रतिपादकमिदमिति भारतवदिति च भारतपदव्युत्पत्त्या भगवत्प्रतिपादकत्वाभावेन भगवतः शास्त्रार्थत्वाभावान्न मुख्यतया प्रतिपादकत्वम्, तत्प्रमेयस्य भगवत्कार्यकर्तृत्वाभावाद्भगवज्जातीयत्वाभावात्तत्सारूप्याभावादेकत्र मुख्यतया प्रतिपादितस्य प्रशंसार्थत्वाभावा'च्छत्रिणो यान्ति कुन्ताः प्रविशन्ती'तिवल्लिङ्गभूमभ्यामपि तदभावाच्च न गौण्यापि, शैत्यपावनत्वादिप्रतीत्यर्थं गङ्गापदेन तीरवन्न तत्पदैः कृतार्थताद्यर्थं भगवान् लक्ष्यत इति न लक्षणयापि। प्रकरणभेदाभावान्न तेनापि। आदिपदेन व्यञ्जनातात्पर्ये। न च 'मुनिर्विवक्षु'रितिवाक्यात्तात्पर्यं भगवतीति वाच्यम्। तत्रापि धर्मत्वेन विवक्षुरित्यर्थस्य विवक्षितत्वात्। यथा कथञ्चिदापादनेपि मोक्षधर्म इत्यादिसमाख्यया फलव्यभिचारेण च तथानिर्णयात्। तदेतदभिसन्धायाहुः न दोष इति। अकृतार्थत्वादिदोषो नेत्यर्थः। वयस इमे वायसा इति योगं रूढिं च पुरस्कृत्याहुः वृद्धा काका इति॥ १०॥

तद्वागित्यत्र। अभ्युपगमेन वेति। अवद्यत्वाभ्युपगमेनेत्यर्थः। प्रथमपक्षेऽवद्यत्वं कर्तृदोषात्। द्वितीये बुद्धिपूर्वकम्। तृतीये आरोपितमिति
१-५-११ ज्ञेयम्। तत्रेति। अघविप्लवने। अस्मिन् श्लोके सिद्धमर्थमाहुः भगवत्सम्बन्धिनामित्यारभ्य इतिनिरूपितमित्यन्तम्। भगवच्छन्दा इति। मुख्यतया भगवत्प्रतिपादकाः शब्दाः॥ ११॥

. नैष्कर्म्यमित्यत्र। इदानीमिति। शब्दोत्तमत्वादेरर्थोत्तमत्वाद्यधीनत्वात्तन्निकर्षनिरूपणानन्तरमित्यर्थः। अत्र साङ्ख्यं वैदिकमिति द्वैविध्यं नैष्कर्म्य-
१-५-१२ निरञ्जनपदबोधितम्। भक्त्यनलङ्कृतस्य केवलस्य तस्योभयविधस्याशोभायां गमकमाहुः ज्ञानस्येत्यादि। तथा च गृहशोभया दीपस्येव ज्ञानवतो भक्तो मनः-

प्रसादाभावेनाशोभया ज्ञानस्याशोभा गम्यत इत्यर्थः । अशोभा चात्राल्पप्रकाशकत्वरूपा विवक्षितफलाजनकत्वरूपा च ज्ञेया । ननु भक्त्यभावेऽपि भगवदवतारत्वात् व्यासस्य कथमशोभेत्यत आहुः सुवर्णेत्यादि । ननु साङ्ख्ये पञ्चविंशतितत्त्वज्ञानेन वेदे 'तमेव विदित्वे'त्यादिषु ब्रह्मज्ञानेनैव फलस्योक्तत्वात् तत एव तत्सिद्धेः कथमशोभेत्याकाङ्क्षायां ता व्युत्पादयन्ति यद्यपीति । निरूप्येऽर्थे इति । कार्येश्वरे । तथा च तदभावादेव 'शैवान् पाशुपतान् दृष्ट्वा लोकायतिककापिलान् । विकर्मस्थान् द्विजान् शूद्रान् सवासा जलमाविशे'दिति पुराणेषु तस्याशोभेत्यर्थः । तर्हि सेश्वरे कथमशोभेत्यत आहुः सेश्वरेत्यादि । तथेत्यध्याहार्यम् । तथा सेश्वरेऽपि नास्तीत्यर्थः । तत्र हेतुः सगुण एवेति । तन्मते ईश्वरस्य सर्वदा सात्त्विकविग्रहाविनाभावाङ्गीकारात्तन्मतीयेश्वरस्य नाच्युतत्वमिति प्रणिधानरूपतद्भक्तेरपि नाच्युतभक्तित्वम् । अत एव तदशोभेत्यर्थः । तर्हि वैदिके कथमशोभेत्यत आहुः वैदिक इत्यादि । समन्वयाध्याये 'शब्द इति चे'दिति सूत्रे वैदिक्याः सृष्टेर्नित्यायाः सिद्धत्वात् पुरुषसूक्ते च तथासिद्धत्वाज्ज्ञानपूर्वकं यज्ञादिकरणे यजमानादिरूपदेवतानां यजमानादिष्वावेशेन यज्ञस्याधिदैविकत्वम्, तदभावे यज्ञस्य लौकिकत्वात् । 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदि'ति तार्तीयीकेऽधिकरणे ज्ञानस्वरूपोपकारार्थं सर्वापेक्षायाश्चोक्तत्वात्सर्वपदे आदिपदे च भक्तेः सङ्ग्राह्यत्वेन सा तथेति तदभावे ज्ञानाभावादेवाशोभेत्यर्थः । ननु 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण' इत्यादावुपासितरूपाया भक्तेः श्रावितत्वात् तत्सत्त्वे कथं भक्त्यभाव इत्याकाङ्क्षायां भावपदतात्पर्यमाहुः सा चेत्यादि । तथा च स्नेहरूपत्वाभावान्न सा भक्तिरित्यर्थः । अपेक्षार्थकत्वेनानुक्तसमुच्चायकत्वमभिप्रेत्याहुः किं बहुनेत्यादि । इत्याहेति । इति कैमुतिकन्यायेनाहेत्यर्थः । कुतः पुनरिति । अत्रापि शोभन इत्यनुषज्यते । विशेषणत्रयतात्पर्यमाहुः तत्रेत्यादि । नेति । अग्रे संसारजननात्तथेत्यर्थः । नास्तीति । 'यत्करोषी'त्यादिगीतावाक्येऽर्पण एव कर्मबन्धनमोक्षकथनात्तथेत्यर्थः । तदाहेति । तस्मात्तदभावेऽशोभामाहेत्यर्थः । भवतीति । फलसाधकं भवतीत्यर्थः ॥ १२ ॥

अतो महाभागेत्यत्र । इत्याहेति । इतीदमनेन सन्दर्भेणाहेत्यर्थः । तादृशा इति । सर्वमोचकाः । अप्रसिद्धत्वादिति । चरित्रयाथात्म्यज्ञापनहेतो-
१-५-१३ स्तथात्वात् । ननु ममाग्रौ भगवत्स्फुरणे व्यामोहकमपि स्फुरिष्यतीति चेत्, तत्राहुः तस्यापीत्यादि । तथा च तस्य तथात्वे ज्ञाते तदपि भक्तिमेव जनयिष्यतीतिभावः । एवं पूर्वोक्तखेदनिरासार्थः भगवद्गुणस्मरणं साधनमुपदिष्टम् ॥ १३ ॥

ततोऽन्यथेत्यत्र । विपरीते बाधकमाहेति । अधिकारसार्थक्यनिष्पादकं भग-
१-५-१४ वच्चेष्टितोपदेशरूपं साधनान्तरमुपदेष्टुं चरित्रातिरिक्तकथने बाधकमाहेत्यर्थः । बाधकमुपपादयन्ति अभिधेयेत्यादिना । नियतत्वाभावा-

दिति । बुद्धिकल्पितत्वेन स्थिरत्वाभावात् । तथा चैकैकस्य धर्मादेर्बुद्धिकल्पितत्वेनानन्त्यादेकस्यापि स्वरूपं न सम्यङ्निरूपयितुं शक्यम्, 'कर्मण्यकर्म यः पश्ये'दितिवच्च तथेत्यभिधेयापर्यवसानमतिरिक्तकथने बाधकमित्यर्थः । ननु भगवद्गुणेष्वप्यानन्त्यस्य भवद्भिरुक्तत्वादयं दोषस्तत्रापि तुल्य इति चेत्, तत्राहुः भगवन इत्यादि । तथा च बुद्धिकल्पितत्वाभावेन स्थिरत्वात्तेषां सम्यक्कथनं सम्पद्यत इति न तत्रायं दोष इत्यर्थः । अत इति । निरूपणीयविपर्ययत्ताभावात् । दोषान्तरमाहुः किञ्चेत्यादि । दुःखात्मकत्वादिति । अतो'ऽन्यदार्त'मिति श्रुतेस्तथेत्यर्थः । एवं वैयासज्ञानस्य स्वरूपखिलत्वबोधकं दोषद्वयमुक्त्वा मूलव्याख्यानेन स्फुटीकुर्वन्ति तदाहेत्यादि । अन्यथेति । आनन्दरूपाच्चरित्रादन्यप्रकारकम् । ननु वास्तवविचारे तु न दोष इति शङ्कायां तदविचार एव दोष इत्याहुः *यद्यपीत्यादि । नन्वस्त्वयं दोषः, परं तस्य कथं* निवृत्तिरित्याकाङ्क्षायां किञ्चनेत्यस्य फलितार्थं वदन्तस्तन्निवृत्तिप्रकारमाहुः अनादरणीयमिति । अत्र ततोन्यथेत्युद्दिश्य किञ्चनेत्यनादरणीयत्वं विधीयत इत्यनादरणीयत्वकथनादेव वाक्यसमाप्तिरिति तद्दोषनिवृत्तिरित्यर्थः । तदनूद्येति । अन्यथाकथितमनादरणीयत्वेनानूद्य । तत्पर्यवसानाभावादिति । भगवत्पर्यवसानाभावात् । दुःस्थेति । दुःखिता । दुःस्थितपदस्यायमर्थ उक्तः । अनास्पदत्वे हेतुमाहुः किञ्चेत्यादि । पृथग्दर्शनकृतानीत्यादि । मत्राहे पदशक्त्यादरणात्तन्नित्यत्वेऽभ्युपगते पदार्थानामनित्यत्वात्तथेत्यर्थः । स्वयंपदेनात्र बुद्धिर्ज्ञेया सर्वत्र । अन्यदित्यादि । तथा चान्यस्य कल्पितत्वेनाभिन्नत्वाद्बुद्धेरास्पदालाभ इत्यर्थः । एवं दृष्टिसृष्टिवाद इवापद्यत इत्यर्थान्तरमाहुः दुःस्थितेत्यादि ॥ १४ ॥

जुगुप्सितमित्यत्र । भट्टा इति । 'तत्रैवं शक्यते वक्तुं येन्धपङ्ग्वादयो नराः । गृहस्थत्वं न शक्ष्यन्ति कर्तुं तेषामयं विधिः । नैष्ठिकब्रह्मचर्यं वा परि-
१-५-१५ व्राजकतायवा । तैरवश्यं ग्रहीतव्या तेनादावेतदुच्यते' इति मतान्तरोपन्यासे आहुरित्यर्थः ॥ १५ ॥

विचक्षण इत्यत्र । इत्याहेति । इतिशङ्कायां तृतीयस्य प्रयोजनमाहेत्यर्थः । निवृत्तिमार्ग इति । निष्कामं कर्म कार्यमितिमार्गे । ब्रह्मसुखं चेति ।
१-५-१६ ज्ञानमार्ग इत्यर्थः । निवृत्तिमार्ग इत्यनेनैव विधान्तरस्यापि सङ्ग्रहान्न तस्य पृथगुक्तिः । प्रयत्न इति । कर्तव्य इति शेषः । अस्तिचेति । 'न निर्विण्णो नातिसक्त' इति पृथगुक्तत्वादस्त्वित्यर्थः । निवृत्तितः सुखमित्यस्यार्थः 'सर्वेहोपरतिस्तनुः सुख'मिति । 'सुखमित्यात्मनो रूपं सर्वेहोपरतिस्तनु'रिति सप्तमस्कन्धे वाक्यात् सर्वेहोपरतिस्तनुःस्यापिका यस्येत्यर्थः । निवृत्तित इति सार्वविभक्तिकस्तसिः प्रथमार्थे । तथा च सर्वेहोपरतिर्निष्क्रियत्वं तनुराकारो यस्य तादृशं सुखमित्यर्थः । वाक्यसिद्धत्वादेवं

शब्द उक्तः । तावतापीति । तादृशसुखज्ञानेपीत्यर्थः । विभोरिति । विष्णुः प्रभुः स्वतन्त्रः, तथा च ज्ञातेपि सुखे तद्दित्सायां तत्प्राप्त्यभावान्न कार्यसिद्धिरित्यर्थः । उत्तरार्धं व्याचक्षते अनात्मन इत्यादि । पूर्वेणेति । पूर्वार्धे उक्तेन सुखपदेन । अध्याहारदोषाभावाय योजनान्तरमाहुः अथवेत्यादि । अनात्मनो गुणैः प्रवर्तमानस्य निवृत्तितस्तत्सङ्गाभावेनानन्तपारस्य विभोः सुखं वेदितुं को विचक्षणोऽर्हतीति, न तु तेषामनात्मगुणानां तथा करणे समर्थः, ततस्तदर्थं भवान् दीप्तिमान् त्वं विभोश्चेष्टितं दर्शयेति योजना । अस्मिन् पक्षे दूरान्वयदोषात् पक्षान्तरमाहुः यद्वेति । तथा चात्मनो निवृत्तिः सुखं पूर्वोक्तो वेदितुं योग्यः, न त्वेतादृशः । ततो हेतोः प्रवर्तमानस्यार्थे दर्शयेत्यर्थः । एवमपि तादर्थ्यस्य सम्बन्धत्वेन विवक्षायां षष्ठीति क्लेशात् पक्षान्तरमाहुः तत्सम्बन्धी चेति । विधिर्निरूपित इति । एतेनास्मिन्नपि सिद्धान्ते धर्मत्वमिति प्रतिभाति ॥ १६ ॥

त्यक्त्वेत्यत्र । तथा सतीति । सर्वाधिकारवत्त्वेन जघन्यत्वे सति । जन्मान्तरे-
१-५-१७ त्यादि । अस्मिन् वाक्ये भक्त्युद्भवस्योक्तत्वात् पापक्षये उक्तत्वात् लौकिकाधर्मिणोश्च पापक्षयाभावादर्थबलेन कर्मकर्तुरधिकारलाभ इति विरोधात्तथेत्यर्थः । एवं लब्धेप्यधिकारे तुल्यबल(श्र) वणाशक्तिरिति तत्परिहारायाहुः यथेत्यादि । अत्रापीति । विहितभक्तिमार्गेपि । नन्वेवं सत्यारम्भदशायामुच्छृङ्खलतैवापततीत्यत आहुः बाधकानामित्यादि । बाधकानि काम्यानि, चिरकालसाध्यानि तीर्थसत्रादीनि ज्ञेयानि । तथा चेति । 'तावत्कर्माणी'ति वाक्ये कर्मकरणस्योत्तरावधेरुक्तत्वात् तद्विचारेणेत्यर्थः । ननु दासत्वाद्युक्तिः श्रुतांशत्वसमर्थनार्था, न तु सेवकत्वार्था, ब्रह्मसूत्रे तथा निर्णयादित्यत आहुः अंशत्वेपीत्यादि । एतदिति । अंशत्वम् । अन्तरङ्गमिति । भजनं सगुणोपासनारूपत्वाद्धर्माद्यपेक्षयोत्कृष्टमित्यर्थः । भजनपक्ष इति दूषयन्ति जीवस्येत्यादि । सायुज्यसाधनत्वादिति । 'भगवान् भजतां मुकुन्दो मुक्तिं ददाति' इत्यादिवाक्यैस्तथेत्यर्थः । पाताभावेप्यपकता तु वर्तत इति शङ्का निराकुर्वन्ति अयमेवेति । भजनधर्म एव सायुज्यसाधनत्वरूपोर्थो वा । परमोपाधित्वादिति । परं सगुणं ब्रह्म मीयतेऽनेनेति परमस्तादृशोपाधित्वादित्यर्थः । स्वशब्देनेति । अभजतां ततः फलाभावं ज्ञापयितुं लौकिकवैदिकधर्मस्य स्वधर्मत्वं स्वशब्देनोच्यत इत्यर्थः । तत्साध्यस्यार्थस्यानर्थत्वं बोधयन्ति अभजतामित्यादिना । देहाद्यधिकारेण प्रोक्तस्यापि धर्मस्य प्रमाणसिद्धत्वात्तत्त्यागे दोषोपि सम्भाव्यत इत्याशङ्कायां तयोरधिकारिभेदेन दोषाभावायाहुः विधर्म इत्यादि । तथाचान्तर्मुखत्वेनाधिकारभेदात्तैस्त्याज्य एवेत्यर्थः । इदं सप्तमस्कन्धे नारदवाक्यम् । एतेषां स्वरूपमपि तत्रैवोक्तं 'धर्मबाधो विधर्मः स्यात् परधर्मोन्यचोदितः । उपधर्मस्तु पाषण्डो दम्भो वा शब्दभिच्छलः । यस्त्विच्छया कृतः पुंभिराभासो ह्याश्रमात् पृथ'गिति । श्रीधरीये विवृतश्च । 'धर्मबुद्ध्या यस्मिन् क्रियमाणे

स्वधर्मबाधः स विधर्मः। अन्यस्य चोदितोन्यस्य परधर्मः। उपमा उपधर्मः। शब्दभिच्छब्दभेदोन्यथाव्याख्यानम्। यथा 'दशावरान् भोजये'दित्यत्र दशभ्योऽवरानिति। शब्दभृदिति पाठे शब्दमात्रं बिभर्ति, यथा 'गां दद्या'दित्युक्तेर्मरिष्यन्त्या गोदानमिति। ननु भजने यदि पाताभावः, तदाशङ्कानुत्थानादनुवाद एव बाधित इति वैतण्डिकशङ्कायां तत्तात्पर्यमाहुः अथेत्यादि। तथा चोक्तन्यायेन तत्कथनमिति न शङ्कालेश इत्यर्थः। सिद्धमाहुः तस्मादित्यादि। अधिकारभेदान्न केनापि प्रमाणेन विरोध इत्यर्थः॥१७॥

तस्यैवेति श्लोकमवतारयन्ति किञ्चेत्यादि। साधनमुखत इति। साधनस्व-
रूपद्वारा। तत्रेति। प्रमेयबलविचारे। तत्र विचारयत्विति। फेन-
१-५-१८ बुद्बुदरूपत्वे विचारयतु। अक्षरपर्यन्तमिति। अक्षरप्राप्तिपर्यन्तम्।
अक्षरावधीति वा। विधिरिति। प्रयतेतेत्युक्तो यत्नविधिः। तद्धि वैधमिति। तथा च फलस्यापूर्वत्वेन तत्साधनत्वस्याप्राप्तत्वात्तत्साधनत्वं वैधमित्यर्थः। पूर्वग्रन्थानुरोधेन धात्वर्थं सङ्कोच्य वैधस्वरूपमाहुः यत्न इत्यादि। 'तं भजे'दित्यादिश्रुत्यनुवादत्वनिरासायाहुः धर्मेत्यादि। भक्तिसेवेति। भक्त्यर्थं सेवा। निरुपधिप्रेम्णा सेवा वा। ननु भगवत्प्रीतिहेतुना कर्मणा भक्तिजनकादृष्टाङ्गीकारे किं बाधकमित्यत आहुः फलेत्यादि। अकामितस्याप्यदृष्टस्य जन्मान्तरे फलसमर्पणार्थमङ्गीकारः। प्रकृते तु भगवत्यर्पितं कर्म भगवत्प्रीतिहेतुः। 'तत्कुरुष्व मदर्पणम्' 'शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः' 'एतान्यपि तु कर्माणी'त्यादिषु तादृशस्य भगवतोक्तत्वात्तथाकृतेन भगवानेव प्रीयते, आज्ञाकरणात्, सा च तेनाविर्भूता नित्या, न तु जन्या, भगवद्धर्मत्वात्। अत एव चानश्वरा। एवं सति जन्मान्तरे तथैव फलसिद्धावदृष्टोपगमोऽप्रामाणिकत्वाद्गौरवग्रासाच्च फलविपर्ययरूपोऽसङ्गत इत्यर्थः। अफलत्वेनेत्यादि। भक्तेस्तत्फलत्वाभावेन भक्त्यर्थमदृष्टजननं न सम्भवतीत्यर्थः। नान्तिमत्वसाधकमिति। अदृष्टमिति शेषः। ननु भक्तेः कालाद्यजन्यत्वं चेत्स्यात्, तदा ज्योतिर्ग्रन्थे जातके देवपूजारतिर्वैकुण्ठादागतिः पुनर्वैकुण्ठगतिश्च शुभग्रहफलतया न ज्ञायेतेत्यत आहुः जातकेपीत्यादि। तस्मादिति। कालादृष्टाजन्यत्वात्। उत्तरार्धं व्याचक्षते न चेत्यादि। ननु सुखार्थं पित्रादयोनुकूलयितव्या इति कथं भक्त्यर्थमेव यत्नः सिध्यतीत्यत आहुः तेषामित्यादि। तथा च कालप्रातिकूल्ये क्रियायां न सिद्धिरित्यर्थः। तर्हि काल एवानुकूलयितव्य इति चेत्, तत्राहुः स चेत्यादि। ननु सुखार्थं देशापेक्षासत्त्वान्न केवलं कालेन सुखसिद्धिरिति तत्सम्पादनाय तु यतनीयमेवेति कथमेकान्ततो भजनयत्नसिद्धिरित्यत आहुः न चेत्यादि। तथा चाकालानुकूल्ये तदर्थोपि यत्नो व्यर्थ

१ प्रवीयत इति पाठ.। २ कालादृष्टजन्यत्वादिति पाठः। ३ क्रियायां।

इत्यर्थः । ननु कालोपि न स्वतन्त्रः, देशं विना फलानुत्पादकत्वादित्याशङ्कायामाहुः तुल्यत्वे इत्यादि । तथा चैवमपि कालापेक्षानपायाद्व्यर्थ एव यत्न इत्यर्थः । ननु मास्तु सुखार्थो यत्नः, दुःखाभावाय तु प्रतिविधातव्यमित्यत आहुः प्रतीत्यादि ॥ १८ ॥

न वै इत्यत्र । तर्कमिति । बाधकनिवर्तकं तर्कम् । तं व्याख्यातुं बाधकं विशद-
यन्ति नन्वित्यादि । पराधीनत्वेनेति । कालाद्यधीनत्वेनन । अङ्गी-
१-५-१५ कृत्यापीति । 'तुष्यतु दुर्जन' इतिन्यायेनेत्यर्थः । ननु यद्येवं तर्हि तुष्यतु
दुर्जनन्यायकस्यापि परिहारस्य किं प्रयोजनमत आहुः साधारणेत्यादि । यथा भरतादिरिति । साधारणभक्तः । स यथा जन्म प्राप्तवान्, तद्दृष्टान्तेन पातः शंस्येतेति तादृशस्थलेपि तदभावाय परिहार इत्यर्थः । सत्यवादी ब्राह्मण इति । उद्योगपर्वणि कौशिकः कश्चित्सत्यवादी चौरैः पृष्टः सार्थं कचिन्निलीनं तेभ्य आचख्यौ, ततस्ते सर्वे चौरैर्लुण्ठिता मारिताश्च, ततस्तेन सत्यवादेन स नरके पपातेति भगवतार्जुनं प्रत्युक्तम्, स यथा सत्येन तथाभूत्, एवं भगवत्सेवकोपि भगवदपराधाद्भगवता तथा भविष्यति, भरतवत् । तथा च यदि भक्तिरेकान्ततः फलसाधिका स्यात्, भरतो न पतेत्, यतो नैवमतो नैवमिति बाधकतर्कमङ्गीकृत्यापीत्यर्थो भवति । परिहारतर्कस्तु, मुकुन्दसेवी यदि संसृतिमाव्रजेत्, अन्यसेवकवदाव्रजेत्, यदि तथा स्यात्, तदा संसृतिं विहातुं नेच्छेत्, इतरसेवकवत् । यतः संसृतिं विहातुमिच्छति, तस्मादितरवन्न संसृतिं व्रजति, यतस्तथा न व्रजति, ततो भक्तिरेकान्ततः फलसाधिकेति । इच्छामपीति । मात्रादीच्छाम् ॥१९॥

इदं हीत्यत्र । दुर्लभत्व इति । भ्रमतां कालादिभिरलभ्यत्वे । भूयस्त्वकथनं
चेति । चोप्यर्थे । इति शास्त्रार्थत्वायेति । इति श्रुतेर्भगवतः शास्त्रा-
१-५-२० र्थरूपत्वायेत्यर्थः । निरूपणीयमिति । सुलभत्वाय भूयस्त्वकथनोपपत्तये
च निरूपणीयम् । कार्यमिति । भगवत्समवेतं कार्यम् । उत्तम इति । उत्तमाधिकारि-विषये । प्रकारत्रयेण निरूपणीयमिति । निरूपणीयोऽर्थः प्रकारत्रयेण निरूप्यत इत्यर्थः । तर्हीति । स्वस्य सर्वस्य च भगवत्त्वे ॥ २० ॥

त्वमात्मनात्मानमित्यत्र । साकल्यं चेति । कुर्विति शेषः । साधनमिति ।
ज्ञानसाधनम् । तथेति । कलात्वम् । तत्रेति । कलात्वज्ञाने । तथा च
१-५-२१ यथा धर्मादयोऽर्थाः स्वतः स्फुरिताः, तथेदमपि स्फुरिष्यतीत्यर्थः ।
अवतीर्ण इति । अत्र व्यापिवैकुण्ठादनागमनरूपोऽवतारपदार्थो ज्ञातव्यः । तत्पदस्यार्थः अज इति । शिवपदस्यार्थः शान्तसुखायेति । तन्महानुभावेतिसमस्तमभिप्रेत्याहुः अस्येत्यादि । अवाङ्मनोगोचरत्वादित्यत्र वाक्सहितं मन इत्येवं समासो बोध्यः ॥२१॥

इदं हि पुंस इत्यत्र । तानीति । स्वरूपसाधनफलानि । उक्तत्रिरूपतां विवृण्वन्ति

१-५-२२ एवं सर्वैरित्यादिना। अर्थशब्दस्य वस्तुनि प्रयोजने च रूढत्वात्तृती-
यार्थे बहुव्रीहौ गूढोत्मेतिवद्वर्णविकृतावविच्युतोर्थ इति पदं साधनमपि
बोधयतीति त्रितयलाभ इत्यर्थः। अविच्युतार्थ इति वा मूलपाठोभिमेत इति न कोपि
शङ्कालेशः। निषिद्धमिति। 'कः क्षेमो निजपरयोः' 'कर्षयन्तः शरीरस्थं भूतग्राम'मि-
त्यादिषु यन्निन्दितं तदित्यर्थः॥ २२॥

अहं पुरेत्यत्र। उक्तविश्वासाय सम्वादात्। मननेन ज्ञातस्य मज्जन्मनो
वाक्येन सम्वादादुक्तविश्वासायेत्यर्थः। तदानीमिति। तस्मिन् जन्मनि
१-५-२३ वा। परमहंससेवातः प्राग्वा। न सम्भवतीति। शूद्रस्योच्छिष्टदाननिषे-
धात्। आश्रमिणामित्यादि। 'वर्षासु ध्रुवशीलोष्टमासस्त्वेकाकी यतिश्चरे'दित्यारुणीश्रुतेः।
'चतुरो मासान् वार्षिकान् ग्रामे नगरेपि वा वसे'दितिकठश्रुतेश्चेत्यर्थः॥ २३॥

ते मयीत्यत्र। साधनकथनमिति। गुणगानरूपसाधनकथनम्। तदाहेति। तस्य
स्वत एव निवृत्तिमाहेत्यर्थः। बाधकज्ञानस्येति। तुल्यदर्शनरूपस्य।
८-५-२४ सेव्यवश्यत्वमिति। फलमिति शेषः। अनपेक्षाया इति। न विद्यते
अपेक्षा यस्याः सानपेक्षा, तुल्यदर्शनत्वेनापेक्षितायाः सेवाया इत्यर्थः। द्वितीयमिति।
निर्दुष्टानुवृत्तिः प्रथमं साधनम्, तदपेक्षयेदं द्वितीयमित्यर्थः॥ २४॥

उच्छिष्टलेपेत्यत्र। अयं धर्म इति। शूद्रायामत्र्येदानादिरूपः[१]। तत्रापि
साधारणेष्विति। शूद्रेपि सेवकव्यतिरिक्तेषु। 'न शूद्राये'ति वाक्यस्य
१-५-२५ स्नातकप्रकरणस्थत्वेन शूद्रस्य चाविशिष्टत्वेन तथेत्यर्थः। मार्गभेदेनाप्य-
दोषमाहुः सेवा चेत्यादि। अस्य न्यायेत्यादि। 'यस्य येन गुणः, तस्य तत्र रुचि'रिति
लोकन्यायसिद्धत्वकथनाय रमेत्यनुपज्य प्रजायत इति लट्प्रयोगः कृतः। अन्यथा
व्यजायतेत्येव प्रयुङ्क्यादित्यर्थः॥ २५॥

तत्रान्वहमित्यत्र। ख्यापयितुमिति। अन्वहमित्यस्य प्रगायतामित्यनेन सम्बन्ध
इति शेषः। तद्भावेनेति। भगवति प्रेम्णेत्यर्थः। तस्या इत्यादि।
१-५-२६ तया श्रवणभक्त्या नारदत्वं सम्पादितमिति सान्यस्याप्येतावत्त्वसम्पादि-
केत्यर्थः। श्रवणफलमिति। श्रवणस्य प्राथमिकं फलम्। अत इति। उत्तरारम्भाभावे
पूर्वविच्छेदस्याप्रयोजकत्वात्। अनुपदमिति। पदं लक्षीकृत्येत्यर्थः। हिहेतौ॥ २६॥

तस्मिन्नित्यत्र। नियमार्थमिति। कार्यकारणभावाव्यभिचारार्थम्। तत्त्वमा-
वश्यकमिति। तद्रूपतावश्यभाविनीत्यर्थः। पूर्वोक्तयेति। 'स एवेदं
१-५-२७ ससर्जे'त्यत्रोक्तया। अस्येत्यारभ्य यावदित्यन्तेन 'इदं हि विश्वमि'ति

[१] मत्यदानादिरूपः।

श्लोकोक्तत्रेधानिरूपणमध्ये 'इतरो भगवा'निति प्रथमाधिकारकज्ञानस्यात्र स्वस्मिन् प्रथमं भवनं विवृतम् ॥ २७ ॥

इत्थमित्यत्र । मासचतुष्टयमित्यनुक्त्वा 'शरत्प्रावृषिकावृतू' इत्युक्त्या सूचितमर्थान्तरमाहुः पञ्चकं वेति। वैद्यके 'प्रावृण्मिथुनकर्कटौ' 'सिंहकन्ये स्मृता
१-५-२८ वर्षास्तुलावृश्चिकौ शर' दितिकथनात् शरदो वृश्चिकान्तत्वेन पञ्चर्तुपक्षे प्रावृषश्चतुर्मासात्मकत्वेन षण्मासप्राप्तावपि आषाढीमारभ्यैव संन्यासिनः स्थितेरुक्तत्वात् गते मिथुने मासपञ्चकमेव ऋतुद्वयं भवतीति तथेत्यर्थः । ज्ञानसाधनमिति । तेषामित्यर्थात् २८

१-५-२९ तस्यैवमित्यत्र । पृथगुक्तिरिति । बालपदेन पृथक्कथनम् ॥ २९ ॥

ज्ञानं गुह्यतममिति श्लोकं व्याकुर्वन्ति अस्ति किञ्चिदित्यादिना । वत्सं लातीत्यादि । अत्र स्नेहपक्षे दीनेषु वत्सलो येषामिति व्यधिकरण-
१-५-३० पदो बहुव्रीहिः ॥ ३० ॥

येनैवेत्यत्र । अहो इति पाठान्तरं ज्ञेयम् । ननु प्रकाशमानस्य कथमस्फूर्तिरित्यत आहुः लेखनदशानुसन्धेयेति । यथा हृदि विद्यमानानां प्रकाशमाना-
१-५-३१ नामपि वाक्यानां लेखनवैयग्र्येण न स्फूर्तिः, तथात्रेति बोध्यमित्यर्थः भगवदुक्तज्ञानस्य फलं वदन्तो येनेतिपदस्यार्थमाहुः क्रमेत्यादि । तथा च मायानुभावज्ञानक्रममात्रेण, न तु तद्व्यापारीकृत्येत्यर्थः ॥ ३१ ॥

एतदित्यत्र । एतैरुपद्रुत इति। 'तस्मिन् महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः स्रवन्ति । ता ये पिबन्त्यवितृषो नृप गाढकर्णैस्तान्न स्पृश-
१-५-३२ न्त्यशनतृड्भयशोकमोहाः' 'एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः । न करोति हरेर्नूनं कथामृतनिधौ रतिम्'इति वचनादित्यर्थः । योजितमिति । 'यत्करोषि यदश्नासी'त्युक्तया रीत्या भगवत्यर्पितम् । तत्र 'शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः । सन्न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसी'तिकथनात् । भावनया प्रापितमिति । यथोक्तं राजधर्मे व्यासेन । 'यथा हि पुरुषो वृक्षं छिन्द्यात्परशुना वने । कर्तुरेव भवत्येव परशोर्न कथञ्चन । न चैतदिष्टं कौन्तेय यदन्येन कृतं फलम् । प्राप्नुयाद्यदि तस्माद्वापीश्वरे तन्निवेशये'ति । प्राप्नुयादिति । अन्यः प्राप्नुयात् । तथा च ईश्वरः कारयतीति भावनया ईश्वरे प्रापितमित्यर्थः । अत एवं प्रकारद्वयेन भगवत्सम्बद्धं कर्मैव तापत्रयचिकित्सितरूपमिति तात्पर्यम् ॥ ३२ ॥

आमय इत्यत्र । तच्चैवेति । भगवति भावनीये कर्मण्येव । योगा इति । क्रियायोगाः । दध्यादिवदिति । यथा 'दध्ना जुहोति' 'दध्नेन्द्रियकामस्य
१-५-३३ जुहुयात्' 'खादिरे बध्नाति' 'खादिरं वीर्यकामस्य यूपं कुर्यात्' इत्यादि-

विहितदध्यादिवदित्यर्थः। सर्वापेक्षा चेति। अयं न्याय उत्तरतंत्रे तृतीयस्य तुरीयपादेऽस्ति। तत्रहि पूर्वं 'पुरुषार्थोतः शब्दा'दित्यादिभिर्ज्ञानस्य फलसाधने कर्मापेक्षा नास्तीति साधयित्वा, अथेदानीं चिन्त्यते, ज्ञानस्वरूपोपकारित्वं कर्मणोस्ति, न वेति। तत्र 'आचार्यवान् पुरुषो वेदे'ति श्रुतेर्गुरूपसत्तितदुपदेशादिभिरेव तत्सम्भवान्न तदपेक्षेति पूर्वः पक्षः। सिद्धान्तस्तु, सर्वापेक्षा सर्वेषां कर्मज्ञानभक्तीनामस्ति पुरुषोत्तमज्ञानोत्पत्तौ अपेक्षा, कुतः, यज्ञादिश्रुतेः, वेदः सर्वोपि पुरुषार्थपर्यवसायी, पुरुषार्थश्च भगवत्प्राप्तिरेव, नान्यत्, सा चेज्ज्ञानादेव, तदा यज्ञादीनां निरूपणमनर्थकं स्यात्, अतस्तत्परिहाराय मन्तव्ये कर्मणां पुरुषार्थसाधकत्वे ज्ञानस्वरूपोपकारकत्वेन तथात्वं मन्तव्यम्। तदपि निष्कामकर्मकर्तृत्वे। वाजसनेयिशाखायां 'यथाकारी यथाचारी तथा भवती'त्यादिना सकामस्य कर्तुः पुनरावृत्तिमुक्त्वा, 'अथाकामयमानो योऽकाम' इत्यादिना 'ब्रह्मैव सन् ब्रह्माप्येती'-त्यन्तेन पूर्वोक्तकर्मकर्तुरेवाकामत्वे तत्फलकथनात्। 'कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते' इति स्मृतेश्च। तत्र दृष्टान्तः। अश्ववदिति। स्वेष्टफलसाधकदेशव्यवधानात्मकदेशातिक्रम एवाश्वस्य यथा साधनत्वम्, न तु तत्फलसिद्धावपि, तथाधिकारित्रिविधप्रतिबन्धनिवृत्तावेव कर्मणां साधनत्वमुपकारकत्वम्, न तु भगवत्प्राप्तिरूपे ज्ञानफलेपीति। सूचित इति। व्यासस्य स्वोक्तिस्मारणाय सूचितः। तथा च पूर्वतन्त्रापेक्षयोत्तरतन्त्रस्य प्रबलत्वात्संयोगपृथक्त्वन्यायबाधेन ततो न पुनः संसार इत्यर्थः॥ ३५॥

१-५-३७ नमो भगवत इत्यत्र। तस्य फलमिति। ध्यानस्य फलम्॥ ३७॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे पञ्चमाध्यायविवरणम्॥ ५॥

अथ षष्ठाध्यायविवरणम्।

अथ षष्ठाध्यायं विवरिषवः सङ्गतिं वक्तुं द्वयोरर्थमाहुः मध्यमेनेत्यादि। तस्यैवेति। श्रवणस्यैव। वर्ण्यत इति। फलमित्यनुषज्यते। वाद्याभाव इति। कीर्तनाभावे। इति निरूप्यत इति। इतो हेतोर्व्यासपादैरुपनिबध्यते। तथा च फलोपोद्घातः सङ्गतिरित्यर्थः। श्रोतव्यविषयनिरूपकस्येति। श्रोतव्यो यो विषय ऐश्वर्यदानरूपस्तन्निरूपयितुर्नारदस्येत्यर्थः। भवतीति। श्रोतुर्भवतीत्यर्थः॥

एवं निशम्येत्यत्र। तूष्णीम्भावे हेतुमाहुः आदरेत्यादि। तथा च मदुक्तौ व्या-

१-६-१ सस्यादरोस्ति न वेति ज्ञातुं नारदस्य तूर्ष्णीभाव इत्यर्थः॥ १॥

१-६-२ भिक्षुभिरित्यत्र। तदेति। कालेन संस्कारनाशे॥ २॥

उत्तरग्रन्थे भिक्षुभिरित्यत्र। प्रथमप्रश्न इति। कृतिप्रश्ने। एतेषां त्रयोविंशति-

श्लोकानां तात्पर्यमाहुः ब्रह्मविद इत्यादि। 'एकात्मजे'त्यादिश्लोकचतुष्टयोक्तितात्पर्यमाहुः भगवानित्यादि । अग्रिमावस्था भगवत्साक्षात्कारार्थकयत्नकरणावस्था । आनुगुण्यसन्देहे यत्कार्यं तदाहुः अन्यासक्तिरित्यादि । तादृशमिति । आनुगुण्यजनकम् ॥५॥

एकात्मजेत्यत्र । आत्मन इति । ममेत्यर्थः । तत्रेति । मातृकर्तव्यपदार्थमध्ये ।
१-६-६ योग इति । अलब्धस्य सम्पादनम् ॥ ६ ॥

एकदेत्यत्र । भगवानिति । दूरीकृतवानित्यनेन सम्बध्यते । स्थापित इति ।
१-६-९ य इति शेषः ॥ ९ ॥

तदा तदहमित्यत्र । ईशस्य भक्तानामिति समभिव्याहारसूचितमर्थमाहुः
१-६-१० भक्तानामित्यादि । भक्तानामेव कल्याणमभीप्सन्निष्ट इत्यर्थः ॥१०॥

१-६-१२ चित्रधात्वित्यत्र । देवखाता इति । पुष्करिणीरितिशेषः ॥ १२ ॥

परिश्रान्तेत्यत्र । परिश्रमे हेतुमाहुः बहिर्मुखत्वे जात इति । भगवदनुसन्धान-
१-६-१४ विच्युतौ जातायामित्यर्थः ॥ १४ ॥

१-६-१५ तस्मिन्निितिश्लोकं व्याकुर्वन्ति । एवं सावधान इत्यादि ॥ १५ ॥

ध्यायत इति श्लोकं व्याचक्षते तस्मिन्नित्यादि । रूपमिति श्लोकं व्याचक्षते ।
१-६-१६ ततो भगवदित्यादि । भर्तृत्वेनेति । कान्तपदस्यार्थः ॥ १६ ॥

१-६-२१ हन्तेत्यत्र । अन्यथेति । देशानुक्तौ ॥ २१ ॥

मनिर्मयीत्यत्र । अनेनेति । भगवदनुग्रहजन्येन पूर्वजन्मादिस्मरणेन । तत्रेति ।
१-६-२४ भगवद्वाक्ये ॥ २४ ॥

एतावदित्यत्र । जातमिति । भूतपदस्यार्थः । तथाकथन इति । अदृश्येन रूपेण
कथने । आत्मातिरिक्तरूपस्याप्यनुमानगम्यत्वं नास्तीत्याहुः अतिरि-
१-६-२५ क्तेत्यादि । सर्वत्रेति । अस्मदादिकृतेषु साधनेषु । उक्तमिति । नम-
नमुक्तम् ॥ २५ ॥

नामानीत्यत्र । अविद्यारूपा इति। योगदर्शने 'विपर्ययो मिथ्याज्ञानमतद्रूपप्रति-
ष्ठ'मिति विपर्ययं लक्षयित्वा 'अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशा'
१-६-२६ इति विपर्ययस्य भेदा उक्ताः । तेषामेव भाष्ये व्यासपादैः 'तमो मोहो
महामोहस्तामिस्रोऽन्धतामिस्र' इति पर्वत्वेन व्याख्यातत्वात्तत्पर्वरूपा इत्यर्थः । तत्र चेति । कर्मादिषु च । पृथगिति । 'निर्विण्णानां ज्ञानयोगः कर्मयोगस्तु कामिनाम् । न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिद' इत्येकादशे वाक्यादित्यर्थः । यदिति । अनुस्वारस्यम् । श्रुतिनिमित्तत्वादिति । मण्डलब्राह्मणे 'तमेतमग्निरित्युपासतेऽध्वर्यव' इत्युपक्रम्य, यजुःसामादिरूपाण्युक्त्वा, 'तस्मादेवंविदसर्वैरेवैतैरुपासीते'ति श्रावणादि-

त्यर्थः । न सर्वैरित्यादि । 'तद्धैतान् भूत्वावती'तिश्रुतावुपास्यरूपेणैव रक्षोक्तेः सर्वरूपानुपासने तद्रूपेणाभवनात् सर्वत्र त्रिविधरागनिवृत्तिः प्रतिबन्धान्तरनिवृत्तिश्च न स्यादित्यर्थः । दूषणान्तरमाहुः श्रोतुरित्यादि । सर्वत्रायं ब्रह्म न जानातीति श्रोतुर्बुद्धिः स्यात्, सर्वत्राज्ञानेऽस्यं श्रुतिविरुद्धत्वात्पाषण्डताशङ्का स्वस्यापि स्यादित्यर्थः । तत्रेति । नाम्नामानन्त्ये । तानिति । लोकान् । नामोच्चारण एवेति । न तु वस्त्रादित्यागेपीत्यर्थः । स्वस्याबाधकानीति । चित्ताविक्षेपकानि । कृतपदं करिष्यमाणानामप्युपलक्षकमित्याशयेनाहुः अथवेत्यादि । एकमित्यादि । चरित्रस्मरणरूपमङ्गं नामोच्चारणसाधनत्वेनोक्तवेत्यर्थः । लौकिकालौकिकानीति । सन्माननानाश्चर्यावलोकनादीनि पुण्यदेशानुभवाज्ञादीनि चेत्यर्थः । तदाहेति । गतस्पृहपदेनाहेत्यर्थः । अपरिच्छिन्नानीति । देशकालकृतनियमरहितानि । अत एव यावज्जीवाधिकारकस्यानिर्वाहादेव । द्वितीयाध्याये जैमिनिसूत्रीये कर्मभेदः नित्यकाम्याग्निहोत्रादेः प्रयोगभेदः । परिच्छेदकदेशकालसम्बन्धे' प्रयागे वपनं कुर्यात्' 'तुलामकरमेषेषु प्रातः स्नायी भवेन्नर' इत्यादिवाक्योक्तदेशकालसम्बन्धे, किं कुर्यात्, परिच्छिन्नापरिच्छिन्नयोर्वपनादिपर्यटनयोर्मध्ये कतरत्कुर्यादित्यर्थः । तत इत्यादि । तथाच कृतिसाध्यत्वासाध्यत्वविचारो हि शरीररक्षाविचारमूलकस्तस्याविचार्यत्वेन तदप्यविचार्य पर्यटेदेवेत्यर्थः ॥ २६ ॥

एवं कृष्णमतेरित्यत्र । भोगसमाप्ताविति । चरमक्षणे । शापसमाप्ताविति । ब्रह्मवैवर्ते ब्रह्मणा नारदं प्रति 'गृहस्थाश्रमं कुरु त्व' मित्याज्ञप्ते नारदो न

१-६-२७ कृतवानित्यतः शापो दत्तः, 'त्वं स्त्रीकामो दासीसुतश्च भवि्ते'ति कथितम्, तेनाहं पूर्वमुपबर्हणगन्धर्वो भूत्वा, ततो दास्यामुत्पन्नः, तस्य शापस्य समाप्ताविति त्यर्थः । केचिदिति । विजयध्वजादयः । अस्मिन् पक्षे तडिपदं क्रियाविशेषणम् । एतस्याः शैघ्र्ये प्रसिद्ध्यभावाच्छ्रीधरोक्तपक्षान्तरमाहुः सौदामिनी वेति । सपर्वते स्फटिकमये इति तत्प्रान्तसम्भवात्तडिदतिस्फुटा भवतीति कालस्य तद्वदतिस्फुटत्वाय दृष्टान्तः । श्रीधरीयेऽन्यदपि पक्षद्वयमुक्तम् । सुदामपाला तत्र भवेति मालाकारेत्यर्थ इति । 'तडिदित्यन्तकव्ययो'रिति नैरुक्तिकस्मरणात् तडिदन्तिक इत्यर्थ इति च । एतेषु सर्वेषु पक्षेष्वपुष्टार्थत्वं सौदामिनीपदे इकारदौर्लभ्यं चेतिदूषणसत्त्वात्पक्षान्तरमाहुः एकं वा पदमिति । तथा प्रसिद्ध्यभावाद्विकल्पवाचकपदोक्तिः । अत्रापि दोषमाशङ्क्य परिहरन्ति तडिदित्येत्यादि । आदिपदेन 'तडितोऽधि वरुणः सम्बन्धा'दित्यादिप्रयोगः सङ्गृह्यते ॥ २७ ॥

प्रयुज्यमान इत्यत्र । नन्वारब्धकर्मनिवृत्तौ 'गन्ता मज्जनतापसी'ति वरादेरपि निवृत्तेरग्रे शरीरं कथमभूदित्यत आहुः वरादिकमिति । तथा चार-

१-६-२८ ब्धत्वाभावान्न पूर्वं निवृत्तिः, किन्तु देहग्रहणोत्तरं तस्याप्यारब्धत्वे जाते

१ अशनेन चक्षुः भुर्गात्यादि पाठः ।

निवृत्तिरित्यर्थः । ब्रह्माण्डपर्यवसायीति । ब्रह्माण्डात्मा । तर्हीति । ब्रह्माण्डात्मकत्वे ॥ २८ ॥

कल्पान्त इत्यत्र । ब्रह्मापि नाभिद्वारेत्यादि । एतदुक्तं कौर्मे ' ततोऽन्तर्यं विश्वात्मा देहमाविश्य चक्रिणः । अवाप वैष्णवीं निद्रामेकीभूयाथ

१-६-२९ विष्णुने'ति ॥ २९ ॥

इति श्रीभागवते प्रथमस्कन्धसुबोधिनीप्रकाशे षष्ठाध्यायविवरणम् ॥ ३ ॥

अथ सप्तमाध्यायविवरणम् ।

अथ सप्तमाध्यायं विवरिषवः पूर्वप्रकरणस्य समाप्तत्वादुत्तरस्य चारप्स्यमाणतया तयोः सङ्गतिं वक्तुमाहुः एवमित्यादि । एवं शौनकप्रश्नमुखेन त्रिभिर्नारदव्याससम्वादं निरूप्य, मध्यमस्याधिकारस्य स्वातन्त्र्येण निरूपणात् निरूपणं विधाय, अथैतदनन्तरमुत्तमाभिधा उत्तमाधिकाराभिधानं त्रयोदशभिरध्यायैर्व्यासचरणैः क्रियत इति शेषः । तथा च व्यासपादोक्तावसरः प्रसङ्गो वा सूतोक्तौ तु प्रश्नोत्तरभाव एव सङ्गतिरित्यर्थः । नन्वस्य कथमुत्तमत्वमित्याकाङ्क्षायामाहुः साधक इत्यादि । अयं वर्ण्यमानो भगवानत्र प्रजानां दीनतया साधारणरूपाणां पतिः समन्ततो रक्षकः सन् साधकः । अधिकारश्च स्वतन्त्रः, अत उत्तमत्वम् । मध्यमे भगवतः साधकत्वेपि नारदस्य प्रजारूपत्वाभावान्न प्रजापतित्वेन साधकत्वम् । प्रथमे चाधिकारस्य न स्वातन्त्र्यम् । प्रकृते तूभयसत्त्वादुत्तमत्वमित्यर्थः । कुत एतदवगम्यत इत्यत आहुः साधकोयमित्यादि । निरूप्यत इति । सप्तमे सप्तमादिषडध्याय्यां वा निरूप्यत इत्यर्थः । अस्तूत्तमत्वम्, परमध्यायाः किमित्यधिका इत्यत आहुः द्वादशेत्यादि । निरूप्यत इति पूर्वेण सम्बन्धः । चोवधारणे । अवान्तरप्रकरणानि विभजन्ति निरूप्यते षड्भिरित्यादि । तथेति । षड्भिरित्यर्थः । हेतुषडध्यायीं विभजन्तः प्रस्तुताध्यायस्यार्थमाहुः हेतुरित्यादि । द्विविध इति । सामान्यविशेषभेदेन द्विविधः । नन्वेवमष्टविधत्वेऽष्टाध्याया अपेक्षिता इत्यत आहुः सप्तम इत्यादि । एतदेव प्रपञ्चयन्ति अत्र द्वीत्यादिना । निरूप्यत इति । उक्तक्रमप्रातिलोम्येन निरूप्यते । सामान्यहेतुत्रयं स्फुटीकुर्वन्ति यस्येत्यादि । श्रीभागवतव्यासयोरपि भगवद्रूपत्वान्नोक्तविरोधः । भक्तमनोरथपूरणमिति । तेन प्रकारेणाश्वत्थामप्रमोचनाद्द्रौपद्यादिमनोरथपूरणम् । एवञ्चात्र सामान्यहेतुत्वं भगवतो भक्तमनोरथपूरकत्वेन विशेषरूपत्वेपि देहरक्षकत्वेन ज्ञेयम् ।

ब्रह्मनद्यामित्यत्र । पुरो हविश्चेति । 'पुरोहविषि देवयजने याजये'दिति विधाय

१-६-२ 'एतद्वै पुरोहविर्दैवयजनं यस्य होतामानरनुब्रुवन्नग्निमप अप आदित्यमभि-
विपश्यती'ति। तल्लक्षणं तैत्तरीये षष्ठाष्टके श्रावितं तादृशमित्यर्थः। शम्या प्रास्यतेऽस्मिन्निति। शम्या गदाकारकाष्ठविशेषो यज्ञायुधम्। प्रास्यते प्रविध्यते बलेन प्रक्षिप्यत इति यावत्। यस्मिन् देशे स इत्यर्थः। नाम निरूप्य तत्तात्पर्यमाहुः तदग्नेरित्यादि। तदुपपादयन्ति तदैवेत्यादि। यदा तन्नियं धाम भवति, तदैवाग्निः गार्हपत्यादिः स्वस्थानात्कुण्डादाशम्यामासात् शम्या प्रवेधदेशमभिव्याप्यापक्षायति अङ्गाररूपेण बहिः पततीत्यर्थः। इदमेव कल्पकारेणोक्तम्। 'यस्याहिताग्नेरग्निरपक्षायेदाशम्याप्रासा'दिति। अत्रैव प्रकारान्तरेणाहुः यदीत्यादि। यदि परस्तरां शम्यापतनदेशादन्यदेशे अपक्षायेत्, अङ्गारोऽपगम्य पतेदित्यर्थः। इयं श्रुतिर्ब्राह्मणेऽच्छिद्रेऽस्ति कल्पसूत्रे च ॥ २ ॥

भक्तियोगेनेत्यत्र। तदाधारमिति। स्फुरितपदार्थाधारं मन इत्यर्थः। अप-
१-७-४ श्यदित्यत्र। पुरा आसेतिव्युत्पत्त्या पुरुपपदेनैव पुरुषोत्तमप्राप्तेः पूर्णपदमनतिप्रयोजनमित्यरुच्या पूर्णपदस्य प्रयोजनान्तरमाहुः जीवेत्यादि ॥ ४ ॥

अनर्थोपशममित्यत्र। ननु मोहस्याज्ञानकार्यत्वाज्ज्ञानेनैव तन्निवृत्तिसम्भवेन मोहनिवर्तकतया ज्ञानस्यैव दर्शनं युक्तमिति कुतो भक्तेस्तथात्वेन दर्शन-
१-७-६ मित्याकाङ्क्षायां ज्ञानस्यातथात्वं भक्तेस्तथात्वं च व्युत्पादयन्ति ज्ञानकाशयेत्यादि। इतीति। अतो ज्ञानस्वरूपस्य सन्दिग्धत्वादित्यर्थः। छिद्रूपत्वादिति। 'आगमोऽर्थः प्रजा देशः कालः कर्म च जन्म च। ध्यानं मन्त्रोऽथ संस्कारो दशैते गुणहेतवः। तत्तत्सात्त्विकमेवैषां यद्यद्वृद्धाः प्रचक्षते। निन्दन्ति तामसं तत्तद्राजसं तदुपेक्षित'मिति वाक्ये वृद्धवाक्यैः सात्त्विकत्वज्ञानोक्त्या वृद्धानामपि बहुविधत्वेन तथात्वादित्यर्थः। ननु मायाज्ञानोपायः सन्ध्याधिकरणे व्यासपादैरुक्त इति तदनुसारेण ज्ञातायां तद्विलक्षणतया ज्ञानस्वरूपमपि ज्ञास्यत इत्यत आहुः कार्त्स्न्येनेत्यादि। आदिपदेन बाधाभावः शास्त्रसम्वादः फलसम्वादश्च सङ्गृह्यते। अनर्थनिवर्तकत्वमिति। जन्मादिनिवर्तकत्वमिति। जन्मादिनिवर्तकत्वं कुतो नेत्याकाङ्क्षायामाहुः यथेत्यादि। नन्वनर्थप्राप्तिजनको मोहश्चेज्ज्ञानेन निवृत्तः, तदा मायाया विद्यमानत्वेऽप्यकिञ्चित्करत्वम्, अन्यथा ज्ञानेनानर्थनिवृत्तिबोधकानां शास्त्राणामप्रामाण्यप्रसङ्गेन महानुपप्लवः स्यादित्यत आहुः शास्त्रेत्यादि। तथा चातो मायानिवृत्तिरावश्यकैवेत्यर्थः। तर्हि शास्त्रस्य का गतिरित्यत आहुः शास्त्रं त्वित्यादि। साधकमिति। ज्ञानसाधकम्। ज्ञानमिति। उत्पद्यत इति शेषः। अत्र प्रमाणमाहुः मामेवेत्यादि। शास्त्रीय इवेति। शास्त्रीये धर्मे यथा श्रद्धा, तथेत्यर्थः। ननु यद्येवमेव पदार्थाः, तदान्येषामपि ऋषीणां योगिनां तथा भासेरन्,

यदि भासेरन्, तदा तथोच्येरन्, यतो नैवम्, अतो नैवमिति शङ्कायामाहुः अन्यथे-
त्यादि । **राजसादिभिरिति** । कर्तृभिः साधनैश्च क्रियमाण इति शेषः ॥ ६ ॥

अस्यामित्यत्र । तदुपपादितं प्रथमश्लोके इति । 'जन्माद्यस्ये'ति श्लोके
'यथा हि वेदे यज्ञीया' इत्यारभ्य 'भागवतसंहिते'त्यन्तेनोपपादित-
१-७-७
मित्यर्थः । इतः प्रथमश्लोके वा । कृष्ण इत्यादिपदद्वयव्याख्याने-
नोत्तममध्यमप्रथमाधिकारिणां भक्तिविषय उक्तो ज्ञेयः । स्वतन्त्रस्येति । इदं 'पुंस'
इत्यस्य व्याख्यानम् । स्वातन्त्र्यं चात्र देवतान्तरे साधनान्तरे च निष्ठाराहित्यं बोध्यम्७
स संहितामित्यत्र । अन्यव्यावृत्त्यर्थ इति । संहितान्तरपाठनादिव्यावृत्त्यर्थः ।
अनुक्रमेण शोधयित्वेति । यथाक्रममुक्तानुक्तदुरुक्तचिन्तां कृत्वा ।
१-७-८
अयं पक्षः श्रीधरोक्तः । अस्मिन् पक्षे समाधेः सदोषत्वमायातीत्यरुच्या
पक्षान्तरमाहुः आनुपूर्व्येण वेति । समाधौ क्रियमाणे सर्वा लीला युगपदेव भाता इति
पूर्वं भानानुसारेणोक्त्वापि पश्चाद्यथास्थानं तन्निबन्धनं आनुपूर्व्यं तत्कृतेत्यर्थः । पाठनं
तु द्वादशानामपि स्कन्धानां भाति । आरम्भे एव 'शुकमुखादमृतद्रवे'ति कथनात् ।
समाप्तौ सूतेनापि 'कस्मै येने'ति श्लोके 'योगीन्द्राय तदात्मना च भगवद्राताये'ति कथ-
नाच । लोकानुवर्तीति । चेदिति शेषः ॥ ८ ॥

१-७-९ **स वा इत्यत्र** । उक्तमिति । मन्तव्य इति श्रुतौ हेतुत्वेनोक्तमित्यर्थः॥९॥

आत्मारामा इत्यत्र । नन्वेषा भक्तिजनिका संहितेति भक्तिमार्गीयाणां तत्राद-
रात् ते किं न स्थिता यत्तान् विहाय व्यासचरणा मुक्तं शुकं तत्प्रचा-
१-७-१०
राय योजितवन्त इत्यत आहुः मार्गान्तरेत्यादि ॥ १० ॥

हरेर्गुणेत्यत्र । फलं गृहीतमिति । विषयेन्द्रियसंयोगफलं ज्ञानं तद्गुणैर्गृहीत-
मित्यर्थः । शुको महादेव इति । 'द्वैपायनाच्छुको जज्ञे भगवानेव
१-७-११
शङ्करः । अंशांशेनावतीर्योर्व्यां स्वं प्राप परमं पद'मिति कूर्मपुराणादित्ये-
त्यर्थः । स्वप्रतिष्ठार्थमिति । स्वस्य प्रकर्षेण स्थित्यर्थमित्यर्थः ॥ ११ ॥

परीक्षित इत्यत्र । परिपालितमिति । भावे क्तः परिपालनमित्यर्थः । परिपा-
लित इति वा पाठः । तावदर्थ्यमिति । तावदर्थस्य भावस्तावद-
१-७-१२
र्थ्यम्, एवं प्रकारकं परिपालनमित्यर्थः । पृष्टमित्यादि । पृष्टं परी-
क्षितमनूद्य तदादतज्जन्मादिहेतुकथनं प्रतिजानीत इत्यर्थः । एतेनाधिकारोक्ति प्रति
हेतुतागर्भः प्रसङ्गः सङ्गतिरुक्ता ज्ञेया । ननु पाण्डवसंस्थादेरपृष्टत्वात्तदुक्तेः किं प्रयोजन-
मत आहुः पुन्येत्यादि । संस्थामिति । सम्यक्स्थितिः प्रकारम्, देहत्यागप्रकारं चेत्यर्थः ।
अनतिबन्धार्यमित्युक्ते कथं प्रतिबन्धसंभावनेति शङ्कोदेति, तन्निरासार्थं प्रतिबन्धकतं

स्फुटीकुर्वन्ति प्रतिबन्धकत्वेत्यादि। यद्यप्यत्र नैकजातत्वम्, तथाप्येकस्वामिकक्षेत्रजातत्वात्तथेतिभावः। ग्रहणमिति। मुक्तेर्ग्रहणम्। अतएवेति। पाण्डुमोचनादेव। अन्यथेति। सर्वथापृष्टत्वे। प्रथमाध्याये 'को वा भगवतस्तस्ये'त्यनेन भगवद्यशःश्रवणादरस्य सूचितत्वान्नासङ्गतिरित्यर्थः॥ १२॥

१-७-१७ इति प्रियामित्यत्र। स्वरक्षेति। रक्षापदं धनुषि च रथे च सम्बध्यते।१७।

स्वमाय इत्यत्र। न प्राकृता इति। न स्वभावजाः। अत्र प्रकृतिमाययोर्भिन्नतया
१-७-२३ निर्देशात् प्रकृतिपदस्य स्वभावपरत्वं बोध्यम्। पूर्वानिति। दोषतया सम्भावितान् धर्मान्॥ २३॥

१-७-२९ श्रुत्वा भगवतेत्यत्र। प्रयोक्तृघातकत्वमिति। प्रथमब्रह्मास्त्रप्रयोक्तृद्रौणिघातकत्वम्॥ २९॥

१-७-३२ प्रजोपप्लवमितिश्लोकं व्याकुर्वन्ति अतःपरमित्यादि। उपसंहृतमिति। अर्जुनेनेति शेषः। स्वस्यापीति। दाहलक्षणमिति शेषः॥ ३२॥

१-७-३३ तत आसाद्येति श्लोकं व्याकुर्वते तत इत्यादि॥ ३३॥

१-७-३४ शिविरायेत्यत्र। सूचितमिति। कालरूपत्वात्सूचितम्॥ ३४॥

स्वप्राणानित्यत्र। प्राणाप्राणैर्जीवनमित्यत्र प्राणापानैरिति पाठो भाति।
१-७-३७ यस्य तत्रेत्यादि। यस्य पुंसस्तत्र तयोः प्राणापानयोः जीवनहेत्वोर्मध्ये प्राणैः प्राणजीवनं तदयुक्तमित्यर्थः। ननु नेदमयुक्तं यागे व्यभिचारादित्यत आहुः धर्मे त्वित्यादि। उभयतारकत्वादिति। 'सगृहः सपशुः सुवर्गं लोकमेती'ति तैत्तिरीये श्रावणेन तस्याः हिंसायाः कर्तृपशुतारकत्वादित्यर्थः। युक्त इति। प्राणसङ्क्षय इति शेषः। धर्म्यादिति। धर्मजनकाद्युद्धात्, तथा च युद्धेन मारणीय इत्यर्थः॥ ३७॥

तदसावित्यत्र। आत्मन इत्यस्यार्थः पुत्रानिति। भर्तुश्चेति चकारसूचितमर्थ-
१-७-४० माहुः कुलेत्यादि। द्रोणकुले दुर्योधनकुले चेत्यर्थः। अवध्यस्त्वहेतुरिति। द्रौणेरवध्यत्वप्रयोजको हेतुः। तथा चैतत्त्रयं ज्ञात्वा कामतो वधोऽर्जुनेन न कृत इत्यर्थः॥ ३९॥ ४०॥

अथोपेत्येत्यत्र। हेतुपदमिति। हेतुभूतं पदम्। नन्वेतदानयने 'विशिखैः शिर उपाहरे' इति प्रतिज्ञाया कथं पूर्तिरित्याकाङ्क्षायामाहुः अयं त्विति।
१-७-४१ देहस्त्विति। प्रतिज्ञातं त्विति च॥ ४१॥

उवाचेत्यत्र। षडङ्गसहितमिति। 'धर्म्यं न्याय्य'मित्येतद्विवरिष्यमाणषडङ्गसहि-

तम् । वलिष्ठमिति । ब्राह्मण्यमितिशेषः । नितरां गुरुरिति । एतेन
१-७-४३ भगवन्मुखत्वरूपो धर्मो महत्त्वादादरणीय इत्युक्तम् ॥ ४३ ॥

१-७-४५ स एष इत्यत्र । नान्वगादिति । द्रोणानुगमनं न कृतवतीत्यर्थः ॥४५॥

तद्धर्मज्ञेत्यत्र । वृजिने प्राप्ते इति । अन्तर्भावितण्यर्थः । अधर्मप्राय इति । 'विषमधिया रचितो य' इतिवाक्यं चित्रकेतुस्तुतौ षष्ठस्कन्धे । अत्र पूर्व-
१-७-४६ श्लोके भागवतधर्मस्यानवद्यतामुक्त्वा ' विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र । विषमधिया रचितो यः स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः ' इति वाक्यकथनादत्रापि धर्म एव परामृष्यत इति तथेत्यर्थः ॥ ४६ ॥ ४७ ॥

यैः कोपितमिति श्लोकं व्याकुर्वन्ति धर्मस्त्वित्यादि । तच्चेदिति ।
१-७-४८ ब्रह्मकुलं चेदित्यर्थः ॥ ४८ ॥

तत्राहेत्यत्र । तत्त्वसहित इति । तत्त्वमनारोपितं रूपं तेन युक्तः । प्रामाणिका इति । प्रमाणपर्यवसितमतयः । सूत्रात्मकत्वे क्रोधो न युक्त
१-७-५१ इत्यत आहुः अधर्मेत्यादि । भीमवचनस्यार्थमाहुः तस्येत्यादि ॥५१॥

निशम्येत्यत्र । उक्तवानिति । पूर्ववाक्यप्रतिनन्दनसूचितवाक्याभ्यां कथितवान् । भिन्नं वाक्यमिति । भगवत्कृतप्रतिनन्दनकथनोत्तरं चतुर्भुजपद-
१-७-५२ प्रयोगादेवावगन्तव्यमिति शेषः । नैकतापि विरुद्धानामिति । विरुद्धानां वाक्यानां एकतापि एकवाक्यतापि नेत्यर्थः । परस्परेत्यादि । ताभ्यां वाक्याभ्यां सम्भूयैककार्यजननाय तावेव तदुभयवाक्यार्थावेव स्तंभितवान् स्थापितवानित्यर्थः । आहेति । भगवानाहेत्यर्थः ॥ ५२ ॥

मय्येवोभयमित्यत्र । ज्ञात्वा मया समाम्नातमिति । द्रौपदीभीमहार्दं
१-७-५३ ज्ञात्वा समाम्नातम्, न तु शास्त्रत्वेनेत्यर्थः ॥ ५३ ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे सप्तमाध्यायविवरणम् ॥ ७ ॥

अथ अष्टमाध्यायविवरणम् ।

अथाष्टमाध्यायं विवरिषवः सङ्गतिं वक्तुं द्वयोरर्थमाहुः एवमित्यादिद्वाभ्याम् । एवमुक्तप्रकारेण या निरूपिता, सा सर्वहेतुकथायां सर्वेषां मनोरथपूरणे यो हेतुः भक्तिरूपस्तत्कथनार्थं निरूपिता । चकारेण सूतोक्तावपि हेतुनिरूपणेन तत्रापि श्रीभागवतप्रतिष्ठाहेतुभूतं यत्परीक्षितो भगवदीयत्वं तत्रापि हेतुस्तत्पूर्वजानां वैष्णवत्वं तत्कथनार्थं

निरूपिता। अष्टमे वाक्यकरणफलं सूतोक्तौ वैष्णवत्वदार्ढ्याय निरूप्यत इति शेषः।
अत्रेदं बोध्यम्। चतुर्थाध्याये शौनकादिभिः श्रीभागवतविषयकः तत्कर्तृविषयको वक्तृ-
विषयकः श्रोतृविषयकश्चेति चत्वारः प्रश्नाः कृताः। तन्मध्ये प्रथमस्योत्तरमग्रिमस्कन्धैवै-
कव्यम्। द्वितीयस्योत्तरं 'द्वापरे समनुप्राप्त' इत्यारभ्य 'शुकमध्यापयामास निवृत्तिनिरतं
मुनि'रित्यन्तैः साधिकैस्त्रिभिरध्यायैरुक्तम्। तदवान्तरप्रश्नोत्तरं चोक्तम्। ततस्तृतीयस्य
तु कथनाध्ययनभेदेन वारद्वयं प्रश्नेपि सप्तमाध्याये अध्ययनविषयकस्योत्तर एव 'नित्यं
विष्णुजनप्रिय' इत्यनेन कथनविषयकस्याप्युत्तरं सूचितम्। अतः परं चतुर्थोऽवशिष्यते,
स तु जन्मकर्ममायोपवेशहेतुप्राणत्यागविषयत्वेन चतुर्धा। तत्र जन्मनो महाश्चर्यत्वस्य तै-
र्ज्ञातत्वात् तत्र हेतुर्वक्तव्यः। अन्यथा विशेषणस्यापार्थत्वप्रसक्तेः। एवञ्च तद्धेतुर्महाश्चर्यत्व-
हेतुर्भगवदीयत्वम्, तत्रापि हेतुः पूर्वजानां वैष्णवत्वम्, तत्रापि प्राथमिकस्तद्धेतुः सर्वेषां
भगवद्वाक्यनिष्ठत्वरूप एव सप्तमे सिद्ध इति सोत्रानूदितः। तेनात्र सूतोक्तौ हेतुहेतुमद्भाव
एवं प्रकारक इति बोधितम्। पूर्वं तु व्यासोक्तसङ्गतिप्रदर्शनाय भक्तमनोरथपूरकत्वप्रमर्थ
उक्त इति न पूर्वोत्तरविरोधः। अत एवात्र 'कथायै चे'ति चकारो भक्तमनोरथपूरकत्वेपि
भगवद्वाक्यनिष्ठत्वस्य हेतुतासूचनायोक्त इति। एवमष्टमाध्यायार्थेपि द्रष्टव्यम्। आहेति।
यत्तदोर्नित्यसम्बन्धात्तदाहेत्यर्थः। अत्रैकं षोडशश्लोकैः सेत्स्यति, तदनन्तरं तु द्वितीयं
पृथास्तोत्रान्तैः सेत्स्यति, शेषानुतापकथा त्वेतदुपोद्घातत्वेनेति सूतोक्तौ प्रासङ्गिकी भगव-
त्कथा। व्यासोक्तौ तु सर्वदुःखनिवृत्तिपूर्वकभक्तिप्रदत्वमिति बोद्धव्यम्। एवमग्रिमाध्यायेपि।

घातयित्वेत्यत्र। कचस्पर्शमात्रेण कथमायुषः क्षय इत्याकाङ्क्षायामाहुः निरपराधे-
त्यादि। प्राणानामुत्तमादिति। आयतनादिति शेषः। 'अर्वाग्बिल-
१-८-५ श्चमस ऊर्ध्वबुध्नस्तस्मिन् यशो निहितं विश्वरूप'मिति श्रुतिव्याख्याने
'शिरो वै अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः प्राणा वै यश' इति श्रावणात् प्राणानामुत्तमायतनं
शिरस्तत्प्राप्य आयुषः प्राणाधीनस्य तत्र तथात्वात्तथेत्यर्थः॥ ५॥

याजयित्वेति श्लोकं व्याचक्षते तरतीत्यादिना। रात्रिसत्राधिकरणेनार्थवादि-
कफलस्यात्रोपादेयत्वे सिद्धे आहारपृथक्त्वपक्षेण आहार आहरणं प्रयो-
१-८-६ गस्तत्पृथक्त्वपक्षस्य 'तत्र सर्वेऽविशेषा'दित्यधिकरणे सिद्धत्वाच्चेनेत्यर्थः।
इदं पूर्वतन्त्रे चतुर्थस्य तृतीयपादे चिन्तितम्। तथाहि। 'सार्वकाम्यमङ्गकामैः प्रकरणा'-
दित्यस्मिन्नधिकरणे दर्शपूर्णमासज्योतिष्टोमादेः सर्वकामार्थत्वं सिद्धम्। तत्र कामा नैमि-
त्तिकाः, ज्योतिष्टोमादिस्वरूपं निमित्तम्। तच्च सर्वेषु कामेष्वविशिष्टमिति सकृज्ज्योतिष्टो-
माद्यनुष्ठानेप्येकमिवा(न्यो?)न्यान्यपि फलानि बाधकाभावाद्भवन्तीति युगपत्सर्वफलसिद्धि-
रिति प्राप्ते ब्रूमः। नात्र ज्योतिष्टोमं निमित्तीकृत्य कामा विधीयन्ते, कामानामननुष्ठेय-
त्वात्, किन्तु पुरुषस्य स्वत एव प्राप्तान् कामानुद्दिश्य ज्योतिष्टोमादिर्विधीयते। अत-

स्तेषां स्वर्गपश्वादीनां परस्परनिरपेक्षाणामेव फलत्वात् तत्तत्साधनत्वेन चोद्यमानो ज्योतिष्टोमादिरपि तत्तदर्थं पृथक् प्रयोगमर्हतीति वाक्यविचारादवसीयत इति ॥ ६ ॥

१-८-७ उपलेभेत्यत्र । प्रारम्भाद्यभावादिति । अत्र पाठः प्राकट्याद्यभावादिति भाति ॥ ७ ॥

पाहि पाहीत्यत्र । आगच्छन्तीवेति । अत्र आगच्छन्त्या एवेति, प्रदर्शयन्तीत्यत्र प्रदर्शयन्त्या इति, बोधयन्तीत्यत्र बोधयन्तीवेति पाठो भाति । इत्युक्तं
१-८-८ भवतीति । यथा पिधेहीत्यादौ द्वारादिपदार्थस्याभिनयेन प्रतीतिः, तथात्रापीत्यर्थः ॥ ८ ॥

१-८-९ अभिद्रवतीत्यत्र । अप्रतिकार्यपक्ष इति । अप्रतिकार्यत्वपक्षे ॥ ९ ॥

१-८-११ तर्ह्येवेत्यत्र । उभयत्रेति । पाण्डवेषु सायकेषु च ॥ ११ ॥

१-८-१२ व्यसनमित्यत्र । दूरापास्तमिति । प्रतिकारकरणमितिशेषः । तद्वैनानित्यादि । तथाच विषयरूपेण विषयार्थं रक्षिता इत्यर्थः ॥ १२ ॥

अन्तःस्थ इत्यत्र । ओषधे त्रायस्वैनमितिवदिति । दीक्षणीयायां दीक्षाङ्गत्वे विहिते केशश्मश्रुवपने क्षुरस्य नतिर्यङ्विधानमनया श्रुत्या कल्पे विहितं
१-८-१३ 'ओषधे त्रायस्वैनमिति स्वधीतं निर्धश्व निदधाती'ति । तथाचौषधे दाहनिधान एनं यजमानं त्रायस्व त्वक्छेदनाकरणाद्रक्षेत्यर्थात् यथा स्वधितिना रक्षा, तथा मायासंबन्धिदोषाजननात्तया आवरणमित्यर्थः । बहिः स्थितस्येति । बहिःस्थितकर्तृकमित्यर्थः । सुवर्णतेजोवदिति । तस्य तैजसत्वात् तेजो यथाकारणत्वेनान्तःस्थितं तथेत्यर्थः । दोष इति । ब्रह्मास्त्रस्य ब्रह्मशिरोरूपत्वात्तत्सम्बन्धे शिवस्येव पिशाचत्वदोष इत्यर्थः ॥ १३ ॥

१-८-१४ यद्यप्येत्यत्र । प्रतिकूलक्रियेति । नाशिका क्रिया । व्यावर्तकक्रियेति । स्तम्भिका क्रिया । अन्यथेति । वैष्णवनिर्णयाभावे ॥ १४ ॥

मा मंस्थेत्यत्र । तथात्वमिति । सात्त्विकत्वम् । तथात्वं न स्यादिति । स्वकार्यकरणसमर्थत्वं न स्यात् । एवं भगवद्वाक्यकरणजनितदोषस्य भगवत्कृतं
१-८-१५ समाधानमुक्तम् । अतः परं गुणपोषणमुच्यते, तत्र रक्षणं गुणस्तस्य पोषणं भक्त्यर्थत्वम्, तदत्र पृथास्तुत्या उच्यत इत्याशयेनाहुः एवं भगवतेत्यादि । स्तुत्यर्थबोधककारिकायां कृतहेलाज्ञेति एकं पदम् । कृतहेलाज्ञानवतीत्यर्थः । अग्रिमस्वारस्यात्पदद्वयं वा ॥ १५ ॥

नमस्य इत्यत्र । एवमज्ञेति । एतादृशं भवन्तं शब्दादिना जानन्त्यप्यात्मत्वेनाजा-

नन्तीत्यर्थः। दृश्यमानापेक्षयेति । दृश्यमानं मनुष्यत्वक्षत्रियत्वादि
१-८-१७-१८ तदपेक्षया। जडव्युदासार्थमिति । आद्यत्वं प्रकृत्याकाशादीनामपि तत्तन्मते वर्तते इति तद्व्युदासार्थमित्यर्थः। तर्ह्याद्यपदमनतिप्रयोजनमित्याशङ्कायामाहुः जीवेत्यादि। पितृरूपत्वमिति। 'पितामहस्य जगत' इति वाक्योक्तं तद्रूपत्वम्। न दृश्यत इति। 'पराञ्चि खानी'तिश्रुतेस्तथेत्यर्थः। कार्येत्यादि। सर्वानुमानापेक्षया कार्यलिङ्गकानुमानस्य सर्वथानुमापकत्वेपि भगवतोऽदृश्यत्वेन कार्यस्य तत्सहचारादर्शनेन व्याप्तिनिश्चया(भावा)त्तथेत्यर्थः। अत एवेति। उक्तस्वभावत्वादेव। अपीति। अलक्ष्यमिति शेषः। तेनालक्ष्यपदस्यावृत्तिर्बोध्या। गुरुणा वेति। अपदस्य गुरुवाचकत्वात्तथेत्यर्थः। अज्ञत्वकथनमिति। 'न वेद स' इति श्रुतावज्ञत्वकथनमित्यर्थः। कारणत्वं गच्छेदित्यादि। कारणत्वादीनां स्वरूपसंबन्धविशेषत्वेन स्वरूपद्वयात्मकत्वादेकतरनाशेपि तथात्वादित्यर्थः ॥ १७, ॥ १८ ॥

तथा परमेत्यत्र। आविर्भावान्यथानुपपत्त्येति। अज्ञापनार्थत्वे तदनुपपत्त्येत्यर्थः। रसजननायेति। नवरसोत्पादनायेत्यर्थः। दोषहेतुरूपेति।
१-८-१९ दोषप्राकट्यहेतुरूपेत्यर्थः ॥ १९ ॥

कृष्णायेत्यत्र। स्वोद्धारार्थमिति। स्वकीयोद्धारार्थम्। अज्ञानदशायामनमस्कार्यत्वे दृष्टान्तः यथेत्यादि। अस्मिन् पक्षे वासुदेवपदं मूलरूपपरम्।
१-८-२० इदं च सूतेनानूद्यते इति सत्त्वोपहितमेव मूलरूपं स्यादित्यरुच्या पक्षान्तरमाहुः कृष्णायेति वेति। पालकपुत्र इति। पालकस्य पुत्र इत्यर्थः। ननु कुमारपदेन कथमेतदुपलभ्यत इत्यत आहुः स्कन्द इत्यादि। वसनीवरीवदिति। यथायं शब्दो यज्ञियजलविशेषवाचको निगमसिद्धस्तथेत्यर्थः। सम्बन्धमोचकत्वमिति। सम्बन्धेन मोचकत्वम् ॥ २० ॥

नम इत्यत्र। पङ्कजनेत्रायेति सर्वपतित्वमिति। 'को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवे'दित्यादिषु पुराणवाक्येषु पुण्डरीकाक्षपदस्य विष्णौ
१-८-२१ रूढत्वाद्विष्णोश्च लौगाक्षिगृह्ये 'विष्णवे सर्वाधिपतये स्वाहे'तिवाक्येन सर्वाधिपतित्वस्योक्तत्वात्पङ्कजनेत्रत्वात्तथात्वं कल्पनाक्लेशेनायातीति तद्विहाय प्रकारान्तरेण सर्वपतित्वमाहुः वक्ष्यतेत्यादि। प्रयच्छेदिति। भक्तिं प्रयच्छेत् ॥ २१ ॥

यथेत्यादि। महतीति। कौतुकजनकत्वेन दुर्ज्ञेयेत्यर्थः। तर्ह्येतल्लीलानुसन्धाने किं वक्तव्यमित्यपेक्षायामाहुः भक्तेत्यादि। गुणत्वेपीत्यत्र गुणत्वेनेति
१-८-२२ पाठो भाति ॥ २२ ॥

१-८-२३ विषादित्यत्र। आस्मेति श्रीधरीये पाठः, अत्र तु स्मेत्येव पाठः ॥२३॥

---

१ तै. स. ६.४.२.

जन्मैश्वर्येत्यत्र। नवप्रकारा इति। स्वरूपगुणेति कारिकया पूर्वमुक्ताः। तदाहुः
स्वरूपेत्यादि। तदुपपादयन्ति तत्रेत्यादि। ज्ञात इति। उक्तश्लोक-
१-८-२५ त्रयोक्तप्रकारेण ज्ञाते। एवमग्रेपि। समीपगमन इत्यादि। समीपगमन-
पदेन पादसेवनम्। तस्मिन् सति तानि भवन्तीति समीपगमनादिर्द्वितीयः खण्ड इत्यर्थः। सख्यात्मनिवेदन इति। एतयोर्दैन्यनिवारकत्वात्तृतीयत्वं बोध्यम्। अप्ययेति श्लोके तद्व्युत्पादयिष्यते। नत्रेति। तेषु पदसु। तत्र तत्रेति। तत्तच्छ्लोकव्याख्याने। दुष्ट-दुर्ज्ञेयत्वस्य पादसेवनं प्रति कारणतामुपपादयन्ति तत्र प्रथममित्यादिना। दुष्टानामित्यादि। दुष्टसम्बन्धिनो ये तादृशव्यापारास्तेषाम्। पेयमिति। सुराख्यमन्नमलमितिशेषः। तत्कुलस्येति। तस्य कुलस्येत्यर्थः। जात्यन्तरमापन्न इति। म्लेच्छादिभावं प्राप्तः। मादकस्येति। मादकसम्बन्धिन इत्यर्थः। पूर्वोक्तरहिता इति। उक्तचतुर्विधपद-रहिताः। इतीति। इदं बोधयतानेन वाक्येनेत्यर्थः ॥ २५ ॥

न वेदेत्यत्र। चिकीर्षितावेदने हेतुमाहुः सामान्यत इत्यादि। कचिदिति।
कस्मिन्नपि काले। स्वाभाविकधर्मस्य भ्रमहेतुत्वे भगवद्धर्माणामेव मित्रा-
१-८-२८ दिभावं प्रति हेतुतायातीत्याशङ्कां वारयितुमाहुः स्वाभाविकस्येत्यादि।
सर्वभावित इति। इतजन्तम्। सञ्जातसर्वभाव इत्यर्थः ॥ २८ ॥

जन्म कर्म चेत्यत्र। न पूजयेति। मनुष्यादिरूपतयैव ज्ञानात्तथेति लक्षणज्ञान-
स्यैव तद्रूपपूजनहेतुत्वमित्यर्थः। अस्यानुकरणस्यात्यन्ततां स्फुटीकर्तु-
१-८-२९ माहुः विश्वस्मिन्नित्यादि। तथा चास्मिन्ननुकरणे उभयथाज्ञा य स
इति हेतोरस्यात्यन्तत्वमित्यर्थः। अत्यन्तत्वमत्राश्चर्यजनकत्वरूपं ज्ञेयम् ॥ २९ ॥

गोपीत्यत्र। सा कुतो न स्वाभाविकीत्याकाङ्क्षायामाहुः तत्राहेति। तदुपपाद-
१-८-३० यतीत्यर्थः ॥ ३० ॥

केचिदाहुरित्यत्र। भगवदिच्छाज्ञानादिति। इच्छाया अज्ञानादित्यर्थः। यशः
स्वरूपं तद्बीजकथनमुखेनाहुः तद्वंश्येत्यादि। यथा चन्दनसन्निहि-
१-८-३१ तवृक्षान्तराणां तथेत्यर्थः ॥ ३१ ॥

अपर इत्यत्र। देहमुख्यत्वेपि तुल्ये कथं द्वितीयमतमित्यपेक्षायां मतान्तरं बीज-
माहुः अपर इत्यादि। कृतप्रयत्नत्वादित्यपि वसुदेवविशेषणम्। कृत-
१-८-३२ तपस्त्वादित्यर्थः। अनेनेति। अजस्यैव जातत्वकथनाद्विरुद्धधर्माश्रयत्व-
बोधनेनेत्यर्थः। तत्रेति। जनने। अनेनेति। दैत्यमुक्तिदातृत्वसूचनेन। अत एवेत्यादि। दैत्यमुक्तिदातृत्वादेव उभयोः एतत्क्षेमासुरवधयोः भगवत्कार्यत्वमित्यर्थः। अन्यथेति। मुक्तिदानं विना। असुरवधस्य कार्यत्वाङ्गीकारे ॥ ३२ ॥

भारावतारणेत्यत्र । कालान्तरीयत्वादिति । पूर्वजन्मद्वयसम्बन्धेन तथात्वात् । तथा च तदर्थमाविर्भावे पूर्ववदंशेन प्रादुर्भवेत्, न तु पूर्णस्तथाभवेत्,
१-८-३३ अतो नेदं प्रयोजनमिति तेषामाशयः । कामप्रधाना इति । त्रिवर्गप्रधानाः । स्वतन्त्रफलतेति । भारावतरणस्येति शेषः । तथा च सुखसाधनस्य स्वतन्त्रफलतेति विरुद्धमापद्येतेतिभावः । दैहिक इव भवतीति । दैहिक इव भासते । ननु विस्मरणे कथमुत्तारणमिवेत्यत आहुः बुद्ध्या हीत्यादि । तथा चारोपकाभावादधःपात इत्युत्तारणमित्यर्थः । अनेनेति । उदधिनौदृष्टान्तेन । अनभिप्रेतत्वमिति । भारावतारणार्थं स्वावतारस्य तथात्वमित्यर्थः । एवं कृतमिति । अनेन प्रकारेण भारावतरणं कृतम् । ननु देवहितकरणादीनामपि प्रयोजनानां दृश्यमानत्वात् कथमेकमेव प्रयोजनत्वेनोच्यते इत्यत आहुः एकपक्ष इत्यादि । सर्वेषां मुख्यप्रयोजनत्वाङ्गीकारे को दोष इत्याकांक्षायामाहुः अन्यथेत्यादि । एकस्मिन् देहे प्रयोजनभेदेन नानारूपस्थितेः श्रुतिसिद्धत्वेन निबन्धे दर्शितत्वादत्रापि तद्भेदे तथा स्यादित्यर्थः ॥ ३३ ॥

भवेस्मिन्नित्यत्र । स्वरूपनिरूपण इति । 'तथापरमहंसाना'मिति श्लोके इत्यर्थः । ननु तत्रापि भक्तियोगपदेन श्रवणादिरेव विवक्षित इति तस्मादस्य को
१-८-३४ विशेषो येनास्य पूर्वपक्षकोटिपात इत्यत आहुः मुक्तीत्यादि । निरन्तरोत्पत्तिमार्गोद्गमनेनेति । 'जायस्व म्रियस्वे'ति श्रावितो निरन्तरोत्पत्तिमार्गः । ल्यब्लोपे पञ्चमी । तं प्राप्य कालिकप्रलयादिविचारेण यद्गमनं पूर्वावस्थानिवृत्तिस्तेन भवे उत्पत्तिरित्यर्थः । स्थित्येति । वर्तमानार्थकशानज्बोधितया स्थित्या । निरूपितमिति । 'एवं नृणां क्रियायोगा' इत्यादिना निरूपितम् । भगवद्धर्मपरत्व इति । तद्विषयत्वे ॥३४॥

शृण्वन्तीत्यत्र । स्वतः सेवामिति । स्वतः पुरुषार्थरूपां सेवाम् । एतदिति । स्वतः सेवनरूपं दास्यम् । तर्हि किमिति फलनिरूपणमित्यत आहुः
१-८-३५ तथापीत्यादि । एवमत्रापीति । स्वयमुद्यम्येत्यर्थः । एतेषामिति । श्रवणगानोपदेशानाम् । स्मरणनन्दनसहितानां वा । श्रवणकीर्तनानीति बहुवचनं गानस्याप्युपलक्षकम् । अवान्तरफलं स्मरणानन्दौ । अत इति । श्रवणादिभ्यः ॥ ३५ ॥

अप्यद्येत्यत्र । दैन्यं निरूपयतीति । दैन्यमनोजस्त्वं तद्दृष्ट्वा हि भगवान् भक्तेषु सख्यं प्रकटयति, यथा पुरञ्जनोपाख्यानेऽन्तर्यामिणा प्रकटितम्, अतः
१-८-३६ सख्यं प्रति तस्य कारणत्वबोधनाय तन्निरूपयतीत्यर्थः । विषयाभाव इति । दुःखाभावे । त्यागसम्भावनायां बीजमाहुः अन्यदेत्यादि ॥ ३६ ॥

१-८-३७ के वयमितिश्लोकं व्याकुर्वते नच वयमित्यादि ॥ ३७ ॥

१-८-३८ नेयं शोभिष्यते इति श्लोकं व्याकुर्वते किम्वायं देश इत्यादि ॥३८॥

अथेत्यत्र । द्वयमेव हि साध्यमिति । आत्मनिवेदने वक्ष्यमाणयोर्द्वयोरेव यतो
हेतुत्वमतो द्वयमेव साध्यमित्यर्थः । नास्तीत्यादि । तथा चात्मव्यति-
१-८-४० रिक्ताभावपक्षे प्रार्थनवैयर्थ्यमित्यर्थः । प्रतीतेनेति । आत्मानात्मोदा-
सीनतया प्रतीतेन । न कर्तव्यः स्यादिति । तथा च शास्त्रेषु ज्ञानिनां विरागत्वोक्ति-
र्विरुद्ध्येतेत्यर्थः । उक्तत्वादिति । 'इदं सर्वं यदयमात्मे'त्यादावुक्तत्वात् । स्फुरणा-
दिति । तत्परित्याग आवश्यक इति शेषः । नन्वेवं ज्ञायते चेत्परित्यागः कर्तव्य इत्यत-
स्तस्य दुष्करत्वमाहुः त्वदित्यादि । तथा च न तत्रास्मत्सामर्थ्यमितिभावः । विधेय-
दशायामित्यादि । विधेयत्वस्फूर्तौ सत्यां शास्त्रेण हेतुना स्नेहः पुत्रादिषु मया क्रियते,
तत्स्नेहकरणं विरुद्धशास्त्रैः पुत्रत्वादिधर्मबोधकैर्नाश्यते, तथा च तौ स्नेहतदभावावदृढत्वा-
दप्रयोजकावित्यर्थः । अविमोक इति । तथा चातः प्रार्थ्यत इति भावः ॥ ४० ॥

त्वयीत्यत्र । स्नेहं प्रार्थयत इति । आत्मनिवेदनहेतुत्वेन स्नेहं प्रार्थयत इत्यर्थः ।
ज्ञानेनेति । भगवति ह्यात्माधिष्ठातृत्वज्ञानेन । प्रतिबन्धकागणनाया-
१-८-४१ मिति । तत्तिरस्कृत्या प्रतिबध्यते ॥ ४१ ॥

श्रीकृष्णेत्यत्र । सम्बोधयदिति । क्रियाविशेषणमिदम् । स्वरूपमिति ।
'नमस्य' इत्यादिश्लोकत्रये गीतोक्तस्य पुरुषोत्तमस्वरूपस्य सिद्धत्वात्तस्य
१-८-४२ श्रौतत्वं बोधयितुं मूलनाम्ना स्वरूपमेवं बोध्यते इत्यर्थः । गाम्भीर्या-
द्य इति । तेन वैष्णवतन्त्रोक्तरूपतापि सूचितेति भावः । हविस्त्याग इति । यागात्मा
धर्म इति शेषः । अन्येषामिति । फलानामित्यर्थः । यद्योगेनेत्यादि । योगो हि चित्त-
वृत्तिनिरोधात्मकः, तेन करणे मनसो रुद्धत्वान्न प्रसाद इत्यतोऽतिदैन्यम्, तथा च
तदीश्वरत्वेन तन्नियामकत्वाद्वृत्त्यनिरोधे चित्तप्रसादाद्दैन्यनिवृत्तिरिति भावः ॥ ४२ ॥

पृथयेतिश्लोकं व्याचक्षते एवं स्तुतेत्यादि । आहेति । पृथयेतिश्लोकं आह ।
नन्वत्र मोहनं किमित्युच्यत इत्याकाङ्क्षायां तत्तात्पर्यमाहुः विषये-
१-८-४३ त्यादि । भगवद्गुणेष्वियत्ताभावादखिलोदयस्तुतेरशक्यत्वेनाखिलपद-
वैयर्थ्यमाशङ्क्य खिलं न्यूनमखिला अन्यूना इति यौगिकार्थं पुरस्कृत्य भगवद्गुणेषु स्वतो
न्यूनत्वाभावात् स्फुरणाभावस्फुरणप्रयुक्तौ खिलत्वतदभावावित्याशयेनाहुः परितः
स्फुरिताः सर्वे इति । यावन्तः स्फुरितास्ते सर्वे इत्यर्थः । नन्वस्त्वेवम्, तथापि कुन्ती-
बुद्ध्या तेषां कथमखिलत्वमित्याकाङ्क्षायामाहुः गुणानामित्यादि । तथा चैवं कुन्तीबुद्ध्या
अखिलत्वमित्यर्थः । एवमखिलत्वसाधने उपपत्तिमाहुः एकधेत्यादि । एकस्य नानात्व-
मेव श्रुतावभिप्रेतम्, निबन्धे तथोपपादनादित्यत उपपत्त्यन्तरमाहुः तथा लीलार्थेति ।

श्रीधरमतं दूषयन्ति नु स्तुतावित्यादि । जयविजयपातनाद्वेति । यथा तत्र स्वविचारितमेव कृतवान्, तथात्रापीतिबोधनायेत्यर्थः ॥ ४३ ॥

तामित्यत्र । प्रार्थितामिति । रतिमित्यर्थः । एवं स्तोत्रमार्थनाङ्गीकारमुखेन गुणपोषणमुक्तम् । अतः परं युधिष्ठिरानुतापग्रन्थः किमर्थ इत्याकाङ्क्षा-
१-८-४४ यामाहुः इयं हीत्यादि । तथा च दोषसमाधाने गुणपोषणे च भगवतोऽद्भुतकर्मत्वं व्युत्पादयितुमेष ग्रन्थ उपोद्घातरूप इत्यर्थः । अत इति । मुक्तत्वात् । तथात्वादिति । 'द्युतं च मांसं च सुरा च वेश्या पापर्द्धि चौर्यं परदारसेवे'त्येवं सप्तत्वात् । तथा च द्युतादिव्यसनान्मुक्तस्यापि शोकान्मा बन्ध इत्यद्भुतमित्यर्थः । नन्वस्त्वेवम्, तथापि द्युतव्यसनविमोकस्य बहुकालमारभ्य जातत्वादिदानीमेव किमिति बन्ध इत्यत आहुः स्वस्मिन्नित्यादि । 'कृष्णे त्वि'त्यनेनापि 'यद्दैवे'त्यादि क्रमनुपज्यते । तथा च 'यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासये'त्यादिवाक्यात्स्वार्थं यदा वाजिमेधाः कृताः, तदा मोहोभवदित्यर्थः ॥ ४५ ॥

१-८-४९ नैनो राज्ञ इतिश्लोकं व्याचक्षते नन्वित्यादि ॥ ४९ ॥

यथा पङ्केनेत्यत्र । अयथाविधसाधनैरिति । सम्पादितो यज्ञ
१-८-५१ इति शेषः ॥ ५१ ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशेऽष्टमाध्यायविवरणम् ॥ ८ ॥

अथ नवमाध्यायविवरणम् ।

अथ नवमाध्यायं विवरिषवः सङ्गतिं वक्तुमष्टमादिचतुष्टे परीक्षिद्रक्षाया अनिरूपणे हेतुं सपरिकरं त्रिभिर्वदन्तोऽग्रे तन्निरूपणे हेतुमाहुः लोक इत्यादि । कार्यं स्फुटीकुर्वन्ति ऐहिकेत्यादि । कथमेवमत आहुः श्रीत्यादि । निरूपितेति । अष्टमे निरूपिता । मध्ये इति । नवमादित्रये । तथा च व्यासोक्तौ सूतोक्तौ चाङ्गाङ्गीभावो निर्वाहकत्वं चेति समानैव सङ्गतिरित्यर्थः । ऐहिकेत्यादि । कारिकोक्तमर्थं व्याकुर्वन्ति एवमित्यादि । तेनैककार्यत्वं सङ्गतिः फलिष्यति । रक्षापूर्वाङ्गेनेति । मायावरणेन । नन्वैहिकामुष्मिकयोरेकसम्बन्धाय पाण्डवमुक्तिरेव निरूप्या, भीष्ममुक्तिकथनस्य कः प्रसङ्ग इत्यत आहुः नवम इत्यादि । स्वस्येति । स्वकीयस्य भिन्नत्वं 'यस्तान् द्वेष्टि स मां द्वेष्टी'त्युद्योगे भगवद्वाक्यात्पाण्डवद्वेषेण अभगवदीयत्वं प्राप्तस्य मुक्त्यभावसंशये तच्छान्त्यै संशयशान्त्यै वर्ण्यत इत्यर्थः । ननु तथापि तत्र भगवद्गमनादिरूपस्य भीष्मपुरस्कारस्य कथनं कुत इत्याकाङ्क्षायामाहुः पुरस्कृत इत्यादि । पुरस्कृतो भीष्मः । अयं द्रोहरूपं भगवद्-

पराधमुत्सृज्य देहं जह्यादिति हेतोः पुरस्कार ईरितः । तथा च भक्तेन कृतेपि द्रोहे भगवान् तन्निवर्तनार्थं स्वयमेव प्रतिबन्धं दूरीकरोतीति ज्ञापयितुं तदुक्तिरिति भावः । प्रासङ्गिकं प्रयोजनान्तरमाहुः राज्ञ इत्यादि । राज्ञो युधिष्ठिरस्य यो मोहस्तस्याप्यनुपेक्षणीयत्वायोपदेशतो निवृत्तिरपि वक्तव्या, अन्यथा क्लेशे विद्यमाने 'अन्ते या मतिः सा गति'रितिन्यायाद्राज्ञोपि मुक्तिप्रतिबन्धः स्यात्, अतस्तदर्थमपि पुरस्कारोक्तिरित्यर्थः । शेषं स्फुटम् । तथापीति । उद्धार्यत्वेपि । तादृग्रूपेणेति । आततायुद्धारकरूपेण ॥१॥

१-९-३ भगवानित्यत्र । भगवतोनुवृत्तिरिति । भगवत्कर्तृकानुवृत्तिः ॥३॥

दृष्ट्वेत्यत्र । यादृश इति । यादृशस्तादृश इत्यर्थः । आगत्येत्यादि । आगत्य यन्नमनं तत्तु लोकात् लोकमाश्रित्य लोकसङ्ग्रहार्थमित्यर्थः । लोक-
१-९-४
सङ्ग्रहस्वरूपमाहुः । भक्तस्तथा नम्यः, न चेत्, यदि भक्तो न स्यात् । विपरीतत्वं दोग्धृभावमापन्नः प्राप्तः कथमेवं नम्यो भवेदिति अयं यादृशतादृशभक्तस्य नम्यत्वबोधनरूपो लोकसङ्ग्रह इत्यर्थः ॥ ४ ॥

१-९-५ तत्रेत्यत्र । स्वार्थदर्शनादिति । काले मनःसङ्गः स्वार्थस्तद्दर्शनादित्यर्थः । बाधकविषयत्वमिति । बाधकस्य तद्धर्ममुख्यत्वसाधकयुक्त्यादेर्विषयत्वमित्यर्थः ।

१-९-६ पर्वत इत्यत्र । न देवर्षित्वमात्रमिति । अत इति शेषः ॥ ६ ॥

कृष्णं चेत्यत्र । कथं पूजितवानिति । सम्बन्धित्वेन वा ज्ञातित्वेन वेश्वरत्वादिना वेत्यर्थः । मायाया देहग्रहणोक्तौ मायावादिवत्काल्पनिको देह इति
१-९-१०
शङ्का स्यात्तन्निवृत्त्यर्थमाहुः प्राकृतेत्यादि । निरूपित इति । सूतेन निरूपितः । उत्तरत्रेति । दशमाध्याये कौरवेन्द्रपुरस्त्रीवाक्येषु, तस्य वास्तवत्वं तु 'यस्यामतं तस्य मत' 'अविज्ञातं विजानतां विज्ञातमविजानता'मित्यादिश्रुत्या ज्ञेयम् ॥ १० ॥

१-९-१२ अहो कष्टमित्यत्र । निरन्वयमिति । प्रसिद्धहेतुरहितम् ॥ १२ ॥

सर्वं कालकृतमित्यत्र । बहूनामित्यादि । 'ईश्वरो वा भवेत् कर्ता पुरुषो वापि भारत । हठो वा विद्यते लोके कर्मजं वा फलं स्मृत'मिति राजधर्मे-
१-९-१४
ष्वत्र लोकादीनां कर्तृत्वप्रतिपादनादित्यर्थः । निराकरणादिति । धर्मनन्दनपदेन कर्मणः धर्माश्रयपदेन लोकस्य च निराकरणादित्यर्थः । सदृष्ट्येति । वक्ष्यमाणया सदृष्ट्या । वश्यत्वे हेतुः वयसेत्यादि । कालमित्येति । कालमानेनेत्यर्थः ॥ १४ ॥

तस्मादित्यत्र । दैवतन्त्रमित्यनेन कालस्य निरूपितत्वादिति सम्बन्धः ।
१-९-१७
सर्वाधीनकथनादिति । अत्र बहुव्रीहिर्बोध्यः ॥ १७ ॥

इति मतिरित्यत्र । अभेदेपि शक्तिरूपत्वेन भिन्नाभिन्नतया प्रकृतिस्वरूपे विद्यते

१-९-३२ तस्याः उद्भवो नायाति तत्संयोगादन्यस्यैव त्वायातीत्याशयेनाहुः न घटत इत्यादि ॥ ३२ ॥

त्रिभुवने इत्यत्र। स्वरूप इति। जीवात्मरूपे। तथा सतीति। शास्त्रसंस्कारेण सौन्दर्ये सति। औत्पत्तिक इत्यादि। एतेन 'श्यामाच्छबलं
१ ९-३३ प्रपद्य' इति श्रुत्युक्तरूपता निबन्धोक्तरीत्या स्मारिता। अनेनेति। वृक्षसम्बन्धिना। पीताम्बरस्य मायारूपत्वे प्रकाशकत्वासम्भवाद्विशेषणबलाद्विवक्षितं स्वरूपमाहुः तथा वेद इत्यादि। सूर्यो हि त्रय्यात्मा रूपात्मना घटादीन् प्रकाशयति तथेत्यर्थः। पीताम्बरस्य वेदत्वं तु 'वासश्छन्दोमयं पीत'मिति द्वादशस्कन्धवाक्याद्बोध्यम्। स्वरूपाच्छादकत्वेन। उक्त इति। वरे उक्ते। अनेनेति। भगवदावरकत्वकथनेन। स्पष्टमिति। अवकाशदानेन प्रतीत्या च स्पष्टमित्यर्थः। ननमिति। न विद्यते नः निषेधो यस्येति ननम्। त एव वा त इति। ते ब्रह्मविद एव वा ते। कुलाः कुं संस्कृतपृथिव्यात्मकं शरीरं लान्ति गृह्णन्तीत्यर्थः। अग्निब्राह्मणरूपमिति। अग्निरूपं ब्राह्मणरूपं चेत्यर्थः। अग्नेरासनत्वं च। 'रविमध्ये स्थितः सोमः सोममध्ये हुताशनः। वह्निमध्ये स्थितं सत्त्वं सत्त्वस्यान्तः स्थितोऽच्युत' इति मैत्रायणीयश्रुतौ 'वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमङ्गल'मित्येकादशस्कन्धे सिद्धम्। नन्वनवद्यरतिप्रार्थनस्योत्तमाधिकारे सम्भवात्तथात्वे 'मम निशिते'त्याद्युत्तरग्रन्थविरोध इत्यत आहुः भगवदित्यादि। तत्त्व इति। अन्तःकरणादिजेतृत्वे। तथा च तदानीं तदभावान्न विरोध इत्यर्थः। ननु तदानीं तदभावे इदानीं कथमीदृशो भाव इत्यत आहुः एवमित्यादि। तथा च भगवदवस्थाभेदादेवैवं भाव इत्यर्थः। एतस्याः सात्त्विकसात्विकीत्वं तु सर्वकमनीयतया सुखजनकत्वेन प्रकाशकत्वेन च सत्त्वकार्यकरणाज्ज्ञेयम् ॥ ३३ ॥

युधीत्यत्र। भक्तश्रवणकटुकत्वाद्दूरान्वयेन प्रकारान्तरमाहुः युद्धेत्यादि। ननु रजोधूसरत्वादिकं शोभाजनकत्वाभावान्न रतिजनकमिति कुतस्तद्वर्णन-
१-९-३४ मत्रेत्याकाङ्क्षायामाहुः राजसेत्यादि। परोक्षवादेन कालरूपत्वबोधनाय च पक्षान्तरमाहुः अथवेत्यादि। सूर्यादीनां तुरगत्वे मानमाहुः अग्निरित्यादि। श्रुतिस्तु 'अग्निर्वा अर्वा वायुः सप्तिः आदित्यो वाजी एताभिरेवास्मै देवताभिर्देवरथं युनक्ति' इति ब्राह्मणप्रथमकाण्डीयतृतीयप्रपाठकषष्ठानुवाके वाजपेयप्रकरणेऽस्ति। ते च त इत्यादि। 'यदि प्रयास्य'न्नित्यादिनोक्ताः क्रममुक्त्यधिकारिण इत्यर्थः। भिन्ना वेति। सकामाः ब्रह्मविदश्चेत्यर्थः। च समुच्चय इति। चोत्र न निपातरूपः। समुच्चयेऽव्ययत्वस्य वैकल्पिकत्वात्। 'चश्चन्द्रदस्युशोभासु पुंसि पक्षे समुच्चये। अथार्थे वाक्यविस्तारे प्रसङ्गे पादपूरणे। अन्योन्यार्थे समाहारे मर्यादायामनुक्रमे। पुनरर्थेऽव्ययं पश्चादुत्तरेषु व्यवस्थित'

इत्येकाक्षरकोशे तथोक्तत्वात् । इतरयोगार्थत्वपक्षे यद्यप्यंऽपयत्वं कोश उक्तम्, तथापि तुना अपिनेत्यादिवदत्र नामत्वमेव चस्य विवक्षणीयम् । आनने यस्येति । भक्ष्यभूता यस्येत्यर्थः । सद्रूप इति । अस्मिन् पक्षे बाहुलकात्तकारस्य यकार अकारात् पूर्वभावश्च बोध्यः । महासामर्थ्यमिति । 'यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम् । महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ती'ति कम्पनाधिकरणविषयवाक्यश्रावितं तदित्यर्थः । पूर्वश्लोकार्थ इति । अनवद्यभक्तिप्राप्तिरूपे ॥ ३४ ॥

१-९-३५ सपदीत्यत्र । तृतीयो गुण इति । तमो गुणः । पूर्ववदिति । तादृशत्वेपि भक्तवत्सल इत्यर्थः ॥ ३५ ॥

१-९-३६ व्यवहितेत्यत्र । विहिता इति । विशेषेण हिताः । आत्मविद्यास्वरूपमाहुः अमैव क्रियेत्यादि । 'मत्तः सर्वं प्रवर्तते' 'यदा यदा हि धर्मस्य' 'वासांसि जीर्णानि' इत्यादिवाक्यान्यत्रोदाहरणत्वेन बोध्यानि । अस्य परमत्वे परः को वेत्यत आहुः स एव पर इत्यादि । तथा च परत्वेपि परमत्वं प्राप्तस्येत्यर्थः । अत्रापि 'मत्तः परतरं नान्यत्' 'मत्तः स्मृतिर्ज्ञानमपोहनं चे'त्यादि द्रष्टव्यम् । एवं रूपभेद इवायातीत्यरुच्या पक्षान्तरमाहुः तदवस्थां प्राप्तस्येति । आत्मविद्योपदेशेन युद्धकारणेन चास्याः अवस्थायाः सात्त्विकराजसत्वं ज्ञेयम् ॥ ३६ ॥

१-९-३७ स्वनिगमेत्यत्र । अधिका चेत्यादि । 'अहं भक्तपराधीन' इत्येवमधिका कृते-त्यर्थः । रथस्यैव चक्रे इति । तेन भारते क्षुरान्ततीक्ष्णाग्रत्वकथनमपि सुदर्शनावेशादिति बोधितम् । दोषाभावमिति । प्रतिज्ञात्यागेपि दोषाभावम् । भक्षणाय प्रवृत्तत्वेन फलावदारणवन्मारणार्थत्वाभावादिति । उपर्याच्छादनार्थमिति । भारते 'व्यालम्बी पीतान्तपट 'इति विशेषणेनोत्तरीयस्य पीतान्तत्वकथनाद्रविरूरगौरवत्वाभावेन न वेदरूपतेति मायारूपत्वात्तदर्थमित्यर्थः । आच्छादनस्वरूपमाहुः अर्जुनो रक्षित इति । मुक्त्यर्थतामाच्छाद्यार्जुनरक्षार्थता प्रकटीकृतेत्यर्थः । द्वितीयमाहुः स इत्यादि । स इति । उत्तरीयपटः । रतिकार्यकर्तृत्वादिति । मुक्तिदानकर्तृत्वात् । अत्र स्वप्रतिज्ञात्यागस्तामसोऽभियानं राजसमिति तामसराजसत्वमवस्थाया ज्ञेयम् ॥ ३७ ॥

१-९-३८ शितेत्यत्र । अत्राततायिनो म इति सम्बन्धषष्ठी, तेन मत्सम्बन्धी सन् मद्वधार्थमभिसारेत्यर्थो भवति, तथा सति शितविशिखहतत्वादिकं राजसं वधार्थमभिसरणमित्यवस्थाया राजसतामसत्वम् ॥ ३८ ॥

१-९-३९ विजयेत्यत्र । ईक्षणीयतया सुखजननं सात्त्विकं हतानां स्वरूपप्रापकत्वं तामसमित्यवस्थाया राजससात्त्विकमित्यवस्थायास्तथात्वम् ॥ ३९ ॥

१-९-४० ललितेत्यत्र। उन्मदान्धपदोक्तमोहजनकत्वं तामसं निरीक्षणं च सात्विकं तदेवोक्तकार्यजनकत्वान्मुख्यमित्यवस्थायाः सात्त्विकतामसत्वम् ॥४०॥

१-९-४१ मुनीत्यादि। न त्वेतस्मिन्निति। न त्वेतच्छरीरान्तर्वर्तीत्यर्थः। अत्र राजसूयस्य राजकर्तृकत्वे राजसत्वात्तत्सम्बन्धितयार्हणीयत्वस्य राजसत्वम्। ज्ञानोत्तरं निश्चयात्सात्त्विकत्वम्। सावस्था तादृशी ज्ञेया ॥ ४१ ॥

१-९-४२ तमिममित्यत्र। न तु जीववदिति। नत्वभिमानितयेत्यर्थः। क इति। भिन्नो अभिन्नो वा ॥ ४२ ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे नवमाध्यायविवरणम् ॥ ९ ॥

अथ दशमाध्यायविवरणम्।

१-१०-० अथ दशमाध्यायं विवरिषवः पूर्वाध्यायार्थमनुवदन्तः प्रस्तुतस्यार्थमाहुः नैश्चिन्त्येत्यादि। निरूप्यत इति। नैश्चिन्त्यसिद्धये निरूप्यते। एतेन सर्वभक्तसमाधानपूर्वकस्वस्थानप्राप्तिरूपं तृतीयकार्यं यत्प्रागुक्तं तेनास्यार्थसङ्गतिर्बोधिता। तत्प्रकारमाहुः पाण्डवेत्यादि। ननु पाण्डवसुखदानं त्वादावेव पङ्क्तिरुच्यते, शेषे त्वध्याये सर्वेषां भगवत्परत्वमिति तस्य कथमध्यायार्थेन संगतिरित्यत आहुः कृष्णेत्यादि। तथा च शेषं हेतुतयोच्यते इति सैव सङ्गतिरित्यर्थः। एतेन पूर्वमध्यायार्थत्वेनोक्तं सर्वमुक्तिदातृत्वमपि समर्थितम्।

१-१०-१ एवं सर्वमर्थं सङ्गृह्य व्याख्यातुं कथासङ्गतिं वदन्तः श्लोकमवतारयन्ति पूर्वाध्यायेत्यादि। राज्यस्थितिमिति। राज्ये युधिष्ठिरस्य स्थितिप्रकारम्। कौरववधस्तु घटत इति बोधयितुमाहुः अवध्येत्यादि। प्रकारान्तरेणापि तेषामधर्मित्वबोधनायाहुः अस्वेत्यादि। नन्वेवं वधे दोषाभावे राज्यकरणस्य कथं दुष्टतेत्यत आहुः अनेनेति। रिक्थस्पृग्पदेन। इति सम्बन्ध इति। एवं सन्देहबोधनाय सर्वत्र शत्रुवधादौ सम्बन्ध इत्यर्थः। सन्देह इति तु पाठः प्रतिभाति। तदासव?। इदानीं वेति। वाशब्द एवकारार्थो वाक्यालङ्कारे। प्रतिकूलत्वे इति। पूर्वावरोधप्रतिकूलत्वे॥१॥

१-१०-२ वंशमित्यत्र। अन्योन्येत्यादि। तथा च स्वयंकृतत्वात्स्वयं प्रतीकाराभाव इत्यर्थः। अभिवृद्धीत्यादि। तथा च वंशवृद्ध्यर्थं संरोहितवानिति भावः। ननु मोक्षदानार्थमुद्यतस्तद्विरुद्धे राज्ये कथं निवेशितवानित्याकाङ्क्षायामाहुः अथवेत्यादि ॥ २ ॥

१-१०-४ काममित्यत्र। क्रमोदिता इति। त्रिविधसौख्यरूपा गुणा इति शेषः ४

उषित्वेत्यादीनां तात्पर्यं आहुः कारिकया । वृथैवेत्यादि । भक्तिश्च ज्ञानं च कृष्ण
१-१०-७ उरसश्चाश्चेति समासः । ननु चैवं ते मुक्तिं विनापि वैयर्थ्यमेवेति तन्निरासं
आहुः कृष्णेत्यादि । 'विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिण' इत्यादि-
वाक्यात् तथेत्यर्थः । हस्तिनापुरे भगवतो या स्थितिः सा मथुरादिस्थितेर्विलक्षणेति
बोधनाय तत्तात्पर्यमाहुः हस्तीत्यादि । वास इति । भगवतः स्थितिः । निरन्तरास-
क्तिर्मथुरादिसम्बन्धिनी । कालवशादेव स्थितवान्, न स्वेच्छयेति वारयितुमाहुः
कालस्येत्यादि । स्थितेः कथं मुक्तिहेतुत्वमित्याशङ्कायां तत्प्रकारमाहुः स्थित्वेत्यादि ।
भाव आशयः । गान्धार्यां विराटतनयातिदेशस्य तात्पर्यमाहुः यथेत्यादि । उत्तराया
भर्ता मारितः, पुत्रो रक्षितः, गान्धार्याः पुत्रो मारितः, भर्ता रक्षित इत्येकैकमारणरक्षण-
साम्यात्तथेत्यतिदेशोक्तिरित्यर्थः । विरहासहनोक्त्यवसरे राजार्जुनौ कुतो नोक्ताविति
आहुः राजेत्यादि । एकशेषादिति । 'पुमान् स्त्रिये'ति सूत्रोक्तादेकशेषात् ॥७-१०॥

सत्सङ्गानित्यत्र । लौकिकमित्यादि । भगवत्प्रभावादिना भगवत्यलौकिकत्वस्य
१-१०-११ ज्ञानत्वात्सर्वप्रकारेण लौकिकं न भवतीत्यर्थः । विरहस्य दुःसहत्वं सम-
र्थयितुं विरहानुभवं व्युत्पादयन्ति उपदिष्टेत्यादि । उपदिष्टैरित्या-
युक्तदशाद्वये सत्सङ्गादित्यादिकं यथायथं रसोत्पत्तौ हेतुद्वयम् । सत्सङ्गादिजन्यस्य रसस्य
ज्ञानादिनाऽभवने हेतुमाहुः मानसेत्यादि । तथा च तद्वैलक्षण्येन तयोः सकाशाज्जाय-
मानस्य सुरसस्यापि वैलक्षण्ये हेतुभेदाद्यथा तत्र रसवैजात्यम्, तथात्रापि रसवैजात्यमिति
ज्ञानादिना सत्सङ्गादिजन्यरसाभवने सिद्धेऽन्तर्यामित्वेन सत्ता ज्ञानदशायामपि बहिस्तद-
भावाद्विरहो युक्त एवेत्यर्थः । ननु सुखाद्युपादानमात्मा वा मनो वा, अतस्तयोर्विद्यमानत्वेन
तत्र सत्ताज्ञाने विद्यमाने निमित्तमात्रवैजात्येन कार्यवैजात्यं न युक्तमिति ज्ञानादिनापि
तादृशरसः सम्भवदुक्तिक इति विरहोऽनुपपन्न इति शङ्कायामाहुः स्त्रिया इत्यादि ।
धार्ष्ट्यंस्तः । दोपस्फूर्त्येति । दोषपूर्विकया स्फूर्त्या । तथा च स्रक्चन्दनवनितादिषु
पर्यायेण दोषाद्यदर्शनात्तन्निष्ठरसस्य स्वनिष्ठकामादिदोषकृतया प्रियत्वादिस्फूर्त्या

ग्युंज्येत्यादि। भिन्नतया स्थितज्ञानमिति। भिन्नतया स्थित इत्याकारकं ज्ञानम्। था च कामाद्यभावेपि दोषान्तरस्य तत्र सत्त्वात् न व्यभिचार इतीहापि तेनैवाभिव्य-क्तिरिति ज्ञानेन रसाभावाद्विरहो युक्त एवेत्यर्थः। भिन्नज्ञानादेर्दोषत्वे युक्तिमाहुः अन्यथे-त्यादि। भिन्नत्वज्ञानादेर्दोषत्वे शङ्कते नन्वित्यादि। कार्यदुष्टत्वस्य कारणे दोषता-प्रयोजकत्वात् प्रकृते च कार्यस्य भक्तिमाधुर्यादिबोधकतयाऽदुष्टत्वाद्विरहकारणस्य भिन्नत्व-ज्ञानादेर्गुणत्वमेवाङ्गीकार्यम्, न तु दोषत्वमित्यर्थः। तदुक्तमुपगम्य परिहरन्ति सत्य-मित्यादि। तथा च यद्यपि त्वदुक्तयुक्त्या गुणत्वमुचितम्, तथापि यथा 'क्षुत्खलु वै मनु-ष्यस्य भ्रातृव्यः अशनया मृत्युरेवे'त्यादिश्रुत्या बुभुक्षादीनां दोषत्वकथनादप्रयोजकम्, तथा 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुत' इत्यादिश्रुत्या भिन्नत्वज्ञानादेर्दोषत्वकथनादे-तयोरपि गुणत्वमप्रयोजकमित्यर्थः। ननु बुभुक्षादीनां लोकेपि दोषत्वात्तद्दृष्टान्तेनात्र गुणत्वत्यागो नोचित इति शङ्कायां लोके तेषां दोषत्वं परिहरन्ति अन्यथेत्यादि। तथा च यथा लोके तेषां गुणत्वं शास्त्रे दोषत्वम्, एवमेतयोरपि भक्तौ गुणत्वं शास्त्रे दोषत्व-मित्यर्थः। सिद्धमाहुः तस्मादित्यादि। रसस्य दोषाभिव्यङ्ग्यत्वनियमात् तथेत्यर्थः। एतादृशस्य रसजनकत्वे शास्त्रीयदशापेक्षयैतादृशदशाया उत्तमत्वे च मानमाहुः अत एवेत्यादि। तथा चास्य दर्शनस्य दोषजन्यत्वेपीदमेवाधिकं 'गोविन्दभुजगुप्तायां द्वार-कायां कुरूद्वह। अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालस' इत्यादिवाक्यादतोनेन ज्ञानोपमर्दाद्विरहो युक्त इत्यर्थः। आधिक्ये मानान्तरमाहुः किञ्चेत्यादि। तथा चास्मादेव विशेषान्मुक्तेषु देहसम्बन्धं मुक्तानां सृष्टिं च करोतीत्यतो ज्ञानादिदशापेक्षयेयमेवाधिके-त्यर्थः। तेन सिद्धमाहुः अत इत्यादि। यतो भगवान् 'क्वचिद्गुणोपि दोषः स्याद्दोषोपि विधिना गुण' इतितत्तत्कार्यार्थं तत्तथा तथा व्यवस्थापयतीति तथेत्यर्थः।

श्लोकव्याख्याने सत्सङ्गपदं पञ्चम्यन्तमपि सम्भवतीत्याशयेनाहुः तदनन्तरमिति। ननु भगवद्विरहासहनप्रस्तावे सत्सङ्गत्यागाशक्तिनिरूपणं कुत्रोपयुज्यत इत्याकाङ्क्षाया-माहुः यदर्थमित्यादि। तथा च भगवत्संबन्धादेव तत्त्यागानिष्टेति तद्विरहासहनप्रस्तावे तदुक्तिरुचितैवेत्यर्थः। प्रकारान्तरेणाप्युपयोगमाहुः अत्याग इत्यादि। सिद्धमाहुः कीर्तिरित्यादि। पूर्वमुक्तत्वादिति। स्तुतिप्रस्तावे पूर्वाध्याये उक्तत्वात्॥ ११॥

१-१०-१२ वीक्षन्त इत्यत्र। न विरोध इति। सम्बन्धस्य न विरोध इत्यर्थः॥१२॥

१-१०-१४ मृदङ्गेत्यत्र। भेर्या आनद्धभेदे गणना, 'ताड्यमानतु भेरीभि'ति भारते प्रयोगाज्ज्ञेया॥ १४॥

१-१०-१५ प्रासादेत्यत्र। 'भक्तिधर्मज्ञाने'त्यत्र धर्मपदेन स्त्रीस्वभावरूपो धर्मो गृह्यते॥ १५॥

उषित्वेत्यादीनां तात्पर्यं आहुः कारिकया। बृथैवेत्यादि। भक्तिश्च ज्ञानं च तत्तया
१-१०-७ उरसवाश्वेति समासः। ननु नैते मुक्तिं विनापि वैयर्थ्यमेवेति तन्निरासे
आहुः कृष्णेत्यादि। 'विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिण' इत्यादि
वाक्यात् तथेत्यर्थः। हस्तिनापुरे भगवतो या स्थितिः सा मथुरादिस्थितेर्विलक्षणेति
बोधनाय तत्तात्पर्यमाहुः हस्तीत्यादि। वास इति। भगवतः स्थितिः। निरन्तरास्थि-
तिर्मथुरादिसम्बन्धिनी। कालवशादेव स्थितवान्, न स्वेच्छयेति वारयितुमाहुः
कालस्येत्यादि। स्थितेः कथं मुक्तिहेतुत्वमित्याकाङ्क्षायां तत्प्रकारमाहुः स्थित्वेत्यादि।
भाव आशयः। गान्धार्या विराटतनयातिदेशस्य तात्पर्यमाहुः यथेत्यादि। उत्तराया
भर्ता मारितः, पुत्रो रक्षितः, गान्धार्याः पुत्रो मारितः, भर्ता रक्षित इत्येकैकमारणरक्षण-
साम्यात्तथेत्यतिदेशोक्तिरित्यर्थः। विरहासहनोत्तमवसरे राजार्जुनौ कुतो नोक्ताविलत
आहुः राजेत्यादि। एकशेषादिति। 'पुमान् स्त्रिये'ति सूत्रोक्तादेकशेषात् ॥७-१०॥

सत्सङ्गानित्यत्र। लौकिकमित्यादि। भगवत्प्रभावादिना भगवत्यलौकिकत्वस्य
१-१०-११ ज्ञातत्वात्सर्वप्रकारेण लौकिकं न भवतीत्यर्थः। विरहस्य दुःसहत्वं सम-
र्थयितुं विरहानुभवं व्युत्पादयन्ति उपदिष्टेत्यादि। उपदिष्टेत्या-
द्युक्तदशाद्वये सत्सङ्गादिरित्यादिकं यथायथं रसोत्पत्तौ हेतुद्वयम्। सत्सङ्गादिजन्यस्य रसस्य
ज्ञानादिनाऽभवने हेतुमाहुः मानसेत्यादि। तथा च तद्वैलक्षण्येन तयोः सकाशान्मान-
मानस्य सुखस्यापि वैलक्षण्ये हेतुभेदाद्यथा तत्र रसवैजात्यम्, तथात्रापि रसवैजात्यमिति
ज्ञानादिना सत्सङ्गादिजन्यरसाभवने सिद्धेऽन्तर्यामित्वेन सत्ता ज्ञानदशायामपि बहिस्तद-
भावाद्विरहो युक्त एवेत्यर्थः। ननु सुखाद्युपादानमात्मा वा मनो वा, अतस्तयोर्विद्यमानत्वेन
तत्र सत्ताज्ञाने विद्यमाने निमित्तमात्रवैजात्येन कार्यवैजात्यं न युक्तमिति ज्ञानादिनापि
तादृशरसः सम्भवदुक्तिक इति विरहोऽनुपपन्न इति शङ्कायामाहुः स्त्रिया इत्यादि।
चात्तुंसः। दोषस्फूर्त्येति। दोषपूर्विकया स्फूर्त्या। तथा च स्रक्चन्दनवनितादिषु
पर्यायेण द्रोणादिदर्शनात्तत्तन्निष्ठरसस्य स्वनिष्ठकामादिदोषकृतया प्रियत्वादिरूपस्फूर्त्या
अभिव्यक्तिर्दृश्यते इति तस्याः उत्कटकामनया तस्यां कामस्य सार्वदिकत्वात् तस्याः
स्वतः सुखं सदा स्यात्, तथा सति विरहदुःखं न तस्याः स्यात्, तच्च दृश्यते, अतो
निमित्तवैजात्ये कार्यवैजात्यमवश्यमङ्गीकार्यम्। तथा सति बहिः सम्बन्धजन्यस्य रसस्य
कामादिदोषैरनभिव्यक्तेर्ज्ञानादिनाऽभवनाद्विरहो युक्त एवेत्यर्थः। ननु रसस्य सुख-
त्वभिव्यक्तौ तदभिव्यक्तिं प्रति स्वनिष्ठदोषस्फूर्तेः कारणता न युक्ता, सायुज्यादा-
वभिव्यक्तस्यात्मसुखस्य दोषं विनाभिव्यक्तेर्व्यतिरेकव्यभिचारात्। अतो यथा तत्र,
तथा भगवत्प्राभिव्यक्तावपि ज्ञानादिना रसाभिव्यक्तेर्विरहो न युक्त इत्यत आहुः

युज्येत्यादि। भिन्नतया स्थितज्ञानमिति। भिन्नतया स्थित इत्याकारकं ज्ञानम्। ा च कामाद्यभावेपि दोषान्तरस्य तत्र सत्त्वात् न व्यभिचार इतीहापि तेनैवाभिव्य- ारिति ज्ञानेन रसाभावाद्विरहो युक्त एवेत्यर्थः। भिन्नज्ञानादेर्दोषत्वे युक्तिमाहुः अन्यथे- ादि। भिन्नत्वज्ञानादेर्दोषत्वे शङ्कते नन्वित्यादि। कार्यदुष्टत्वस्य कारणे दोषता- ोजकत्वात् प्रकृते च कार्यस्य भक्तिमाधुर्यादिबोधकतयाऽदुष्टत्वाद्विरहकारणस्य भिन्नत्व- नादेर्गुणत्वमेवाङ्गीकार्यम्, न तु दोषत्वमित्यर्थः। तदुक्तमुपगम्य परिहरन्ति सत्य- त्यादि। तथा च यद्यपि त्वदुक्तयुक्त्या गुणत्वमुचितम्, तथापि यथा 'क्षुत्खलु वै मनु- ास्य भ्रातृव्यः अशनया मृत्युरेवे'त्यादिश्रुत्या बुभुक्षादीनां दोषत्वकथनादप्रयोजकम्, ा 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुत' इत्यादिश्रुत्या भिन्नत्वज्ञानादेर्दोषत्वकथनादे- ोरपि गुणत्वमप्रयोजकमित्यर्थः। ननु बुभुक्षादीनां लोकेपि दोषत्वात्तद्दृष्टान्तेनात्र णत्वत्यागो नोचित इति शङ्कायां लोके तेषां दोषत्वं परिहरन्ति अन्यथेत्यादि। तथा यथा लोके तेषां गुणत्वं शास्त्रे दोषत्वम्, एवमेतयोरपि भक्तौ गुणत्वं शास्त्रे दोषत्व- ेत्यर्थः। सिद्धमाहुः तस्मादित्यादि। रसस्य दोषाभिव्यङ्ग्यत्वनियमात् तथेत्यर्थः। ादृशस्य रसजनकत्वे शास्त्रीयदशापेक्षयैतादृशदशाया उत्तमत्वे च मानमाहुः अत ्रेत्यादि। तथा चास्य दर्शनस्य दोषजन्यत्वेपीदमेवाधिकं 'गोविन्दभुजगुप्तायां द्वार- ायां कुरूद्वह। अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालस' इत्यादिवाक्यादतोनेन ानोपमर्दाद्विरहो युक्त इत्यर्थः। आधिक्ये मानान्तरमाहुः किञ्चेत्यादि। तथा चास्मादेव ेशेषान्मुक्तेषु देहसम्बन्धं मुक्तानां सृष्टिं च करोतीत्यतो ज्ञानादिदशापेक्षयेयमेवाधिके- र्थः। तेन सिद्धमाहुः अत इत्यादि। यतो भगवान् 'क्वचिद्गुणोपि दोषः स्याद्दोषोपि ेधिना गुण' इतितत्तत्कार्यार्थं तत्तथा तथा व्यवस्थापयतीति तथेत्यर्थः।

श्लोकव्याख्याने सत्सङ्गपदं पञ्चम्यन्तमपि सम्भवतीत्याशयेनाहुः तदनन्तरमिति। ्नु भगवद्विरहासहनप्रस्तावे सत्सङ्गत्यागाशक्तिनिरूपणं कुत्रोपयुज्यत इत्याकाङ्क्षाया- ाहुः यदर्थमित्यादि। तथा च भगवत्संबन्धादेव तत्त्यागानिच्छेति तद्विरहासहनप्रस्तावे दुक्तिरुचितैवेत्यर्थः। प्रकारान्तरेणाप्युपयोगमाहुः अत्याग इत्यादि। सिद्धमाहुः कीर्तैरित्यादि। पूर्वमुक्तत्वादिति। स्तुतिप्रस्तावे पूर्वाध्याये उक्तत्वात्॥ ११॥

१-१०-१२ वीक्षन्त इत्यत्र। न विरोध इति। सम्बन्धस्य न विरोध इत्यर्थः॥१२॥

१-१०-१४ मृदङ्गेत्यत्र। भेर्या आनद्धभेदे गणना, 'ताड्यमानासु भेरीष्वि'ति भारते प्रयोगाज्ज्ञेया॥ १४॥

१-१०-१५ प्रासादेत्यत्र। 'भक्तिधर्मज्ञाने'त्यत्र धर्मपदेन स्त्रीस्वभावरूपो धर्मो गृह्यते॥ १५॥

उद्भव इत्यत्र । विष्णोः पद इत्यादि । अस्यां श्रुतौ मधुन आनन्दादेर्भगवत्पदाधिकरणकत्वकथनात् तेषां तादृशज्ञानवत्ताज्ञापनाय मधुपद-
१-१०-१७ मुक्तमित्यर्थः ॥ १७ ॥

अश्रूयन्तेत्यत्र । तथापीति । अनुवादत्वेनाप्रामाण्यत्वेपीत्यर्थः ।
१-१०-१८ गृहीता इति । प्रमाणत्वेन गृहीताः ॥ १८ ॥

स वै किलेत्यत्र । प्रमाणे नेति । अत्र प्रमाण इति सप्तम्यन्तम् । नेति भिन्नं पदं बोध्यम् । प्रतिपाद्यत इतिशेषः । तत्र गमकमाहुः आत्मेत्यादि ।
१-१०-२० 'पूर्वमेवे'त्यादिश्रुतिस्तु आरुणकेतुकब्राह्मणस्था । तथा च स पुरुषः पुराणो भविष्यति, नायमित्यर्थः । अत्रेति । उक्तश्रुतिषु । इदानीन्तनैरिति । ब्रह्मविष्णुमहेशादिभिः । नन्वस्मदाद्यपेक्षया पुरातनत्वं तेषामस्तीत्यतिव्याप्तिर्दुर्वारेत्यत आहुः यत्किञ्चिदित्यादि । कयाचिदिति । 'पूर्वमेवे'तिश्रुतेः कूर्मवाक्यत्वेन कूर्मस्यावतारस्वरूपया मायाभर्तृत्वरूपया वेत्यर्थः । एतदिति । एकस्य सत्त्वम् । अग्रे तदानीमिति । 'सदेव सौम्येदमग्र' 'नासदासीन्नो सदासीत्तदानी'मित्यादिश्रौतशब्दोक्तिः । प्रमाणाभावादित्यादि । विशेष्यान्वितैवकारेण सदसन्निषेधेन च तदभावात् । पश्चादिति । 'रेतोधा आस'न्नित्यादिश्रुत्युक्त वक्राद्युत्पत्त्यनन्तरम् । तदानीन्तनेत्यादि । पाश्चात्यव्यवहारमाश्रित्य ततः पूर्वस्थितिबोधनार्थं तथोक्तमित्यर्थः । अत्र गमकमाहुः उभयेत्यादि । तथा च 'सदासीदग्र आसी'दित्येवमुभयसत्ताप्रतिपादने तथेत्यर्थः । ननु तत्र कालसत्तानूद्यत एव, न तु प्रतिपाद्यत इति न वाक्यभेद इत्यत आहुः ततः पूर्वमित्यादि । 'सदेवे'त्यादिश्रुतिः सर्वतः पूर्ववृत्तान्तं वदन्ती एवकारेण चेतरं व्यवच्छिन्दन्ती प्रमाणान्तरस्याप्यसत्तां पूर्वं बोधयतीति तदभावान्नानुवादः शक्यवचन इति कालप्रतिपादकत्वमेवादरणीयम्, तथा सति दोषस्तदवस्थ इत्यर्थः । कालप्रतिपादकत्वे दूषणान्तरमाहुः एकमित्यादि । पूर्वं कालसत्ताप्राप्तौ तद्भ्रमनिरासायात्र वाक्यशेषे एकपदमन्ययोगव्यवच्छेदपूर्वकमुक्त्वा एकपदस्य वाचकत्वान्मुख्येतरव्यवच्छेद एव वाक्यार्थ इतिभ्रमनिरासायाद्वितीयपदस्यात्र श्रावणात्तद्विरोध इत्यर्थः । एतन्नाकुर्वन्ति कथमित्यादि । निराकुर्वन्निति । अद्वितीयपदेन निराकुर्वन् । बोधनसमयानुसारेणेति । बोधनमर्यादानुसारेण । ननु मास्तु कालः, तथापि आसनक्रियाया विद्यमानत्वात् कथमेकसत्तासिद्धिरित्यत आहुः आसनेत्यादि । पूर्ववद्वेति सिद्धान्तानुसारेणेति । 'पूर्ववद्वे'त्यधिकरणे यः सिद्धान्तस्तदनुसारेण । जगदात्मनीति । अनारोपितानागन्तुकं रूपमात्मपदेनोच्यते, तथा च जगतोऽनारोपितानागन्तुकरूपे इत्यर्थः । कालेत्यादि । कालस्यापि कश्चिदुपादानत्वकथनात्तादृशः कालो भविष्यतीति कथमेतदेकसत्ता-

सिद्धिरित्याशङ्कायां तन्निराकरणार्थमित्यर्थः। ईश्वर इति। 'प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः। सतोऽभिव्यञ्जकः कालो ब्रह्मतत्त्रितयं त्वहम्'इति वाक्यात्सर्वेषामपि मूलरूपः स्वयमेवेत्यर्थः। जीवेत्यादि। ननु तथापि 'नित्यो नित्याना'मित्यादिश्रुतौ जीवानां नित्यत्वनिरूपणात्तत्सत्तायां कथमेतदेकसत्तेति शङ्कायां जीवनिराकरणार्थमित्यर्थः। नितरामित्यादि। 'सर्व एवात्मानो व्युचरन्ती'ति श्रुत्या व्युचरणोत्तरमेवांशानां जीवरूपेण प्राकट्यात् ततः पूर्वमप्राकट्येन तत्सिद्धिरित्यर्थः॥ २०॥

स एवेत्यत्र। तत्रेति। सृष्टिकरणे। कालं सृष्टवानिति। तृतीयस्कन्धे कालनिरूपणे 'पुरुषस्तदुपादानमात्मानं लीलयाऽसृज'दितिवाक्यादित्यर्थः।
१-१०-२१ द्विविधेति। वक्ष्यमाणकार्यद्वयकरणाद्विविधा। प्रतिकृत्येति। पूरितपात्रसञ्ज्ञापकतुल्यरूपया। स्वेच्छयेति। अविद्याकामकर्मभिर्भ्रमणात् स्वकामेन। तदेति। एवं कार्यद्वयकरणे। जीवार्थेति। जीवपुरुषार्थसिद्ध्यर्था। केवलया तया सृष्टिकरणे मोक्षप्रतिबन्धादिति। इदानीन्तनाया इति। जीवसृष्टिकालसम्बन्धिन्याः। जगद्रूपेण भवनार्थं भगवतस्तत्सम्बन्धप्रकारमाहुः तद्व्यापारेत्यादि। 'सर्वयोनिषु कौन्तेय मूर्तयः प्रभवन्ति याः। तासां ब्रह्म महद्योनिरहं बीजप्रदः पिते'तिवाक्यादित्यर्थः। वेदकरणप्रयोजनमाहुः केवलेत्यादि। तेन व्यामोहितेष्विति। 'यन्नामभिर्ध्यायति धीरपार्थै'रितिवाक्यात्तथेत्यर्थः॥ २१॥

स वा अयं यत्पदमित्यत्र। ननु ब्रह्मविद्भिः समाधिनान्तरात्मोपास्यते इति बहिर्विद्यमानस्यास्य कथं तथात्वमित्याकाङ्क्षायामाहुः बाह्येत्यादि।
१-१०-२२ पूर्वमिति। 'स वै किलाय'मिति श्लोके 'य एक आसी'दित्यनेनेत्यर्थः। तद्वाक्यादिति। 'आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा। असितो देवलो व्यास' इति तेषां वाक्यात्। त्वमिति। त्वम्पदवाच्यत्वेनोपदिष्ट इत्यर्थः॥ २२॥

स वा अयं सखीत्यत्र। जीवतुल्यता स्यादिति। अहन्ताममताभ्यां संसारासक्तिः स्यादित्यर्थः। दोषसम्बन्ध इति सप्तमी। नेति भिन्नं पदम्।
१-१०-२३ क्षतिरिति। सौन्दर्यहानिः। एतेन 'अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जग'दित्यादिश्रुत्युक्तोवयवावयविभावो जीवब्रह्मणोर्बोधितः। स इति। श्रेत्पदव्यामत्वादि- सम्बन्धवद्धीकृतत्वसम्बन्धः। गुणत्वे हेतुमाहुः तदर्थमित्यादि। जीवार्थमेव प्रपञ्चस्य भोग्यत्वेन निष्पन्नतया भोग्यत्वरूपतत्स्वभावाभिव्यञ्जकत्वादित्यर्थः। ननु कर्तृत्वभोक्तृत्वयोः साहचर्यस्य लोके दृष्टत्वात्तर्हि कर्तृत्वमप्यस्त्विति चेत्, तत्राहुः अंशानामित्यादि। तया च व्याप्यभावे साहचर्यमात्रमप्रयोजकमिति न तत्सिद्धिरित्यर्थः। त्रिपदबहुव्रीहेः क्वाचित्कत्वाद्व्याख्यानान्तरमाहुः सन्निभिर्वेत्यादि। अत्रेति। अनुगीतत्वे। यत्कृत्य-

मिति । कविनिबद्धायाः कथायाः सखीनां वक्तृत्वम् । विशकलिततयेति । भिन्नतया । प्रक्रियाया इति । प्रकरणस्य । सर्ववेदान्तप्रत्ययाधिकरणं साधनाध्यायतृतीयपादारम्भे । सर्वत्र प्रसिद्धोपदेशाधिकरणं प्रथमस्य द्वितीयपादारम्भे । तत्रेति । सर्गादिषु ॥ २३ ॥

यदा हीत्यत्र । सामान्यविशेषभेदेनेति । लोकस्थितिर्लौकिकस्थितिभेदेन । तत्रेति । स्थितिसर्गसंहारेषु । इत्यादीति । वाक्यादिविशेषः । तत्र
१-१०-२४ यदेति । उपमर्देन प्रादुर्भावे विशेषस्थितिकाले । स्थिताविति । लौकिकस्थितौ । निवेद्येति । स्वदौर्बल्यं निवेद्य । नैमित्तिकमुक्तम् । यदापदेन कालविशेषबोधनाद्भगवदागमनं नैमित्तिकमुक्तमित्यर्थः । वर्तुलमिति । लोष्टत्रिविडम् । निमित्तमिति । अवतरणे निमित्तम् । यदा यदेत्यादि । तथा चास्मिन् वाक्येऽहमितिपदादस्यैव तत्कार्यम्, न सगुणस्य विष्णोरित्यर्थः ॥ २४ ॥

१-१०-२५ अहो अलमित्यत्र । सतामिति । भगवदीयानां यादवानाम् । तस्य पूजन इति । तत्कृते पूजने । सर्वैरिति । देवै ऋषिभिश्च ॥ २५ ॥

१-१०-२६ अहो बतेत्यत्र । स्थितिरिति । भगवत्स्थितिः । तत्रत्यानां वा ॥२६॥

नूनमित्यत्र । एवमिति । मर्यादापुष्टिभेदेन स्त्रीणां स्वरूपे भेदद्वयम् । एकमिति । गृहीतपाणित्वम् । भगवत्फलमिति । भगवत्सम्बन्धिफलम् । 'सुपां
१-१०-२७ सुलु'गिति लुप्तविभक्तिकं सखिपदमित्याशयेनाहुः हे सख्य इति ॥२७॥

एवंविधा इत्यत्र । पुरयोषितामित्यनेन तासां धाष्टर्यबोधनमुच्चैः कथने
१-१०-३० हेतुर्बोध्यः । अभिनन्दने हेतुः सत्यकथनं बोध्यम् ॥ ३० ॥

१-१०-३२ अथेत्यत्र । उभयत्रेति । मिलने भिन्नतया गमने चेत्यर्थः ॥ ३२ ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे दशमाध्यायविवरणम् ॥ १० ॥

अथैकादशाध्यायविवरणम् ।

अथैकादशाध्यायं विवरिषवोऽवसररूपां सङ्गतिं बोधयितुं पूर्वाध्यायार्थमनुवदन्तः प्रस्तुतार्थमाहुः एवं कौरवेत्यादि । कथमुदीर्यत इत्याकाङ्क्षायां तद्धेतूनवान्तरार्थानाहुः प्रवेशो चेत्यादि । एवं त्रिधोत्सवकथनेन कथं सर्वभक्तसौख्यमत आहुः प्राकृतेत्यादि । तथा च तेषां सात्त्विकादिभेदेन त्रैविध्यात्तेन तथेत्यर्थः । शास्त्रार्थं जानतां कथमेवमत आहुः कृष्णेच्छानस्त्विति । प्रत्यापत्तिः पूर्वसजातीयसुखस्य पुनः प्राप्तिः । तथा चैवं सर्वसौख्यं निरूप्यत इत्यर्थः । प्रवेशे उत्सवो मङ्गलात्मेति तानि गणयन्ति

शङ्खनाद इत्यादि । स्निग्धदर्शनं स्निग्धविषयकं भगवत्कृतं दर्शनम् । तदन्त इति । तत्पुरोभागे ।

तत्रोपनीतेत्यत्र । तत्रेतिमूलस्थपदस्य भगवन्निकट इत्यर्थः । सूर्योद्देशेनेत्या-
दिना उपढौकनमित्यन्तेन व्याख्यानेन इदानीन्तनैरप्येवंभावेनोप-
१-११-४ ढौकनं कार्यमितिशिक्षा बोधिता । कार्यमिति । भगवता कार्यम् । तथा च निजलाभेन भगवल्लाभेन आत्मारामं पूर्णकामं यथा स्यात्तथा आदृता इति योजना बोध्येर्थः । एवं श्लोकद्वयस्य प्रत्येकवाक्यत्वपक्षे द्वितीयश्लोके तिङन्तक्रियाविरहेण क्लिष्टमिव मन्वाना युग्मवाक्यत्वमङ्गीकृत्य पक्षान्तरमाहुः अथवेत्यादि । नन्वादृता इत्यन्तमेकं वाक्यम्, आत्मेत्याद्यर्भका इत्यन्तमपरमित्येवमादरणीयं दूरान्वयदोषाभावादित्याशङ्कायामाहुः स्तोत्रेत्यादि । तथा चैवमन्वयाङ्गीकारे कर्माकाङ्क्षायाः पूर्वार्धेन पूरणात्पितरमित्याद्यर्थस्यासङ्गतिः पुनरादाने समाप्तपुनरात्तत्वं दूरान्वयश्चेत्यतो नायं पक्षो युक्तः, किन्तु पूर्वोक्त एव युक्त इत्यर्थः । अस्मिन् पक्षे प्रतिर्लक्षणे कर्मप्रवचनीयस्तद्योग इयं द्वितीयेत्याशयेन द्वितीयान्तानामर्थमाहुः उत्कृष्टैरित्यादि । अवान्तरप्रकरणविचारे उक्तश्रुतेर्जीवप्रकरणस्थत्वेनानुपष्टम्भकत्वमित्यरुच्या पक्षान्तरमाहुः अथवेत्यादि । तिरोभावानुपपत्तिदशायामिति । द्वन्द्वान्ते श्रूयमाणस्य दशाशब्दस्य प्रत्येकमभिसम्बन्धः । अव्यक्तादिनिधनत्वादिति । अव्यक्तमादिनिधनयोर्येषां पदार्थानां तादृशत्वादिति व्यधिकरणपदो बहुव्रीहिः । उक्तमिति । व्याख्यातमित्यर्थः । निजपदस्य स्वरूपवाचकत्वपक्षेऽर्थमाहुः अवतीर्णेत्यादि । अन्यैरादृतत्वादुत्तरार्धे दृष्टान्तवाक्यत्वाङ्गीकारेण दोषाभावाच्च तृतीयामपि योजनामङ्गीकृत्य तस्मिन् पक्षेऽर्थमाहुः स्तोत्रेत्यादि ॥ ५ ॥

नताः स्मेत्यत्र । तत्राद्यानामिति । पुरुषेष्वाद्यानाम् । वाक्यार्थो न भव-
तीति । समभिव्याहारलभ्यो न भवतीत्यर्थः । अत्र नमनमात्रवाक्यं
१-११-६ स्त्रीणाम् । तत्पूर्वकं सर्वं ज्ञानिनामिति बोध्यम् ॥ ६ ॥

भवायेत्यत्र । उद्भवायेति । तथा च 'भवाय भवे'ति प्रार्थनमेव वक्तॄणां निष-
यित्वगमकं ज्ञेयमित्यर्थः । जरायुवदित्यादि । तथा च त्वन्निष्ठमातृता-
१-११-७ निर्वाहकत्वात् गौण्या वा तस्या मातृत्वमिति न तथा तव मातृत्वहानि-
रित्यर्थः । तदर्थविहितेति । भगवदर्थविहितेत्यर्थः । तत्रेति । कर्मज्ञानभक्तिषु । मोहनार्थं चेति । वाशब्द एवकारार्थः । 'छागो वा मापदर्शना'दित्यादिवत् । तत्रेति । तेषु पाषण्डादिमार्गेषु जातेषु । तर्हि भगवति कथं सद्गुणत्वमित्यत आहुः त्वमित्यादि । इदमष्टमस्कन्धसमाप्तौ मत्स्यावतारस्तुतौ सत्यव्रतवाक्यम् । 'जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः । त्वं त्वव्ययं ज्ञानममोघमञ्जसा प्रपद्यते येन जनो निजं पदम्'-

मिति । तस्मात्तथेत्यर्थः । गुरुशुश्रूषयेतिवाक्यादिति । ' नाहमिज्याप्रजातिभ्यां तपसोपशमेन वा । तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथे'ति वाक्ये साधनान्तरापेक्षया तस्या एव स्वतोषसाधनत्वकथनात्तथेत्यर्थः । अङ्गदेवता इति । अङ्गरूपदेवता आवरणदेवताश्च । कृतीति । अनष्टसत्कर्मा । ' धर्मः क्षरती'त्यादि । यथाऽतिवत् कथञ्चित् कथनेपि नाशसंभवात् । तत्र प्रायश्चित्ताभावबोधनेन पुनःकर्मान्तरेण पुनस्तत्संवादनाशक्तेश्चेत्यर्थः । द्वितीयवाक्यस्थस्य कृतशब्दस्योपकारवाचकत्वपक्षेपि ' न ते मामङ्ग जानन्ती'ति वाक्येन भगवत्कृतोपकाराज्ञाने तद्भजनाच्चथेति बोध्यम् । बभूविमेति । प्रार्थनायां लिट्छान्दसः ७

अहो सनाथा इत्यत्र । अपेक्षाऽभावान्नियन्ता नापेक्ष्यते इति । सापेक्षो

१-११-८ ह्यधिकं गृह्णातीति तादृशवारणार्थं नियन्त्रपेक्षा, भगवत्पराणां त्वपेक्षाया एवाभावात् ग्रहणं दूरापेतमतो नापेक्ष्यते । तथा च तदभावादेव तेषां सर्वतो भयाभाव इति भावः । त इति । भगवत्पराः । वयमिति । अल्पभक्तियुक्ताः । इदं पुनरिति । आश्रयान्तरमित्यर्थः । पुनस्ततोन्यदाश्रयान्तरमाहुः किञ्चेत्यादि । अनेनेति । स्मितपदेन । उभाभ्यामिति । उक्तव्यञ्जिताभ्यां स्नेहदयाभ्याम् ॥ ८ ॥

मधुभोजेत्यत्र । पञ्चसु श्लोकेषु वर्णनीयानर्थान् सङ्गृह्णन्ति अधिष्ठानेत्यादि ।

१-११-११ एतेषां सुन्दरमित्यादिनान्वयः । अङ्गविभेदत इति । अङ्गानां द्वारादीनां विभेदतः अलङ्कारकृतवैशेष्यादित्यर्थः । अधिष्ठातॄन् वर्णयतीति । विग्रहतुल्यत्वं व्युत्पादयितुं सा यथाधिष्ठातृशुद्धौ स्थिरा भवति, तथेयमिति बोधनाय तान् वर्णयतीत्यर्थः । पड्भिर्यैर्गुप्तत्वकथने कथं स्थैर्यं तौल्यमित्यतो व्युत्पादयन्ति सत्त्वेत्यादि । पुरी चेत्यादि । तथा चेन्द्रियैर्गोपने यथा सत्त्वरूपान्तःकरणस्यानाशः, तथा तैर्गोपने पुर्या इति तथेत्यर्थः । ननु देहं विनेन्द्रियैर्न सत्त्वरक्षेत्यतस्तत्कार्यकारित्वं विशेषणेन बोधयन्ति यथात्मा देह इत्यादि । नन्वत्र गुणतो रक्षा विवक्षिता, सा तु नैवं सिद्ध्यतीति पक्षान्तरमाहुः वायुर्वेति । आत्मपदेन कथं वायुलाभ इत्यत उपपादयन्ति अहं मनुरित्यादि । तथा च यद्यपि बृहदारण्यकेऽस्याः श्रुतेर्वायुपरत्वं न सिद्ध्यति, तथापि बह्वृचसंहितायां सिद्ध्यतीत्यर्थः । ननु वायुरत्र कौष्ठ्यो विवक्षितः, स त्वेवमपि नायातीत्यत आहुः मण्डलेत्यादि । तथा च मण्डलानां दशत्वेन ' दश वै पशुषु प्राणा' इति श्रुत्युक्तप्राणसमानसङ्ख्याकत्वात्तया तल्लाभादर्थोपपत्तिरित्यर्थः । अत्र व्याख्यानक्लेशादात्मपदस्य भगवत्परत्वमङ्गीकृत्य पक्षान्तरमाहुः बलं सेना चेत्यादि । तथा च यथान्तर्यामिणा सन्मार्गप्रेरणेनान्तःकरणसत्त्वं रक्ष्यते, तथैतैर्गृहरक्षणेन पुरीति तथेत्यर्थः । सर्वप्रवेशन इति । सर्वेषां यादवानां पुर्यां प्रविश्य स्थितौ । तथा च यथा वासुकिप्रभृतिभिः प्रविश्य स्वपुरी भोगवत्याख्या रक्ष्यते, तथेत्यर्थः । अस्मिन् दृष्टान्ते प्राणा

नायान्तीति पक्षान्तरमाहुः शरीरमित्यादि। तेषां पुर्या भोगवतीति नाम तथा न प्रसिद्धमिति पक्षान्तरमाहुः गङ्गाप्रवाहो वेति।

१-११-१३ गोपुरेत्यत्र। उत्तराङ्गमिति। उत्तरश्लोके वक्ष्यमाणा यान्तःशोभा तदङ्गमिदं विशेषणमित्यर्थः॥ १३॥

१-११-१५ द्वारि द्वारीत्यत्र। अन्तर्नीत इति। स्वहृदये गृहे नीत इत्यर्थः॥१५॥

१-११-१८ प्रणयागतसाध्वसा इत्यत्र। लौकिकपदार्थपदेन सम्बन्ध उच्यते॥१८॥

१-११-२१ भगवांनित्यत्र। न पाक्षिकफलत्वमिति। न कादाचित्कसत्कारविषयत्वम्॥ २१॥

१-११-२२ प्रह्वेत्यत्र। कृतवानिति। 'ये यथा मां प्रपद्यन्ते' इति प्रतिज्ञानादुचितं कृतवानित्यर्थः। करस्पर्शः शिरसि हस्तस्थापनम्॥ २२॥

१-११-२३ स्वयं चेत्यत्र। प्रयच्छतीति। विषयान् प्रयच्छति। तथा च विषयाणां बन्धकत्वाभावेन तद्दाने दोषाभाव इति भावः। अन्धशब्दस्यार्थान्तरमाहुः नूतनेत्यादि। ननु पुरिप्रवेशस्य पूर्वमुक्तत्वात्पुनः तत्प्रवेशो व्यावर्तकत्वेन वक्तव्यः, पुरमाविशन्नाशीर्भिर्बन्धुभिश्च युज्यमानो जात इति, तत्कुतः पुनस्तत्प्रवेशकथनमित्यत आहुः अत्रेत्यादि। तथाचात्रानर्तपुर्या द्वारकायाश्च सत्त्वेन पूर्वमानर्तप्रवेशस्योक्तत्वेऽप्यत्र द्वारकाप्रवेशक्रियाया एव सर्वोत्कृष्टत्वात्तथोच्यत इत्यर्थः। ननु तावता सर्वोत्कृष्टत्वे स्तोत्रादिनिरूपणवैयर्थ्यं स्यादित्यत आहुः केवलमित्यादि। आदिपदेन स्वप्रार्थनम्॥ २३॥

१-११-२४ राजमार्गमित्यत्र। मर्यादास्थितस्त्रीणामिति। आवरणे तिष्ठन्तीनामित्यर्थः॥ २४॥

१-११-२५ नित्यमित्यत्र। कथमुत्सवत्वमिति। अतिशयितानन्दजनकत्वं ह्युत्सवत्वम्। तच्च दर्शनस्य नित्यत्वादतिशयाजनकत्वेन कथं केन प्रकारेणेत्याशङ्क्याह तदुपपादनाय नेत्रतृप्त्यभावं तद्धेतुत्वेनाहेत्यर्थः। अत्र मूले उत्सवहेतुत्वेन दृगविशूतिरुच्यते, तस्या अपि हेतुत्वेन भगवदङ्गानां स्वाधीनलाभाव उच्यते। यद्यपि निरीक्षमाणानां द्वारकौकसां नित्यमर्यादर्शनम्, तथापि तेषां दृशो न वितृप्यन्ति, हि यतो हेतोः अङ्गं श्रियो धामेत्यादिर्न स्वाधीनं स्वस्मादिति वचनव्यक्तेः। तामुपपादयन्ति नित्योत्सवत्वादित्यादि। प्रतिक्षणमन्यान्यविग्रहप्रदर्शनेनान्यान्यानन्दजनकत्वात्तथेत्यर्थः। तृतीयस्कन्धे 'तया विभ्रंशितज्ञाना' इत्यत्र

ज्ञानस्य चिरकालस्थायितायां व्यवस्थाप्यत्वेनात्र धारावाहिकत्वकथनं मतान्तरीयप्रसिद्ध्यभिप्रायेण । तथा चोत्तरोत्तरज्ञानेन पूर्वपूर्वज्ञानतिरोभावाद्धारावाहिकतुल्यैकज्ञानत्वं नेत्यर्थो बोध्यः । ननु मास्तु ज्ञानस्य धारावाहिकत्वम्, तथापि तत्तद्रूपदर्शनजनितानन्देन दृशां तृप्तेः सम्भवादवितृप्तिः कुत इत्याकाङ्क्षायामाहुः अलौकिकेत्यादि । नन्वस्तु रुचिः, तथापि भगवतो विषयत्वात्तदंशे तु तृप्तिः स्यादेवेति कथं विशेषस्तदभाव इत्यत आहुः न विषयत्वमित्यादि । तथा च 'पराञ्चि खानी'ति श्रुतेः भगवद्दर्शने प्रमाणानामसामर्थ्यात्तत्र भगवत्सामर्थ्येन दर्शने 'अहं पश्यामी'त्यभिमानमात्रम् । तथा सत्युचितैवातृप्तिरित्यर्थः । ननु तथापि तटस्थस्य रुच्युत्पादकत्वादर्शनाद्रुच्यनुरोधेन भगवत्सामर्थ्याद्भगवतो ज्ञानविषयत्वमत्रोपेयम्, तथा सति नावितृप्तिरित्यत आहुः रुचिरित्यादि । सकृत्पूर्वं दृष्टविषयस्यासामर्थ्यादित्यर्थः । अत एवेति । सकृद्दर्शनादेव । नन्वेवं रुच्युत्पादकत्वे सर्वैर्भक्त्या भगवान् कुतो न गृह्यते, भक्त्या दर्शनप्रकारस्य पूर्वाध्याये स्थापितत्वादित्यत आहुः दोषादित्यादि । भगवत्पराङ्मुखत्वेन भक्त्यभावरूपदोषात्तथेत्यर्थः । तद्वक्ष्यते तमिमं मन्यते लोक इत्यत्र । स दोषः किन्निष्ठो येनाग्रहणमित्याकाङ्क्षायां तदधिकरणमाहुः तत्रेत्यादि । अग्रहणप्रयोजके दोषे विचारणीये दृष्टेस्तैजसत्वात् 'सूर्यश्चक्षुस्तथारूपं ज्योतिषो न पृथग् भवे'दित्यादिवाक्यैस्तेजोरूपत्वात्तस्य च 'तत्तेजो विद्धि मामक'मिति वाक्येन भगवदीयत्वात्तत्र तदभावे विषयदोषेण तद्ग्राह्यविषयस्य प्राकृतत्वात्तत्सम्बन्धेनैव चण्डालाग्निवद्दुष्टता । तथा च तद्ग्रहणस्वाभाव्याद्भगवद्ग्रहणासामर्थ्यम् । मार्गणं मार्गः, धर्ममार्गे धर्मविचारे तु कर्तृधर्मसम्बन्धेऽपि कर्ता जीवोन्तःकरणं वा तद्धर्मः साधारणत्वेन यो भगवत्यध्यासस्तत्सम्बन्धेऽपि दुष्टतेति तेनाग्रहणमित्यर्थः । एवं दोषं निश्चित्य द्रष्टृषु तदभावं स्फुटीकुर्वन्ति स चेत्यादि । द्वारकौकसामिति । द्वारं कायति वदतीति द्वारका । तथा च तयैव वासेन भक्तिरूपदर्शनसाधनोपदेशात्प्राकृतत्वरूपविषयदोषस्य अध्यासरूपकर्तृदोषस्य च सम्बन्धाभावात् स नास्तीत्यर्थः । सर्वे इति । मोक्षादिफलप्रतिबन्धकाः । ननु द्वारकावासमात्रेण सर्वदोषनिरीक्षणस्यावितृप्तिहेतुता नोच्येतेत्यत आहुः पराञ्चीत्यादि । उभयसाधकत्वमिति । दोषनिवृत्तिः तृप्तिश्चेत्युभयोः साधकत्वम् । दृश्यत इति । द्वितीयक्षणे दृश्यते । तथाच द्वितीयक्षणे पूर्वक्षणस्थदर्शनेन रुचिः, द्वितीयक्षणस्थेन त्वलौकिकबोधः, पुनरग्रिमे तत्र रुचिरित्येवं रुचिप्राचुर्ये युक्तैवावितृप्तिरित्यर्थः । ननूक्तं तटस्थस्य रुच्यनुत्पादकत्वम्, अतस्तदापि विषयसम्बन्ध उपेयः, तथासति तृप्तिरवर्जनीयेत्यत आहुः यद्यपीत्यादि । एवमवृप्तौ हेतुं समर्थयित्वात्यन्तातृप्तौ हेत्वन्तराणि स्फुटीकुर्वन्ति दृश इत्यादिना ॥ २५ ॥

सारङ्गाणामित्यत्र । सारङ्गपदेऽतिपरोक्षवृत्त्या वर्णागमो वोध्यः, हंस इतिवत् । पुनश्चेति । निर्वचनान्तरविचारे । सर इति । द्रवद्द्रव्यमित्यर्थः । त
१-११-२६ इति । रससमूहप्रासारः । एतेषां पदाम्बुजसम्बन्धे 'तपस्विनो दानपरा' इति वाक्यं प्रमाणत्वेन वोध्यम् । एवमन्यत्रापि । समुदायशक्त्येति । कोशान्तरे सारङ्गशब्दस्य भ्रमरे शक्त्या ॥ २६ ॥

प्रविष्टस्त्वित्यत्र । भेदे कारणाभावादिति । स्त्रीणां पृथक्धर्मशीलत्वं
१-११-२८ हि गृहान्तरस्थितौ कारणं तदभावात् ॥ २७ ॥

तमात्मजैरित्यत्र । भृगुणा भगवन्माहात्म्यस्यानुभूतत्वात्तद्वंशे प्रधानस्य तत्राप्ये-
१-११-३२ तन्माहात्म्यज्ञानं भविष्यतीत्याशयेनाहुः भगवन्माहात्म्येत्यादि ।

यद्यपीत्यत्र । कृतत्वादिति । पार्श्वगतैः कृतत्वात् । स चात्यन्तमिति । स मनोरथोऽत्यन्तमित्यर्थः । पूर्वोक्त इति । मनोरथः । श्रीरिति । इयं
१-११-३३ देवीरूपा ज्ञेया, चिच्छक्तेर्वलवद्भगवन्निष्ठत्वात् ॥ ३३ ॥

एवं नृपाणामित्यत्र । न लोकसदृश इति । अतः स्वयमेवानुवर्तत इति शेषः । तत्रापीत्यादि । तथा चेदं तेषामागन्तुकं कार्यमित्यर्थः । तत्रेति ।
१-११-३४ तेषां तादृशे कार्यद्वये तैर्जाते । निमित्तमिति । सहकारि ॥ ३४ ॥

तमयमित्यत्र । आत्मानमिति । स्वस्वरूपं भगवत्स्वरूपमिति यावत् । तात्पर्यापरिज्ञानादित्यादि । भगवता स्वस्मिन्नज्ञत्वादिबोधनेऽन्येषां कृते
१-११-३७ तत्तात्पर्यापरिज्ञानादित्यर्थः । तथामन्तेति । सङ्क्लिप्तमन्ता ॥ ३७ ॥

एतदीशनमित्यत्र । बोधनक्रियाया इत्यादि । स्वस्मिन्नज्ञत्वादिबोधनरूपायां भगवत्क्रियायां यथा जीवाज्ञानजनकत्वमित्यर्थः । ज्ञापयतीति । अज्ञा-
१-११-३८ नादिकं भगवति जीवत्वं ज्ञापयतीत्यर्थः । विमतं अज्ञानादिकं न दोषजन्यम्, अयोग्यप्रतारणार्थत्वात्, भरतीयजडत्वादिवदित्यनुमानेन पूर्वोक्तहेतोः साध्यसमत्व-शङ्कायां हेत्वन्तरमाहुः भ्रमेत्यादि । तथा च विमतो जीवः, भ्रमजनकत्वेन प्रतारकत्वात्, जडभरतादिवदित्यनुमानेन जीवत्वमित्यर्थः । एवमाशङ्क्येति । ईदृशानुमानेन ज्ञानि-जीवत्वमाशङ्क्य । भ्रमादिति । विषयेष्वानन्दजनकत्वोत्कृष्टत्वभ्रमात् । तथा च विमतो विषयसम्बन्धः न जीवधर्मः, दोषाजन्यत्वात्, दत्तादिकृतसुरापानादिवदिति सत्यनुमानेन बाधितत्वादित्यर्थः । ईश्वरत्वबोधक इति । विमतः सम्बन्धः ईश्वरधर्मः, नियतकार्यजनकार्थमतिबन्धकत्वात्, दत्तात्रेयसुरापानादिवदिति प्रयोगात्तयेत्यर्थः । अत्र च नियतविषयासक्तिरूपकार्यजनकं मनः तत्कार्यासक्तिमतिबन्धकत्वं सङ्कल्पेनेश्वरधर्मत्वम्, एवं योगिस्वैराचरणस्यापीशधर्मत्वमेव योगजत्वादतो न हेतौ दोषः । ननु विमतो नेश्वरधर्मः नियत-

कार्यजनककार्यप्रतिबन्धकत्वान्मणिमन्त्रादिनिष्ठदाहप्रतिबन्धकधर्मवदिति दृष्टान्तान्तरेण हेतोः साधारणत्वमिति चेत्, तत्राहुः मणीत्यादि । तथा चैवं हेतोः साधारणत्वेपि तत्त-ज्जीवधर्मे व्यभिचाराभावेनोक्तहेतौ चेतनधर्मत्वे सतीत्येवं विशेषिते साधारण्यपरिहारात्त-स्येश्वरधर्मत्वे सिद्धे ईश्वरत्वबोधकता निःप्रत्यूहेत्यर्थः । तदेतद्धृदिकृत्वाहुः अत इत्यादि । सर्वाश्रयत्वादिति । तच्च ब्रह्मवादे स्वरूपेण तादात्म्येन वा । मतान्तरे तु संयोगादि-नापीति बोध्यम् । तस्माद्धेतोस्ते सदा भगवति वर्तन्त इत्यर्थः । संयुक्तेत्यादि । जीवात्म-संयुक्तं मनस्तत्र समवायः सङ्गादीनाम्, तेन संबन्धेन ते सदा परमात्मन्येव वर्तन्त इत्यर्थः । ते इति । प्रकृतिगुणाः । न भवेयुरिति । कार्यसम्पादने भगवत्त्वभङ्गाज्जी-वाश्रिता एव भवेयुः, तथा च सर्वस्य भगवदाश्रितत्वानुरोधात्स्वकार्यासम्पादकानामेवा-श्रितत्वमङ्गीकार्यमित्यर्थः । ननु कार्यासम्पादने तत्सत्तायां प्रमाणाभावान्मास्तु तदाश्रित-त्वमित्यत आहुः भगवत इत्यादि । सिद्धमाहुः तथाचेत्यादि ।अनाश्रित्येति। नियम-तोनाश्रित्य।अन्याश्रितानां व्यधिकरणत्वात्कथमन्यत्र दोषजनकत्वमित्यत आहुः अन्या-श्रयैरित्यादि । चौरादिषु रोगेषु चेति । यथान्याश्रितधनस्य रूपादेश्चान्यत्र जिघृक्षा-दिकार्यजनने तच्चौर्यलाम्पट्यदोषजनकत्वम्, यथा चान्यत्र विद्यमानस्य कुष्ठादिरो-गस्य 'कुष्ठी यावत्प्रपश्यती'तिवाक्यात् दर्शनविषयदोषजनकत्वं तथेत्यर्थः । अत्रेति । नियताश्रितस्य दोषाजनकत्वे । एवमुपपाद्य सर्वमर्थं संगृह्णन्ति एकस्यैवेत्यादि । अवि-द्यावदिति । अविद्या यथा जीवव्यामोहिका तथेत्यर्थः । दोषनिराकरणार्थमिति। 'अज्ञा-निनः सुरवरेशमधिक्षिपन्त' इतिन्यायेन भगवदस्मरणरूपदोषनिराकरणार्थम् ॥ ३८ ॥

तं मेनिर इत्यत्र । दर्शनज्ञानानीति । न्यायादिदर्शनसिद्धानि ज्ञानानि । केचिदिति । निरीश्वरकापिलाः । अन्य इति । बाह्याः । अपर इति ।

१-११-३९ जैमिनीयाः । अन्य इति । वैशेषिकाद्याः । केचिदिति । साङ्ख्यैकदे-शिनः । मूलप्रमाणाज्ञानादिति । ब्रह्मणि मूलप्रमाणं वेदस्तदर्थाज्ञानादित्यर्थः । मूल-कारणेति पाठे ब्रह्मज्ञाने मूलकारणं वेद इति स एवार्थः ॥ ३९ ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे एकादशाध्यायविवरणम् ॥ ११ ॥

अथ द्वादशाध्यायविवरणम् ।

अथ द्वादशाध्यायं विवरिषवः पूर्वसङ्गतिनिरूपणपूर्वकं तस्यार्थमाहुः एवमि-त्यादि । एवमिति । पञ्चाध्याय्युक्तप्रकारेण । अधुनेति । द्वादशाध्याये । नन्वेवं दाहाद्यनन्तरं किमिति रक्षा कृता, पूर्वमपि करणे भगवतः सामर्थ्यादित्यत आहुः यथे-

१ कामजनने च इति स्यात् । अत्र पाठः संदिग्धः ।

त्यादिद्वयम् । तथा चैतदर्थमेवं रक्षेत्यर्थः । अतः परं व्याख्यातुकामाः शौनकप्रश्नतात्पर्यमाहुः व्यवहितेत्यादि ।

१-१२-४ अपीपलदित्यत्र । शास्त्रानुसारेण फलजननं कृष्णसेवायाः सम्यक्तत्त्वज्ञाने हेतुः ॥ ४ ॥

१-१२-६ किं तेऽकामा इत्यत्र । अकामा इति । अकामिता इत्यर्थः । पूर्ववदिति । सम्वादार्थमित्यर्थः ॥ ६ ॥

१-१२-७ मातुरित्यत्र । ननु देवैर्वैन्धनस्य क्वचिदसिद्धावत्र तदकरणं युज्येत, तच्चमसिद्धमिति शङ्कायामाहुः अत्रेत्यादि । 'देवा वै राजन्याज्जायमानादबिभयु'रिति तैत्तिरीयसंहिताश्रुतौ भयस्योक्तत्वात् तेन बन्धनमपि युज्येतेति नाप्रसिद्धिरित्यर्थः । तपः स्वधर्मसहित इति । असृदह्यमानत्वमेव तपः कृच्छ्रादिवत् । सन्तापात्मकत्वात् । स्वधर्मो वीरत्वं ताभ्यां सहित इत्यर्थः ॥ ७ ॥

१-१२-८ अङ्गुष्ठमात्र इति । अर्थस्त्वेतावत्परिमाणकोप्यङ्गुष्ठं पादावयवं चकारादालोमनखाग्रं च सम्यग्व्याप्याश्रितः, आसमन्तात्तत्र तत्र कार्यं कुर्वन् स्थित इति । शेषं स्फुटम् । श्रुतिस्तु तैत्तिरीये बृहन्नारायणोपनिषदि ॥ ८ ॥

१-१२-९ गदापाणिमित्यत्र । तेजोग्रास इत्यादि । तेजसो वायुकार्यत्वेन तस्य वायावेव लयात्तथेत्यर्थः । अप्रकटयदिति । प्रकटं करोतीत्यस्मिन्नर्थे तत्करोति तदाचष्ट इत्येनेन णिच् ॥ ९ ॥

१-१२-१३ तस्य प्रीतेत्यत्र । अपूर्वपक्षमिति । नैमित्तिकमात्मसंस्कारपक्षम् ॥१३॥

१-१२-१८ अप्येष इत्यत्र । चरित्रस्वभावोत्कर्षाविति । चरित्रोत्कर्षः स्वभावोत्कर्षश्चेत्यर्थः ॥ १८ ॥

१-१२-२० दीप्यन्तिरिव यज्वनामित्यत्र । नन्वत्र चकाराभावाद्यज्वनां भिन्नो सम्बन्धो न युक्त इत्यत आहुः सर्वत्रेत्यादि । सर्वत्रानुक्तचकारे वाक्येपि चकारः पूर्वोक्तसम्बन्धः प्रत्येकसमुदायाभ्यां कीर्तिसम्बन्धो दृष्टान्ते दार्ष्टान्तिके च प्रमाणसिद्धो दृष्टान्तीयगुणवशेनार्थादेव बोध्य इत्यर्थः ॥ २० ॥

१-१२-२४ जयाभाव इति । परेण जेतुमयोग्यत्वम् । मूले सर्वे सद्गुणमाहात्म्यपदं सप्तम्यन्तमित्याशयेनाहुः तदर्थमिति । 'चर्मणि द्वीपिनं हन्ती'तिवदत्र तादर्थ्ये सप्तमीत्यर्थः ॥ २४ ॥

१-१२-२८ जिज्ञासितात्मयाथात्म्य इत्यत्र । प्रत्यापत्त्यर्थ इति । ब्रह्मास्त्रस्य पुनः प्राप्त्यर्थः । तदेव विद्न्वन्ति एतावदित्यादि ॥ २८ ॥

१-१२-२९ इति राज्ञ इत्यत्र। इत्युक्तमिति। अनेन सन्दर्भेणायमर्थ उक्त इत्यर्थः २८

स एपेत्यत्र। पूर्वस्य च फलमिति। रक्षणस्य फलमित्यर्थः। परित्त ईक्षा-
१-१२-३० मित इति। अत्र पृषोदरादित्वेनाकारनाशः। इतृजन्तस्यार्थकथनं वेति ज्ञेयम्। इतरसामग्रीरहित इति। 'शब्दादेव प्रमित' इत्येतत्सूत्रविषयवाक्योक्तधर्मैरहित इत्यर्थः॥ ३०॥

१-१२-३२ यक्ष्यमाण इत्यत्र। देवताधिष्ठानादिति। भावप्रधानो निर्देशः। हेतुनिर्देशो वा। पूर्वमिति दशमाध्यायारम्भे॥ ३२॥

१-१२-३३ तदभिप्रेतेत्यत्र। तद्द्रोहस्तेषां पीडेति। पूर्वश्लोके व्याख्यातत्वादत्र तदर्थकथनम्॥ ३३॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे द्वादशाध्यायविवरणम्॥

अथ त्रयोदशाध्यायविवरणम्।

अथ त्रयोदशाध्यायं विवरिषवः पूर्वप्रकरणसमाप्तिं बोधयन्ति एवमित्यादि। सपरिकरहेतुनिरूपणपूर्वकं निरूपितेत्यर्थः। अग्रिमायां वैराग्यपडध्याय्यां तावतां प्रयोजनं सर्पिंथतुर्भिर्वदन्तः पूर्वं त्रयाणामाहुः पुरुषत्रयेत्यादि द्विरूपत्वादिति। मुक्तेर्हेतुकार्यविभेदतो द्विरूपत्वात्। हेतुर्भगवत्प्रयाणं कार्यं नियामकलयभावनादिकं तद्भेदतो द्विरूपवात्। सनिमित्ताम्। प्रयाणसूचकोत्पातदर्शनादिरूपनिमित्तसहिताम्। तामध्यायद्वयेनाहेत्यर्थः। ननु पुरुषत्रयमुक्तेः कथमेतन्मुक्त्यर्थतेत्यत आहुः अमुक्तपितृकेत्यादि। वार्यत इति। अमुक्तिस्तेषां वार्यते, अतस्तन्मुक्तेः सकाशाद्राज्ञो निश्चिन्ततासिद्ध्यै इहास्मिन्नध्यायत्रये राज्ञश्चित्तशुद्धिरुच्यते, सा मुक्त्युपकारिणीति तत्प्रयोजकतया पुरुषत्रयमुक्तेस्तन्मुक्त्यर्थतेत्यर्थः। शेषाणां चतुर्णामर्थमाहुः तत इत्यादि। नान्यथेति। सत्सङ्गं विना। तथा च सत्सङ्गस्यावश्यकत्वबोधनार्थमग्रिमा सपरिकरवैराग्यानन्तरभाविनी ऊनविंशाध्यायस्य कथेत्यर्थः। अवान्तरव्यापार इति। पूर्वं सनत्सुजातादिकृतोपदेशस्य निर्वेदोत्पादनादिना स्मारणात्तथेत्यर्थः। बहुकालव्यवहितस्य सनत्सुजातीयस्य पुनः कथनाभावे स्मरणायोगात्कथने च गुरुत्वस्यैव सिद्धिरित्यरुच्या पक्षान्तरमाहुः धर्मराजत्वेन गुरुर्वेति। अयं पक्ष 'एवं राजे'ति श्लोकस्थात् बोधितपदात्सिद्ध्यति। प्रथमस्तु ततः पूर्वग्रन्थात्। ननु धर्मराजत्वस्य प्रागपि सत्त्वात्तदानीमुपदेशकर्तृत्वमाप्तावपि स्वस्यानधिकारकथनपूर्वकं तदकरणमिति तस्यैदानीमपि सत्त्वात् कथं गुरुत्वं युज्यते इत्यत आहुः भगवते-

त्यादि । स्मरणं 'यस्य ज्ञानोपदेशाये'तित्रान्ये स्फुटिष्यति । अतो द्वितीयः पक्षोपि युक्त एवेत्यर्थः । तर्हि तदर्थं तत्कथैव पूर्वं कुतो नोक्तेत्यत आहुः विदुरेत्यादि । तथा च तस्याः पुराणलक्षणग्रन्थे प्रविष्टत्वाद्बहुत्वाच्च नेदानीं सोक्ता, किन्तु गुरुत्वरूपप्रयोजनसिद्ध्यर्थं तदुत्तरैव कथोक्तेति नोक्तार्थे सन्देह इत्यर्थः । एवं मुक्त्युपोद्घातत्वेन प्रसङ्गमुपपाद्य व्याकुर्वन्ति विदुर इत्यादि । मूले आत्मविवित्सित इत्यत्र बहुव्रीहौ आहिताग्न्यादिष्विति आत्मपदस्य पूर्वनिपातः । विवित्सितपदं च विशेषज्ञाने रूढमित्यवगन्तव्यम् । विशेषेण ज्ञानस्याकारं फलोक्तिमुखेन विवृण्वन्ति अयमर्थ इत्यादि । तथा च तया लीलया साङ्ख्यसिद्ध इव साक्षीति न ज्ञातः, किन्तु भगवद्दासत्वादिवैशिष्ट्येनोपनिपतिसिद्धरूपेण ज्ञात इत्यर्थः । अग्रिमचरित्रमिति । पञ्चमादिस्कन्धान्तरोक्तम् । फलज्ञानादिति । फलमनुपदोक्तरीतिकस्वस्वरूपावस्थानरूपं तस्य ज्ञानात् । इदमेव विशेषतो ज्ञानम् ॥

एतन्निगमनायाग्रिमश्लोकं विवृण्वन्ति अत एवेत्यादि । यथाधिकारं निर्णय इति । बन्धुत्वनिर्णयः । ज्ञानमोक्षाभ्यां बन्धनं सत्त्वगुणवज्ज्ञेयम् ।
१-१३-२ ताभ्यामपि गुरुत्वेनासक्तिजननादिति ॥ २ ॥

मुमुचुरित्यत्र । भगवतः प्रेम एवेत्यत्र प्रेम इवेति पाठः प्रतिभाति । निषेधाभाव इति । पूजा न मया ग्राह्येति निषेधस्याभावः । कुलक्षयप्र-
१-१३-६ योजकत्वान्निषेधः सम्भाव्यते अग्रिमवाक्यकथनानुसारात्, तदभावायैतदुक्तम् । तदर्थमिति । लोके हि नानादेशयात्रां कुर्वाणाः स्वस्य पक्षित्वं वदन्ति वयं पक्षिण इति, तदा स्मरणं न सम्भवतीति तन्निवृत्तय इत्यर्थः । अर्थपदमत्र निवृत्तौ मशकार्थो धूम इतिवत् । चिचिकित्सेति । अयं शब्दो ग्लानौ रूढो जुगुप्सावत्प्रयोगवशाज्ज्ञेयः । क्लेशजनितमिति । पूर्वानुभूतक्लेशजनितम् । षष्ठ्यन्तपदं तृतीयया कथं व्याख्यायत इति शङ्कानिवृत्तय आहुः जीवनेत्यादि । परित्यागभावनामिति । जीवनस्येति शेषः ॥ ६ ॥

भवद्विधा इत्यत्र । प्रयासजननादिति । तीर्थपापनाशप्रयासजननात् । इदमेव
१-१३-१० सूचितं विवेकधैर्याश्रयग्रन्थे 'विशेषतश्चेदाज्ञा स्या'दिति पद्येन १०

अपि न इत्यत्र । ज्ञास्यतीति । सम्भावनायां लृट् । लज्जयेति ।
१-१३-११ अवधूतवेशकृतलज्जया ॥ ११ ॥

१-१३-१३ नन्वप्रियमित्यत्र । स्वकार्यमिति । विदुराभिमतं कार्यम् ॥ १३ ॥

एवं गृहेष्वित्यत्र । भगवन्तं दृष्ट्वेति । द्वारकायां गत्वा तत्र दृष्ट्वा ।
१-१३-१७ अन्यथा चेदिति । यदि स्वार्थे प्रमत्ता न भवेयुरित्यर्थः ॥ १७ ॥

१-१२-२९ इति राज्ञ इत्यत्र । इत्युक्तमिति । अनेन सन्दर्भेणायमर्थ उक्त इत्यर्थः २८

स एषेत्यत्र । पूर्वस्य च फलमिति । रक्षणस्य फलमित्यर्थः । परित ईक्षा-

१-१२-३० मित इति । अत्र पृषोदरादित्वेनाकारनाशः । इतृजन्तस्यार्थकथनं वेति ज्ञेयम् । इतरसामग्रीरहित इति । 'शब्दादेव प्रमित' इत्येतत्सूत्रविषयवाक्योक्तधर्मरहित इत्यर्थः ॥ ३० ॥

१-१२-३२ वक्ष्यमाण इत्यत्र । देवताधिष्ठानादिति । भावप्रधानो निर्देशः । हेतुनिर्देशो वा । पूर्वमिति दशमाध्यायारम्भे ॥ ३२ ॥

१-१२-३३ तदभिप्रेतेत्यत्र । तद्द्रोहस्तेषां पीडेति । पूर्वश्लोके व्याख्यातत्वादत्र तदर्थकथनम् ॥ ३३ ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे द्वादशाध्यायविवरणम् ॥

अथ त्रयोदशाध्यायविवरणम् ।

अथ त्रयोदशाध्यायं विवरिषवः पूर्वप्रकरणसमाप्तिं बोधयन्ति एवमित्यादि । सपरिकरहेतुनिरूपणपूर्वकं निरूपितेत्यर्थः । अग्रिमायां वैराग्यषडध्याय्यां तावतां प्रयोजनं सार्धैश्चतुर्भिर्वदन्तः पूर्वं त्रयाणामाहुः पुरुषत्रयेत्यादि द्विरूपत्वादिति । मुक्तेर्हेतुकार्यविभेदतो द्विरूपत्वात् । हेतुर्भगवत्प्रयाणं कार्यं नियामकत्वभावनादिकं तद्भेदतो द्विरूपत्वात् । सनिमित्ताम् । प्रयाणसूचकोत्पातदर्शनादिरूपनिमित्तसहिताम् । तामध्यायद्वयेनाहेत्यर्थः । ननु पुरुषत्रयमुक्तेः कथमेतन्मुक्त्यर्थतेत्यत आहुः असुक्तपितृकेत्यादि । वार्यत इति । अमुक्तिस्तेषां वार्यते, अतस्तन्मुक्तेः सकाशाद्राज्ञो निश्चिन्तत्वासिद्ध्यै इहाप्यस्मिन्नध्यायत्रये राज्ञश्चित्तशुद्धिरुच्यते, सा मुक्त्युपकारिणीति तत्प्रयोजकतया पुरुषत्रयमुक्तेस्तन्मुक्त्यर्थतेत्यर्थः । शेषाणां चतुर्णामर्थमाहुः तत इत्यादि । नान्यथेति । सत्सङ्गं विना । तथा च सत्सङ्गस्यावश्यकत्वबोधनार्थमग्रिमा सपरिकरवैराग्यानन्तरभाविनी ऊनविंशाध्यायस्य कथेत्यर्थः । अवान्तरव्यापार इति । पूर्वं सनत्सुजातादिकृतोपदेशस्य निर्वेदोत्पादनादिना स्मारणात्तथेत्यर्थः । बहुकालव्यवहितस्य सनत्सुजातीयस्य पुनः कथनाभावे स्मरणायोगात्कथने च गुरुत्वस्यैव सिद्धिरित्यरुच्या पक्षान्तरमाहुः धर्मराजत्वेन गुरुर्वेति । अयं पक्ष 'एवं राजे'ति श्लोकस्यात् बोधितपदात्सिद्ध्यति । प्रथमस्तु ततः पूर्वमन्यात् । ननु धर्मराजत्वस्य प्रागपि सत्त्वात्तदानीमुपदेशकर्तृत्वप्राप्तावपि स्वस्यानधिकारकथनपूर्वकं तदकरणमिति तस्येदानीमपि सत्त्वात् कथं गुरुत्वं युज्यते इत्यत आहुः भगवते-

त्यादि। स्मरणं 'यस्य ज्ञानोपदेशाये'तिवाक्ये स्फुटिष्यति। अतो द्वितीयः पक्षोपि युक्त एवेत्यर्थः। तर्हि तदर्थं तत्कथैव पूर्वं कुतो नोक्तेत्यत आहुः विदुरेत्यादि। तथा च तस्याः पुराणलक्षणग्रन्थे प्रविष्टत्वाद्बहुत्वाच्च नेदानीं सोक्ता, किन्तु गुरुत्वरूपप्रयोजनसिद्ध्यर्थं तदुत्तरैव कथोक्तेति नोक्तार्थे सन्देह इत्यर्थः। एवं मुक्त्युपोद्घातत्वेन प्रसङ्गमुपपाद्य व्याकुर्वन्ति विदुर इत्यादि। मूले आत्मविविन्त्सित इत्यत्र बहुव्रीहौ आहिताग्न्यादिष्विति आत्मपदस्य पूर्वनिपातः। विवित्सितपदं च विशेषज्ञाने रूढमित्यवगन्तव्यम्। विशेषेण ज्ञानस्याकारं फलोक्तिमुखेन विवृण्वन्ति अयमर्थ इत्यादि। तथा च तया लीलया साङ्ख्यसिद्ध इव साक्षीति न ज्ञातः, किन्तु भगवद्दासत्वादिवैशिष्ट्येनोपनिपत्तिसिद्धरूपेण ज्ञात इत्यर्थः। अग्रिमचरित्रमिति। पञ्चमादिस्कन्धान्तरोक्तम्। फलज्ञानादिति। फलमनुपदोक्तरीतिकस्वस्वरूपावस्थानरूपं तस्य ज्ञानात्। इदमेव विशेषतो ज्ञानम्॥

एतन्निगमनायाग्रिमश्लोकं विवृण्वन्ति अत एवेत्यादि। यथाधिकारं निर्णय इति। बन्धुत्वनिर्णयः। ज्ञानमोक्षाभ्यां बन्धनं सत्त्वगुणवज्ज्ञेयम्।
१-१३-२
ताभ्यामपि गुरुत्वेनासक्तिजननादिति॥ २॥

मुमुक्षुरित्यत्र। भगवतः प्रेम एवेत्यत्र प्रेम इवेति पाठः प्रतिभाति। निषेधाभाव इति। पूजा न मया ग्राह्येति निषेधस्याभावः। कुलक्षयप्र-
१-१३-६
योजकत्वान्निषेधः सम्भाव्यते अग्रिमवाक्यकथनानुसारात्, तदभावायैतदुक्तम्। तदर्थमिति। लोके हि नानादेशयात्रां कुर्वाणाः स्वस्य पक्षित्वं वदन्ति वयं पक्षिण इति, तदा स्मरणं न सम्भवतीति तन्निवृत्तय इत्यर्थः। अर्थपदमत्र निवृत्तौ मशकार्थो धूम इतिवत्। विचिकित्सेति। अयं शब्दो ग्लानौ रूढो जुगुप्सावत्प्रयोगवशाज्ज्ञेयः। क्लेशजनितमिति। पूर्वानुभूतक्लेशजनितम्। पष्ठ्यन्तपदं तृतीयया कथं व्याख्यायते इति शङ्कानिवृत्तय आहुः जीवनेत्यादि। परित्यागभावनामिति। जीवनस्येति शेषः॥६॥

भवद्विधा इत्यत्र। प्रयासजननादिति। तीर्थपापनाशप्रयासजननात्। इदमेव
१-१३-१० सूचितं विवेकधैर्याश्रयग्रन्थे 'विशेषतश्चेदाज्ञा स्या'दिति पद्येन १०

१-१३-११ अपि न इत्यत्र। ज्ञास्यतीति। सम्भावनायां लृट्। लज्जयेति। अवधूतवेशकृतलज्जया॥ ११॥

१-१३-१३ नन्वप्रियमित्यत्र। स्वकार्यमिति। विदुराभिमतं कार्यम्॥ १३॥

एवं गृहेष्वित्यत्र। भगवन्तं द्रष्टेति। द्वारकायां गत्वा तत्र दृष्ट्वा।
१-१३-१७ अन्यथा चेदिति। यदि स्वार्थे ममता न भवेयुरित्यर्थः॥ १७॥

विदुर इत्यत्र । कालस्येति । कलियुगरूपस्य । तत्र लिङ्गं परमदुस्तरत्वं
१-१३-१८ बोध्यम् ॥ १८ ॥

राजन्नित्यत्र । पत्नीरिवेति । अष्टावक्रशप्ता भौमाहृताः कुशपत्नीरिव । तासां
तथात्वं पाद्मोत्तरखण्डे प्रसिद्धम् । पूर्वमिति । विश्वरूपदर्शनावसरे
१-१३-१८ 'अमी च त्वां सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ती'ति-
भयलिङ्गात् । वैधदीक्षान्यायेनेति । यथा वैधदीक्षायां गुरुणा स्वनिष्ठं ज्ञानं शिष्ये सञ्चार्यते, यथोपकोसलविद्यायां 'ब्रह्मविद इव सौम्य ते मुखं भाति, को नु त्वानुशशासे'त्यादि । यथा च तान्त्रिकदीक्षायां गुरुणा देवता स्वस्मिन् सन्निवाश्य शिष्ये सञ्चार्यते, तेन न्यायेनेत्यर्थः । अन्यत्रेति । पाण्डववञ्चनादौ । द्वितीय इति । आद्ये ॥१८॥

१-१३-२० येन चैवेत्यत्र । स्वनिष्पादित इति । कालनिष्पादितः ॥ २० ॥

अग्निरित्यत्र । सामान्यविशेषभावादिति । लाक्षागृहे समातृकाणां पञ्चानामप्रकारात्तत्समानम्, विषमोदके तु भीमस्यैवाप्रकाराद्विशेष इति
१-१३-२३ पश्चात्तद्ग्रहणमित्यर्थः । तेपीति । दूषिता इति शेषः ॥ २३ ॥

तस्यापीत्यत्र । अनालोचितयाचक इति । अनालोचितं यथा स्यात्तथा याचकः, वस्तुयाच्यस्वदातॄणां चतुर्णामन्यतमस्य वा स्वरूपादिकमवि-
१-१३-२४ चार्य यो याचते, तादृश इत्यर्थः ॥ २४ ॥

इतोर्वागित्यत्र । हीनत्वबोधनायेति । धृतराष्ट्रस्येत्यर्थः । स्वतन्त्राणामिति । पुंसामित्यस्य विवरणम् । देशसापेक्ष इति । पुरुष इति शेषः । तथा च
१-१३-२६ देशापेक्षां परित्यज्य यात्वित्यर्थः । अत एवेति । स्वदेशापेक्षात्यागादेव । परित्यागवैयर्थ्यापत्तेरिति । देशत्यागोत्तरमपि बुद्धिभ्रंशे तथात्वापत्तेरित्यर्थः । ननु तस्यैव हेतोरित्यत्र देशस्य परमफलासाधकत्वमुक्तम्, तथा 'भयं द्वितीये'त्यत्र धनस्यापि तथात्वमुक्तम्, तथा सति कोविदत्वस्य प्रमादाभावस्य च तत्साधकत्वं फलतीति ताभ्यामेव फलार्थं प्रयतनीयम्, त्यागे को विशेष अत आहुः तस्यैवेत्यादि । तथा च तत्र तयोरसाधकत्वमात्रमुक्तम्, नतु बाधकत्वम्, अतस्तत्र केवलेन कालेन देशेन च न परमफलविरोध इत्यर्थः । तथा च तत्र तथास्तु, प्रकृते तु कालस्य बाधकताया प्रत्यक्षानुमानाभ्यां सिद्धत्वात्तन्नियम्यैः स्वैर्व्याप्तस्यापि तथात्वाद्विरोध एवेति देशस्त्याज्य एवेत्यर्थः । एतदेवाहुः तदित्यादि । केचिदित्यादि । श्रीधरो बोपदेवाद्याः गतस्वार्थेति श्लोकव्याख्यातपक्षस्थं धीरं मन्यन्त इत्यर्थः ॥ २५ ॥

---

१ अप्रत्यक्षानुमानाभ्यामिति पाठः ।

पतिमित्यत्र । पौनरुक्त्यपरिहारायाहुः अत्राधिकेति । ' विप्रस्य वै सन्न्यसतो '
इत्यत्रोक्तर्थाधिर्द्वैतरनाविष्टत्यर्थः । अनुवादादिति । नारदकृतानुवा-
१-१३-२९ दात् । ननु नारदेन विदुरोपदेशाद्गत इति कुतो नोक्तम्, तत्राहुः साक्षा-
दित्यादि । विरोध इति । विदुरोऽस्मात्तु पूर्वं स्निग्धः, इदानीमस्मद्दोपदर्शी जात इत्याका-
रको विरोधो युधिष्ठिरस्य मनस्यापद्येत, तदनुचितम्, विदुरस्यान्यत्र तात्पर्यात्, अत-
स्तदभावार्थं नोक्तवानित्यर्थः । नन्वस्मिन्नध्याये धृतराष्ट्रस्य मुक्तिमात्रं वक्तव्यम्, तत्तु
'धृतराष्ट्रः सह भ्रात्रे ' त्यादिना वक्ष्यति, ततः पूर्वं युधिष्ठिरप्रश्नादिकं व्याससू-
ताभ्यां किमित्युक्तमित्याकाङ्क्षायां युधिष्ठिरादिमुक्तिर्याग्रिमाध्याययोर्वक्ष्यते, तदुपोद्घातत्वे-
नात्रेदमुक्तम् । तथा धृतराष्ट्रमुक्तेः प्रकृतत्वात्तदुपयुक्तत्वेनाप्युक्तम्, तथान्योपदेशायाप्युक्त-
मित्याशयं कारिकाभिराहुः यावदित्यादि । प्राक्कथेति । युधिष्ठिरप्रश्नादिकथा ॥२९॥

अजातशत्रुरित्यत्र । अनुद्धरणाभ्युदयेति । गार्हपत्यादिकं कुण्डादग्नीनामुद्धर-
णात्पूर्वं सूर्योदये तत्प्रायश्चित्तत्वेन तद्विधानमित्यर्थः । क्रमेणेति ।
१-१३-३० आवश्यकं पूर्वं ततः सन्ध्या ततस्तर्पणमिति क्रमेण ॥ ३० ॥
अथाजगामेत्यत्र । प्रमादमिति । आत्मघातादिरूपमनर्थम् । उद्वेगा-
१-१३-३७ द्धीनत्वादिति । उद्वेगेन हीनत्वात् । अधिकारजाघन्यादित्यर्थः ॥३७॥
मा कञ्चनेत्यत्र । शोको हीत्यादि । शोको हि यथा मानभङ्गादौ स्वन्यूनतायां
तस्य मननेन विशिष्टज्ञानम्[2] । तत्र च शत्रुनाशादिनिदिध्यासनेति
१-१३-४० व्याप्तिवारणाय विशेषणदलम्, स्वन्यूनतापादकमनिष्टज्ञानं शोक इत्युक्ते
पुत्रादिनाशश्रवणजन्यशाब्दमात्रेति व्याप्तिरिति तद्वारणाय विशेष्यदलम् । तादृश-
शाब्दस्यापि लक्ष्यत्वाङ्गीकारे तु प्रयोग[3]प्रसिद्ध्योर्विरोध एव दोष इति समुदितोपादा-
नम् । निदिध्यासनं प्रयत्नपूर्वकं विशिष्टज्ञानम्, तदेतदभिसन्धायाहुः कोपीत्यादि ।
शोकाकरणे हेत्वन्तरमाहुः किञ्चेत्यादि । ननु स्वपुत्रनाशादौ कथं हितकरणानुसन्धानं
स्वार्थपक्षे इत्यत आहुः ममतास्पदेत्यादि । सैवेति । स्वहितकरणरूपा । लीलात्वेन
विचारेपि सैवानुसन्धेयेत्याशयेनाहुः उभयथेत्यादि ॥ ४० ॥
यथा गाव इत्यत्र । तदर्थमिति । लीलार्थम् । अन्यथेति । लीलायां दोष-
त्वाद्यभिसन्धाने । दीर्घरज्जुरिति । यस्यां रज्जौ बलीवर्दान्नसि प्रोतान्
१-१३-४१ कृत्वा रज्ज्वन्तरेण बध्यन्ते, सा तन्ती तद्रूपेत्यर्थः । आधारत्वमिति ।
प्राकृतक्रियारूपतुपाधारत्वम् । असंस्कृतान्नरूपत्वमित्यर्थः । अनध्यासे कथमिन्द्रियव्या-

---

१ धृतराष्ट्रमात्रमिति पाठ. । २ मनने अनिष्टज्ञानमिति पाठः । ३ प्रयोगसिद्धयोः ।

पार इत्यत आहुः इन्द्रियाणीत्यादि । प्रेरकस्येति । इन्द्रियाधिष्ठातुः । अध्यासं कृत्वेति । देहादिषु तत्सम्बन्धिषु च यथायथमहन्तां ममतां चेत्यर्थः । किञ्च भगवते त्यादि । इत आरभ्य यथा क्रीडोपस्कराणामित्यस्य व्याख्यानम् । कुतश्चिद्योजयतीत्यत्र । सार्वविभक्तिकस्तसिः । केनचिदित्यर्थः ॥ ४१ ॥

१-१३-४३ यन्मन्यस इत्यत्र । न चेति मूलस्यार्थमाहुः नासीदस्ति भविष्यतीति । अत्र त्रिष्वपि नञोन्वयः ॥ ४३ ॥

१-१३-४५ कालकर्मेत्यत्र । राजशब्दस्य देहवाचकत्वादिति । इदं देहोयमित्यस्येदमो व्याख्यानं निमित्तमिति, न रक्षाकर्तेत्यर्थः ॥ ४५ ॥

१-१३-४६ अहस्तानीत्यत्र । दूषयतीति । द्वाभ्यां दूषयतीत्यर्थः । तत्र सामान्यप्रकार इति । अन्नातृभावे सामान्यप्रकारः । भावे वेति । जीवानधिष्ठितस्य सत्त्वेपि ॥ ४६ ॥

१-१३-४७ तदिदमित्यत्र । तत्राहेति । तादृश्यां शङ्कायां खाद्यानां खादकानां चाभेदमाहेत्यर्थः । स्रष्टानामपीति । परस्परमभेदादित्यर्थः । बहिरिति । प्रकटयतीति शेषः । लौकिक इति । तथा च वस्तुविचारे कूर्माङ्गवदन्तःप्रवेशान्न दोष इत्यर्थः । आदित्यादि । आसमन्तादद्नमात् आतः भक्षणान्मा निषेधात्मकः केवलो भवत्यवतिष्ठते इत्यर्थः । 'परोनुनासिको वे'ति सन्धेर्वैकल्पिकत्वान्नत्वाभावः[1] । पृषोदरादित्वाद्वा । दत्वनत्वयोरभावस्तेनात्मेत्यतिपरोक्षवृत्त्या सिद्ध्यतीति ज्ञेयम् । आत् अभजनादिति पाठो न भाति । नहीत्याद्यग्रिमग्रन्थानुरोधादित्यपि ज्ञेयम् ॥ ४७ ॥

१-१३-४८ सोयमद्येत्यत्र । सर्वरूपेण रक्षकत्वमिति । व्यापकत्वेन भक्ष्यैकभक्षकत्वेन सर्ववस्तुस्वरूपत्वेन चेत्यर्थः । संहारलीलायां कथं पालकत्वमित्यत आहुः दोषदूरीकरणेनेति । तथा च तदापि पालकत्वमव्याहतमिति भावः । विशेषाधिकारित्वादिति । संहरणे विशेषाधिकारित्वात् । मौसलस्य जातत्वात्कथमेवमुक्तिरित्यत आहुः मोहान्तरेत्यादि । निवारकत्वेनेति । स्थापनीयानां मृत्युनिवारकत्वेन मोहनिवारकत्वेन वा ॥ ४८ ॥

१-१३-५० धृतराष्ट्र इत्यत्र । पल्लवीकृतमिति । पल्लववद्दीपद्धनीकृतम् ॥ ५० ॥

१-१३-५२ स्नात्वेत्यत्र । अग्नय एव संस्क्रियन्ते इति । न फलार्थं होम इत्यर्थः । त्रिमुच्येति । तथा च सापि त्यक्तेत्यर्थः ॥ ५२ ॥

---

१ नानुनासिकः २ । मध्य ।

विज्ञानात्मनीत्यत्र। स एवेति। निर्विकल्पसमाधिरेव। अत्रेति। आत्म-
विचारे। देहमानसभेदेनेति। देहाभिमानित्वमनोभिमानित्वभेदेन।
१-१३-५४ ब्रह्माण्डाभिमानेति। ब्रह्माण्डे अहमित्यभिमानो यस्य सः। प्रकृत्य-
धिष्ठातृत्वमित्यादि। तथा च चतुर्थे आत्मनि प्रविलीन इत्यर्थः॥ ५४॥

स वा इत्यत्र। आग्नेय्याः धारणाया यजमानस्यावश्यकत्वायाहुः
१-१३-५६ आधानेत्यादि। तथा च तस्य तदभिन्नत्वात्तेन साधारणा कार्यै-
वेत्यर्थः॥ ५६॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे त्रयोदशाध्यायविवरणम्॥ ३॥

अथ चतुर्दशाध्यायविवरणम्।

अथ चतुर्दशाध्यायं विवरिषवोऽवसरसङ्गतिबोधनाय पूर्वाध्यायार्थमनुवदन्तः प्रस्तुताग्रिमयोरर्थमाहुः एवं हीत्यादि। अत इति। एतदनन्तरम्। ननु द्वाभ्यां हेतुपूर्व कथनस्य किं प्रयोजनमत आहुः तेषामित्यादिद्वयम्। महदिति। भूमित्यागरूपम्। तथा च तद्धेतुत्वेनात्र तत्कथनमित्यर्थः। ननु तथापि तत्तु द्वितीये वाच्यम्, तथात्वस्य कथं हेतुबोधकत्वमित्यत आहुः सम्भावनायामित्यादि। इति चेति। एवं प्रकारेण तत्र हेत्वन्तराणि समुच्चेतुं विनिरूप्यत इति पूर्वेण संबन्धः। एतदेव निगमयन्ति भगवद्ग-मनं तस्मादित्यादि॥

१-१४-२ सम्प्रस्थित इत्यत्र। यदा नायादिति। व्यतीता इत्यस्यार्थः॥ २॥

जिह्मप्रायमित्यत्र। न शक्येति। नानुमातुं शक्या। सौहार्दमिति। नानु-
मातुं शक्यमिति शेषः। तस्मा इति। युधिष्ठिरार्थम्। तत्कृतार्थत्वार्थं
१-१४-४ तस्यैतद्द्वयं भातमित्यर्थः॥ ४॥

भगवानपीत्यत्र। अयुक्तत्वेपीति। भगवत्त्वादेवायुक्तत्वेपि। बहूनामिति।
अस्मादृशामन्यदेशवासिनाम्। आराध्यानामित्यादिनोक्तहेतुद्वयेनान्यत्र
१-१४-३४ गमनसम्भवात् पुर आस्ते इति बहिर्मुखेत्यादिहेतोः सुधर्मायामास्ते
इति भक्तानामपि कालवशेन तथात्वाच्च सुहृद्वृत इति प्रकारविशेषं पृच्छतीत्यर्थः। सुखप-
दप्रयोजनमाहुः स्यमन्तकेत्यादि॥ ३४॥

मङ्गलायेत्यत्र, क्षेमाय भवायेत्यत्र साधारणानामधिकाराभावं हृदिकृत्याहुः
निविष्टपदरक्षणायेति। ये द्वारकादौ निविष्टाः, तेषां स्थानरक्षार्थम-
१-१४-३५ धिकपदमात्मार्थं चेत्यर्थः। तादृशा इति। मङ्गलजनकाद्यूतवन्त एव
दृशाः सन्तीत्यर्थः। अथवेत्यादि। तथा चादृशामपि तत्सम्पादनसामर्थ्यान्न दोष

इत्यर्थः । यथा प्रकृतिपरिणाममित्येकं पदं सिन्द्ध इति क्रियाया विशेषणम् । ध्वनिनेति । काव्याङ्गप्रधानवाक्येन वा ॥ ३५ ॥

यत्पादशुश्रूषणेत्यत्र । अन्यत्त्विति । भोगात्मकं तु । विषयबला-
१-१४-३७ दिति । शुश्रूषणविषयस्य भगवतो बलात् ॥ ३७ ॥

न दत्तमित्यत्र । अधर्म्याणीति । 'स्याद्धर्ममस्त्रियां'मित्यमरः ।
१-१४-४० तद्विरुद्धमधर्मम् ॥ ४० ॥

पराजितेत्यत्र । नसमास इति । नैकधेत्यादिवन्नशब्देन सह सुप्-
१-१४-४२ सुपेति समास इत्यर्थः ॥ ४२ ॥

अपिस्वित् पर्यभुङ्क्था इत्यत्र । सम्भोज्येति ह्रस्वान्तपाठे प्रयोगसम्भवप्रकार-
माहुः अथादावुत्तरे विभाग इति । इदं लक्षणग्रन्थस्य प्रातिशाख्यस्य
१-१४-४३ सूत्रम् । तथा च 'अथादावुत्तरे विभागे ह्रस्वं व्यञ्जनं पर' इति सूत्रेण यथा देवयते शीकयते इत्येवमादेः पदस्य देवाय ते यजमानाय शर्म, शीकाय ते स्वाहेत्येवं संहिताध्ययनदशायां दीर्घो वोच्यते, तेन न्यायेनात्रापि पदविभागे ह्रस्वः, संहितायामेव दीर्घ इत्यर्थः । सूत्रार्थस्तु, अथेत्यधिकारे । आदावुत्तरे पदादौ पदान्ते च संहितायां वर्तमानो दीर्घो यदि व्यञ्जनपरः स्यात्, तदा विभागे पदपाठे ह्रस्वमापद्यत इति त्रिभाष्यरत्ने व्याख्यातः । तत्र स्वारसिकमेकपद्यम्, अत्र तु समासकृतमित्यतोत्र न्यायपदमुक्तं ज्ञेयम् ॥ ४३ ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे चतुर्दशाध्यायविवरणम् ॥ १४ ॥

अथ पञ्चदशाध्यायविवरणम् ।

अथ पञ्चदशाध्यायं विवरिषवः सङ्गतेः प्रागेवोक्तत्वात्तां स्मारयन्तः प्रस्तुतस्यार्थमाहुः एवमित्यादि । विनिश्चयादिति । ल्यब्लोपे पञ्चमी । शास्त्ररीतावपि विशेषमाहुः भार्येत्यादि । तथा च यथा 'ये देवा यज्ञहन' इत्यादीन् मन्त्रानुक्त्वा 'इत्याहैतानेव लोकांस्तीर्त्वा सगृहः सपशुः सुवर्गं लोकमेती'ति तत्पाठेन सपरिकरस्य यजमानस्य सुवर्गो लोकः श्राव्यते, तथात्र भक्त्येति निरूप्यत इत्यर्थः । अवान्तरवाक्यतात्पर्यमाहुः प्रेमेत्यादि । आहेति । सूत आह । पर इति । उत्कृष्ट भक्तः ।

एवं कृष्णसख इत्यत्र । भगवतो जनार्दनत्वेन कालरूपत्वेन च मुक्त्यवसरे देहत्यागे
च तस्यावश्यकतया 'स्वलङ्कृताः कान्तसखावरूथाः' इत्यादिषु बहु-
१-१५-१ व्रीहौ सखिशब्दस्य साहित्येपि प्रयोगात्तमाश्रित्य पक्षान्तरमाहुः एतद्-

द्वारा वेत्यादि। कृष्णसखः कृष्णसहित इत्यर्थः। एतस्यार्थस्याभिप्रेतत्वाय विपक्षे बाधकांस्तर्कानाहुः अन्यथेत्यादि। यद्यर्जुने भगवत्साहित्यं न स्यात्, तदा पूर्वोपदेशस्मरणस्येदानीमिव तदानीमपि सम्भवात्तत एव वैराग्यादेरपि सिद्धेस्तस्मादेव स्थानान्महाप्रस्थानगमनमुचितं स्यात्। न'न्वर्जुनेनान्विता' इति भगवद्वाक्याद्बलरामानयनायागमनमिति नानेन साहित्यसिद्धिरित्यत आहुः अर्जुनेत्यादि। उक्तवाक्य इन्द्रप्रस्थस्योक्तत्वादिन्द्रप्रस्थादेव तथा स्यात्, न तु गजाह्वयात्तथेत्यर्थः। बाधकतर्कमुक्त्वा साधकतर्कमाहुः तावदित्यादि। नारदेन 'ह्यवशेषं प्रतीक्षत' इति भगवत्कृतां प्रतीक्षामुक्त्वैतेषां प्रतीक्षणमुक्तम्। मौसलस्यैवावशेषत्वाङ्गीकारे तस्य वृत्तत्वेन तद्वाक्यमप्यप्रमाणं स्यादिति तदर्थं तथेत्यर्थः। युक्त्यन्तरमाहुः कृष्णाविति। अश्विनोरिव नरनारायणोरपि साहित्यस्य नियतत्वात्तदपि सत्यं स्यादित्यर्थः। ननु यदि सार्वदिकं साहित्यम्, तदापराजयाद्यवस्था न स्युरिति नेदं युक्तमिति शङ्कायामाहुः अवस्थेत्यादि। सर्वत्र भगवत्तेजसैव कार्यसिद्धिः, नान्यथेत्यर्जुनस्य विश्वासार्थं भगवतैव लीला सा कृता, अन्यथासुरमोहाद्यर्थं अज्ञत्वादिकं स्वस्मिन् पूर्वं प्रकटीकृतं तथेत्यर्थः। अवस्थाप्रकटनस्य लीलात्वे विश्वासार्थत्वे च युक्तिमाहुः अन्यथेत्यादि। यद्येवमर्जुनावस्थां न प्रकटयेत्, तदा तस्याहङ्कारे मुक्त्यभावेन तथा स्यादित्यर्थः। ननु मुक्तेर्दैवकार्यत्वात्तद्दानेपि न सावशेषकर्तृत्वमितिशङ्कायामाहुः अर्जुनस्येत्यादि। तदभावे मास्तु सावशेषकर्तृत्वम्, तथापि तस्याहङ्कारसत्तायां तेजः शोकस्तेजोविषयको यः शोकः स न युक्तः स्यात्, अतो विश्वासार्थं सा लीलेत्यर्थः। फलमपि गमकत्वेनात्राहुः अत एवेति। 'एवं गृहेषु सक्ताना'मित्याद्युक्तं संसारावेशं प्राप्यापीत्यर्थः। रूपमेवार्जुन इति। 'इन्द्रो देवते'तिवल्लिङ्गभेदेपि विशेषणविशेष्यभावः॥ १॥

१-१५-३ कृच्छ्रेणेत्यत्र। ननु भगवतो नित्यत्वव्यापकत्वेऽनुभवन्तमर्जुनं प्रति भगवतः परोक्षत्वाभावात् कथं तदुक्तिरित्यत आहुः स्वेच्छयेत्यादि। तथा च तदानीं तादृशेच्छया तथेत्यर्थः॥ ३॥

१-१५-७ यत्संश्रयादित्यत्र। गुणस्वभावभेदेनेति। गुणा इतरेतरसङ्कीर्णाः सत्त्वादयः स्वभावोर्जुनस्य प्रकृतिः ताभ्यां कृतो यो भेदो वैषम्यं तेनेत्यर्थः। चतुर्दशस्यार्थमाहुः तेनान्यस्य च सङ्क्षय इति। अन्यस्येति। तेजसः। चतुर्दशगतिमिति। चतुर्दशप्रकारम्। तेजसा मध्ये सर्वमिति। ह्रियमाणेन तेजसा-त्मन्मध्यस्थं सर्वमेव हृतमित्यर्थः॥ ७॥

१-१५-१२ यत्तेजसेत्यत्र। चरित्रमितीति। इति हेतोर्भिन्नः प्रक्रम इत्यर्थः॥१२॥

तत्रैवेत्यत्र। ननु पूर्वश्लोकवदुत्तरश्लोकानामपि यत्पदोपबन्धवत्तां सत्त्वाद-

१-१५-१३ स्मिन्नेव मध्यस्थे किमिति मोप उच्यत इत्याकाङ्क्षायामाहुः तमसे त्यादि । गुणनिरूपणादिति । आजमीढपदेन मोक्षदाननिरूपणात् । तथा चैनं हेतुद्वयात् परोक्षत्वं मोक्षदातृत्वं च वक्तुं मोपमाहेत्यर्थः । ब्रह्माण्डविग्रहत्वादिति । तथा च तेन रूपेणातिपरोक्षतया मोपहेतुत्वमित्यर्थः । तेजोपहरणेपीति । कार्यकारणोत्तरं तेजोपहरणेपीत्यर्थः । एवं सर्वसम्मतपाठपाठस्य मध्ये मोपोक्तिः समर्थिता । अतःपरं सिद्धान्तपक्षेण समर्थयन्ति वस्तुत इत्यादि । ननु गुणैः कार्यान्तरमपि जायत एवेति त्रयेणैव निरूपणं कुत इत्याकाङ्क्षायामाहुः लोकत्रयेत्यादि । नृदेवदैत्यात्मका ये लोकास्तज्जयस्यैवार्जुनेष्यमाणत्वादित्यर्थः । यत्तेजसेतिश्लोके दैत्यजयस्यास्पष्टत्वात्तत्स्फुटीकर्तुमाहुः दैत्येत्यादि । अत्र दैत्यजय इत्यादौ सप्तम्यन्तः पाठः प्रतिभाति । तथा च तस्मिन्नेवं निरूपणीयेपि अभीष्टेषु भोगस्य प्राधान्यात्स एव तत्र निरूपित इत्यर्थः । तर्हि तन्निरूपणे किं मानमत आहुः अर्थादित्यादि । आसनार्द्धप्राप्तिरूपस्यार्थस्य देवारातिवधादेव जातत्वात्तन्निरूपणेनार्थादेव निरूपितोपि देवलोकवृत्तान्तोपसंहारे तदनुवदनभगवत्कृतवञ्चनयोः शेषतयाङ्गतयाग्रिमश्लोके निरूपितः । तथा चाग्रेनुवाद एव मानमित्यर्थः । ननु तथापि मध्ये वञ्चननिरूपणस्य तात्पर्यमाहुः दैत्यानामित्यादि । तत्प्राधान्यादिति । वञ्चनप्राधान्यात् । तथा चेदानीं संहारकालत्वात्तत्र च ' अन्ते त्वधर्महरमन्युवशासुराद्या ' इति वाक्येनासुराणामुपकरणरूपत्वादिदानीं तदनुगुणत्वबोधनाय तदुक्तिरित्यर्थः । नन्वेवं सत्यग्रे भगवच्चरित्रनिरूपणस्य किं प्रयोजनम्, प्रश्नोत्तरस्य तावतैव जातत्वादित्याकाङ्क्षायामाहुः यदित्यादि । नात्यन्तमिति । आपाततः प्रतीयमानोपि तेषु श्लोकेषु सोत्यन्तं न सिध्यतीत्यर्थः । अनुग्रह उपकारः । अत्यन्तासिद्धौ गमकद्वयमाहुः भूभारेत्यादि । सिद्धमाहुः अत इति । यद्वान्धवेत्यादिपद्यत्रयस्यावतारकार्यबोधनमात्रार्थत्वात् । नन्वेवं सति मध्ये एतेषां किं प्रयोजनमित्याकाङ्क्षायां तत्तात्पर्यं कारिकाभ्यामाहुः कारणमित्यादि । इतरसंहारस्यार्जुनद्वारा कारणं स्वयं तत्करणं अर्जुनसंहारमतिवन्धश्चेतित्रयं भगवतस्तूष्णीकत्वेपि भगवत्कृतत्वमेषां ज्ञापयितुं कथ्यत इत्यर्थः । तदिति । स्वकृतत्वज्ञापनम् । एवं कथनस्य प्रयोजनमाहुः दोषेत्यादि । सिद्धमाहुः अत इत्यादि । अन्तःसाधनं वलम्, वहिःसाधनं धन्वादिसामर्थ्यम्, तथा चैवमुपपत्तौ तेषां श्लोकानां विगीतत्वं युक्तमेवेत्यर्थः । सर्वसम्मतपक्षमाश्रित्याहुः तमोमिश्रेत्यादि । विगीतत्वाभिप्रायेणाहुः हेतुत्वेनेत्यादि । एवमग्रेपि । ॥ १३ ॥

१-१५-१४ यद्वान्धव इत्यत्र । कथं निवारितेत्यत आहुः तेनेत्यादि । निलीयगमननिरासे एकस्य तत्राशक्तत्वान्निवारितेत्यर्थः ॥ १४ ॥

सौत्य इत्यत्र । फलस्येति । आनन्दरूपस्य भगवतः । ततः स इति ।

१-१५-१७ जीवः । प्राप्तत्वादिति । यथेष्टविनियोगे हेतुः । अल्पमिति । अल्पं फलम् ॥ १७ ॥

१-१५-१८ नर्माणीत्यत्र । अयथात्वादिति । अपुरुषार्थत्वादित्यर्थः । तत्रानैकान्तिकमिति । स्मिते वशीकरणव्यभिचारम् । सम्बोधयतीति । वशीकरणार्थसम्बन्धित्वेन सम्बोधयति । सञ्जल्पितत्वमिति । प्रतिवादिजयमात्रफलककथाया जल्पत्वेन तथेत्यर्थः ॥ १८ ॥

१-१५-१९ शय्येत्यत्र । प्रतिकारे कृत इति । भगवता कृते । अन्ये इति । अर्जुनकृताः । तस्यापीति । पितुरपीत्यर्थः ॥ १९ ॥

१-१५-२० सोऽहमित्यत्र । अस्य विचार इति । वक्ष्यमाणे कार्ये प्रतीकारस्य विचार इत्यर्थः । ततः पराणां कार्याणां का सम्भावनेत्यत आहुः प्रियस्येत्यादि । यथा सारथ्यमित्यर्थः । स्वनिष्ठाः कार्याभावहेतवस्त्रिविधभगवद्राहित्यानि भगवन्निष्ठकार्याभावहेतुः सुहृत्त्वाभावः ॥ २० ॥

१-१५-२१ तद्वै धनुरित्यत्र । प्राप्ताप्राप्तविवेकेनेति । कार्यनिष्पत्तिकारणत्वेन किं प्राप्तं किं वानाप्तमिति विचारेण । इदानीं त्वित्यादिव्यतिरेकदशायां तु तद्धनुरादिकमाधारत्वेन ईशाधारत्वेन हेतुना अन्यथासिद्धं तत्स्वरूपस्य स्यात्-त्र्येणान्वयव्यतिरेकाभावादीशवत्त्यैव तद्ग्रहणात्स्वरूपतो जथाकारणत्वेन सिद्धमित्यर्थः । तदभावो वेति । स्वरूपाभाव एव वा असत्त्वमित्यर्थः । फलसाधकस्य तद्रूपत्वेमानमाहुः तत एवेत्यादि । स्थित इतीति । अवशिष्ट इति हेतोरित्यर्थः । विनियुक्त इति । धनुरादिर्विनियुक्तः । कुहक इति । सकपटः । फलवैफल्यमित्यादि । परिग्रहरक्षाभावेनाराधनवैयर्थ्यं साध्यवैफल्यं रक्षावैयर्थ्यं साधनवैफल्यं धन्वादिवैयर्थ्यम् ॥ २१ ॥

१-१५-२२ २४ राजन्नित्यत्र । द्वितीय इति । स्वास्वास्थ्ये । प्रथमस्येति । सर्वपश्चस्य । निश्चीयत इति । अत्रापि निश्चीयते ॥ २२ ॥

१-१५-२७ देशकालेत्यत्र । भगवदीयत्वादिति । वाक्यानां भगवदीयत्वात् । भगवान् हि अन्यत्करोत्यन्यत्सम्पद्यते तथा वाक्यान्यपीत्यर्थः । अत्र तूष्णीम्भावः कण्ठतोऽनुक्तोपि अग्रे चिन्तनोक्त्यर्थबलादेव पूर्ववाक्यशेषत्वेनावगन्तव्यः ॥ २७ ॥

१-१५-२८ एवमित्यत्र । स्वभावत एव ज्ञानरूपत्वमिति । 'बुद्धिर्विज्ञानरूपिणी'ति वाक्याद्विशिष्टज्ञानसमानाकारत्वम् ॥ २८ ॥

वासुदेवाङ्घ्रीत्यत्र । भगवत्स्वरूपयोरिति । जीवपरमात्मनोरित्यर्थः । जीव-

भगवत्स्वरूपायीरिति वा पाठः प्रतिभाति । सोऽर्जुनो जात इति ।
१-१५-२९.३० 'वलक्षो धवलोऽर्जुनः' शुद्धो जात इत्यर्थः । त्रिक्षणावस्थायीति ।
मतान्तरानुसारेण पूर्वपक्षतयोक्तम् । मूले ज्ञानस्य रूढत्वकथनेन चिरकालस्थायित्वस्यैवाभिप्रेतत्वात् । ज्ञानतिरोभावं दूरीकृतवानिति । पुनः प्राप्तिस्वरूपव्याख्यानाचेति ज्ञेयम् ॥२९॥

विशोक इत्यत्र । तत इति । ज्ञानानुसन्धानानन्तरम् । अन्तःप्रवेशेनेति ।
सर्वान्तःप्रवेशेन । असम्भय इति । न विद्यते संशयानां सम्भवोय-
१-१५-३१ स्मिन्निति सप्तम्यर्थे बहुव्रीहिः । न पुनरुद्भम इति । तात्पर्यार्थः ॥३१॥

यथाहरदित्यत्र । आभासे । आत्मत्त्वादिति । नियन्तृत्वादित्यर्थः । न दोषभाव इति । अत्र न दोष इत्येव पाठः प्रतिभाति । विजहाविति ।
१-१५-३४ तथा च कार्ये निर्वृत्ते प्रयोजनाभावादेवं कृतमित्यर्थः । द्वयमिति ।
भूभारभूततनुस्तद्वर्तितनुश्चेति द्वयम् । अत्र तयोस्तन्वोः सत्यत्वम्, कण्टकदृष्टान्ताद्द्वयोः साम्यकथनाच । अनित्यत्वं परम् ॥ ३४ ॥

यथेत्यत्र । एवमिदमपीति । तथा च भूभारक्षपणार्थं यो मर्त्यवेशस्तमपीत्यर्थः ।
अत्र कलेवरस्यावस्तुत्वम्, त्यक्तरि नटदृष्टान्तात् । 'कृष्णो ह्यत्यक्तदे-
१-१५-३५ होपि त्यक्तदेहस्य देहवत् । आत्मानं दर्शयामास स्वरूपसदृशाकृति'मिति
ब्रह्माण्डवाक्याच ज्ञेयम् ॥ ३५ ॥

यदा मुकुन्द इत्यत्र । निर्गमनस्यैव शरणत्वे हेतुः तदतिरिक्तेत्यादि ।
प्रत्यन्तस्य गन्तव्यपदेनान्वयः । सर्वेषु युगेषु कालत्वाविशेषेपि कलि-
१-१५-३६ धर्माणामेव मोक्षबाधकत्वम्, तथा सर्वेषु देशेषु देशत्वाविशेषेपि देशविशेषस्य कुतस्तद्व्याप्तिराहित्यं येन युधिष्ठिरस्य तत्र गमने बुद्धिरित्याकाङ्क्षायां व्याख्येयश्लोकद्वयस्य तात्पर्यमाहुः कलिरित्यादि । 'त्वं कालमत' इत्युक्तो 'मले शुद्धिर्न विद्यते' इति ब्रह्मवैवर्तीयकाशीमाहात्म्ये कलिं प्रति ब्रह्मणो वाक्यात् । कलिः कालमलम्, अतो मलत्वरूपाद्विशेषात्तद्धर्माणां मोक्षबाधकत्वमितिभावः । कालस्य सर्वोपादानत्वात् सर्वं कालस्तेन मूलेस्य सर्वत्र व्याप्तिसम्भवेपि स्वामी 'कालस्वामी तु माधवः कालोपादेयायतो यस्माद्देशान्निवर्तते तिरोहितो भवति, तत्र तस्मिन् देशे निकृष्टता । तत्र दृष्टान्तः वह्नाविवेति । यथा निवृत्ते वह्नौ पार्थिवस्य भस्मतया निकृष्टता, भस्मनोऽग्निपुरीषत्वात् । 'अग्नेर्भस्मास्यग्नेः पुरीषमसीति' श्रुतेः । तर्हि देशान्तरस्य कथं शुद्धत्वम्, तत्राहुः दाराविरित्यादि । तदन्तर्वह्नेः सत्त्वेन न तथा निकृष्टता, एवं देशान्तरेन्तर्भगवतः सत्त्वेन न निकृष्टत्वम् । अतो देशान्तर्गतैर्युधिष्ठिरस्य मना बुद्धावारूढेत्यर्थः । दाराविति पुल्लि-

१ मलेति पाठः ।

द्वनिर्देशस्तु लिङ्गस्य लोकाश्रयत्वेनाशिष्यत्वात्। 'नित्यं शलाका स्त्रिया'मिति ज्ञापकात्।
ननु भगवत्सत्त्वयैव चेत्निकर्षाभावः, तर्हि भक्तत्वेन युधिष्ठिरेपि तत्सत्त्वान्निर्गमनमनर्थक-
मित्याकाङ्क्षायामाहुः अग्निभावेपीत्यादि। यथारणौ वह्निसत्त्वेपि काष्ठेन मथनद्वारा
प्रकाशनात् स(अग्निः) साध्यः, तथात्र भगवत्सत्त्वेपि देशान्तरगत्या स प्रकाश्य इति हेतोर्यु-
धिष्ठिरस्य गमननिश्चय इत्यर्थः। ननु भगवतो व्यापकत्वात्पूर्वोक्तं सर्वमसम्भवीत्यत आहुः
यद्यपीत्यादि। केचिदत्र 'स्वतन्वा सह महीं जह्रा'विति व्याकुर्वते, तद्दूषयन्ति भूमी-
त्यादि। तथा चैवं व्याख्याने जहाविति त्यागवाचकपदे विध्यनुवादवैरूप्यापत्तिः।
सा ह्यस्यानुपपद्यमानत्वात् तृतीयाया अप्यसम्भव इत्यर्थः॥ ३६॥

युधिष्ठिर इत्यत्र। स त्वित्यादि। युधिष्ठिरे ज्ञानाविकाससमन्ता कलिर्युधिष्ठिरा-
१-१५-३७ दीन् पाण्डवानपि भगवत्कृपानवलोकितान् मन्यत इत्यर्थः॥ ३७॥

सः स्वपौत्रमित्यत्र। नीवीपदसूचितमर्थमाहुः अन्ये त्वित्यादि। स्त्रिया कृतेन
चरणसंवाहनादिना एकदेशे भुज्यमाने वस्त्ररहिताया अपि स्त्रीयः पतित्वं
१-१५-३८ स्वस्मिन् मन्यन्त इति योजना। वस्त्ररहिता इत्यत्र वस्त्ररहिताया
इति पष्ठ्यन्तः पाठः प्रतिभाति। पिचो द्विकर्मकत्वाभावेन स्वपौत्रं पतिमभ्यपिञ्चदिति
प्रयोगानुपपत्तिमाशङ्क्य तदुपपत्त्यर्थमाहुः पतिमित्यादि। अनुवादानङ्गीकारे दोषमाहुः
पतित्वेत्यादि। अनुशासनाभावेन द्वितीयायाश्चतुर्थ्यर्थे लक्षणाद्धातोर्द्विकर्मकत्वकल्पना च
स्यादित्यर्थः॥ ३९॥

विसृज्येत्यत्र। अशास्त्रत्वादिति। न विद्यते शास्त्रमस्मिन्नित्यशास्त्रं तथात्वा-
दशास्त्रीयत्वादित्यर्थः। ननु शेषाभ्यनुज्ञानङ्गीकारे चीरवाससत्त्वोक्ति-
१-१५-४० विरोधस्यत इत्यतः आहु चीरेत्यादि। तत्परित्यागतुल्यत्वेन वस्त्रपरि-
त्यागानुकूलत्वेन वस्त्रपरित्यागज्ञापनार्थमिति न विरोध इत्यर्थः। ननु प्राजापत्येष्टिकथना-
दिनैव सन्न्यासारम्भे सिद्धे दुकूलादिष्वात्मीयतापि निराकृतैवेति पुनर्निर्ममत्वोक्तेः किं
प्रयोजनमत आहुः परित्यागेत्यादि। नन्वहन्तात्यागकथनस्य किं प्रयोजनमत आहुः
मध्य इति। अहन्तामध्ये। ननु ब्रह्मवादे 'मत्तः स्मृतिर्ज्ञानमपोहनं चे'ति वाक्याद्ध्यास-
स्येश्वरकर्तृकत्वात् किमिति कुतो वा त्याग इत्यत आहुः भगवत्कृतेत्यादि। तदाज्ञयेति।
'वाचं यच्छ मनो यच्छ प्राणान् यच्छेन्द्रियाणि च। आत्मानमात्मना यच्छ न भूयः
कल्पसेऽध्वने'इत्यादिरूपया॥ ४०॥

वाचमित्यत्र। नन्वस्त्वाज्ञयाध्यासपरित्यागः, तथापि तन्निवृत्त्यर्थं देहादिलये भाव-
नीये देहस्यान्नमयत्वा'दन्ने प्रलीयते मर्त्य'मित्येकादशोक्तप्रकारेण लयो
१-१५-४१ भावनीयः। अथ साग्निकत्वायज्ञायत्नम्, तदा 'श्रोत्रादीनीन्द्रि-

याण्यन्ये संयमाग्निषु जुह्वति'इत्यादिगीतोक्तप्रकारेषु केनचित्प्रकारेण होतव्यं किमित्ययं वागादिहोमप्रकार इत्याकाङ्क्षायां साग्नित्वेन द्वितीयस्यावश्यकत्वेपि गीतायां नानाप्रकारकथनात्तेषु नियम्यस्य नियामके होमः सर्वत्र सिद्ध्यतीति प्रकारान् वैकल्पिकत्वादनादृत्य सिद्धमादाय यथाकथञ्चिद्धोमेप्याज्ञासिद्धिरित्याशयेनाहुः तत्रापीत्यादि। सम्पादितमिति। यस्य यत्सम्बन्धित्वं सम्पादितम्। तदाहेति। तस्माद्धेतोरेतं क्रममाहेत्यर्थः। सम्बन्धं प्रमाणेन स्फुटीकुर्वन्ति वागित्यादि। तथा च तस्यां हुतायां निमित्तापाये नैमित्तिकस्याप्यपाय इति शरीरसम्बन्धोप्यपेष्यतीति तदर्थं तथेत्यर्थः। वाचो मनःसम्बन्धित्वायाहुः मनस इत्यादि। ननु देवपत्नीकथनप्रस्तावे 'वाग्नायो'रिति श्रावणात्कथं मनोभार्यात्वमित्यत आहुः प्राकृती हि सेति। यतो हेतोः सात्र हूयमाना प्राकृती तेन मनोभार्या वैदिकीतोतिरिक्तेत्यर्थः। नन्वत्राहुतिरूपा स्ववक्तव्या वाक् स्वश्रोतव्या परस्य वाग्वा देवतारूपा वा। आद्ये बद्धवागित्यग्रिमवैयर्थ्यापत्तिः, द्वितीयतृतीययोस्तु तन्नियमासम्भवेनाहुतित्वासम्भव इति शङ्कायां तां निश्चेतुं व्यवच्छिन्दन्ति आत्मनइत्यादि। तयेत्याहुतिरूपया। नेति। नाहुतित्वेन। भगवत्कर्तृकाध्यासपक्षेऽयमेव होमप्रकार आवश्यक इत्यत्र बीजमाहुः ईश्वरेत्यादि। हि यतो हेतोः ईश्वरकर्तृकेऽध्यासे आज्ञया निवर्तनीयेऽधीने लयो मुख्यः, अधिक इनः अधीनः निरङ्कुशेश्वर इति यावत्। तस्मिन् लयो मुख्यस्तत्सायुज्यसम्पादकः। अतोयं प्रकार आवश्यक इत्यर्थः। स त्वाहुत्य न भवतीति क्रमस्यावश्यकत्वे यस्य यन्नियतत्वं तदाहुः तत्रेत्यादि। मनोधीनत्वं मनो नियम्यत्वम्। अभिमानिनीति। सगर्वा प्रजापतेरिवेति। इदमुपाख्यानं 'प्रजापते आशया वै श्राम्यसी'ति श्रुतौ प्रायोस्ति। एतेन दृष्टान्तेन तस्या आहुतिसम्पादने तन्निवृत्ते प्रमाणमुक्तम्। सिद्धमाहु तथेत्यादि। निवर्तयिष्यत इति। भगवता निवर्तनीया। तथा चास्याहुतित्वे तत्सम्बन्धेन सर्वा एव वाच आहुतिभावं प्राप्य निवृत्ता भविष्यन्तीत्यर्थः। वाचः स्वनियामकाधीनत्वं तन्नियामके मनसि तथात्वमतिदिशन्ति तथेत्यादि। हेतुमुखेन तत्र प्रमाणमाहुः तद्गतागतिभ्यामिति। 'स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयते, एवमेव खलु सौम्य मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते, प्राणबन्धनं हि सौम्य मन' इतिच्छान्दोग्यश्रुतौ मनोगतागतिभ्यां मनसः प्राणाधीनत्वनिरूपणादित्यर्थः। विपरीतमुद्भाव्य समादधते यद्यपीत्यादि। अग्र इति। निरोधानन्तरम्। ननु तथा सति तौल्यादाहुतिक्रमस्य वैकल्पिकत्वापत्तिरित्यरुच्या पक्षान्तरमाहुः तन्निरोधेनेत्यादि। प्राणनिरोधेनेत्यर्थः। तथापि दोषतादवस्थ्यमिति फल्गुरेन स्मृतिप्रमाणत्वेनाहुः तथाचेत्यादि। तथा चेति। चोवधारणे। प्राणनिरोधेन मनोनिरोध

एव देहसम्बन्धापगमः । अत एवेति । प्राणनिरोधेन देहसम्बन्धापगमादेव । तन्मूलत्वकथनमिति । मनोमूलकत्वकथनम् । तथा च फलमेवास्य प्राणाधीनत्वगमकम्, अतो मनसः प्राणनिरोधकरणत्वम्, न प्राणस्य मनोधीनत्वप्रयोजकमित्यर्थः । नन्वत्रेश्वरे होमस्योपक्रान्तत्वादेतस्मिन् तदद्दृष्टावस्मिन् होमकथनं विरोत्स्यत इत्याशङ्कायामाहुः होमेत्यादि । प्रकृतस्येति । युधिष्ठिरदेहादेः । तथात्वसम्पादनार्थमिति । मुक्तिसाधनाधिकारसम्पादनार्थम् । पूजायामित्यादि । यथैकादशे 'एवं जीवकलां ध्यायन्नादान्ते सिद्धभाविताम् । तयात्मभूतया पिण्डे व्याप्ते सम्पूज्य तन्मयः' इत्यादौ पूजायोग्यत्वार्थं भावनया केवलचिदात्मकदेहनिर्माणवदित्यर्थः । प्राणस्यापानाधीनत्वं स्फुटीकुर्वन्ति प्रयत्नेनेत्यादि । वायुनेति । तस्य वायुना । अत्रापि 'प्राणो वै ग्रहः सोपानेनातिग्रहेण गृहीतोऽपानेन हि गन्धान् जिघ्रति' इति श्रुतिरनुसन्धेया । ननु मप्राणस्यानुपलम्भात् मृत्योः कथमपाननियामकत्वमित्यत आहुः मृत्युनेत्यादि । 'स ऊर्ध्वं क्रियत' इति अपानः प्राणकर्षणायोत्क्षिप्यते । प्राणेऽपानाधीनतायाः साहजिकत्वं बोधयितुं योगिविशेषाणां मतमनूद्य परिहरन्ति केचनेत्यादि । तत्रेति । दुर्गतिस्थले । अत्रैवेति । स्वनियामके । तस्मान्न दुर्गतिरित्यर्थः । स मृत्युः को वेत्यपेक्षायामाहुः अग्नयेत्यादि । तस्य कथं पञ्चत्वाधीनत्वमित्यत आहुः स सर्वेत्यादि । तत्र निरुद्धाविति । देहे निरुद्धौ । तस्य नियामकानीति । मृत्योर्नियामकानि । निबध्नन्तीति । प्रतिबध्नन्ति । अत इति । भक्षणपोषणयोरभावात् । नन्वेवं पञ्चभूताधीने मृत्यौ तस्य पञ्चसु होमो युक्तः, न पञ्चत्वे, अत्र दृष्टं यन्मृत्युनियामकत्वम्, तत्कस्य धर्म इति विमर्शेऽत्र होममाहुः एवमित्यादि । प्राप्ताप्राप्तविवेकेनेति । तस्य संख्यात्वेन मृत्युनियामकत्वायोगादित्याकांक्षायां तत्स्वरूपनिश्चायनपूर्वकं तदुपसेचनश्रुत्या भगवत एवेति प्राप्तम्, भूतानां तु प्रमाणभावेन न प्राप्तमिति तद्विवेकेन । भगवत्कार्यत्वादिति । ल्यब्लोपे पञ्चमी । भगवत्कार्यत्वं निश्चित्य । तत्प्रदिष्टस्येति । तादृशव्यवहारनियामकसंख्यारूपेण प्रविष्टस्य । एवं मृत्युहोमपर्यन्तं व्याख्यायाग्रिमश्लोकं व्याकर्तुमतिदिशन्ति एवं तत्रापीति । एवं नियामके नियम्यत्वभावनया, तत्रापि त्रित्वे तन्नियम्यस्य पञ्चत्वस्य होमार्थं निर्णयेपि प्राप्ताप्राप्तविवेकरूपा युक्तिश्च शब्देन समुच्चीयत इति शेषः । सा कथमित्याकांक्षायां तां युक्तिं स्फुटीकुर्वन्ति स्वत इत्यादि । पञ्चानांक्रमत उत्पत्तेस्ततः पूर्वं स्वत एव सहसा भगवतः पञ्चत्वाभावात् तन्नियामकः पूर्वोऽन्वेष्टव्यः । स च विचार्यमाणस्त्रित्वं प्राप्तो भगवानेव पर्यवस्यति, तत्कथमित्याकांक्षायां भूतोत्पत्तेः पूर्वं द्विपदातिक्रमस्यैव, द्वे च ते पदे च द्विपदे गरुडकाली तयोरतिक्रमस्यैव सुकरत्वात् सुकरत्वात् [illegible] या स्वकालरुक्मीमिस्त्रित्वं प्राप्तः स्वगरुडकृतिभिस्त्रित्वं प्राप्तो [illegible] विवेकेन पञ्चभूतानियामकतया

अग्नित्वं प्राप्त इत्यर्थः। अग्निं व्युत्थाप्य होममाहुः तदेवमित्यादि। तत्रैकत्वे जु-
त्रित्वहोमं व्याकुर्वन्ति तत्रापीत्यादि। प्रकृतिस्वरूपे इति। तदात्मना ए-
भगवतीत्यर्थः। 'सर्वमात्मन्यजुहवी'तित्यनेनोक्तमेकत्वहोमं व्याकुर्वन्ति सा हीत्य-
शेषं स्फुटम्। अथवेत्यादि। अस्मिन् पक्षे एकत्वस्यात्मपदवाच्येऽक्षरे होमः।
पुरुषयोस्तुल्यबलत्वेनैकस्मिन् नियामकताया अशक्यवचनत्वात्। एवं पक्षद्वयेपि
हुतयः, नवैवाग्नयः। तदिदमभिप्रेत्याहुः एवं भगवत्यादि॥ ४२॥

चीरवासा इत्यत्र। अतः परमित्यादि। अतः परं एवं प्रकारेण देहप्रति-
१-१५-४३ दिना जाताया: परममुक्तेरनन्तरं यदि 'अक्षरधिया'मिति सू-
न्यायेन भगवदिच्छया अस्य युधिष्ठिरस्य देह उत्पद्यते, तदा पा-
ब्राह्मो वा चिदात्मको वा भगवत्सेवार्थमुत्पत्स्यत इत्यर्थः। बीजस्येति। संसरणवं-
प्राणादेः। एतादृशस्येति। बीजादिरहितस्य। एतद्परित्याग इति। देहापरित्य-
नौकोत्तारणवदिति। नौकात्यागवत्।

अनवेक्षमाण इत्यत्र। नन्वेवं देहाद्यध्यासाभावे 'निरगा'दित्यनेनोक्तस्य गम-
१-१५-४४ कथं सिद्धिरित्यत आहुः दग्धेत्यादि। दग्धे पटे पटत्वजातिवद-
मानेपि संस्काररूपो गुणस्तिष्ठति, तेन सिद्धिरित्यर्थः।
ते साधुकृत्येत्यत्र। अस्तीति। 'यत्कर्मभिर्यत्तपसे'त्यादिवाक्यार्दा-
१-१५-४५ भक्तिश्च पञ्चम इति। तैरनुभूत इति शेषः॥ ४१॥ ४२॥
१-१५-४७ तद्ध्यानेत्यत्र तेनेति। बहिर्निर्गमनेन॥ ४७॥
अवापुरित्यत्र। प्रत्येकमगमने हेतुरिति। आचारराहित्यमन्तः-
१-१५-४८ णदोषश्चेति द्वयं प्रत्येकं तथेत्यर्थः॥ ४८॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे पञ्चदशाध्यायविवरणम्॥ १५॥

अथ षोडशाध्यायविवरणम्।

षोडशाध्यायं विवरिषवः सङ्गतिं वक्तुं पूर्वाध्यायत्रयार्थमनुवदन्ति मुक्ति-
त्यादि। पूर्वमिति। पूर्वाङ्गत्वात्पूर्वमित्यर्थः। पितृहेतुत इति। पितृभ्यो हेतुभ्यः। इ-
पारलौकिकबन्धस्येत्यनेनान्नेति। प्रस्तुताध्यायत्रयार्थमाहुः ऐहिकेत्यादि। अधुन-
त्यस्मिन् प्रकरणे। तेनोभयोः प्रकरणयोरेककार्यत्वं सङ्गतिरित्यर्थः। अत्राध्यायद्वयप्रयोज-
नमाहुः अधिकारेत्यादि। निवार्यत इति। बन्धो निवार्यते। अतो द्वैविध्यादध्याय-
द्वयमत्रेत्यर्थः। अवान्तरार्थानस्याध्यायस्याहुः प्रथममित्यादि। यद्भवेदिति। यद्भूरक्ष-
दिकं राजत्वाद्भवेत्, सामान्येन तन्निरूप्यते। अश्वमेधादिकं तु विशेषत इत्यर्थः

विशेषतो निरूपणप्रयोजनमाहुः अन्यथेत्यादि। द्विविध इति। लौकिको वैदिकश्च। पूर्वपक्षे न्यूनत्वं लौकिको दोषः। अयाज्ञिकत्वं च वैदिक इति। आधिदैविकरक्षायाः किं प्रयोजनमत आहुः स्थापित इत्यादि। धर्म इति शेषः। मूलदोषादिति। काले धर्मः क्रियत इति तस्य मूलं कालस्तद्दोषात्। शेषं स्फुटम्॥ १॥

स उत्तरस्येत्यत्र। 'मातुलस्येव योषे'ति वाक्यस्य विधायकत्वे, समानयोग-
क्षेमत्वाद्धन्विनेत्यादीनामपि विधायकत्वापत्तिः, तथा च सति प्रत्यक्ष-
१-१६-२ श्रुत्यैव सर्वनिर्वाहान्नित्यानुमेयश्रुत्यङ्गीकारो व्यासादीनां मुधैव स्यादि-
त्यत आहुः अत इत्यादि। तथा च यत्र स्मार्त्तः प्रतिषेधः, तत्र लौकिकपरत्वेन श्रुत्याशयो व्यवस्थाप्यः। कुमारशिखाधारणवत्तत्रापि विधेरन्वेतुं शक्यत्वात्। अन्यथोभयोर्निरवकाशत्वेनान्यतरबाधापत्तिः। यत्तु भाट्टाः। मातुलकन्यापरिणयस्य केवलशिष्टाचारमूलकत्वं स्मृतिपादपञ्चमाधिकरणद्वितीयवर्णके व्यवस्थापयन्ति। तदेतेन प्रत्युक्तं ज्ञेयम्। दूरतोपि श्रुत्याश्रयाभावे केवलस्य दुर्योधनाद्याचारवद्भ्रान्ताचारत्वेनाप्रामाण्याच्छिष्टानादरणीयत्वापत्तेः। अतः श्येनादिवत्तत्करणमिति युक्तमुत्पश्यामः। नाम्नेत्यादि। इराया मुख्यासु द्वादशभगवच्छक्तिषु 'श्रिया पुष्ट्ये'ति वाक्ये गणनाद्द्वत्वेन तयेत्यर्थः। श्रुताविति। 'इरावती धेनुमती हि भूतमूयवसिनी मनवे यशस्ये व्यस्कभ्नाद्रोदसी विष्णुरेते' इति श्रुतौ॥ २॥

आजहारेत्यत्र। पूर्ववदिति। जातकोक्तकालगुणवशात्। अनेनेति। परी-
क्षिता। ननु पूर्वतन्त्रे देवताया मन्त्रमयत्वप्रतिपादनात् कथमक्षिगो-
१-१६-३ चरत्वमित्यत आहुः हविरित्यादि। क्रियमाणा इति। मन्त्रमयत्वेन
क्रियमाणाः। तथाचोत्तरतन्त्रे देवताविग्रहाधिकरणे तस्या विग्रहस्थापनात्पूर्वतन्त्रं मन्यमाधिकारिपरम्। अतो न विरोध इत्यर्थः॥ ३॥

१-१६-४ निजग्राहेत्यत्र। पापाधिष्ठातृत्वादिति। क्लेशनशालत्वात्॥ ४॥
कस्य हेतोरित्यत्र। समुच्चयप्रतीतिरिति। यथा ब्राह्मणाः शूद्राः प्रवेशनीया
इत्यादौ तथेत्यर्थः। अशक्यत्वं विहण्वन्ति विग्रहेत्यादि। तद्विशे-
१-१६-५ षणत्वेनेति। फलविशेषणत्वेन॥ ५॥
किमन्यैरित्यत्र। उभयस्योभयं प्रतियोगीति। उक्तान्यद्द्वयं भगवत्पद-
१-१६-६ कृत्ययोः प्रतिरूपतया योगिविन्द्रत्वेन सम्बन्धीत्यर्थः॥ ६॥
अमृतमिच्छतामिति। एतेन मूले मर्त्यानामृतमिच्छतामित्यत्र मर्त्यादमृत-
मिति पाठः सुबोधिन्यां प्रतिभाति। उक्तयोजनायामर्थप्रत्याय्याहा-
रसम्भवात्पक्षान्तरमाहुः पूर्वेण चेति। उक्तयोजनयोर्मध्ये पूर्वेव मार्थो-

यसी उत्तरश्लोकानां स्वारस्यादिति ज्ञापयितुमग्रिमं व्याकुर्वन्ति सहस्रेत्यादि । निश्चय इति । 'विश्वसृजः प्रथमा' इत्यत्र हिरण्मयशकुनिरूपब्रह्मप्रादुर्भावश्रावणात् तथेत्यर्थः । स इति । मृत्युः । ननु यज्ञे मृत्युभागः को वा सर्वेहविषां तत्तदेव तत्त्वेन तत्र मृत्योरप्रवेशात् क्वचित्प्रवेशेऽप्यसार्वत्रिकत्वादित्याशङ्कायामाहुः अवस्थाभेदेनेति । तथा च नीयमानावस्थानां पशूनां तद्भागत्वात् पशुयागे तत्प्रवेशात्तथेत्यर्थः । यागान्तरेऽपि प्रवेशायाहुः रौद्रमित्यादि । तथा च घृतस्य सर्वयागेषु सत्त्वान्मृत्यो रुद्रावस्थया घृतस्य गोनिष्ठत्वावस्थया च यागमात्रे तस्य तथात्वमित्यर्थः । शामित्र इतिवक्तव्ये यत्कर्मपदमधिकमुक्तं तत्तात्पर्यमाहुः तत्रेत्यादि । इह भगवानाहूतः । शामित्रकर्मणि मृत्युराहूतः । इत्युभयाह्वानपक्षमङ्गीकृत्याहुः अर्थमित्यादि । अर्थं निश्चित्येति । भाविनमर्थं निश्चित्य ।

न कश्चिदित्यत्र । स्वापकीर्तिनिवारणार्थमिति । अत्र प्रथमश्रुतावायुरणमुक्तम्, तच्चोद्यमनम् । 'सर्वे सर्वाभ्य एव देवताभ्य सर्वेभ्यः पृष्ठेभ्य आत्म-

१-१६-८ नमागुरतेयाः सत्रायागुरत इति सर्वाभ्य इत्यादौ चतुर्थी' । तथा चोक्तसर्वार्थमात्मानमुद्यमयतीत्यतोपकीर्तिः । द्वितीयस्यां तु 'सर्वासां वा एते प्रजानां प्राणैरासते ये सत्रमासते तस्मात्पृच्छति किमेते सत्रिण' इति स्फुटैवापकीर्तिरिति तदर्थं तथेत्यर्थः । एवं विचारितमित्यग्रिमेण अस्याप्यन्वयः ॥ ८ ॥

१-१६-९ मन्दस्येत्यत्र । सामर्थ्यमिति । मृत्युनिवारणसामर्थ्यम् ॥ ९ ॥

१-१६-१० यदेत्यत्र । कलिनिग्रहस्येति । कथ्यमानस्य तस्येत्यर्थः ॥ १० ॥

१-१६-१० यदापरीक्षिदित्यत्र । कलिप्रवेशकथनादुक्तमेव ।

१-१६-१७ तस्यैवमित्यत्र । उक्तमेवेति ।

धर्म इत्यत्र । प्रवृत्ताविति । पृथिवीधर्मयोर्विशेषणम् । छायापदस्यातपाभावार्थकत्वमभिप्रेत्य प्रकारान्तरेण वैवर्ण्यमाहुः चरण इत्यादि । वत्सरहिताया

१-१६-१८ गोः पितृपयोगित्वं 'पितृभ्योऽग्निष्वात्तेभ्योभिवान्यायै दुग्धे मन्थ'मिति तद्विविबोधकश्रुत्या ज्ञेयम् । अभिवान्या मृतवत्सा । मन्थः सक्तुः । व्याख्यातमिति । पितृपयोगिकथनेनाभिवान्यात्वबोधनादेवोक्तार्थम् ॥

१-१६-२६ सत्यमित्यत्र । शोके हर्षे चेति । इदानींतनशोके प्राथमिकहर्षे चेत्यर्थः ॥

ब्रह्मादय इत्यत्र । सर्वसाधारण्येन सर्वशोकहेतुभूतयोर्भगवद्राहित्य-

१-१६-३२ कलीक्षितयोः कथनेन प्रश्नोत्तरपूर्तौ ब्रह्मादय इत्यादिकथनस्य प्रयोजनमाहुः अलमित्यादि । तत्रोक्तगुणवद्भगवद्राहित्यस्य शोकप्रयोजकत्वात्ते गुणाः सहजा इति मूलग्रन्थानुरोधाद्वक्तव्यमिति तदाख्याय मतान्तरं दूषयितुमुपक्षिपन्ति अत्र केचिदिति । मायावादिनः । तदीयत्वे गुणत्वमेव भज्येतेति । तमसः प्रलायकत्वेन स्वातन्त्र्यस्य तमोगुणत्वात् कौशलादीनां रजोगुणत्वाद्रजस्तमसोश्च हेयत्वेन तेषां गुणत्व-

मेव न स्यात्, विग्रहस्य सात्त्विकत्वाङ्गीकारेपि तत्र तेषां प्रवेशालाभादपि तद्गुणत्वं न स्यादित्यर्थः। ब्रह्मत्वं वा भवेदिति। सत्त्वादीनामसत्त्वादेतेषामपि तथात्वापत्त्या तत्राभावेन निर्विशेषब्रह्मत्वमेव भगवतः स्यात्, नत्वीश्वरत्वमित्यर्थः। तेषां सदसद्विलक्षणत्वे तु 'न सत्तन्नासदुच्यत' इति गीतावाक्येन ब्रह्मणस्तथात्वात्तेषामपि ब्रह्मत्वं स्यात्, न तु गुणत्वमिति वार्थः। नन्वेते गुणा भगवति नारोपिताः, किन्त्वागन्तुकाः, अतो निर्विशेषत्वाभावान्न ब्रह्मत्वम्, किन्त्वीश्वरत्वमिति चेत्, तत्राहुः संयोगजत्व इत्यादि। तथा च तथा चेत्तदा वसनारुण्यवद्भगवति प्रतीयमाना अपि ते गुणानामेव स्युर्न भगवत इत्यर्थः। ननु घृतद्रवत्ववत्ते भगवत्युत्पद्यन्ते, न तु परञ्जयन्ति, अतो भगवदीया इति चेत्, तत्राहुः उत्पत्तीत्यादि। न च नित्यपदस्य यावदवतारभावित्वमर्थो युक्तः, 'न व्यथन्ति स्म कर्हिचि'दिति चतुर्थपादवैयर्थ्यापत्तेः। अतस्तद्विरोधो दुरुद्धर एवेत्यर्थः। ननु गुणसम्बन्धः सार्वदिक एवाङ्गीक्रियत इति न पूर्वोक्तो दोष इत्यत आहुः सगुण इत्यादि। सत्त्वादिगुणस्वरूपविचारेण दूषणान्तरमाहुः किञ्चेत्यादि। अस्तु सगुणस्तथापि कानुपपत्तिर्यदर्थं भगवति सत्त्वादयः कल्प्यन्ते, निर्विशेषस्य जगत्कर्तृत्वाद्ययोगाच्छ्रुत्युक्तानां तेषामसम्भव इति चेद्बाढम्, तर्हि तेषां सत्त्वादीनां सामर्थ्यं विचारणीयम्, किमेते तां परिहर्तुं शक्ता न वेति। तत्राद्यस्तु न सङ्गच्छते। तथाहि। ते जडाः किं ब्रह्मणि स्वत एव सम्बद्धाः, हेतुना वा। आद्ये त्रयाणामन्योन्यमिथुनवृत्तित्वेन सम्बन्धस्याविशिष्टत्वाद्युगपत्कार्यत्रयापत्त्या सृष्टिप्रलयादिव्यवस्थाभङ्गप्रसङ्गः। अथ चञ्चलत्वाद्रजः प्राक्संसृज्यते, ततोन्यस्तत इतर इति गुणस्वभाव एव व्यवस्थापक इति चेत्तर्हि सर्वप्रलायकत्वात्प्रबलं तमः कुतस्तूष्णीकं, वस्तुस्वभावादिति चेत्, तर्हि उत्पद्यमानासत्त्वस्यापि सर्वदा नैव द्वितीयक्षणे ग्रसतु। अथ सत्त्वेन प्रतिबन्धान्न तथेति चेत्, तर्हि सत्त्वोपमर्दात्सुसत्त्वान्न जातु प्रलयोस्तु। अथान्योन्योपमर्दकत्वमपि तेषां स्वभाव इति सत्त्वोपमर्दात्सुरेन प्रलय इति चेत्, तर्हि वैनाशिकप्रक्रियाया अनङ्गीकारात् ग्रस्यमानानां द्वितीयक्षण उत्पत्तिरस्तु। स्वभावस्यानपेतत्वात् हेत्वन्तरस्यानुपेतत्वाच्च। अतोऽवधिनियमभङ्गादाकास्मिकवादान्तर्गतः स्वभाववादस्त्वसङ्गतः। अनीश्वरत्वापादकत्वा 'द्यतो वा इमानी'त्यादिश्रुतिविरोधाच्च। अथ हेतुना सम्बद्धास्तर्हि सम्बन्धात्पूर्वमीश्वरस्याभावात्तस्य कार्यत्वापत्तिः, साङ्ख्यमतापत्तिश्च। हेतुश्च क इत्यपि विचारणीयम्। काल इति चेत्, अद्वैतहानिः। इच्छा चेत्, तदापि तथा। तत्रापि तस्याः क्रमानपेक्षायामव्यवस्थाप्रसङ्गः। अपेक्षायां तत्र हेतोरवश्यवाच्यत्वेन गुणानां तथात्वाङ्गीकारे स्वभाववादापत्त्या तद्दोषतादवस्थ्यम्। तेषामवस्तुत्वेनाङ्गीकारात्ततः कार्याभावे शून्यवादप्रसक्तिः। अतस्तेषां सामर्थ्यविचारे भगवति तत्सम्बन्धकल्पनमसङ्गतमित्यर्थः। ननु भेदवादमङ्गीकृत्य सत्त्वादीनां चेतनत्वं चाङ्गीकृत्य तत्सम्बन्धं च नित्यमङ्गीकृत्य स्वातन्त्र्यादीनां गुणधर्माणां भगवति

नित्यत्वमङ्गीक्रियते इति चेत्, तत्राहुः अथेत्यादि । प्रासङ्गिकं परिहृत्य प्रस्तुतमाहुः बहुतिथमित्यादि । विशेषेणात्मशोके को वा हेतुरित्याकाङ्क्षायामाहुः भगवत्त्यागस्येति । भगवत्कृतत्यागस्य । विचार्यत इति । स्वतस्त्यागे भगवतः स्वतन्त्रत्वादल्पः, स्वात्मदोषेण त्यागे त्वधिक इति निश्चेतुं त्यागहेतुर्विचार्यत इत्यर्थः ॥ ३२ ॥

सर्वानर्थायेत्यत्र । कर्मधारयः तदित्यादि । एकेन त्यक्तं ह्यन्योपेक्षत इति तेन ग्रहणे सर्वेऽनर्थाः इत्यर्थः । हेत्वन्तरमाहुः संघातप्रवेशेनेति । व्युच-
१-१६-३२ रणोत्तरमपि यावन्न सङ्घातप्रवेशः, तावत् न तत्त्यागः, अतस्तेन सापेक्षत्वेऽपेक्षाया अनर्थमूलत्वात्तथेत्यर्थः । प्रकृते को वानर्थ इत्यत आहुः हीनेत्यादि । हीनेन हीनस्य वापेक्षायां भगवदीयत्वरूपस्वरूपमेव नश्यतीति स एवानर्थ इत्यर्थः । अत इति । एतत्सर्वमवगत्य । समर्थेति । अन्यस्य हीनतानिवारणसमर्था । निर्वाहार्थं चेति । चकारात् स्वस्य भगवदीयताया अपि निर्वाहार्थम् । कार्यं कारणं चानुपदमत्रैव व्याख्यास्यते । अन्य इति । ब्रह्मादयः । तत्सेवकाः । भगवतः सेवकाः । सपत्नीति । समानभाग्या । अत एवमस्माकं सर्वेषां भगवदीयत्वाद्विवक्षितं वक्तुं सर्वत्यागसूचकं भजनरूपं तस्याः कृत्यमाहेत्यर्थः । तस्या इत्यादि । तस्याः स्वकार्ये औदासीन्यं वक्तुं प्रथमतः स उच्यते इत्यर्थः । कटाक्षपदेनेति । तद्वाचकापाङ्गपदेन । उच्यत इति । भावोद्गारिणान्तानां चतुर्णामभावे तादृशदृष्टेरसम्भवादर्थबलेन समर्प्यते । अत इति । एषां दुर्लभानां लक्ष्मीदृष्ट्या सिद्धिमवगत्य । तादृशा इति । लक्ष्मीकटाक्षमोक्षकामाः । उक्त्वेति । तत्रौदासीन्यबोधनायोक्त्वा । जन्मस्थानमिति । 'पुनश्च पद्मादुद्भूता । आदित्योऽभूद्यदा हरि'रिति विष्णुपुराणवाक्याज्जन्मस्थानम् । एतेन सिद्धमाहुः एतावतेत्यादि । तत्त्वाय चेति । भजत इति शेषः ॥

तस्यैत्यत्र । भगवद्ग्रहणमिति । 'ततो विभूति'मित्युत्तरार्द्धे तच्छब्देन भगवद्ग्रहणम् । तदर्थमिति । सङ्घाते विद्यमानानामप्यमृताधिका-
१-१६-३२ रार्थम् ॥ ३३ ॥

श्रीनित्यत्र । विशेष्यभूतलोकोक्तावपि पदसमभिव्याहारसूचितमर्थमाहुः अन्येषां च त्रित्वयुक्तानामिति । ते च ब्रह्मादयः सात्त्विकादिभेदभिन्नाः
१-१६-३३ भक्ताश्च ज्ञेयाः ॥ ३३ ॥

१-१६-३४ यो वा इत्यत्र । मूलभूतामिति । भगवत्कृते त्यागे मुख्यहेतुभूताम् ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे षोडशाध्यायविवरणम् ॥ १६ ॥

अथ सप्तदशाध्यायविवरणम् ।

अथ सप्तदशाध्यायं विवरिषवोऽध्यायार्थस्य पूर्वमुक्तत्वेपि विशेषेणावान्तरा-
र्थान् बोधयितुं पुनराहुः ततः सप्तदशे इत्यादि । विद इति । तत्स्वरूपज्ञात् राज्ञः
सकाशात् । प्रथमं सान्त्वननिरूपणतात्पर्यमाहुः प्रथममित्यादि । विचारत इति ।
अयमधर्मबन्धुरतस्तादृशान्येव स्थानान्यस्य देयानि, अन्यथान्यस्याप्यधर्मस्थानत्वापत्त्या
महानेवानर्थ इति विचार्य धर्मवाक्यतात्पर्यमाहुः विवेकस्थापनायेति । नानावाक्य-
कृतो यो विमोहस्तन्निवारको योधिकारिविवेकस्तत्स्थापनाय । तस्यापि प्रयोजनं हि
यतो हेतोः ततः विवेकादस्य राज्ञः सर्वसामर्थ्यसम्पन्नः । आधिदैविकं ज्ञातुं सामर्थ्य-
सत्ता बोध्यत इत्यर्थः । तस्यापि प्रयोजनम्, अग्रिमाध्यायेऽद्भुतं वैराग्यं वक्तुं तदुपो-
द्घातता । एतेनाग्रिमसङ्गतिरुक्ता । मूर्तीभूता इत्यादि । अलौकिकसामर्थ्यमवगन्तुं
प्रत्यक्षा जाता इति शेषः । ज्ञानानन्तरं धर्मप्रचारसामर्थ्यं बोधयितुं प्रतिसन्धानकथेत्या-
शयेनाहुः सन्धानमित्यादि । तेन हेतुनास्य धर्मस्य स्वयं स्वत एवाश्वासनं कृतम्,
भूमेस्तु शोकस्य हेतूनां निवारणात् परम्परयेत्यर्थः ॥
वृषमित्यत्र । तत्र प्रत्यहं बाह्यक्षय इति । पञ्चाङ्गवैकल्ये बाह्यस्य धर्मस्य क्षयः
सूचित इत्यर्थः । तदुपपादयन्ति कर्मेत्यादि । कर्मक्षय उक्त इति ।
१-१७-२ मूत्रणस्य विसर्गरूपत्वात् कर्मेन्द्रियसाध्यत्वाच्च बाह्यस्याचारादिरूप-
कर्मणः क्षय उक्त इत्यर्थः । इवेत्यनुकरणादिति । इवपदबोधितादनुकरणात् । दम्भेन
करणमिवपदेन बोध्यते इति बाह्यधर्मस्य क्रियारूपस्य क्षय उक्त इत्यर्थः । रोग सूचित
इति। तथा च दुष्कर्मभोगसूचनात् । तेनापि बाह्यधर्मक्षय उक्त इत्यर्थः । चञ्चला भव·
तीति । तेन फलानुपयोगात् क्षयस्तस्योक्त इत्यर्थः । सीदन्तमित्यस्यार्थमाहुः जाड्येन
वेपन्तमिति । इत्येव सम्बन्ध इति । पूर्वश्लोकोक्तक्रिययैव सम्बन्धः, नतु 'पप्रच्छे'-
त्युत्तरश्लोकोक्तया तत्र मारणोद्योगस्यैव दर्शनादग्रे कलिं प्रत्येव पूर्वं प्रश्नाच्चेत्यर्थः ॥
कस्त्वमित्यत्र । निश्चयभेदादिति । अद्विजत्वनिश्चयस्य पूर्ववाक्ये जातत्वेपि तद्वि-
शेषनिश्चयस्य द्वितीयोक्तकर्मणा जातत्वात्तेन द्वितीय इत्यर्थः । पूर्ववाक्यो-
१-१७-५ क्तकर्मणापि तस्य सम्भवादित्यरुच्या पक्षान्तरमाहुः अधीत्यादि ॥
द्वितीयस्याभासे । तथापीति । एवं प्रश्नोत्तरमपि ॥
मा सौरभेयेत्यत्र । एवं कथनमिति । अवस्थानुवादेनास्मासु दुष्टत्वमिवारोपय-
१-१७-९ त्कथनम् ॥
१-१७-११ एष इत्यत्र । स्वकर्तृकहिंसाविषया इति । परीक्षितकर्तृकतद्विषयाः ॥

आख्याहीत्यत्र । एतस्य शिक्षार्थं दण्डकरणपक्षेपीति । अयं शूद्रो नृपस्य
शिक्षायै दण्डं कृतवानिति पक्षेपि । तथापीति । वैरूप्यकरणे । वैरूप्य-
१-१७-१३ करणमेवास्योचितम्, न तु मारणमित्यर्थः । पूर्ववदिति । प्रायेण
विगीतम् ॥

१-१७-१५ राज्ञ इत्यत्र । त्यक्तशासनस्येति । दत्तभूताभयस्य ॥

एतद्व इत्यत्र । अयमिति । राजा । तथा भातीति । बहिर्मुखो भाति । सर्व-
१-१७-१६ प्रमाणार्थं इति । इदं भगवत्पदव्याख्यानम् ॥

न वयमित्यत्र । उपदिशतीति । परोक्षेणोपदिशति । नन्वेवं परोक्षेण किमि-
त्युपदेश इत्यत आहुः अयमर्थ इत्यादि । द्वैराश्यादिति । श्रुति-
१-१७-१७ स्मृतिभेदेन द्वैराश्यात् । तादृक्स्वभावेति । हसन्स्वभावेत्यर्थः ।
पुरुष इति । न्यायवैशेषिकमीमांसकमते । अन्तःकरणं साङ्ख्यपातञ्जलमते । शरीरं धर्म-
शास्त्रमते । अन्यानीति । देशकालद्रव्यमन्त्रकर्माणि । व्यष्टिमेव हेतुं मन्यन्ते इति ।
अस्मदादिशरीरमेव स्वक्लेशबीजं मन्यन्त इत्यर्थः । आत्मनैवेति । पक्षान्तरेपियं
तृतीया सहार्थे । तेन दैवकर्मस्वभावेषु सर्वत्रात्मपदान्वयो बोध्यः । प्रथमपक्षे तु करणार्थे ।
तथा च तेन क्लेशा भवन्तीति शेषः । समष्टिमिति । ब्रह्माण्डशरीराभिमानिनम् ।
कारणमिति । व्यष्टिक्लेशकारणम् । पुरुषकारणवादिनः पातञ्जलाद्याः । पौराणिकविशेषा
वा । पुरुषं मन्यन्त इति । तत्त्वात्मकं तथा मन्यन्ते । कर्वेति । भिन्नं पदम् । अन्ये
पुनरिति । पौराणिकविशेषाः । विवेचनस्वरूपमाहुः नियामकत्वमित्यादि ॥

धर्मं ब्रवीषीत्यत्र । स्वरूपासिद्धिमिति । पक्षे हेत्वभावम् । धर्मवक्तृत्वादिति ।
द्वितीयमनुमानमुक्तमित्यर्थः । स्वरूपासिद्धिवारणायानुमानान्तरं वदती-
१-१७-२१ त्याहुः किञ्चेत्यादि । तथा च वृषत्वेपि प्रयोजकाद्वष्टमन्तरेण मनुष्य-
वाणीवक्तृत्वादनुमिते अलौकिकत्वे, तेषु तस्यैव तथात्वं ततोपि त्वं धर्म एवेत्यर्थः ।
अर्थादधर्मस्येति । सूचकस्येत्यन्वयः । तथा चाधर्मस्य यः सूचकः अनेनाधर्मः कृत
इति शृङ्गग्राहिकया वक्ता तस्येत्यर्थः ॥

तप इत्यत्र । अन्यथानिरूपणस्येति । 'सत्यं दया तपो दान'मित्येव कथनस्य ।
परदुःखप्रहाणेच्छेति । इदं न दयालक्षणम् । पूर्वं परदुःखासहनं
१-१७-२३ दयेति लक्षितत्वात् एकादशस्कन्धसुबोधिन्यां तथा प्रतिपादयिष्यमाण-
त्वाच । ननु 'न हिंस्या'दित्यादिश्रुतिभिर्निषेध्यत्वेन प्रतियोगिनोऽधर्मस्याप्यवगमात्
कथमधर्मे प्रमाणाभाव इत्यत आहुः निवृत्त्यर्थमित्यादि । अनुवादे गमकमाहुः अन्यथे-
त्यादि । अधर्मस्यापि प्रमाणवाक्यार्थत्वे अर्थस्याभावेन वाक्यभेदः स्यात्, अतो न

हिंस्या'दित्यादिष्वपि निषेधविधानार्थं हिंसादेरधर्मस्यानुवाद एव स्वीकार्य इत्यर्थः ।
नूमिरिति । कर्मभूमिः । अधर्ममिति । व्यवस्थापयतीति शेषः । दशाविशेष इति ।
भगवद्दासत्वाभिमानसत्सङ्गभगवद्दानादिकृतहर्षोत्कर्षे । गोब्राह्मणाद्यर्थकानृतदशायाम् ।
ननु सम्बुध्यन्ते धर्मपदे विभक्तिव्यत्यासात्त्वां निवर्तयेदिति व्याख्यानमयुक्तमि-
त्यत आहुः विभक्तीत्यादि । व्यत्यासानङ्गीकारे स्वात्मानमित्यध्याहारः स्यादित्यर्थः ।
नन्वधर्मस्य पदार्थान्तरत्वेन कालभिन्नत्वात्कथमुद्देश्यविधेयभाव इत्याकाङ्क्षायां तस्य
पर्यवसानं विचारयन्ति अपरिच्छिन्न इत्यारभ्य कलिरित्यर्थ इत्यन्तेन । एवं युगवि-
भागे उपपत्तिमाहुः कालस्येत्यादि । द्वितीयराशीति । अधर्मराशीत्यर्थः । अधर्मा-
शप्रवेश इति । अवच्छेदके काले तत्प्रवेशः । तथा च यथा सम्वत्सररूपेण परिभ्रमन्
सर्वमन्तः स्थापयति, तथाऽधर्मांशमपीति तथा विभाग इत्यर्थः । ननु कृतकल्योर्धर्माधर्मा-
वच्छेदकत्वे किं मानमत आहुः ये वा इत्यादि । प्रसङ्गान्निर्द्धारितमिति । 'देवस्य
सवितुः प्रात'रित्यनुवाके प्रातःसङ्गवमध्याह्नापराह्णसायाह्नानां सवितृमित्रबृहस्पतिभृगु-
वरुणदैवत्यत्वेन पुण्यत्वं वदन्त्या श्रुत्या तदवान्तराणां सम्बन्धिनां चतुर्णामग्निष्टोमोक्थ्य-
षोडश्यतिरात्रकरणेनात्तवीर्यत्वं च वदन्त्या चत्वार्यश्लीलानीति वदन्त्या चतुर्णां
कालावयवानामेतदभावचतुष्टयरूपत्वं निर्द्धारितमित्यर्थः । मध्यभागेनेति । घटस्या-
न्तर्बहिराकाशो मध्ये घटस्तथोभयतः कालो मध्येऽधर्मः । एवं सत्युद्देश्यविधेयभावस्यावच्छे-
दकत्वे पर्यवसानमित्यर्थः । पूर्वमिति । द्वापरत्रेतयोरित्यर्थः । ननु द्वापरत्रेतयोः कलि-
सद्भावे किं मानमित्याकाङ्क्षायां पूर्वोक्तां श्रुतिमेव स्मारयन्ति अत एवेत्यादि ॥

स्वरूपतद्दुःखज्ञानसमुच्चयार्थः ।
१-१७-२७ इतीत्यत्र । उक्तसमुच्चयार्थ इति ।
१-१७-२८ तमित्यत्र । स्वकुटुम्बमिति । कलिकुटुम्बम् ।
पतितमित्यत्र । सोपीति । गतिनाशोपि । तत्र जात इति ।
१-१७-२९ अधर्ममारणावसरे जात इत्यर्थः । पशुरिति । राजा पशुः ।
त्वामित्यत्र । ज्येष्ठा दारिद्र्यसम्पादनमिति । पुराणे अलक्ष्म्या
१-१७-३१ लक्ष्मी ज्येष्ठभगिनीत्वाज्ज्येष्ठेतिनाम्ना प्रसिद्धेस्तथेत्यर्थः ॥ ३१ ॥
यस्मिन्नित्यत्र । धर्मपक्षे विस्ताराभाव इति । धर्मादेव फलमदृष्टद्वारेतिपक्षे
शं तनोत्यनेनोक्तो यः सुखविस्तारस्तदभावः । फलस्य तददृष्टनियत-
१-१७-३२ त्वादित्यर्थः । तथास्त्विति । एकोस्त्वित्यर्थः ॥ ३२ ॥
पुनश्चेत्यत्र । पुनः प्रासानामिति । स्वातन्त्र्येण प्राप्तानाम् ॥ ३८ ॥
१-१७-३८ अथेत्यत्र । पदार्थाग्रहेणेति । पदार्थस्वरूपस्याविचारेणापाततः पदार्थप्रतीत्ये-
त्यर्थः । यत्रेति । स्वस्त्रीसेवनादौ । न विधिर्न प्रतिषेध इति । लोके
१-१७-४० 'व्यवायामिषमद्यसेवे'तिवाक्यात्तदाकाङ्क्षानिवृत्तये नियम इत्यर्थः ॥ ४० ॥

स एष इत्यत्र । शान्तस्येति । अविद्यमानस्य । भगवन् इव स्फुरणा-
१-१७-४२ दिति । यथा भगवतो व्यापकत्वं तथा सायुज्यं प्राप्तेपि व्याप-
कत्वाविर्भावात् ॥ ४२ ॥
१-१७-४४ इत्थम्भूतेत्यत्र । संवत्सरेत्यादि । तथा च दीक्षायां शामित्रस्याभावेन
मृत्योराह्वानाभावादविरोध इत्यर्थः ॥ ४४ ॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे सप्तदशाध्यायविवरणम् ॥ १६ ॥

अथ अष्टादशाध्यायविवरणम् ।

अथाष्टादशाध्यायं विवरिषवः पूर्वोत्तराध्यायसङ्गतिं बोधयितुमध्यायद्वयार्थ-माहुः अथेत्यादि । अथाद्भुतवैराग्योपोद्धातत्वेनालौकिकसामर्थ्यबोधनानन्तरमध्यायद्वयेन वैराग्यदार्ढ्यबोधकं राज्ञश्चरित्रमीर्यते । तत्र प्रकारमाहुः शापादित्यादि । शापात्प्रायः, ततः प्रायं द्वारीकृत्य शापो राज्ये [1]वैराग्यबोधकः । तर्हि द्वयोः किमिति तत्कथनं तत्राहुः सङ्क्षेपकथनं पूर्वमिति । तथा चैतयोः सूतवाक्ये सामान्यविशेषभावः सङ्गतिरित्यर्थः । किमिति सङ्क्षेप इत्यत आहुः श्रोत्रित्यादि । सूतशौनकवाक्याना तात्पर्यमाहुः तयो-रित्यादि । स्थापयितुमित्यन्तम् । तयोरिति । वक्तृश्रोत्रोः । तादृशमिति । श्रद्धया प्रोत्साहेन चोक्तं श्रुतं च । ननु शापो यथा प्रायद्वारा वैराग्यरूपोत्कर्षबोधकः, तथा स्वरूपेणापकर्षस्यापि बोधक इति कथं तेनोत्कर्षसिद्धिरित्यत आहुः द्विजादित्यादि । हरिणा प्रोक्त इति । ब्राह्मणस्य मुखरूपत्वात्तथा । नान्यथामृततर्पणादिति । शापा-भावे श्रीभागवतात्मककथामृततर्पणाज्ज्ञानिदेहनाशो नेत्यर्थः । तथा च तत्प्रतिपत्त्यर्थं स इति नोत्कर्षहानिरित्यर्थः । शेषं स्फुटम् । तथा सोपधर्मोपि 'शापो मेऽनुग्रहायैव'ति न्यायेन फलत उत्कर्षस्यैव साधक इति न कोपि दोष इत्यर्थः ॥

१-१८-१ यो वेत्यत्र । प्रकटाप्रकटनामनी इति । प्रकटस्य कालरूपस्याप्रकटस्य
सदानन्दरूपस्य नामनी इत्यर्थः ॥ १ ॥
१-१८-२ ब्रह्मकोपेत्यत्र । कोपपदतात्पर्यमाहुः तक्षक इत्यादि ॥ २ ॥
नोत्तमेत्यत्र । अत्रान्तकाले भ्रमाभावबोधनात् कारणसद्भावे च भ्रमाभीक्ष्ण्य-
१-१८-४ दर्शनादत्र कथं तदभाव इत्याशङ्काया भगवच्छास्त्रानुसारेण तत्कारण-
मन्यत्र तत्सत्त्वमत्र तदभावं च साधयन्ति भ्रमस्त्वित्यादि । सन्नि-
पातः कः कीदृशश्चेत्यत आहुः दोषा इत्यादि । दोषा रजस्तमसो वृत्तयः गुणाः सत्त्वस्य

१ व्यवहारबोधक ।

वृत्तयः। 'शमो दमस्तितिक्षेशा तपः सत्यं दया स्मृतिः । तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनिर्वृतिः । काम ईहा मदस्तृष्णा स्तम्भ आशीर्भिदासुखम् । मदोत्साहो यशः प्रीतिर्हास्यं वीर्यं बलोद्यमः । क्रोधो लोभोऽनृतं हिंसा या आदम्भः क्लमः कलिः । शोकमोहौ विषादार्ती निद्राशाभीरनुद्यम' इत्यत्रोक्तास्ते एकीभूता यथासम्भवमुद्भूतानुद्भूतरूपेण संहताः एकत्वं पिण्डीभावेनैकत्वसङ्ख्यायोगं यदा प्राप्नुवन्ति, स तेषां पिण्डीभावः सन्निपातः, यथा वैद्यके पूर्वे त्रिदोषः, ततः सन्निपातस्तथेत्यर्थः । स च 'सन्निपातस्त्वह'मितिभगवद्वाक्यात् 'व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभि'रिति भगवद्वाक्याच्चाहंममाभिमानरूपो मनोमात्रेन्द्रियप्राणस्वाभाविकव्यापारात्मकव्यवहाररूपश्चेति द्विप्रकारक इत्यर्थः । एवं भ्रमकारणमुक्त्वा तस्य सार्वदिकत्वं भ्रमाभीक्ष्ण्याय बोधयन्ति तेनेत्यादि । तेनाहंममाभिमानेन यावज्जीवं मनोमात्रेन्द्रियप्राणानामात्मसन्निधानपर्यन्तं सन्निपातात्मकः व्यवहारः । अतोऽन्तेपि देहादीनामात्मसन्निधानात्तैस्तत्कार्यं सन्निपातकार्यं भ्रमं प्राप्नुवन्ति, अतस्तेषां भ्रमस्याभीक्ष्ण्यम् । तर्हि तस्य सर्वत्र तौल्याद्भगवदीयेषु कुतो न भ्रमोत्पत्तिस्तत्राहुः भगवदीयेत्यादि । तथा च पूर्वसन्निपातनिवृत्त्या तदनुत्पत्तिरित्यर्थः । निवृत्तिरेव कथमित्यतस्तत्कारणमाहुः तत्रेत्यादि । तामसीति । स्वभावतः क्रियमाणत्वात् तथा । विपरीतमिति । तेषां सात्त्विकस्वभावेन भगवत्सम्बन्धितयैव क्रियमाणत्वाल्लौकिकी वार्ता सात्त्विकी । आग्रहदार्ढ्येन क्रियमाणत्वाद्भजनं सेवारूपं तामसम् । कथाजोषणं तु राजसमेव । आद्यमिति । वार्ताकरणम् । तत्रोपपत्तिः यद्धीत्यादि । 'यद्धि मनसा ध्यायति तद्वाचा वदती'ति श्रुतौ वाचां मनःपूर्वकत्वप्रतिपादनादिति । अतः सत्त्वादिगुणकार्येष्वपि देहादिष्वेवं भगवत्सम्बन्धान्निरन्तरेत्याद्युक्तप्रकारेणाज्ञानसहिते सन्निपाते निराकृते तथेत्यर्थः । नन्वेवमन्यदास्तु, अन्तसमये तु कालेन स्वभावव्यत्यासाद्भवः स्यादेवेति चेत्, तत्राहुः यद्यपीत्यादि । नित्यत्वादिति । देहादीनां कालानधीनत्वात् । तथा चातो महाभयेपि न भ्रम इत्यर्थः ।

तावदित्यत्र । ननु यदि राज्ञा कलिर्निराकृतः, तदा तदनधिष्ठितस्य कालस्य कलावप्रवेशाद्गणनायामविषयं स्यादिति तन्निरासायाहुः आधिदैविके-
१-१८-५ त्यादि । निराकृतस्त्वाधिदैविकः, तेन तस्य प्रभुत्वाभावः । आध्यात्मिकस्तु वर्तत एवेति न गणनाविषयमित्यर्थः । गुणानां गुण्यपेक्षयेति । गुणानां राजनिष्ठानां गुण्यपेक्षया भगवदपेक्षया । गुणानामिति । 'कलिं सभाजयन्त्यार्या' इत्यादिवाक्योक्तानां कलिगुणानां राजगुणानां च ॥ ५ ॥

यस्मिन्नित्यत्र । इति वाक्यानुरोधादिति । अस्मिन् वाक्ये उत्तमश्लोकवार्तावच्छिन्नस्य कालस्य हरणाभावकथनेन सूर्यपरिस्पन्दानवच्छिन्नत्व-
१-१८-६ बोधनानुरोधादत्राप्युत्तमश्लोकवार्तावच्छिन्नस्य कालस्य सूर्यपरिस्प-

न्दानवच्छिन्नतायाः शतृप्रत्ययवचनत्वादित्यर्थः । सूर्यपरिस्पन्दानवच्छिन्नत्वे कथं कलिप्रवृत्त्यभावसिद्धिरित्यत आहुः सूर्येत्यादि । तथा च तदभावे तदभावात् प्रवृत्त्यभावसिद्धिरतस्तथेत्यर्थः । उत्कर्ष उद्धरणम् । तदायुषेति । भगवद्वार्तावच्छिन्नेन राजायुषा । ननु विद्यमाने सामर्थ्ये कुतो न सम्पन्न इत्याकाङ्क्षायां पूर्वं सामर्थ्यगमकमाहुः तत्रेत्यादि । उत्कृष्टेवेति । सूर्यपरिस्पन्दावच्छेदे तत्कृतगुणदोषयोर्यथायथमावश्यकत्वेपि 'भूःकालभञ्जितभगापि यदङ्घ्रिपद्मस्पर्शोत्थशक्तिरभिवर्षति नोखिलार्थान्'इति वाक्ये दोषनिवृत्तिकथनेन द्वापरनिवृत्तिबोधनादुत्कृष्टैव । तथा च सामर्थ्यमस्त्येवेत्यर्थः । तदसम्पत्तावुपपत्तिमाहुः अथेत्यादि । अस्य स्वसमानबलस्याभावादिति पूर्वोक्तायुर्विशिष्टस्य राज्ञो मर्यादाभङ्गाभावपूर्वककलक्षयवतारकालबाधाभावपूर्वकगत्युत्कर्षणासामर्थ्येन तथात्वादित्यर्थः । तदपेक्षयेति । भगवत्प्रचलनप्रतीक्षया ॥ ६ ॥

या या इत्यत्र । केवलनिर्देशेनेति । निर्देशो लौकिकबुद्धिविषयीकरणम् । साधारणानीति । लौकिकतौल्येन प्रतीयमानानि । सप्रतिष्ठानीति ।
१-१८-१० तादृशान्यपि तत्प्रतिष्ठापूर्वकं कथनीयानीत्यर्थः ॥ १० ॥

सूत जीवेत्यत्र । प्रउगादिशंसनवदिति । प्रउगं शस्त्रविशेषः । 'प्रउगं शंसती'ति श्रुतेः । शस्त्रं चात्र (अ)गीतमन्त्रसाध्या स्तुतिर्ज्ञेया । विपं-
१-१८-११ च्यतीति पचाद्यच् । भावप्रधानो निर्देशः । तथासति प्रवेशकर्तृत्वं च्यतीत्यर्थः सिद्ध्यति, तदाहुः संसारेत्यादि । यत एवमतः प्रवेशकर्तृत्वं च्यतीत्यर्थः ॥

कर्मणीत्यत्र । यथा तत्रेत्यादि । मनुष्यलोकस्य प्रत्यक्षफलत्वेनोत्कृष्टत्वं वक्तुं यथा देवलोकफले सन्देहवचनम्, तथात्र भगवल्लीलाकथारसस्योत्कृष्ट-
१-१८-१२ त्वाय कर्मणोऽनाश्वासत्त्वमुच्यते, न तु तस्य कर्मणो निन्दार्थमित्यर्थः ॥

तुलयामेत्यत्र । ननु स्वर्गापवर्गयोः कथं न तत्समानत्वमित्याकाङ्क्षायां तयोः स्वरूपं क्रमेणाहुः स्वर्गो हीत्यादि । न्यूनत्वमेतस्य जन्यत्वात्पारक्य-
१-१८-१३ त्वाच्च बोध्यम् । तस्यैव जीवावरणनिवृत्तिरूप इति । 'जीवो जीवं विहाय मा'मित्यादिप्राज्यस्य लिङ्गस्यापि जीवत्वकथनात् । जीवरूपं यदावरणं तन्निवृत्तिरूप इत्यर्थो बोध्यः । स एवेति । ब्रह्मानन्द एव । सङ्ख्ययेति । आनन्दमीमांसास्थसङ्ख्यया । ब्रह्मानन्दस्य जीवानन्दाद्विलक्षणत्वे भगवदानन्दस्य तदुभयविलक्षणत्वे च मानमाहुः अन्यथेत्यादि । नन्वानन्दमीमांसायामिव 'यतो वाचो निवर्तन्त' इति मन्त्रेपि ब्रह्मपदेनोभयत्रैकस्यैव ब्रह्मानन्दस्य प्रतीतेः ब्रह्मानन्दस्य कथं भगवदानन्दतो भेदावगतिः, कथं तत्र च न्यूनत्वावगतिरित्यत आहुः ब्रह्मानन्द इत्यादि । तथा च भगवदपेक्षया ब्रह्मानन्दे न्यूनता । ब्रह्मणो न्यूनतेत्युभयमप्येकेनैव कार्येणावगम्यते इति श्रुतौ

शब्दसाधारण्येप्यर्थोवगन्तव्य इत्यर्थः। अन्यथा वदद्व्याघातापत्तेरिति। सिद्धमाहुः अत इत्यादि। ननु मास्तु भगवत्तुल्यत्वम्, तथापि भगवत्सङ्गिसङ्गतुल्यत्वे का वानुपपत्तिरित्यत आहुः साधनेत्यादि। भक्तिसाधनं भगवत्सङ्गिसङ्गः। तत्तौल्यापगमेपि सा न वक्तुं शक्येत्यर्थः। तदुपपादयन्ति मुक्तो हीत्यादिना। इदमिति। मुक्तत्वम्। मोक्ष इति। स्वरूपोपकारीति शेषः। स्वतन्त्रनियतपाक्षिकयोरिति। स्वतन्त्रनियतं च पाक्षिकं चेति द्वन्द्वः॥ १३॥

को नामेत्यत्र। पूर्वमिति। प्रथमाध्यायस्थे 'वयं तु न वितृप्याम' इति श्लोके। तस्येति। कथास्वरूपस्य। तद्रूपत्वमिति। रसजनकत्वम्। तस्येति।
१-१८-१४ तद्रूपस्य उत्कृष्टफलरूपस्येत्यर्थः। साधनत्वेनेति। 'यस्य स्मृत्ये'ति 'ज्ञानं यतः प्रतिनिवृत्ते'त्यादिवाक्यैः कर्मपूर्तिज्ञानयोः साधनत्वेन ज्ञानात्साधनत्वरूपे यो रसस्तद्वित्त्वम्; न तु फलत्वेन रूपेणेति तद्व्यावृत्तिरित्यर्थः। विरोधाभासत्वेनासङ्गत्वमुपपादयन्ति यो हीत्यादि। पर्वताग्रनदीजलवदिति। यथा ब्रह्मगिरेः पतन्ती गोदा न कदापि विच्छिद्यत्यपरिमिता भवति तथेत्यर्थः। उपपत्तिमुक्त्वा प्रमाणमाहुः भवतीत्यादि। 'वेदः गणकानामित्यादि। भवस्य प्रमाणमुख्यरूपत्वमुपपादयन्ति भवतीत्यादि। 'वेदः शिवः शिवो वेदः' 'वेदाभ्यासी सदाशिवः' 'पाषाणः शिवतां याति वेदाभ्यासाद्द्विजः' किम्विगति वाक्यं शिवपुराणीयम्, तस्माद्भवस्य मुख्यप्रमाणरूपत्वमित्यर्थः। तत्त्वमिति। प्रमेयमुख्यत्वम्। यद्यपि निःश्वसितश्रुतेः 'प्रचोदिता येने'ति वाक्याच्च भगवत एव प्रमेयमुख्यत्वं सम्भवति, तथापि प्रमाणस्वरूपतया वेदोत्पत्तेस्तद्रूपस्य शिवस्यापि प्रमेयमुख्यत्वं सम्भवति, तथापि प्रमाणरूपत्वमेवादृतं ज्ञेयम्॥ १४॥

तन्नो भवानित्यत्र। नित्यनपुंसक इति। सुहृद्वाचकमित्रशब्दवत्। तथा च तत्कोटिप्राबल्यात् मूले पाञ्चस्य पृथगुल्लेखाच्चात्र मुख्यवाचकस्य पुल्लिङ्गत्वेप्यदोष इत्यर्थः। कोशानुरोधेन सम्बन्धं
१-१८-१५ षष्ठ्यां सम्बन्ध्यध्याहारक्लेशेन च पक्षान्तरमाहुः भगवानित्यादि॥

स वा इत्यत्र। तद्विष्णोरिति। 'सोध्वनः पारमाप्नोति विष्णोः परमं
१-१८-१६ पद'मिति काठकादिवाक्येषु तथानिर्णयादित्यर्थः॥

तन्नः परं पुण्यमित्यत्र। उद्देश्यविशेषणत्वे दूषणमुक्त्वा विधेयविशेष-
१-१८-१७ णत्वे गुणमाहुः एवं त्वयेत्यादि। एवं प्रकारकोपकाराय त्वया कथितमित्यर्थः॥

अहो इत्यत्र। ब्रह्मकल्पे इयं व्यवस्थेति। तत्र हि पृथोर्यज्ञे बृहस्पतेर्हविषि ऐन्द्रं हविः प्रमादतः पतितम्, तत सूत उत्पन्नः, तस्य मुख्या वृत्तिः
१-१८-१८ पुराणकथनम्। अन्या अश्वचिकित्साद्या जघन्या इत्युक्ता। षड्गुणा इति। अहो वयमित्यादिश्लोकषट्कोक्ताः॥

कुतः पुनरित्यत्र। इत्याहेति। इति हेतोरुक्तेरधिकप्राप्तिं कैमुतिकेनाहेत्यर्थः।
१-१८-१९ अपेक्षेति। तत्रोपादेयबुद्धिः। अपेक्षायां हेतुमाहुः प्रायेणेत्यादि। तत इति। तेन न्यायेनैवं ज्ञापनार्थं स न्यायोत्रोच्यत इत्यर्थः। वक्तव्य इति। उक्त इत्यर्थः। विपरीततया कथयन्निति। भगवत्कथनपूर्वकनाममाहात्म्यं कथयन्। उत्तरवाक्यगतमिति। उत्तरार्द्धे इत्यर्थः। किं भगवति माहात्म्यमित्याकाङ्क्षायामाहुः महतो भावो माहात्म्यमिति। महत्त्वमेव माहात्म्यमित्यर्थः। तद्विवृण्वन्ति महत्त्वमित्यादि। तादृशमिति। देशाद्यपरिच्छिन्नम्। अनो नवधेति। स्वरूपस्य त्रिधाऽपरिच्छिन्नत्वम्, शक्तिगुणयोस्तु कार्यस्य फलस्य च यथायथं सर्वत्र सर्वदा सर्वेषु दर्शनाच्छक्तीनां कार्यतस्त्रिधाऽपरिच्छिन्नत्वम्, गुणानां तु फलतस्तथात्वमतो नवधेत्यर्थः। पठ्यतीति पाठे सूतः पश्यति इत्यर्थो बोध्यः। पर्यवस्यतीति प्राञ्जलः पाठः। उत्तरत्रेति। महद्गुणत्वादित्यनेनोक्तेषु गुणेष्वपीत्यर्थः॥

१-१८-२० एतावतेत्यत्र। स्वरूपशक्तिभिरिति। स्वरूपेण शक्तिभिश्चेत्यर्थः। 'तया विना क्व देवत्व'मिति वाक्यं तु विष्णुपुराणे इन्द्रकृतलक्ष्मीस्तुतौ वर्तते। अथापीत्यत्र। युक्तिरिति। दोषसत्त्वेऽङ्घ्रिरेणुं न भजेदिति युक्तिः।

१-१८-२१ भिन्नं वेति। पादश्च नखश्चेति द्वन्द्वान्ते श्रूयमाणस्याग्रशब्दस्य प्रत्येकमभिसम्बन्धात्तथेत्यर्थः। अग्रे इति। तृतीयस्कन्धे 'यच्छौचनिःसृत' इति कपिलोक्तौ नवमस्कन्धे शुकोक्तौ चेत्यर्थः।

यत्रेत्यत्र। तेषामिति। वामनादीनाम्। भवन्तीति। अनुरागेणैव भवन्तीत्यर्थः। ननु यत्र यत्र देहादिसङ्गनाशकत्वम्, तत्रतत्र भगवद्विषयराग-
१-१८-२२ त्वमिति व्याप्तिरप्रयोजिका, ज्ञानद्वेषादौ व्यभिचारादित्यत आहुः उपेत्यादि। तथा च भगवद्विषयकत्वमात्रेण व्याप्तिरिति भावः। अवोचाम इति। कुण्ठितेति। तद्व्यापारात्मागेव तत्प्रतिपादितेऽर्थे प्रवृत्तेस्तथेत्यर्थः।

अहं हीत्यत्र। अर्यमण इत्यत्र दीर्घाभावः छान्दसः। हीति। मूले हिर्हेतावि-
१-१८-२३ त्यर्थः। सम्बन्धत इति। पूर्ववाक्ये कर्तृत्वेन, द्वितीये प्रयोजकत्वेनेत्येवं सम्बध्यते। वेदपाठवदिति। आधुनिकवेदपाठवत्।

१-१८-२४ एकदेत्यत्र। विचरन्निति। कुर्वन्नित्यर्थः। हृता इति। हि यतो हेतोः हृताः प्राप्ताः गृहीता इत्यर्थः।

१-१८-२४ जलाशयमित्यत्र। अननुज्ञात इति। तस्यान्तः प्रयोगः अननुज्ञयेत्यर्थः।

१-१८-२६ स्थानत्रयादित्यत्र। कार्यद्वयमिति। वाग्यमान्तरं चेत्यर्थः।

तस्य पुत्र इत्यत्र। पापमापणं कथमित्याकाङ्क्षायामाहुः मृतसर्पेत्यादि। आश्रमस्थवधेनेति। यथा सर्पो हतः, तथा अन्यं हन्यात्, तथा
१-१८-३१ सति मरणमेवापतेदित्यर्थः। मुनिपर्यवसायो जात इति। यथा ब्रह्मघ्नो लिङ्गं कपालधारणम्, तथा सर्पघ्नस्य सर्पधारणमिति तथेत्यर्थः।

१-१८-३२ अहो इत्यत्र। एतावतेति। पूजाया अकरणेन समाधिविघ्नेन च॥

ब्राह्मणैरित्यत्र। विषमदृष्टान्तशङ्कयेति। पुरुषविद्ब्राह्मणे 'क्षत्रात्परं नास्ति तस्माद्ब्राह्मणः क्षत्रियमध उपास्त' इति श्रुतेस्तथेत्यर्थः। चतुर्द्धा निरू-
१-१८-३३ पणमिति। स्वामिद्रोहस्य चतुर्द्धा निरूपणम्। प्रत्यक्षतो द्वारपालत्वाप्रत्ययात्तत्कथमित्याकाङ्क्षायां तदुपपादयन्ति शरीरादीत्यादिना। द्वारमिति। समाधेर्द्वारम्। तथा च तद्रक्षकत्वेन द्वारपालत्वमित्यतो न प्रत्यक्षविरोध इत्यर्थः। तर्हि कथं दृष्टान्तवैषम्यपरिहार इत्यत आहुः वस्तुत इत्यादि। तथा च पश्चादेवंभावान्न तद्वैषम्यमित्यर्थः। अर्हतीति। मूलस्थकर्थंशब्दोऽत्र योज्यः। एवमेकप्रकारेण स्वामिद्रोहो निरूपितः। द्वितीयमाहुः ब्राह्मणमित्यादि। तथा च कश्यपादिभिर्दत्तेऽपि राज्ये तैः क्षत्रियेभ्यो दानात् तथेत्यतोऽपि द्रोह इत्यर्थः। तृतीयमाहुः ब्रह्मण इत्यादि। सर्वपुरुषेत्यादि। द्वाराणीत्यर्थः। वलिस्थानमिति। वलिदानस्य स्थानम्। स्थाने इति वा पाठः। ब्राह्मणमपीति। अत्र ब्राह्मण इति सप्तम्यन्तः पाठः प्रतिभाति, अन्यथा आज्ञापयतीत्यादेरध्याहारापत्तेः। चतुर्थमाहुः समाधीत्यादि॥ ३३॥

कृष्ण इत्यत्र। मूले भगवतीति विशेषणं हेतुगर्भमिति ज्ञापयन्ति भगवत्त्वादिति। तथात्वे इति। स्वानन्दानुभवप्रतिपक्षत्वे। कोटिद्वयस्येति।
१-१८-३४ पाल्यपालककोट्योरित्यर्थः। द्वयमिति। सेतुपालनं तत्प्रतिपक्षशासनं च। स्वार्थपरित्याग इति। स्वप्रयोजनत्यागः। स्वकार्यत्याग इति यावत्॥

१-१८-४० निशाम्येत्यत्र। तस्येति। पुत्रस्य॥

तदार्यधर्मश्चेत्यत्र। निर्लज्जोपभोग इति द्वयं कामविशेषण-
१-१८-४४ त्वेन बोध्यम्॥ ४४॥

क्षुत्तृडित्यत्र। ते पूर्वमुक्ता इति। ते क्षुत्तृडादयः पूर्वं सूतोक्ता
१-१८-४५ इत्यर्थः॥ ४५॥

इतीत्यत्र। युक्तमेवेति। 'जिघांसन्तं जिघांसीया'दिति लोक-
१-१८-४८ न्यायेन॥ ४८॥

इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशेऽष्टादशाध्यायविवरणम्॥ १८॥

अथोनविंशाध्यायविवरणम् ।

अथोनविंशाध्यायं विवरिषवः सूतोक्तिसङ्गतेः पूर्वमुक्तत्वात्तामनुक्त्वा व्यासोक्तिसङ्गतेः स्फुटतयानुक्तत्वात्तामुभाभ्यां स्फुटीकुर्वन्ति सर्वदोषेत्यादि । निरूपितेति । 'प्रायशः' इति समाप्तिश्लोके निरूपिता । तथाचैककार्यत्वमधिकारे सङ्गतिरित्यर्थः । अवान्तरवाक्यतात्पर्यमाहुः एकोनविंशे इत्यादि । तत्रेति । तेषु मुनिषु । विवाद इति । शुकस्य परम्परया भगवदवतारत्वान्नारदरामव्यासानां साक्षादवतारत्वाद्विवाद इत्यर्थः । प्रकर्ष इति । उन्नतिप्रकर्षः । ननु मास्तु स प्रकर्षः, तथापि प्रश्नोत्तरवक्तृत्वं कुतो नेत्यत आहुः गुरुणेत्यादि । 'ईश्वराज्ज्ञानमन्विच्छे'दिति ज्ञानदाने गुरुत्वेन ईश्वरनियतत्वात्तेन गुरुणा ज्ञानदानात् स्वरूपाप्तिर्भवति, 'मोक्षमिच्छेज्जनार्दना'दिति मोक्षो भवतीति साक्षादवताराणामत्र न वक्तृतेत्यर्थः । अन्ते शिवात्मनेति । संहारे शिवस्यैवाधिकृतत्वात्तथेत्यर्थः ॥

ध्रुवमित्यत्र । विषय इति । अपराधविषयः । स च द्विविध इत्यादि । अत्र नपुंसकपाठः प्रतिभाति । क्रियतामिति । अप्रतीकार्यत्वपरीक्षार्थं क्रिय-
१-१९-२ ताम् । धर्म इति । वृत्तिमत्वेन धर्मिणः सकाशाद्धीन इत्यर्थः । अत इति । साक्षादपराधकरणात् । तथा च पर्यवसानविचारे धर्मिनाशापेक्षया धर्मनाश एव ज्यायस्त्वादुचित इत्यर्थः ॥

अद्येत्यत्र । पाक्षिकदोषपरिहारार्थमिति । देहादौ विद्यमाने तदध्यासात् कदाचित्पुनरेवमपराधकरणं पाक्षिको दोषस्तत्परिहारार्थमित्यर्थः ।
१-१९-३ आहेति । विलम्बाभावं प्रार्थयत इत्यर्थः । नन्वत्रैवं ग्लानौ स्वव्यसनसङ्कोचाभावः प्राक् प्रार्थित एवेति किमनेनेति शङ्कायां शेषे षष्ठीबोधितमर्थमाहुः शेषरक्षार्थमित्यादि । पूर्वं या व्यसनसङ्कोचाभावस्यात्मनि प्रार्थना, सा शेषरक्षार्थं न, किन्तु कुरुजाङ्गलातिरिक्ते स्वस्य साक्षात्सम्बन्धाभावबोधनार्थम् । तथाचात्रोक्तातिरिक्तानां श्रेयोर्थमियं प्रार्थनेति नानर्थक्यमित्यर्थः । सिद्धमाहुः अत इत्यादि । यतः साक्षात्सम्बद्धा एवान्तरापराधजनकाभिमानप्रयोजकाः, अतो ब्राह्मणापराधार्थं ब्राह्मणापराधनिवृत्तये नैमित्तिक अपराधहेतुभूतमन्युमत्सरजनकाभिमाननिवर्तकतया तत्सम्बन्धी देशनाशः प्रार्थित इत्यर्थः । तस्य प्रार्थनस्याकारमाहुः साक्षादित्यादि । यत एतन्नयं नाशयेत्ततो निःप्रत्यूहं भवत्विति । अयमेवाशय इत्यत्र गमकमाहुः तत्रेत्यादि । तथा चेदं स्वविशेषणमेवाशयस्य गमकमित्यर्थः । तस्मिन्निमित्तदाहार्थं इत्यत्र तत् निमित्तदाहार्थे इति पाठः प्रतिभाति ॥

स चिन्तयन्नित्यत्र । सर्वे ह्यस्य भृत्यचो वेद्या इत्यादि । अत्र हितौ ।

वा एवकारार्थे। तथाच हयमेधावभृथे मृत्यूनामिष्टत्वेनेतरेषामभावात्तथे-
१-१९-४ त्यर्थः। अहेतुत्वमिति। विरक्त्यहेतुत्वम्। ननु भावितत्सम्बन्धज्ञान-
नस्यैव विरक्तिकारणत्वेनोदासीनस्य तक्षकानलस्य तथात्वाभावे परस्परापेक्षाभावेनासाम-
र्थ्यात्कथमयं समास इत्यत आहुः नित्येत्यादि। कारणशब्दस्य नित्यं कार्यसापेक्षत्वात्
वक्तव्ये तस्मिन् विवक्षिताया विरक्तेरेवात्र परम्परया तथात्वेनोपस्थितत्वादयमसमर्थ एव
समास इत्यर्थः॥

अथो इत्यत्र। अनशनमिति। 'प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोरपी'ति कोशा-
दित्यर्थः। अत एवेति। त्यागस्य भगवत्सेवार्थत्वादेव। भगवद्व्रतत्वे-
१-१९-५ नेति। 'अनश्नन्नन्य'इति श्रुत्या तथात्वेन। एवं चात्रोपविशतेः
क्रियार्थत्वं बोध्यम्। यथा 'सत्रमासते'त्यत्रासतेः क्रियार्थत्वम्, तद्वत्। तत्तीर
इति। मन्दाकिनीतीरे। ननु गङ्गाया अमर्त्यत्वसाधकत्व इदानीं कथं तद्व्यभिचार इत्यत
आहुः इदानीं त्वित्यादि॥ ५॥

या वै लसदित्यत्र। भक्तावित्यादि। गङ्गायां कुत एवं सामर्थ्यमित्याकाङ्क्षायां
भक्तावित्याद्याहेत्यर्थः। चरणक्षालनमिति। तथा च तत्करणत्वेन
१-१९-६ फलरूपोपयोग इत्यर्थः। ननु तथापि प्रकृतेः कथं स इत्यत आहुः
भावनायामित्यादि। तस्यामिति। सेवायाम्। अभिज्ञापिकेति। स्मारिका। तथा
च प्रकृते स्मारकत्वेन स इत्यर्थः। केन रूपेणाभिज्ञाजनकत्वमित्याकाङ्क्षायामाहुः तस्या
इत्यादि। तथा च विशेषणोक्तरूपेण तथेत्यर्थः। अत्र विमिश्रत्वकथनानुपपत्त्या तुलसी-
स्थितिरुत्क्षिप्तेपि चरणारविन्दे सिद्धा, तद्विमिश्ररेणुसम्बन्धेन क्षालनकरणतापि सिद्धा।
तथा चैतद्विशेषणोक्तरूपेणाभिज्ञापकत्वमित्यर्थः। एवं फलरूपमुपयोगं प्रकृतोपयोगं च
बोधयित्वा सेवोपयोगिदेहजननसामर्थ्यसाधनायाहुः भक्तकार्येत्यादि। अत्र भक्ता
वलिर्देवाश्च, तत्कार्यमुद्धारस्त्रिविष्टपप्रापणं च, तदर्थं व्यापृतस्योत्क्षेपादिकां क्रियां तन्वा-
नस्य भगवतश्चरणस्य वा, भूतसंस्कारकपक्षमाश्रित्य, कार्यव्यापाराभावे ततः सायु-
ज्यादेरेव सम्भवात्, तद्व्यापारे तु स्वसेवायोग्यदेहसम्पादनरूपस्य भक्तान्तरकार्यस्यापि
संभवात् देहनिष्पादकभूतसंस्कारकपक्षमादृत्य। तदन्तरेति साधनाध्यायारंभस्थितसूत्रो-
क्तन्यायेन। तत्र हि 'पूर्वजन्मनि निष्कामयज्ञकर्तुर्ज्ञानरहितस्य मरणे सर्ववेदार्थरूप-
भगवत्स्वरूपज्ञानाभावेन यज्ञाभिव्यक्त्यभावाद्भूतसंस्कारक एव यज्ञो जात इति, निष्का-
मत्वाच्च यज्ञसचिवा देवास्तुष्टा इति, ततश्च तदधीनान्येव भूतानीति, ते देवास्तस्याग्रे ज्ञान-
योग्यदेहसिद्ध्यर्थं तत्र तत्र हुत्वा पञ्चाग्निविद्याप्रकारेण तस्य शरीरं सम्पादयन्तीति
प्रतिपादितम्, तेन न्यायेन कृतप्राणिपुण्यपुञ्जस्य पूर्वजन्मनि कृतो यः पुण्यपुञ्जः श्रवणा-

१ अत्रत्यं पाठान्तरं पृष्ठोपरि द्रष्टव्यम्।

दीनां साधनभक्तीनां साक्षान्मोक्षसाधनत्वं ज्ञात्वा तान्त्रिकीदीक्षापूर्वकं विहितत्वेन कृतं यदुपासनामार्गीयं श्रवणादिनवकं तत्पूर्वोक्तयज्ञवत् भूतसंस्कारकमेव जातमिति तस्य यज्ञस्य स्वव्यापारभूतदेवाधीनानि देहजनकानि भूतानीति विद्यायोग्यदेहनिष्पादनार्थं देवसम्बन्धं प्राप्य पञ्चाग्निविद्योक्तहोमरूपेण स यज्ञस्तिष्ठति, तथा पूर्वोक्तनवरूपमपि सम्बन्धिनां निषेक्तृपोषकरूपाणां पित्रादीनां भक्तत्वे सति तद्द्वारा भगवदीयशरीरनिष्पादनार्थं चरणामृतचरणरेणुरूपेण भूतानि संस्कुर्वत् भगवच्चरणे सम्बन्धं प्राप्य तिष्ठतीति भक्तानां तादृशपुण्यश्रवणादिकृतां तत्सम्बन्धि तादृशशरीरं निष्पादयितुं चरणामृतचरणरेणुसम्बन्धिनं साक्षात्सेवायोग्यं निष्पादयितुं स्थितस्य नवकस्य चरणप्राप्तेः पूर्वमेव तत्प्राप्तिसाधकत्वं चरणामृतचरणरेणुसम्बन्धप्राप्तिसाधकत्वं गङ्गाया व्यासः सूतश्च वदति, तेन तस्याः तादृशसामर्थ्यमित्यर्थः । भक्त्योरिति । विहिताविहितभक्त्योः । सेशानिति । अस्मिन् पक्षे उभयत्रेत्यस्य स्थितिदशायां संहारदशायां चेत्यर्थो बोध्यः ॥ ६ ॥

इत्थं व्यवच्छिद्येत्यत्र । अन्यथा स्यादिति । आधिदैविकरूपानाविर्भावेन स्वविचारितकार्यानुपयोगि स्यात् । आध्यात्मिकस्येत्यादि । अन्तः-

१-१९-७ करणनिष्ठपापादेर्बलिष्ठत्वेन पूर्वोक्तं प्रायोपवेशनमित्यर्थः । ग्रहवदित्यादि । यथा 'ग्रहं सम्मार्ष्टी'ति सम्मार्गवाक्ये श्रूयमाणाप्येकत्वसङ्ख्या, ग्रहान्तराणामुत्तरत्र होमादिकर्मणि विनियोगार्थं उद्देश्यगतत्वादविवक्षितेत्याद्रियते, तथात्रापि चरणान्तरस्य ध्यानोपयोगार्थमविवक्षितेत्यर्थः । अविवक्षितत्वस्य फलमाहुः तेनेत्यादि । पूर्ववच्छेषत्वमिति । सेवायोग्यशरीरप्राप्तिशेषत्वम् । अनन्यभावत्वकथनप्रयोजनमाहुः प्रायेत्यादि । अपेक्षितत्वादिति । पूर्वश्लोकद्वये कर्मत्वेन शुद्धिजनकत्वादिना च तथात्वात् । आज्ञयेति । गृहमेधे पुत्रादीनामाज्ञादानेन ॥ ७ ॥

तत्रेत्यत्र । कालसामीप्यमिति । यस्मिन् काले प्रायोपवेशं कृतवान्, तदैवेत्यर्थः । पुनर्बोधनव्यावृत्त्यर्थमिति । एवं कथाकरणार्थं यत्पुनर्बोधनं

१-१९-८ तद्व्यावृत्त्यर्थम् । शिष्टाचारदर्शनादेव तत्सिद्धेरिति ॥ ८ ॥

अत्रिरित्यत्र । अन्यो वेति । कृपस्य शारद्वतत्वेन प्रसिद्धेर्गौतमस्याग्रे उक्तत्वाच्च तथेत्यर्थः । भगवद्भक्तान्ता इति । नारदान्ताः । तेष्ववान्तरविभाग-

१-१९-९ माहुः अथेत्यादि ॥ ९ ॥

अहो इत्यत्र । हेतुत्वादिति । भगवत्कृपाहेतुत्वात् । अतो हीत्यादि । अतो हेतोः ब्रह्म क्षत्रं चेति द्वे अन्योन्यमात्मानं रक्षत इत्यन्वयः । तद्वि-

१-१९-१३ परीतमिति । उत्तमोत्तमम् ॥ १३ ॥

तस्यैवेत्यत्र । अन्यथेति । शापरूपत्वेन अभवने । एतस्यैव विवरणं अन्यथा

१-१९-१४ अवरेयामित्यादि। समयाभाव इति। शास्त्रश्रवणेऽवकाशाभावः। न तस्येति। इदं पञ्चमस्कन्धे जडवाक्यम्। 'न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन्। स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्या'दिति। अर्थस्तु। यस्य गृहमेधिसौख्यं स्वप्नदृष्टान्तेन हेयतया अनुमितं स्वतो न स्यात्। तस्य वरीयसः शास्त्रीया वाचोपि तस्य तत्त्वनिश्चयाय न बभूवुरिति। न्यायादित्यर्थः। तथा जातमिति। गृहे मोचनं न जातमित्यर्थः॥ १४॥

१-१९-१५ तं मोपयान्तमित्यत्र। तयोरिति। भगवदीयभगवतोः॥ १५॥

पुनश्चेत्यत्र। ननु प्रवृत्तिपराणां स्वर्गस्येव निवृत्तिपराणां सर्वेषां मुक्तेरेवाभीष्टत्वात्सैवामुत्र कुतो न प्रार्थ्यते इत्याकाङ्क्षायामाहुः मुक्तिरित्यादि। अप-
१-१९-१६ राधित्वान्न सम्भाविता, भगवदीयत्वान्नापेक्षिता, अतो न प्रार्थ्यते इत्यर्थः। तर्हि भक्तिः कुतः प्रार्थ्यते इत्यत आहुः राज्येत्यादि। विरुद्धधर्माश्रयत्वादिति। भक्तौ बन्धरूपत्वेप्यबन्धरूपत्वस्य तृतीयस्कन्धे व्युत्पादनाद्वयोर्धर्मयोस्तत्र सत्त्वेन तथात्वात्। तर्हि जनकादेरिव दोषाजनकं राज्यमेव कुतो न प्रार्थ्यते इत्याकाङ्क्षायां कैमुतिकेनाहुः जन्मेत्यादि। ननु सकृदुत्पन्नायामपि रतौ कार्यसिद्धेरव्याहतत्वाद्रतिकारणप्रार्थनस्य किं प्रयोजनमत आहुः अन्यथेत्यादि। अन्यथेति। साधनप्रार्थनाभावे। साधनमिति। रतिदानवररूपं महत्प्रसङ्गरूपं वा। उपक्षिप्तमित्यत्र उपक्षीणमिति पाठः प्रतिभाति। तथा चाक्षिप्तस्य साधनस्यैवोपक्षीणत्वे पुनर्जन्मान्तरे रत्यभावान्महदेवानिष्टमापद्येतेत्यतः कारणप्रार्थनं युक्तमित्यर्थः। नन्वेवं रतेरावश्यकत्वे सैव सर्वदास्त्विति प्रार्थनीयम्, तथा सति सकृज्जातेनैव साधनेन सर्वदा तस्याः सिद्धिरित्यत आहुः न चेत्यादि। अपिना सेवानिर्वाहः सङ्ग्राह्यः। ननु 'अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यह'मिति भगवद्वाक्याद्भगवतैव देहादिनिर्वाहसम्भवान्न तदनुपपत्त्या असार्वदिकतत्प्रार्थनं युक्तमिति चेत्, तत्राहुः तादृशेत्यादि। सार्वदिकरतेः प्रमेयैकसाध्यत्वेन प्रमाणस्य साधनत्वाभावात्। यद्वा। राजा हि भगवदनुभावानुभवात्तत्साक्षात्कारार्थं प्रयतते। स हि वाक्योग्यव्यतिरिक्तज्ञानत्वेन प्रमाणम्, यथा 'आकाशवदन्तरं बहिर्भूतेषु सन्तं पुरुष'मिति शुकस्य ज्ञानम्, तच्च कदाचित्कयैव सत्सङ्गजन्यया रत्या, न तु व्रजरत्नानामिव सार्वदिकया, तस्या विरहसहायत्वेन तदजनकतया तत्साधनत्वाभावात्। अतो न तत्प्रार्थनमित्यर्थः। ननु मास्तु सार्वदिकरतिप्रार्थनम्, तथापि प्रतिजन्मीनतत्साधनप्रार्थनमयुक्तम्, त्रिशङ्कूपाख्याने त्रिशङ्कोः स्वर्गसाधनीभूतपुण्याभावेपि सकृद्वाद्विश्वामित्रवरादेव फलसिद्धेरुक्तत्वादत्रापि वरस्यैव विवक्षितरतिसाधनत्वस्य शक्यवचनत्वेन तत एव नानाजन्मसु रतिसम्भवादिति

शङ्कायामाहुः वरस्येत्यादि। एतज्जन्मीनवरस्यैव तादृशतत्साधनत्वेङ्गीकृते त्रिशङ्क्वादि-वदत्रापि फलं भविष्यतीति सम्भावनायाः प्रमाणत्वेङ्गीकृते सति रत्यधिकरणस्य स्वस्य शापेन लौकिकतुल्यतया प्रकारान्तरे त्रिशङ्कुन्यायेनोभयाभावे च प्रसक्ते युक्तिबाधात् उत्प्रेक्षायां प्रमाणत्वकल्पनस्यानपेक्षिताभ्यागमस्यापातेन त्रिशङ्क्वादिवरन्यायबाधात् भगवच्चवरेण सायुज्यं पर्यवस्यति। तच्च भक्तानां भगवदीयत्वेनैव परिसमाप्तसर्वार्थाना-मनपेक्षितम्, अतः प्रतिजन्मीनरत्यर्थं प्रतिजन्मीनरतिकारणप्रार्थनं युक्तमेवेत्यर्थः। एवं वरस्वरूपविचारेण प्रतिजन्मीनसाधनप्रार्थनस्य युक्तत्वमुपपाद्य रतिस्वरूपविचारेणो-पपादयन्ति रतिश्चेत्यादि। स्नेहत्वादिति। 'प्रेमाना प्रियता हार्दं प्रेमस्नेह'इतिको-शेन प्रियतारूपत्वात्। तथा चान्तःकरणधर्मत्वेन सिद्धेऽनित्यत्वे प्रतिजन्मनि तत्का-रणप्रार्थनं युक्तमित्यर्थः। ननु रतेः सविषयत्वेनेच्छारूपत्वात्तस्याश्चानुकूलत्वबुद्धिवेद्यद्विष-यादेव सिद्धेस्तत्साधनप्रार्थनमनर्थकमित्याकाङ्क्षायां रतेः स्वरूपं विवेक्तुं विकल्पयन्ति न वेत्यादि। पुत्रादिषु तदभावप्रसङ्गादिति। पुत्रादिविषयिण्या रतेः इच्छारूपत्वाभा-वेन रतित्वाभावप्रसङ्गादित्यर्थः। एतेनैव ज्ञानरूपतापि वारिता। यत्नरूपता च। अनुकूल-बुद्धिवेद्यत्वेन द्वेषादिरूपतापि तथा। प्रीणाम्यनुरज्यामीत्यनुव्यवसायगम्यत्वाददृष्टरूपतापि निवारिता। सविषयत्वाच्च न सुखरूपता। तदेतदभिसन्धायाहुः अत इत्यादि। अत अनु-कूलबुद्धिवेद्यत्वेपि सविषयत्वरूपाद्विशेषात्प्रीणाम्यनुरज्यामि स्निह्यामीत्यादिबुद्धिगम्यत्वाच्च रत्याद्यपरनामा स्नेहः पदार्थान्तरमेवेत्यर्थः। नन्वस्तु पदार्थान्तरत्वम्, तथापि प्रियत्वापर-पर्यायस्य तस्य निरुपधेरेव मुख्यत्वात्तादृशस्य च तस्य मैत्रेयीब्राह्मणे 'न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवती'त्यादिना आत्मधर्मत्वेनैव व्यवस्थापनाद्भगवद्विषयकस्य सोपाधेरेवान्तःकरणधर्मत्वमित्यात्मविषयकतदपेक्षया जघन्य-त्वात् किं तत्प्रार्थनेन किं वा तत्साधनप्रार्थनेनेत्याशङ्कायामाहुः स इत्यादि। तथा च यथा चतुःश्लोकीस्थं ज्ञानमैश्वर्यं च भगवद्दत्तं तत्सम्बन्धाच्चतुर्मुखे तन्निरूप्यात्पार्षदादिषु च भासते, तावतापि न तस्य भगवद्धर्मत्वहानिः, तथा स्नेहस्यापि तस्य मनोधर्मप्रतीतावप्यागन्तुकत्वेन भगवत्सम्बन्धार्थं तत्साधनप्रार्थनं युक्तम्, भगवद्धर्मत्वेनाजघन्यत्वाच्च तत्प्रार्थनमपि युक्तमे-वेत्यर्थः। नन्वेमागन्तुकत्वे सर्वत्र तुल्य एव स्यात्, न तु न्यूनाधिक इत्यत आहुः उष्णस्प-र्शवदित्यादि। तथा च वह्निनैकट्ये उष्णस्पर्शस्येव तस्यापि भगवन्नैकट्याच्चयेत्यर्थः। एतदेव निगमयन्ति शारीर इत्यादि। परमस्नेहत्वमिति। सप्तम्यर्थे बहुव्रीहिः। परमस्ने-हविषयत्वमित्यर्थः। ननु परमस्नेहः श्रुतौ शारीरविषयक एव मैत्रेयीब्राह्मणे सिद्ध इति कथं तस्य भगवन्नैकट्यात्परमस्नेहविषयत्वमित्यत्र आहुः वाक्येत्यादि। इदमधिकरणं समन्व-याध्यायचतुर्थपादेस्ति। तत्र मैत्रेयीब्राह्मणं जीवबोधकं ब्रह्मबोधकं वेति संशयः। तत्रो-

पक्रमे अमृतत्वायात्मदर्शनतत्साधनयोरुपदेशार्थं स्वप्रतीत्या पत्यादिसर्वापेक्षया प्रियत्वलिङ्गकः स्वात्मैवाभ्यस्यते, उपसंहारे च 'एतावदरे खल्वमृतत्व'मित्यनेन तस्यैव ज्ञानस्यामृतत्वं वदतीत्युपक्रमोपसंहाराभ्यासैरिदं जीवस्यैव बोधकम्। यत्पुनर्मध्ये आत्मज्ञानादीनां सर्ववेदनरूपफलसिद्ध्यर्थमात्मनः सर्वत्वमुक्तम्, तत्त्वस्य सोपाधिकस्य जगत्कर्तृत्वरूपोत्कर्षबोधनार्थमित्यार्द्रैन्धनाग्निदृष्टान्तादवसीयते, एवमेव समुद्रादिदृष्टान्तैराधारत्वं यदुक्तम्, तदपि तदर्थमेव। एवं श्रुत्यन्तरे या तस्य ब्रह्मता श्राव्यते, साप्युत्कर्षार्थमेवेत्यत इदं जीवबोधकमेवेति पूर्वः पक्षः। सिद्धान्तस्तु इदं ब्रह्मबोधकमेव, तत्र हेतुः 'वाक्यान्वया'दिति। वाक्यानामन्वयो वाक्यान्वयस्तस्मात्। अत्रोपक्रमेऽमृतत्वायात्मदर्शनं तत्साधनानि चोपदिश्यन्ते, अमृतत्वं मोक्षः, तच्च ब्रह्मज्ञानादेवेति। 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाये'ति सावधारणश्रुतौ मार्गान्तरनिषेधात् सिद्धमितीहापि तमेवात्मत्वेन परामृश्य दर्शनादिवाक्यानामन्वयो वाच्यः, अन्यथा तद्व्याकोपापत्तेः। एवञ्चोपसंहारवाक्यमपि युज्यते, उपक्रमश्चासञ्जातविरोधित्वात्प्रबलः, एवं च ज्ञानफलादिवाक्यान्यप्यन्वेष्यन्ति। तस्यैव सर्वत्वात्सर्वाधारत्वाच्च। अन्यथा तु निःप्रयोजनमसदुत्कर्षबोधनान्नान्विधुः। न च प्रियत्ववाक्यानन्वयः शङ्क्यः। 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त' इत्यादिश्रुतिभिर्ब्रह्मण आनन्दरूपत्वे भूतानां सशरीरजीवानां च तत्कार्यत्वे 'सर्व एवात्मानो व्युच्चरन्ती'ति श्रुत्या केवलानामंशत्वे च सिद्धे 'एष ह्येवानन्दयाती'ति सावधारणश्रुत्या ब्रह्मण एवानन्दजनकत्वे च सिद्धेऽन्यत्र प्रियत्वाध्यासो जीवे प्रियत्वाधिक्यं तत्सम्बन्धतन्नैकट्याभ्यामेवेति तेषामपि तत्रैवान्वयः। एवं चाभ्यासोपि तस्यैवानुगुणः। अतः साक्षात्परम्परया च सर्वेषां वाक्यानां तत्रैवान्वयादिदं ब्रह्मवाक्यमेवेति। तथा चैतस्मिन्नधिकरणे प्रियत्वस्य भगवद्धर्मत्वेनैव सिद्धत्वाज्जीवे निरुपाधिप्रेमापि तन्नैकट्यादेवेति न श्रुतिविरोध इत्यर्थः। नन्वेवं सति तस्य स्वतः सिद्धत्वात् किं तत्साधनप्रार्थनेनेत्यत आहुः अत इत्यादि। अत इति। जैवप्रियत्वापेक्षयाप्यतितिरोहितत्वेन। तदिति। नैकट्यम्। ननु जीवब्रह्मणोः स्वरूपविचारेऽतिनैकट्यस्यापि सिद्धत्वात् साधनप्रार्थना न युक्तेत्यत आहुः आश्रय इत्यादि। अन्यथा स्वाप्यये जीवस्यापि तदाश्रितत्वेन स्वत एव रतिः स्यात्, अतो नैकट्यार्थं सर्वदाश्रयोऽपेक्षित इति तथेत्यर्थः। ननु तेपि बहवः समीपेपि सन्तीति किंप्रार्थनेनेत्यत आहुः नेत्यादि। आश्रितमात्रेणेति। साधारणैराश्रितैः॥१६॥

एवं त्वित्यत्र। निश्चयेनेति। 'यस्य स्यादद्धा न विचिकित्सा-
१-१९-१८ स्ती'ति श्रुतेस्तथेत्यर्थः॥ १८॥

तमित्यत्र। स्मश्रूत्पत्त्यावसीयन्ते इति। अग्रे तदुत्पत्त्या तथा निश्चीयन्ते, तत्र गमकं मृतेति। मृतत्वज्ञापका इति। त्वङ्मृतत्वज्ञापकाः। तेन
१-१९-२६ सिद्धमाहुः अत इत्यादि। अमेध्यस्पर्शाभावात् फाल्गुनो बलवत्त्वादि-

रूपो गुण एव, न तु कामवत्त्वादिरूपः कालजो दोषस्तत्रेत्यर्थः । उभयज्ञापनायेति । गुणदोषाभावरूपगुणद्वयज्ञापनाय । अन्यथा षोडशाब्दमित्येव वदेदित्यर्थः । तयोः प्रयोजनमाहुः अग्निमेत्यादि । कामजरादिदोषव्याप्त्यभावाय गुणसूचनं सम्पन्नस्य ज्ञानभक्त्यादिरूपगुणस्य स्थापनाय दोषाभावसूचनमित्यर्थः । अस्मिन् पक्षे तमितिपदस्य विशेषार्थाभावात् पक्षान्तरमाहुः भगवदित्यादि । त्व इति । अग्रिमा वर्षाः । ताभ्यां सिद्धमाहुः अत इत्यादि । तथा चामेध्यत्वक्स्पर्शाभावाच्छिष्टकाले भगवत्स्मरणं द्व्यष्टवर्षपदेन सूच्यते द्वितीयस्तमितिपदेन । प्रक्रान्तविषयत्वस्वतप्रसिद्धार्थविषयत्वेपि बाधकाभावादिति । तथा च तद्गुणद्वयसूचनायेदं पदद्वयमत्रेत्यर्थः । गूढचिह्नमिति । पुंव्यञ्जनम् ॥ २६ ॥

स विष्णुरात इत्यत्र । आगमने नियतकालरहित इति । 'अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते' इति तथेत्यर्थः । परिगृहीताना-
१-१९-२९ मिति । शुकेन परिगृहीतानाम् ।

अहो इत्यत्र । पूर्ववदिति । 'अहो वय'मित्यत्र यथा परश्लाघार्थे स्वश्लाघा तथेत्यर्थः । उपदेष्टृत्वमिति । जनकादेरिवेत्यर्थः । तद्गतं पापमित्यादि । देहगतं
१-१९-३० पापं जलसंयोगद्वारा जले गच्छतीत्यर्थः ॥ ३२ ॥

पुरुषस्येत्यत्र । अधिकारिद्वैरूप्यं स्वतन्त्रम्रियमाणभेदेन कर्मणां श्रोतव्यादीनां तत्तदभावभेदेनेति मूलवाक्य एव स्फुटति । विपरीतेत्यादि ।
१-१९-३१ स्वतन्त्रकर्तृसम्बन्धिकर्मपञ्चके म्रियमाणसम्बन्धाभावो अन्यस्यान्यसम्बन्धितदभाव इत्यर्थः । विशकलिततयेति । कर्तृभेदेन द्विधाकर्मभेदेन दशधेत्यर्थः । यद्वा । विपर्ययमित्यस्यार्थमाहुः अथवेत्यादि । उभयकरणमिति । नित्यद्वयकरणं नित्यनैमित्तिककरणं च । ननु नियमविध्यङ्गीकारे नोभयकरणप्रसक्तिरिति किमर्थं विपरीतकथनप्रश्न इत्यत आहुः आवश्यकेत्यादि ॥ ३७ ॥

एवं श्रीवल्लभाचार्यनवचन्द्रमरीचिभिः । निरस्ते हृदयध्वान्ते विवृताद्यसुबोधिनी ॥ १ ॥
समर्पिता तत्पदयोरेषा पुष्पाञ्जलिर्गिराम् । तेनतुष्यन्तु दयया दासेस्मिन् सहसूनवः ॥ २ ॥
यदत्र सदसद्वापि जीवबुद्ध्या मयोदितम् । आशयाज्ञानतस्तन्मे क्षन्तव्यं दीनवत्सला ॥ ३ ॥

बद्धाञ्जलि मूर्ध्नि बुधेषु नत्वा मुहुस्तदीयेषु निवेदयामि ।
अस्मदस्मिन् भवति कचित्तत्कृपापरैर्वीक्ष्य निवारणीयम् ॥ ४ ॥

इति श्रीमदाचार्यचरणकमलैकतानश्रीपीताम्बरतनुजपुरुषोत्तमप्रकाशितप्रथमस्कन्धसुबोधिनीप्रकाशो ऊनविंशाध्यायविवरणम् ।

मुद्रितपुस्तकानि ।

सेवाफलम् । द्वादशविवरणसमेतम् ।	रु. १-०-०
निरोधलक्षणम् । षड्विवरणसमेतम् । गुर्जरानुवादसमेतं च ।	रु. १-०-०
संन्यासनिर्णयः । अष्टविवरणसमेतः । गुर्जरानुवादसमेतश्च ।	रु. १-०-०
{ जलभेदः । चतुर्विवरणसमेतः । पञ्चपद्यानि । विवरणद्वयसमेतानि । सेवाफलम् । विवरणत्रयम् । }	रु. १-०-०
भक्तिवर्धिनी । चतुर्दशटीकासमेता ।	रु. २-०-०
सिद्धान्तमुक्तावली । अष्टविवृतिसमेता । गुर्जरानुवादसमेता च ।	रु. १ ०-०
सिद्धान्तरहस्यम् । एकादशविवरणसमेतम् । गुर्जरानुवादसमेतं च ।	रु. १-०-०
पुष्टिप्रवाहमर्यादा चतुर्विवरणसमेता ।	रु. १-०-०
नवरत्नम्-पञ्चविवृतिसमेतम् । गुर्जरभाषानुवादसमेतं च ।	रु. १-०-०
श्रीसुबोधिनी । दशम-पूर्वार्ध-तामस-फलप्रकरणम् ।	रु. ३-०-०
श्रीसुबोधिनी । दशम-उत्तरार्ध-राजस-साधनप्रकरणम् ।	रु. २-०-०
२ श्रीसुबोधिनी दशमोत्तरार्धराजसफलप्रकरणम् ।	रु. २-०-०
३ श्रीसुबोधिनी-दशमोत्तरार्धसात्त्विकप्रमेयप्रकरणम्	रु. २-०-०
४ श्रीमती टिप्पणी । श्रीमद्विठ्ठलेश्वरप्रणीता ।	रु. २-०-०
५ रासपञ्चाध्यायीप्रकाशः । श्रीपीताम्बरप्रणीतः ।	रु. १-०-०
६ दशमतामसफलयोजना । श्रीलालूभट्टकृता ।	रु. ०-८-०
७ वेदान्ताधिकरणमाला । श्रीमत्पुरुषोत्तमप्रणीता ।	रु. १-०-०
८-२१ भाष्यप्रकाशिका । ब्रह्मसूत्रवृत्तिः । श्रीकृष्णचन्द्रकृता । अध्यायाः १-२-३-४	रु. २-४-०
२२ तैत्तिरीयोपनिषद्भाष्यम् । श्रीजयगोपालभट्टकृतम् । गुर्जरानुवादयुतम् ।	रु. १-०-०
२३ भागवतार्थनिबन्धः । प्रकाशावरणभङ्गसमेतः । आद्यस्कन्धद्वयम् ।	रु. १-०-०
२४ शृङ्गाररसमण्डनम् । श्रीविठ्ठलेश्वरप्रकटितम् । गुर्जरानुवादसमेतम् ।	रु. २-८-०
२५ श्रीमधुराष्टकम् । षड्विवरणसमेतम् ।	अमूल्यम् ।
२६ { प्रेमामृतम् । श्रीविठ्ठलेश्वरकृतविवृतिसमेतम् । पारायणाष्टकम् । श्रीगोपेश्वरकृतटीकासमेतम् । }	रु. ०-८-०
२७ रसाब्धिमहाकाव्यम् । श्रीदेवकीनन्दनकृतम् ।	रु. १-०-०
२८ मनोदूतम्-हृदयदूतं च । गुर्जरानुवादसमेतम् ।	रु. ०-८-०
२९ निबिधनामावली । टीकासमेता ।	रु. १-४-०
३० श्रीपुरुषोत्तमनामसहस्रम् । नामचन्द्रिकायुतम् ।	रु. ०-१०-०
३१ पत्रावलम्बनम्	रु. ०-४-०
३२ श्रीमदणुभाष्य-प्रकाश-रश्मि- तृतीयाध्यायप्रथमपादः ।	रु. १-०-०
३३ श्रीमदणुभाष्य-प्रकाश-रश्मिः तृतीयाध्यायद्वितीयपादः ।	रु. १-०-०
३४ श्रुतिरहस्यम्-प्रकाशसमेतम्-गुर्जरानुवादयुतम् ।	रु. १-०-०
३५ श्रीमद्भागवतप्रथमस्कन्धश्रीसुबोधिनीप्रकाशः । श्रीपुरुषोत्तमप्रणीतः ।	रु. १-०-०
36 Discuss how far Sankaracharya truly represents the view of the author of the Brahma-Sutras	Rs 1-0-0

१. पंडित गट्टूलालजीनी पाठशाला, केथिड्रलस्ट्रीट भूलेश्वर, मुंबई.

Printed by Manilal Itcharam Desai at the "Gujarati News" Printing Press, Nos 20-24 Bake House Lane, Fort, Bombay.

Published by Mulchandra Tulsidas Telivala B. A., L. L. B., Vakil, High Court, Bhakkar Buildings, C. P. Tank Road, Girgaon, Bombay.

श्रीकृष्णाय नमः ।

श्रीमती टिप्पणी ।

(दशमस्कन्धप्रकरणद्वयविवृतिप्रकाशः ।)

श्रीमद्गोस्वामिश्रीमद्विट्ठलेश्वरदीक्षितप्रणीता ।

श्रीमत्प्रभुचरणनिजश्रीहस्ताक्षरलिखनेन संवादिता ।

सा च,
श्रीसुरतिस्थश्रीमद्गोस्वामिश्रीमघ्रळालात्मजश्रीव्रजरत्नलालचरणसंपूर्णसाहाय्येन
'राजनगरस्थ भगवद्धर्मपरायण श्रेष्ठिअचरतलाल हरिवल्लभदास मूल-
चन्दवाला'इत्यस्य द्रव्येण च 'भृगुपुरस्थ मूलचन्द्र तुलसीदास
तेलीवाला बी. ए., एल्एल्. बी., वकील हाइ कोर्ट,
सुरतिस्थ धैर्यलाल व्रजदास सांकलीया बी. ए.,
एल्एल्. बी., वकील हाइ कोर्ट' इत्येताभ्यां
संशोध्य-मुम्बापुर्यां 'निर्णयसागर'
मुद्रणालये मुद्रयित्वा
प्रकटीकृता ।

श्रीवल्लभाब्दाः ४४२. संवत् १९७७.

मूल्यं रूप्यकद्वयम् ।

मुद्रितपुस्तकानि ।

१	सेवाफलम् । द्वादशविवरणसमेतम् ।	रु. १-०-०
२	निरोधलक्षणम् । षड्विवरणसमेतम् । गुर्जरानुवादसमेतं च ।	रु. १-०-०
३	संन्यासनिर्णयः । अष्टविवरणसमेतः । गुर्जरानुवादसमेतश्च ।	रु. १-०-०
४	जलभेदः । चतुर्विवरणसमेतः । पञ्चपद्यानि । विवरणद्वयसमेतानि । सेवाफलम् । विवरणत्रयम् ।	रु. १-०-०
५	भक्तिवर्धिनी । चतुर्दशटीकासमेता ।	रु. २-०-०
६	सिद्धान्तमुक्तावली । अष्टविवृतिसमेता । गुर्जरानुवादसमेता च ।	रु. १-०-०
७	सिद्धान्तरहस्यम् । एकादशविवरणसमेतम् । गुर्जरानुवादसमेतं च ।	रु. १-०-०
८	पुष्टिप्रवाहमर्यादा चतुर्विवरणसमेता ।	रु. १-०-०
९	नवरत्नम्-पञ्चविवृतिसमेतम् । गुर्जरभाषानुवादसमेतं च ।	रु. १-०-०
१०	श्रीसुबोधिनी । दशम-पूर्वार्ध-तामस-फलप्रकरणम् ।	रु. ३-०-०
११	श्रीसुबोधिनी । दशम-उत्तरार्ध-राजस-साधनप्रकरणम् ।	रु. २-०-०
१२	श्रीसुबोधिनी दशमोत्तरार्धराजसफलप्रकरणम् ।	रु. २-०-०
१३	श्रीसुबोधिनी-दशमोत्तरार्धसात्त्विकप्रमेयप्रकरणम्	रु. २-०-०
१४	श्रीमती टिप्पणी । श्रीमद्विठ्ठलेश्वरप्रणीता ।	रु. २-०-०
१५	रासपञ्चाध्यायीप्रकाशः । श्रीपीताम्बरप्रणीतः ।	रु. १-०-०
१६	दशमतामसफलयोजना । श्रीलालूभट्टकृता ।	रु. ०-८-०
१७	वेदान्ताधिकरणमाला । श्रीमत्पुरुषोत्तमप्रणीता ।	रु. १-०-०
१८-२१	भावप्रकाशिका । ब्रह्मसूत्रवृत्तिः । श्रीकृष्णचन्द्रकृता । अध्यायाः १-२-३-४	रु. २-४-०
२२	तैत्तिरीयोपनिषद्भाष्यम् । श्रीजयगोपालभट्टकृतम् । गुर्जरानुवादयुतम् ।	रु. १-०-०
२३	भागवतार्थनिबन्धः । प्रकाशावरणभङ्गसमेतः । आद्यस्कन्धद्वयम् ।	रु. १-०-०
२४	शृङ्गाररसमण्डनम् । श्रीविठ्ठलेश्वरप्रकटितम् । गुर्जरानुवादसमेतम् ।	रु. २-८-०
२५	श्रीमधुराष्टकम् । षड्विवरणसमेतम् ।	अमूल्यम् ।
२६	प्रेमामृतम् । श्रीविठ्ठलेश्वरकृतविवृतिसमेतम् । पारवृढाष्टकम् । श्रीगोपेश्वरकृतटीकासमेतम् ।	रु. ०-८-०
२७	रसाब्धिमहाकाव्यम् । श्रीदेवकीनन्दनकृतम् ।	रु. १-०-०
२८	मनोदूतम्-हृदयदूतं च । गुर्जरानुवादसमेतम् ।	रु. ०-८-०
२९	निबिधनामावली । टीकासमेता ।	रु. १-४-०
३०	श्रीपुरुषोत्तमनामसहस्रम् । नामचन्द्रिकायुतम् ।	रु. ०-१०-०
३१	पत्रालम्बनम्	रु. ०-४-०
३२	श्रीमदणुभाष्य-प्रकाश-रश्मिः तृतीयाध्यायप्रथमपादः ।	रु. १-०-०
३३	श्रीमदणुभाष्य-प्रकाश-रश्मिः तृतीयाध्यायद्वितीयपादः ।	रु. १-०-०
३४	श्रुतिरहस्यम्-प्रकाशसमेतम्-गुर्जरानुवादयुतम् ।	रु. १-०-०
३५	श्रीमद्भागवतप्रथमस्कन्धश्रीसुबोधिनीप्रकाशः । श्रीपुरुषोत्तमप्रणीतः ।	रु. १-०-०
36	Discuss how far Śankaracharya truly represents the view of the author of the Brahma-Sutras	Rs 1-0-0

१. पंडित गट्टूलालजीनी पाठशाला, केथिड्रल स्ट्रीट भूलेश्वर, मुंबई.

Printed by Manilal Itcharam Desai at the "Gujarati News" Printing Press, Nos. 20-24 Bake House Lane, Fort, Bombay.

Published by Mulchandra Tulsidas Telivala B. A., L. L. B., Vakil, High Court, Khakkar Buildings, C. P. Tank Road, Girgaon, Bombay.

श्रीकृष्णाय नमः ।

श्रीमती टिप्पणी .

(दशमस्कन्धप्रकरणद्वयविवृतिप्रकाशः ।)

श्रीमद्गोस्वामिश्रीमद्विट्ठलेश्वरदीक्षितप्रणीता ।

श्रीमत्प्रभुचरणनिजश्रीहस्ताक्षरलिखनेन संवादिता ।

सा च,

श्रीसुरतिस्थश्रीमद्गोस्वामिश्रीमन्मट्टलालात्मजश्रीव्रजरत्नलालचरणसंपूर्णसाहाय्येन
'राजनगरस्थ भगवद्धर्मपरायण श्रेष्ठिअचरतलाल हरिवल्लभदास मूल-
चन्दवाला'इत्यस्य द्रव्येण च 'भृगुपुरस्थ मूलचन्द्र तुलसीदास
तेलीवाला बी. ए., एल्एल्. बी., वकील हाइ कोर्ट,
सुरतिस्थ धैर्यलाल व्रजदास सांकलीया बी. ए.,
एल्एल्. बी., वकील हाइ कोर्ट' इत्येताभ्यां
संशोध्य-मुम्बापुर्यां 'निर्णयसागर'
मुद्रणालये मुद्रयित्वा
प्रकटीकृता ।

श्रीवल्लभाब्दा ४४२. संवत् १९७७.

मूल्यं रूप्यकद्वयम् ।

श्रीमद्गोस्वामिश्रीव्रजरत्नलालचरणाः ।



श्रीवल्लभाचार्य्यवचोविचारप्रचारचर्य्योपचयैकचित्तः ।
गुणैर्गरिष्ठोऽधिगतप्रतिष्ठो धर्मात्तनिष्ठो व्रजरत्नलालः ॥ १ ॥

[illegible] ।

मूल श्रीहस्ताक्षरपुस्तकनो शोध.

ઉપર જણાવેલા સર્વ ગોસ્વામિબાલકો તથા વૈષ્ણવ વિદ્વાનોનો ઉપકાર અમે અન્તઃકરણથી માનીએ છીએ. નવ પુસ્તકના આધારે શ્રીટિપ્પણીજીનું શોધન કરી અમે મુદ્રણકાર્યમાં ફલપ્રકરણના પ્રથમાધ્યાયના અન્તભાગપર્યન્ત આવ્યા. 'क्रिया सर्वापि सैवात्र' એ શ્રીસુબોધિનીકારિકાનું વ્યાખ્યાન કાંઇક વિલક્ષણ લાગ્યું. આથી શ્રીપુરુષોત્તમજીકૃત તત્પ્રકાશ જોયો. આ પ્રકાશ પણ શ્રીપુરુષોત્તમજીનો નિજશ્રીહસ્તાક્ષરે લખેલો અમારે ત્યાં બિરાજે છે. તે જોતાં નીચેની પંક્તિ વાચવામાં આવીઃ—'अत्र कारिकाव्याख्यानं टिप्पणीपुस्तकेषु दृश्यते, तत् पाण्डुलिखने नास्तीति श्रीगोकुलनाथानां तत् प्रतिभाति, लेखरीत्यापि तथेति च।' અહિં કારિકાવ્યાખ્યાનનું દર્શન ટિપ્પણીપુસ્તકોમાં થાય છે, તે પાંડુલિખનમાં નથી, તેથી શ્રીગોકુલનાથજીનું તે હોય એમ લાગે છે, લેખરીતિથી પણ તેમજ ભાસે છે. એ કારિકાવ્યાખ્યાન શ્રીગોકુલનાથજીનું છે એમ શ્રીપુરુષોત્તમજી કહે છે તે વાતને એજ કારિકાવ્યાખ્યાનનું સ્વતંત્ર પુસ્તક જે અમારી પાસે વિદ્યમાન છે તે પુષ્ટિ આપે છે. તે પુસ્તકમાં આ પ્રકારે લખેલું છે—'श्रीश्रीवल्लभो जयति। दशमना अध्याय २६ ने समाप्ते श्रीआचार्यजीनी कारिका ५ ॥ છે, તે મધ્યે પહેલી कारिका જે 'क्रिया सर्वापि सैवात्र परं कामो न विद्यते। तासां कामस्य संपूर्तिर्निष्कामेनेति तास्तथा ॥ १ ॥ श्रीजीकृत एहू लिखत'. આના પછી મુદ્રિત શ્રીટિપ્પણીજીમાં વિદ્યમાન સંસ્કૃત વ્યાખ્યાન અક્ષરશઃ આદ્યન્ત લખેલું છે. શ્રીગોકુલેશના અન્તરંગ સેવકો એઓશ્રીને પુરુષોત્તમભાવથી શ્રીજીસંજ્ઞાથી વ્યવહારે છે. આથી શ્રીપુરુષોત્તમજીનું કથન કે આ વ્યાખ્યાન શ્રીગોકુલનાથજીનું છે તે સુદૃઢ થાય છે. આ તો અપ્રસ્તુત પ્રસંગ થયો, પરન્તુ આ શ્રીપુરુષોત્તમજીની પંક્તિથી અન્ય વાર્તા સ્ફુરી. આ લેખથી એમ જણાયું કે શ્રીપુરુષોત્તમજી પાસે આ પાંડુલિખન શ્રીટિપ્પણીજીનું હોવું જોઇએ, અને શ્રીપુરુષોત્તમજી સુરતમાં થયલા હોવાથી ઉક્ત પુસ્તક સુરતના શ્રીબાલકૃષ્ણજીના મંદિરમાં હોવું જોઇએ. આ અનુમાનોથી દોરાઇને અમે એક વિનતિપત્ર આ સંબધમાં શ્રીવ્રજરત્નજીને લખ્યું. મહારાજશ્રીએ નિજમંદિરમાં વિદ્યમાન સંગ્રહમાં તપાસ કરી, પરન્તુ એ પાંડુલિખનનું પુસ્તક તેમાં મલ્યું નહિ. તેથી આપશ્રીએ અમને જણાવ્યું કે ઉક્ત શ્રીટિપ્પણીજીનું પુસ્તક અમારે ત્યાં સુરતના મંદિરમાં નથી. આ પ્રત્યુત્તરથી અમારા અન્તરાત્માને સંતોષ થયો નહિ, તેથી સ્વતઃ સુરત જઈ આનો નિશ્ચય કરવાનું સ્ફુર્યું. આથી દીવાળીની રજામાં ગત આશ્વિન શુક્લ ત્રયોદશીને દિવસે અમે સુરત ગયા. તે જ દિવસે મહારાજશ્રીવ્રજરત્નજીને વિનતિ કરી કે આપશ્રી અમને આપશ્રીને ત્યાં સેવામાં બિરાજતા હસ્તલિખિત પુસ્તકોનું દર્શન કરાવવા કૃપા કરો. મહારાજશ્રીએ કૃપા કરી અમારી વિનતિ લક્ષમાં લઈ બીજે જ દિવસે—આશ્વિન શુક્લ પૂર્ણિમા—રાસોત્સવને દિવસે—પ્રાતઃકાલે ગ્વાલ અને રાજભોગના અનવસરમાં ઉક્ત પુસ્તકોનું દર્શન કરાવ્યું. હસ્તલિખિત પુસ્તકોનું દર્શન કરતાં અમને બહુ જ આનન્દ તથા સંતોષ થયો. અમને માલુમ પડ્યું કે શ્રીમદ્વિઠ્ઠલેશ્વર પ્રભુચરણના નિજ શ્રીહસ્તાક્ષરે લખેલા શ્રીટિપ્પણીજીના મૂલ પુસ્તકજી ત્યાં બિરાજે છે. અને આજ પુસ્તકનો ઉપન્યાસ શ્રીપુરુષોત્તમજી પાંડુલિખન તરીકે કરે છે. આ ઉપરથી મહારાજશ્રીને વિનતિ પુનઃ કરી કે મુદ્રિત શ્રીટિપ્પણીજીના પુસ્તકને આ મૂલ સાથે સરખાવવા દેવાની કૃપા કરો. આપશ્રીએ અમારી આ વિનતિ પણ સ્વીકારી. દીપોત્સવના અન્નકૂટાદિ ઉત્સવ પ્રસંગોમાં આ કાર્ય શાન્તિથી નહિ થાય એમ હોવાથી આપશ્રીએ અમને આ કાર્ય નાતાલની રજામાં કરી લેવાની અનુજ્ઞા આપી. તા. ૨૧ મી ડીસેમ્બરને મગલવારે અમે સુરત પાછા ગયા. તે જ દિવસે સાયંકાલે મહારાજશ્રીના દર્શનાર્થ ગયા. ઉક્ત કાર્ય કઇ રીતે કરવું તેનો આપશ્રીએ સુનિપુણતાથી અને સરલતાથી પ્રબંધ કર્યો. બુધવારે પ્રાતઃકાલે મૂલ શ્રીહસ્તાક્ષરના શ્રીટિપ્પ-

ણીજી સાથે સરખાવવાનું કાર્ય આરભ્યું. આ કાર્ય કરતા અમારા આનન્દનો પાર ન રહ્યો બુધ, ગુરુ, શુક્ર, શનિ અને રવિ એમ પાચ દિવસ પ્રાત કાલે ૯ થી ૧૨ અને બપોરના ૨ થી ૬ આ કાર્ય મહારાજશ્રીની કૃપાથી અમે નિર્વિઘ્ન શાન્તિથી તથા અત્યન્ત ઉલ્લાસથી કર્યું; અને જન્મપ્રકરણથી આરભીને છેક ભ્રમરગીતના શ્રીટિપ્પણીજી પર્યન્તનો સમગ્ર ગ્રન્થ મૂલ શ્રીહસ્તાક્ષરના પુસ્તક સાથે સવાદી લીધો. ૧૨૮ પૃષ્ઠ તો શ્રીટિપ્પણીજીના મુદ્રિત હતા, તેથી તેટલા પૃષ્ઠ મૂલ સાથે શોધીને શોધપત્ર પણ તૈયાર કર્યું, અને અવશિષ્ટ ભાગ તો મૂલને જ અનુસરીને મુદ્રિત કર્યો છે. આથી આ મુદ્રિત શ્રીટિપ્પણીજીનું પુસ્તક અત્યન્ત પ્રામાણિક હોવાનો સભવ છે ૧૨૮ મુદ્રિત પૃષ્ઠોમાં અશુદ્ધ પાઠ માત્ર એક બે સ્થલે જ દૃષ્ટિગોચર થયા હવે જો કોઈ દોષ મુદ્રિત પુસ્તકમા હોય તો તે નેત્રદોષ અથવા મુદ્રણયત્રદોષ વિના અન્ય હોવાનો સભવ નથી શ્રીટિપ્પણીજીના પ્રત્યેક વાચકને અમારી વિનતિ છે કે વાચવાનો આરભ કરતા પહેલાં અન્તે મુદ્રિત શોધપત્રના આધારે મુદ્રિત પુસ્તકના ૧૨૮ પૃષ્ઠ શોધી લેવા

ઉક્ત મૂલ શ્રીહસ્તાક્ષરના શ્રીટિપ્પણીજીના દર્શનાદિ કરતાં કેટલાક વિચારો જે અમને સ્ફુરેલા તે પણ અત્ર વૈષ્ણવોને નિવેદન કરવાનું આવશ્યક લાગે છે. ઉક્ત મૂલ શ્રીહસ્તાક્ષરની પ્રતિ એવી રીતે લખેલી હતી, અને તેમાં એટલા બધા તો શોધપત્રો ભિન્ન પ્રમાણના પત્રો ઉપર અને સાહિથી લખેલા હતા કે હાલ શ્રીટિપ્પણીજીના પુસ્તકોમાં જે સ્વરૂપનુ દર્શન થાય છે તે તે મૂલ શ્રીહસ્તાક્ષરની પ્રતિ ઉપરથી શોધિત અને કવચિત્ વર્ધિત રૂપનું લાગે છે અન્તે મુદ્રિત શોધપત્રના મૂલ શ્રીહસ્તાક્ષરપુસ્તકસ્થ પાઠો અત્ર મુદ્રિત પાઠો સાથે સરખાવતા આ કથનને પુષ્ટિ મળે છે આ જ શોધિત વર્ધિત આવૃત્તિના મૂલ આધારરૂપ આ પાડુલિખન છે, અને તેજ પુસ્તકનો ઉપન્યાસ શ્રીમત્પુરુષોત્તમજી નિજવિરચિત રાસપચાધ્યાયીપ્રકાશમા કરેછે

મૂલ શ્રીહસ્તાક્ષરની પ્રતિ પ્રથમથી જ ગ્રન્થરૂપે કલ્પાઇ હોય એમ લાગતુ નથી શ્રીમત્પ્રભુચરણે સેવાનવસરમા શ્રીસુબોધિનીજી ઉપર કવચિત્ કવચિત્ ટિપ્પણ યોજેલુ, પરન્તુ પુન પુન વિચાર કરવાથી આપશ્રીને અધિક અધિક લખવાની સ્ફૂર્તિ થઈ, અને તેથી પ્રથમ જે શ્રીટિપ્પણરૂપે હતુ તે અન્તે ઇતિશ્રીમા વિવૃતિપ્રકાશરૂપ થયુ. તથાપિ મૂલ પ્રસિદ્ધિ જે શ્રીટિપ્પણીજીથી થઈ હતી તે જ સપ્રદાયમા ચિરસ્થાયી થઈ જેમ બાલકનુ અન્ય ગૌરવયુક્ત નામ હોવા છતા સ્નેહીઓ બાબુ, બચુ નામથી સ્નેહથી વ્યવહારે છે તેમ શ્રીસુબોધિનીજીના વાચકોએ આ ગ્રન્થને તેના વિવૃત્તિપ્રકાશ એ બૃહત્ નામથી ન વ્યવહાર્યું, પરન્તુ શ્રીટિપ્પણીજી એવા મૂલાશયસૂચક નામથી પૂર્ણ ભાવથી વ્યવહાર્યું મૂલ આ ગ્રન્થ માત્ર પ્રકીર્ણ ટિપ્પણરૂપ હતો તે વાત પણ આ મૂલ પુસ્તકમા પાછળથી ઉપરનીચે ટિપ્પણરૂપે લખેલા મગલાચરણના શ્લોકોથી તથા અન્તમા ઇતિશ્રીના અભાવથી પણ સૂચવાય છે

મૂલ શ્રીહસ્તાક્ષરની પ્રતિમા પ્રાય સર્વત્ર જ્યા ભગવત્ શબ્દનો પ્રયોગ આવતો ત્યાં ભગવત્ને સ્થાને ભવત્શબ્દ જોવામા આવ્યો સાપ્રદાયિક પરિભાષામા પ્રભુને 'આપ' એમ સામાન્ય વ્યવહાર છે શ્રીમત્પ્રભુચરણને પ્રભુસાનિધ્ય અને પ્રભુતન્મયતા એટલી બધી પ્રકટ છે અને પ્રભુના સયોગરસમા એટલા બધા [illegible] મગ્ન છે કે અનવધાનતાથી ભગવત્શબ્દને સ્થાને પ્રાય સર્વત્ર ભવત્શબ્દનો પ્રયોગ [illegible] થઈ ગયો છે શ્રીટિપ્પણીજીના શોધિત લિખનમાં લેખકે ભગવત્શબ્[illegible]

શ્રીમત્પ્રભુચરણના શ્રીહસ્તાક્ષરમાં કેટલીક વિલક્ષણતા પણ દૃષ્ટિગોચર થઈ. આપશ્રીને સામાન્યરીતે બહુ લખવાની ટેવ ન હોવી જોઇએ, અને એ જ કારણથી અક્ષર ઠરેલા નથી. અક્ષર સર્વ સમાન નથી, પણ નાના મોટા એક પંક્તિમાં પણ દૃષ્ટિગોચર થાય છે.

श्रीग्रन्थकृतः ।

શ્રીટિપ્પણીજીના પ્રણેતા શ્રીમદ્વલ્લભાચાર્યજી શ્રીમહાપ્રભુજીના દ્વિતીય કુમાર શ્રીમદ્વિઠ્ઠલેશ્વર છે. એઓશ્રી સમ્પ્રદાયમાં શ્રીગુસાંઇજી, શ્રીમત્પ્રભુચરણ ઇત્યાદિ નામથી પ્રસિદ્ધ છે. શ્રીમદ્વિઠ્ઠલેશ્વરનું પ્રાકટ્ય સંવત્ ૧૫૭૨ ના માર્ગશીર્ષ કૃષ્ણ નવમીને વાર શુક્રને દિવસે થયું હતું. જે સમયે શ્રીમદાચાર્યચરણ નિત્ય લીલામાં પધાર્યા તે સમયે આપશ્રીનું વય માત્ર પંદરેક વર્ષનું હતું, પરન્તુ શ્રીમદાચાર્યજીના અંતરંગ સેવકોમાં શ્રીમદ્દામોદરદાસ શ્રીપદ્મનાભદાસાદિ ભૂતલ ઉપર વિરાજતા હતા. તેઓને શ્રીમત્પ્રભુચરણ કવચિત્ સંશય થતાં પૂછતા એમ કેટલીક સાંપ્રદાયિક ગાથાઓમાં પ્રસિદ્ધ છે. શ્રીમત્પ્રભુચરણે શ્રીમદાચાર્યજીની પછી સંપ્રદાયનો બહુ સારો પ્રસાર કર્યો. સાંપ્રદાયિક અનેક મર્યાદાઓ બાંધી જે હજુ સુધી અવિચ્છિન્ન સચવાઈ રહી છે. અનેક રાજાઓ પણ એઓશ્રીના સેવક થયા. એઓશ્રીનું નામ **'अनेकक्षितिपश्रेणिमूर्धासक्तपदाम्बुज'** એ જ આશયને સ્પષ્ટ કરે છે. સમ્રાટ્ અકબરના દરબારના રાજા ટોડરમલ, રાજા વીરવર (બીરબલ), રાય પુરુષોત્તમાદિ એઓશ્રીના કૃપાપાત્ર વૈષ્ણવ હતા. સ્વપિતૃચરણે પ્રકટ કરેલા બ્રહ્મવાદ અને ભક્તિમાર્ગનું સરસ મંડન આપશ્રીએ વિદ્વન્મંડન નામક સ્વતંત્ર ગ્રન્થમાં કર્યું છે. વ્યાસસૂત્રના અન્તિમ સાર્ધ અધ્યાયનું ભાષ્ય પણ આપશ્રીએ નિજપિતૃચરણના અન્તિમ દૃષ્ટિબિન્દુથી યોજ્યું છે. ભગવલ્લીલાનું ગાનકીર્તન કરવાને અને નિજ ગીતસંગીતસાગરત્વને શ્રીમદ્રસેશ પ્રભુમાં વિનિયોગદ્વારા સમર્પણ કરીને સફલ કરવાને આપશ્રીએ શૃંગારરસમંડનાદિનું પ્રાકટ્ય કર્યું છે. અને શ્રીગોવિન્દના વિહારરૂપ શ્રીસુબોધિનીજીનું ઉત્તમોત્તમ દૃષ્ટિથી દિગ્દર્શન કરાવવાને આપશ્રીએ આ શ્રીટિપ્પણીજી યોજ્યાં છે. આપશ્રીનું વિશેષ ચરિત્ર સાંપ્રદાયિક ગાથાઓમાં પ્રસિદ્ધ છે. આપશ્રી સંવત્ ૧૬૪૨ ના પૌષ કૃષ્ણ સપ્તમીને દિવસે નિત્ય ભગવલ્લીલામાં પધાર્યા. આપશ્રીનું સેવ્ય સ્વરૂપ શ્રીનવનીતપ્રિયજી હાલમાં શ્રીનાથદ્વારમાં વિરાજે છે. આપશ્રીની વિજ્ઞપ્તિઓ ખાસ કરીને ભગવદ્વિરહક્લેશાનંદનું શુદ્ધ પ્રતિબિંબ છે.

ग्रन्थपरिचयः ।

શ્રીટિપ્પણીજીનું મંગલાચરણ વાચતાં એક બે વસ્તુ આપણું ધ્યાન ખેંચે છે. **'श्रीविठ्ठलैः क्रियते'** અને **'चिरविचारहृद्गततदीयतात्पर्यम्'** શબ્દોથી આપશ્રીની પ્રૌઢ અવસ્થામાં આ ગ્રન્થ યોજાયલો છે એમ દિસે છે. તેમજ **'स्वे यदरणं शश्वन्मामकं हृदयाम्बुजम्'** એ શબ્દોથી આપશ્રીના સૌભાગ્યમદનું અને પ્રભ્વેકચિત્તતાનું દર્શન થાય છે. આચાર્યશ્રી શ્રીસુબોધિનીજીમાં જે નિગૂઢ આજ્ઞાઓ કરી ગયા છે તે આજ્ઞાઓના તદ્ધૃદયગત અન્તિમ તાત્પર્યના દૃષ્ટિબિન્દુથી શ્રીમત્પ્રભુચરણે શ્રીટિપ્પણીજી યોજ્યા છે. આચાર્યશ્રીના નિતાન્ત ગોપ્ય હૃદયતાત્પર્યના કાંઇક અવગાહનની અપૂર્વ અને અનુપમ કૂંચી શ્રીટિપ્પણીજી છે. આપશ્રીની માફક ભગવચ્ચરણારવિન્દના કુંકુમરાગથી અનારક્ત હૃદયને જે સમયે શ્રીમત્પ્રભુચરણ 'ખદ્યોત, ગાવઃ' ઇત્યાદિ શબ્દોનું તાત્પર્ય શ્રીસ્વામિનીજીઓમાં ઘટાવે તે સમયે કાંઇક અતિશયતાનો ભાસ થાય, તો પણ જ્યાં આપશ્રીનું દૃષ્ટિબિન્દુ લક્ષમાં આવે કે તરત જ આ ભાસતી અતિશયતા પણ પરમ હૃદયગમ લાગે છે. કોઈ કોઈ સ્થલે આચાર્યશ્રીની સાંકેતિક વાણીમાં સ્થિત પરમ નિગૂઢ અવ્યક્ત માધુર્ય આપશ્રી અત્યન્ત ઔચિત્યાનુસાર પરમ ઓજસ્યુક્ત અલ્પ શબ્દોમાં દર્શાવી

દે છે જેમ બ્રહ્મસૂત્રોનું અન્ય ટીકાકારકૃત વર્મપર વ્યાખ્યાન અસમત નહિ હોવા છતા પણ
આપશ્રી તો સર્વસૂત્રોનું તાત્પર્ય ધર્મિમા જ યોજે છે, કારણકે આચાર્યશ્રીને તે જ અભીષ્ટ છે,
અને વ્યાસને પણ તે જ હોતુ જોઇએ, તેમ શ્રીસુબોધિનીજીમા પણ ધર્મપર વ્યાખ્યાન
નહિ કરતા, ધર્મિપર સર્વત્ર યોજે છે આચાર્યશ્રી રાસલીલૈકતાત્પર્ય છે, અને તે રાસસ્ત્રી
ભાવપ્રતિતનિગ્રહ છે, તેથી આપશ્રી શ્રીટિપ્પણીજીદ્વારા શ્રીસુબોધિનીજીનુ તાત્પર્ય એવી રીતે
ઘટાવે છે કે જ્યા એઓશ્રીનુ તાત્પર્ય દૃષ્ટિગોચર થાય કે તત્ક્ષણ જ રાસસ્ત્રીનો પરમ નિગૂઢ
ભાવ એ જ પરમ પ્રાપ્ય વસ્તુ છે એમ સ્ફુરે, અને તત્સ્ફૂર્તિ થતા રસેશ પ્રભુના રાસોત્સવની
પરમફલતાનો આસ્વાદ પ્રાપ્ત કરવાના પ્રચુર હૃદયગમ મનોરથો તદ્ભાવથી આરક્ત હૃદયમા
સ્ફુરે, અને ક્વચિત્ કરુણામય પ્રભુના કૃપાતિશયથી હીનાધિકારીને પણ પરમફલની સિદ્ધિ
થઈ જાય વસ્તુત શ્રીસુબોધિનીજીનુ યથાસ્થિત તાત્પર્ય શ્રીટિપ્પણીના દર્શન વિના સ્ફુરવુ
દુર્લભ છે, અને તેથી જે શ્રીસુબોધિનીજીના દર્શનાદિ કરનારાઓ શ્રીટિપ્પણીજીરૂપ ઉપનેત્ર
ધારણ કરીને તદ્દર્શનાદિ કરશે તો અમને તો સશય નથી કે તેમનુ હૃદયકમલ પણ ભગવ-
ચ્ચરણારવિન્દના પરાગરાગથી સદૈવ અરુણ થયા વિના રહે.

मुद्रणसंबन्धी ।

વાચકોને શ્રીટિપ્પણીજીના સ્વરૂપનુ યથાસ્થિત પરમ સુન્દર દર્શન થાય તેને માટે યાવ
ચ્છક્ય પરિશ્રમ અમે લીધો છે. શ્રીટિપ્પણીજી સ્વરૂપથી જ શ્રીસુબોધિનીજીના પ્રકીર્ણ શ્લોકોના
વ્યાખ્યાનરૂપ છે. તેથી અમે બાજુમા પ્રત્યેક ટિપ્પણના અધ્યાય તથા શ્લોકની સખ્યાનો નિર્દેશ
કર્યો છે, અને પ્રત્યેક ભિન્ન વ્યાખ્યાનને માટે નૂતન વિભાગ કર્યો છે શ્રીસુબોધિનીજીના પ્રતીકો
મોટા ટાઇપમા છાપ્યા છે શ્રીમદ્ભાગવતના શ્લોક જેના ઉપર ટિપ્પણ છે તે તથા અધ્યાયારભો
પણ મોટા ટાઇપમા છાપ્યા છે પ્રકરણના તથા અધ્યાયના આરભ અન્ત નિર્દેશ્યા છે મુદ્રણ-
સમયમા જેટલા સ્વતત્ર લેખ પ્રાપ્ત થયા તેટલા સર્વ શ્રીટિપ્પણીજીમા તે તે સ્થલે બ્રેકેટ
( ) કરી છાપ્યા છે પ્રાચીન પુસ્તકોમા ક્વચિત્ વિદ્યમાન ટિપ્પણ પણ ઉપયોગી જણાયુ ત્યા
ટિપ્પણરૂપે છાપ્યુ છે. પાઠપાઠાન્તરો યોજવામા યાવચ્છક્ય પ્રભુદત્ત વિવેક કર્યો છે. અર્થાત્
શ્રીટિપ્પણીજીનુ સર્વાંગસુદર સ્વરૂપદર્શન થઈ શકે તેને માટે યાવચ્છક્ય અમે પ્રભુકૃપાથી કર્યુ છે

स्वतंत्र लेखो ।

શ્રીટિપ્પણીજીના અન્તે શ્રીગુસાઇજી, શ્રીગોકુલનાથજી, શ્રીહરિરાયજી વગેરે મહાનુભાવોના
યાવત્પ્રાપ્ય શ્રીભાગવતના શ્લોકોના સ્વતન વ્યાખ્યાનો તથા શ્રીસુબોધિનીજીના પ્રકીર્ણ ટિપ્પણો
પરિશિષ્ટમા છાપવાનો અમારો મનોરથ હતો પરન્તુ આ સમય એ મનોરથ અમારો સફલ
નથી થતો તેથી અમને કાઇક ખેદ થાય છે પરિશિષ્ટમા છાપવાને માટે જેમ જેમ અમે
સ્વતન લેખો તથા ટિપ્પણોનો શોધ કરતા ગયા તેમ તેમ તે સગ્રહ વૃદ્ધિ પામતો ગયો, અને
હાલ અમારી પાસે તે સગ્રહ એટલો તો મહાન્ થઇ ગયો છે કે જો તેનુ અમે મુદ્રણ કરવા
જઇએ તો એક બીજી શ્રીમતી ટિપ્પણીજી જ થઈ જાય કદાચિત્ તેથી પણ પરિશિષ્ટ મોટુ
થઈ જવાનો ગભ[illegible] લાગ્યો આ કાર્ય પૂર્ણ કરતા પ્રેસની હાડમારીમા કદાચિત્ બે વર્ષ શ્રીટિ
પ્પણીજીની પ્રસિદ્ધિમા વિરોધ થવાનો [illegible]લાગ્યો તેમ જ તે કાર્યને સાગોપાગ પૂર્ણ
કરવાને દ્રવ્યાદિસામગ્રીની પણ વિશેષ [illegible] લાગી આથી એ સર્વ સગૃહીત સ્વતન
લેખો સ્વતનગ્રન્થરૂપે યથાવ[illegible]
આ નિર્બંધથી શ્રીટિપ્પણીજી[illegible] અનિચ્છાથી કરવો પડ્યો છે

પાત્ર થશે. સ્વતંત્ર લેખોનો આવો સુન્દર મહાન્ સંગ્રહ પ્રભુકૃપાથી અમને પ્રાપ્ત થયો તેથી અમને પણ આ વિલંબમાં પ્રભુની ઇચ્છા કારણભૂત લાગે છે. કદાચિત્ અન્ય લેખોનો પણ સમાવેશ હજુ પણ આ સંગ્રહમાં થવાનો હશે. પરન્તુ સપૂર્ણ સાધનસામગ્રી પ્રાપ્ત થયે તેનું પણ મુદ્રણ અમને અતીવ ઉપયોગી જણાય છે. પ્રભુ તે કાર્ય કરવાનું પણ અપેક્ષિત સામર્થ્ય અમને દાન કરો એટલું જ તત્પ્રતિ પ્રાર્થ્ય છે.

चित्र ।

શ્રીટિપ્પણીજીના આરંભમાં શ્રીમત્પ્રભુચરણનું લક્ષ્મીઆર્ટસમાં તૈયાર કરાવેલું રંગિત ચિત્ર ધર્યું છે, તે રા. હરખલાલ હરિદાસ ભગતે આપ્યું છે. તેથી તેમનો પણ ઉપકાર માનીએ છીએ.

श्रीव्रजरत्नजीनुं उपकारसंस्मरण ।

શ્રીટિપ્પણીના મુદ્રણદ્વારા પ્રકાશ કરવામાં શ્રીમદ્વ્રજરત્નજીનો આદિથી અન્તપર્યન્ત પરમ ઉપકાર થયો છે. શ્રીટિપ્પણીજીના મુદ્રણાર્થ અપેક્ષિત દ્રવ્ય સંપાદન કરવામાં, શોધન માટે નિજ મંદિરના સંગ્રહમાંથી અપેક્ષિત પુસ્તકો આપવામા, શ્રીકંકરપત્રીના શ્રીદ્વારકાધીશજી-ના મંદિરના પુસ્તકસંગ્રહના દ્વાર પરમ પરિશ્રમ લઇને અમને ઉઘડાવી આપવામાં, અને નિજમંદિરમાં શ્રીબાલકૃષ્ણજીની નિકટ સેવામાં વિરાજતા શ્રીમત્પ્રભુચરણ શ્રીમદ્વિઠ્ઠલેશ્વરના નિજ-શ્રીહસ્તાક્ષરથી લિખિત મૂલ શ્રીટિપ્પણીજીના પુસ્તક સાથે મુદ્રિત શ્રીટિપ્પણીજીના પુસ્તકને વિના પ્રતિબંધે અને વિના સંકોચે પરમ ઉદારતાથી અને સરલતાથી સરખાવવા અને શોધવા દેવામાં, ઉક્ત મહારાજશ્રીની સાંપ્રદાયિક ઉજ્જવલ ઉન્નતિ કરવાની પરમ અભિરુચિ સ્પષ્ટ થાય છે. આ પ્રકારે અપૂર્વ અને અનુપમ ઔદાર્ય દર્શાવીને મહારાજશ્રીએ નિખિલ સંપ્રદાયને આપશ્રીનો પરમ ઋણી બનાવ્યો છે. મહારાજશ્રીનો અમારા ઉપર જે પરમ અનુગ્રહ થયો છે તેનું કથન અસ્મત્પ્રોક્ત પ્રાકૃત શબ્દોથી થઈ શકે એમ નથી. મહાનુભાવો નિજ અનુભવથી યથાર્થ સમજી શકે છે. તેમને અસ્મત્કથનની અપેક્ષા નથી. શ્રીમદ્બાલકૃષ્ણપ્રભુ મહારાજશ્રીના સકલ સાંપ્રદાયિક ઉન્નતિપ્રસારના મનોરથો સફલ કરો એટલું પ્રાર્થી વિરમીશું.

ग्रन्थनिवेदन ।

શ્રીસુબોધિનીજીના વરેણ્ય આશયો સ્ફુરાવવામાં આ પુસ્તક કોઈ પણ મહાનુભાવ ભગવ-દીયને સહાયક થશે જ એ વિચારથી અમારા પરિશ્રમની કૃતકૃત્યતા માનીએ છીએ. અન્તમાં આ પરમ પ્રેમથી અને અભિરુચિથી સિદ્ધ થયલો ગ્રન્થ શ્રીમત્પ્રભુચરણકમલમાં સમર્પણ કરીએ છીએ.

વસન્ત પંચમી,
૧૯૭૭. મુબઈ.

મૂલચન્દ તુલસીદાસ તેલીવાલા,
ધીરજલાલ વ્રજદાસ સાંકલીયા.

श्रीगोपीजनवल्लभाय नमः ।



श्रीमत्प्रभुचरणश्रीविट्ठलनाथजी

प्रकाशक—शा. हरखलाल हरिदास भगत

Lakshmi Art, Bombay, No 8

पनाय तद्रूपं
ते वाक्यात्
मोः शेषभावं
नः क्षीराब्धौ
ऽत्यन्तागाधो
क्ष्मीसहस्रैस्तु-
शांशकलानि-
त्रैका लक्ष्मी-
भाधिकरणक-
। प्रकटो यो
कूजनादिः ।
न नायिका-
। पुरि शयनं
। तथा सति
स्थायिभावा-

त्मक स्थास्नुं विपत्ती भावानुत्पाद्य सद्धवतादृशं कंचन मधुरं भावमुत्पादितवान् येन तल्लीलाविवरणात्मकमखिलरसात्मकं जगदाविरभूदिति । तेन[3] मूले शयनपदोक्त्या नारायणे

१. निधित्वेन इति पाठः । २. सेव्यमानमिति । ३. तेनेति नास्ति क्वचित् ।

तत्प्रसिद्धमिति तद्धर्मसाम्यमाचार्यैर्निरूपितम् । मूलेऽनुशयनशब्दस्य भावार्थकत्वपक्षे त्वनुशय्यतेऽनेनेत्यनुशयनमिति करणव्युत्पत्त्या ताभिः सहात्मनो निगूढभावकरणं येन स निरोधः । स्वकीयेषु स्वविषयकभावोत्पादनं यया लीलया क्रियते सा निरोधशब्दवाच्येत्यर्थः । अथ प्रकरणार्थरूपं नमस्यन्ति **चतुर्भिरिति** । दशमस्कन्धे पञ्चप्रकरणानि सन्तीति पञ्चधा प्रकरणार्थरूपो मम हृदये यो विराजते तं नमामीति सम्बन्धः । पञ्चरूपत्वं प्रकटयन्ति । आद्यं चतुर्भिरध्यायैः । द्वितीयं प्रमाणप्रमेयसाधनफलात्मकैश्चतुर्भिः प्रकरणैः । तथैव तृतीयम् । चतुर्थं त्रिभिः प्रकरणैः । पञ्चमं षड्भिरध्यायैः । एवं पञ्चधा यो विराजत इति सम्बन्धः । **पूर्वोत्तरेति** । अशरीरस्य विष्णोः पुरुषशरीरस्वीकारः सर्गः, पुरुषात् ब्रह्मादीनामुत्पत्तिर्विसर्गः, उत्पन्नानां तत्तन्मर्यादया स्थापनं स्थानम्, स्थितानामभिवृद्धिः पोषणमिति प्रकारकः कार्यकारणभावः । प्रकृते च पूर्वस्कन्धे भक्तानां निरूपणात् तेषां चित्तवृत्तिनिरोधे कथ्यमाने स तिष्ठति, अन्यथा मुक्तानामाश्रयत्वेनाश्रयनिरूपणान्मुक्तिमनिरूप्य तन्निरूपणमशक्यमिति तदसंगतं स्यात्, निरोधः प्रलयत्वेन तेऽभिमत इति मुक्त्यनन्तरं तन्निरूपणे मुक्तानां प्रलय इति संगतिर्भवेत्, सा चायुक्ता, अनेवंकथने कार्यकारणभावक्षतिरित्यर्थः । **आद्यन्तयोरिति** । प्रकरणयोरिति शेषः । तत्र दुष्टमारणाभावाल्लक्षणस्याप्रवेश इत्यव्यापकं लक्षणमिति भावः । **मुक्तावपीति**। स्कन्धान्तरे तन्निरूपणादतिव्यापकं तदिति भावः । एवं सति तस्या लीलाया दशविधलीलामध्यपातित्वाभावेन भागवतेऽप्रवेशः । अथ ग्रहिलतया प्रवेशो वाच्यस्तदा दशविधलीलाभ्यो भिन्नत्वेन भागवतमध्यपातित्वेन चैकादशी सा भवेदित्याहुः **लीलाधिक्यमिति** । नवलक्षणज्ञानं ह्याश्रयज्ञाने कारणम् । तथा सति तयोस्तथात्वहानिश्चेत्याहुः **कार्येत्यादि** । 'दशमस्य विशुद्ध्यर्थं नवानामिह लक्षण'मित्युपक्रान्तत्वात्तेभ्यः पूर्वमाश्रयोक्तौ तत्त्यागश्च भवेदित्याहुः **प्रक्रान्तेति** । **ब्रह्मेति** । तेषां भक्तत्वेऽप्यधिकारित्वात् केवलभक्ताया भूमेराधिक्यं तदपेक्षयेति भावः । **अन्यसंश्रय** इति । भक्तेष्वेवाविश्य सेवितवन्तो, न स्वातन्त्र्येणेत्यर्थः । यद्वा प्रभोराविर्भावस्य स्वस्यापीष्टत्वेऽपि न स्वयं विज्ञापयितुं शक्तास्तादृगार्त्यभावात्, किन्तु तादृशीं भुवमग्रे कृत्वेत्यर्थः । **प्रद्युम्न** इति । अत्र निबन्धानुरोधादयं क्रमो न विवक्षित इति ज्ञेयम् । हेतोस्त्रैविध्ये तात्पर्यमाहुः **गुणा** इति । सत्त्वादय इत्यर्थः । **तद्गतम्** । भक्तगतमित्यर्थः । द्वादशभिः प्रश्ने हेतुमाहुः **गुणदोषग** इति । षड्गुणाः लोके दोषत्वेन प्रसिद्धा धर्माश्च षड् देशान्तरगता गर्भमातुलमारणादयः । उभयविषयकत्वात्तस्य तथात्वमित्यर्थः । गुणवाक्यसाम्यं दोषवाक्यानामयुक्तमित्याशङ्क्याहुः **समत** इति । यथा गुणा उत्तमास्तथा लोके दोषा अप्युत्कटा इत्युभयोः साम्येन राज्ञा प्रश्नः कृत इति तथेत्यर्थः । समत इति भावप्रधानः ।

१०-१-३. अग्रिमप्रयोजनार्थमिति । अनवतारसामयिकजीवोद्धारार्थमित्यर्थः ।

श्रवणानन्दत्वेनेति गानतात्पर्यम्। **अनिवार्या** इति। भगवद्विषयकत्वेन निवारयितुमयोग्याः कामादय इत्यर्थः। **तथापि श्रवणस्ये**ति। आद्या प्रवृ-
१०-१-४. त्तिर्विषयत्वेनैवेति तथा प्रवृत्तस्याखिलपुरुषार्थसाधकेऽर्थे प्रवृत्तिप्रयोजकं विषयान्तरसमानधर्मवत्त्वं जघन्यमेवेति तथोक्तम्। **अनिवर्त्यदोषेण** चेति। सहजासुरत्वेनेत्यर्थः। **वैराग्यजनकस्ये**ति। गुणानुवादे वैराग्यजनकस्येत्यर्थः। दैत्यानां मुक्तिस्वरूपमाहुः **अपुनरावृत्ती**ति।

पुण्यद्वारमात्रतामिति। अग्रे हि भगवान् साक्षादेव भक्तदुःखं निवारितवान्न तु केनचिद् द्वारेणेत्युच्यते। तेन तच्चरित्रेऽपि साक्षात्पुरुषार्थसाधकत्वं, न तु
१०-१-५. पुण्यद्वारेति ज्ञापितं भविष्यतीति तथेत्यर्थः। क्षेत्रं पाण्डोः, बीजिनो धर्मेन्द्रादयः। एकस्वामिकक्षेत्रजत्वेन पञ्चापि। एकक्षेत्रजत्वेन तु त्रय एव पितामहा भवन्ति। **स्वधर्मत्याजनसामर्थ्यमपी**ति। भगवदिङ्गितकरणं तद् देवव्रतं, तद्विरुद्धं तद् दैत्यव्रतम्। तथाच देवव्रते भीष्मे तिमिङ्गलत्वं दैत्यव्रतं कौरवैः संपादितमिति तेषां कौरवाणां तथासामर्थ्यं जातमित्यर्थः। इदमतिसामर्थ्यमिति भावः। सैन्यसागरपदतात्पर्यमाहुः **बहिःस्थितमपी**ति। सैन्यस्था हीतस्ततः स्वसेनाबहिःस्थितं मारयन्ति, न तु स्वसेनाम्। समुद्रस्यास्तु स्ववृन्दमध्यस्थमपि। इह च उभयरूपत्वमुक्तम्। तेनोक्तकैमुतिकन्यायसूचनाय सैन्यत्वं समुद्रत्वं चोक्तमित्यर्थः। पोतमपि गिलन्तीति साधनघातकत्वम्। **चेतने**ति। जलात्मकः समुद्रः स स्वयं न मारकोऽचेतनत्वात्, किन्तु तत्स्थाश्चेतनाः। इह समुद्रस्यैव चेतनत्वात् स्वस्वरूपेणैवान्यनाशकत्वं ज्ञाप्यत इत्यर्थः। प्लवत्वोक्तितात्पर्यमाहुः **भगवत** इत्यादिना। प्लवो हि समुद्रात् स्वल्पतरस्तत्स्वरूपानन्तःपाती च। स्वाश्रयणमात्रेण तारको, न तु मकरादिनिवारणे स्वक्रियावान्, एवं भगवानपि पाण्डवसैन्यमशेषं रक्षितुं नोद्यतः। तदा बृहद्रूपः स्यात्। किन्तु पाण्डवानेव रक्षितुम्। अतोऽल्परूपत्वमयुद्ध्यमानत्वात्तदनन्तःपातित्वम्। 'पितामहा मे'इति श्लोकविवरणे **तथापि सम्य**गित्यादि। उक्तसागरं वत्सपदमकुर्वन्नित्येतावतैव चारितार्थ्ये प्रभोः प्लवत्वनिरूपणं तत्तरणोक्तिश्च निरर्था। वत्सपदे मज्जनासंभवेन प्लवानपेक्षणादित एव तरणस्याप्यसंभवादुल्लङ्घनस्यैव तत्र संभवादित्याशङ्क्य तत्तात्पर्यमाहुः **तथापी**ति। वत्सपदे तासामेव मज्जनसम्भवात् प्लवतरणोक्त्या तेषां तथात्वं ज्ञाप्यत इत्यर्थः। तत्र हेतुः **सम्यगित्यादि**। तत्रापि हेतुः **स्वदृष्टये**ति। स्वसाम्येनेत्यर्थः। लौकिकदृष्टयेति वा। भगवत्त्वेन भगवति ज्ञाते वत्सपदे मज्जनसंभावना न स्यादित्याहुः **भगवद्भाव** इति। महास्त्रदर्शन उत्तरावच्चरणगमनमेव स्याद्, न शस्त्रग्रहणम्। तदा चक्रेण प्रभुणा चेन्न रक्षिताः स्युस्तदा स्वसामर्थ्यस्याप्रयोजकत्वाद् नाश एव स्यात्। इदमेव मज्जनरूपम्। स्वसामर्थ्येनास्माकं जय इत्यभिमानेन हि तदा शस्त्रग्रहणम्। एवं सति पूर्वमपि प्रभुणैव रक्षितत्वेन तदुपकाराज्ञानान्माहात्म्याज्ञानाच्च क्षुद्रत्वमेव तेषु पिपीलिकात्वम्।

द्रौण्यस्त्रेत्यस्य विवरणे **अर्जुनस्येत्यादि** । सर्वात्मना गर्भदाहे गोप्यस्याभावाद्
१०१६. गोपनासम्भव इति गोप्यमशमाहुः **अर्जुनस्येत्यादिना** । स्थूलांशे दग्धेऽप्युक्त-
वीजत्वांशात्मको धर्मस्तु वैष्णवांशत्वात् स्थित एवेति दग्धानप्यशान् स्वसा-
मर्थ्येन अदग्धान् भावितवानिति तैः सहभूत बीजभाव जुगोपेत्यर्थः । **योगविभागादिति** ।
'जनपदशब्दात् क्षत्रियादञि'ति सूत्रप्राप्तान्प्रत्ययस्य लोपस्तु 'जनपदे लुबि'ति सूत्रेण भवति,
इह कुरुशब्दस्य जनपदावाचित्वेऽञो लोपासम्भवादेव प्रयोगासम्भव इत्याशङ्क्य तत्सम्भव-
प्रकारमाहुः **योगविभागादिति** । जनपदशब्दे विभक्ते कृते, लुबित्येतावन्मात्र सूत्रमिति
जनपदावाचित्वेऽपि तत्प्रत्ययलोपात्तथा शब्दसिद्धिरित्यर्थः । **अन्यथा प्रतीतैरिति** ।
पूर्वं दग्धत्वेन प्रतीतानामदग्धत्वेन प्रतीतिरन्यथाप्रतीतिः । **धर्मरक्षार्थं** इति । वेद-
मन्त्रेणाधिष्ठापितब्रह्मरूपदेवताकं हि ब्रह्मास्त्रम् । तत्कार्यस्य भगवता प्रतिबन्धे भगवतो वेद-
मार्गरक्षकत्वलक्षणो धर्मो गच्छेदिति तथा । एतेनादाहेऽपि सामर्थ्यं प्रभौ सूचितम् । **मोक्ष**
इति । वेदमन्त्राधिष्ठिता देवता हि स्वकार्यं कृत्वा निवर्तते । तदकरणे तदनिवृत्त्या मोक्ष-
प्रतिबन्धः स्यान्मर्यादामार्ग इति तदभावार्थं तथेत्यर्थः । **तत्त्वसहितमिति** । 'तेजस्तत्त्व
सुदर्शन'मिति वाक्यादिति भावः । इह चक्रपद भगवति स्थितानां सर्वेषां तत्त्वानामुपलक्ष-
कम् । तानि तु द्वादशस्कन्धे, 'अथेममर्थं पृच्छाम' इत्युपक्रम्य, 'तान्त्रिकाः परिचर्यायां
केवलस्य श्रियः पते' । अङ्गोपाङ्गायुधाकल्प कल्पयन्ति यथा च यैरि'ति शौनकेन पृष्टः सूतो
'नमस्कृत्य गुरून् वक्ष्ये विभूतीर्वैष्णवीरपी'त्युपक्रम्य अङ्गादीनि पूजायां येन रूपेण ध्याय-
न्त्याचार्यास्तानि रूपाण्यवदत् । तथाच ध्यानार्थमेव तथा प्रदर्शनमिति साधूक्तं **उपकार**
इति । रक्षार्थं चक्रोक्तावग्रिमोक्त्या विरोधः स्यान्न तूक्तरीत्याहुः**अत एवेति** । काल-
निग्रहार्थं वेति । चक्र मारकत्वेन कालरूपम् । तद् धृत्वा तिष्ठतीति तन्न स्वकार्यकरणक्षम
भवतीति तथा । चक्रपदोपादानतात्पर्यान्तरमाहुः **अत एवेति** । दग्धस्यापि पूर्वभावसम्पा-
दनेन जीवितसम्पादनमनुभावः । तादृशो भगवान् पूर्णे गर्भे प्रयोजनाभावात्ततो निवृत्त इति
सोऽनुभावोऽपि निवृत्त', अन्यथा भगवता रक्षित इति कालादेरपि भयाभावादय देहो नित्य
एव स्यात् । तथाच चक्र भ्रमणशीलमिति व्यावृत्य मत्परितो भ्रमण कृतवदिति कालाधी-
नत्व सम्पन्नमितीदानीं न जीवनसम्पत्तिरित्यर्थः ।

वीर्याणीत्यत्र अनेनेत्यादि । वारद्वय वीर्यप्रश्नकथनेनेत्यर्थः । यदुवशे वशसवन्धि-
१०१७ कार्यकरणार्थं प्रद्युम्नांशेनावतीर्य वीर्याणि कृतवानिमम्मलक्रममागधादिवधरू-
पाणि प्रवयसामपि यौवन यदूनां द्वारकानयनवैदर्भीहरणादिरूपाणि चेति
'तत्रांशेनावतीर्णस्ये'त्यनेनावताररूप निरूपितम् । 'वीर्याणि तस्ये'त्यनेनोक्तरूपद्वयमुक्तफल-
दाने वाशीवत् करणभूत यस्य तन्मूलभूत रूप निरूपितम् । अखिलदेहभाजामितिपदादेत-

१ आविर्भावेति पाठ । २ पुरुषकालरूपात्मकम् ।

दवतारात् पूर्वमपि तेषामुक्तफलदानोक्तेस्तथात्वं ज्ञायते । एवं सत्यवतारकार्यस्य मूलरूपकार्यस्यापि करणादुभयरूपत्वमस्मिन्नवतारे ज्ञाप्यत इत्यर्थः । तेन वीर्यबहुत्वसम्भावनास्तीति तत्प्रश्न इति भावः । अत्रैतदवतारवीर्यं पृच्छँस्तत्कर्तुर्यन्मूलरूपत्वमुक्तवान् तेनास्यैवावतारस्य मूलरूपत्वोक्त्या माहात्म्यमेवोक्तवानित्याशयेन पक्षान्तरमाहुः इदमेवेत्यादिना । आत्मत्वेन मृत्युदानमनुपपन्नमित्याशङ्क्य समादधते **निमित्तवशा**दिति । देहभाक्त्वोक्तितात्पर्योक्तिरियम् । 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ'विति तत्त्वसूत्रात् । 'स नैव रेमे, तस्मादेकाकी न रमते स द्वितीयमैच्छ'दित्यादिश्रुतिभ्यश्च जीवानां देहसम्बन्धः स्वक्रीडार्थमेव भगवता कृत इति क्रीडैव निमित्तं, तद्वशात्तथेत्यर्थः । **भगवद्ध्यानरूपा**णीति । आन्तरत्वादिति भावः । **अतः कथमपी**ति । उतेति पदादन्तर्मुखेभ्यो रूपद्वयेनाप्यमृतदानम् । विषयपक्षे भजनोपयोगित्वेन तथात्वम् । ब्रह्मादिपक्षे भगवत्क्रीडोपयोगित्वेन विभूतिरूपत्वेन च ज्ञानात्तथात्वम् । बहिर्मुखेभ्यस्तथात्वं स्पष्टम् ।

क्व वासमित्यत्र । **अथवे**त्यादि । अधुनापि, 'वयं गोवृत्तयोऽनिशं, श्रूयतां मे पित'रित्यादिवचनानामश्रवणाद्वसुदेवपुत्रत्वेन यादवत्वेन ज्ञानादेवमपि कथनं
१०-१-९. सम्भाव्यते इत्याशयेनेदमुक्तम् ।

देहं मानुषमित्यत्र । **तत्रैवोक्त**मिति । तत्रैव वृष्णिमानुषदेह एवाश्रयणमत्रोक्तमित्यर्थः । तेषु सर्वेषु भूभारराजपृतनानिरसनसामर्थ्याय भगवानाविष्टस्तिष्ठ-
१०-१-११. तीति तथा । वृष्णिभिः सह संव्यवहारे क्रियमाणे वृष्णिदेहेष्वाश्रयणसंभवादपि तथा । एतज्ज्ञापनायैवाद्यश्वरण उक्तः । अन्यथा तं विनापि प्रश्नसम्पत्तेस्तं न वदेत् । एवं सति, 'वृष्णिभिः सह देहं मानुषमाश्रित्य कति वर्षाणि यदुपुर्यामवात्सी'दिति सम्बन्धो ज्ञेयः । अत एवाग्रे प्रभुर्वक्ष्यति, 'नैवान्यतः परिभवोऽस्य भवेत् कथञ्चि'दित्यत्र हेतुभूतं विशेषणं मत्संश्रयस्येति ।

उद्धारविषयनिर्द्धारमाहुः **ये भक्ता** इति । शास्त्रीयसाधनरहितानामित्यर्थः । ननु ससाधनानामपि कथं न विषयत्वमित्याशङ्क्य तत्र बाधकमाहुः येषामिति ।
१०-१-१७. किञ्च, एतेषां निरोधपदार्थोऽपि पूर्वस्माद्विलक्षणोऽतोपि न विषयत्वमित्याहुः **संसारे**ति । अत्र ससाधनेष्वित्यर्थः । निरूप्यते । त्वयेति शेषः । तथाच संसारस्याविद्याकार्यत्वेन तन्निवृत्तेश्च ज्ञानैकसाध्यत्वेन तद्रूप एव निरोधस्तेषां वाच्य इत्याह अत इति । तथाच यद्वेव वैलक्षण्यमिति भावः । किञ्च । भक्तानां संसारो लीलोपयोगित्वेन सुखरूपस्तेषां तु दुःखरूप इतीतोपि तद्वैलक्षण्यमित्याहुः दुःखेति । प्रासङ्गिकमुक्त्वा पूर्वोक्तमुपसंहरन्ति एवमिति । एकं निःसाधनानां भगवत्प्राप्तिलक्षणमित्यर्थः । ननु भगवत्कृतनिरोधो न शास्त्रैर्जनयितुं शक्य इति पूर्वोक्तशेषभावासम्भवात् ससाधनानामपि विषयत्वं वक्तुं युक्तम् । अत एव, 'तथा परमहंसानां मुनीनाममलात्मनाम् । भक्तियोगवितानार्थं कथं

पश्येमहि स्त्रियः'इतिपृथग्वचनमपि गीयत इत्याशयेन पक्षान्तरमाहुः **द्वयं चेति** । उभयोर्निरोधस्यैकरूपत्वेनोक्तवैलक्षण्याभावात्तथेत्यर्थः । एवम्प्रकारेण लीलाकरणे कथने च हेतुमाहुः **साङ्गस्येति** । निरोधस्येति शेषः । अत्रोपपत्तिमाहुः **तत** इति । यतश्चिकीर्षितनिरोधमवतीर्य स्वयं कृतवानतो हेतोरयं स्कन्धो दशमत्वेन युज्यत इत्यर्थः । अन्यथाऽनवतीर्यैवाम्बरीषादेरिवात्रापि भक्तदुःखनिवारणोक्तौ भक्तकथैवोक्ता भवतीति ईशानुकथैवेयमपि भवेदित्यस्य स्कन्धस्य दशमत्वं न स्यादिति भावः । अङ्गमाहुः **अवतार** इति । येन विना यन्न सम्भवति तत्तदङ्गमत्रोच्यते । तथाचानाविर्भावे निरोधपदार्थ एव न स्यादिति भावः । यद्वा, यतः संसारभवदुःखव्यावृत्तिरेव निरोधप्रयोजनमतो निरन्तरं भगवत्स्मरणात्मको निरोधो दैवासुरसाधारणो निरूप्यत इत्याहुः **संसारेति** । **स्मृतिश्च** क्वचित् स्नेहात् क्वचित् द्वेषादिनेति परं विशेषः । एकं पूर्वोक्तमित्यर्थः । अथवा यतो लीलानुपयोगिसंसारवतां संसृतिरपि दुःखरूपातोधिकारिभेदेन विरोधाभावाद् दुःखनिवृत्तिः संसारनिवृत्तिश्चेति द्वयमपि फलमित्युक्तमित्याहुः **दुःखरूपा च संसृतिः, द्वयं वा न विरुध्यत** इति । एवमनुक्तौ दुःखरूपेत्याद्यनर्थकं स्यात्, केषाञ्चिद्भक्तानां दुःखमेव निवारितम् । अहम्ममात्मकः संसारस्तु लीलोपयोगित्वेन स्थापित एव । केषाञ्चिद्भक्तानामन्येषां च संसारोऽपि नाशितः । तेन द्वयमपि फलमित्यर्थः । नन्वाधिदैविकप्रवर्तनं विना वाण्युद्गमासम्भवे भक्तदुःखहेतुवाणीं स कथं प्रवर्तितवानित्याशङ्क्य तत्तात्पर्यमाहुः **सर्वमुक्त्यर्थमिति** । हर्याविर्भावं विना सा न भवतीति स्वयं तं कर्तुमशक्तस्तद्धेतुहेतुं चक्र इत्यर्थः । तदनुगुणदेवतायास्तदुत्कर्षमसहमानाया इतिरूपेऽग्रिमग्रन्थे तत्पदाभ्यां कंस एवोक्त इति ज्ञेयम् । मुक्तिहेतुत्वेन तदनुगुणत्वम् । भगवन्मातृदास्य दैवपक्षे परमोत्कर्षः । अयं चासुर इत्यसहमानत्वम् । एवमविरोधः पूर्वापरयोः । कालो ह्यत्र प्रतिबन्धको जात इत्यत्रापि अत्रपदस्य दैवानुगुणत्वे कंसस्येत्यर्थो ज्ञेयः । तथा सति मातुर्दुःखासम्भवेन मातृत्वमेव न स्यादिति भावः । **अतस्तेऽप्यन्त** इति । भीष्मादय इत्यर्थः । **तद्धर्मा** इति । नृपधर्मा इत्यर्थः ।

वासुदेवकलानन्त इत्यस्य विवरणे । तदाविष्टस्तस्मिन् सङ्कर्षणे आविष्ट इत्यर्थः ।

१०-१-२४. अत्र पूर्वं शय्यारूपे सङ्कर्षणे शयानस्यावतारदशापन्ने तस्मिन्नावेशरूपा स्थितिरनुशयनं भवति । तथाचानुशयनस्यैव स्कन्धार्थत्वाद्बलदेवाविष्टवासुदेवकलाया एव लीलास्कन्धार्थः स्यादित्यत आह **अत** इति । यतः शयानस्यावेशोऽतो हेतोर्विष्णोः सात्त्विककल्पाविष्टात्तुरेव बलभद्रेण कृत्वानुशयनमुच्यते, नात्मनः पुरुषोत्तमस्य नेत्यर्थः । 'निरोधोऽस्यानुशयनमात्मन' इति मूलवाक्यादिति भावः । तेन नोक्तदूषणमिति भावः । तर्हि बलदेव एवं निरूपणे किं तात्पर्यं तदाह एकवदिति । पूर्वोक्तवासुदेवांशत्वादंशांशिनोश्च तादात्म्येनाभेदादेकवदेव प्रोच्यते । तेन तत्रापि तथा निरूपणमित्यर्थः । अतस्तच्चरित्रमपि मूलरूपचरित्रमेवेति भावः । नन्वेवं लोके न प्रतीयत इत्यत

आह कृष्ण इति । यथांशत्वेनैक्येपि स्वरूपे द्वैविध्यप्रतीतिस्तथा चरित्रेपीत्यर्थः । अत एव यथा चतुर्व्यूहरूपेण प्राकट्यं मथुरायां, पुरुषोत्तमस्य व्रजे तथात्रापीत्याह देवक्यामिति ।

शूरसेनो यदुपतिरित्यत्र । ननु मातृचरणानां दुःखप्रापणोपायमात्रं ह्यत्र वाच्यम् ।
तत्तु विवाहं कृत्वा गृहगमनसमये तथाकाशवाण्यभूदित्येतावतैवोक्तं भव-
१०-१-२७. तीति देशकालावस्थादिभिः सर्वोत्कर्षवर्णनं व्यर्थमित्याशङ्क्य तत्तात्पर्यमाहुः
सर्वोत्कर्षे त्वित्यनेन । भगवदाविर्भावस्थानमिति । यथा वसुदेवजन्मसमय आनका दुन्दुभयश्च नेदुरिति सर्वत उत्कर्षो लोके ज्ञातस्तथा स्त्रिया भर्तृगृह एव पुत्रजन्म भवति । तत्र विवाहो निमित्तमिति तं कृत्वा तद्गृहगमनसमये मातुः सर्वोत्कर्षे भगवता सम्पादिते सति यत् दुःखमुपस्थितं तत् स्वल्पके निमित्ते शीघ्रमनायासेन भगवता निरसितुं योग्ये सति भवतीति भगवन्मार्गे शास्त्रे निरूपितमित्यत्रापि न काचिच्चिन्तेति ज्ञापनाय तद्वर्णनमित्यर्थः । सुष्ठु अल्पकमतिसूक्ष्मं दुर्ज्ञेयमिति यावत् । तादृशे निमित्ते सतीत्यर्थः । भक्तदुःखं विना भगवदाविर्भावो न भवतीति तदर्थं तत्कथनमित्यपि तात्पर्यं ज्ञेयम् । देशतः कालत इत्यादि । सत्यैव सुखदा इत्युक्त एकस्य द्वयोर्वापि सुखदत्वं सम्भवतीति नायं नियम इत्याशङ्क्य निमित्तानां तावद्रूपत्वात्तथेति बोधयितुं तान्येवोक्तानि, देशत इत्यादिना । अथवा, सार्वविभक्तिकस्तसिलिति केचिदिति वाक्यादत्र प्रथमातस्तसिलिति ज्ञेयम् ।

तस्यां तु कर्हिचिदित्यस्य विवरणे । सर्वानित्याद्याचकर्षेत्यन्तम् । पूर्वसान्निध्ये
सति भक्तदुःखाभावे स्वावतारो न सम्भवतीति तदर्थं तत्सान्निध्यं दूरीकृत-
१०-१-२९. वान् । अग्रे च तत्प्रयोजनाभावात् स्वस्मिन्नेव लीनं कृतवानित्यर्थः ।

पथि प्रग्रहिणमित्यत्र । अनेनाधिभौतिकः काल इति । भगवत्प्रादुर्भाव-
हेतुर्भक्तिमार्गोऽयं विवाहश्चेत्युभयोः साम्यादेतत्सम्बन्धिमार्गे कालकृतप्रति-
१०-१-३४. बन्धकथनेन भक्तिमार्गेऽपि तथात्वं ज्ञाप्यत इत्याशयेनेदमुक्तम् । एवं सत्यस्मिन् मार्गे भगवत्प्रापकमार्ग इत्यर्थो ज्ञेयः ।

खड्गपाणिः कचेऽग्रहीदित्यत्र । कचेषु किञ्चिदित्यादि । ग्रहणक्रियाकर्म-
त्वेपि कचानां कर्तुर्ग्रहणक्रिययेप्सिततमत्वाभावात्तथात्वज्ञापनाय सप्तम्युक्ता,
१०-१-३५. न द्वितीयेत्यर्थः ।

---

१. यथा चतुर्व्यूहरूपेण सह प्राकट्यं पुरुषोत्तमस्य, तथा व्रजे बलभद्रेऽपि वासुदेवावेशेन सह प्राकट्यमित्यर्थः । २ व्यूहरूपेणेत्यर्थः ।

दृष्ट्वा समत्वमित्यत्र। अनेन पञ्चवार्षिक इत्यादि । अत्रायं भावः। अग्रे निगडनिग्रहानन्तरमेव, जातं जातमहन्निति वक्ष्यमाणत्वात् समर्पणानन्तर-
१०-१-५९. ममारणे तन्नोचितमिति मत्वा नारदेन तथा कथनादेतदनुपदमेव तत्कथन-मिति ज्ञायते। तथाच निग्रहे गर्भासंभव इति । अत एव, जातं जातमिति न कालभेद-ज्ञापकमित्यग्रे वक्ष्यते। भगवतस्त्वलौकिकी रीतिरिति नानुपपत्तिः।

इति प्रथमाध्यायः।

द्वितीयाध्यायार्थोक्तौ कृष्णोद्यम इत्यादि। भगवदुद्यमे हेतुमाहुः **महत्त्वेति**। हेतोरिति शेषः। अत एव तावन्तमपि विलम्बमसहिष्णुर्गर्भकर्षणमाज्ञप्तवान्।
१०-२-०. न ह्येवमन्यत्रेति भावः। अथवान्येभ्योऽवतारेभ्योऽत्र महत्त्वज्ञापनाय माया-ज्ञापनवसुदेवादिमनःप्रवेशलक्षणः स उच्यत इत्यर्थः। अथवा महत्त्वं पुरुषोत्तमत्वं तज्ज्ञा-पनाय सविशेषणः स उच्यत इति सम्बन्धः । असाधारणत्वेनेतरेभ्यो व्यावर्तको धर्मो हि विशेषणम्। तदत्र मायाज्ञापनमेकम्। न हि ब्रह्मादिव्यामोहिकां तामन्य आज्ञप्तुमर्हति, सान्याधीना वा भवति । वसुदेवदुरासदत्वादिकं, देवक्यां स्वहन्तृज्ञानेप्यासुरभावत्याजनं कंसस्य, ब्रह्मादिस्तुतिश्च।

हतेष्वित्यस्याभासे । **देवक्या बन्धनाचधीति**। अत्रेदमाकूतम्। सप्तमे गर्भे जाते नन्दाद्या ये व्रज इत्यादि नारदेनोक्तम् । तदा षट्पुत्रहतिर्मातृबन्धनं
१०-२-४. च जातम्। तदत्र, हतेष्वित्येकेनानूद्य स गर्भो देवक्या हर्षशोकविवर्धनो बभूवेत्यर्वेन शीघ्रं भगवदुद्यमे हेतुरुक्तः। पूर्वं शोकवर्धनो नासीत् । हतेषु तेषु अयमपि तथा भविष्यतीति ज्ञानेन तथा बभूव। तथाचेदं सर्वं बन्धनानन्तरं जातमिति तदेव पूर्वा-वधिर्यस्य तादृशं चरित्रमाहेत्यर्थः। अत एवाग्रे वक्ष्यन्ति 'षट्पुत्रवधात् पूर्वमेव सङ्कर्षणगर्भ' इति। असुरहननं सङ्कर्षणगर्भविषयकं दुःखं च भगवच्चरित्रमेव। तर्हि हर्षवर्धनत्वमनुपपन्न-मित्याशङ्क्य तत्रोपपत्तिमाहुः **स चार्धमित्यादिना**। पुरुषोत्तमस्यैव पूर्णानन्दत्वान्मातुर्मनसि तदागमने तत्रानन्दाविर्भाव एवाभूत्, परस्परं तादृशी नामून्निरोधवशादिति सरस्वती-दृष्टान्तेन वक्ष्यते। अस्यानन्दमयत्वेपि प्रभुसङ्गम एव पूर्णानन्दप्राकट्यकरणं भवतीति तथा।

गच्छ देवीत्यत्र । स्थावरान्नगरादिति । न गृणातीति नगरमतः स्थावर-
१०-२-६. तुल्यम्। अभिमानेन स्तब्ध एव तिष्ठतीति तथा।

आविवेशेत्याद्याभासः। अथाक्रोशानन्तरमित्यादि । ननु मूल एतदानन्तर्य-
१०-२-१५. वाचकपदाभावात् स्वयं तत्कथनमनुपपन्नमिति भातीति चेन्नैवम्। भावानव-बोधात्। तथाहि । इह हि शीघ्रं स्वागमनार्थमेव गर्भकर्षणाज्ञापनम्। तु, 'गां गता तत्तथाकरो'दित्येतावतैव निरूपितमभूत्। आक्रोशस्तु प्रकृतानुपयुक्तः।

एवं सत्यपि 'गर्भे प्रणीत' इति श्लोककथनं यत्तद्भगवद्वाक्यस्याथशब्दतात्पर्यकथनायेति ज्ञायते । अन्यथा, 'तत् सन्निकृष्य रोहिण्या उदरे सन्निवेशये'त्युक्ते प्रयोजनाकाङ्क्षायामहं देवक्याः पुत्रतां प्राप्स्यामीत्येतावतैव चारितार्थ्यादथशब्दं न वदेत् । एवं सति यस्मादानन्तर्यं प्रभुबुद्धिस्थं स पदार्थो 'गर्भे प्रणीत' इति श्लोकेन विवृतः श्रीशुकेन । आचार्यैरपि तमेवाथशब्दं प्रतीकत्वेनोक्त्वा, गर्भे इतिश्लोकोक्ततत्तात्पर्यमाक्रोशानन्तरमित्यादिनानूदितम् । अयमर्थो भगवतोऽत्यन्त गोपनीय इति तत्सम्पत्तिर्लोकानामन्यथाज्ञानोक्त्या तत एव तदज्ञानसूचनेन च ज्ञापितेति सर्वमनवद्यम् ।

पुरुषोत्तमस्तु नन्दगृह एवेत्यादि, भवतीत्यन्तम् । अत्रायं भावः । उक्तवाक्यानुरोधान्नन्दगेहे पुरुषोत्तमाविर्भावोऽवश्यमङ्गीकार्यः । एवं सति, 'सुतं यशोदाशयने निधाये'त्यग्रिमवाक्यं चानुपपन्नं भवति । तत्र स्वरूपद्वयदर्शनप्रसङ्गात् । आगतस्य तिरोधानं न वक्तुं शक्यम्, आगमनवैयर्थ्यापातात् । 'प्रागयं वसुदेवस्ये'तिवाक्यविरोधश्चेति उभयतःपाशारज्जुरितिचेत् । अत्र ब्रूमः । नन्दगेहे प्रादुर्भूतस्यैव पुरुषोत्तमस्य सर्वतःपाणिपादान्तत्वेन तदा कार्यमस्तीति वसुदेवगृहे प्रादुर्भाव इति ज्ञायते । स एव, 'बभूव प्राकृतः शिशु'रित्यनेन उक्तः । पूर्वरूपस्य तिरोधानेप्यग्रिमकार्यार्थं स्वस्मिन्नेव स्थापितवान् । यतो मुक्तिभूभारहरणवंशसम्बन्धित्वेनाविर्भावपित्रादिसुखदानवेदमार्गरक्षानारदशापविमोकद्विजसंमाननादिकार्याणि वासुदेवादिमूर्तिनियतकारणकानि उक्तकार्याण्यग्रे स्पष्टानि । एतदेवोक्तम् **एवं सति सर्वेषां चरित्राणामभिनिवेशो भवतीत्यनेन** । अत्र श्रुतार्थापत्तिरेव मानमिति नानुपपत्तिः काचित् । **रूपान्तरमिति** । रूपान्तरत्वेन भानमित्यर्थः। तच्च मानुषत्वम् । तथाच शुद्धे पुरुषोत्तम एव तथा मानसाग्रे वाच्यत्वान्मायानिरूपणेन तन्नियतकार्यविषयस्याप्युत्पत्तिर्निरूपिता भवतीत्यर्थः ।

दधार सर्वात्मकमित्यस्य विवृतौ । **धृद्धिराकाशस्येवेत्यारभ्य, भवतीत्य**न्तम् । यथा यथा भित्त्याद्यावरणापसारणं तथा तथाकाशप्राकट्यं यथा, तथा
१०-२-१७. यावद्यावन्मायारूपं येन प्रकारेणापसार्यते तावत्तावत्तेन प्रकारेण भगवत्स्वरूपं प्रकटं भवतीति क्रमेणैव गर्भलक्षणाविर्भावस्तेनेतरगर्भेभ्यो भगवद्गर्भसम्बन्धिन्यपि वृद्धिर्देवक्या अविलक्षणोपपन्ना भवति । एवमेव यावता अंशेनेतोपसारण तावतांशेन यशोदागर्भे मायाप्रादुर्भाव इति यशोदाया अप्यविकृता वृद्धिस्तथेत्यर्थः । अन्यथा त्वलौकिकत्वेन पूर्वं तल्लक्षणाभावे पश्चात् प्राकट्ये च उभयोर्यशोदादेवक्योर्वृद्धिर्विकृता भवेत् । तथा सति लीला न सम्पद्येतेति तथैव ज्ञेयमिति भावः । साकारव्यापकलक्षणः स्तोकाकारमात्रावरणापसारणेपसारितस्यापि तस्य तथाकारत्वं लोकन्यायेन सिद्धम् । अत्रावरणस्य व्यापकत्वेनाविशेषाद्यशोदागर्भदेशेपि तत्प्राकट्ये नानुपपन्नं किञ्चित् ।

---

१ विरहेण सर्वात्मभवनमित्यर्थः ।
२ टि०

सत्यव्रतमित्यस्य विवरणे । **अष्टविधं भवतीत्यादि** । अष्टविधत्वं चाग्रे स-
स्फुटीभविष्यति । यत् सत्यं तत् परमित्यादिवक्ष्यमाणश्रुत्यर्थनिरूपकमिति ज्ञे-
१०-२-२५. यम् । यद्वा सर्वोत्कृष्टमित्यत्र वाशब्द एवकारार्थो वाक्यालङ्कारे । श्रुताविव
स्तुतावप्येतयोरैक्यं प्रतिपादनीयमित्यतिदिशन्ति । **एवं सत्यस्त्वेत्यादिना** । लोके हि व्रत-
मुत्कृष्टमिति यदुक्तं तत्रोपपत्तिर्यस्त्वित्यादिना उच्यते । तथाच लोके व्रतं सत्यं चेति द्विविधं सत्यं निरूपितं भवति । मूले व्रतपदेनैतदुभयप्राप्तौ हेतुमाहुः । **उभयोः परत्वादिति** । सत्यव्रतमित्यनेन सत्यं परमिति श्रुतिपदस्यार्थ उक्तो भवतीति भावः । तेन लोके सत्यं व्रतं चेति द्वैविध्यम् । अग्रे परं सत्यमिति श्रुत्यर्थनिरूपकं सत्यपरमिति पदं व्याकुर्वन्ति । **अतः परमिति** । अत्रापि लोके लौकिकं नियामकं वैदिकं द्वादशविधं चेति द्वैविध्यम् । भगवतो व्रतं लोकानुसारेण देवहितकारिणो नियामकं चेति द्वैविध्यम् । त्रिसत्यमिति पदार्थे भूरादि-त्रयं कायादित्रयं चेति द्वैविध्यम् । एवमष्टविधत्वं सत्यस्य भगवतः कालरूपस्य । यदि सत्यरूपत्वं न स्यात्तदा लोके व्रतादिकं नियामकं च वैदिकं च द्वादशविधं भगवद्व्रतानि च लोकाश्चात्मादयश्च न स्युरित्युपपत्तिरूपत्वम् । व्रतं हि उपोषणादिरूपमहोरात्रादिसा-ध्यम् । सत्यमपि तप्ततैलादिष्वप्यदाहोऽत्युत्कटपापेऽल्पेनैव कालेनानिष्टमनुत्कटत्वेचिरेणे-त्यादि । अन्यत् स्पष्टम् । लौकिकमुक्तद्वादशविधं वैदिकं चेति द्विविधम् । भगवदीयं व्रतं नियामकं चेति च द्विविधम् । लोका भूर्भुवःस्वर्लक्षणाः । आत्मानः कायजीवपरमात्मानः । लोकाः फलरूपाः । इतरे त्वितराणि । इदं च द्विविधम् । एवमष्टविधत्वं सत्यस्योक्तभेदेन । पदद्वये विधेयभेदेन द्वैविध्यम् । त्रयं च द्विविधम् । एवं चतुर्विधत्वम् । **इतराविति** । प्रमाणफललक्षणावर्थावित्यर्थः । **आद्यन्तयोरिति** । सत्यात्मकमित्यन्तिमेन पदेन फलम् । एतस्मादाद्येन, ऋतसत्यनेत्रमित्यनेन प्रमाणमित्यर्थः । भगवत्स्वरूपज्ञानशक्त्योः फलत्वप्रमा-णत्वे प्रसिद्धे । अथवा सत्यस्य योनिमित्यनेन प्रमाणम् । सत्यस्य सत्यमित्यनेन फलम् । 'मानाधीना मेयसिद्धि'रिति कारणान्तःपाति मानमिति तथा । पूर्वमङ्गस्य ज्ञानेन विषयस्व-रूपमपि तदैव सिद्धं भूतमिति यतो मानम् । फलं विवृतावेव स्फुटं, **सत्य एवेत्यादिना** । प्रमाणादिचतूरूपं भगवति प्रतिष्ठितं चेति पञ्चविधम् । पूर्वोक्तमष्टविधमेतत्पञ्चविधं चेति त्रयोदशधा । अग्रे ज्ञानशक्तिद्वयं धर्मी चेति षोडशधा ।

बिभर्षीत्यस्य विवृतौ । **चरचराशब्देनेत्यादि** । 'यस्य ब्रह्म च क्षत्रं चोभे भवत
१०-२-२८. ओदन' इति श्रुत्यर्थनिर्णयं कुर्वन्, 'अत्ता चराचरग्रहणा'दिति सूत्रे विषय-
वाक्योक्तब्रह्मक्षत्रे चराचरशब्देन व्यासोवददिति तथेति ज्ञेयम् ।

त्वत्पादपोतेनेत्यत्र । **भगवद्भावकेत्यादि** । अक्षरपक्षेऽनुपपत्तिरियम् । भगवतः
१०-२-२९. पुरुषरूपेणानिर्भावे ह्यक्षरस्य चरणरूपत्वम् । तदा भगवतैव तरणसम्भवे ता-
वन्मात्रस्य तथात्वमयुक्तम् । एतदेवोक्तम्, **भगवतीत्यादिना** । न च तेन पुरुषरूपेणापि तत्सम्भव इत्याह । **समाधिकल्पितस्यैवेति** ।

येन्येरविन्दाक्षेत्यत्र । सम्यग्वायुसञ्चारो नाडीशुद्ध्या भवतीति तदर्थमपेयपानादिकं
१०-२-३१. यत्तदेव विकर्मेति ज्ञेयम् । एतदुक्तं **विकर्मसहित**मित्यनेन ।
शरीरिणां श्रेय इत्यत्र । **ते हि शरीराभिमानिन** इत्यादि । वैदिकं कर्म
यथोक्तमेव कृतमदृष्टजनकम् । ज्ञानमपि तत्राङ्गम् । 'य एवं वेदे'ति वाक्ये-
१०-२-३३. भ्यः । तथाच तदभावात्तथेति भावः । जडत्वादपि तथात्वं ज्ञेयम् ।
सत्त्वं न चेदित्यत्र । **उभयोः साक्षात्कार** इत्यादि । आत्मसाक्षात्कारस्य फल-
मध्यासनिवृत्तिः । द्वितीयस्याद्वैतस्फूर्तिः । वैदिकमार्गे हि प्रमेयं, 'स हैतावा-
१०-२-३४. ना'सेतिश्रुतेर्ब्रह्मात्मकम् । अतस्तत्त्वेन स्फूर्तिः फलमिति भावः । इत्पद-
व्यतिरिक्तमिति । न चेदित्यत्र यदित्यदं तद्व्यतिरिक्तमित्यर्थः । **अज्ञानभिद्विज्ञानं मार्जनमापेति न व्याख्यान**मिति । क्रियापदस्य समानलकारेणैवान्वयनियमान्मार्जनमाप्नुयादिति भवेत् । स्वोक्ताशङ्काया अनिवृत्तेश्च स्वव्याख्यातशास्त्रार्थाप्राप्तेश्चेति भावः ।

इति द्वितीयाध्यायः ।

तृतीयाध्याये प्रकरणार्थसंदर्भे । **अधिकारिणि काल** इति । दक्षिणायनकृ-
ष्णपक्षनिशीथादिदोषेषु सर्वकर्मणि निन्दितेषु सत्सु सर्वगुणोपेतत्वोक्तिर्मूलेऽ-
१०-३-०. नुपपन्नेत्याशङ्क्य तत्तात्पर्यमाहुः **अधिकारिणी**त्यादिना । तथा'प्यधिकं तत्रानुप्रविष्टं, न तु तद्धानि'रिति न्यायेनोक्तदोषानिवृत्तिस्तदवस्थैवेति चेत् । अत्र वदामः । नात्र पूर्वोक्ताधिभौतिककाले प्रादुर्भाव उच्यते, किन्त्वधुनैव लीलाविर्भावारम्भ इति लीलाकालो योऽग्रे भगवदात्मकत्वेन वाच्यः स प्रादुर्भूत इति । एवमेव देशादिरपि । अत एवाथशब्दो भिन्नप्रक्रमार्थक उक्तः । आधिभौतिकस्य तस्य जन्मनिमित्तत्वाभावाद् भौतिकस्याधिष्ठानत्वेऽपि यथा वरदेयरात्रीणां तदा दिवापि प्रकटनं कृतमिति तद्रात्रीणां दिवारूपत्वमपीति न वक्तुं शक्यम् । तथास्याधिभौतिकतद्रूपत्वं न वक्तुं शक्यम् । एतज्ज्ञापनायैव शुकैस्तथोक्तम् । अन्यथा प्रकटे त्वदुक्तदूषणे सत्येवं न वदेत् । यद्यप्याधिभौतिक उत्तरायणत्वादिविशिष्टेऽप्येतत्प्रकटनं सम्भवति, तथापि यदेतादृशे तस्मिंस्तथा करणं तन्मर्यादामार्गात् पुष्टिमार्गोऽतिविलक्षणो बलिष्ठश्चेति ज्ञापनायेति जानीमः । अत एव सर्वदेवतासान्निध्यप्रयुक्तसर्वगुणोपेतत्वव्यावृत्त्यर्थं तद्गमनानन्तरं भिन्नप्रक्रमेण इदमुक्तम् । असङ्कोचात् सर्वशब्देनैश्वर्यादय उच्यन्ते । तेन भगवदात्मकत्वमुक्तं भवति । तेन लीलाकालत्वमायाति ।
प्रादुर्भावस्थले नैश्चिन्त्यं वाचि पूर्ववदिति । वाचि उपनिषद्भाषायामित्यर्थः ।
'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह,' 'अदृश्यमग्राह्यं,' 'न तत्र सूर्यो
१०-३-८. भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः,' 'न चक्षुषा दृश्यते
नोत वाचे'त्यादिविरोधः प्राकट्यकथने आपतति । न च, 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत्,'

सत्यव्रतमित्यस्य विवरणे। **अष्टविधं भवतीत्यादि**। अष्टविधत्वं चाग्रे स्पष्टीभविष्यति। यत् सत्यं तत् परमित्यादिवक्ष्यमाणश्रुत्यर्थनिरूपकमिति ज्ञेयम्। यद्वा सर्वोत्कृष्टमित्यत्र वाशब्द एवकारार्थो वाक्यालङ्कारे। श्रुताविव
१०-२-२५.
स्तुतावप्येतयोरैक्यं प्रतिपादनीयमित्यतिदिशन्ति। **एवं सत्यत्वेत्यादिना**। लोके हि व्रतमुत्कृष्टमिति यदुक्तं तत्रोपपत्तिर्यस्त्वित्यादिना उच्यते। तथाच लोके व्रतं सत्यं चेति द्विविधं सत्यं निरूपितं भवति। मूले व्रतपदेनैतदुभयप्राप्तौ हेतुमाहुः। **उभयोः परत्वादिति**। सत्यव्रतमित्यनेन सत्यं परमिति श्रुतिपदस्यार्थ उक्तो भवतीति भावः। तेन लोके सत्यं व्रतं चेति द्वैविध्यम्। अग्रे परं सत्यमिति श्रुत्यर्थनिरूपकं सत्यपरमिति पदं व्याकुर्वन्ति। **अतः परमिति**। अत्रापि लोके लौकिकं नियामकं वैदिकं द्वादशविधं चेति द्वैविध्यम्। भगवतो व्रतं लोकानुसारेण देवहितकारिणो नियामकं चेति द्वैविध्यम्। त्रिसत्यमिति पदार्थे भूरादित्रयं कायादित्रयं चेति द्वैविध्यम्। एवमष्टविधत्वं सत्यस्य भगवतः कालरूपस्य। यदि सत्यरूपत्वं न स्यात्तदा लोके व्रतादिकं नियामकं च वैदिकं च द्वादशविधं भगवद्व्रतानि च लोकाश्चात्मादयश्च न स्युरित्युपपत्तिरूपत्वम्। व्रतं हि उपोषणादिरूपमहोरात्रादिसाध्यम्। सत्यमपि तप्ततैलादिष्वप्यदाहोऽत्युत्कटपापेऽल्पेनैव कालेनानिष्टमनुत्कटत्वे चिरेणेत्यादि। अन्यत् स्पष्टम्। लौकिकमुक्तद्वादशविधं वैदिकं चेति द्विविधम्। भगवदीयं व्रतं नियामकं चेति च द्विविधम्। लोका भूर्भुवःस्वर्लक्षणाः। आत्मानः कायजीवपरमात्मानः। लोकाः फलरूपाः। इतरे त्वितराणि। इदं च द्विविधम्। एवमष्टविधत्वं सत्यस्योक्तभेदेन। पदद्वये विधेयभेदेन द्वैविध्यम्। त्रयं च द्विविधम्। एवं चतुर्विधत्वम्। **इतराविति**। प्रमाणफललक्षणावर्थावित्यर्थः। **आद्यन्तयोरिति**। सत्यात्मकमित्यन्तिमेन पदेन फलम्। एतस्मादाद्येन, ऋतसत्यनेत्रमित्यनेन प्रमाणमित्यर्थः। भगवत्स्वरूपज्ञानशक्त्योः फलत्वप्रमाणत्वे प्रसिद्धे। अथवा सत्यस्य योनिमित्यनेन प्रमाणम्। सत्यस्य सत्यमित्यनेन फलम्। 'मानाधीना मेयसिद्धि'रिति कारणान्तःपाति मानमिति तथा। पूर्वमज्ञस्य ज्ञानेन विषयस्वरूपमपि तदैव सिद्धं भूतमिति यतो मानम्। फलं विवृतावेव स्फुटं, **सत्य एवेत्यादिना**। प्रमाणादिचतूरूपं भगवति प्रतिष्ठितं चेति पञ्चविधम्। पूर्वोक्तमष्टविधमेतत्पञ्चविधं चेति त्रयोदशधा। अग्रे ज्ञानशक्तिद्वयं धर्मी चेति षोडशधा।

विभर्षीत्यस्य विवृतौ। **चरचराशब्देनेत्यादि**। 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदन' इति श्रुत्यर्थनिर्णयं कुर्वन्, 'अत्ता चराचरग्रहणा'दिति सूत्रे विषयवाक्योक्तब्रह्मक्षत्रे चराचरशब्देन व्यासोवददिति तथेति ज्ञेयम्।
१०-२-२८.

त्वत्पादपोतेनेत्यत्र। **भगवद्भावकेत्यादि**। अक्षरपक्षेऽनुपपत्तिरियम्। भगवतः पुरुषरूपेणाविर्भावे ह्यक्षरस्य चरणरूपत्वम्। तदा भगवतैव तरणसम्भवे तावन्मात्रस्य तथात्वमयुक्तम्। एतदेवोक्तम्, **भगवतीत्यादिना**। न च तेन पुरुषरूपेणापि तत्सम्भव इत्याह। **समाधिकल्पितस्यैवेति**।
१०-२-२९.

येन्येरविन्दाक्षेत्यत्र । सम्यग्वायुसञ्चारो नाडीशुद्ध्या भवतीति तदर्थमपेयपानादिकं
यत्तदेव विकर्मेति ज्ञेयम् । एतदुक्तं **विकर्मसहितमि**त्यनेन ।
१०-२-३१. **शरीरिणां श्रेय** इत्यत्र । **ते हि शरीराभिमानिन** इत्यादि । वैदिकं कर्म
यथोक्तमेव कृतमदृष्टजनकम् । ज्ञानमपि तन्नाङ्गम् । 'य एवं वेदे'ति वाक्ये-
१०-२-३२. भ्यः । तथाच तदभावात्तथेति भावः । जडत्वादपि तथात्वं ज्ञेयम् ।
सत्त्वं न चेदित्यत्र । **उभयोः साक्षात्कार** इत्यादि । आत्मसाक्षात्कारस्य फल-
मध्यासनिवृत्तिः । द्वितीयस्याद्वैतस्फूर्तिः । वैदिकमार्गे हि प्रमेयं, 'स हैतावा-
१०-२-३४. ना'सेतिश्रुतेर्ब्रह्मात्मकम् । अतस्तत्त्वेन स्फूर्तिः फलमिति भावः । इत्पद्-
व्यतिरिक्तमिति । न चेदित्यत्र यदित्पदं तद्व्यतिरिक्तमित्यर्थः । **अज्ञानभिद्विज्ञानं
मार्जनमापेति न व्याख्यान**मिति । क्रियापदस्य समानलकारेणैवान्वयनियमान्मार्ज-
नमाप्नुयादिति भवेत् । स्वोक्ताशङ्काया अनिवृत्तेश्च स्वव्याख्यातशास्त्रार्थाप्राप्तेश्चेति भावः ।

इति द्वितीयाध्यायः ।

तृतीयाध्याये प्रकरणार्थसंदर्भे । **अधिकारिणि काल इति ।** दक्षिणायनकृ-
ष्णपक्षनिशीथादिदोषेषु सर्वकर्मणि निन्दितेषु सत्सु सर्वगुणोपेतत्वोक्तिर्मूलेऽ-
१०-३-०. नुपपन्नेत्याशङ्क्य तत्तात्पर्यमाहुः **अधिकारिणी**त्यादिना । तथा'प्यधिकं त-
त्रानुप्रविष्टं, न तु तद्धानि'रिति न्यायेनोक्तदोषानिवृत्तिस्तदवस्थैवेति चेत् । अत्र वदामः ।
नात्र पूर्वोक्ताधिभौतिककाले प्रादुर्भाव उच्यते, किन्त्वधुनैव लीलाविर्भावारम्भ इति लीला-
कालो योऽग्रे भगवदात्मकत्वेन वाच्यः स प्रादुर्भूत इति । एवमेव देशादिरपि । अत एवाथ-
शब्दो भिन्नप्रक्रमार्थक उक्तः । आधिभौतिकस्य तस्य जन्मनिमित्तत्वाभावाद् भौतिकस्याधि-
ष्ठानत्वेऽपि यथा वरदेयरात्रीणां तदा दिवापि प्रकटन कृतमिति तद्रात्रीणां दिवारूपत्वमपीति
न वक्तुं शक्यम् । तथास्याधिभौतिकतद्रूपत्व न वक्तु शक्यम् । एतज्ज्ञापनायैव शुकैस्तथो-
क्तम् । अन्यथा प्रकटे त्वदुक्तदूषणे सत्येव न वदेत् । यद्यप्याधिभौतिक उत्तरायणत्वादि-
विशिष्टेऽप्येतत्प्रकटनं सम्भवति, तथापि यदेतादृशे तस्मिंस्तथा करण तन्मर्यादामार्गात् पु-
ष्टिमार्गोऽतिविलक्षणो बलिष्ठश्चेति ज्ञापनायेति जानीमः । अत एव सर्वदेवतासान्निध्यप्रयुक्त-
सर्वगुणोपेतत्वव्यावृत्त्यर्थं तद्गमनानन्तरं भिन्नप्रक्रमेण इदमुक्तम् । असङ्कोचात् सर्वशब्देनै-
श्वर्यादय उच्यन्ते । तेन भगवदात्मकत्वमुक्त भवति । तेन लीलाकालत्वमायाति ।
प्रादुर्भावस्थले नैश्चिन्त्यं वाचि पूर्ववदिति । वाचि उपनिषद्रूपायामित्यर्थः ।
'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह,' 'अदृश्यमग्राह्यं,' 'न तत्र सूर्यो
१०-३-८. भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः,' 'न चक्षुषा दृश्यते
नोत वाचे'त्यादिविरोधः प्राकट्यकथने आपतति । स च, 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत्,'

सत्यव्रतमित्यस्य विवरणे। **अष्टविधं भवतीत्यादि**। अष्टविधत्वं चाग्रे स-
१०-२-२५. ष्टीभविष्यति। यत् सत्यं तत् परमित्यादिवक्ष्यमाणश्रुत्यर्थनिरूपकमिति ज्ञे-
यम्। यद्वा सर्वोत्कृष्टमित्यत्र वाशब्द एवकारार्थो वाक्यालङ्कारे। श्रुताविव स्तुतावप्येतयोरैक्यं प्रतिपादनीयमित्यतिदिशन्ति। **एवं सत्यत्वेत्यादिना**। लोके हि व्रतमुत्कृष्टमिति यदुक्तं तत्रोपपत्तिर्यस्त्वित्यादिना उच्यते। तथाच लोके व्रतं सत्यं चेति द्विविधं सत्यं निरूपितं भवति। मूले व्रतपदेनैतदुभयप्राप्तौ हेतुमाहुः। **उभयोः परत्वादिति**। सत्यव्रतमित्यनेन सत्यं परमिति श्रुतिपदस्यार्थ उक्तो भवतीति भावः। तेन लोके सत्यं व्रतं चेति द्वैविध्यम्। अग्रे परं सत्यमिति श्रुत्यर्थनिरूपकं सत्यपरमिति पदं व्याकुर्वन्ति। **अतः परमिति**। अत्रापि लोके लौकिकं नियामकं वैदिकं द्वादशविधं चेति द्वैविध्यम्। भगवतो व्रतं लोकानुसारेण देवहितकारिणो नियामकं चेति द्वैविध्यम्। त्रिसत्यमिति पदार्थे भूरादित्रयं कायादित्रयं चेति द्वैविध्यम्। एवमष्टविधत्वं सत्यस्य भगवतः कालरूपस्य। यदि सत्यरूपत्वं न स्यात्तदा लोके व्रतादिकं नियामकं च वैदिकं च द्वादशविधं भगवद्व्रतानि च लोकाश्चात्मादयश्च न स्युरित्युपपत्तिरूपत्वम्। व्रतं हि उपोषणादिरूपमहोरात्रादिसाध्यम्। सत्यमपि तप्ततैलादिष्वप्यदाहोऽत्युत्कटपापेऽल्पेनैव कालेनानिष्टमनुत्कटत्वेचिरेणेत्यादि। अन्यत् स्पष्टम्। लौकिकमुक्तद्वादशविधं वैदिकं चेति द्विविधम्। भगवदीयं व्रतं नियामकं चेति च द्विविधम्। लोका भूर्भुवःस्वर्लक्षणाः। आत्मानः कायजीवपरमात्मानः। लोकाः फलरूपाः। इतरे त्वितराणि। इदं च द्विविधम्। एवमष्टविधत्वं सत्यस्योक्तभेदेन। पदद्वये विधेयभेदेन द्वैविध्यम्। त्रयं च द्विविधम्। एवं चतुर्विधत्वम्। **इतराविति**। प्रमाणफललक्षणावर्थावित्यर्थः। **आद्यन्तयोरिति**। सत्यात्मकमित्यन्तिमेन पदेन फलम्। एतस्मादाद्येन, ऋतसत्यनेत्रमित्यनेन प्रमाणमित्यर्थः। भगवत्स्वरूपज्ञानशक्त्योः फलत्वप्रमाणत्वे प्रसिद्धे। अथवा सत्यस्य योनिमित्यनेन प्रमाणम्। सत्यस्य सत्यमित्यनेन फलम्। 'मानाधीना मेयसिद्धि'रिति कारणान्तःपाति मानमिति तथा। पूर्वमज्ञस्य ज्ञानेन विषयस्वरूपमपि तदैव सिद्धं भूतमिति यतो भानम्। फलं विवृतावेव स्फुटं, **सत्य एवेत्यादिना**। प्रमाणादिचतूरूपं भगवति प्रतिष्ठितं चेति पञ्चविधम्। पूर्वोक्तमष्टविधमेतत्पञ्चविधं चेति त्रयोदशधा। अग्रे ज्ञानशक्तिद्वयं धर्मी चेति षोडशधा।

विभर्षीत्यस्य विवृतौ। **चरचराशब्देनेत्यादि**। 'यस्य ब्रह्म च क्षत्रं चोभे भवत
१०-२-२८. ओदन' इति श्रुत्यर्थनिर्णयं कुर्वन्, 'अत्ता चराचरग्रहणा'दिति सूत्रे विषय-
वाक्योक्तब्रह्मक्षत्रे चराचरशब्देन व्यासोवददिति तथेति ज्ञेयम्।

त्वत्पादपोतेनेत्यत्र। **भगवद्वाचकेत्यादि**। अक्षरपक्षेऽनुपपत्तिरियम्। भगवतः
१०-२-२९. पुरुषरूपेणाविर्भावे ह्यक्षरस्य चरणरूपत्वम्। तदा भगवतैव तरणसम्भवे ता-
वन्मात्रस्य तथात्वमयुक्तम्। एतदेवोक्तम्, **भगवतीत्यादिना**। न च तेन रूपरूपेणापि तत्सम्भव इत्याह। **समाधिकल्पितस्यैवेति**।

येन्येऽरविन्दाक्षेत्यत्र । सम्यग्वायुसञ्चारो नाडीशुद्ध्या भवतीति तदर्थमपेयपानादिकं
यत्तदेव विकर्मेति ज्ञेयम् । एतदुक्तं **विकर्मसहितमित्यनेन** ।
१०-२-३१. **शरीरिणां श्रेय इत्यत्र** । **ते हि शरीराभिमानिन** इत्यादि । वैदिकं कर्म
यथोक्तमेव कृतमदृष्टजनकम् । ज्ञानमपि तत्राङ्गम् । 'य एवं वेदे'ति वाक्ये-
१०-२-३२. भ्यः । तथाच तदभावात्तथेति भावः । जडत्वादपि तथात्वं ज्ञेयम् ।
सत्त्वं न चेदित्यत्र । **उभयोः साक्षात्कार** इत्यादि । आत्मसाक्षात्कारस्य फल-
मध्यासनिवृत्तिः । द्वितीयस्याद्वैतस्फूर्तिः । वैदिकमार्गे हि प्रमेयं, 'स हैतावा-
१०-२-३४. ना'सेतिश्रुतेर्ब्रह्मात्मकम् । अतस्तत्त्वेन स्फूर्तिः फलमिति भावः । **इत्पद-**
व्यतिरिक्तमिति । न चेदित्यत्र यदित्पदं तद्व्यतिरिक्तमित्यर्थः । **अज्ञानभिद्विज्ञानं**
मार्जनमापेति न व्याख्यानमिति । क्रियापदस्य समानलकारेणैवान्वयनियमान्मार्ज-
नमाप्नुयादिति भवेत् । स्वोक्ताशङ्काया अनिवृत्तेश्च स्वव्याख्यातशास्त्रार्थाप्राप्तेश्चेति भावः ।

इति द्वितीयाध्यायः ।

तृतीयाध्याये प्रकरणार्थसंदर्भे । **अधिकारिणि काल** इति । दक्षिणायनकृ-
ष्णपक्षनिशीथादिदोषेषु सर्वकर्मणि निन्दितेषु सत्सु सर्वगुणोपेतत्वोक्तिर्मूलेऽ-
१०-३-०. नुपपन्नेत्याशङ्क्य तत्तात्पर्यमाहुः **अधिकारिणीत्यादिना** । तथा'प्यधिकं त-
त्रानुप्रविष्टं, न तु तद्धानि'रिति न्यायेनोक्तदोषानिवृत्तिस्तदवस्थैवेति चेत् । अत्र वदामः ।
नात्र पूर्वोक्ताधिभौतिककाले प्रादुर्भाव उच्यते, किन्त्वधुनैव लीलाविर्भावारम्भ इति लीला-
कालो योऽग्रे भगवदात्मकत्वेन वाच्यः स प्रादुर्भूत इति । एवमेव देशादिरपि । अत एवाथ-
शब्दो भिन्नप्रक्रमार्थक उक्तः । आधिभौतिकस्य तस्य जन्मनिमित्तत्वाभावाद् भौतिकस्याधि-
ष्ठानत्वेऽपि यथा वरदेयरात्रीणां तदा दिवापि प्रकटनं कृतमिति तद्रात्रीणां दिवारूपत्वमपीति
न वक्तुं शक्यम् । तथास्याधिभौतिकतद्रूपत्वं न वक्तुं शक्यम् । एतज्ज्ञापनायैव शुकैस्तथो-
क्तम् । अन्यथा प्रकटे त्वदुक्तदूषणे सत्येवं न वदेत् । यद्यप्याधिभौतिक उत्तरायणत्वादि-
विशिष्टेऽप्येतत्प्रकटनं सम्भवति, तथापि यदेतादृशे तस्मिंस्तथा करणं तन्मर्यादामार्गात् पु-
ष्टिमार्गोऽतिविलक्षणो बलिष्ठश्चेति ज्ञापनायेति जानीमः । अत एव सर्वदेवतासान्निध्यप्रयुक्त-
सर्वगुणोपेतत्वव्यावृत्त्यर्थं तद्गमनानन्तरं भिन्नप्रक्रमेण इदमुक्तम् । असङ्कोचात् सर्वशब्देनै-
श्वर्यादय उच्यन्ते । तेन भगवदात्मकत्वमुक्तं भवति । तेन लीलाकालत्वमायाति ।
प्रादुर्भावस्थले नैश्चिन्त्यं वाचि पूर्ववदिति । वाचि उपनिषद्भाषायामित्यर्थः ।
'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह,' 'अदृश्यमग्राह्यं,' 'न तत्र सूर्यो
१०-३-८. भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः,' 'न चक्षुषा दृश्यते
नोत वाचे'त्यादिविरोधः प्राकट्यकथने आपतति । स च, 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत्,'

क्रम्य, 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् । यं प्राप्य न निवर्तन्ते तद्धाम परमं ममे'ति प्रभुवाक्याच्छ्रीव्रजजनमनोरथपूर्तये, 'दर्शयामास लोकं स्वं गोपानां तमसः परम् । सत्यं ज्ञानमनन्तं यद्ब्रह्मज्योतिः सनातनम् । यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः' इत्यादिवाक्यैः सर्ववेदप्रतिपाद्यत्वेनाप्यक्षरं ब्रह्म पुरुषोत्तमस्य लक्षणम् । चेष्टारूपत्वेन, 'अथ सर्वगुणोपेतः कालः' इत्यादिना निरूपितो य आनन्दमयो लीलाकालः सोऽपि तथा । आदिपदाल्लीलाविशेषाश्च । तथाच सर्वात्मकत्वभगवत्त्वजगदादिलक्षणेषु ब्रह्म मुख्यं लक्षणम् । सर्ववेदप्रतिपाद्यत्वादाविर्भूतसच्चिदानन्दरूपत्वाज्ज्ञानिमुक्तिस्थानत्वात् पुरुषोत्तमगृहचरणात्मकत्वात् । अतः श्रीवत्सस्य लक्ष्मत्वमुक्तमन्यथेतरविशेषणवदिदमप्युक्तं स्यादिति भावः । अत्रोपपत्त्यन्तरमाहुः **अत एवे**ति । जातिवेदाक्षरब्रह्माणि तदानन्दश्च सर्वशब्देन उच्यते । तदाधारभूतो भृगोर्देहः । तद्गतस्तस्य गतिर्भगवत्पर्यवसायिन्येवेति तथेत्यर्थः । किञ्च भगवतस्त्वगिन्द्रियाद् भृगोरुत्पत्तिः । तच्चेतरेन्द्रियेभ्यो विशिष्टमन्तर्बहिर्व्यापित्वात्तथा ज्ञानजनकत्वाच्च स्पर्शसुखाभिव्यक्तिहेतुत्वाद्भगवतः स्पर्शसुखाभिव्यक्तिहेतुः । श्रीस्तत आविर्भूतेत्याशयेनाहुः **लक्ष्म्याश्चे**त्यादि ।

गलशोभीत्यत्र । सरस्वत्या ज्ञानशक्तिरूपत्वात्तथा कृतिः । अत्र विद्यादिपदानि त्यक्त्वा सरस्वतीपददानस्यायं भावः । सा हि वीणागानपरा, प्रभुश्च मुक्तोपसृप्य इति मुक्ताः सर्वे सङ्गीतविद्यया यथा प्रभुं सन्तोषयन्ति तदर्थमेव करणम् । एतेनैवंविधानां लीलाश्रमक्तानां न प्राकृतत्वं, किन्तु कण्ठभूषणरूपत्वमेवेति ज्ञाप्यते । स्थानं प्रभुगुणगानम् । मुक्तानामेव शुकादीनां तत्राधिकारादिति भावः ।

सान्द्रपयोदेत्यत्र । **पूर्वमि**ति । निबन्धे निरूपितमित्यर्थः । तत् स्मारयन्ति । **आकाशे**त्यादिना । चक्षू रूपवद् द्रव्यं गृह्णत्तदभावे निर्मेघ आकाशे दूरं गतं सन्नीलमिव पश्यति । तथा ब्रह्माप्यतिगाढगम्भीरतया नीलमिव पश्यतीत्येकः प्रकारः । तत्तद्गुणाधिष्ठातृदेवतानां तादृक्ताद्रूप्यत्वात् तत्प्रतिबिम्बेन नियतानेकरूपत्वमिति द्वितीयः । भूमेर्नीलरूपत्वेन तत्राविर्भावे तत्प्रतिफलनेन तथा भातीति तृतीयः । शुद्धस्य सत्त्वस्य नीलरूपत्वेन तत्प्रतिफलने वैकुण्ठाविर्भूतं ब्रह्म तथा भातीति तुरीयः । अथवा भूमिर्वैकुण्ठं श्वेतद्वीपम् । हन्तेदं ब्रह्मणो नीरूपत्वपर्यवसायित्वेन न दासविद्वज्जनमनोरमं भवतीतिचेन्नैवम् । अत्रावतारविभूतिरूपावतारविषयत्वादस्य । श्रीपुरुषोत्तमाख्यं तु वस्त्वेव तादृशं, न त्वौपाधिकं तत्राप्यस्ति, शुद्धब्रह्मरूपत्वादित्यनुपदमेव प्रमाणप्रकरणे निरूपयिष्यत इति विद्वद्भक्तमनोरममेतदिति जानीहि । यत्तु स्वकाल इत्यादि तु परोक्षवादत्वेनापि ज्ञेयम् । स्वकाले लीलाकाले । अत एव स्वपदम् । नूतनरसोत्पादको दिनान्तादिष्वग्रिमश्च । एवमित्यादिना श्रीवत्सेत्यादिविशेषणोक्तितात्पर्यमुक्तं क्रमेण, पुरुषोत्तमासाधारणचिह्नत्वात् तत्त्वेन ज्ञाने मूलकारणभूतः श्रीवत्सः । तस्य ब्रह्मत्वं निरूपितम् । वस्तुतस्तु श्रीरूप एव सः । महानन्द-

रूपत्वात्तस्यास्तत्र स्थितो लीलां करोतीति लीलामूलभूतमपि तद्रूपं ब्रह्म। 'कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यज' इति वाक्यात् । स्वीयत्वेनाङ्गीकृतानामात्मनामाधिदैविकं रूपं स्वकण्ठे स्थापयन्न जातु त्यजति । स्वरूपानन्दं चताननुभावयतीति तथा । भूरूपकट्या आवरणोक्त्या तथात्वम् । प्रावृड्घनश्यामत्वोक्त्या सर्वानिष्टनिवृत्तिपूर्वकं सर्वार्थदानम् ।

महार्हेत्यत्र । भगवन्मुखनिरीक्षका इत्यादि । अत्रायं भावः । 'बिभर्ति सांख्यं योगं च देवो मकरकुण्डले' इति वाक्यात्तद्रूपयोस्तयोः सहभावेन किरीट-
१०-३-१०. स्योक्तेर्मौलिपदं, पारमेष्ठ्यमित्यत्रापि तद्रूपो वेद एवोच्यत इत्यवगम्यते । सर्वप्रमाणानामुपरि स्थितिस्तस्यैवोचिता यतः । एवं सति तज्जनितज्ञानमेव तत्त्विड्रूपमिति तत्परिष्वङ्गोक्त्या तेषां तथात्वमेव संपद्यत इति जीवानां तत्र स्थितिरयुक्तेतिशङ्कानिवारणाय भगवन्मुखेत्याद्युक्तम् । अपरं च तेषां बहुत्वेपि तत्त्विष्येकत्वोक्त्या तज्जनितस्य भक्तिभावस्यैकरूपत्वं मूले ज्ञाप्यते । तेन वेदादीनां भक्तिरेव फलमिति ज्ञापितं भवति । अर्हस्य प्रापकद्रव्यरूपत्वेन तादृशोत्र गुरुरेवेति तथोक्तम् । अन्यथा त्वमूल्यपदमेव वदेदिति भावः । इदं च भक्तिमन्महापुरुषानुग्रहादेवेति ज्ञापनायार्हे महत्त्वमुक्तम् । अत एव, 'वेदवादरताः पार्थे'त्यादिनोक्तशीलानां न भक्तिलाभः । एतदेवाभिसंधाय सर्वलोकप्रसिद्धादिति विशेषणं दत्तम् । अर्हस्य लोकसिद्धत्वेनापि तथा विशेषणमिति ज्ञेयम् । कुन्तलानां रसोद्दीपकत्वेन तेषु भक्तिप्रवर्तकत्वमपि सूच्यते । **तान्येव पदानी**ति । कुन्तलानां भ्रमरतुल्यत्वेन तेषां षट्पदत्वेनैतेष्वेतान्येव तानीत्यर्थः । **त्रयाणामपी**ति । वेदसांख्ययोगानामित्यर्थः । कुन्तलानां शास्त्राभिज्ञजीवत्वेन पूर्वमुक्तत्वात्तेषामनेकविधत्वे तज्ज्ञानप्रकारानेकविधत्वमेव प्रयोजकमिति कुन्तलानेकत्वोक्त्या तत्प्रयोजकमप्याक्षिप्तं भवतीत्यर्थः ।

उद्दामेत्यत्र । त्रयाणां कर्मत्वोक्तेरयं भावः । भूमावेव कर्ममार्ग इति तद्रूपकट्यां भूषणत्वेन स्थितस्य कर्मत्वं युक्तम् । इतरयोः क्रियाशक्तौ प्रतिष्ठितत्वेनेति ।

कृष्णावतारेत्यत्र । **सम्यग्भ्रमो यस्ये**ति । विविधपदार्थैर्महानुत्सवः कार्य इति बुद्ध्या तत्र तत्र मनोधावनं भ्रमः । पुरःप्रकटे भगवत्यन्यत्रापि मनोधावन-
१०-३-११. स्यानुचितत्वात् । परं तूत्सवरसस्तादृश एवेति भक्तिमार्गे स गुण एवेति भगवच्छास्त्रेणापर्युदस्तः । (वसुदेवदेवकीस्तुतितात्पर्यनिरूपणं द्वादशात्मेत्यादिभिः क्रियते । पूर्वं तमद्भुतमित्यादिना द्वादशधा प्रादुर्भाव उक्तः । अग्रे तद्रूपद्वाभ्यां वसुदेवदेवकीभ्यां ततो न्यूनाधिकभावेन निरूपणे विसंवादादन्यतराप्रामाण्यशङ्का स्यात्, तन्निरासः स्तुतिनिरूपितार्थाभ्यां भवतीति ज्ञापयन्तीति **द्वादशात्मे**त्यादिना । स्तुतिभ्यामिति पूर्ववद् द्वादशधैव निरूपितो हरिर्ज्ञेयः । तत्र प्रकारमाहुः **त्रिधा च नवधे**ति । देवकीभिस्त्रिधा, वसुदेवैर्नवधेत्यर्थः । स्तुत्याः स्वरूपमाहुः वैदिकोऽलौकिक उच्यत इत्यनेन । आद्यस्य नवधात्व

---

१ शोधपत्रमिदं श्रीमन्मथुरेशपुस्तकस्थम् ।

इतरस्य च त्रिधात्व उपपत्तिमाहुः **यज्ञस्त्वित्यादिना** । अग्निहोत्रदर्शपूर्णमासादिरूपः पञ्चात्मकः । चतुर्व्यूहात्मकश्चतुर्मूर्तिः । षड्गुणैश्वर्यवान् साकारब्रह्मरूप उपास्यत्वेन तत्र उच्यते । तन्त्रपदेन भागवतशास्त्रमप्युच्यते । एतज्ज्ञापनायैव भगवत्पदम् । फलितमर्थमाहुः **पञ्चात्मकश्चतुर्मूर्तिरिति** । वेदे तन्त्रे चोपास्यत्वेनोक्तं रूपमिदमेवेत्यर्थः । ननु वैदिकत्वेनैव चारितार्थ्ये द्वितीयस्योक्तिः कुतस्तत्राहुः **तन्त्रमिति** । यथा वेदो भगवत्प्रापकः, तथा तन्त्रमपीति वेदतुल्यं तदित्यर्थः । तत्र त्रैवर्णिकानामेवाधिकारः, अत्र तु सर्वेषामिति मर्यादापुष्टिभेदेनोभयमपि भगवत्प्रापकम्, यतोतस्तथेति भावः । द्वितीयस्याः स्तुतेस्त्रिधात्वे हेतुमाहुः **लौकिक इति** । अत्र गुणशब्दः प्रकारवाची, न तु प्राकृतततद्वाची । 'अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति भगवद्वाची । 'अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति भगवद्वाक्याल्लोकेपि तत्स्वरूपं प्रथितं वाच्यम् । तच्चाधिदैविकादिरूपं त्रिविधं स्मार्तमिति सा तथेत्यर्थः । लौकिकस्यैव हि वस्तुन आधिदैविकादिरूपत्रितयं रूपमुच्यते । अत एव स्मृतौ परमात्मत्वेनैव भगवानुच्यते, आधिदैविकत्वात् । इदं स्तुतिव्याख्याने स्फुटीभविष्यति । उक्तार्थमनुवदन्ति संदेहाभावाय **नवधेत्यादिना** । पूर्वं वसुदेवेनैकेन श्लोकेन प्रार्थनं कृतं, तेन दशश्लोकाः । त्रिरूपत्वोक्तिरेव मुख्येति त्रिधेत्युक्तम् । 'मर्त्यो मृत्युव्याले'ति 'विश्वं यदेत'दिति च श्लोकद्वयं पर्यवसानतः स्तुतिरूपमिति चकारेण समुचितम् । प्रतिपत्तिहेतुविरोधपरिहारयोरेव तत्र स्फुटं प्रतीतेः । फलितमर्थमाहुः **शाश्वत इति** । प्रतीयमानस्यैव शुद्धभगवद्रूपत्वमुभाभ्यां तथेत्यर्थः । एवं निरूपणस्यावश्यकत्वमाहुः **बाधकमिति** । उभयोर्हेतुश्चाक्षुषत्वादिति ज्ञानं तस्मादित्यर्थः ।)

विदितोसीत्यत्र । **यस्त्वित्यारभ्य प्रयोगान्तम्** । अत्रैवं ज्ञेयम् । असीति
१०-३-१३. व्यवहारो युष्मच्छब्देनोपस्थित एव भवतीति स्थितावपि व्यवहारमात्रोक्तिर्या सा, स तेन विनानुपपन्नस्तमाक्षिपतीत्यन्यलभ्यत्वाभिप्रायेणेति । अत एव, पिधेहीत्यादौ द्वारादिपदार्थस्यैवाध्याहारो, न तु पदस्यापि लाघवादिति भाट्टा मन्यन्ते । प्रकृते त्वर्थस्य पुरःस्थत्वेन नाध्याहारापेक्षापि । वस्तुतस्त्वसिभवानिति समस्तं पदम् । तथाचासिशब्दयुक्तो भवानित्यर्थः । तद्युक्तत्वं तेन व्यवहार्यमाणत्वम् । पूर्वोक्तपक्षे भवच्छब्दसंगत्यभावारुच्या पक्षान्तरमाहुः **अथवेत्यादि** । क्षराक्षरपुरुषोत्तमाः, आधिभौतिकादयो वा त्रयः पुरुषाः । असीति देहरूपेण सत्त्वेन प्रतीयमान उक्तः । भवानिति तदभिमानित्वेन धर्मिणा परमात्मत्वेन प्रतीतिविषय उक्तः । तेन श्रुत्युक्तसैन्धवघनदृष्टान्तन्यायोत्राभिप्रेत इति ज्ञायते ।

प्रकृते पर इत्यस्याग्रे । **प्रत्यक्षदोषस्त्वित्यादि** । शुद्धब्रह्मत्वेन पुरुषोत्तमत्वेन च वेदनं हि विदितोऽसीत्यनेन प्रतिज्ञातम् । असि भवानितिव्यवहारश्च प्रत्यक्षविषय एव भवति । एवं सत्युक्तव्यवहारविषयस्यैव प्रमेयोक्तरूपत्वं सिध्यतीति तत्परिहार इत्यर्थः ।

ननु ज्ञातत्वे प्रामाणिके सत्युक्तदोषपरिहारः। तच्च न वक्तुं शक्यम्। दोषत्वादित्यत आहुः **ज्ञातत्वेति**। भवत्पुरुषपदाभ्यां पूर्वं तथोक्तत्वादलौकिकचक्षुस्तत्सामर्थ्यरूपेणापि स्वयमेव हरिः प्रकटो जात इति स्वस्य ज्ञानं यथा न विरोधि तथा वसुदेवज्ञानमपीत्यर्थः। 'अन्यदेव तद्विदितादथो अविदिता'दित्यादिश्रुतिरपि लौकिकयोस्तयोः सकाशादेव भेदमाह। अन्यथा वदद्व्याघात इति भावः। नन्वदृश्यत्वादिप्रतिपादकवेदाप्रतिपाद्यत्वाद् ब्रह्मत्वमपि न वक्तुं शक्यमित्यत आहुः **विरुद्धा** इति। यद्रूपं यदा दृश्यं तदेव तदैवादृश्यमपीतीन्द्रियसामर्थ्यलक्षणेनांशेन प्रभिच्छालक्षणेन तेन चोभयधर्मसिद्ध्या ब्रह्मत्वं न क्षतं भवतीत्यर्थः।

स एव स्वप्रकृत्येत्यत्र। **आधिदैविकस्वभावेनेत्यादि**। लीलौपयिकपदार्थानामलौकिकत्वेन लौकिक्या प्रकृत्या न तत्सृष्टिः सम्भवतीति तथोक्तम्। अ-
१०-३-१४. न्यथा स्वपदानर्थक्यमिति भावः।

त्वयीश्वर इत्यत्र। अविरोधे ईश्वरत्वब्रह्मत्वलक्षणं हेतुद्वयमुक्तं तृतीये पादे। चतुर्थेऽपि द्वितीयकोट्युपस्थितिर्न प्रामाणिक्यतोऽपि न विरोध इति हेत्व-
१०-३-१९. न्तरमुक्तमिति, **किञ्चेत्यादिना** व्याख्यातम्। अन्यथा त्वविरोधः पूर्वेणोक्त एवेत्यग्रे तच्छक्त्योपचारोक्तिः शशशृङ्गभिया पलायनमनुहरेत्। वस्तुतस्तु, ननु सांख्यादिषु गुणानामेव कर्तृत्वमुच्यते इत्यत आह **त्वदाश्रयत्वादिति**। त्वमेवाश्रयो येषां तादृशत्वाद्गुणानां त्वन्निष्ठं कर्तृत्वं तेषूपचर्यत इत्यर्थोऽभिप्रेत इति ज्ञेयम्।

देवकीस्तुतितात्पर्योक्तौ। **इदानीं मारण** इत्यादि। युद्धे भगवतैव तन्मारणसम्भवेऽपि पूर्वमुद्यतायुधेन बाला मारिता इत्यधुनापि तादृशतद्दर्शनं पूर्व-
१०-३-२२. ज्ञानसदृशम्। तथाच तन्मात्रेणैव तथेत्यर्थः। **अन्यथेति**। जन्माज्ञानाभावे प्राणास्थितिरेव स्यादित्यर्थः। न सिध्येदिति पाठे प्रथमः पक्षो रक्षा।

१०-३-२५. व्यक्तेऽव्यक्तमित्यत्र। **पुरुषोत्तमाभिन्न** इति। पुरुषोत्तमचरणात्मक इत्यर्थः।

त्वत्पादाब्जं प्राप्येत्यत्र। ननूक्तपलायनविशिष्टस्य साक्षाद्भगवच्चरणप्राप्तिर्न संभवत्यतोऽनुपपन्नमिदमित्याशङ्क्य तत्तात्पर्यमाहुः **सत्सङ्गो भागवतं चेत्या-**
१०-३-२७. **दिना**।

स त्वं घोरादित्यत्र। **इदानीं मारणे वेत्यादि**। रक्षाप्रार्थनेति शेषः। अस्मिन् पक्षे रूपानुपसंहारातिरिक्तबाधकाभावात्तत् कृत्वान्यत्र स्थेयमिति भावः।
१०-३-२८. एतदेवोक्तम्, **अनुपसंहार** इत्यादिना। **अन्यतरेति**। इदानीमेव मारणं लोके चैतद्रूपदर्शनमित्येतयोरन्यतरस्य तथात्वायेत्यर्थः। इदानीममारणमन्यत्र गमनं च

१. सज्ञानमिति पाठः।

मध्यम पक्ष । एव सत्यपि यदि तममारयित्वैवान्यत्र गतिर्भवति तदा स्वतस्तन्मारणान्नि वृत्तिर्भवतीति, तथापि दोपानिवृत्तिरित्याहु **मध्यमपक्षे** **खल** इत्यादिना । तेन जन्माज्ञानस्यावश्यकत्वमुक्त भवति ।

शङ्खचक्रेत्यत्र । **यद्यपी**ति । केचिद्देवा अपि चतुर्भुजा भवन्तीति तादृशे रूपे देवाना नालौकिकत्वेन भानम् । इतरेषा तु भवतीति तथा । **तादृशम**
१० ३ ३० पीति । उपसहृतालौकिकप्रभ चतुर्भुजाकारमात्रमपीत्यर्थ । रूप चेदमित्यनेन कसादीनामदर्शन प्रार्थितम् । अत एव, मासद्दशामित्युक्तम् । अनेन तु तदर्दर्शनेऽपि मनुष्यमानस्य तथा दर्शन नास्मद्धितमिति तदभाव प्रार्थितोऽतो नान्यतरवैयर्थ्यं शङ्कनीयम् । किञ्च, यद्यप्याद्येनैव द्वितीयचारितार्थ्यं भवति, तथापि रूपपदमात्र ध्यानधिष्ण्यपद च श्रुत्वा सर्वांशेन तिरोधान हरिर्मा करोत्विति विशेषप्रार्थन द्वितीय कृतमिति ज्ञेयम् ।

त्वमेवेत्यत्र । भगवदुक्तवाक्यसख्यातात्पर्यमाहु **चतुर्दशे**ति । पूर्णब्रह्मणो देवकीपुत्रत्व न प्रमाणसिद्धमिति भ्रमाभावाय सर्वा अपि विद्या अत्र प्रमाणानीति
१० ३ ३२ ज्ञापनाय तत्समानसख्यैर्वाक्यैर्भगवतोक्तमित्यर्थ । प्रमाणस्य भाव प्रामाण्य प्रमाणत्वमिति यावत् । तदर्थमित्यर्थ । नच सख्याया अपि तात्पर्यवत्त्वे प्रमाणाभाव इति वाच्यम् । श्रुतिसिद्धत्वात् । तथा हि । 'वैश्वानर द्वादशकपाल निर्वपेत्, पुत्रे जाते यदष्टाकपालो भवति, गायत्र्यैवैन ब्रह्मवर्चसेन पुनाति, यन्नवकपालस्त्रिवृतैवास्मिस्तेजो दधाति, यद्दशकपालो विराजैवास्मिन्नन्नाद्य दधाति, यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रिय दधाति, यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाती'तिश्रुतौ कपालेषु द्वादशसख्याविधानतात्पर्यं तदवयवभूतसख्याफलोक्त्या निरूपितम् । तत्तत्सख्यायास्तत्तत्फलसाधकत्वोक्तेरपि तत्तत्फलसख्यासजातीयत्वमेव प्रयोजकमिति ज्ञेयम् । 'अष्टाक्षरा गायत्री तेजस्त्रिवृत्, दशाक्षरा विराडन्न विराट्, एकादशाक्षरा त्रिष्टुप्, द्वादशाक्षरा जगती, जागता पशव' इतिश्रुतिभ्य । ननु सकृत्पुत्रत्वेपि वरवाक्यसत्यत्वे वारत्रय तथात्व कुत इत्यत आहु **त्रिगुणमि**त्यादि । लौकिकमेकगुण, द्विगुण वैदिक, भगवदीय त्रिगुणमत सर्वाधिकमिहोक्तमिहैव फलति चेत्तदा सत्य भवति । वैदिक तु जन्मान्तरेऽपि फलतीति तथा । भगवदुक्त त्वामोक्ष यावन्ति जन्मानि तेषु सर्वेष्वेव फलतीत्येतदेवैकगुणत्वादिक तेषु ।

अजुष्टग्राम्येत्यत्र । ननु श्रीतिसेरनार्थत्वाज्जुषेरनयो श्रीतिसत्त्वादजुष्टत्व कथमिति
१० ३ ३९ चेत् । सत्यम् । तथापि द्वितीयमर्थमादाय तथोक्तमित्याहु **सेवा न घृ**ष्टेतीति । नन्वजुष्टत्वेऽनपत्यत्व प्राप्तमेवेति कथन तस्य किंप्रयोजनकमित्याशङ्क्य तत्तात्पर्यमाहु **वैदिकेनापी**ति । अलौकिकप्रकारकतन्निषेधार्थक तदित्यर्थ । अजुष्टेत्यादिविशेषणतात्पर्याणि **रागस्ये**त्यादिना क्रमेणोक्तानि । ननु मोक्षाधिकविवक्षितलीलाऽमृताब्धिफलके मोक्षावरणपूर्वकहरिसदृशसुतवरणे मायामोहस्य हेतुत्वोक्तिर्भेतिमा-

१ तदृशा इत्यपि पाठ ।

गेविरुद्धा, मोक्षस्य चैवमाधिक्यं भवेदित्यत आहुः **इयं विशेषमायेत्यादि** । तर्हि मदनुग्रहात्तन्न वव्राथ इति वक्तुं युक्तं, न त्वेवमिति चेद्, न । अनवबोधात् । प्रकृते भगवति ज्ञानशक्तेरपि प्रकटत्वेऽपि ब्रह्मत्वेन भगवत्त्वादिना च ज्ञानाभावो यः स न मोहमृते । तथा ज्ञानं च लीलारसविरोधीति न तथा ज्ञापनम् । नन्वयमप्यनुग्रहादेवेतिचेन्नतु मोहोऽप्यनुग्रहादेवेति बुद्ध्यस्व । तथाप्येवंविधेऽर्थे मोहोक्तिः कथं भक्तमनोरमा भवेत् । इत्थम् । अचिन्त्यानन्तशक्तेर्भगवतो नियतकार्या हि ताः सर्वा लीला अप्यनेकविधाः । एवं सति यान्तरङ्गलीलायामेवाधिकृता सा तल्लीलास्थभक्तानां मध्ये यस्मिन् यादृशी लीला प्रभोश्चिकीर्षिता तस्मिँस्तदुपयोगिपदार्थेष्वासक्तिं तदतिरिक्तविस्मृतिं च करोतीत्येतन्मात्रसाधर्म्येणैतच्छक्तिकार्येपि मोहत्वोक्तिः । प्रकृते प्रभौ सर्वशक्तिप्राकट्येऽपि स्वानुरूपातिरिक्तज्ञानाद्यभावात् प्रमाणमार्गात् प्रमेयमार्गोऽतिविलक्षणो बलिष्ठश्चेति ज्ञापनाय च । अत एव, 'न न्यवर्तन्त मोहिता' इति वक्ष्यते । न हि तत्रामोह उत्तम इति वक्तुं शक्यम् । निवृत्तिहेतुत्वात् । यथा यथैतन्मोहाधिक्यं तथा तथा पुष्टिमार्गे भावप्राचुर्यमिति ज्ञेयम् । अत एव गोविन्दापहृतात्मत्वेनैवानिवृत्तिसम्भवेऽपि मोहिता इत्युक्तम् । अत एव भगवन्मायावाचकपदयोरसमासः । दास्यभावात् । पितृत्वादिभावस्य न्यूनत्वात् । यद्वा, 'समो मशकेने'ति श्रुतेर्भगवतः सर्वसमत्वेपि भगवत्समत्वं नान्यस्यास्तीति तादृक्पुत्रवरणं मोहकार्यमिति तथोक्तिः । वस्तुतस्तु 'अपवर्गं न वव्राथे' इत्येतावतैव चारितार्थ्येपि 'म' इति यदुक्तं, तेन पुरुषोत्तमसम्बन्धी भक्तिमार्गीयो दास्यरूपो योपवर्गः स उच्यते । तस्य सर्वाधिकत्वात्तद्वरणं मोहादेवेति तथा । ननु तदवरणोक्तिप्रयोजनं न पश्यामः । तया विनापि प्रकृतार्थोपपत्तेः । उच्यते । भगवद्वचनैरुक्तप्रकारकस्वरूपदर्शनेन च सर्वार्थतत्त्वज्ञानमभूदित्येवम्भूतास्मत्क्लेशेनाविर्भूतो भगवान् दास्यमेव कुतो न दत्तवानित्याशङ्काभावायैतदुक्तम् । अत्रायं भावः । कामदित्सयेतिवचनान्नियतेच्छयैवाविर्भाव इति भवदकामितं स्वतो न देयम् । अपवर्गे च भवतोः कामो नाभूदिति तथेति ज्ञापयितुं तदुक्तिः । तथापि परमकृपालुरेवं कुतः कृतवानिति शङ्का तु, एवं सति यान्तरङ्गेत्यादिना प्रागेव निरस्ता । एतेनैव कामदित्सयेति वाक्यादेवाकामितादानस्य प्राप्तेः कामाभावस्य च स्वतः सिद्धत्वात्तदनुवादः किमर्थं इत्याशङ्कापि निरस्ता ज्ञेया । कामाभावहेतोर्मोहस्यापि निरूपणात् । अन्यथा मोहनमेव कुतः कृतवानिति शङ्का तिष्ठेदेवेति । किञ्च, 'स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन'इति वाक्यान्निरयतुल्यत्वं यस्मिन् भगवत्परा मन्यन्ते, तस्यापवर्गस्यावरणं भक्तानां मायामोहकार्यमिति कथं वक्तुं शक्यम्, अतो यथोक्त एवार्थो ज्ञेयः ।

युवां मामित्यत्र । यदि भक्त्यङ्गत्वेन ज्ञानं नोच्येत, किन्तु स्वातन्त्र्येण, तदा
१०-३-४५. यथाकथञ्चित् स्नेहमात्रेण निरोधपदार्थसिद्धेरस्मिन् स्कन्धे ज्ञानमुच्यमानमेतदर्थाऽसङ्गत्यात्र प्रवेशमलभमानं वाक्यभेदापादकं भवेदित्याहुः **अन्यथा बोधांश इत्यादि** ।

इत्युक्त्वासीद्धरिस्तूष्णीमित्यस्य विवरणे, अत्र आत्मपदेन इदमाकूतम्। य-
१०-३-४६. थात्मा अविकृतो नित्यः शुद्धः सद्रूपस्तथैव मायाप्युक्तगुणविशिष्टा। अत एव ता-
दृशगुणविशिष्टलीलायाः प्रत्यायिका, नासत्पदार्थस्य। संसारहेतुभूता माया यथा जीवस्य स्वरूपं विस्मारयित्वा प्रापञ्चिकविषयासक्तिं जनयत्येवमियमपि भक्तानां स्वस्वरूपविस्मृतिं भगवदासक्तिं च जनयतीत्येतावद्धर्मसाम्येनास्यामपि मायाशब्दप्रयोगः। वस्तुतस्तु यथाऽन्ये लीलोपयोगिनो गोपीगोपादय आनन्दरूपा एवमियमपीति ज्ञापनायात्मपदम्। अन्यथा पुरुषोत्तमवाचिभगवत्पदाव्यवहितोक्त्यैव मायाया भगवदीयत्वप्राप्तेरात्मपदं व्यर्थं स्यात्। एवं सति, 'प्रकाशाश्रयवद्वा तेजस्त्वा'दिति न्यायेन भगवद्रूपत्वादत्र कर्मधारयो प्यभिप्रेत इति ज्ञेयम्। तथाचेदं पदं सर्वत्रानुषज्यते। तथाहि। अत्र लीलार्थं भगवता तौ पितृत्वेनाङ्गीकृताविति भगवच्छक्त्यैव तयोस्तथाविर्भावः। अन्यथा निषेकजननाद्यभावेन तयोस्तथात्वमुच्यमानं बाधितं स्यात्। एतदेवाह **आत्ममायया पित्रो**रिति। ननु 'एतद्वां दर्शितं रूपमि'ति वाक्यात् पूर्वरूपदर्शन एव भगवदिच्छाया उक्तत्वाद्, 'नान्यथा मद्भवं ज्ञान'मिति वाक्याद्दर्शनस्यानन्यलभ्यत्वाच्चैतद्रूपदर्शनं कथमेतयोरत आह **आत्ममायया सम्पश्यतो**रिति। एतेन चक्षुस्सामर्थ्येनादृश्यत्वं सूचितम्। अतिशयेनोपक्रान्तकार्योपयोगित्वं हि सम्यक्त्वम्। तेन पूर्वमीश्वरत्वेन जानतोर्लीलोपयोगिमायाकरणकदर्शने सम्यक्त्वं स्वपुत्रत्वेनापि दर्शनं ज्ञेयम्। तथैव लीलायाः करिष्यमाणत्वात्, पित्रोरितिवचनाच्च। यद्वा, लौकिकभावे सत्येव लीलोपपत्तिरिति दर्शने लीलोपयोगिमायाकरणकत्वनिरूपणेन पितृत्वोक्त्या च पुत्रत्वज्ञानं प्राप्तमेव। तच्च न केवलं, किन्त्वीश्वरत्वानुसन्धानसहितमिति तदेव सम्यक्त्वम्। 'युवां मां पुत्रभावेन ब्रह्मभावेन चे'ति भगवद्वचनात्। अथवोक्तरूपमायाकरणकदर्शने तद्विरुद्धाविषयकत्वमेव सम्यक्त्वम्। तथाच ब्रह्मभावस्य लीलाविरोधित्वेन तद्रहितं स्वस्मादुत्पन्न इत्येव ज्ञानं सम्यग्दर्शनम्। एवं सति तया पश्यतोस्तयोः परं प्राकृतः शिशुर्बभूवेति तद्दर्शनप्रकारकथनम्। वस्तुतस्तु भगवान् षड्गुणसम्पन्नः परमकाष्ठापन्नः शुद्धब्रह्मरूप एव यः शिशुः शिशुरूपः स सद्यस्तस्मिन्नेव क्षणे आसीद् दृष्टः प्रकटो वा जात इति योजना। तत्राभवद्भगवान् व्यासपुत्र इत्यत्रेवात्राप्यासीदिति पदस्य नोत्पत्तिरर्थः, जातो हि बालो रोदिति। तच्च द्वा स्वजागरणहेतुरिति तूष्णीं तथासीत्। अपरोक्षत्वेप्यलौकिकत्वेन ज्ञानाभावात् सोंशः परोक्ष एवेति लिट्प्रयोगः। अपरं च। इह हि तत्तत्क्षणसम्बन्धित्वेनोच्यमानापि सर्वा लीला तथाभूतैव शुद्धब्रह्मधर्मरूपा नित्यैवेति, 'कृतागसं त'मितिश्लोकोक्तरूपवन्नालादिसहितशिशुरूपस्यापि शुद्धब्रह्मत्वाद्यथाश्रुतेपि न काप्यनुपपत्तिः। तच्छ्लोकोक्तरूपस्यैव, नचान्तरित्यादिना शुद्धब्रह्मत्वमग्रे शुकेनोक्तमिति न काचिच्छङ्कान। लीलाया निरोधार्थत्वाद् यथैव सम्भवति तथैव करोतीति न प्राकृतानुकरणलीलायां काचिन्यूनता। प्रत्युत भक्तार्थं एवमपि करोतीत्यद्भुतमाहात्म्यख्यापकमित्येतत्सर्वं हृदि कृत्वा

स्वस्यैव सर्वभवनसामर्थ्येन तथा कृतवानित्याद्युक्तमिति ज्ञेयम्। अत एव 'बबन्ध प्राकृतं यथे'ति प्राकृतदृष्टान्त उक्तोऽग्रे। अथवा शेषे इदं सूत्रं शेषाधिकारकाण्प्रत्ययान्तोत्र प्रकृतिशब्दः। तेन यथा चक्षुषा ग्राह्यं रूपं चाक्षुषमित्यादिशब्दास्तथायमपीति प्रकृत्या ग्राह्यः प्राकृत इत्यर्थः सम्पद्यते। लौकिकालौकिकभेदेन हि द्विविधा जीवाः। तेषां प्रकृतिरपि तथा। तथाच, 'मल्लानामशनि'रितिश्लोकोक्तरीतिवदलौकिकप्रकृतिभिरलौकिकत्वेन ग्राह्यो, लौकिकप्रकृतिभिर्लौकिकत्वेनेत्येतादृशो, वस्तुतस्त्वलौकिक एव शिशुर्बभूवेत्यर्थः सम्पद्यते। अत्र लौकिकव्यवहारोपयोगि ज्ञानं लौकिकं, तद्वन्तस्तथा। शास्त्रीयं ज्ञानमलौकिकम्, तद्वन्तस्तथेत्युच्यन्ते। तेन नन्दादीनां लौकिकत्वेन भानेपि लीलया अलौकिकत्वात्तन्मध्यपातित्वेन तज्ज्ञानादीनां न लौकिकत्वम्। तेषां पुत्रत्वादित्वेन ज्ञानं शास्त्रेणानूद्यते परं, न तु विधीयत इति शास्त्ररीतिमपेक्ष्य लौकिकत्वमुच्यते। नैतावता काचिन्न्यूनतात्र। लीलात्वेनालौकिकत्वमुक्तमेव। यद्वा, प्रथमस्कन्धे भीष्मोक्तौ, 'प्रकृतिमगन् किल यस्य गोपवध्व'इत्यत्रेवात्रापि प्रकृतिशब्दो भगवत्स्वरूपवाची। तथाच पूर्ववत् प्रकृत्या स्वरूपेणैव ग्राह्यः। तथा, 'न तत्र सूर्यो भाती'त्यादिश्रुतिभिः, 'नाहं वेदै'रित्यादिस्मृतिभिश्चेतरसाधननिषेधाच्छ्रुत्यन्तरे च, 'नायमात्मा प्रवचनेन लभ्य' इत्यादिनेतरसाधननिषेधपूर्वकं, 'यमेवैष वृणुते तेन लभ्य' इत्यादिना भगवतैव भगवाँल्लभ्य इति निरूप्यते। तथाचैतादृशशुद्धब्रह्मरूपो लोकवेदप्रसिद्धः पुरुषोत्तमः शिशुर्बभूवेत्यर्थः। तयोः सम्पश्यतोरेव तथाकरणे उपपत्तिमाहुः **लौकिकज्ञानेत्यादिना**। **सामर्थ्यस्य** सामर्थ्यप्रकटनस्येत्यर्थः। इदमत्राकूतम्। अनेनैव रूपेणाधुनैव कंसं मारयित्वा सर्वसमाधानं कर्तुं सामर्थ्ये सत्यपि यद्रूपान्तरप्रकटनं तत् 'समुद्विजे भवद्धेतोरधीरधी'रित्यादिवाक्यैर्लौकिकरीत्यैव स्नेहातिशयो ज्ञायते। येन भगवतः कंसाभिमुखत्वमात्रेपि प्राणापगमो भवेत्। लोकविद्वेषभिया रूपोपसंहारप्रार्थनेनापि लौकिकरीत्यैव स ज्ञाप्यते मातुः। पितुस्तु पूर्णमाहात्म्यज्ञानवत्त्वेनोक्तशङ्काभावेप्यनेनैव रूपेण अधुनैव कंसमारणे भक्तदुःखनिवृत्तौ सत्यां स्थितौ प्रयोजनाभावादस्माकं पुनर्दर्शनं न भविष्यति चेन्न, प्राणस्थितिर्भविष्यतीत्यभिप्रायेण तद्वृत्तान्तकथनादेतद्रूपोपसंहारोन्यत्राधुना गमनमभिप्रेतमिति ज्ञायते। अन्यथा माहात्म्यज्ञानवत्त्वेन सर्वज्ञतामपि प्रभोर्जानातीति न तन्निवेदयेत्। तथाच तदा तद्दर्शनसत्त्वोक्त्या तज्ज्ञानस्योक्तरूपस्य हेतुत्वं सूच्यत इति युक्तं तथात्वमिति।

ततश्च शौरिरित्यत्र। सर्वमोहनस्वभावायास्तस्या आविर्भावे वसुदेवे तथात्वं कुतो नेत्याशङ्क्य तन्निवारणाय, भगवत्प्रचोदित इतिपदतात्पर्यमाहुः **साधार-**
१०-३-४७. **णमोहस्येति**। भगवता गोकुले स्वनयनार्थं ततः कन्यायाश्चानयनार्थं स प्रेरित इत्येतावति कार्ये भगवज्ज्ञानशक्त्यैव व्याप्त इति योगमायाजनितसर्वसाधारणमोहस्य निवर्तकमुक्तरूपं ज्ञानमिति तथेत्यर्थः। यथान्यः कश्चिचौर्येण गच्छन् पद्भ्यां शनैश्च ग-

च्छति स्वचातुर्येण, तथैव वसुदेवोपीति ज्ञाने साधारणत्वम् । अन्यथा गोपाला भाण्डीरमिवायमपि गोकुल प्रापित स्यात् । यद्वा, भगवद्विषयकज्ञानतारतम्येन मोहापगमतारतम्यमिति भगवति लोकसाधारण ज्ञानमधुनास्यास्तीति तादृङ्मोहोप्यपगत इति तथेत्यर्थ । तावान् चाह्योपि वन्धो निवर्तत इत्याहु **कपाटोद्धाटनं** चेति । **तदा देवकी**त्यादि । दर्शनेन हि मोहाभाव । समानकालत्वे जन्मनो दर्शनक्षणे मोह एव भवेदित्यर्थ ।

इति तृतीयाध्यायः ।

चतुर्थाध्यायोक्तिसन्दर्भे अनिमित्त इति । भक्तदु खाभावादित्यर्थ । **ज्ञापने** इति । मायाकृतरोदनेन स्वज्ञापनम् । ततो गृहपालकृतबालजन्मज्ञापन

१०४. च कसे । एते उभे अपि तथेत्यर्थ । **ततोपी**ति । एतदुभयज्ञापनानन्तर, 'यत्र क्व वा जात' इति मायाकृत भगवज्जन्मज्ञापन, कसकृतज्ज्ञापन च मन्त्रिषु । एते उभे अपि दु खसुखदे इत्यर्थ । **न चान्यथे**ति । मायामोह विनेत्यर्थ । ननु धर्मस्थापनहेतो र्भगवदवतारस्य तन्नाशहेतुत्व कथमुच्यते । 'जात खलु तवान्तकृद्, यत्र क्व वे'ति वाक्य श्रवणेनैवानिर्देशान्निर्देशाश्वेत्यादिमन्त्रणस्य जातत्वादित्यत आहु **तामसप्रभुक** इति । **तामसाश्च त** इति । तद्धता परवादय इत्यर्थ । एवमपि कण्टकन्यायेन धर्मप्रतिपक्षदूरीकरण युक्तमिति भाव । **पश्चादि**ति । तम कार्यनिवृत्ते पश्चाज्जातो धर्मस्तथेत्यर्थ ।

भुवि भौमानीत्यत्र । ननु 'भुवि भौमानि यथा यान्त्यपयान्ति तथात्मा न याति

१०४१९ नापयाती'त्येतावतैव वाच्योऽर्थ सम्पद्यत इत्यन्यानि पदानि व्यर्थानि । किञ्च, यथा भूर्न विक्रियत इति द्वितीयो दृष्टान्तो बाधित । भौमाना भूविकारत्वा दित्यरुच्या पक्षान्तरमाहु **भुवि भौमानि भित्त्यादीनी**त्यादि । भुवि भौमानि भित्त्या दीनि यथा यान्त्यपयान्ति च । भूतान्यबादीनि च यान्त्यपयान्ति । आत्मा त्वेतेषु भूतेषु विद्यमान एव न तथा । न याति नापयातीत्यर्थ । एतेन भूतानीतिपदस्यात्मनि सम्बन्धे प्रकार उक्त । यद्यप्येवमपि भूतपदमेतेष्वित्यादिपदानि च न सार्थकानि भवन्ति, तथापि तेषु म्रियमाणस्यापि तद्धर्मासम्बन्धकथनात्तत्यात्वम् । अन्यथैतदर्थाप्राप्ते । **दृष्टान्त** एवेति । दृष्टान्तनिरूपकवाक्ये भूतपदस्यापि प्रवेश उक्त इत्यर्थ । अत पर, यथा भूरिति दृष्टान्त विवृण्वति **यथा बहिरि**त्यादिना । भौमानि यदा विक्रियन्ते तदा तेभ्यो बहि स्थिता स्थूला भूर्न विक्रियते, तथैतेष्वन्तस्थित आत्मापि तथा । एव सति तथैतेष्वित्यस्यावृत्ति कार्या । तदेतदुक्त, **तथैतेष्विति भिन्नवाक्यमि**त्यनेन । अस्मिन्नेव पक्षे, एतेष्वित्यादिपदानि प्रकारान्तरेण व्याकुर्वन्ति । **एतेषु मनुष्यदेहेष्वपी**त्यादिना । यथा बहिस्थिता भूर्मनुष्यदेहेपूत्पद्यमानेषु न विक्रियते तथात्मापीत्यर्थ । अग्रे तूक्तेऽर्थे प्रमाणमुक्तमेते

---

१ क्षणे क्षणो यनि पाट ।

म्वित्यादिना। अथ प्रकारान्तरेणार्थमाहुः वर्षाकालेत्यादिना । एतेषु तृणादिषूत्पद्यमानेषु यथा भूर्विक्रियते, न तथा तदन्तर्गत आत्मेत्यर्थः । व्यतिरेकेऽत्र दृष्टान्तः । 'यः पृथिव्यां तिष्ठन् पृथिवीमन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीर'मिति श्रुतेः पृथिव्यन्तर्गतोऽभिमान्यात्मास्तीति मन्तव्यम् । विपक्षे बाधकमाहुः अन्यथेति। एकतृणरूपेण एकस्यात्मनो विकृतौ सत्यां निरवयवत्वेनांशभेदस्य वक्तुमशक्यत्वाद् द्वितीयादिषु तेषु भिन्नो भिन्न आत्माङ्गीकार्यः स्यादित्येकस्मिन् पृथिवीलक्षणशरीरेऽनन्ता आत्मानः कल्पनीयाः स्युरित्यर्थः। अधिष्ठात्र्य इति । त्वगादिगोलकेषु लोमादीनामिन्द्रियाणामोषध्यादयो देवताः शरीराभिमान्यात्मनः सकाशाद्भिन्ना इत्यर्थः ॥ इति श्रीजन्मप्रकरणश्रीटिप्पणी समाप्ता ।

इति चतुर्थोऽध्यायः ।

तामसप्रकरणे प्रमाणप्रकरणम् ।

पञ्चमाध्याये प्रकरणार्थसन्दर्भे । स्वभावस्येति । भक्तस्वभावानुसरणे भगवतः परमदयालुत्वं भक्तिमार्गोत्कर्षश्च सिध्यति । तदन्यथाकरणे क्लिष्टक-
१०-५-०. र्मत्वं स्यादनेकविधत्वं रसालता च लीलाया न स्यादिति भावः । सात्त्विकं विहायादावेव तामसप्रकरणनिरूपणेऽस्य तामसत्वेनोक्तौ च हेतुमाहुः **लौकिकं तामस** इति । इदमत्र आकूतम् । पुरुषोत्तमस्वरूपमेव फलं, नेतरदिति हि भक्तिमार्गे मुख्यः सिद्धान्तः, तत्सम्बन्धादेव अन्यत्र फलत्वोक्तिः । एवं सत्यत्र स्वभावान्यथाकृत्यभावेन सात्त्विकानां ज्ञानादिविहितमार्गरुच्या राजसानां च विक्षेपतो लौकिकालौकिककर्मव्यासङ्गेन स्वरूपविस्मृतिसम्भवेन सम्यङ्निरोधासिद्धिः, तामसानां तु मौढ्यात् यत्राग्रहः पतति तत्र स न गच्छति कथञ्चनेति लोके दृश्यते । व्रजवासिनां च भगवत्स्वरूपविषयकः स्नेहस्तादृशो जातो येन स्वरूपातिरिक्तस्य भगवदुक्तस्यापि धर्मस्यानङ्गीकारोभूत्तथैवाग्रेतनज्ञानस्यापि । तेन सर्वात्मना निरोध एतेष्वेव फलित इत्येतद्धर्मसाम्येन पुष्टिमार्गस्य मर्यादातो विपरीता गतिरिति ज्ञापनाय च तामसत्वं प्रकरणस्योच्यते। वस्तुतस्तु निर्गुणमेव। 'तस्मान्मद्भक्तियुक्तस्ये'त्यारभ्य 'न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति भगवद्वाक्या'त्स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन' इति वाक्यात्तत्साध्यमोक्षस्यापि नरकतुल्यत्वेन गणना, अतोपि भक्तिमार्गाद् ज्ञानमार्गस्य हीनत्वमिति भगवदेकनिष्ठविशुद्धभाववतां सर्वाधिकत्वं शास्त्रसिद्धमिति दिक्। एतदेव लौकिकत्वं तामसे मुख्यमितिपदेनोच्यते। व्यापकत्वेनात्मत्वेनान्तर्हृदि हरिरस्त्येवेति श्रवणेपि बहिर्लोके प्रकटं यद्रूपं तदेवोक्तरीत्या मुख्यमत्र, नान्तरात्मादिरूपमित्यर्थः । मर्यादामार्गतो वैलक्षण्यात् स्त्रियोत्र मुख्या इति ज्ञापयितुं तत्रापि मर्यादायां यो मुक्तिप्रतिबन्धकत्वेन सम्मतः कामः स एवात्र भगवत्प्रापक इति च ज्ञापयितुं काम एवान्तःफलं यस्यास्तादृशी सेत्यर्थः । अत्रासम्भावितत्वभानं न कार्यम्, यत एतादृश्येव

कृतिरग्रे स्फुटा निरूपयिष्यत इत्यर्थः। किञ्च, मर्यादायां विहितभक्त्या भगवदाविर्भावः, अत्र तु कामवशादेव दैन्ये सति प्रकटे प्रभौ स्नेहः, सोपि तथा, तच्छास्त्रानुसारी, न तु विध्यनुसारीत्यर्थः। 'एका भ्रुकुटिमाबध्ये'त्यादिकथनात्। तथा चात्र निःसाधनेभ्यो ब्रह्मादीनामपि साधनैरप्यप्राप्य भजनानन्द तदधीनत्वमङ्गीकृत्य दत्तवानिति सर्वोत्कर्षवत्त्वेन तत्तथेत्यर्थः। यद्वा, अग्रे गजदृष्टान्तदानैर्भगवान् स्वय कामवशाद्भक्तानां समीपमागच्छतीति ज्ञाप्यते। तथा चोक्तरीत्या कामेनोद्भूते प्रिये स्नेह इत्यर्थः। न ह्येवमन्यत्र सम्भवतीति युक्तमादौ तत्कथनमिति भाव.। लौकिकमारूप्येण चतुर्विधलीलाकरणे लौकिकत्वेन भगवति ज्ञानवतां निरोधासिद्धिरित्याशङ्क्याहु. एकमिति। यथैकेन पूतनासुपय.पानेन लोके वीर्यप्राकट्य, तस्याश्च मुक्ति, प्रमेयवलप्राकट्य लोके वेदे च, पूर्वभक्षिताना बालानां कृतार्थता, अन्येषा च रक्षा, तोकेनामीलिताक्षेणेतिवाक्यादग्रे व्रजवासिनां माहात्म्यज्ञानपूर्वकः स्नेहस्तात्कालिकश्च विस्मयोन्येषां श्रवणादिफल चेत्याद्यनेककार्याणि जातानि, तथा सर्वापि लीलेत्यर्थः। एव सति प्रतिपाद्याननुगममाशङ्क्य तदनुगमक रूपमाहुः प्रपञ्चेति। आसक्तिरत्र मुख्या, तद्विस्मृतिरङ्गम्, तया विना सर्वथासक्त्यसम्भवात्तथा च निरोधत्वमेव तथेत्यर्थः। नन्वत्र वलदेवादिकार्यमप्युच्यत इति न सर्वा भगवल्लीलेत्याशङ्क्याहुः येनैवेति। आविष्टचरित्रमिति भाव। अन्यथा निरोधः तेनापि न स्यात्। अत एव 'वलपार्थभीमव्याजाह्वयेन हरिणे'ति ब्रह्मणोक्तम्। एव सति प्रपञ्चविस्मृतिरित्यनेनैवास्य श्लोकस्य गतार्थतेति शङ्का निरस्ता ज्ञेया। पूर्व प्रतिपाद्यत्वेनात्र तु परिचायकत्वेन तदुक्तेः। उत्सवाविष्टेत्यादिना क्रमेणैतत्प्रकरणस्थाध्यायप्रतिपाद्यनिरोधाधिकारिण उक्ताः। समुच्चय एवास्य, न त्वेतन्मात्रत्वम्। भगवदासक्ताना तत्सम्बन्धमात्रेण सर्वासां लीलानां हृद्यत्वात्। आद्ये स्पष्टम्। तृतीये 'नन्दादयश्चाद्भुतदर्शनाकुला' इति वाक्यात्। 'अहो वतात्यद्भुत'मिति 'मानयामास विस्मित' इति च। 'आसीत् सुविस्मिते'ति च वाक्यैराश्चर्याभिवेशिनो निरुद्धा.। तुरीयेध्याये शास्त्रे पुरुषोत्तमनामत्वेन प्रसिद्धानि कृष्णवासुदेवादिनामान्यत्र कृतानीत्यलौकिकम्। गर्गेण स्पष्टतयोक्तेपि नन्दावोधोपि तथा। अलौकिकत्वेन ज्ञात्वा तेषु नामसु ये रतास्तेऽत. परमस्यैवैतानि नामानीति ज्ञात्वास्मिन्निरुद्धा भविष्यन्तीति च। रिंगणलीलाप्यलौकिकरीत्या दैत्यनाशनपूर्वकभक्तेष्टेति तथा। लोके हीनत्वापादकत्व चौर्य भगवत्युत्कर्षाधायक निरोधसाधकत्वादेवमपि भक्तमनीषितकरणाच्चालौकिकत्वम्। मृत्स्नाभक्षण, तत आस्ये विश्वदर्शन शरणागतिर्मद्दनुग्रहश्चेति सर्वमलौकिकमिति तादृशानामेतच्छ्रवणेन निरोध. सेत्स्यतीति तथा। पञ्चमे दधिमाण्डभेदनादिक लोकदृष्टचोपद्रावकमिति तथा। अग्रिमा लीला स्वभक्तोपद्राविका चेति। षष्ठे नलकूबरमणिग्रीवौ स्त्रीस्वभावरतानिति तत्कथा तथा। स्त्रियश्च स्वभावश्च राजसतामसादिस्तयो रता इत्यर्थ। नात्र क्रमो विवक्षित इति। अत.पर द्वितीयाध्यायतात्पर्यमुच्यते। तत्रादौ हरिशरणगमनेनैव भयनिवृत्तिरिति तत्त्वम्। अनधिकारियुक्त्युक्त्या प्रमे-

१ अर्थाभिव्यक्ति पाठ।

यवलतत्त्वं चोच्यते। रक्षाकरणेन स्वामिनीनां च तत्त्वमलौकिकत्वतादृक्स्नेहवत्त्वादिलक्षणम्। हरौ रक्षाकरणं लोकरीत्येति लौकिके तत्त्वे रतास्तथा । सप्तमे वृन्दावनावासपर्यन्तं महानेवोद्यमो निरूपितो 'गोपीभिः स्तोभित' इत्यादिना। अग्रे च लीलेयम उक्त इति तथा। अथवा। यथाक्रममेव निरूपणं ज्ञेयम्। तथाहि । पूतनाया आगमनप्रकारागमनभगवत्कर्मकग्रहणपूतनाकर्मकमारणप्रकारतद्देपानाक्रमणतन्मुक्तितत्सहजरूपतद्दाहगन्धादयः सर्वे आश्चर्यरूपा इति तादृशानां निरोधः । तृतीये स्वोत्सवार्थमपि लौकिकप्रवाहधर्मासक्त्या स्वविस्मृतौ प्रकारान्तरेणास्मरणे शकटं भंक्त्वा मातुर्निरोधकरणमलौकिकम्। तस्य वैपरीत्येन तथात्वमपि तथा। प्रवालमृद्वंघ्रिस्पर्शमात्रेण तथाकृतिरपि तथा। अकस्माद्दुरुत्वप्रकटनमारभ्य कुशलेनागमनपर्यन्तं सर्वमलौकिकम्। जम्भालीलायां तथात्वं स्पष्टम्। उक्तत्रिविधलीलायामाश्चर्यरूपत्वमप्यस्तीति तादृशानामप्यत्र निरोध इति समुच्चयार्थोपिशब्दः। तथाप्यलौकिकत्वं मुख्यमिति पृथक्त्वम्। चतुर्थे चौर्यादिलीलाया लोकप्रतीत्योपद्रावकत्वमिति तथा । नामरूपादेरलौकिकत्वेनोक्तनिरोधस्यापि समुच्चयार्थश्चः । पञ्चम आवश्यकत्वज्ञानेन दास्याद्यभावे स्वयमपि कर्मकरणम्। पुत्रे च शिक्षार्थं तथा करणं स्त्रीस्वभावः। षष्ठे नारदोक्तिभिर्लौकतत्त्वम्। परमार्थतस्तत्त्वं स्तुत्येत्युभयत्र रतास्तथा । सप्तमे मन्त्रणपूर्वस्थानत्यागापूर्वतत्परिग्रहतत्रगमनाद्युद्यमोक्तेस्तादृशास्तथेति । अत्रोक्ताधिकारिणो यथासम्भवं लीलास्थास्तदन्ये च ज्ञेयाः। सप्तस्वप्यध्यायेपूक्तासु लीलासु सप्तविधा अपि यथासम्भवमधिकारिण इति ज्ञेयम्। **आवश्यकमिति** तदनन्तरमेव शीघ्रं करदानार्थगमनोक्त्येति शेषः। यदि केनाप्यंशेन नन्दो वसुदेवागमनं जानाति तदाकाशवाणीवृत्तान्तज्ञत्वेन सञ्जातवृत्तान्तशङ्कया स्वपुत्रत्वे सन्दिहान एव वोत्सवं कृतवानिति कस्यचिच्छङ्का स्यात् सापि तदैव मथुरागमनेनापास्तेत्याहुः **अन्यथाज्ञानेति** । उपपत्त्यन्तरमाहुः **उत्सवस्त्विति**। यथाकथञ्चिद्गमनसम्भवेऽप्युत्सवस्तु स्वपुत्रत्वनिश्चयं विना न स्यादित्यर्थः। नन्दः स्वपुत्रमादायेत्यत्रोदारधीरिति विशेषणसूचितं महार्हानेकविधभगवदुपयोगिद्रव्यानयनं चान्यथा न स्यादित्याहुः **द्रव्येति**। यद्यपि भ्रमप्रमासाधारणं तथाज्ञानमात्रमेवाह्लादहेतुस्तथापि महतामन्तःकरणमतथाभूतं वस्तु न गृह्णातीत्याशयेनाहुः **अन्तःकरणप्रतीत्यापीति**।

अलङ्कृत इत्यस्याभासः। **अन्यामपि शुद्धिमित्यादि**। अत्रायं भावः। बाह्याभ्यन्तरभेदेन शुद्धिर्द्वेधा । एतत्तारतम्येन भगवदानन्दानुभवतारतम्यमिति
१०-५-१. मर्यादा। प्रकृते चोत्सवरसानुभावकमलङ्करणमिति तथात्वमिति। मूलस्थपाणिपदतात्पर्यमाहुः **रिक्तेत्यादि**। **सम्बद्धा** इति कुलदेहसम्बन्धयुक्ता इत्यर्थः।

नवकुङ्कुमेत्यत्र। मुखेषु तादृक्पङ्कजत्वोक्त्या व्यञ्जितमर्थमाहुः **गन्ध इत्यादिना**।

---

१ कोटापुस्तके कर्मकस्य कर्तृक इति कृतम्।

भावज्ञापकत्वसाम्येन कटाक्षोक्त्योरैक्यविवक्षया चतुष्टयत्वमुक्तम् । कटाक्ष-
१०५१०. युक्तास्ता इति वा । तथा च गन्धादिवक्रोक्तिगानपर्यन्तं ताभिर्ज्ञापितं
ज्ञास्यति । यतस्तच्चतुष्टयं ज्ञेयम् । लोभात्मकं रसं तु स्वत एव ज्ञास्यतीति योजना । एतेन
भगवतस्तु रूपादिपञ्चविधविषया ये भोग्यास्ते एता एवेति सूचितम् । तेनैतासु भगवत
आसक्तिः सूचिता भवति, मिथश्चित्तव्यतिषङ्गोऽपि । चतुष्टयज्ञेयपदे रसस्यैव वा विशेषणे ।

कृष्णे विश्वेश्वर इत्यत्र **सञ्ज्ञेत्यादि** । ननु विश्वेश्वरादिपदसामानाधिकरण्या-
त्तद्वत् कृष्णपदमप्यानन्दहेतुत्वेनोक्तम्, न तु नामत्वेनेति सञ्ज्ञेत्यादिकथनं
१०५१३. न घटते । अस्तु वा, तथापि व्रजवास्युक्तिः परं न घटते । शुकस्तु जाना-
त्येवेति युक्तं तदिति कथमेवमिति चेत्, सत्यम् । यदा यादृशी लीला भवति तत्कालीनां
तादृशीमेव तां शुको वदति । यथा 'चिरं पाहीति बालकं' इति । तथा च तदालोके
तन्नामप्राकट्यं भगवता न कृतमिति तत्कथनमयुक्तमित्याशयेन तदुक्तम् । यत्तु नामत्वेन
नोक्तमित्युक्तम्, तत्राप्युच्यते । पुरुषोत्तमस्वरूपं सदानन्दात्मकमिति केवलस्वरूपवा-
चित्वेन कृष्णपदमेव मुख्यं नाम । नत्वीश्वरादिपदवद्धर्मपुरःसरत्वमिति तत्सामानाधिक-
रण्येऽप्यस्य नामत्वेनैवोपस्थितिः । यथान्यशब्दानां धर्मपुरःसरं धर्मिवाचकत्वेऽपि सत्ताशब्दस्य
न तथात्वम्, तथात्रापीति । **मारयेदिति** । बादकानिति शेषः । **महानपकुर्यादिति** ।
पूज्यपूजाव्यतिक्रमजन्यदोषप्रयोजको भवेदित्यर्थः ।

तत आरभ्येत्यत्र । **यदा पूर्वोक्तेत्यादि** । अत्रायं भावः । रमाक्रीडत्वोक्त्यैव
सर्वसमृद्धिमत्त्वस्य प्राप्तावपि पृथक् तन्निरूपणाद्धरेर्निवासेत्यनेनैव हेतुकथनेऽपि
१०५१८. तत आरभ्येति पार्थक्येन पूर्वानधिकथनाच्च पश्वादिसमृद्धौ विष्ण्वाराधनस्यैव
नैकट्यात् हेतुत्वमवगम्यते । तादर्थ्यचतुर्थ्याराधनस्यैव मुख्यफलत्वेनानुषङ्गिकत्वमनेनेति ।

दिष्ट्या भ्रातरित्यत्र । **इदानीमित्यादि** । वसुदेवबुद्धिमनुसृत्येदमुक्तमिति ज्ञेयम् ।
वस्तुतस्तु प्रजाशब्दोपत्यमात्रवाचीत्यग्रे वचनादिदानीमप्रजत्वोक्तिः कन्याभि-
१०५२३. प्रायेण तस्या गतत्वात्तथात्वम् । प्रजा यत्समपद्येति तु भगवदभिप्रायेण ।
अन्यथेदानीमप्रजस्य प्रजा समपद्यतेति विरुद्धं वाक्यं स्यात् ।

न तेष्वित्यत्र । **यथात्मन** इत्यादि । नन्दस्यातिप्रियत्वात् तत्तोषार्थं स्वगृहे नन्दा-
कारणमुचितं यद्यपि, तथापि तथाकृते भगवति देवकीपुत्रत्वं कंसः सम्भाव्य
१०५२८. नन्दानिष्टं कुर्यात्तदा सुहृन्नन्दः क्लिष्टो भवेदतो नाकारणम् । इदमप्येकं दुःए-
मेतदुक्त्या ज्ञाप्यते, तेन यथात्मनो नन्दस्य स्वगृहे नाकारणमिति सम्बन्धः । शेषं हेतुत्वे-
नोक्तम् ।

निःसाधनफलात्माय प्रादुर्भूतोऽस्ति गोकुले ।
अतो वयं मुनिश्चिन्ता जाताः सर्वत एव हि ॥ १ ॥

इति पञ्चमोऽध्यायः ।

षष्ठेध्याये वीर्ये वर्णनीये भक्तदुःखोक्तिरनुपपन्नेत्याशङ्क्याह **मायये**ति । माये-
१०-६-०. त्यसुरा इति श्रुतेरसुराणां तद्रूप एवोपास्य इति तत्सम्पादितपूतनारूपं मायारूपमिति तया करणभूतया कृत्वा भगवतैव कृतं दुःखमित्यर्थः । अत एव स्वामिनीनां श्रीत्वभानम्, अन्यथा ताभिरेव सा निवर्त्स्यत। अत एव तदभावाय मुक्तिदानं च । अन्यथान्यत्र प्रविश्य पुनर्दुःखदानसम्भवेन सर्वात्मना तन्निवृत्तिर्न स्यात् । तर्हि सुतरां दुःखमनुपपन्नमित्याशङ्क्य भगवति भक्तचित्तवृत्तिनिरोधहेतुत्वेन पुरुषार्थरूपं तद्दुःखमिति नेदं भक्तिमार्गे दूषणमित्याहुः **निरोधोक्ते**रिति । एतेन निरोधमार्गो मर्यादाभक्तिमार्गोद्विलक्षण इति सूचितम् । यद्वा । ईश्वरे रक्षाकरणं नोचितमित्याशङ्क्यैतदुक्तम् ।

अमंसताम्भोजकरेणेत्यत्र। स्वातन्त्र्येण सम्बन्धमत्रालभमाना गोपीद्वारा सम्बन्धे-
१०-६-६. प्सया तत्राविशतीत्याशयेनाहुः **स्वस्मिन्नावेशातिरिक्तरूपा**मिति ।

रसा दिशश्चेत्यत्र। **तासामपि चलन**मिति। तद्देवतानामित्यर्थः। प्राणैः समं
१०-६-१२. पानोक्त्यैव व्यसुत्वे प्राप्तेपि पुनस्तदुक्तिराध्यात्मिकादिभेदविवक्षयेत्याशयेनात्र तद्भेदा उक्ताः । अत एव जीवमर्मोक्तिरपि मूले । ननु भगवत्यागते गोकुले सर्वोत्कर्षवर्णनमेवोचितम्, न त्वेतादृशोपद्रवस्येत्याशङ्क्य पूतनावधोक्त्याऽलौकिकेभ्य उत्कर्ष उक्त इति वक्तुमुत्कर्षस्य च लौकिकालौकिकभेदेन द्विविधत्वाल्लौकिकः स पूर्वाध्यायेनोक्त इत्याहुः **साधारणस्थिति**रिति । तादृगुत्सवेन तत आरभ्येति वाक्येन गोकुल इति पदात्तदतिरिक्ते तदभावः सूचित इति तत्रैवोत्पातोक्त्या च लोकसाधारणी स्थितिर्गोकुलस्य तथेत्यर्थः । तेन लौकिकेभ्य उत्कर्ष उक्तो भवति । अलौकिकेभ्य उत्कर्षमाहुः **अविद्ये**ति । अत्रायं भावः । सा हि स्वरूपाज्ञानदेहेन्द्रियप्राणान्तःकरणाध्यासलक्षणपञ्चपर्वात्मिका । तत्र 'तत्प्रभया धर्षिते निरीक्ष्यमाणे अतिष्ठता'मित्युक्त्या जनन्योस्तत्कृतस्वस्वरूपविस्मृतिरुक्ता । ततो नष्टायां तस्यां सर्ववृत्तान्तानुभवे सत्यस्मत्तूष्णींस्थित्यैतादृशमभवत्कार्यमित्यतः परं सावधानतया भगवद्रक्षा कार्या, अन्या काप्यत्र न प्रवेशनीयेत्यवधृतिरभूदिति । तयोर्जननीत्वधर्मो यादृशस्तादृशो हृद्यागत इति निरोधरूपस्वस्वरूपस्मृतिरुक्ता भवति । गोपानां च रक्षकत्वेन स्थापितानां तद्रूपजमोहेनोक्तस्वस्वरूपविस्मृतिरभूत् । ततश्च जननीवदेतेपामपि भावो ज्ञेयः । एतेषां स्त्रीरूपेण मोहाद्धि तदनिवारणम् । तत्र च पुंस्त्वमेव हेतुरिति देहाध्यासस्य तदनिवारणे हेतुत्वमायाति । तस्यां सौन्दर्यमल्लिकादिसत्त्वेन रूपगन्धादिभिर्मनोहरणे चेन्द्रियाध्यासस्तथा । वज्रनिपातशङ्कायां भगवानधुना क्वास्ति कथमस्ति इति विचार एवोचितस्तमकृत्वा स्वप्राणरक्षार्थं क्षितौ पातस्तदध्यासहेतुकः । व्रजसीमन्तिनीनामन्तःकरणे भगवत्सम्बन्धसत्त्वेन तस्यैवात्रापि स्फुरणेन तदवारणमभूदित्यन्तःकरणाध्यासस्य तद्धेतुत्वम् । तथाचैवं तूष्णींभावस्य तन्मारणानन्तरं भगवद्धामिस्थानिष्टपर्यवसायित्वं दृष्ट्वा यथाकथञ्चित् कुशलिनं प्रियं प्राप्य पश्चात्तापयुक्ताः सन्तोऽतः परं नैवं स्थेयं, किन्तु

तत्परतयैवेति ज्ञानममूदिति सुष्ठूक्त'मविद्या पूतना नष्टा,' 'अतःपरं निरोधः सुगम' इति च । अत एव व्रजौकसां साधारणानां गोपीनां जनन्योश्च भावा उक्ताः। अत एवाग्रे 'सन्त्रसु'-रित्युक्त्वा 'गोप्यस्तूर्णं जगृहु'रित्युक्तम् । कृष्णासक्तिसमन्विता प्रपञ्चविस्मृतिः । सा निरोधरूपेत्यर्थः ।

ईषामात्रेत्यत्र, अनेनेति, हस्तादिमानं हित्वेषामात्रत्वकथनेनेत्यर्थः। कन्दराद्युपमाने
हेतुमाहुः **क्रीडेति** । तत् तस्याः शरीरम् । 'तस्या उरसि क्रीडन्त'मिति
१०-६-१५. वाक्यात्तथाजातमिति क्रीडायोग्यस्थानैरुपमीयत इत्यर्थः। तज्ज्ञानेन्द्रियं दुष्ट-मिति तथोपमा । ननु पूर्वमात्मभूषणकर्त्रीभिः प्रियतमे गोमूत्रसम्बन्धः कथं कारितस्तत्राह **अर्भकमिति** । प्रिये दुष्टसम्बन्धज्ञानेनातिकातर्येण सर्वविस्मृतिर्यथाकथञ्चिदमंगलनि-वृत्त्याशंसा च स्नेहस्वाभाव्यादवश्यं सदैव भवितुमुचिता, किं पुनरर्भकभावापन्न इति ज्ञापयि-तुमर्भकपदम् । मूले अयमेवार्थो 'ननु कथ'मित्यादिना पितृचरणैरुक्त इति ज्ञेयम् ।नन्वितरा-र्भकवत्तत्कालोचितरूपदर्शनाभिप्रायेण तदुक्तमिति शङ्कनीयम् । क्रीडन्तमकुतोभयमिति पदेन पूर्वमेव तन्निरासात् । ननु स्नेहवशाद्रक्षाकृतिरिति सत्यम्, परन्तु तस्या उपयोगः क्वेति विचारणीयम् । न च दोषाभावे, तेषामेवाभावात् । न च तदारोपाभावे, भ्रममूलकत्वा-पत्त्या रक्षाया अप्रामाणिकत्वापत्तेः । एवं सति भक्तिमार्गीयभजनमात्रस्य तथात्वापत्त्या महानेवानर्थश्च स्यात् । स्नेहस्य भ्रमजनकत्वेन दोषापत्तिश्च । न चैवमपि वक्तुं शक्यम्, सर्वप्रमाणविरोधात् । न च प्रमाणानामन्यपरत्वम् । स्नेहस्यैव भक्तिपदार्थत्वेन विवृतत्वात् सर्वत्र । नन्वत्र यथाकथञ्चिन्निरोध एव साध्यः । रक्षाकृत्या चासक्तिविशेषरूपः स सिद्ध इति न किञ्चिदनुपपन्नमिति चेत्, एवं सति देहाद्यध्यासरूपाज्ञानमूलकत्वेन स्रक्चन्दनादिसुखस्य हेयत्वं यथा, तथा लीलारसस्याप्यज्ञानमूलकत्वेन तथात्वं स्यात् । मोक्षादप्याधिक्यं भक्तौ तत्र तत्र निरूप्यत इति न तथा वक्तुं शक्यं चेत्युभयतःपा-शारज्जुरिति चेत् । अत्रेदं प्रतिभाति । माहात्म्यज्ञानदशायामपि स्नेहजो भावो दृश्यत इति नाज्ञानमूलकत्वं वक्तुं शक्यम् । तदुक्तं देवकीस्तुतौ, 'रूप चेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं मांसदृशां त्वं कृषीष्ठा' इत्युपक्रम्य 'समुद्विजे भवद्धेतोः कंसादहमधीरधी'रित्यादि । एवं सति ज्ञानभक्त्योर्युगपत्सत्त्वेपि स्नेहकार्यस्यैव सम्भवेन स्नेहस्य ज्ञानमार्गीयज्ञानाद्बलिष्ठत्वं ज्ञायते। तथा च 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावर' इत्यादिश्रुतिभ्यः शास्त्रीयज्ञानपूर्वकभगवत्साक्षात्कारवति भ्रमसम्भावनापि न कर्तुं शक्या, अतः स्नेहजभावस्य न भ्रमत्वमिति सर्वथा मन्तव्यम् । तथा सति विषयाबा-धश्च वाच्यः । प्रकृतेपि 'पतिं द्रष्टुमागतां श्रियममंसते'ति वाक्याद्भगवत्त्वेन ज्ञानवतीभिरेव रक्षा कृतेति ज्ञायते । एवं सति यथैकस्मिन्नेव पुरुषे पुत्रत्वभाववत्याः स्त्रियास्तद्दर्शने वात्स-ल्योत्पत्तिः, स्वपोषणपुष्टत्वपोष्यत्वादिज्ञानस्य च पतिभाववत्या विनयविशेषपूर्वकरसमावो

मनैहिकपारलौकिकनिर्वाहक इति च भाव उत्पद्यते। जारभाववत्यास्तु तत्प्रसङ्गेषु स्वरसपोषकत्वज्ञानेन प्रौढिपूर्वकविविधरसभावविशेषोत्पत्तिस्तदनुरूपभावाः पुंसस्युत्पद्यन्ते। न ह्युक्तभावविषया धर्माः पुंससन्त इति वक्तुं शक्यम्, अनुभवविरोधात्। तथा च तत्र विद्यमाना अपि धर्मास्तत्तद्भावैकगम्यत्वेन तत्तद्भाववतीनामेव विषयास्तथा स्नेहभावे सत्येव ये धर्मा भगवन्निष्ठाः स्फुरन्ति ते तत्र सन्त एव तादृगेकवेद्या एव तथेति न भ्रमत्वशङ्कापि। यथा 'न चान्तर्न बहिर्यस्ये'तिश्लोकोक्तधर्मवत एव दाम्नावच्छिन्नत्वम्, तथा लोकविलक्षणत्वेन माहात्म्यज्ञानजनकत्वेन ज्ञानप्रकरणोक्तधर्मविपरीतधर्मा लीलारूपा अपि प्रभौ सन्तीति नानुपपत्तिः काचित्। अत एव 'अतृप्नुरुत्सृज्य जवेन सा ययाविं'त्युक्तं शुकैः, अन्यथा 'न चान्त'रित्यादिधर्मवत स्तन्येन तृप्तिस्तदप्राप्त्या चातृप्तिर्विरुद्धा नोक्ता स्यात्। किञ्च। शास्त्रं हि यथाधिकारं ब्रह्मस्वरूपं निरूपयति। ज्ञानमार्गीयेभ्यो भक्तिरसादानान्मोक्षमात्रदानाच्च रसात्मकब्रह्मधर्मबोधने प्रयोजनाभावान्नैतान् धर्मान् ज्ञानमार्गे निरूपयति। नह्येतावता तदतिरिक्तधर्माभावः सिध्यति। येषु तज्ज्ञापनप्रयोजनमस्ति तान् ज्ञापयतीति व्रजसीमन्तिन्यादिषु तदज्ञापनम्। ते च ब्रह्मधर्माः स्नेहे जाते स्वत एवानुभूयन्त इति फलरूपत्वेन साधनमार्गे तदकथनं युक्तं च। ज्ञानकर्मादीनां विहितत्वेन साधनमार्गीयत्वात्। ननु ज्ञानमार्गस्याक्षरविषयत्वेन तथात्वस्य युक्तत्वेपि भक्तिमार्गीयेष्वपि केषाञ्चिन्मुमुक्षूणामुक्तधर्मास्फूर्तिः स्नेहवतां तु तत्स्फूर्तिः, तत्रापि तारतम्यमिति कथमिति शङ्का 'यथैकस्मिन्नेव पुरुष' इत्यादिना निरस्ता ज्ञेया। यथा प्रत्यासत्तिसाम्येपि न चक्षुषा गन्धादिग्रहोऽयोग्यत्वात्तथात्रापीति ज्ञेयम्। किञ्च 'रसो वै स' इत्यादिश्रुत्या लीलायाः स्वरूपात्मकत्वान्नानुपपत्तिः काचित्। यथैतत्तथा विद्वन्मण्डने प्रपञ्चितमस्माभिः। यद्वा। 'तेन ब्रह्मविदो वय पूत ब्रह्म पुनीमहे' इत्यादिश्रुतौ ब्रह्मणः पावनं श्रूयते। तच्च ब्रह्मात्मकातिशयविशेषप्राकट्यमेव। प्रकृते च 'रसो वै स' इत्यादिश्रुत्या भगवतो रसात्मकत्वात्तस्य च भावात्मकत्वाद्रक्षाकृत्या स्वामिनीभावविशेषरूपातिशयप्राकट्यमभूदिति तत्रैवोपयोगो रक्षाकृते। सौंदर्यविशेषाभिव्यक्तौ मण्डनकृतेरिव। अत एवाधुनापि स्वक्षुत्पिपासादि ज्ञापयति भक्ते हरिः। पूतनातः स्वस्मिन्नानीतानां बालकानामग्रे विनियोगयोग्यतासिद्ध्यर्थं राक्षसीस्पर्शजदोषोऽवश्यं निवारणीय इति स्वामिनीकृतरक्षायामन्यन्निवारणमप्येकं प्रयोजनं भगवदभिमतमिति ज्ञेयम्। एकस्या भगवल्लीलाया अनेककार्यसाधकत्वात्। अङ्गानि करणानि आत्मा कर्ता। तदाहुः करणकर्तृभेदेनेति।

अव्यादज इत्यत्र, अंघ्रिरयमित्यादि। अयं अजनीयत्वेनोच्यमान इत्यर्थः।

१०-६-२२. परिदृश्यमान एवाधिदैविकोऽजपदेनोच्यते। स स्वाधिष्ठानभूतमाध्यात्मिकं स्वस्मिन्निधीयमानमेव पात्वादिति प्रार्थनेति भावः।

१०-६-४४. **य एतदित्यत्र** । **इष्टजनकं** मोक्षजनकमित्यर्थः ।

इति षष्ठोऽध्यायः ।

सप्तमाध्यायप्रकरणार्थोक्तौ । **सङ्ग्रह** इति । अग्रे स्वोपयोगं ज्ञात्वोत्तमानामता-
दृशानां च स्वीयत्वेन स्थापनं हि लोके सङ्ग्रह इत्युच्यते । सोत्राधुनिक-
१०-७-०. निरोध एव । तथा च सङ्ग्रहनिमित्तमीर्यत इति सम्बन्धः । सर्वेषां दुःखोक्ते-
स्तात्पर्यमाहुः **यश** इति । **सर्वगमिति** । चरित्रमिति शेषः । दुःखमिति वा । एवं सति
तन्निवारके सर्वेषामासत्त्या चरित्रगानेन यशस्सिद्धिरित्यर्थः । आद्यपक्षे चरित्रस्य सर्वगत्वे
हेतुमाहुः **स्वासक्त्येति** । सर्वेषां तदा गानसम्भवेन तथेत्यर्थः । **तस्मिन्नेव दिवसे
रोहिणीनक्षत्रमिति**वाक्यमनतिप्रयोजनमपि स्वरूपकीर्तनपरमिति ज्ञेयम्, न तु व्या-
ख्यानमिति । नन्दव्रजस्थानां भगवदीयत्वात्तत्पूजनं चेत्स्यादुदिताश्रवणं न स्यात् । किन्त्व-
न्यव्रजस्थानां तत्रापि केवलं भिक्षुकाणां तेन तथेत्याशयेन ते चेत्सन्त इत्याद्युक्तम् ।

अप्रमेयं बलमित्यत्र । यद्यप्यत्र संशयो न कण्ठोक्तस्तथापि बालोक्ते श्रद्धाभावो-
क्त्या तन्निश्चयाभाव एवायाति, न तु विपरीतनिश्चयोपीति संशयप्राप्तिरि-
१०-७-१०. त्याशयेनाहुः **सन्देहस्त्वनेने**त्यादि ।

येसूयेत्यत्र । विप्रवाच एव सत्यत्वमुक्तम्, न कृतेरपीति यत्तत्तात्पर्यमाहुः **कृतं
तु सर्वेषामिति** । सर्वेषां भगवतो विप्राणां च निर्दोषाणां कृतमपि सत्य-
१०-७-१३. मेव, परन्तु तद्वचनाविरोध्येव, न तु स्वच्छन्दचरितमपीत्यर्थः । स्वकर्तव्य-
जातीयत्वेन ग्रहविषयत्वाभाव एव कृतौ सत्यत्वाभावो ज्ञेयः ।

एकदेत्यत्र । **वाचिकमित्यादि** । पूतनावधे रक्षाकरणे वाङ्नियुक्तेति तन्निरोध
उक्तः । शकटभङ्गे भगवदर्थः कायिको व्यापार उक्त इति तथा । तृणावर्त-
१०-७-१८. प्रसङ्गे भगवन्निमित्तकं दुःखं वक्ष्यते **मानसमिति** । मानसो निरोधस्तथा ।
प्रकरणान्निरोध एव विशेष्य इति लिङ्गमविवक्षितमत्रेति ज्ञेयम् । उक्तत्रयसम्बन्धिनिरोध-
करणं वा विशेष्यम् । रक्षाविधानशान्त्यादेर्भगवल्लीलात्व उपपत्तिमाहुः **अन्यथेति** । एतस्य
निमित्तत्वाल्ल्यब्लोपे पञ्चमी ज्ञेया । तथा च तत्प्राप्य तद्विषयत्वं प्राप्येति यावत् । ज्ञानहेतुषु
स्वरूपतद्धर्मेषु सत्स्वपि स्वलीलार्थं तेषामन्यथाज्ञानं स्वस्मिन् प्राकृततुल्यत्वेन ज्ञानमुत्पाद्य
स्वयमेव सर्वं करोतीत्यर्थः । तेन रक्षाविधानादिना पूर्वस्माद्वैलक्षण्यभानं यथा लोके तथा
स्वस्मिन्नपि प्रकटयतीति ज्ञेयम् । तथा ज्ञानाभावे तूक्तप्रकारको निरोधो न स्यादिति
भावः । अन्यथा ज्ञाने सति कायवाङ्मनोनिरोधकथनाच्छास्त्रेत्यद्भुतत्वं चरित्रेस्मिन्
ज्ञापितं भवति । किञ्च । एकस्मिन् बाले सर्वेषां सहजस्नेहो लोके न सम्भवतीति तथात्वं
यदत्र तद्भगवत्कृतमेवेति ज्ञायते । यद्वा । मानसिकनिरोधस्यावश्यकतामाहुः अन्यथेति ।

अत्र गुरुत्वात्मकस्वधर्मज्ञापनपूर्विका लीलोच्यत इत्येतत्कथनाभावे जीवसहजाज्ञानतो हेतोर्नन्दयशोदादिः सर्वं करोतीति ज्ञानं सर्वेषां भविष्यतीति तदभावायैतदुच्यत इत्यर्थः । **अनिमित्तश्चेति** । अङ्कारोहे कालो न निमित्तमिति न विद्यते कालो निमित्तं यस्य तादृगारोह इति च न तत्कथनमित्यर्थः ।

महापुरुषमादध्यावितित्र । **आगतस्त्विति**त्यादि । उक्तविधासक्तौ मातृत्वेन
परानुरोधाभावाद्दोचारणरात्रिलीलादिकं सर्वं प्रतिबद्धं तथा स्यादुक्तज्ञाने
१०-७-१९. सार्वदिके वा लीलारसानुभवो न भविष्यतीत्याशङ्क्य गोकुले समागमनं सर्वसुखदानार्थमिति यथैव तद्भविष्यति तथैव सम्पादयिष्यतीति न काप्यनुपपत्तिरित्युक्तमेतेन। किञ्च । **लालनेत्यादि** । आनुषङ्गिकफलस्यासार्वदिकत्वादपि ज्ञानमिदं न स्यास्यतीति भावः । मुख्यं फलं तदेव स्वयं, निरोधो वा तत्कृतः । गोकुलं सर्वमावृण्वन्नित्यादि प्रकरणार्थनिरूपणेऽविद्यापर्वपञ्चककथनं तच्चानुपपन्नम् । यशोदादिस्नेहे तथात्वस्यायोगादत आहुः **लौकिकादिति** । प्राकृतबालके तादृक्समये लोकानां यथा शङ्का तथात्रापि सात्ययुक्तेत्यमंशो लौकिकः स तत्पर्वरूप उच्यते। न तु स्नेहदुःखादिरपि। अलौकिकत्वात् ।एतदेवाहुः **लौकिकादिति** । लौकिकसजातीयत्वादुक्तभावस्य पर्वत्वमुच्यत इत्यर्थः ।

सा वीक्ष्येत्यस्याभासोक्तौ । **अद्यापि तस्या** इत्यादि । अत्रायमाशयः ।
मातुर्हि पुत्रत्वेनैवात्र स्नेहः, स च लौकिकसरूप एव वाच्यः, परन्तूत्कटः
१०-७-३७. स्वरूपतोऽलौकिकश्च । तथा च तत्र लौकिकविजातीयधर्मदर्शनं प्रथमत एव स्नेहप्रयुक्तातिभयजनकम्, येन प्राणस्थितिर्न भवति, अतः क्रमेण किञ्चित् किञ्चित् तथाविधधर्मदर्शनेऽग्रे सहजभगवद्धर्मत्वेन[1] ज्ञानाद्धैर्येण सर्वसामञ्जस्यं भविष्यतीत्यधुना तथा ज्ञानाभावाद्धैर्याभाव एवाधिकाराभावरूप उच्यते । तेन क्षणमात्रं प्रदर्श्य तिरोहितं कृत्वा विस्मयरसमुत्पादितवानिति सर्वं सुस्थमिति ।

इति सप्तमोध्यायः ।

अष्टमेध्याये प्रकरणार्थोक्तौ । संस्कृतान्येव नामानीति । सत्त्वशोध-
नस्य मर्यादामार्गीयत्वाद्गुरूपदेशलक्षणसंस्कारवन्त्येव तानि तथेत्यर्थः । इयद-
१०-८-०. वधि यशोदाद्यधीनमेव गमनादिकमुक्तमस्मिन् सत्त्वशोधकाध्याये स्वातन्त्र्येण रिङ्गणादिलीलोक्त्या सत्त्वशुद्धिपर्यन्तं स्त्रीसम्बन्धि लीलाविशिष्टं रूपं न भावनीयम् । माक्षिकोपि दोषः परिहरणीय इति न्यायात् । किन्तु केवलभगवत्कृतलीलाविशिष्टमेव रूपं तच्छुद्ध्यनन्तरं सा लीला भावनीयेति तात्पर्यं ज्ञाप्यते। एतदेवाहुः **स्वेच्छा लीलेत्यादिना**। स्वेच्छया, न त्वन्येच्छया कृता या लीला तद्विशिष्टं रूपं शोधकमिति सम्बन्धः । पूर्वस्मादेतस्य वैलक्षण्ये हेतुमाहुः **आनन्देति** । आनन्दस्वरूपत्वादित्यर्थः । गूढाभिसन्धिमुद्घाट-

---

[1] सहजधर्म इति ।

यन्ति अन्येच्छयेति। भक्तानां भगवत्सम्बन्धेनैवानन्दो, भगवांस्त्वानन्दरूप एवेत्यस्मि-न्नध्याये न दुःखकथनम्, अन्याधीने चरित्रे क्वचिद्दुःखमप्युक्तमिति तस्माद्वैलक्षण्यमित्यर्थः। कंसस्यैतज्ज्ञानं स्वानिष्टमित्युक्त्या रहसि नामकरणाद्दुःसङ्गवर्जनमङ्गत्वेन सूचितमिति तदाहुः दुःसङ्गवर्जनमिति।

अयं वै रोहिणीपुत्र इत्यत्र, **वस्तुत** इत्यादि। अप्राकट्यदशायामव्यवहार्ये

१०-८-१२. ब्रह्मणि सत्यन्यपदार्थवल्लोके केवलं स्वरूपत एव भगवन्नामप्राकट्याभावाद्भगवतः प्राकट्यात्मकगुणयोगादेव लोके नामानि प्रकटानि भवन्तीत्यर्थः। यथाश्रुतार्थकथने नामानि रूपवन्नामरूपस्यापि भगवतो रूपाणीत्यारभ्याखण्डान्येवेत्यन्ते-नाग्रिमग्रन्थेन विरोधः स्यात्। **यशोदायाः पुत्रत्व इति**। अत्रायं भावः। गर्गः पूर्ववृ-त्तान्ताभिज्ञोऽत्रागत्याधुना भगवद्भाववत्त्वेन भगवति यशोदापुत्रत्वलक्षणं धर्मं च दृष्ट्वा सन्दिहानस्तत्त्वंनिश्चयं जानंस्तद्वाच्यव्ययं वा इत्युक्तवान्। अत एव विपरीतनिश्चयो नोक्त इति भगवन्नामकरणप्रस्तावे सम्यग्भगवद्भावान्निश्चयोभूदिति तवात्मजस्ते सुतस्येत्युक्तवान्।

तान्यहं वेदेत्यस्य विवृतौ। सारूप्येण साधकमित्यादि। ननु साङ्केत्या-

१०-८-१५. दिना भगवन्नामोच्चारणस्यापि फलसाधकत्वं श्रूयत इत्याशङ्क्य तत्तात्पर्यमुच्यते। सङ्केतिते पुरुषे सदानन्दत्वादिधर्मबाधेन भगवन्नाम्नस्तत्रावाचकत्वाल्लौकिक एव शब्दस्तत्समानाकारस्तद्वाचकः स इति मन्तव्यम्। तथा च सारूप्येणापि मोचकमिति माहात्म्यज्ञापनपराण्यप्रवर्तमानस्य च प्रवर्तनपराण्युपाख्यानानीत्यर्थः। ज्योतिः-शास्त्राभिज्ञत्वं भाविज्ञाने लोकप्रतीतिमनुसृत्य हेतुत्वेनोक्तम्। भगवद्धर्माणां तच्छास्त्रागम्यत्वात्। 'न लभ्यते यद्भ्रमतामुपर्यध' इति वाक्यात्। भाविरूपनामज्ञानहेतुत्वेन वा तदुक्तम्।

एष वः श्रेय आधास्यदित्यत्र। स्वयं पुरुषार्थरूपोपीति। ननु धार्यधार-

१०-८-१६. कयोर्भेदाद्भगवदतिरिक्तस्य श्रेयस्त्वं भक्तिमार्गविरुद्धमित्यत आहुः स्वयमित्यादि। एवं सति श्रेयोधारकत्व नन्दादीनामेव तत्प्रतिबन्धकनिवर्तकत्वेन भगवत्युपचर्यत इत्यर्थः। तथा च नन्दादीनां भक्तत्वेन सर्वपुरुषार्थरूपस्य भगवतस्तत्राविर्भूय विराजमानत्वादन्यस्य श्रेयस्त्वाभावेपि तद्धारकत्वमुक्ताभिप्रायेण भगवति न विरुध्यते। यद्यपि भगवति विद्यमाने दोषाणां प्रतिबन्धकत्वमेव न संभवति, क्व तन्निवर्तकत्वेनोपचारः, तथापि लीलायां निरोधसिद्ध्यर्थमस्मत्प्रभुणा लोकरीतिरेव स्वीकृता। यतस्त-दर्थं स्वरूपमपि तथा प्रदर्शितवान्। तदुपपादितं 'बभूव प्राकृतः शिशु'रित्यत्र। लोके च यथा यथा प्रतिबन्धबाहुल्यम्, तन्निवृत्त्या पुनः फलानुभवः, तथा तथा दुरापलज्ञानेन फ-लेप्यासक्तिरधिकतरा भवतीति दृश्यते। अतो नन्दादीनामासक्तिसिद्ध्यर्थं स्वेच्छयैव दोषरू-

१ तत्रेति पाठः। २ भक्त्या मामभिजानातीत्यधिकं क्वचित्।

पान् पूतनादीन् प्रतिबन्धकत्वेनोद्भाव्य तन्निराकरणद्वारा स्वयमेव तच्छ्रेयोरूपः फलतीति मनस्यभिसंधाय साधूक्तं **स्वय**मित्यादि तातचरणैः ।

नारायणसमो गुणैरित्यत्र । उपमेये तत्समाना धर्मा ये त उच्यन्ते । एत-
स्सृष्टिविलक्षणा हि लीलासृष्टिरियम् । अस्यामुत्पादितास्तु जीवगणा दशरस-
१०-८-१९. सम्बन्धिनो यावन्तो भावा भगवद्विषयकास्तद्वन्त इति तद्भावपोषार्थं भगव-
तापि तथैव स्वनिष्ठा गुणाः प्रकटीक्रियन्त इति भगवद्गुणस्यापकत्वं तेषाम् । न च मन्तव्यमेतादृशा एव केचन जीवाः सन्ति, येषामेतादृक्सामर्थ्यं सहजमस्तीति, यतस्तद्रूपः स्वयमेव प्रकटो जात इति ज्ञापनायाहुः **तावद्गुणप्रसिद्ध्या** इत्यादि । एतेन प्राकृतानां नैतद्रसप्राप्तिरिति ज्ञापितं भवति । **द्वितीये**त्यादि । अत्रैतादृशो व्रजसुन्दरीपरिग्रह एव । रसाधिक्ये पुंभावेनाग्रिमोक्तधर्माः स्पष्टाः । तृतीये गोपिकाधीनत्वादि स्पष्टम् । 'अहं भक्तपराधीनः' 'एवं मदर्थोज्झिते'त्यादिवाक्येभ्यः । एतदेवोक्तं त्रिविधा अपीत्यादिना । **श्रिया कीर्त्ये**त्यत्र । **एवं कृष्णोपि करोती**ति । व्रजसुन्दरीणामिति ज्ञेयम् । अग्रे स्पष्टम् ।

कालेन व्रजतेत्यत्र । आभासोक्तौ **तस्मिन्नेवाधिदैविके** गच्छतीति । नन्वेवं
सति गतेर्गमनमुक्तं भवतीत्यनुपपन्नमिति चेत्, अत्रेदं प्रतिभाति । उत्तरदे-
१०-८-२१. शसम्बन्धफलिका हि गतिः, तत्तत्कालविशिष्टा लीला च नित्यत्वेन विद्यमा-
नैव क्रमेणाच्छाद्य क्रमेणाविःक्रियत इति रिङ्गणादिलीला यस्मिन् काले स कालोधुना प्रकटित इत्ययमेव पूर्वलीलाकालस्योत्तरदेशस्थानीय इत्युक्तन्यायेन तत्सम्बन्धित्वे जाते तदाधेयरिङ्गणलीलामपि प्रकटितवानिति हृदयम् । तथा च लीलानित्यत्वज्ञापनाय कालेन व्रजतेत्युक्तमिति सारम् । **उपविष्टमि**त्यादि । उक्तत्रिविधरूपस्यैवानुवादोयम् । **अन्याश्रित**मित्यादि । कथञ्चित् केनाप्यंशेनान्याश्रितं रूपमित्यर्थः । स्वतः स्वातन्त्र्येण क्रियमाणलीलाविशिष्टं रूपमित्यर्थः । **सर्वथा** । सर्वांशेन स्वतः क्रियमाणलीलाविशिष्टं रूपमित्यर्थः । **निर्गुणे**ति । ताभिश्चरित्रे ज्ञापिते सति तदनन्तरं ताभिः परिदृश्यमानं निर्गुणावस्थवेद्यं रूपमित्यर्थः । अखिलैतत्प्रकरणतात्पर्यमाहुः **सात्त्विकादी**ति । सात्त्विकादिभेदोपलक्षितास्ते ते ये पुरुषास्तत्तद्धृदयगामिनि रूपे सति सा हृदयस्थितिस्तथा कृत्वान्तिमे रूपे स्थिरा भवति, स्वरूपमात्रनिष्ठा भवतीत्यर्थः ।

गोकुले रामकेशवावित्यत्र । रिङ्गणलीलायां केशकृतः शोभातिशयो भवतीति तत्राधिक्यं मन्वानैरुक्तम् । वस्तुतस्त्वित्यारभ्यापेक्षाभावादित्यन्तम् । भगवद्वाचकत्वे योर्थस्तमनूद्य तत्रारुचौ हेतुमाहुः **प्रत्यये**ति । मत्वर्थीयवप्रत्ययाभावे तत्सौन्दर्यालाभादिति भावः । उभयोस्तरतमभावेपि गतिसाम्ये हेतुमाहुः **भगवद्गतित्वे**नेति । बलदेवेप्याविष्टस्यैव गतिर्निरूप्यते । सा चैकैवेति तथेत्यर्थः । वयसोधिकत्वेन बलदेवरिङ्गणं पूर्वं कुतो नोक्तमित्याशङ्क्यात्र भगवद्गतिरेव वाच्या तत्सम्बन्धश्चात्र नामकरण-

मारभ्येति भगवद्रिङ्गणलीलासमय एव तदुक्तिरपीत्याशयेनाहुः **भगवत्सन्निधान** इत्यादि। पाण्योः सहभावोक्त्या गौणत्वोक्तिपूर्वकं रिङ्गणे जानुनोः प्राधान्येन निरूपणस्य तात्पर्यमाहुः **जानुभ्यामिति**। सर्वमूलरूपत्वेनैतयोः सुतलाधिदैविकरूपत्वमुच्यते। 'द्वे जानुनी सुतल'मिति वाक्यात्। तथा च रिङ्गणलीलायां जानुनोरपि घर्षणं संभवतीति तमंशमादायेदमुक्तम्। घर्षणे पीडासंभवात् तस्याश्चात्रायुक्तत्वाल्लोकसाम्येन सर्वकरणात् तज्जनितकिणधारणेनापि सा तदपास्य दैत्यगामिनीति मन्तव्यमिति भावः। न च जानुनोरेव सहभावो वाच्य इति वाच्यम्। अस्या लीलायाः प्रथमगतिरूपत्वेन तस्याश्च पदधर्मत्वेन तयोरेव प्राधान्यस्योचितत्वादिति भावः।

उज्झितगृहा इत्यत्र। सूचितमानुपङ्गिकमप्यर्थमुक्तवन्तः **एवं कर्मभ्य** इत्यादिना। **प्रेक्षन्त्यो ज्ञानपरा** इत्यादि। उक्तत्रिविधासु तासु मध्ये स्लाघाः
१०-८-२४. कौतुकं मत्वा वत्सपुच्छालम्बनेन गतिं द्रष्टुमेवोद्यता इति ज्ञानपराः। प्रियदर्शनकटाक्षस्पर्शादिरसाविष्टानामन्यत्र रागाभावः स्पष्टः। तृतीयास्त्वेकाकी प्रियः प्राप्त इति सन्तोषाद्धसन्त्यो जाताः। **विनियोगस्त्विति**। उक्तत्रैविध्यकथनेनेत्यर्थः। अङ्गं नयन्तीत्यङ्गे वा नयन्तीति तथेति तदुक्त्येति वा।

गृह्याणि कर्तुमित्यत्र पञ्चमलीलायामिति। जन्मप्रकरणयुक्तं फलप्रकरणं पञ्चममिति तत्रोक्ता सा पञ्चमीति ज्ञेयम्। **ततस्त्विति त्रिभिरिति**।
१०-८-२५. ततस्त्वित्यस्मादग्रिमैस्त्रिभिरित्यर्थः। तद्भाववतां निरोधहेतुत्वेन लीलायामपि ते गुणा उपचर्यन्ते।

व्रजस्त्रीणां मुदं जनयन्नित्यत्र। अन्यथेति। तन्निर्देशो न स्यादित्यनेन सम्बध्यते। अन्यथेत्यस्यैव विवरणं शिष्टेन। तथा चानुपङ्गिकं फलं व्रजस्त्रीणां
१०-८-२७. मुत्करणम्, न तु तदेकप्रयोजनत्वेन लीलाकरणमिति चेत् स्यात्, तदा 'व्रजस्त्रीणां मुदं जनय'न्निति शुको न वदेदित्यर्थः। अनावश्यकत्वादिति भावः। निरोधस्यात्रोद्देश्यत्वेनापि तथा मन्तव्यमिति हृदयम्। तर्हि तद्धर्मप्राधान्यात् ता मुमुदिर इति वदेन्न तु प्रभुप्राधान्येनेति चेत्, तत्राह **निरोधजनकत्वं स्वस्येति**।

मर्कान् भोक्ष्यन्नित्यत्र। सोपीत्यादि। यद्यपि श्रौतं ज्ञानं न सहजमेतासां, भगवता लीलार्थं न ज्ञाप्यते च, तथापि भगवद्धर्मनिरूपणे चित्ते तदावेशाद्भ-
१०-८-२९ गवति सोपि धर्मोस्तीति वस्तुस्वभावात् तस्यापि स्फूर्तिः। तत्रापि भोजनप्रकरणादस्यैव धर्मस्य। अन्यथा पुरःस्थिते प्रियेऽयमित्यनुक्त्वा स इति न वदेयुरिति भावः।

हस्ताग्राह्य इत्यत्र। पञ्चविधमित्यादि। प्रकारशब्दोत्र साधनवाची। तथा च पीठादिसाधनयुक्तं तदयुक्तं चेति द्वैविध्यम्। यस्मिन्काले तद्गृहे कोपि न
१० ८ ३० भवति। तत्कालविषयकं ज्ञानं वस्तुविषयकं च तथा। **तदीयांशानामिति**।

पूर्वोक्तज्ञानस्यांशाः पीठादयो विषयत्वात् ज्ञानस्य स्वतो निरंशत्वेन तस्यैव तथात्वात् । तथा च स्वगृहे सदा तज्ज्ञानमिति तत्सम्बन्धिभगवज्ज्ञानमपि सदेत्युपकार एवेत्यर्थः ।

न ह्युपालब्धुमैच्छदित्यस्य विवृतौ। यावन्नात्यन्तासक्त्येति। नेत्यत्यन्त-
; १०८३१ पदविशेषणम्। अत्यन्तासक्तौ तु बाह्यानुसंधानमेव न स्यादिति भावः। **सोऽप्युद्गत** इति। भगवद्विषयकः पुत्रत्वेनाध्यासोपि निवर्तिष्यत इति सम्बन्धः। अत एव प्रणता स्वमतिप्रकारगणनाया'मेष मे सुत' इत्युक्तवती। निवर्तने हेतुमाहुः **स्वसमानेति**। पुत्रत्वेन स्नेहाद्धि मृद्भक्षणे शिक्षार्थं लोकन्यायेन विरुद्धाचरणमपि संभवतीति तच्चिकीर्षायां स्नेहसमानविषयको विरोधो भवतीति स्वधर्मप्रदर्शनेन सोपि निवर्तिष्यत इत्यर्थः ।

एकदा क्रीडमाना इत्यत्र। **ये स्त्रीणां सुखार्थं** इति। पूर्वं वयस्यैर्व्रजबालकै-
१०-८-३२ र्व्रजस्त्रीणां मुदं जनयंश्चिक्रीड इत्युक्तम् । तथा च तच्छब्दस्य पूर्वपरामर्शित्वेन त एवोच्यन्त इत्याशयेनाहुर्ये इत्यादि । **निरोधस्येति** ।.मृदोनिष्टहेतुत्वेन ज्ञानेन हि तदभावाय निवेदनम् । तच्च स्नेहं विना न संभवतीति कथं तदकरणमुक्तमिति चेत् । उच्यते । क्रीडमाना इत्यात्मनेपदप्रयोगेण न भगवदर्थं नापि भगवत्सङ्गे क्रीडेयम्, किन्तु स्वार्थमेव परस्परमेवेति च ज्ञाप्यते। सर्वभावेन निरोधे तु तथा करणं न सम्भवतीति तथोक्तमाचार्यैः । व्रजस्त्रीमुञ्जननस्यैवोद्देश्यत्वेन तदुपयोगिलीलोपयोगित्वेन बालकसहभाव इति हृदि कृत्वा स्त्रीसङ्गादित्युक्तम् । अत एव मुख्यो निरोधो न सम्पन्नः, आनुषङ्गिकस्तु जात इति भावः। **तत्कार्यम्** । निरोधाकरणकार्यमित्यर्थः । यथैव ता भगवत्सङ्गता भवन्ति तथैव सम्पादयतीति स्त्रीरतिकर्तृत्वं रामे । अत एव रसरीत्या ताम्बूलाद्यङ्गीकार एवास्य रोचते, न त्वलौकिक्या अपि मृद इति स्नेहवशादेव दोषदृष्टिस्तत्र । अत एव रामाद्या इत्यत्रातद्गुणसंविज्ञानो बहुव्रीहिः, तेन बालकविजातीयो भावः सूच्यते । रामे गोपबालकत्वाभावात्तथा । गोपानां त्वग्रे निरोधो वक्तव्य इत्यधुना तथा न निरोध इति तथोक्तम् । पुत्रशब्दविवरणं लोकसम्बन्धीति ज्ञेयम् । तथा च यत्र लौकिक एव स एतादृशस्तत्र भगवानङ्गीकृततथात्वः स्वापराधकरणात् क्रियारूपाद्रक्ष्यतीति युक्तमेवेति भावः । अत एव वचनमेव, न तु क्रिया काचिद्विरुद्धा ।

भयसम्भ्रान्तप्रेक्षणाक्षमित्यत्र । प्राकृता बाला हि ताडनभिया मातृसंमुखं
१०८-३३. द्रष्टुं न पारयन्ति, प्रभुरपिताननुकरोतीत्यस्यालौकिकत्वेन तत्तात्पर्यमुच्यते । **प्रदर्शयिष्यमाणमित्यादि** । मुखारविन्दे प्रदर्शयिष्यमाण रूपं ब्रह्मधर्मत्वाद् ज्ञानात्मकमेव । तत्साधनत्वादपि तथोच्यते । एतस्य भविष्यमाणमधिकरणं माता । अग्रे ज्ञानजननात् । तत्र च भगवति दोषारोपो विरोधी गुणः । भगवत्प्रेक्षणं ज्ञानरूपमिति तच्चेन्मातर्यागच्छति, तदा तेन ज्ञानमाविर्भवति । तच्चोक्तगुणशङ्कयेतस्तत एव भ्रमणं करोति । न तु संमुखं निरन्तरं यशोदाविषयकं भवतीति तथा। अत एवाग्रे ज्ञानं जननीयमिति मात-

१ प्रणतास्मीतिप्रकारेति पाठः ।

रमीक्षते । परन्तु प्रकर्षेण नेति ज्ञापनाय प्रशब्दो मूले । विरोधी च गुण इत्यादिनेक्षणप्रेरणायां हेतुत्वेन प्रभुतात्पर्यमुक्तम् । वस्तुतस्तु तत्कालीनमौग्ध्येनैव मोहिता नान्यत्कर्तुमशक्त् । तथापि स्नेहभरवशतोस्मिन्नर्थे विज्ञप्तिः कार्यैवेति तां कृतवती । तत्र सम्बोधनेन कृपालुत्वमुक्तम् । तथाहि न दान्ता अदान्ता असंयतेन्द्रियाः पुरुषा इति यावत् । तेषामप्यात्मा निरुपधिहितकर्तेत्यर्थः । मृद्भक्षणमस्मद्धितं न भवति, मनःखेदहेतुत्वादिति भावः । अत एव हेतुरेव पृष्टः, भगवांस्तु मात्रादिसम्भावितमृद्दनकार्याभावादेव हेतुविचारो न युक्त इत्याशयेनोत्तरितवान् । अन्यथा लोके बालस्वभावमेव प्रसिद्धं हेतुं जानन्ती कस्मादिति न वदेत् । तदानीं ज्ञानदित्सया तादृगीक्षणेन चैतावन्मात्रं ज्ञानमभूदग्रे सम्पूर्णं भविष्यत्येवेति हृदयम् । भगवत्प्रेरणया गन्तव्यमेवेत्यनेन पितृचरणैर्ज्ञापितम् ।

सर्वे मिथ्याभिशंसिन इत्यत्र । **नैवेद्यमिति** । उपासनामार्गीयैः पूजायां दत्तं
१०-८-३५. नैवेद्यं तथेत्यर्थः । **शुद्धान्नसम्बन्धेनेति** । साक्षाद्भगवद्भक्षितत्वेनोच्छिष्टं यदन्नं तच्छुद्धान्नपदेनोच्यते । भुक्तशिष्टान्नान्मुखारविन्दमध्यस्थं चर्वितं ताम्बूलमिव मुख्यमुच्छिष्टं भवति । न ततोन्यत्फलरूपं शोधकं वास्तीति तत्सम्बन्धेन तथात्वायेत्यर्थः । वन्यत्वं साधारणभगवत्सम्बन्धो वात्र शुद्धिपदार्थ इति न वक्तुं शक्यम् । भगवदन्तःस्थितानां पूर्णपुरुषार्थत्वेन तथाविधेन तेन कृतार्थत्वोक्तेरनुचितत्वात् । यत्त्वेते बालका इत्यारभ्य मिथ्याभिशंसिन इत्यन्तं वाक्यं तन्मर्यादामार्गपरं ज्ञेयम् । 'वशे कुर्वन्ति मां भक्त्ये'ति वाक्याद्यथैव तत्तोपस्तथैव भगवतः कर्तव्यं भवतीति स्वमर्यादामतिक्रम्य भक्तेच्छानियम्यत्वाङ्गीकारात् पुष्टिमार्गीयभक्तिमार्गे भक्षणादिकं सर्वमुपपद्यते । वस्तुतस्त्वियमेव पुरुषोत्तममर्यादा यद्भक्तवश्यत्वम् । अत एवाधुनापि भाग्यवतो भक्तानाज्ञापयति भोग्यविषये ज्ञानमिश्रभक्ते मर्यादाभक्तिमार्गीयभक्तेऽनवतारदशायां चानशनादयो धर्मा भगवता प्रकटीक्रियन्त इति तद्विषयाणि तथाविधवाक्यानीति ज्ञेयम् । यद्यपि यथा सर्वे ब्राह्मणा भोजयितव्या इत्यत्र सर्वपदस्य निमन्त्रिततत्परत्वम्, तथात्रापि रामादिपरत्वमिति नानुपपत्तिः काचित् । तथाप्याचार्यैस्तु बाला इत्येत इति वाऽनुक्त्वा सर्वपदं भगवतोक्तमिति तत्तात्पर्यमुक्तमेते बालका इत्यादिना । तत्तात्पर्यं चोक्तमेव । ज्ञानप्रकरणत्वादपि तथोक्तिरिति न भक्तिमार्गीयविरोधः शङ्कनीयः ।

यद्येवमित्यस्याभासे । **अपेक्षितमिति** । मुखव्यादानमित्यर्थः । विशेषेणासमन्ता-
१०-८-३६. देहीत्यपि ध्वनिः । भक्तिमार्गीयत्वमत्र विशेषः । तस्यापि यावती मर्यादास्ति यावद्रूपं वा तत्तदानमाङोर्थः । अत एव सर्वात्मभावावधि ज्ञानं जातम् । अन्यथा तदतिरिक्तबुद्धीनां भगवद्विषयिणीनामपि कुमतित्वं नोच्येत ।

अव्याहतैश्वर्य इत्यस्याभासे । **कथं सर्वसंवाद इति** । 'यः पृथिव्यां तिष्ठ'न्नित्यादि सर्वश्रुतिसंवाद इत्यर्थः ।

सा तत्रेत्यत्र। **प्रतिकृतिरूप**मिति। यथा 'क्षुरः क्षुरधान' इत्याद्युपनिषद्भिस्तथा।
१०-८-३७. सूनोस्तनौ। सूनोर्विदारितं यदास्यं तस्मिंश्च वीक्ष्येति सम्बन्धो ज्ञेय इत्याशयेनाहुः **तस्मिन्नन्तर्बहिः सर्वत्रैवे**ति। अन्यथा तनुविशेषणत्वेन स्त्रीलिङ्गत्वापत्तेः।

किं स्वप्न इत्यत्र। **सन्ध्यत्वा**दिति। 'तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने
१०-८-४०. भवतः, इदं च परलोकस्थानं च, सन्ध्यं तृतीयं स्वप्नस्थान'मिति श्रुतौ स्वप्नस्य सन्ध्यत्वमुक्तम्। एतच्चेहलोकमध्यपातित्वेति तद्वैलक्षण्यम्। **कार्त्स्न्येने**त्यादि। स्वप्नसृष्टेरसत्त्वे व्यासचरणैर्हेतुरुक्तो 'मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वा'दिति। एतदर्थस्तु स्वप्नसृष्टिर्मायामात्रम्, तत्र हेतुरग्रे यस्य यादृशं स्वरूपं देशकालवस्तुसापेक्षं तथाभिव्यक्तिः कार्त्स्न्येनाभिव्यक्तिस्तदभावादिति। **उभयोश्चादर्शन**मिति। द्रष्टृमायिनोर्मायिकैः पदार्थैः सहादर्शननियम इत्यर्थः।

चेतोमनःकर्मेत्यत्र। **कायिकमत्रे**ति। उत्तमकायहेतुप्रारब्धमित्यर्थः। **परस्प-**
१०-८-४१. **रव्याघाता**दिति। एकदैवैकस्यैव वस्तुनोन्तर्बहिश्च स्थितिकथने तथात्वादित्यर्थः। **विचारेपी**ति। मायिकानां भ्रमप्रतीतानां वस्तूनां विचारासहत्वम्, अत्र च तद्वैपरीत्यमित्यर्थः। मायातिरिक्तस्त्वहमिति विवरणे पुलिङ्गनिर्देशो बुद्धिप्रकाराणां दुष्टत्वेन गणनाच्छुद्धजीवमात्राभिप्रायेण कृतः।

सद्योनष्टस्मृतिरित्यत्र। **अनुभवस्मरणयो**रिति। न संस्कारनियम इत्यर्थः।
१०-८-४४. अन्यथा अनुभवाव्यवहितोत्तरक्षणे यत्र स्मृतिः सा न स्यात्। नचैवंविधा सा नास्तीति वाच्यम्। बाधकाभावात्। न चोपनीतभानमेव तत्रेति वाच्यम्। स्मृतित्वोच्छेदप्रसङ्गात्। संस्कारोपनीतत्वस्य सर्वत्र वक्तुं शक्यत्वात्। न च ज्ञानातिरिक्तस्योपनायकत्वाभावान्न तथेति वाच्यम्। अप्रयोजकत्वात्। क्लृप्तमानाभावेपि ज्ञानजनकत्वस्योपनायकत्वेन संस्कारेपि तत्सत्त्वात्। न च संस्कारजन्यत्वस्य स्मृतित्वात् नैवमिति वाच्यम्। साक्षात्प्रमाणजन्यज्ञानत्वस्यानुभवत्वेन तदतिरिक्तज्ञानत्वस्य स्मृतित्वात् क्लृप्तद्वारातिरिक्तानन्तरितत्वं साक्षात्त्वं विवक्षितम्। अत एव स्मरामीत्यनुव्यवसायस्तदुत्तरक्षणे तमेव विशेषमवलम्ब्य भवति। यथानुभवत्वसामान्येप्यनुमित्यनन्तरमनुमिनोमीत्येव प्रत्ययो न त्वनुभवामीति तथेति भावः। यद्वा। लौकिकवस्तुतत्त्वनिरूपणे नास्माकं प्रवृत्तिरिति लोके स्मृतिः संस्कारजन्यैवास्ताम् न वा, प्रकृते त्वलौकिकप्रदर्शनप्रस्तावेन तत्सम्बन्ध्यग्रेतनमप्यलौकिकमेवेति ज्ञापनाय तथोक्तिः। एतदेवात्रपदेनोच्यते। स्मृतिनाशोक्तेस्तदुत्पत्तिरवश्यं वाच्या। सा चोत्पत्तिक्षणोत्तरक्षण एव नष्टेति ज्ञापनाय सद्यःपदं मूले। अन्यथा नाशस्यानुक्तिसिद्धत्वेन तन्न वदेत्। एवं सति द्वितीयक्षणाधिकरणकनाशस्याप्रासत्वात्तदा तन्नाश इति ज्ञापनाय सद्यो नष्टस्मृतिरित्युक्तम्। तेनेदमप्येकमलौकिकं चरित्र-

१ तन्नाशककाल एव तस्य नाश इति पाठः।

एतेन भक्तिरसानुभानकलेन
मिति ज्ञाप्यते, आस्तिकैर्द्वितीयक्षणे लोके तन्नाशानङ्गीकारात् । यथा स्वावतारार्थं गर्भसङ्कर्षण तथेदमिति
मोहने निलम्बासहिष्णुत्व भगवत उक्त भवति । तथाप्यत्र कालान्तरेपि स्मृत्य
भात्र । यद्यप्येव सस्कारजन्यत्व तदजन्यत्व वा न सिध्यति, तदुक्तिस्तदर्थं मोहो
मानस्य वक्तव्यत्वान्नष्टसस्कारेत्येव वदेत् । स्मृतिनाशस्य स्वत सम्भवेन सा चोक्तरीत्या नष्ट,
त्तिश्च न स्यात् । एव सत्यन्यथानुपपत्त्येव तेनानुभवेन स्मृतिरेवोत्पन्ना एतदेवाभिसन्धायोक्तमाचा
सस्कारस्तु न जनित एव, भगवदिच्छाभावादिति मन्तव्यम् । सर्वोत्पत्तिमन्निमित्तकारणत्वेनादृष्टस्यापि
र्यैरत्र **भगवन्मत**मित्यादि । किञ्च । सस्कारवादिना सस्कारेणेत्याशयेनापि तन्निषेध
स्मृतिहेतोर्वक्तव्यत्व आवश्यकत्वाल्लाघवाच्च तदेवास्तु,कृत तस्यानुभव विनाऽजनकत्वात्तस्य च
उक्त ।न चानुभवस्याविहितत्वेन तदजनकत्वात्प्राचीनस्य वा स्यादिति वाच्यम्। अनुभवत
नष्टत्वेन सहकार्यभावात्स्मृतिरेव न स्याद् अनुभव विनापि सदृशादेरनुगतस्यैवोद्बोधकत्वाङ्गीकारात् । एतदे
द्ध्वसयोरन्यतरस्य सहकारित्वात्। त्वयापि स्वसमानाधिकरणस्वसजातीयप्रागभावास
वोक्तम् **स्मृतिरपी**त्यादिना । **नाश्यते** चेति । न्नैवमिति वाच्यम् । व्यक्तिभे
द्वमूत क्रियत इत्यर्थ । न च प्रतियोग्यभावयोरेकत्राजनकत्वा उभयोरपि जनकत्वात् । नन्व
देनादोषात्। न चैकजातीयेपि तथेति वाच्यम् । ज्ञानजातीय ज्ञान प्रत्यभावस्य विष
भावत्वेन कारणत्वे प्रतियोगिन प्रतिबन्धकत्वापत्त्या नैव वक्तु युक्तम्, हेतुत्वेनात्र तथात्वाभावादिति
यत्नेन कारणत्वान्न दोष , ससर्गाभावत्वेन प्रतिबन्धकाभावस्य । अन्यथानुभवप्रागभावेत्यता
चेद्। अत्राप्यनुभवध्वसत्वेन कारणत्वान्न दोष इति तुल्यम् स्मृतिमङ्गीकृत्योक्तम्। तदनङ्गीकारे
...गतच्चानुभवाव्यवहितोत्तरक्षणेपि भगवन्मतानुवादग्रन्थो यथाश्रुत एव
भावे च सति स्मृतिप्रसङ्गे ...मार्गीयभक्तेऽनव । तच्चोक्तरूपेणेति । श्रुत्या यागस्य हेतुत्वमुक्त
तस्यैव सहकारित्व ...ख्यानीति ज्ञेय ...न यागजापूर्वासिद्धि प्रतियोग्यभावयोरेकव्यक्तिजनकत्वादर्शनाच्च ।
...धान् भवतीति सर्वं सुस्थम् । वाच्यम् ...नम्, तथापि रा ... दृष्टमिति चेत् । सत्यम् । प्रति
तदभावस्य तथा कथनायोगात् । न च ... न वाऽनुक्त्वा सर्वप... त्व तत्कार्यं तद्ध्वसेन न जन्यत इति
तदभावयो स्वसमूहालम्बिज्ञान ... । ज्ञानप्रकरणत्वाद ... व ... त्र तथा वक्तु शक्यम् । प्रकृतेऽनुभ
...च्छेदकधर्मसैन यत्कार्यजनकतावच्छेदक ... मिति । मुसव्यादानां ...र्यत इति व्यवहारो भूतेष्वनुशास
... तन यागत्वस्यैवोभयजनकतावच्छेदक ...मार्गीयत्वमत्र विशेष । हेतुत्वमवगम्यते, अतीतमनुभवविष
...नोक्तदूषणापत्ति । अत एवानुभूत ... । अत एव सर्वात ...न्यमिति आरोपणात्पूर्ववत्कृत इति ।
...पपत्तमेव तदर्थं इति ... नामपि कुमतित्व नोच्येत । **मोहसहित** इति । शुद्ध हि
... । श्रुतिनलाघात्... ...ं **सर्वसवाद** इति । ...पि स्नेहो न निरुपधि, किन्तु पुत्र
...र स ... ...र्वोक्तज्ञाने सति भगवति महाराज
...र्ति सहजा । तया चोभयोर्विरो

इति स्नेहसम्बन्धी यः कलिः कलहो विरुद्धधर्मोपमर्दनमिति यावत् । तं लाति स्वीकरोतीत्यादृशं हृदयं यस्याः सा तथेत्यर्थः । तेन हृदि ज्ञानतिरोभावपूर्वकः स्नेहभर उक्तो भवति । ज्ञानं निरूप्य तदन्ते स्नेहस्य प्रकृष्टवृद्धिकथनं तत्फलत्वाभिप्रायेण । अन्यस्य तत्त्वेनानुक्तेः । अन्यथा तु ज्ञानस्य निष्फलत्वापत्तिः । अननुसन्धानेपि वैदिकसंस्कारस्यालौकिकातिशयजनकत्ववज्ज्ञानस्यापि स्नेहवृद्धिहेतुत्वमिति भावः । जातिकुलधर्मपरता मातृत्वं च पूर्वावस्था । स्नेहवर्धिन्या मायायास्तत्त्वात्स्नेहेन सततमन्यत्यागपूर्वकं भजनमेव भवेदिति विहितभक्तौ प्रवेशः स्यात्, न तु पुष्टिमार्गीयलीलारसानुभव इत्यर्थः ।

नन्दः किमकरोदित्यत्र । पञ्चभिरुत्तरदाने तात्पर्यमाहुः **कर्मव्युदासस्ये**ति ।
१०-८-४६. नेदृशं फलं कर्मणो भवितुमर्हति, किन्तु महदनुग्रहस्यैवेति कर्मव्युदासस्य वक्तव्यत्वात् तस्य चाग्निहोत्रदर्शपौर्णमासचातुर्मास्यपशुसोमात्मकत्वेन पञ्चात्मकत्वात् तावद्भिस्तद्व्युदासोक्तिरित्यर्थः ।

कृष्णोदारेत्यत्र । उदारत्वोक्तितात्पर्यमाहुः **साधनफलमि**त्यादि । अधिकारः
१०-८-४७. साधनम् । तस्य हीनत्वात् तज्जन्यं फलमपि तथा । अथवा । सुखसाधनरूपं वैदिककर्मणः फलं पश्वादिरूपं तथा । साध्यफलं स्वर्गादि मोक्षान्तम् । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुतेस्तथा । स परमानन्द एव चेत्तथा । तदा पश्वादि तज्जन्यं लौकिकमलौकिकं च सुखं तादृशमेव परमानन्दरूपमेवेत्यर्थः । **लौकिकवदि**ति । लौकिकवत् परिदृश्यमानं परमित्यर्थः । लोके वेदे च फलात्साधनमपकृष्टं दृष्टम् । यत्र परमकाष्ठापन्नं वस्तु साधनं तत्र तत्साध्यफलस्य का वार्तेति भावः ।

अस्त्वित्युक्त इत्यत्र । **फलग्रहणार्थमि**त्यादि । अत्रायं भावः । पुरुषोत्तमा-
१०-८-५०. नन्दाधिष्ठानं ब्रह्मानन्द इति तद्योग्यत्वार्थं ब्रह्मानन्दता महदनुग्रहेण सम्पन्नास्मिन्, तदा हि सर्वत एवानन्दस्फूर्तिर्भवति । एवं सत्येतेनैव पूर्णार्थताज्ञाने पुरुषोत्तमाविर्भावः स्वस्मिन्न भविष्यतीति भक्तिरसानुभवार्थमुक्तं **बाधकमंशं त्यक्त्वा तथा प्रसिद्ध** इति । अपुत्र इति । निषेकादिहेत्वभावादिति भावः । **मोक्षदानार्थमि**ति । भजनानन्दो भक्तिमार्गे मोक्षस्तद्दानार्थमित्यर्थः, न तु प्रासङ्गिकमिति । प्रासङ्गिकं प्रयोजनं प्राकट्यहेतुर्न भवितुं शक्नोतीत्यर्थः । प्रासङ्गिकप्रयोजनान्तरमाहुः **सर्वार्थमि**ति । स्वरूपकीर्तिभ्यां सर्वोद्धारार्थमपि प्रकट इत्यर्थः । एतेनाप्युक्तमोक्षपदस्योक्तमोक्ष एवार्थ इति ज्ञेयम् । अन्यथा पुनरुक्तित्वप्रसङ्गात् । नन्दचरणानां यद्विषयकोधिकारो येषां वा सर्वात्मना निरोधो न कृतो भगवता ते गोपगोपीपदेनोच्यन्ते । अन्यथा वयस्यानां व्रजस्त्रीरत्नानां चाग्रे सर्वाधिकनिरोधोक्तिर्विरुध्येत । अत एव सत्सङ्गव्यतिरेकेणापीत्येतत्तात्पर्यमुक्तम् ।

---

१ तत्त्वादिति पाठः ।

कृष्णो ब्रह्मण इत्यत्र । **साक्ष्यर्थमिति** । निःसाधनजीवनिमित्तं प्राकट्यं तदधी-
नत्वेन लीलाकरणादिकं च ब्रह्मणि श्रुतिविरुद्धमिति शङ्कानिरासं वेदात्मक-
१०-८-५२. तत्संमत्या कर्तुमित्यर्थः । अत एव श्रुतिरप्याह 'नायमात्मा प्रवचनेन लभ्य'
इत्युपक्रम्य 'यमेवैष वृणुते तेन लभ्य' इति, 'ते ते धामान्युश्मसी'ति 'विष्णोः कर्माणि पश्यते'त्यादि । एतदर्थस्तु विद्वन्मण्डनेस्माभिः प्रपञ्चितः । **तेषां प्रीतिजनन** इत्यादि । स्वेच्छया या स्थितिस्तदपेक्षयाधिको व्यापारो भगवता न क्रियत इति ज्ञापनाय 'वसन्प्रीतिं चक्र' इत्युक्तमित्यर्थः । अन्यथा लीलायाः प्रीतिजननोक्त्यैव वासस्य स्वतःप्राप्त्या तत्कथनमनर्थकं स्यादिति भावः ।

इत्यष्टमोध्यायः ।

नवमाध्याये निवारितापीति । ननु मायाकार्याद्भगवत्कार्यं बलिष्ठमिति भगव-
त्कृते निवारणे सत्यपि कथं गृह्यकृत्ये प्रवृत्तिरित्याशङ्क्य तत्र हेतुमाहुः **पुनर्मोहि-**
१०-९-१. **तेति** । निषेधेन पूर्वमोहापगमेनावश्यकमपि कार्यं त्यक्त्वा भगवत्परापि 'स-
स्मितमीक्षती मुख'मिति वाक्यात् स्मितेन पुनर्भगवता मोहिता सती तथा जातेत्यर्थः । नन्वन्यासक्तिहेतुत्वेन निरोधविरोधि पूर्वमोहनमित्याशङ्काभावायाहुः **गुणगान** इति । भगवत्कृतत्वान्मोहस्य तत्कालेपि गुणगानार्थमेवाभूदित्यर्थः । मोहेस्मिन्नस्ति रूपद्वयम् । विषयासक्तकत्वं भगवत्कृतत्वं च । तेन द्वाभ्यामुक्तमिति शेषः । तर्ह्येवंरूपतन्निषेधोनुचित इत्याशङ्क्य तन्निमित्तमाहुः **ततः श्रमोभवदिति** । ततः श्लोकद्वयानन्तरमेकेन श्रमोभवदिति निरूप्यत इत्यर्थः । यत एवमतो भक्तक्लेशासहिष्णुत्वेन स कृत इत्याहुः **अत** इति । लोके धनं पुत्रार्थमिति न्यायेन भगवदर्थमिदमिति ज्ञानेन माता प्रवृत्तेति कथं कोप इत्याशङ्क्य तत्र हेतुमाहुः **भ्रान्तेति** । भगवतस्तदपेक्षाभावात् तथाज्ञानं भ्रम इति तथा । एतादृश्येव भक्तिमार्गमर्यादेति ज्ञापनाय **भवेदित्युक्तम्** । **तान्** यष्टिग्रहणादियत्नानित्यर्थः । तपोन्तःकरणदोषापहं दुःखरूपं भगवत्प्रापकं चेत्यनुधावनयत्नेन तपस्त्वमुक्तम् । अत्रापि प्रचुरदोषबुद्धिसत्त्वात्तथा । अत एवाग्रे यष्टित्यागः । सर्वात्मना दोषारोपानिवृत्तेस्तत्प्रापकस्य दुःखस्य भक्तिमध्यपातित्वं नोक्तम् । अत्रायं भावः । पूर्वमेव स्वप्रापणमकृत्वा तावत्क्लेशानन्तरं तथा करणे कश्चन विशेषो वाच्यः । स च पूर्वं यष्टिग्रहणेन क्लेशानन्तरं तत्त्यागेन चान्तःकरणगत एवेति लक्ष्यते । एवं सति 'वीर्यं मे दुश्चरं तप' इति वाक्यात् तद्गतालौकिकविशेषहेतुस्तप इति तथोक्तम् । भक्तित्वानुक्तौ हेतुरुक्त एव । एतदेवाभिसन्धायोक्तं **परोक्षेत्यादि** । परोक्षवादविषय एवासक्तिं चेदित्यादिनाप्युक्तः ।

---

१ येति नास्ति क्वचित् । २ पुनरिति पाठः ।

दधिनिर्मन्थने काल इत्यत्र । **क्रियाशक्तेरि**त्यादि । क्रियाशक्तिर्भुजयोः प्रति-
१०-९-२. ष्ठिता । तदाधिदैविकश्चेन्द्रः । 'इन्द्रियं वै दधी'तिश्रुतेस्तस्येन्द्रियरूपं तदिति तथा । वस्तुतस्तु परोक्षवादविषय एवार्थोऽनेनोक्तः । तथाहि । क्रियाशक्तेरिति पञ्चमी हेतौ । भगवद्वियोगे हि सर्वेन्द्रियगतस्तादृक्क्षोभो भवत्यतिप्रचुरो, येन तत्तदाधिदैविकस्यापीन्द्रियं क्षुभितं भवति । तदा भावविशेषैर्गुणगानं भवति । यथा व्रजरत्नानाम् । तदेतत्प्रसङ्गादुक्तं **भगवत** इत्यादिना ।

क्षौमं वास इत्यत्र । **सुभ्रू**रित्यस्याभासः । **नन्वेवमतिक्रम** इत्यादि । व्रजजनक्ले-
१०-९-३. शहेतुभूतानां नाशाय दुःखप्रापणाय च मृत्युयमौ तत्राज्ञप्ताविति कुचकम्पस्य क्लेशहेतुत्वेन तत्कर्त्री पूर्वोक्तदेवतां तौ कथं न तथा कृतवन्ताविति्यर्थः । सर्वनियमनत्वेन तयोर्यमत्वम् । दिक्पालस्यात्रातथात्वमिति ज्ञापनायेदमुक्तम् । भाव्यर्थः श्रमस्तस्यानङ्गीकारे तद्धेतौ न प्रवर्तेत । तथा च तदङ्गीकृत्य ममन्थेति सम्बन्धः । क्लेशे भ्रूसङ्कोचसम्भवेनात्र च शोभनत्वेन तदभावात् क्लेशाभावो ज्ञाप्यत इत्याशयेनाहुः **पर्यवसानादि**ति । तदद्दण्डः पर्यवसानं । रज्ज्वाकर्षे भुजद्वयस्यापि व्याप्टतत्वं भवतीति दक्षिणवामयोर्यथाक्रमं तद्रूपत्वम् । अत्रायं भावः । अस्त्यत्र क्रिया द्विविधा । भगवत्सम्बन्धिनी गार्हस्थ्यसम्बन्धिनी चेति प्रधानत्वाप्रधानत्वाभ्यां तद्रूपत्वमुच्यते । तत्तत्कङ्कणानां भक्तिमार्गीयनियमरूपत्वं कर्ममार्गीयदेवतारूपत्वम् । तदाश्रितत्वात् । सुभ्रूरितिवत्स्वतन्त्रविशेषणत्वं सर्वेषामनुक्त्वाभरणकर्मत्वोक्तेस्तात्पर्यमाहुः **क्लिष्टं सर्वत्रे**ति । क्लेशरूपसमानधर्मवत्त्वं सर्वेष्वस्तीति ज्ञापनाय तथेत्यर्थः । विशेषणत्वोक्तौ प्रकारकत्वापत्त्या तदप्राधान्येन तत्क्लेशस्याप्रयोजकत्वात् तद्धेतुभूतमन्थनेनुचितत्वं न ज्ञापितं भवेदिति भावः । शीर्ष्णः सत्यलोकाधिदैविकरूपत्वेन तदुपरि ज्ञानिनां जीवन्मुक्तानामेव स्थानमिति तथोक्तम् । लीलामध्यपातिनां भगवदात्मकत्वमभिसन्धायैवं सर्वत्राचार्यैर्निरूप्यत इति ज्ञेयम् । प्रभौ स्नेहवतां तथैव तत्सम्बन्धिष्वपि स्नेह इति मातुस्तादृक्श्रमदर्शने तदसहिष्णुत्वेन क्षोभात् मुक्तानामपि स्वधर्मविस्मृतिर्भवतीत्याशयेन **मा लक्ष्मीरि**त्याद्युक्तम् । किञ्च । सर्वमूलभूतभगवदाविर्भावस्थानत्वेन सर्वमूलभूतत्वान्मातरि तादृशधर्मे सति तत्कार्यपरंपरायां स्वत एव तादृशत्वं भवतीति भावेनापि तथोक्तम् । विपक्षे बाधकमाहुः **आकृती**त्यादि । मन्थनोक्त्यैव तदनुरूपाकृतेरपि प्राप्तेस्तत्कथनं पुनर्मन्थनोक्तेश्च तथा स्यादित्यर्थः । एवं सति विशेषस्यावश्यवाच्यत्वे मन्थनस्यानुचितत्वज्ञापनमेव विशेष इति वक्तुं युक्तमिति लोकतः परमार्थतश्च तथात्वमुक्तम् । किञ्च । पूर्वं दधिनिर्मन्थने काल इति वाक्याद्गुणगानाङ्गत्वेन मन्थनमुक्तम् । तेन मन्थनेन न किमपि क्लिष्टमभूत् । तथैव चेदग्रेपि स्यान्न निवारयेत्प्रभुः । निरोधाविरोधात् । एवं सत्यग्रे निषेधस्य वाच्यत्वात् तद्धेतुभूतं निरोधविरोधिमन्थनमवश्यं वाच्यमित्येकेन तदुक्तम् । एवं सति विवृतिस्तथाविधेति युक्ततरम् । अन्यथा निषेधोक्तिर्विरुद्धा

त्यादित्यभिसंधायाहुः **शुकवाक्येत्यादि** । मन्थनसामयिकाकृतेः साधारणत्वेन विशिष्टलीलारूपत्वं न सम्भवती'त्युत्तमश्लोकलीलया गृहीतचेता' इति लक्षणं शुकवाक्यं तथा स्यादिति वा । उक्तरीतेस्तु माहात्म्यज्ञानहेतुत्वेन भक्तिजनकत्वादुत्कर्षः । **पूर्ववदिति** । निष्क्रमणोत्सववदित्यर्थः ।

तमङ्कमारूढमित्यत्र । **दैत्यानिति** । उक्तन्यायेनाधिदैविकभूरूपत्वादङ्कस्य भूस्थितांस्तांस्तथाकर्तुमित्यर्थः । मात्रा ग्रहणसम्भवेपि स्वयमङ्कारोहणस्येदं
१०-९-५. तात्पर्यमुक्तम् ।

उत्सिच्यमान इत्यत्र । वैदिकेग्निहोत्रादावलौकिकदोषजनकं यथा, तथा लौकिके त्वलौकिकदोषजनकमित्याशयेनोक्तं **दोषजनकं** चेति ।

स जातकोपेत्यत्र । **तत्त्रयं निवारणीयमिति** । यशोदाया अपराधस्तत्रिष्ठाध्यात्मिकलोभस्य च नाशनमेतदमारणार्थमाधिदैविकविज्ञापनं चेति त्रयम् ।
१०-९-६. आधिदैविकश्चेदाध्यात्मिकं मारयेत्, सर्वांशेन मारयेत्, तथा सत्यग्रिमकार्यं न भविष्यतीति तत्कृततन्मारणस्य निवारणमत्रोच्यते । भगवांस्त्वेतत्कालीनापराधहेतुभूतलोभमात्रं नाशितवानिति पूर्वोक्तेन लोभं तद्गतं भाण्डं च स्फोटितवानित्यनेनाग्रिमग्रन्थेन न विरोधः । अत्रैवाग्रे त्रयमुत्पादयितुं **भिन्नमिति** । यथाधिदैविकेन तथा कर्तुमुद्यतम् । तथान्यां यशोदां तद्गतं लोभं च भगवदेकविषयम् । तदुपभोग्यत्वेन भोगविषयान् दुग्धादींश्चान्यानुत्पादयितुं स तथेत्यर्थः । तेन क्रोधातिशयो निरूपितो भवति । **तदुभयमपीति** । आधिदैविकं लोभं रजोगुणं चेत्यर्थः । ननु पुत्रदुग्धयोः समानप्रीतिविषयत्वेपि नैवं संभवतीत्यनुपपन्नमिदमित्याशङ्क्य तत्रोपपत्तिं वदन्तो दृषदश्मना भेदनस्यापि तात्पर्यमाहुः **दैत्याविष्टेवेति** । सा यशोदानिष्ठा पयोविषयिणी स्नेहकला प्रभुविस्मारकत्वेन दैत्याविष्टेवोद्गतेति तथागमनमभूत् । तन्नाशं वालौकिकप्रकारेण करिष्यन् 'स्फ्यश्च कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानी'ति श्रुतेस्तथेत्यर्थः । तच्छ्रवणे पुत्रानुसन्धानात् तथा । तत्रैवं कथनमयुक्तमितीवेत्युक्तम् । वस्तुतस्तु भगवत्कृतो मोह एव तादृगिति तथात्वम् । अत एवास्यापि लीलात्वं तथाप्यनुचितमभूदिति तथोक्तमाचार्यैः । **जघास हैयङ्गवमन्तरङ्गन** इत्यत्र । **आधिदैविकदैत्यानामिति** । मातृदर्शनयोग्ये स्थाने भक्षणे तस्याः क्रोधो भवेत् । अतो यत्र भक्षणे कृते तदनुत्पादस्तत्र तथाकृतवानिति भावः ।

मर्काय काममित्यत्र । **पूर्वमपि दैत्यावेशेनेति** । पूर्वमपि यत्सम्पादितं तन्मर्काय यच्छतीति सम्बन्धः । तत्र हैयङ्गवगतं हेतुमाहुर्दैत्यावेशेनेति ।
१०-९-८. मत्कीयपदार्थस्य स्वयमनङ्गीकारात् । क्रूरे विनियोगाच्च दुष्टत्वं लक्ष्यते । स चालौकिक एव दोषो वाच्यो, लौकिकस्यादर्शनात् । तदेतदुक्तं दैत्येत्यादिना । शकृदाद्य-

न्तेनान्यत्राप्येवंभूते दृष्टिः कार्येति नासम्भावना काचित् । **चौर्यविशङ्कितेक्षणमित्यत्र । तस्याश्चौर्यदोषनिवारणायेति** । पुत्रस्नेहस्नुतेति वाक्यात् भगवदेकभोग्यस्तन्यनिरोधश्चौर्यम् । तच्च तदीयवस्तुनो यथेच्छं विनियोगकरणेन सन्तोषान्निवार्यते । विशब्दस्य कालवाचित्वपक्षमादायाहुः **तस्या ज्ञानं कालेनेति** । बालत्वं ज्ञात्वा तथा व्यवहरतीति तथा । 'पृष्ठे कृतो मे यदधर्म' इति वाक्यात्पृष्ठभागदिशि पापस्थानमिति तत्र व्याप्ता दृष्टिस्तद्विषयिणी भवत्येवेति भावेन पापदृष्टिरित्युक्तम् ।

विस्रंसितकेशबन्धनेत्यत्र । उत्पत्तिप्रलयाविल्यादि । कशब्देशशब्दयोरुत्पत्ति-
१०-९-१०. *लयाधिष्ठातृदेववाचकत्वात्तद्वाच्यत्वात्केशानां तयोस्तत्र सत्त्वं ज्ञायते* । तत्सत्त्वेनैव तदधिष्ठेयोत्पत्तिलययोरपि । एतादृशान्मुक्तानां मुक्तमेवाजननम् । अन्यथा स्वाधिष्ठातृसहितोत्पत्तिलयाधिष्ठानाच्युतिर्न स्यादिति भावः । **तत इति । तादृशानां बन्धादिरर्थः** ।

न चान्तर्न बहिरित्यत्र । किञ्च जगन्मयोयमित्यादि । जगच्च य इत्यत्र
१०-९-१३. चकारार्थकथनमिति ज्ञेयम् ।

तद्दाम बध्यमानस्येत्यत्र । भगवता स्वस्मिन्दोषद्वयमित्यारभ्य ज्ञापयि-
१०-९-१५. **तुमेवमाहेत्यन्तम्** । अत्रेदं प्रतिभाति । बहिः प्रकट एव प्रभौ पुत्रव्यवहार इति तत्कृतमन्तःस्थितस्याज्ञानम् । दोषारोपे बहिरनुभूयमानोप्यननुभूयमान इव भवति । दोषज्ञानपराभूतत्वाद्दृष्टेः । तदिदमुक्तमन्तर्बहिःस्थितमित्यादिना । *मूलस्थविशेषणद्वयतात्पर्यरूपं लीलापदार्थानां सच्चिदानन्दरूपत्वमभिप्रेत्य* दाम्नि ज्ञानकरणे निरूपिते । ननु ज्ञानेन वस्त्वन्यथाभावाभावाद्वेष्टनमसम्भवि, दाम्नस्तथात्वे सुतरां तथेति चेत् । अत्र वयं वदामः । अत्र हि भगवान् भक्तप्राधान्येन लीलां करोति, अतो यथा मर्यादाभक्तिमार्गे भगवद्विषयकापराधे भक्तानां दण्डः कालादिभिस्तदधिकारिभिः क्रियते तथा (पुष्टि)पुष्टिमार्गे भक्तविषयकापराधे यथैव ते चिकीर्षन्ति, तथैव प्रभुरङ्गीकरोतीति वस्तुस्थितिः । अत्र भजनविरोधिभावजननमेवापराधः । एवं सति पुत्रत्वेङ्गीकृते तद्धर्माङ्गीकारोपि जात इति मातृनियम्यत्वस्यापि स्वस्मिन्नङ्गीकारात्तत्स्वामिकदाम्नामपि तादृक्सामर्थ्यं दत्तमस्तीति तथा । इदमेवोक्तमन्यथा **बहिरपीत्यादिना** । एवं सति दामभिर्नियमने दण्डसम्पत्तिर्भवति । अत्र तथाभावेङ्गद्वयं प्रतिबन्धकं निसर्गेश्वरत्वनिसर्गदासत्वलक्षणं भगवत्तद्दासगतम् । न हि दासनियम्यः प्रभुर्भवति । यद्यपि मातृनियम्यत्वमङ्गीकृतमिति तेनैव सर्वात्मना नियमनं सम्भवति, तथापि यथा भगवद्धर्मत्वेनाङ्गीकारो बलिष्ठस्तथैश्वर्यस्यापि तथात्वादबाध्यत्वाच्च न तथा सर्वात्मना भवितुमर्हति । उक्ताङ्गीकारात्परं तावद्वेष्टनमभूत् । भक्तेषु प्रभुनियम्यत्वस्यापि नित्यत्वात् । अतस्तथा न्यूनमभूत् । अतएव सर्वोपयोग्यङ्गमानेन न्यूनतोक्ता । अग्रे त्वीश्वरत्वेनान्यथा कर्तुं समर्थत्वात्तदेव स्वनियमने

साधक कृतवानिति वक्ष्यते **कृपयासीत्स्वबन्धन** इति पदेन । कृपाया ईश्वरधर्मत्वे- नैश्वर्यमेव करणत्वेनावगम्यते । अन्यथैतत्कार्यं न स्यात् । न ह्यीश्वरादन्यः स्वस्वरूपमर्या- दातिक्रमणे जीवस्वरूपमर्यादातिक्रमणे च समर्थो भवति, अस्वतन्त्रत्वात् । यथा जगत्क- र्तृत्वादेरीश्वरधर्मत्वेपि नैतादृशत्वं तथा भक्तानामप्येतदतिपौरुषमिति ज्ञाप्यते । यद्वा, बन्ध- नन्यूनतोक्त्योर्मध्ये विशेषणद्वयकथनेन तयोरुभयत्र हेतुत्वमभिप्रेतमित्यवगम्यते । बन्धने तयोर्हेतुत्वमुक्तम् । तादृग्न्यूनतायामपि तयोस्तथात्वमुच्यते । विशेषणाभ्यां हि तज्ज्ञानप्रकार उच्यते । भगवांस्तु निरुपधिस्नेहेन दोषारोपाभावयुक्तेन वशे भवति । तथा च पुत्रत्वेन स्नेहः सोपाधिरिति दोषारोपश्चास्तीति वशीकरणे प्रतिबन्धकमेतद्द्वयमिति ज्ञापनाय द्व्यङ्गुल- न्यूनतोच्यते । अतएव स्वपदम् । यद्वा । स्वार्भकस्य कृतागसः इति मातृविशेषणम् । अतृप्त- त्यागावगूरणबन्धनोद्यमैः कृत्वा कृतागस्त्वम् । प्रथमतोऽर्भकस्तत्रापि स्वस्यैव तादृशे तथा कृतिरत्यनुचितेति ज्ञापितम् । तथा चैतादृश्यास्तद्दाम तथाभूदिति सम्बन्धः । तथा च बाह्या- भ्यन्तरापराधवत्सम्बन्धित्वात्तथा न्यूनमभूदिति भावः । दामसामर्थ्ये सत्यपि भगवदिच्छया तथात्वे न्यूनं चकारेत्युक्तं स्यात् । तथा चैवमुक्त्या वस्तुस्वाभाव्यादेव तथात्वमिति बोध्यते । **पूर्वापरयोर्भगवत एव सत्त्वादि**त्यादिग्रन्थस्याय भावः । 'एवं सन्दर्शिते'ति वाक्यात्तत्प्रदर्शनार्थमिमां लीलां कृतवानिति गम्यते । यद्यपि भक्तनिवेदितान्नवस्त्रभूषणा- द्यङ्गीकारोपि भक्तेच्छयैवेति सोपि तथा भवति, तथापि तेषामिष्टत्वाल्लोके तदङ्गीकारो न तथा तद्बोधकः । बन्धन तु दुःखहेतुत्वेनानिष्ट लोक इति तदङ्गीकारस्सुतरां तथेत्यनेन प्रकारेण प्रदर्शितवानित्युच्यते । अतएवानेवभावे तन्न दर्शित भवति, किन्त्वेवभावेनैवेत्या- शयेन मूल 'एव सदर्शिते'त्युक्तम् । किञ्च । ईश्वरे दुःखाभावेन तथा भक्तेच्छापूरणे न कोपि विशेषः सिध्यति यद्यपि, तथापि मात्रतिरिक्तभक्तानां श्रवणेपि दुःखहेतुरिदमिति भक्तदुः- खहेतुकरण भक्तिमार्गविरुद्धमिति सर्वथा पुरुषोत्तमस्याकर्तव्य भवतीति तस्यापि करणेना- तिशयेन तथात्व बोधित भवति । एव सत्युदरस्य व्यापकत्वाद्यत्र कुत्रचित्स्थितिवद्भगवत्पृ- ष्ठभागे पार्श्वयोश्च दाम्नः स्थितिर्न विरुद्धा । किन्तु दाम्नावच्छेद्यत्व विरुद्धम् । तच्च तदाद्य- न्तयोर्मेलने भवति । यद्यप्युक्तदेशे स्थितिर्यथात्रापि स्थितिस्तथोक्तदेशे तन्मेलनवदत्रापि तत्सम्भवति । तथाप्यत्र स्वरूपप्राकट्यात् तद्धर्माणामपि व्यापकत्वादीनां प्रकटत्वेन स्वकार्यो- न्मुखत्वान्न तत् सभवति । स्वस्यैवावच्छेदकत्वे तत्साधनोच्छेदप्रसङ्ग । तथा च दामा- द्यन्तयोः मतोदरेणैव न तथा सम्भवतीति न्यूनताया आवश्यकत्वेन प्रथमातिक्रम इति न्यायादल्पेत्यादिनोक्तहेतुना च तथा न्यूनमभूत् । अग्रे 'कृष्णः कृपयासीत्स्वबन्धन' इति वाक्यात्स्वयमेव स्वरूपमर्यादामतिक्रम्य तथाभवदित्युक्तम् । 'सर्वतः पाणिपादान्त'मित्यत्र तत्स्वाभाविकधर्मरूपत्वमनभूषणनिदर्शनामेव देशापरिच्छेद उक्त इति न तैरवच्छेदः शङ्क- नीयः । **व्यापकत्वस्येति** । स्वाभाविकव्यापकत्वस्यैवानवच्छेद्यत्वे हेतोः सत्त्वात् कृत्रि- मतत्करणमप्रयोजनकमयुक्त चेति भावः । अल्पपरिमाणत्वेन प्रतीयमानस्यैव तदधिकपरि-

माणवत्त्वमवच्छेदकाधिक्येपि सर्वत्र समानपरिमाणत्वेन प्रतीयमानत्वं च चन्द्रतत्प्रतिबिम्बयोरस्तीति तद्दृष्टान्तमाहुः **प्रतिबिम्बादाविति** । यथा द्वादशसहस्रयोजनात्मकत्वेपि चन्द्रमण्डलस्येतो यावत्परिमाणकं तद्दृश्यते तावत्परिमाणकमेवोदञ्चने सरस्सरित्प्रभृतिषु च, तथात्रापीत्यर्थः। तथा सति तु पूर्ववैलक्षण्यज्ञानादशक्यताज्ञानेन भूयो योजनासम्भवोपि। इदमेवोक्तं **वैलक्षण्याज्ञाना**दित्यनेन। यद्वा। तदेव निकटस्थमणिस्तम्भादिगतभगवत्प्रतिबिम्ब आदिपदात् तच्छायायां च पूर्ववदेवोपालम्भादित्यर्थः।

कृष्णास्त्विवसस्याभासे। **एवं स्वमनोरथ** इत्यादि। अधुना त्वितो मातुर्गमन-
१०.९.२२. मुच्यते, अग्रे बाला ऊचुरित्यनेन तेषां तत्र स्थितिर्ज्ञाप्यते, नान्येषाम्। एवं सत्यर्थाद्गोपीनां गमनमुक्तं भवतीति तदिदमुक्तम्। एतास्तु तादृशं त द्रष्टुमक्षमा इति तादृग्गेहेपि समुखं मुखं न कृतवत्य इति तद्गेहाद्बहिरेव प्रसन्नमुखा जाता इति ज्ञापनाय विशेषणमुक्तम्। **एवं स्वमनोरथे सिद्ध** इति तु मातुर्वैयग्र्ये हेतुरुक्तः। अथवा, अधुनाप्यनाश्लिष्टप्रियास्तदभिलाषिण्यो दाम्ना बन्धनाभावं दृष्ट्वा स्वार्थे सन्दिहाना जाताः। सम्पन्ने तस्मिन्स्वमनोरथोपि सेत्स्यतीति निश्चयेनैतासामेव स सिद्ध इति तथोक्तम्।

इति नवमोध्यायः।

दशमेध्याये। **त्वमेव काल** इत्यत्र। **वस्तुनः परिच्छेदकत्वमि**त्यादि।
१०-१०-३०. ननु समवेतस्य वस्तुनो घटादेः परिच्छिन्नत्वेन तत्समवायिनो भगवतोपि परिच्छेदापात इत्यत आह **वस्तुन** इत्यादि। सर्वं ब्रह्मेति वादी सर्ववादी। तथा च तन्मते स्वस्यैव सर्वभवनसामर्थ्येन वस्तुरूपेणाप्याविर्भाव इति न तत्कृतपरिच्छेदशङ्का भगवतीत्यर्थः[1]। अथवा समवेतस्य परिच्छिन्नत्वेपि न समवायिनस्तथात्वं सर्वेषां वादिनां सम्मतं, शब्दस्य तथात्वेप्याकाशस्यातथात्वादित्यर्थः।

गृह्यमाणैरित्यत्र। **तेषां धर्माणा**मित्यादि। भगवद्ग्रहणहेतौ सत्यप्यग्रह इति वक्तुं
१०-१० ३२. तद्धेतुमाहुः **तेषामि**त्यादि। तेषां घटादीनां त्वदाश्रयत्वादाश्रयस्य च सहभानैनियमात्तथा भवितुं युक्तमित्याद्यपक्षे धर्माणां घटादिधर्माणामपि तथात्वाद्धर्मिसहभाननियमात्तथेत्यर्थः। यद्यप्येवं धर्मिपदमनर्थकं तथापि प्रत्येकं भिन्नहेतुकथनार्थमिति ज्ञेयम्। एवं सत्यप्यग्रहे हेतुमाहेत्याहुः[2] **तत्र हेतुरि**ति।

इति दशमोध्यायः।

---

१ भवतीति पाठः। २ माधेति पाठः।

एकादशेऽध्याये प्रकरणतात्पर्यनिरूपणे । वत्सचारणदोषस्य निवृत्तिर्वत्समारण-
१०-११-०. मिति तन्निवृत्तिरूप तदित्यर्थः । अनीश्वरस्यैव कर्म वत्सचारणमितीश्वरस्य तत्करणमनुचितमिति दोषबुद्धिस्तन्मारणकथया निवार्यते । न ह्यनीश्वर एव-भूत ज्ञातुमेव हन्तु वा शक्तो भवत्यतस्तन्निवृत्तिः । किञ्च । तस्यासुरत्वेपि वत्ससारूप्यतद्यूथगतत्वाभ्यां तत्सम्बन्धित्व लक्ष्यत इति पशुत्वेन कण्टकशर्कराक्षेत्रप्रवेशहेतुभूतभाव एव निवर्तित इति ज्ञाप्यते । तथा सत्यपराधः स्यादिति । एव सति वत्सास्तच्चारण च । तयोः सम्बन्धिदोषस्येत्यर्थ. सम्पद्यते । भगवदीयेषु प्रवेशस्य फल करकमलसम्बन्धः । दोषबुद्धेः फल स्वरूपनाशः । तेन निर्दोषबुद्ध्या भक्तसङ्गः कार्यो, न त्वन्यथेति ज्ञापित भवति । मूले भक्तानिष्टनिवर्तने लोकवेदयोरगणना च । **गोपालदोषेति**। दम्भस्यैव लोभानृताभ्यां कृत्वा-न्तःकरणे भगवत्तिरोधायकत्वमिति सेवकानां सोनुचित इति तद्रूप बक मारितवानित्यर्थः ।

दर्शयंस्तद्विदामित्यत्र । **व्रजे यावद्विधा** इत्यारभ्य **भगवानुवाहेत्यन्तम्** ।
१०-११ ९ इदमत्राकूतम् । प्रभुपुत्रत्वेन सर्वेषां यथेच्छ भगवति व्यवहर्तुमशक्यत्वे सति यदि भगवांस्तत्तद्भावानुरूप तेषु स्वय न व्यवहरेत्तदा रूपचेष्टादिभि-र्भगवदाश्लेषादिविषयक उत्कट उत्पन्नो भाव' स्वविषयमप्राप्य को वेद किं कुर्यादतस्तथा करणमावश्यकम् । इमे एव वहनाशक्तिवहने उक्ते । भगवता यत्र कुत्रचित्तथा करणे तेषां च सर्वसमक्ष यथेच्छ करणे बालत्वेनैव लोकाविगानमपि । इदमेव बालचेष्टि-तैरित्यनेनोक्तम् । किञ्च । परम्पराहर्षजनन एवेय व्यवस्था यत्र, तत्र साक्षात्स्वरूपेण येषु तज्जनन तेषां रीति' कथ वक्तु शक्येत्याशयेन बालचेष्टितैरित्यस्याभासमाहु' **तदपीत्यादि** । करणस्य व्यापारत्वेन बालचेष्टितानामेवात्र तथात्वम् । यत्र स्वरूपमेवासक्तिहेतुस्तत्र साक्षात्त-ज्जननमिति ज्ञेयम् ।

गोपवृद्धा इत्यस्याभासे । **सर्वदेवाधिष्ठितेति** । आधिदैविका इन्द्रादयोन्तरङ्ग-
१०-११ २१. सेवका भूत्वा तत्तल्लीलोपयोगिस्थान सज्जीकृत्य प्रभु प्रतीक्षन्त इति तथात्वम् ।

मुक्तः कथञ्चिदित्यस्याभासे । **उत्पातत्वं चेति** । न स्यादिति शेष । प्रतिका-
१०-११ २४. रत्वत एवोत्पातशब्दवाच्यत्वादिति भाव. । वृद्धान्बालानित्यादिषु । तदा केवल स्वोपकरणमात्रपरत्वे तामसत्व, प्रभुत्वेन कर्ममार्गीयद्विजसहितत्वेन च राजसत्वम् । प्रमाणप्रकरणे यशोदानन्दनिरोधो मुख्य इत्येतत्प्रकरणार्थभूतनिरोधतारतम्य-ज्ञापनाय सात्त्विकत्वकथनम् ।

अनुकृत्य रुतैर्जन्तूनित्यत्र । **तेषां दोषदूरीकरणार्थमिति** । लीलानिरोधि-
१०-११-३०. म.वप्रकटन दोषः । अलौकिकत्वज्ञान च तथा । प्राकृताननुकरण च तद्धेतुः । तथा च तदजननार्थं तदनुकरणमित्यर्थः ।

पितरं जगद्गुरोरित्यत्र । तस्यैतन्निदर्शनार्थमिति । यथा गोपालसूनुरपि
१०-११-५०. तत्पितृत्वेन परब्रह्मरूप एव, तथा प्राकृतसंघातेषु प्रतीयमानोपि जीवोक्षररूप इति ज्ञापनार्थमित्यर्थः ।

१०-११-५९. **निलायनैरित्यत्र । ब्राह्मणोपीति ।**

सूक्ष्मरूपेण विश्वासमुत्पाद्य प्रतिबन्धके । तेनैवापगते स्वेष्टरूपमाविष्करोति हि ॥ १ ॥
भक्तार्तिहृतिरिष्टाप्तिः फलं तदितरेष्वपि । निरोध्येषु प्रभौ दोषारोपाभावः फलं त्विह ॥ २ ॥
कदाचिन्निजभक्तानां पित्रादीनामनुज्ञया । तत्संगतस्तत्र लीलाः कुर्वन् कृष्णो विराजते॥३॥
क्वचित्परस्परं गुणानुरागवशतो वने । कथञ्चिद्भक्तसंगे सत्यनिशं रमते प्रभुः ॥ ४ ॥
कदाचिद्भक्तपित्रादिनिषेधेपि निजाग्रहात् । नयति स्वेष्टदेशांस्तं चातुर्येण प्रतापवान् ॥ ५ ॥
कदाचित् कौतुकावेशं ज्ञापयन् स्वस्य नृष्वसौ । अन्यसंगनिवृत्त्यर्थं वानरैः सहितः प्रभुः ॥६॥
पुलिनस्थितभक्ताप्त्यै बहुधोपायकार्यभृत् । तत्स्थितप्रतिबन्धं च नाशयत्येव सर्वतः ॥ ७ ॥
अन्यश्चेदभिमानेन भक्तनैकट्यमाप्नुयात् । बालभावाग्रहेणैव तमपास्य तदा स्वयम् ॥ ८ ॥
स्थित्वानेकविधा लीलाः करोति व्रजवल्लभः । स्थापयित्वान्यगमनप्रतिबन्धकमात्मनः ॥ ९ ॥
केवलस्य गतौ तत्र साधनं विदधाति च । भक्ता हि विविधैर्भावैर्युक्ता हरिरपि क्वचित् १०
एकत्रैवाखिलान् भावान् क्रमेणोत्पाद्य तान् रसान् । भुंक्ते कदाचित् प्रत्येकं तत्र तत्र स्थितस्तथा॥
अथवैकत्र पुलिने वेणुवादनलीलया । संगतेष्वखिलान् भावरसान् भुङ्क्त्युदारधीः ॥ १२ ॥
एतदेव ब्राह्मणोपीत्यादिनोक्तं सुगोपितम् । एतदग्रे मूलरूपलीलेत्यादि निरूपितम् ॥ १३ ॥
तद्भावः प्रोच्यते सम्यक् तदनुग्रहतः स्फुटः । प्रमाणाख्यप्रकरणोपसंहारेपि शुद्धता ॥१४॥
ब्रह्मता नोच्यते चेत् तत्सिद्धं नो भवति द्वयम् । अत एव त्रयं प्रोक्तं ब्रह्मतापरिचायकम् ॥
सर्वाज्ञातस्वरूपं हि ब्रह्म पूर्वं रिरंसया । ततोऽखिलजगद्रूपं भूत्वा तत्रातिदुस्तराः ॥ १६ ॥
मर्यादाः कुरुते लीलासिद्ध्यै यद्वा प्रपञ्चतः । अतीतस्याप्तये भक्तिमार्गानप्यकरोद् दृढान् ॥१७
अशेषवेदशास्त्रोक्तफलभोगाय वेदताम् । आत्मनः प्रकटीकृत्य क्रीडतीत्यपि सूच्यते ॥ १८ ॥
भक्ताः सर्वं परित्यज्य प्रभुप्राप्त्यै यथा रहः । स्थितास्तथा चेत् कुरुते स्वयमेव तदा परः १९
यतो नान्यप्रतिज्ञेयं 'ये यथे'त्यादिनोदिता । साक्षात्स्वरूपदानेन परा लीलेयमित्यपि ॥२०॥
लीलासम्बन्धि वस्त्वत्र सर्वं भगवदात्मकम् । प्रवर्तकत्वतो वेणुनादो वेदात्मकोत्र हि ॥२१
एतत्सर्वं ज्ञापयितुमेतल्लीलात्रयं शुकैः । उक्तमित्युक्तमाचार्यैर्गोप्यत्वं चापि सूचितम् ॥२२॥

अग्रेऽध्यायत्रयं प्रक्षिप्तमित्युक्तम् । तत्र 'कौमारं जहतुः' 'ततश्च पौगण्डवयः श्रिता'विति युक्तः सन्दर्भ इति। मध्येन्यकथा 'त्वेवं विहारै'रित्यस्य 'ततश्च पौगण्डवय' इत्यस्य च वक्त्रा नोक्तेति ज्ञायते । अन्यथैतदध्यायत्रयानन्तरमेव कौमारत्यागं वदेत् । किञ्च, 'पौगण्डे परिकीर्तित'मिति वाक्यात् पूर्वाध्याय एव तत्प्राप्तेस्ततश्च पौगण्डवयःश्रिता'विति वाक्यं विरुद्धं स्यात्, तदनर्थकं च। तृतीयाध्यायान्ते'त्वेवं विहारै'रिति श्लोकोधुना कैश्चित्पु-

स्तकेपु लिख्यते, तदप्रामाणिकमितीतोपि तथात्वं तेषां ज्ञेयम् । भगवत्प्रियाकृतलीलानुकृतिष्वेतदनुकूलभावात् । तृतीयस्कन्धे श्रीमदुद्धवैर्द्वादशे स्कन्धे सूतेन चैतत्कथाया अकथनाच्च । 'न भारती मेङ्ग मृषोपलक्ष्यते,' 'न वै क्वचिन्मे मनसो मृषा गतिः,' 'न मे हृषीकाणि पतन्त्यसत्पथे' इति ब्रह्मवाक्यविरोधश्च । ईश्वरे तत्त्वेन ज्ञानवतस्तत्परीक्षाकृतेर्महानर्थरूपत्वात्, 'भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचि'दिति भगवद्वाक्यविरोधश्च । तोकेन जीवहरणमित्यादिनिरूपकस्य सदेश्वरत्वेन ज्ञानवतस्तादृग्धाष्टर्यस्यासम्भवाच्च । आचार्यैः प्रसिद्धिमात्रेण विवृतमित्यस्माभिरुपेक्षितम् । **इति श्रीप्रमाणप्रकरणम् ।**

प्रमेयप्रकरणम् ।

द्वादशेध्याये प्रकरणार्थौक्तौ । गोपालानां निरोध इत्यादि । एतयोर्निरोधो मुख्यतयोच्यत इत्यर्थः । **मध्यमोय**मिति । वयस्यानां स्वामिनीनां चाग्रेस्यान्निरोधादधिकस्य तस्य वक्ष्यमाणत्वादेतत्प्रकरणोक्तस्तमपेक्ष्य स तयोरपि मध्यम एवेत्यर्थः । **पश्चैर्थे**चेति । धेनुककालीयदावाग्निद्वयप्रलम्बनिग्रहात्मक इत्यर्थः । साधारणानां व्रजस्थानामेतेनान्तःकरणनिरोधप्रतिबन्धकापगम उक्तः, वयस्यानां सखीनां तु मुख्यत्वेन निरोध एकैकेनाध्यायेनोक्त इत्याहुः **उभयेषा**मिति । तत्र निमित्तमाहुः **स्नेहाधिक्ये**ति । साधारणापेक्षयाधिकस्नेहज्ञापनार्थमित्यर्थः । प्रथमं द्वादशेध्याय इति श्लोकः । अत्र अयमाशयः । अत्र ह्यादौ लीलासम्बन्धिवस्तुस्वरूपज्ञानं निरूप्यते । तदनन्तरं दशरसात्मकलीलानुभवश्च । तथा चैवं भावोत्पत्त्यनन्तरं देहादिसर्वविस्मृतिरेव वक्तुं युक्ता, सापि न तात्कालिकी, किन्तु सार्वदिकीति स्थितौ सत्यां यदेतदग्रे धेनुकवधनिरूपणं तत्तादृग्रूपमित्येव ज्ञेयम् । धेनुकातिरिक्तदध्यासाभावश्चेत्यपि । अध्यासनिवृत्तौ तत्स्मृत्यसंभवात् । किञ्च । अध्यासस्य अविद्याजन्यत्वनियम इति ग्रहिलवादिनं प्रति 'तुष्यतु दुर्जन' इति न्यायेनाहुः **यथाग्रहस्तदैतमेव धेनुकं तथा मानये**ति । आवश्यकदैहिककर्मप्रवृत्तिनिमित्तत्वेन भगवद्भजनप्रतिबन्धकत्वं हि देहाध्यासे । अयमपि स्वाभीष्टभजनप्रकारविशेषानुकूलतद्वनगमनप्रतिबन्धक इति तथा। अतएव मूले 'प्रेम्णेदमब्रुव'न्नित्युक्तम् । गोपेष्टप्रकारस्य भगवदभिमतत्वमपि ज्ञापयितुं सखित्वमप्युक्तम् । अन्यथा सोतिवीर्य इत्यादेः कृतनरसंहारत्वस्य चोक्तत्वात्सम्भावितानिष्टदेशे गमनविज्ञापनं प्रेमविरुद्धमिति तदुक्तिर्विरुद्धा स्यात् । यथा तत्त्वज्ञानस्वभावादेव तदध्यासनिवृत्तिरावश्यकी, तथात्रोक्तरसानुभवस्वभावजनिततत्प्रकारविशेषोत्कटरागतः स्वेष्टलीलाप्रतिबन्धकत्वातिरिक्तस्तद्धर्मो भासमानोपि न बाधकस्तेषां विज्ञप्तावभूत्, अतस्तन्निवृत्तिरावश्यकत्वात् । अन्यथा सा न स्यादेव । अतएवाग्रेस्युच्चाधिकारवत्प्राप्यं फलं प्राप्तवन्तः । एतदेवाहुः **फलावधी**ति क्रियाविशेषणेन। **कालीय इन्द्रियाण्याहु**रिति।

---

१ नष्टोपरमनन्तरमिति पाठः । २ स्मृत्यभावादिति पाठः ।

इत्याहुरिति सम्बन्धः। **इति मत**मिति च । आध्यात्मिकीमविद्यामित्युक्तत्वात्तादृशस्यैव देहादेरध्यासनिवृत्तिरत्र कार्या । स च लिङ्गशरीरात्मक इति प्राकृततन्निवृत्तिरेव वाच्या । सैवाध्यायान्ते निरूपिता। अत एव 'दैवोपहतचेतस' इति वक्ष्यति। लीलास्थभक्तजीवनादिकमपि नादृष्टजन्यम्, अलौकिकत्वादिति ज्ञापनाय । एतदेवोक्तमाचार्यैः **ततश्चेज्जीविता** इत्यनेन। देहस्य प्रारब्धजन्यत्वनियमेन तस्य च नष्टत्वेन न तज्जन्योऽग्रिमो देह इति पूर्वस्माद्भिन्न एवेत्याहुः **पुनर्देहान्तरे**ति । 'मृत्युरत्यन्तविस्मृति'रिति वाक्यात् हरिविस्मृतेरेव तथात्वम् । तथा च विषयोन्मुखेन्द्रियाणां तद्धेतुत्वात्तथात्वमित्याशयेनोक्तं **कालीय इन्द्रियाण्याहु**रित्यादि । एतेनैतेषां भगवद्भावातिरिक्तभावाभावः सार्वदिक इति सूचितम् । यद्यपि पूर्वमप्येतेषां तथात्वमेवासीत्तथापि यथा वाचा लीलास्थतर्वादिस्वरूपं ज्ञापितम्, तथा स्वकृत्यैतेषां स्वरूपमाधुनिकान् ज्ञापयितुं लौकिकमपि भावं स्थापयित्वा तथा कृतवान्, अन्यथा 'दैवोपहतचेतस' इति न वदेत्, अलौकिकत्वात्, लौकिकेष्वेव तथात्वसम्भवादिति भावः ।

ततश्च पौगण्डवय इत्यत्र । **दोषाभावः प्रथम**मित्यादि । पुरुषे हि देहेन्द्रियप्राणान्तःकरणजीवात्मकः सङ्घः।तथात्वं भगवत्यपि भासत इति तदभा-
१० १२-१. वनिरूपणेन दोषाभाव उक्तः । प्रमाणप्रकरणत्वात् । तेन भक्तानामपि तथात्वं सिध्यति । अन्यथा सख्यदानं न स्यात् । स चोक्तलीलयैवोक्तः । तथा हि । नहि जीवस्य तादृगुत्सवहेतुत्वं पूतनान्तकत्वं मुक्तिदत्वं वा सम्भवति । न वा स्वापकारकर्त्र्यामपि ब्रह्मादिदुरापपुरुषार्थहेतुकृपायुक्तमन्तःकरणमन्यस्य भवति । यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनादिति न्यायः सर्वत्र द्रष्टव्यः। न वा पूतनास्तन्यसम्बन्धे प्राणरक्षा सम्भवति। अतएव दुर्जरवीर्यमित्युक्तम् । अतितोकस्य प्राणधर्मरूपस्तनार्थित्वदशायां प्रवालमृदंघ्रिस्पर्शमात्रेण शकटे तथात्वोक्त्या चावस्थाविरुद्धकार्यकरणेन भौतिकप्राणराहित्यमेवोक्तं भवति । तृणावर्तगलग्रहणेऽपि तथा । वक्रमुखान्तःप्रवेशेऽपि । स्वमुखकमलेऽखिलप्रदर्शनेनैकदैव लघुत्वगुरुत्वप्राकट्येन रज्जुन्यूनतया चेन्द्रियदेहराहित्यं ज्ञाप्यते। न हि 'यः पृथिव्यां तिष्ठ'न्नित्यादिश्रुत्युक्तधर्मवतीन्द्रियं देहो वा सम्भवति । न हि देहे लघुत्वगुरुत्वे एकदैव सम्भवतः, तावद्रज्ज्वमानं वा। उक्तन्यायोऽनुसन्धातव्यः । एवं सति देहाद्यभावेन तदध्यासादेरप्यभावादुक्तगुणैश्च निर्दोषपूर्णगुणविग्रहरूपत्वं सिद्धम्। तेन दोषाभावज्ञापककालाभिमानिन्यस्ता इति पूर्वं ता एव निरूपिताः। अत्रैव श्लोके **सखिभिः सम**मित्यत्र। **गोरक्षा धर्मे** इत्यारभ्य **नोपपद्येर**न्नित्यन्तम् । ननु गोरक्षा हि वर्णधर्मः । तथा च भगवत्सख्यं प्राप्तानां तदपेक्षाविक्षेपावसम्भावितावित्यनुपपन्नमिति चेत्। अत्रायं भावः। 'अधिकं तत्रानुप्रविष्टं न तु तद्धानिरि'ति न्यायेन स्वाभाविकधर्मान् स्थापयित्वैव सख्यं दत्तवान्प्रभुरिति मन्तव्यम्। अन्यथाग्रे दैवोपहतचित्तत्वं विषपानेन चान्यथाभावो नोपपद्येत । अतएव स्वाभाविकपूर्वस-

र्वधर्मनिवृत्तिर्विषपानकार्यव्याजेन भगवता कृतेत्युक्तम् । एवं सति सख्यस्य फलपर्यवसायित्वार्थं स्वकर्तव्यं गोरक्षणं तैः कारयति प्रभुः । सख्यं प्राप्तानां प्रभुकर्तव्यकरणस्यैव स्वधर्मत्वात् । अन्यथा तदकरणेन स्वाभाविकधर्मैश्च चित्तमितस्ततो भ्रमद्भगवन्माहात्म्यग्रहणाक्षमं सद्भगवल्लोकदिदृक्षामपि न जनयेदिति तद्दर्शनमपि न स्यात् । समर्पणे कृतेपि प्रभुश्चेन्न मनुते, तदा न तत् सम्पद्यत इत्यात्मीयत्वेनाङ्गीकारे सत्येव तत्सम्पत्तिः । इह तु तदर्थं स्वगृहप्रकटनेनात्मत्वमेव भगवानेतेषु मनुत इति ज्ञायते । तेन अस्य आत्मसमर्पणरूपत्वम् । इदं तु साधनरूपम् । अतः साधनप्रकरणे निरूपितम् । फलरूपं तु फलप्रकरणे निरूपयिष्यते । साधनरूपनवविधभक्त्यनन्तरं हि फलरूपाणि तानि नवापि भवन्ति । अतः साधनप्रकरणान्ते निरूपितम् । **पुण्यमतीवे**त्यत्र । **पूर्वमवोचामे**ति । 'या वै लसच्छ्रीतुलसी'ति श्लोक इत्यर्थः ।

तन्माधवो वेणुमित्यत्र । **लक्ष्म्या सह क्रीडां कर्तुमि**ति । व्रजसीमन्तिन्य एवात्र लक्ष्मीपदेनोच्यन्ते । एकवचनं तु दिवा कथञ्चित्तथैव सम्भवतीला-

१०।२२ शयेनोक्तम् । अत्रैव **शब्दब्रह्म च संवादार्थमि**ति । अत्र हि स्वच्छन्दविहारार्थं वनप्रवेश उच्यते । स चामर्यादारूप इति मर्यादानिरूपकशब्दब्रह्मणा विसंवादादप्रामाण्यं स्यात्तन्निरासाय तल्लीलास्वरूपनिरूपकं शब्दब्रह्म प्रकटयति । एवं सति यत्र प्रवर्तकशब्दस्यैव मोक्षादिविस्मारकत्वम्, तत्र तद्विषयस्य कीदृशत्वं वाच्यमिति कैमुतिकन्यायप्रदर्शनार्थं वेणुपदव्युत्पत्तिकथनम् । वेदे चातथात्वं स्फुटम् । इदं च स्वतः पुरुषार्थरूपम् । फलाविसंवादि च । तेन प्रमाणोत्तमत्वं सूचितम् । तथा चायं मार्गः पुष्टिरूप इति मर्यादामार्गीयप्रमाणाविषयत्वं युक्तमिति भावः । **कुसुमाकरं वन**मित्यत्र । **रजसैव विहार** इति । रसोद्दीपिका सामग्री रजःशब्देनोच्यते । यथा रसशास्त्रसिद्धा लौकिकी रीतिः, तथात्रापीति ज्ञापनाय । अत्रैव **सत्त्वप्रधानैवे**ति । 'सत्त्वात्सञ्जायते ज्ञान'मिति वाक्याद्रसस्वरूपज्ञानपूर्विकैव लीलेत्यर्थः ।

स्पृशच्छिखान्वीक्ष्येत्यत्र । **तान् उद्गतान् दृष्ट्वे**ति । निरुद्धान् दृष्ट्वेत्यर्थः ।

१०।२५. अत्रैव **तमोपहत्यै तरुजन्मे**त्यत्र । **तरुत्वदोषनिवृत्त्यर्थमि**ति । अत्रायं भावः । तमसोऽज्ञानहेतुत्वेन ज्ञानविरोधित्वाच्च कदाचित् स्वसमीपे भगवत्यागते स्वसम्बन्धिपत्रपुष्पफलाद्यपेक्षाया च सत्या पूर्वोक्तदोषेणेदमज्ञात्वा न प्रकटयेयुः, स्वजातिस्वभावेन स्वस्वकाले एव च प्रकटयेयुस्तदापराधः स्यात् । अत्र तादृक्तरुजन्मवैयर्थ्यं च । अतस्तमोनिवृत्तावज्ञानस्यापि निवृत्तेर्यथोचिता सेवा भवतीति तन्निवृत्तिः प्रार्थनीया, न तु तरुत्वस्यापि, परमेष्टत्वादिति ।

एतेऽलिन इत्यत्र । **वृक्षापेक्षया किञ्चित्समीचीना** इति । देवापेक्षया

१०।२६. मुनीनां तथात्वं स्पष्टम् । वाचनिकं भजनमनुपथं च भजनं रसविशेषोद्दीपकत्वं चाधिकमेतेषु तेन तथा ।

एव **वृन्दावन** इत्यस्यावतारिकायां, **तत्र प्रथमं धममाविःकुर्वन्निति** । अत्र हि
१०।१२।९ भगवद्दास्यमेव मुख्यो धर्मः । स च वृक्षाणां भगवता निरूपित. । तथा चैव 'वृन्दावने पशून्सचारयन् रेमे' इति वाक्येन पूर्ववाक्यानां सम्बन्ध इति तादृशधर्मप्रकटनपूर्वक रमण महावाक्यार्थो भवति । स्वय पशुचारणे क्रीडायां प्रतिबन्धः स्यादिति तदभावाय भगवत्कार्यं स्वय गोपा. कुर्वन्तीति पशुचारणमपि सेवैवेति स्वधर्म एव, वैश्यानां चाय धर्मो भवत्येवेत्यर्थ. समाज इति भाव. ।

वृक्षमूलाश्रय इत्यत्र । **वृक्षस्य मूलमेवेत्यारभ्यातस्तेषु शेत** इत्यन्तम् ।
१०।१२।१६ गोपोत्सङ्गोपबर्हणस्य तल्पेषु शयानस्य वृक्षमूलाश्रयत्वमनुपपन्नमित्येव व्याख्या । न च तत्र तल्पस्थित्या तथात्वमुक्तमिति वाच्यम्, भगवद्विशेषणत्वानुपपत्ते. । एव सति विवक्षितार्थस्यातिगोप्यत्वेन परोक्षवादेनैवोक्तिरिय श्रीशुकस्येत्याचार्यैरपि तथैवोच्यते । तथा हि । इमानि वृक्षमूलानि स्वप्रियाभ्य. सङ्केतितानि, गोपाश्रान्तरङ्गाः प्राप्तसख्या इत्युभयानुगुणकार्यकर्तारोऽत उक्तमूलेष्वेव तद्रचना कृतवन्तः । तथा च सङ्केतानन्तरं नायिकान्त.करणानि तत्रैव सन्तीति तेषु तथात्वेनोक्ति' । गुप्ततया स्थितिरित्यतीन्द्रियत्वम् सर्वपरित्यागेन मानसोत्कृष्टभावप्राधान्येन च परमहसत्वम् । रह सन्देशवाक्यानामतिगोप्यानामुक्त्या चर्वित्वम्, अत एव परमत्वमुक्तम् । प्रिययोगवत्त्वेन योगित्वम् । शयन उपबर्हणस्य प्राथमिकत्वेन तथैव वक्तुमुचितत्वेपि यदन्ते कथन तेन रतिश्रान्त्या पश्चाद्यच्छयन तदत्रोच्यत इति ज्ञायते, अन्यथोपबर्हणस्य तल्पान्तर्गतत्वेन तेनैव तत्प्राप्तेर्गोपोत्सगो नोच्येत । एव सति तदुक्त्या तल्पान्तर्गततदभाव सूचितो भवति । स च विविधबन्धैरेव भवतीति तदन्ते श्रमापनोदनार्थमन्तरङ्गगोपास्तथा कृतवन्त, तदा तेषामेव प्राधान्यम्, न नायिकानाम् । इदमेवाभिसन्धाय तेषु भगवत प्राधान्यस्थापनमित्याद्युक्तमाचार्यै. **परोक्षवाद** इति । स्मरयुद्ध नियुद्धपदेनोक्तवान्, अन्यथा पूर्वोक्तरीत्या शान्तरसो नोक्त स्यात् ।

अन्ये तदनुरूपाणीत्यत्र । **भगवति सर्वं** सम्भवतीति । भक्तिमार्गे विरोधली-
१०।१२।१८. लाया अभावात्तत्कृतो मनोज्ञत्वपरिहारोनुपपन्न इत्यत आहु महात्मन इत्यस्य तात्पर्यं **भगवतीत्या**दिना । यथा रोदन यथा वाग्रे सर्वज्ञत्वेन जानन्नपि भक्तपरीक्षार्थमसन्तमपि भक्तदु खहेतु कालीयह्रदे प्रदर्शितवान् । तथाविधा लीला न गीतेत्यर्थ. ।

एवं निगूढात्मगतिरित्यत्र । स्वकार्याकरणमेवात्र निगूढत्वम्, तेन तद्विपरीत-
१०।१२।१९ कार्यसम्भवोपि । अत एव पूर्णशृङ्गाररसात्मत्व सगच्छत इति दिक् ।

विद्यन्तेऽभुक्तपूर्वाणीत्यत्र । केचिदित्यस्वरसोद्भावनम् । तद्बीज तु गन्धविशेषेणे-
१०।१२।२० ष्टरसानुमानात्काम सम्भवति । अत एव गन्धलोभितचेतसामिति वक्ष्यन्ति । उक्ततद्धर्मैश्चौर्यसम्भावनापि नेति ।

तं गोरजइत्यत्र गावोत्र धर्म इत्यादि । धर्मस्य वृषरूपत्वेन गोजातीयत्वाद्गो-
शब्देन धर्मोत्रोक्तः । धर्महेतुत्वेन वा । अर्थस्य धर्मसाध्यत्वेन तत्सम्बन्धित्वा-
१०-१२-४२. द्विक्षेपहेतुत्वेन च रजोरूपत्वान्मदहेतुत्वाच्च रजःपदेनार्थ उक्तः । निष्काम-
स्यान्यसम्बन्धासम्भवात्कामे सत्येव तथात्वाद्व्याप्तिः कामः । 'स नैव रेमे, तस्मादेकाकी
न रमते, स द्वितीयमैच्छत्स हैतावानासे'ति श्रुतेः । 'तत्सृष्ट्वा तदेवानुप्राविशदि'ति श्रुतेश्च
कामेनैव सर्वरूपेणाविर्भूय सर्वं व्याप्तवानिति च तथा । केशाः सदा बद्धास्तिष्ठन्ति, अलकाः
सदैव मुक्ता एवेति तथा । दूरमिव गतानां मानिनीमनसां स्वशोभातिशयेनाकार्येव स्वरूपा-
नन्ददातार इति च मोक्षस्थानीया इति भावः । तत्तद्दर्शनेन सा सा लीला साक्षादनुभूतेव
भवतीति निगर्वः । अत्रैव **कुन्तलाश्च कामरूपा** इत्यादि । उत्तमरसभोक्तृदर्शने स्वस्यापि
तद्भोगेच्छा लोकसिद्धा । प्रकृते च भ्रमरतुल्या एते मुखाम्बुजस्य परितश्चकासत इति
तद्धर्मभावोद्दीपका इति कामरूपाः । गवां सदा भगवत्संगतत्वेन प्रियस्मारकत्वात् कदाचित्
तासामन्यादर्शनसम्पादकत्वेन रसानुभवहेतुत्वाच्चानुभावकत्वम् । मध्ये त्वधिकारिदेवै-
रिति तु परोक्षकथनं वेदितव्यम् ।

त्रयोदशेऽध्याये प्रकरणतात्पर्योक्तौ । परीक्षैवेन्द्रियाणामित्यादि । ननु
कालीयस्य भक्तापराधित्वेन निग्रह उचितः । तं नागभोगेत्यादिनोक्तलीला
१०-१३-०. त्वयुक्ता, उत्पाताश्चानुपपन्नाः, वस्तुतो हेत्वभावादित्याशङ्क्य तत्तात्पर्यमाहुः
परीक्षेत्यादिना । कृतो निरोधः सम्पन्नो न वेति परीक्षैवास्मिन्नध्याये निरूप्यत
इत्यर्थः । अत्रोपपत्तिं वदन्त एव तं नागभोगेत्यादितात्पर्यमाहुः **इन्द्रियाणां** हीति ।
हि यस्माद्धेतोस्तन्निग्रहं परीक्षार्थं हरिः कुरुते इति सम्बन्धः । मृत्योरप्यधिकपीडाजनको
दण्डो निग्रहशब्देनोच्यते । भगवतः स्वेन्द्रियकार्यप्रकटनमात्रमेव गोकुलवासिनां तादृशं
पूर्णे निरोधे भवेन्नान्यथेति तज्ज्ञापनार्थं तथात्मानं प्रदर्शितवानित्यर्थः । उत्पातोपपत्तिमाहुः
ततो देव इति । देवपदेनाधिदेवरूपः काल उच्यते । स च भगवद्रूपः स्वयमाध्यात्मि-
काधिभौतिकौ प्रेरितवानित्यर्थः । अत एव **त्रिविधा** इत्युक्तम् । **पुरुषाय महात्मन**
इत्यस्याभासे । ततः **सर्वोत्तमोपी**त्यादि । यद्यपि सर्वोत्तमस्तथाप्ययं नन्दगेहे जातो,
न तु नृसिंहवत्स्वयमेव प्रकटः । तथा च जननं गर्भादिसापेक्षमिति पुरुषोत्तमत्वमनुपपन्नं
स्यादिति तदभावाय पुरुषोत्तमत्वं पदद्वयेनोपपादयतीत्यर्थः ।

अपराधः सकृद्भर्त्रेत्यत्र । **यद्यपी**त्यादि । पालकत्वेन साम्प्रतं सात्त्विकेष्वेव कृपा,
न राजसतामसयोरतस्तयोः स्वकार्यकरणेनवसर इति तत्करणमपराधस्तथापि
१०-१३-५१. तयोरपि भवानेव पतिरिति सोढव्य इत्यर्थः ।

चतुर्दशाध्याये प्रकरणतात्पर्योक्तौ इन्द्रियप्राणयोर्दोष इत्यादि । क्षुद्र-
पाद्यैः प्राणधर्मत्वेनात्र चाद्यैः निवृत्त्युक्त्या प्राणदोषनिवृत्तिरेवोच्यते । काली-
१०-१४-०. यकथया सह कथने हेतुः **सहैव** हीति । अन्यतरदोषसत्त्वेप्युभयकार्या-

वश्यंभावेन तथा । महतो गरुडस्यापि प्राणदोषादेव शापप्राप्तिर्यतोतः सर्वथा निवर्तनीय इति ज्ञापनाय पूर्वं प्रासङ्गिकी कथेति भावः । कालस्याप्यगम्यस्थलकर्ता तद्भयरहितस्यापि भयहेतुश्चेत्यद्भुतकर्ता मत्स्यरक्षार्थं भक्तापराधे कृते भगवता स तत्रानीतो येन तत्सर्वनाशोऽभूदित्यप्यद्भुतं कर्म । किञ्च, गरुडस्य प्रभुविहारस्थानत्वेनैव तत्रत्यजीवमात्रापीडनेन शापप्रयुक्तखादनाद्यभावात्सौभरेरपि भक्तापराधदोषनिवृत्तिः । सर्पस्थितितद्विषकार्यादिषु शापस्यैव मूलत्वात् तदुद्वासनादिनापि तथा । यमुनाया अपि दोषनिवृत्तिरनयैव लीलयेति ज्ञापनाय प्रासङ्गिकी कथेत्यर्थः ।

अत्र प्रविश्येत्यत्र । **इदमनुवादकमिति** । सर्पप्रवेशे तीरगानां विषेण तथात्वं स्वत एव भविष्यतीति तदनुवादकत्वशङ्का । अन्यथा विषप्रवेश एव न स्या-
१०-१४-११. दिति भावः ।

पञ्चदशेध्याये प्रकरणसन्दर्भे अन्तःकरणदोषश्चेति । तिष्ठतु स्नेहवार्ता दूरे, लोके लौकिकानामपि क्रीडादिष्वप्यारोहणादेर्निमित्ते जातेपि प्रभुपुत्रादौ न
१०-१५-०. तत् कर्तुमन्तःकरणप्रवृत्तिः सम्भवति । इह तु स्नेहवतामप्यनेवं भाव उच्यत इत्यवश्यमन्तःकरणे तादृशो हेतुरस्तीति मन्तव्यम् । प्रलम्बे हते भगवत्यलौकिकत्वबुद्धिः पूर्वस्मात् स्नेहातिशयश्च जातो येन आशीर्दानं विह्वलचेतस्त्वं चाभूदतः सुष्ठूक्त**मन्तःकरणे**त्यादि ।

कूजत्कोकिलसारसमित्यत्र । **कूजिते परपुष्ट** इति । पूर्णे रसे हि कूजितोद्गमः । स च न विवाहिते पुंसि भवति । किन्तु परस्मिन्नेवेति कूजिते प-
१०-१५ ७. रपुष्टो भावोपेक्ष्यते । कोकिलश्च पूर्वं काकपोषित इत्येतत्साम्येन कोकिलोक्त्योक्तौर्यो व्यज्यत इत्यर्थः ।

षोडशेध्याये । **अजा गावो महिष्यश्चे**त्यत्र । **ते हि वर्षवृद्धा** इत्यादि । 'ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री'त्यनुशासनादत्र स्त्रीप्रयोगादतरुणत्वं ज्ञाप्यत
१०-१६-२. इति तथा ।

सप्तदशाध्यायार्थकथनं । **लीला सप्तदशेध्याय** इत्यादिना । ननु सर्वा लीला निरुद्धभक्तसहितेत्यत्र को विशेष इति चेत् । उच्यते । प्रलम्बवधदवाग्नि-
१०-१७-०. मोचनाभ्यां वयस्यानां तदुक्ततच्छ्रवणेन व्रजस्थानां च पूर्वस्माद्विशिष्टा भगवदासक्तिरेव विशेष इति । अपरञ्च । निरुद्धभक्तसाहित्यं प्रभोरनुक्त्वा लीलाया यदुक्तं तेन दिवा स्वामिनीनामिव रात्रौ वयस्यानामाधुनिक्यात्यासक्त्या मिथो भगवल्लीलागानेन तद्भावापत्तिरेव जाता । एवं सति प्रभुर्यां यां लीलां करोति, सा सा गोपानां हृदये तिष्ठतीति ज्ञाप्यते । **सर्वतत्त्वमिति** । लीलामध्यपातिनां सर्वेषामित्यर्थः । नन्वितः पूर्वमपि तयोर्भूतत्वादस्माद्ग्रीष्मात्पूर्वमेवैतयोः कथं न निरूपण तत्राहुः **दोषापगमन** इति । स-

त्क्रीडेति । मारणार्थमपि दैत्यासम्बन्धिनीत्वात्केवलानन्दरूपत्वमेव क्रीडायाः सत्त्वम् । **प्राजापत्य** इति । 'यो वै सप्तदशं प्रजापतिं यज्ञमन्वायत्तं वेद' तिश्रुतौ यज्ञात्मकप्रजापतेः सप्तदशत्वमुक्तमिति तत्समानसंख्याकेध्याय इत्यर्थः । **तत्संगदोषो न भवेदिति** । गोपालानां प्रभावत्वासत्त्या रात्रावपि निरन्तरं गुणगान एव क्रियमाणे मात्रादयः स्नेहाज्ञागरणस्य दुःखत्वं ज्ञात्वा कदाचिन्निवारयेयुस्तासां प्रभावनासक्तिश्चेत्स्यात् । एतल्लीलाद्वयश्रवणेन माहात्म्यज्ञानपूर्वकः सुदृढः स्नेहो जातस्तासामपीति तासामप्येतदेव रोचत इति न प्रतिबन्धकत्वं स्यादित्यर्थः । **सर्वसत्त्वगुणोद्बोधाद्धेति** । अप्राकृते भगवद्धर्मात्मके सत्त्वे यथा भगवदाविर्भावेंशावतारे तथा सच्चिदानन्दात्मकनलीलाया अपि तत्रैवाविर्भावः । एवं सति सर्वेषां लीलापदार्थानां सम्बन्धी यः सत्त्वगुणस्तस्याविर्भावे तदधिष्ठयानामपि तत्राविर्भावाल्लीला सम्यक् सम्पद्यत इति कार्यतो लीलोपयोगित्वं प्रावृषः । सत्त्वव्यवधानेन जीवानां साक्षात्प्रभुसम्बन्धाभावमाशङ्क्याहुः **तदा भगवानिति** । धर्मेण साक्षाद्धर्मिभिरपि क्रीडिष्यतीत्यर्थः । **एतान्येवेति** । अप्राकृतानि भगवद्धर्मरूपाणीति ज्ञेयम् । **दिव्यानिति** । अस्याः पूर्वं संभृतिरूपत्वमुक्तम् । सा न लौकिकी, किन्तु लोकेप्यलौकिको यः स्वर्गो लोकस्ततोप्यलौकिकी सच्चिदानन्दरूपत्वादिति ज्ञापयितुं स्वर्लोकं ज्ञापयितुं स्वर्लोकसमसंख्यैः श्लोकैरुच्यत इत्यर्थः । तेनेतरलीलातोपि वैलक्षण्यमायाति ।

सान्द्रेत्यादिश्लोकसंख्यातात्पर्योक्तौ । **एकविंशो** वा इत इत्यारभ्य **एकविंश** इति चेत्यन्तम् । यथास्माल्लोकाद्विलक्षणः सुखरूपो वेदैकसमधिगम्योऽत एव
१०-१७-२. अलौकिकश्च स तथा अयमपीति ज्ञापनाय तत्सख्यासमानसंख्याकैः श्लोकैरुच्यत इति भावः ।

अष्टौ मासान्सान्द्रनीलाम्बुदैरिति श्लोकद्वयेपि वृष्टिनिरूपणेऽन्यतरवैयर्थ्यमिति शङ्काभावाय तद्भेदकं रूपमाहुराभासाभ्याम् । **तत्संबन्धिनं सूर्यं निरूपय-**
१०-१७-४. **तीति** । **सूर्योपरिलोकयोरि**त्यादि च ।

तपःकृशेत्यत्र । ननु 'न यत्र चण्डांशुकरा विषोल्वणा भुवो रसं शाड्वलितं च गृह्णत' इति वाक्यविरुद्धं भूमेस्तपःकृशत्वकथनमिति चेत् । मैवम् । दृष्टान्तेनैवै-
१०-१७-७. तन्निरासात् । तथा हि । पूर्वमप्राप्ततापोपि कामितफलप्राप्त्यर्थं विहितं स्वयमुद्यम्य हि तपः करोति पुरुषस्तद्विना तदसम्भवात् । तथा तरणितापाभावेऽत्यार्द्रायां वृष्टिजलाप्लुतायां भुव्युप्तं बीजमपि नश्यत्यतो येषु क्षेत्रेषु तापापेक्षा तेषां क्षेत्राणां रसं रविकरा गृह्णन्त्येव । तदपि न स्वस्वभाववशात् किन्तूक्तदृष्टान्तन्यायेन गोपालानां विशेषतस्तथेच्छयेति मन्तव्यम् । अत एव ग्रीष्मवर्णने भुवो रसस्यैव ग्रहणमुक्तम्, न तु जलस्यापि । रसशब्देन चान्नोत्पत्तिहेतुभूतार्द्रतोच्यते । एतेन व्रजजनेच्छानुरूपमेव कार्यं भवति, नान्यदिति ज्ञापितं भवति । एतदेव हृदि कृत्वा **तपसा शोषितनदेह** इत्याद्युक्तमाचार्यैः ।

निशामुखेष्वित्यादिश्लोकपञ्चकाभासोक्तौ । एवं **लोकत्रयस्ये**त्यादि । द्वादश-
१०-१७-८. मासा इति श्रुत्युक्तैकविंशतिपदार्थैपूक्तचतुष्टयं निरूप्येत्यर्थः । अग्रे च पञ्चर्तव इति श्रुत्युक्तपञ्चर्तुरूपतोच्यते । द्वादशसु मासेषु प्रत्येकं मासद्वयात्मकत्वेनर्तूनां षोढात्वे सम्भवति पञ्चत्वनिरूपणं यत् तत्तात्पर्यमाहुः **ऋतवो धर्म** इति । अग्निहोत्रदर्शपौर्णमासचातुर्मास्यपशुसोमा वैदिका धर्माः पञ्च । ते च वसन्तेऽग्नीनादधीतेत्यादिश्रुतिभिर्ऋतूनेवाधिकृत्य विहिताः । तथा चोक्तधर्मार्थमेवर्तुविभाग इति ज्ञापनाय तत्समानसंख्याका एव ते निरूप्यन्त इत्याशयेनाहुः **ऋतवो धर्मे प्रतिष्ठिता** इति । प्रतिष्ठितत्वं तत्रोपयुक्तत्वं तन्निमित्तत्वमिति यावत् । वसन्तादिषूपनयनाग्न्याधानज्योतिष्टोमादीनां वर्णभेदेन यागभेदेनापि विधानात्तथा । मासानां द्वादशत्वे हेतुमाहुः **मासा धर्मिष्विति** । धर्मिणो वैदिकधर्मकर्तारः पुरुषास्ते चोक्तधर्मसमुचिताः षष्ठा भवन्ति । सकामनिष्कामभेदेन तेपि द्विविधा इति द्वादशविधत्वम्, द्वादशांगत्वेनापि तथा । तेषां चायुः कर्मानुष्ठाने साधनम् । तच्च संवत्सरैर्मितमिति तेषामपि द्वादशमासात्मकत्वमित्याशयेनोक्तं **मासा धर्मिष्विति** । अग्रे जलस्थलौकस इत्यादिद्वादशसु श्लोकेषु जीवादयो द्वादश धर्मिणो ये वाच्यास्तेपि धर्मिपदेन संगृह्यन्ते । निशामुखेष्वित्यादिश्लोकप्रतिपाद्यानर्थान् क्रमेणाहुः **अर्थः शब्द** इत्यादिना । वेदो हि धर्ममूलम् । तत्र वर्णाश्रमधर्मा अर्थः । तत्प्रतिपाद्यत्वात् । अध्ययनं शब्दः, शब्दग्रहणात्मके तस्मिंस्तस्यैव मुख्यत्वात् । निषिद्धं कर्मफलम् । निषिद्धफलप्राप्तौ याद्वा सम्पत्तिस्तज्जो मदश्चांगे । अत्र पञ्चस्वपि श्लोकेषु हीनदृष्टान्तोक्तितात्पर्यमाहुः—**पुष्टिमार्ग** इति । पुष्टिमार्गे मर्यादामार्गाद्वैलक्षण्यं ज्ञापयितुं तथोक्तिरित्यर्थः । तर्हि धर्मप्रतिष्ठामाहेत्याभासः कथं संगच्छते । इत्थम् । लौकिक्यां सृष्टौ पापेन यथा पाषण्डधर्माणां प्रकाशो, न वैदिकधर्माणाम्, तथात्र प्रावृट्सहजधर्मरूपं यत्तमस्तदन्यत्पापम् । खद्योतप्रकाशातिरिक्तः पाषण्डधर्मप्रकाशश्च, चन्द्राद्यप्रकाशातिरिक्तो वैदिकधर्माप्रकाशश्च नास्तीत्यर्थः । इदं च प्रावृषः शोभाकरं तेन पूर्णो वैदिको धर्मोत्रास्तीति ज्ञापितं भवति । एतेन लीलासृष्टिस्वरूपज्ञापिकेयं प्रावृडित्युक्तं भवति । अत्रत्यानां क्षुद्राणामपि प्रकाशोऽधुना लीलानुपयोगिनां महतामप्यप्रकाश आवरकस्य प्रकाशकत्वं चेति वैलक्षण्यं च । किञ्च । परोक्षवादेन मर्यादामार्गादन्यदपि वैलक्षण्यमत्र ज्ञाप्यते । तथा हि । खे आकाशे द्योतः प्रकाशो येषां ते तथा । गतिमतामेव च तेषां द्योतः । सोपि न दिवा । किन्तु तमस्येव । एवं सत्येतत्समानधर्मवत्यो भगवदर्थमभिसारवत्यः स्वामिन्यो लक्ष्यन्ते । तासां भानं शोभा निष्प्रत्यूहं भगवत्प्राप्तिरेव । अत एव निशामुखेष्वित्युक्तम् । प्रियप्राप्त्यनन्तरमलौकिकचन्द्रस्यैव प्रकाशनात् । अन्यथा तमसा भान्तीत्येतावदेव वदेत् । ग्रहो ग्रहणं पाणिग्रहणं यासां तास्तथा । परोक्षवादत्वान्न पाणिपदोक्तिः । नहि तादृशं प्रत्यभिसारः सम्भवति । अत एव न भान्ति । गृह्णन्तीति ग्रहास्तदन्वेषणेन तन्निवारकास्त-

त्सुरुपा इति वा । एवं सति यथा मर्यादामार्गे निषिद्धेनाभिसारेण तानि पापस्य खण्डानि, 'लिङ्गं खण्डमिहोच्यत' इति वाक्यात् । तज्ज्ञापकमत्युग्रं दुःखं प्राप्नुवन्ति, न तु सुखम् । तथात्र । तेन मुक्तानामपि दुर्लभं सर्वश्रुतिमृग्यं भगवत्संगं प्राप्नुवन्तीति महदेव वैलक्षण्यमिति भावः । इदमत्राकूतम् । 'स वै पतिः स्यादकुतोभयः स्वयमि'ति 'त्वक्श्मश्रुरोमनखकेशपिनद्धे'त्यादिवाक्यैः स्त्रीणां भगवानेव पतिर्न तु जीवः । एवं सति यथा वैदिकेषु कर्मसु विष्णुयाग आसुरा यथा न जानन्ति, तथोपांशुरेव क्रियते, उपसदोपि तथा । यद्वा, 'इदमुच्चैर्यज्ञेन चरामः तन्नोऽसुराः पाप्मानुविन्दन्ति । उपांशूपसदा चराम तथा नोऽसुराः पाप्मानानुवेत्स्यन्ती'ति श्रुतेः । तेषां ज्ञानमेव तद्धर्मरूपपाप्मप्रयोजकत्वेन फलप्रतिबन्धकम् । तथा प्रकटं प्रभुसमीपगमन एतन्मार्गानधिकृताः स्वधर्मेण फलप्रतिबन्धकरणेन योजयिष्यन्तीति तथा गमनमेव तासां स्वधर्म इति मुख्यो धर्मो ज्ञापितो भवत्यत्रेति । यद्वा, सर्वत्र धर्मविरोधदृष्टान्तोक्तितात्पर्यमाहुः **पुष्टिमार्गे हीति** । इदमत्राकूतम् । सर्वसामर्थ्यानि प्रकटीकृत्य स्वयं प्रकटे फलरूपे प्रभावितरसाधनानुष्ठानस्याप्रयोजकत्वेपि व्रजे यद्वेदाध्ययनादिकं तन्न मर्यादामार्गीयम्, किन्तु 'मदर्थं मत्परिग्रह'मिति प्रभुवाक्यात् तेषां मर्यादामार्गीयत्वासम्भवात् पुष्टिमार्गीयम् । स्वस्त्ययनाशीर्दानादिभिस्तज्जनितसामर्थ्यस्य भगवति विनियोगात् लीलोपयोगित्वाच्च तथा । 'विप्रा मन्त्रविद' इति वाक्यात् तादृशानामेवाशिषामनिष्फलत्वात् तेषां स्वस्मिन् विनियोगस्य चिकीर्षितत्वात् तदिच्छात एव तत्करणात् पुष्टिमार्गीयत्वम् । तेन मर्यादामार्गीयो धर्मोत्र नास्तीति ज्ञापनाय तादृग्दृष्टान्तोक्तिरिति । अथवा, ऋतवो धर्म इति । यस्यर्तोर्यो धर्मः पुष्पघर्ममेघादिस्तस्मिन् प्रवृत्ते सम्यगयमृतुः प्रवृत्त इति सर्वैः स्तुतो भवतीतीयमेवर्तुप्रतिष्ठा । तथा च तमोविशेषः खद्योतप्रकाशो ग्रहाभानं च वर्षर्तुधर्मः शोभाहेतुश्चेति स उच्यते । प्रकाशस्य ग्रहाणां च मर्यादामार्गीयत्वात्तदशोभोच्यते । मर्यादामार्गविरोधांशे च दृष्टान्तः । मण्डूकशब्दोपि वर्षर्तुशोभाकरः । ब्राह्मणास्तु मेघगर्जितं श्रुत्वानध्यायज्ञानेन वेदाध्ययनलक्षणनियमभंगे तदन्या वाचः सृजन्ति, कर्मानुपयोगित्वमुभयोस्तुल्यम् । तेन वेदाध्ययनात्मकमर्यादाशोभाभाव उक्तो भवति । क्षुद्रनदीनां तथात्वमपि (तदा) तथा अविहितप्रकारेण दानभोगाभ्यां मर्यादाभाव उक्तः । अग्रिमश्लोकोक्तधर्मा अपि तदा शोभायै । नृणामिति साधारणवचनात् क्षुद्रार्थजनिता लौकिकी शोभोक्तेति न मर्यादामार्गीयत्वम् । क्षेत्राण्यपि पूर्ववत् । उत्तरार्धे स्पष्टं पूर्ववत् ।

यथा पापेनेत्यस्याभासे । **एवं भावे यो हेतु**रित्यादि । मर्यादामार्गतिरोधानमेव हेतुरिति भावः । **श्रुत्वा पर्जन्यनिनद**मित्यनेनापि कलिस्थब्राह्मणतुल्या अत्र मण्डूका एव, न तेपीति ज्ञाप्यते । तेनात्र ब्राह्मणानां स्वधर्मनिष्ठत्वं ज्ञापितं भवति । **आसन्नुत्पथवाहिन्य** इत्यनेनापि क्षुद्रनदीव्यतिरिक्त उत्तरार्धोक्तधर्मविशिष्टः पुरुषोत्र नास्तीति ज्ञाप्यते । एतेनेन्द्रियपरवशत्वाभावेनान्तरमङ्गमुक्तं भवति । **हरिता हरिभि**रित्यनेनापि नृणां

क्षुद्राशयानां क्षुद्रार्थसम्पदो मदजनिका यथा, तथात्रोक्तधर्मत्रयातिरिक्ताः क्षुद्रार्था न सन्तीति ज्ञाप्यते । न ह्येते मदजनकाः । तथा च 'तत आरभ्य नन्दस्ये'ति वाक्यादलौकिकी सर्वार्थसम्पदस्ति, न तु मदजनिकेति ज्ञाप्यते । अपरञ्च । लौकिकमहाराज्यश्रीतुल्यात्र भुवो वर्णादिशोभैव । सापि बाह्यैव । प्रभुपदाम्बुजचिह्नलीलानन्दादिरूपबाह्याभ्यन्तरशोभायास्तु दृष्टान्त एव नास्तीति भावः । क्षेत्राणीत्यनेनापि सर्वजीवनहेतुभूतान्नोत्पत्त्यनुकूलप्रयत्नवतां मुदं स्वदोषेण वस्तुतत्त्वाज्ञानेन च परद्रोहकर्तॄणां तत्प्रतिबन्धकरणेन दुःखं च क्षेत्राणि जडानि यत्र ददुस्तत्र किमु वक्तव्यं गोकुले चेतनानां सर्वहितकर्तृत्वमन्येनापि परद्रोहचिन्तने तत्प्रतिबन्धकत्वमिति ज्ञाप्यते । तेनात्र पूर्णो धर्मो निरूपितो भवति । अतः सुष्ठूक्तं **धर्मप्रतिष्ठामाह पञ्चभिरिति** ।

जलस्थलौकस इत्यत्र । **मासा हि निमित्तमि**त्यादि । 'द्वादश मासा' इत्यादिश्रुत्युक्तैकविंशतिप्रकारेण प्रावृड्व्यच्यत इत्यादित्यत्रिलोकन्यायेनोक्त्वा ऋतुन्यायेन
१०-२७-१३.
पञ्चभिः श्लोकैर्धर्मप्राधान्येन निरूपणं कृतम् । अधुना तु धर्मिप्राधान्येन माससमसंख्याकैः श्लोकैस्तत्क्रियते । मासा हि गर्भन्यायेन धर्मिस्वरूपविशेषसम्पत्तौ निमित्तभूताः, अतो वक्ष्यमाणजीवादयो धर्मिण एवात्र प्रधानभूता इत्यर्थः । साक्षाद्भगवत्सेवौपयिकदेहसाधनत्वं वारिमात्रस्य यत्र, तत्र किं वाच्यमन्यस्य वस्तुन इति भावः । एकेनालौकिकगुणाधायकत्वमुक्तवात्र सदोषवस्तु निकटेऽपि नास्तीति ज्ञापयितुं दूरस्थं सिन्धुं निरूपितवान् । सिन्धुर्द्वीपमर्यादाहेतुत्वेन मर्यादामार्गीय इति तस्य क्षोभ उच्यते । एतल्लीलानुपयोगिनो महतोऽप्यनर्थपर्यवसानमेवेति च ज्ञाप्यते । अन्यथा सिन्धोरव्रजस्थस्य निरूपणमनर्थकं स्यात् । निरूप्यते चात्र भगवदीयप्रावृष एव कार्यम् । तस्याश्चेतोन्यत्र प्राकट्ये प्रयोजनाभावः । एवं सति स्वाधिष्ठानत्वादाधिभौतिकप्रावृषस्तद्द्वारैव तथा कारितवतीयमित्यस्मिन्प्रकरणे व्रजस्थेतरस्यापि सिन्धोर्निरूपणम् । लीलारसामृतसमुद्रे जागरूकेऽन्यस्मिन् समुद्रत्वमसहमानया तया स्वप्रौढ्येदं कृतमिति ज्ञायते । तथा चास्थैर्यस्वभावा स्त्री, तादृश्याः पतिश्च गोकुले नास्तीति दोषाभावो व्यज्यते । दृष्टान्तेन चात्र भगवदेकनिष्ठत्वेनोभयेषां सिद्धचित्तवृत्तिनिरोधत्वादेकत्रस्थित्या स्वस्त्रीदर्शनादावपि न क्षोभ इति व्यज्यते, तेन 'मन्यमानाः स्वपार्श्वस्थानि'ति न्यायः सार्वदिक इति सिद्धम् । अत्र पूर्वं वारिमात्रस्यापि मुख्यभक्तिकार्यकर्तृत्वेन भक्तिरूपत्वमुक्त्वा तदात्मिकानामेव सरितां यत् क्षोभकत्वमुक्तम्, तेन प्रावाहिकभक्तिमन्तो न लीलानिष्ठा भवन्ति, प्रभुस्वरूपनिष्ठाभावाद्यसंगता भवन्ति तमपि क्षोभयन्तीति ज्ञापयति । ये तु प्रभुलीलौपयिकत्वेन स्वरूपैकनिष्ठया निश्चलत्वेनात्युच्चाधिकारं प्राप्तास्ते त्वभिभावकसम्बन्धेऽपि नाभिभूता भवन्तीति ज्ञापयितुं गिरीनग्रे निरूपितवान् । यथा यथा वर्षधारासम्बन्धस्तथा तथा स्वगुहाद्यन्तःस्थितप्रभौ तत्सम्बन्धा भावाः स्वेन भवन्तीति ज्ञानेनानन्दातिशय एव भवति, न तु तत्सम्बन्धजं दुःखमपीति दृष्टान्तेन ज्ञाप्यते । इदमेवोक्तं **यतस्तेन्तःसारा** इत्यनेनाचार्यैः ।

अग्रिमश्लोकाभासे **तेषां वर्षकृतोपद्रवमाहेति** । ननु भगवदीयप्राप्तौ भक्तो-
पद्रवकर्तृत्वकथनमनुचितमिति चेत् । अत्रैवं ज्ञेयम् । उपद्रवो हि दुः-
१०-१७-१५. खदः । वर्षधाराणामताद्दशत्वे वक्ष्यमाणरीत्या सुखदत्वाभिमानहेतुत्वं न
स्यात् । प्रभौ तन्निवारकत्वेनैव स्वस्मिन् कृतार्थताभिमानः । अत एव मूले हननमुक्तमतः सुष्ठूक्तमुपद्रवमाहेति । 'मार्गा बभूवु'रित्यनेनापि व्रजे लीलोपयोगिवर्षर्तौ मार्गाणामेव तथात्वम्, न तु कदाचिद्वेदानामिति ज्ञाप्यते । अत एव कालहता इति विशेषणं मूले । यथा भगवत्प्रापका वेदा अलौकिकरीत्या तथैवैकान्ते भक्तानां भगवत्प्रापका मार्गा इति द्वयोः साम्यम्, तेन सदा व्रजलोकयातायातं यत्र समार्गो नात्र विवक्षित इति ज्ञायते । अत एव ताद्दशानामेव भक्तानां तमिस्रायां क्वचिद्दिवापि तत्सन्देहः । अन्येषां तु तदज्ञानमेव । इदमेवोक्तमाचार्यैः **पूर्वं ये तेनेत्यादिना** । अत एव यावत्पर्यन्तं तद्विषयकसंस्कारानुत्पत्तिस्तावत्पर्यन्तमेव सन्देहस्तदुत्पत्तौ तु तमिस्रायामपि न सन्देह इत्याशयेनोक्तं मूले **असंस्कृता** इति । **मार्गलोप एवेति** । स्यादिति शेषः । तेन संस्कारस्यावश्यकत्वमायाति । लोकबन्धुष्विसनेनापि व्रजे चलसौहृदा विद्युत एव दृष्टाः, न त्वन्याः स्त्रिय इति ज्ञायते । कदाचित्सत्त्वे हि चलत्वं सौहार्दस्य । अत्र तु प्रभ्वतिरिक्ते तदभावात्प्रभौ च तस्य सार्वदिकत्वात्सौहार्दस्य चलत्वाभाव एव यतः ।

धनुर्वियतीत्यत्र चक्रं निर्गुणमपीति । वृत्रवधाय भगवदावेशे जात एवेन्द्रे
वज्रसम्बन्धो जातः । वज्रेपीन्द्राविष्टभगवदायुधस्य चक्रस्यावेशः । अत
१०-१७-१८. एवायुधानामहं वज्रमित्युक्तम् । तच्च गुणातीतं सगुण इन्द्रे शोभत इत्यर्थः ।
वज्रं निर्गुणमपीति पाठे स्पष्टम् ।

न रराजेत्यस्याभासे । **गुणेष्ववशिष्टमिति** । तामसमित्यर्थः । अभगवदीय-
साहंकारस्य दृष्टान्तत्वादस्य तामसत्वम् । अत एवात्रास्य न शोभेति
१०-१७-१९. भावः । न रराजोडुप इत्यनेनाप्युक्तरीत्या यथा प्राकृतः पुरुषो न राजते,
तथात्र घनाच्छन्नो लौकिक इन्दुरेव तथा । न तु तदन्यः कोपि पुरुषोपीत्युच्यते । अत एव **भगवदीयव्यतिरिक्तमित्याचार्यैरुक्तम्** ।

मेघागमोत्सवानित्यत्र । पूर्वतापं दूरीकृत्य भगवदानन्ददायिभक्तजनागमदृष्टा-
न्तोक्त्या यदा दिवा परिजननिरोधतश्चिरविरहतापे सति कथञ्चिद्व्याजेन
१०-१७-२०. श्रीनन्दगेहे गमने सम्पन्ने सति वनगमने वा प्रियसङ्गे सति मेघास्ताद्दशीं
वृष्टिं चिरं कुर्वन्ति । यतोत्रातिविलम्बेपि स्वगृहीया नोपालभन्ते तदा तन्मेघागमस्य प्रतिनन्दनं भवत्यन्यदा तु न तथा वृष्टिं कुर्वन्तीति ज्ञाप्यते । अयमेवार्थ उक्त **एतन्निरूपणं यदर्थं तदाहेत्याभासेन** । ग्रीष्मे घर्मादिना गिरिशिखरादिष्वनावृतदेशेषु लीलाया असम्भवात् सर्वत्र भगवदानन्ददातृत्वेनैवैतदभिनन्दनम्, न तु वैषयिकसुखदत्वेनेति ज्ञापनाय निर्विण्णत्वमुक्तं दृष्टान्ते ।

पीत्वापः पादपा इत्यत्र । **तेषां नीरस्यैवे**त्यारभ्य **तथे**त्यन्तम् । अत्रायं भावः ।
१०-१७-२१. नीरस्य जीवनत्वेपि तत्सम्पादने स्वयमशक्तास्तत्सम्बन्धघटकं ये पान्ति ते ह्य-
तिदीनास्तापतप्तास्तेभ्यो जीवनसम्पादकोयमृतुस्तेन यदेकोपजीविनो ये तेषां
तद्दातेति ये तादृशा भक्तास्तेषां भगवत्सम्बन्धजनकः, सर्वत्रैव निकुञ्जगह्वरप्रदेशजननादिति । अत एव नानात्ममूर्तित्वं कार्यमुक्तम् । अयमेवार्थ **एतदपि निरूपण**मित्याभासेनोक्तः । सरःस्वित्यादिनापि दृष्टान्तीयधर्मसमानधर्मवन्तोत्र सारसा न त्वन्यः कोपीति ज्ञाप्यते । तत्रापि सारसानामेव निरूपणेन सरसा ये भक्तास्तैः सह जलविहारदेशे तद्रसावेशाद्दोषमप्यगणयन्तो भवन्तीति तथा । दोषागणनपूर्वकमत्यासक्तिर्ग्राम्याणां गृहादिषु भवतीति ते दृष्टान्तीकृताः, तेनात्र गृहवन्तोपि भक्ता एव, न तु प्राकृतः कोप्यस्तीति ज्ञाप्यते । एतज्ज्ञापकोयमृतुरित्येतत्प्रस्ताव इदं निरूपितम् । अयमेवार्थ **एतदि**त्याभासेनोक्तः ।

जलौघैरित्यनेनापि जलसेत्वतिरिक्तस्य सेतोर्न नाशो व्रजेस्तीति ज्ञाप्यते । तेन वेद-
१०-१७-२३. सेतोः सातत्यं सूचितं भवति । इदमेवोक्तं **तदपी**त्याभासेन ।

व्यमुञ्चन्नित्यत्र जलमोकोक्तेः पुनरुक्तिशङ्कानिरासायामृतपदं मूले । तदर्थमाहुर्हस्ता-
दीत्यादिना । अन्यथा पूर्ववृष्टेरपि वैयर्थ्यं स्यादन्नासम्पत्तेरित्यस्यामृतत्वम् ।
१०-१७-२४. तद्धि क्षुत्कृतमृतिनिवर्तकमिति भावः । दृष्टान्तेनात्रत्यसाधारणजनानामपि
सर्वसम्पत्तिरितरापेक्षाभावश्च ज्ञाप्यते । प्रभुणैव ह्यत्र सर्वेषां सर्वसम्पत्तिः । एवं सत्युक्तरीत्या भगवत्संभृतिरूपात्वं प्रावृषः सूचितं भवति । एतदेवोक्तमे**तदपी**त्याभासेन । अपरञ्च, यथान्यप्रेरणयैव विश्पतयो ददति, न स्वतोपि, तथात्र मेघा एव, न त्वन्येपि, यतः स्वत एव श्रीनन्दप्रभृतयः सर्वेभ्यः सर्वं ददतीत्यपि ज्ञाप्यते ।

धेनवो मन्दगामिन्य इत्यस्याभासात्पूर्वं **वैराग्यशक्तिर्वे**ति । विरक्तो हि गृहं
१०-१७-२६. हित्वा वनं प्रविशतीति वनप्रवेशमात्रसाम्येनैवमुक्तम् ।

क्वचिद्वनस्पतिक्रोड इत्यस्य रामविषयकत्वोक्तौ स्वाशय उद्घाटितः **क्रोडे**
पुनरित्यादिना । *यद्यप्येवमप्येका बाललीला सम्भवति, तथापि प्रभुली-*
१०-१७-२८. लायां सङ्कोचमसहमानैरेवमुक्तम् । उपपत्तिश्चोक्ता, विशेषं च वक्ष्यति भग-
वतीति । शरद्वर्णने **सा हि प्रवृत्तिरूपे**त्यादि । प्रवृत्तौ मालिन्यं निवृत्तौ नैर्मल्यं भवतीत्येतद्धर्मसाम्यादेवमुक्तम् । व्रजेपि लीलारूपेष्वेव गोचारणकृष्यादिषु सक्ताः केचन भक्ताः, सर्वनिवृत्तिपूर्वकं स्वरूपमात्रपराः केचन । तथा च विशेषतस्तत्तदुपयोगित्वेनापि तथात्वमभिप्रेतम् । तेनात्र प्रवृत्तिनिवृत्ती लीलारूपे ज्ञेये । प्रतिश्लोकार्थोक्तौ **जलाना**मित्यारभ्य **गोपिकाना**मित्यन्तेन दशवाक्यानामर्थमुक्त्वाप्यचित्तस्यापीत्यनेनैकस्यार्थमुक्त्वाग्रिमवाक्यानामर्था भगशब्दार्था इति सर्वानशोभयदित्यनेनोक्त्वा गुणरूपत्वेनैव चन्द्रादयो निरूपिता इत्या-

---

१. अगृहवन्त इति पाठः ।

हुश्चन्द्रमा न वा इत्यादिना । महाभूतशुद्धयुक्तिप्रस्तावे तन्मध्यपातित्वेन द्वितीयेपि श्लोके अपां मलमित्युक्तमन्यथा पौनरुक्त्यं स्यादित्याशयेनाहुः **एवं पञ्चमहाभूतानामिति** ।

अखण्डमण्डलो व्योम्नीत्यत्र । सोऽपि चन्द्रो गोपिकाभिरिति । भगव-
१०-१७-४४. दीयचन्द्रस्योडुरूपाणि स्वामिनीमनांसीति ताभिर्दृश्यमानस्तन्मनःसहकृतो भवतीति शोभितो भवतीत्यर्थः । एवं सति मूले अखण्डमण्डलपदेन भगवदीयः स उच्यते । शशिपदेन लौकिक इति भावः ।

अष्टादशेऽध्याये । गोपानामपि सोच्यत इत्यत्र । बालका हि यत्किञ्चिद-
१०-१८-०. द्भुतमनुभूय स्वबाल्यस्वाभाव्यादेवोत्साहवशात्सर्वेषामग्रे तद्वदन्ति, तथा नैतैरुक्तं, किन्तु प्रभ्वासक्त्या। तस्यास्त्वयं स्वभावो यत्स्वसमानशीलेष्वेव स्वसर्वस्वतया ज्ञातं प्रभुचरित्रं व्यक्ततया वादयति । तादृक्त्वमेतास्वेवेति गोपाः स्वस्वगृहे ताभ्य एवाचख्युः। इदमेव सम्यक्त्वं चक्षणे।एतेन यथा दिवैतासां गुणगानं तथैतेषां निशीति ज्ञापितं भवति । एतच्च प्रकरणादौ ज्ञापितमिति तदन्ते च ज्ञापितमन्तरङ्गक्रीडार्थं वनप्रवेशे गोपालसाहित्यकथनेन । अन्यथा व्रतवरदानार्थं गच्छन्यथैतान्सङ्गे न नीतवांस्तत्कार्यं कृत्वैभिः सहितो जातस्तद्वक्ष्य 'स्वयं गोपैः परिवृत' इत्यनेन, तथात्रापि कुर्यात्तदेतद्धृदि कृत्वोक्तं **गोपानामपि सोच्यत** इत्याचार्यैः । यथा स्वामिन्यो गृहेषु स्थिता अपि वने दिवाकृतां लीलां भगवद्भावानुभावेन स्वहृदयेष्वनुभूय गायन्ति, तथैतेपि निशिकृतां लीलामासक्तिभरानुभावेन स्वस्वहृदयेष्वनुभूय गायन्ति, सा चातिगोप्येति शुकैः स्फुटतया नोक्ता, एतद्गानकथनेनैवोक्ता भवति, गानहेतुभूतासक्तेस्तुल्यत्वात्सा च ज्ञापितैवेति तत्कार्यमपि सुतरां ज्ञापितं भवति । तदेतदुक्तं **वर्ण्यवर्णकभेदेने**त्यनेन । वर्ण्यं वर्णनीयं रात्रिचरित्रं, वर्णका वर्णनकर्तारो गोपाः । तत्र दिवा चरित्रं स्वामिन्यश्चेति भेदः । आसक्तिनिरूपणमुपपादयन्ति **तद्गुणेष्वि**त्यादिना । अत्रैतज्ज्ञेयम् । गुणासक्तिलक्षणकार्येण भगवदासक्तिर्ज्ञाप्यते । आसक्तिः प्रेमोत्तरभाविनीति तन्निरूपणेन प्रेमापि निरूपितो भवति, स चाद्यश्लोकेन निरूप्यते । स तूद्बुद्ध एवासक्तिं जनयत्ययं तु लौकिकवत्कोकिलादिकूजनेन नोद्बुद्धो भवत्यलौकिकत्वादतः **प्रभुकृतमेव** तदुच्यते । फलितमाहु**रासक्त्या वर्णन**मिति । आसक्तौ सत्यामपि यावद्भगवान् स्वयं न ज्ञापयति तावत्स्वरूपगुणलीला न ज्ञातुं शक्यन्ते यतस्तस्माद्धेतोरेकेन श्लोकेन बर्हापीडमित्यनेन गानोपक्रमान्ते विद्यारूपं सपरिकरं ब्रह्मस्वरूपज्ञानं स्फुटं यथा भवति तथा वर्ण्यते इत्यर्थः । पूर्वं नादब्रह्मात्मकामूर्तविद्यामन्तरे चानुभावयित्वान्तरेव तत्फलभूतं गानेन स्वरूपानुभवं कारितवान्, अग्रे तु स्वलोकात्मकव्यापिवैकुण्ठस्य बहिरनुभवात्मकविषयया तत्फलभूतं बहिरङ्गसङ्गेन स्वरूपानन्दानुभवं कारयिष्यतीति ज्ञापनायाप्यत्र विद्यात्वनिरूपणमिति ज्ञेयम् । यद्वा । श्लोकपञ्चकानन्तरं गानारम्भोक्तिव्यञ्जितम-

१. स्वगृहेष्विति पाठः ।

र्थमाहुर्विद्यान्त इति । विद्याया अन्त इत्यर्थः । सा हि पञ्चपर्वात्मिका । तथा च गानोक्तेः पूर्वश्लोकेषु तत्समानसंख्योक्त्या तेषु तत्त्वं लक्ष्यते । तथा च ब्रह्मविद्यातोप्याधिक्यं, तस्या अपीदं फलमिति ज्ञाप्यत इत्याशयः । श्लोकसंख्यातात्पर्यमाहुः **कालाधिक** इत्यादिना । द्वादशमासात्मकः कालो, द्वादशाङ्गः पुरुषश्च । इह तदधिकसंख्यया गेये तदधिकत्वं ज्ञाप्यत इत्यर्थः ।

इत्थं शरत्स्वच्छजलमित्यत्र । **शक्तीनां निर्भयत्वाये**त्यादि । अलौकिकत्वनित्यत्वस्वाभाविकधर्मत्वज्ञापनायैतदनभिज्ञेषु गोपनाय भगवद्भोग्यसी-
१०-१८-१. मन्तिनीषु शक्तिपदप्रयोगः । स्वार्थं तदपेक्षारहितः फलभोगसमर्पको यथाधिकारं तत्र प्रवर्तकश्च साक्षी भवति यथा परमात्मा । तादृशत्वमन्तरङ्गत्वाद्गोपेष्वस्तीति साक्षित्वमुक्तम् ।

कुसुमितेत्यत्र । **धर्मं कुर्वन्नि**त्यादि । धर्मो हि साक्षात्परम्पराभेदेन चतुर्वर्गस्यापि साधकः । अवगाहनं च तत्र तत्र तथा तथा लीलाकरणार्थम् । एवं सति
१०-१८-२ लोकसिद्धं कार्यान्तरं विना तत्र गमनं चिरस्थित्यादिकं च लोकविरुद्धम् । लोके चिकीर्षितलीलाज्ञानं च रसविरुद्धमिति सर्वसमाधानपूर्वकं सर्वसम्पादकं गोचारणमिति भावेन धर्मत्वोक्तिः ।

तद्व्रजस्त्रिय आश्रुत्येत्यत्र । **गोपिकाभिरेव श्रूयेते**ति । एतदितरश्रवणाभावे प्रमाणापेक्षायामुच्यते । भगवान् हि सप्रयोजनकमेव कार्यं करोति, न त्वन्य-
१०-१८-३. थापि, जीववत् । अत्र च रमणार्थं भावोद्दीपनमेव प्रयोजनम् । एवं सति यासु तदभावस्तासु तच्छ्रवणं निष्प्रयोजनकमिति प्रभुर्न करोत्येवेति मन्तव्यम् । एतेन श्रुतं सर्वैः, परन्तु स्थायिभावोऽत्रैवास्तीत्यत्रैव तदुद्दीपनं नान्यत्रेति निरस्तम् । सर्वज्ञस्य तादृक्कृत्यसम्भव इत्युक्तत्वात् । नादनिष्ठामृतस्य स्वप्रवेशमात्रेणैव भगवदीयत्वकरणलक्षणस्वभावहानिप्रसङ्गश्च । स्वस्वरूपातिरिक्तस्य वपुषोऽभावात्तद्वर्णोक्तिरसङ्गतेत्याशङ्क्य तत्तात्पर्यमाहु**र्भगवांस्त्वि**त्यादिना । उक्तरीत्योद्बुद्धद्विविधरसात्मकं हि वपुः, रसश्च भावात्मकत्वात्स्वप्रियाव्यतिरिक्तेषु भक्तेषु तादृशत्वस्याप्रकटनाच्चामूर्तत्वेन लोके प्रसिद्धः । वपुर्धिप्राणस्तु बहिः स्वस्वरूपं प्रकटयन् भवति । तथायमपि कुर्वन् वृन्दारण्यं प्राविशदिति । अत्रैवं ज्ञेयम् । शब्दात्मकत्वेनामूर्तत्वेन लोके प्रसिद्धा अपि 'वेदा यथा मूर्तिधरास्त्रिपृष्ठ' इति वाक्यात् सार्वदिकशब्दब्रह्मात्मकमूर्तिप्राकट्यवन्तो यथा, तथा ब्रह्मणः साकारत्वात्सार्वदिकमेव रसात्मकं वपुर्वृन्दारण्ये एव प्रकटितवान् । हृद्येव प्राकट्ये तु मनोमात्रभोग्यत्वम्, बहिःप्राकट्ये सर्वेन्द्रियभोग्यत्वम् । एवं सति चक्षुराद्यविषयत्वे प्रियपदार्थस्य मनोमात्रविषयत्वं दुःखदमित्यनुभवसिद्धमतो भक्तार्थं तथेति । **न त्विति** । स एव भगवानेव तथा । आत्मभिन्नवपुषो भर्तेत्यर्थः ।

वैजयन्तीं च मालामित्यस्याभासे । **ततोप्याच्छादिका**मिति । विक्षेपस्यापि
१०-१८५. वस्तुयाथात्म्यज्ञानाच्छादकत्वमस्तीत्याशयेनेदमुक्तम्, अन्यथाग्रे विक्षेपकं च रूपे निरूपितमिति न वदेयुः । **रन्ध्रान्वेणो**रित्यत्र गूढाभिसन्धिना हेत्वन्तरमप्याहु**र्यावचे**ति । नादो हि रसात्मको धारावत्कर्णद्वारा हृदि प्रविष्टः स एव भगवदीयसर्वेन्द्रियविषयकविविधरसभावैर्निर्झरैः पाथःप्रवाह इव पुष्टो रसपूररूपो जातो, येन समानशीलव्यसनानां परस्परं तद्वर्णनरूपो बहिः प्रकटोभूत् । **स च सार्वत्रिक** इति तत्र हृदयस्थितोधररसो मुख्याधररसस्यांश एवेति । स सर्वासां हृदि स्थितः पर्यायेण सर्वासां हृदि प्रविष्टः । तदानिर्वचनीयोत्कटभावोदयेन साक्षात्तदनुभवयोग्यता भवतीत्यर्थः । एवं सति यावदुक्तरीत्या सोंशो नान्तःप्रविशति तावदपि साक्षात्तद्भोगयोग्यता न भवतीति शेषग्रन्थो ज्ञेयः । **एतदर्थमेवे**ति । रसपूरेण तदंशप्रवेशार्थमेवेत्यर्थः । अत्रैवाग्रे **अत एवे**ति । यतो विहितभक्तिमतामप्ययं रसः फलत्वेन प्रार्थनीय एव तिष्ठति, न तु तत्प्राप्त्यैवायं प्राप्तो भवत्यतो वंशद्वयसम्बन्धिभक्तनिरूपणानन्तरं निरोधो निरूपित इत्यर्थः । एतस्यैव तात्पर्यान्तरमप्याहुः **सृष्ट्युत्पन्नाना**मिति । भक्तानामिति शेषः । भोगो भक्तिरसभोग इत्यर्थः । **एतत्पर्यवसा-यी**ति । एतदप्राप्तौ तेषामपि सृष्ट्युत्पत्तिर्व्यर्थेत्यर्थः । एतेनान्येषां कैमुतिकन्यायेनैव जन्मवैयर्थ्यं ज्ञापितं भवति । 'नैष्कर्म्यमप्यच्युतभावे'त्यादिवाक्यैः । तर्ह्येवं फलस्य सिद्धत्वादग्रिमलीलाद्वयं व्यर्थमित्याशङ्क्य तत्तात्पर्यमाहुः **ततो विमोचन**मित्यादि । ये मुक्ताः स्वान्तःस्थिता एव जीवा लीलार्थं सृष्टास्तेषां परमानुग्रहतो नित्यलीलामध्यपातिभक्तैः सहैतद्रसानुभवं कारयित्वा पुनः पूर्वभावं सम्पादयतीति स्कन्धद्वयेन निरूप्यत इत्यर्थः । पुनः पूर्वभावसम्पत्तेरेव प्रत्यापत्तिपदार्थत्वात् । लोके एतद्रसप्रकटनस्य तात्पर्यं वदन्तः आवश्यकतां चाहुः **अन्यथे**ति । अस्यैव परमपुरुषार्थत्वेन सृष्टिमध्ये यत्र कुत्रापि प्रकटनेनैव सृष्टेः सार्थकत्वम् । अन्यथा प्राणसम्बन्धरहितदेहसंस्थितवत्सा व्यर्था स्यादित्यर्थः । **तदंशाना**मिति । महिष्यादीनामित्यर्थः । **मुख्यप्रापणार्थं चे**ति । मुख्यः पुरुषोत्तमः । एतासां च स एवापेक्षित इति तस्यात्मत्वेन कथने स एव प्रापितो भवतीति तथा ।

अक्षण्वतामित्यत्र । प्रकरणार्थविभागे **द्वाभ्यां भक्तेरि**ति । लोके हीनानामपि
१०-१८७. चरणारविन्दसम्बन्धिकुङ्कुमसम्बन्धमात्रेण लक्ष्मीसमानभाग्यवत्त्वं चरणमाहात्म्यमेव । स्पर्शमात्रेण प्रकृष्टमोदजनकत्वं च । चरणश्च भक्तिमार्गरूप इति तद्धर्मप्रकटनं भक्तिस्थापनरूपमित्यर्थः । एवं तत्तात्पर्यानुक्तौ बाधकमाहुः **अन्यथे**ति । प्रकारान्तरेण तात्पर्योक्ताविर्त्यर्थः । पुरुषोत्तमस्य लोकेपि हीनायाः स्त्रियाः सम्बन्धोक्त्या हीननायकत्वमापद्येत । श्रीपतेः कन्दाद्युपयोगश्च तथा । अतस्तत्रैव तात्पर्यमिति भावः । तथापि लोकरीत्या दूषणत्वं तस्य भवत्येवेत्यत आहुः **वैपरीत्यात्समाधान**मिति । प्रमे-

१ धारारूपेणेति पाठः ।

यमार्गः प्रमाणमार्गाद्विपरीतो बलिष्ठश्च। अधुना च स एव प्रकटीकृत इति वस्तुस्वाभाव्यादेव तथात्वमिति न दूषणमिति भावः। अत्र मर्यादावैपरीत्यं भूषणमिति सारम्। मर्यादामार्गीयपरमोत्कर्षवद्बाधोप्युत्कर्षसिद्धेः सर्वमवदातम्। अन्यथा वैपरीत्यमात्रेण मार्गोत्कर्षो न सिध्येत्। सेन्द्रियाणामपि तदफलने हेतुमाहुः **बाधकानामिति**। भगवदतिरिक्तस्य सर्वस्य बाधकत्वात्तत्त्यागे सति प्रतिबन्धकाभावेन मोक्षलक्षणं फलं न भवेदित्यर्थः। मुमुक्षूणां तथात्वेपि न तथात्वमित्याशङ्क्य तत्साधनमाहुः **साधकानामिति**। सर्वात्मभावेन भजनं साधकत्वम्। यद्यपि सर्वात्मभावेन सर्वत्यागोप्यन्तर्भवति, तथाप्याधुनिकानां स्वतस्तद्भावरहितानां पूर्वं बुद्धिपूर्वकस्तत्त्याग एतद्भावनं चोपदिश्यत इति पृथगुक्तिः। अत्रैव **वयस्यै**रित्यत्र। **तदाधारत्वे निमित्तमितीति**। गोपलीलयोरेककालाधारत्वे प्रभुप्राकट्यं निमित्तमिति तथेत्यर्थः।

चूतप्रवालेत्यत्र। **त्रयाणामन्योन्यगुणप्रधानभाव** इति। स्थायिभावव्यभि-
१०-१८-८. चारिभावविगाढभावानामित्यर्थः।

गोप्यः किमाचरदित्यस्याभासे। **तस्याधिदैविकरूपतासम्पादकमिति**।
१०-१८-९. कामरसो हि सहजः, वेणुनादेन सह सुधान्तःप्रविष्टा सहजं पूर्वकामं दूरीकृत्य भगवदीयं तं प्रकटितं करोतीति तथा। **दामोदरे**त्यस्याभासे। **मर्यादायां हीनतामिति**। हीनतां साधनहीनतां, न्यूनतामिति यावत्। नादं भुङ्क्त इत्यत्र प्रमाणमाहुः **सा वनस्पती**नित्यादि। 'वाग्वै देवेभ्योपाक्रामद्यज्ञाया तिष्ठमाना सा वनस्पतीन्प्राविश'दिति श्रुतिः। सुधाभोगविवादे हेतुः **सुधानधिकार** इति।

वृन्दावनं सखीत्यस्याभासः। **चरणानां स्वरूपमाहे**ति। अत्रेदमाकूत-
१०-१८-१०. मिति मे भाति। भगवच्चरणमाहात्म्यं सर्वश्रुतिप्रतिपादितम्। 'तदेव देवानाम् पादा' इत्युपक्रम्य 'तस्या भाग्याभिनन्दन'मित्यन्तेनोक्तम्। तथा चैतादृक्पदसम्बन्धात् वृन्दावनस्वरूपमुत्तमत्वेन निरूपितं भवति। तत् कथमुक्तमत्र विहारनिरूपणेन चरणानां तथेति। अत्रेदमाकूतम्। लोके वेदातीतशुद्धपुष्टिमार्गीयलीलासामग्री हि नान्यत्र प्रसिद्धा। एवं सति तत्कर्तापि तथेति सिध्यति। अत एव वृन्दावनाद्गतो दूरमित्यग्रे वक्ष्यति। यतस्तत्र पुष्टिलीलानङ्गीकारो वक्ष्यते। एवं सत्यन्वयव्यतिरेकाभ्यामियं लीलात्रैवेति फलिष्यति। एवं सति यत्रैव शुद्धपुष्ट्यङ्गीकारस्तत्रैतच्चरणलीलेति ज्ञेयम्। अत एव बृहद्वनेपि 'प्रेक्ष्यन्त्य उज्झितगृहा जगृहुः,' 'सह रामो व्रजस्त्रीणां चिक्रीडे जनयन् मुदम्' 'कृष्णस्य गोप्य' इत्यादिनैयमेवोक्ता। कालीयशिरोनृत्ये नैतच्चरणप्राकट्यम्। तत्र पुष्टिलीलायामनङ्गीकारात्। अत एव तत्स्तुतिरपि तादृशी। अतो यत्र पुष्टिमार्गीयभक्तिमार्गप्रकटनं लीलायाम्, तत्रैतच्चरणारविन्दाविर्भाव इति ज्ञेयम्। अतः सुष्ठूक्तं (त्वच्) **चरणानां स्वरूपमाहे**ति। असाधारणधर्मनिरूपणे धर्मिनिरूपणसम्पत्तिवत्। यतो

लीलैव तत्परिचायिका। एवं सति 'देवानां पादा' इत्यारभ्य 'आधिदैविकावानन्दरूपा' वित्यन्तेन यावन्ति चरणरूपाण्युक्तानि तदतीतत्वमेतच्चरणयोर्ज्ञापितं भवति। उक्तेषु पुरुषोत्तमो लोकवेदप्रथितो ज्ञेयः, अयं तदतीत इति ज्ञेयः।

धन्यास्त्वित्यत्र। स दोषो न ज्ञायत इति। दोषस्वरूपमाहुः **न ज्ञायत** इति। मृगीभिर्भगवत्स्वरूपं श्रुत्यादिप्रतिपाद्यत्वेन न ज्ञायत इति लक्षणो दोष इत्यर्थः।

१०-१८-११. **पूजां दधुरित्यत्र। तस्याश्च धारणं ततोपीति**। सर्वोत्तममिति शेषः।

कृष्णमुखनिर्गतेत्यत्र। मुखं वागधिपतिरित्यादि। अत्रायं भावः। पूर्वश्लोके देवस्त्रीणां मोह एवोक्तो, वस्तुसामर्थ्यात्, न तु रसपानमपि। गवां भगवदी-

१०-१८-१३. यत्वात् भगवत्सङ्गत्वात् प्रियत्वाच्च रसपानमुच्यते। तत्र सुरस्त्रीणां यत्र तथात्वं, तत्रैतासां पशुजातीयत्वेन तदसम्भावितमित्याशङ्कानिरासाय नेदं साधारण्येन गानं, किन्तु यथैव तासामपि रसानुभवो भवति, तथा सर्वसामग्रीप्रकटनपूर्वकमिति ज्ञापनायेति। अतएवाग्रे हृदि प्राकट्यं स्पर्शश्चोक्तः। आधिदैविकसम्बन्धमात्रेण यत्राध्यात्मिकाधिभौतिकयोरपि कार्यकरणसामर्थ्यं, तत्र साक्षादाधिदैविकस्यैव करणत्वे किं वाच्यं कार्यसम्पत्ताविति वागधिपतित्वाद्युक्तेस्तात्पर्यम्। एतेन शब्दनिष्ठरसप्राप्तौ साधनसम्पत्तिरुक्ता भवति। किञ्च। वाच्यार्थाज्ञाने रसस्वरूपाज्ञानात्तत्कार्यासम्भव इति शङ्का कृष्णपदार्थोक्त्या निरस्ता। स्वरूपात्मकत्वादर्थस्य स्वत एव प्रकटत्वाज्ज्ञानसाधनानामनपेक्षणाद्बलवत्त्वाच्च न पशुत्वादिकं प्रतिबन्धकमतः सर्वमवदातम्। अपरञ्च। कृष्णमुखान्निर्गतस्य तत्रापि परम्परासम्बद्धस्य पीयूषस्य यत्रैतादृशत्वं, तत्रापि पशुषु, तत्र साक्षान्मुखपानकर्त्रीषु किं वाच्यमित्युत्कण्ठाज्ञापनायापि निर्गमनाद्युक्तिरिति ज्ञेयम्। अन्यच्च, मुखस्याग्नित्वेन साक्षात् तत्पानकर्त्रीणां कदाचित्तत्पीयूषं तापमप्युत्कटं जनयति। इदं तु तस्मान्निर्गतत्वेन सदैवानन्दजनकमेव, न तु तथा। तस्माद्भिन्नत्वेन परम्परासम्बन्धाच्च तद्धर्मासम्भवात्। अत एव साक्षात्सम्बन्धानन्तरं यादृशस्तापस्तादृशो न पूर्वम्, किन्तु सहजसम्बन्धात्तद्धर्मवत्त्वस्यापि सहजत्वात्कश्चन तापं जनयतीति ज्ञापनाय तावदुक्तमिति। **प्रतिक्षणं नूतनकर्णत्वादिति**। पुटत्वोक्त्या तत्र यथैकेन रसेन पूर्णे द्वितीयरसावकाशो न सम्भवति, तथैकैकक्षणसम्बन्धिनादरसस्यापि तत्त्वात् तेन पूर्णे पुटे द्वितीयादिक्षणसम्बन्धिनां तेषां प्रवेशासम्भवात्तत्पानार्थं द्वितीयादिपुटापेक्षावश्यकीति तथात्वम्। अन्यथा करणाभावेन नादग्रहणासम्भवाद्द्वितीयादिपानमेव न भवेत्। अत्रैवं ज्ञेयम्। भगवत्सम्बन्ध्यर्थो न लौकिकेन्द्रियग्राह्यः, किन्त्वलौकिकैरेव तैः। प्रभुदित्सा च तत्र हेतुः। तथा च तयैव तावत्साधनसम्पत्तिर्भवतीति नानुपपत्तिः काचित्।

प्रायो बताम्बेत्यत्र। सम्बोधनं दयार्थमिति। दयया भगवन्निकट एव स्था-

१०-१८-१४. पयेदिति भावः। **तेषां शरेति**। पल्लवैरेवावृताङ्गत्वेनान्यदर्शनाभावाच्छरादिभयाभाव इति केचित्।

नद्यस्तदेत्यत्र । सर्वतत्त्वं ज्ञातवन्त इति । भगवत्स्वरूपात्मकरसतत्त्वं ज्ञातवन्त
१०-१८-१५. इत्यर्थः ।

गा गोपकैरित्यत्र । सर्वेषामेव वनानामित्यारभ्य तत्र गच्छत इत्यन्तम् ।
१०-१८-१९. शुद्धिपदेनाशुद्धिनिवृत्तिरुच्यते । वस्तुतत्त्वाज्ञानहेतुभूततरुत्वस्वभावोऽशुद्धिपदार्थोऽत्र विवक्षितः । पूर्वं 'कृष्णमुखनिर्गते'त्यादिना पशुत्वेपि सति तदुलङ्घ्यैतद्रसानुभाविका सामर्थ्युक्तेति तत्फलवत्यो गाव इति तत्सम्बन्धे सति वनस्यापि तरुत्वादिस्वभावोल्लङ्घनपूर्विका रसप्राप्तिर्भवति । गोपेषु रसिकत्वं स्पष्टम् । तदेव धर्मपदेनोच्यते । तदेतदुक्तम**तदीया शुद्धिर्धर्मश्च तत्र गच्छत** इत्यनेन । गोपु तस्थुरितिपदेन क्रियानिवृत्तेरप्युक्तत्वात्तत्सम्बन्धादत्रापि तथा । वेणुस्वनयोरौदार्योक्त्या प्रासङ्गिकमिदं नादकार्यं वस्तुस्वभावजम्, न त्वेतदुद्दिश्य भगवतायं नादः कृत इति ज्ञाप्यते । प्रासङ्गिककार्यकथनेन यत्रैतेष्वेवैतादृश्यं तत्रैतन्नादविषयेषु किं वाच्यमिति ज्ञाप्यते । **अतो भीता** इत्यादि । गोनिष्ठरसग्रहणार्थं बन्धनादिप्रयासं करोति, तथास्मासु प्रयासं मा करोत्वित्याशयेन प्रभुप्रयासाद्भीताः स्वत एव समर्पयन्तीत्यर्थः । निदाने इति पाशनामोक्तिः ।

इति प्रमेयप्रकरणम् ।

अथ साधनप्रकरणम् ।

एकोनविंशाध्याये प्रकरणार्थनिरूपणे विद्यापञ्चकमत्रापीत्यादि । सा-
१०-१९-०. क्षादसम्भवे परम्परयापि भगवानेव सेव्यः । देहेन्द्रियादिकं च तदर्थमेव विनियोक्तव्यं, न स्वार्थमपीति निर्णयरूपैका । देहनिर्वाहार्थं प्राणादिधर्मनिवृत्त्यर्थमपि स्वतः सम्भवेऽपि प्रभुरेव प्रार्थनीयः, न त्वन्योऽपि । प्रभुश्च लोके नालौकिकं करोति, भगवद्भावे चानुग्रह एव नियामकः, न तु साधनमपि शास्त्रीयमिति निर्णयरूपा द्वितीया । इतरभजनं न कार्यं पारम्पर्यागतमपि, धर्मं भगवदिच्छायां सत्यां विसृजेतेतिरूपा तृतीया । सर्वावस्थासु हरिरेव सेव्यः, भगवांश्चाक्लिष्टकर्मा रक्षत्येव स्वानिति च तुरीया । माहात्म्यज्ञानपूर्वकः परमस्नेहो भक्तेष्वाधिक्यज्ञानं चेति पञ्चमी । एतत्पञ्चकसम्पत्तौ पूर्णो निरोधः सिद्ध इति स्वकार्ये सम्पन्ने जाते पश्चादिन्द्रादिविषयिणीं दृष्टिं कृतवान् । अत एव पश्चान्निरूपितम् । व्रजेन्द्रस्य च भगवदुत्कर्षज्ञानहेतुभूतवरुणदर्शनं कारितवान् । इदमेवोक्तं **तस्मिन् जाते सुरेक्षणमित्यनेन** । एतन्निरूपणतात्पर्यमाहुः **अविद्याकार्येति** । अविद्या तत्कार्यं चेति ज्ञेयम् । **स्त्रीपुंसेति** । तयोस्तथानिरूपणे **हेतुस्तुल्यत्वादिति** । अविद्यासम्बन्धाभावस्य तुल्यत्वादित्यर्थः । निरोधस्य वा ।

१०.१९.१. **एकोनविंशाध्यायार्थनिरूपणसन्दर्भे । अन्यपूर्वास्त्वन्यथैव कृतसंस्कारा** इति । अत्रेदं ज्ञेयम् । स्त्रीणां विवाह एव मुख्यः संस्कारः, समग्रकत्वात् । स च स्वर्गादिफलकाग्निहोत्रादावधिकारित्वसम्पादको लोके । प्रकृते चातथात्वाद्भगवत्सम्बन्धस्य च फलत्वेन वक्ष्यमाणत्वात् तत्र चास्याप्रयोजकत्वादेतत्कथनमत्राप्रयोजकं स्यादिति विवक्षितफलप्रयोजक एव कश्चन धर्मः संस्कारशब्दवाच्योत्र वाच्यः । स च विवाहजनितः तृतीयपुरुषार्थरसविशेषानुभवहेतुरेव । स दम्पत्योर्न सम्भवतीति यतस्तद्रसमर्यादा । अत एवान्यथैवेत्युक्तम् । भगवदीयानामन्यत्र विवाहस्यानुचितत्वात् । परन्तु तैः सह सम्बन्धाभावाद्भगवद्रसपोषकत्वाच्चास्य संस्कारत्वम् । एतेनायुक्तत्वमपि परिहृतम् । न ह्यनुचितः संस्कारो भवतीत्यनवद्यमखिलम् । किञ्च, 'लोकानुसारिणी विद्या कर्मज्ञानात्मिका पुरा निरूप्यत' इति वाक्याल्लोकानुसारेणात्र कर्म निरूप्यते, न तु भगवच्छास्त्रानुसारेण । भगवदर्थं भगवानेव सेव्य इति यतस्तत्र मर्यादा । लोके हि प्रियप्राप्त्यर्थं तदीया दूतिका प्रार्थ्यते, तथात्रापि कात्यायनी प्रार्थ्यते । लौकिकी सा यथा द्रव्यादिदानेन तोष्यते, तथेयमलौकिकीत्यलौकिकप्रकारेणेति । अन्यभजनदोषोपि नैवं सम्भवति । भगवत्तोषहेतुस्ववपुर्मण्डनतुल्यकक्षत्वेन, रसपोषकत्वात् । विवाहितानां तु प्रौढात्वेन जातभावाङ्कुराणामनुदिनमेधमानप्रेमार्द्रार्द्रप्रियेक्षणेक्षणप्ररूढतद्रसपूरमत्तत्वेनान्यस्फूर्तिरहितानां समयविशेषे समागम एवापेक्षितः । स च 'निशम्य गीत'मित्यारभ्य 'न न्यवर्तन्ते' त्यन्तेन निरूपयिष्यते । एतदेवाभिसन्धायोक्तं **तासां त्यागोङ्ग**मिति । ननु कुमारीणां व्रतप्रसङ्गे प्रौढानां कथं प्रसङ्गः । इत्थम् । मूले 'कुमारिका व्रतं चेरु'रिति कथनेन तदितरासां व्यावृत्तिः सूच्यते । तत्र व्यावर्त्यानां स्वरूपं वाच्यम् । व्यावर्त्यत्वे हेतुश्चेति युक्तं तदुभयकथनमिति दिक् । एतदग्रे । **अन्यासामसंस्कृताना**मित्यादि । आदौ भगवदर्थव्रतजक्लेशजभावविशेषलक्षणः संस्कारः । अनायासेन प्राप्तात् क्लेशेन प्राप्ते स्नेहातिशयस्यानुभवसाक्षिकत्वात् । ततः 'कृष्णचेतस' इति पदोक्तानवरतानेकविधसङ्गममनोरथरूपस्तज्जनितो भावविशेषश्च सः । येनाग्रे भगवत एव प्रार्थना । तत 'उपसी'त्यादिना वक्ष्यमाणप्रकारकः सः । ततः प्रियागमने सति विविधरसभावगर्भपरस्परवाग्व्यवहारजप्रमोदविशेषजभावः सः । ततो 'यूयं विवस्त्रा' इति वाक्ये श्रुतेऽग्रिमवाक्यनिरूपितो भावविशेषः सः । ततो वसनदानतत्सामयिकभावोद्गारिदृष्टिविविधस्पर्शजातो भावविशेषः सः । स एव 'दृढं प्रलब्धा' इति श्लोकेन शुकेनोक्तः । अत एवासूयाहेतुषु सत्स्वपि न तदुत्पत्तिः । संस्कारस्य दोषाजनकत्वात् । ततोग्रिमवाक्यनिरूपितस्तद्विशेषः सः । ततोतितुष्टप्रियावलोकनवरदानवाक्यश्रवणजसङ्गमविशेषनिश्चयजः सः । ततो गृहगमनाज्ञाजनितदुःखभरेणेष्टप्राप्तिसुखभरेण च शबलो भावविशेषश्च सः । तत एकैकस्य क्षणस्यानेककल्पतुल्यत्वमानं सर्वतः सङ्गोपनेन च स्वहृद्येव प्रवर्धमान-

भावरसपूरतया कचिदन्योन्यं तत्कथामृतोद्गिरणनिर्वृत्या सततमनोरथैश्चानुक्षणं साक्षादुपभोगमिव मन्यमाना भवन्तीत्यनेकविधसंस्कारः । अन्तःसाक्षात्सम्बन्धो बहिर्न तथेति च। एवं हि सत्यग्रिमभगवत्सङ्गे मुख्यरसास्वादयोग्यतेत्येषां संस्कारत्वम् । एतदेवाभिसन्धायोक्तं **संस्कार एव निरूप्यत** इति । यद्यपि भगवत्यस्ति सर्वं सामर्थ्यं तथापि तद्रसस्वरूपमेव तथेति तथोच्यत इति भावः । **विद्यायामयमेव त्यागात्यागनिर्णय** इति । अयं त्यागपदार्थः, अयमत्यागपदार्थः, स चैवं कार्यः, अन्यथा न कार्य इति निर्णयरूपः **अयमेव** । उक्तरूपसंस्कारनिरूपणलक्षण इत्यर्थः । तथाहि । 'यदहरेव विरजेत्तदहरेव प्रव्रजे'दिति श्रुत्या प्रावाहिकाश्रममर्यादायां रागाभावमात्र एव त्याग उपदिश्यते, भक्तिमार्गे न तथेति ज्ञापनाय **विद्यायामिति** । सात्र भक्तिमार्गीयोच्यते । अन्यत्र विद्यात्वमेव नाभिमतमिति सामान्यपदम् । एतासां विषयरागाभावेपि फलरूपो भगवान् गृह एवास्तीति बहिर्गमने प्रयोजनाभावात् बाह्यो न त्यागः, किन्तु गृह एव स्थित्वा तत्प्राप्त्यनुकूलो यत्नः । यथा यथा भगवद्भावप्राचुर्यम्, तथा तथा बहिरङ्गसाधनत्यागोन्तरङ्गतत्कृतिश्च । भगवत्सङ्गमभावस्वाभाव्येन यत्त्यक्तं भवति वैदिकमपि, तद्भवतु नाम, न तु स्वबुद्धिपूर्वकः कस्यचित्त्यागः । प्रियतोपार्थमशक्यत्यागा अपि दैहिकान्तःकरणधर्मास्त्याज्याः । फलप्राप्तावपि यदा भगवदिच्छा, तदैव त्यागः कार्यः, नत्वन्यदापीति व्रतभगवत्प्रार्थनवसनत्यागाञ्जलिबन्धगृहगमनैर्निर्णीयत इति तथा । अत एवाग्रे त्याग उक्तः । उक्तरूपादन्यथा कृतस्त्यागस्त्याग एव न भवति, फलरसाननुभावकत्वादित्यत्यागपदस्य तात्पर्यं ज्ञेयम् । साधनदशायां तु त्यागो न युक्त इति निर्गलितोर्थः । एतासां फलप्राप्तावपि पूर्वोक्तसंस्काररीत्या साधनदशैव । वस्तुतस्तु फलप्राप्तिनिश्चय एवाधुना, प्राप्तिस्त्वग्रे । अतो युक्तं गृहगमनम् । ननु 'नीवीं प्रति प्रणिहिते च कर' इति न्यायेन तदा स्ववस्त्रमोकार्यमपि तदनुसन्धानं कथ घटते । इत्थम् । सङ्गमभाव एव स्वस्मिन्भगवतोनिप्रीत्या स्वान्तरायासहिष्णुत्वभावनयेति बुध्यस्व । अत एव प्रियेण 'मद्भ्याञ्जलिं मूर्ध्नी'नि तद्भावपरीक्षैव कृता । उक्तभावेनैव चेदेवं कृतं भविष्यति, तदा दृष्टयन्तरायमपि दूरीकरिष्यन्तीति । देवहेलनहेतुकथनेन वसनत्यागे स्वारुचिः सूचिता । साक्षात्तथात्व एव तथाकरणं युक्तम् । न तु तथा भावनायामपीति यतो भगवदाशयः । एतदेवाभिसन्धायोक्तं **अत्यागस्त्यागाद्गुत्तम इति ज्ञापयितुं परीक्षेति** । अत एव मूले 'तत्पूर्तिकामा' इत्युक्तम् । पूर्णाङ्गदृष्ट्या पूर्ति मन्वानसातथात्वे सति भवत्पूर्तिरिनि पूर्वोक्तरीत्या तत्पूर्तिकामा एव तथा कृतवत्य इत्यर्थः । वसनात्यागे शीघ्रमेव प्रियान्तिकागमनं स्यात्त्यागेन च विलम्बोऽभवदित्यप्युत्तमत्वे हेतुरिति ज्ञेयम् । एतदग्रे **'ब्राह्मणाः सात्त्विका'** इत्यारभ्य सेव्यत इत्यन्तम् । पद्मपुराणे गीयते । दण्डकारण्यवासिनः षोडशसहस्रमृषयः स्वाश्रमान्तिकागतकोटिकन्दर्पाधिक-

लावण्यश्रीकोसलेन्द्रदर्शनजरिरंसाभावभरेण तं प्रार्थितवन्तस्तदीयस्त्रीत्वम् । तदा भगवानेकपत्नीव्रतधरोहमधुना, व्रजे वो मनोरथः सम्पत्स्यत इति प्रसादं कृतवान् । त एवैता इति हृदि कृत्वोक्तं **ब्राह्मणा** इत्यादि । आदिवाराहे 'कृष्णस्य रमणार्थं हि सहस्राणि च षोडश । गोप्यो रूपाणि चक्रुश्च तत्राक्रीडन्त केशवम् ॥' महाकौर्मे 'अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्तारं च जगद्योनिं वासुदेवमजं विभुम् ॥' अत एवैकजातीया ऋषयः षोडशसहस्रमिति पुराणान्तरादवसीयत इत्याचार्यैरुक्तम् । अत्रैवं ज्ञेयम् । पुरुषशरीरे सति स्त्रीभावोत्पत्तिरसंभाविता, विरोधात् । एवं सत्येतानतिशुद्धान् कृतपुण्यपुञ्जान् दृष्ट्वा हरिस्तथा प्रसन्नोऽभवद्येनादेयतमसाक्षात्स्वरूपानन्ददित्साविरभूत् । तदनुभवस्तु न पुंस्त्वे केवलस्त्रीत्वे वा । मानाभावात् । द्विजस्त्रीषु तथा प्रपन्नास्वप्यदानात् । क्षुद्रास्वपि पुलिन्दीषु दानात् । किन्त्वचिन्त्यानन्तशक्तेर्भगवतः प्रसादरूपा अपि शक्तयो बह्व्यः सन्ति । तत्राप्यन्तरङ्गतमा सैकाऽस्ति यत्सम्बन्धिजीवे भगवत्स्वरूपानन्दानुभवोऽवश्यंभावी । सा चोक्तरूपस्त्रीत्वलक्षणधर्मरूपैव । अतस्तामेतेषु स्थापितवानिति शुकस्तदा तेषां स भावः, तदनुरूपो देहः परमधुना सम्पन्नस्तथा भगवदिच्छा यतः । एतदेवाहुः **तेषां प्रसादरूपा शक्तिः स्त्री भवतीति** । स्त्रीत्वलक्षणधर्मरूपापि स्त्रीरूपा कात्यायनीरूपेत्यर्थः । सैव तदर्थं फलपर्यवसानार्थं सेव्यत इत्यनेन सम्यध्यते । अथ तेषां स भावो भगवद्भाव इति निश्चितम् । दृष्टिद्वारा हृद्यागत एव भगवति तदुत्पत्तेः । 'रसो वै स' इत्यादिश्रुत्या च भावरूपत्वेनैव निरूपणान्न धर्मरूपत्वम्, किन्तु धर्मिरूपत्वमेवेत्याशयेन पक्षान्तरमाहुः **भगवानेवेति** । सेव्यो हि सेवके स्वं रूपं सम्पादयति । हृद्यागतेन भावरूपेणास्माकं देहादिकमेवं सम्पादितमिति तद्रूप एव भगवान्सेव्यते । बहिरस्सद्रमणार्थं प्रकटो भवत्वित्येतदर्थं नायिकाभावत्वेन स्त्रीत्वमुच्यते । नैतावता काचिन्न्यूनता सगुणत्वं वेत्येतदाशङ्कानिरासायैव **गुणातीत** इत्युक्तम् । यथाब्धिजामृतदायकं तद्रूपम्, तथा स्त्रीयलोभामृतदायकमिदमिति ज्ञेयम् । एतेन 'दिव्यं ददामि ते चक्षु'रिति वाक्याद्भगवदीयचक्षुषैव यथा भगवान् दृश्यः, तथा स्त्रीत्वेनापि तादृशेनैव भगवान् भोग्य इति ज्ञापितम् । अत्रैवाग्रे **चित्तदोषस्य गतत्वादिति** । भ्रमजनको हि दोष इत्युच्यते । एतासां तु पूर्वमपि केवलं भगवदीयत्वाद्व्रताचरणहेतुभूतसंशयहेतुद्वितीयकोटिस्फूर्तिस्तद्रूपैवेति ज्ञायते । कृष्णचेतस्त्वे भगवत्पतित्वनिश्चयेनेतरकोटिस्फूर्तिरपि गतेत्येतदभिसन्धायेदमुक्तम् । दोषत्वमत्रानिश्चयस्यैव । तत्र च तादृक्स्नेहो हेतुः । तादृक्स्वभावत्वात्स्नेहस्य । अग्रे स्नेहसत्त्वेपि कृष्णचेतस्त्वहेतुकतत्प्रतियोग्युत्पत्त्या तन्नाश एवेति सर्वं सुस्थम् । सार्वदिकत्वेपि पुनः कृष्णचेतस्त्वोक्त्या कश्चन विशेषो वाच्यः । व्रतानन्तरमेवोक्तत्वेन तत्फलत्वमेव विशेष इत्याशयेन फलत्वमुक्तम् । अग्रे पुनः साधनोक्त्या चावान्तरफलत्वमिति विवेकः । तेन पूर्वस्माद्वैलक्षण्यं प्राप्यते ।

भूयान्नन्दसुत इत्यत्र। फलवाचकत्वादित्यारभ्य कृतमित्यन्तम्। अत्रायं
१०-१९-५. भावः। पूर्वं मासमाप्यव्रतोपसंहारस्य कृतत्वात्पुनः पूजापूज्यनाम-
भेदभिन्नमन्त्रकालभेदानां कथनाद्व्रतान्तरता इति प्रभुवाक्याचेदं व्रतान्तरमिति गम्यते। अपिच। भगवत्पतित्वमात्रार्थत्वाद्व्रतस्य कृष्णचेतस्त्वेन चान्तस्तन्निश्चयेन भगवदेकसाध्यत्वज्ञानाच्च तदर्थं तत्करणासंभवः। किन्त्वतःपरं बहिरपि तथात्वमेवापेक्षितम्। तत्र च तादृक्कालस्यैव निमित्तत्वमिति तदभिमानिदेवता चेयमेवेति तथात्वेनैतस्या एवात्र पूजोच्यते। अत एव भगवतैव तस्याश्चतुर्दशनामस्विदं नामोक्तम्। मन्त्रेपि बहिः प्रकटतया पतित्वभवनमेव प्रार्थ्यम्, अन्यथान्तस्तन्निश्चयसत्त्वेन तत्प्रार्थनानुपपन्ना स्यात्। अत एव न पूजाङ्गत्वमस्य, भिन्नविषयकत्वात्। अपरञ्च, पूर्वमन्यप्रार्थना हि कृता। तथा च तन्निर्बन्धेन तथात्वे स्वतोऽतथात्वे नीरसत्वं स्यादित्येवं प्रार्थना। अत एव न पृथग्भगवतः पूजा कृता। पतित्वेन भावनात्। न चैवं पूर्वमन्त्रस्याप्रयोजकत्वेन मन्त्रत्वानुपपत्तिः। भावक्रमस्य तथात्वेनोत्तरभावप्रयोजकत्वात्। अत एव व्रतफलत्वेन कृष्णचेतस्त्वमुक्तम्। एतच्च यथा तथोपपादितम्। अस्मिन्मन्त्रेर्थभावनैव मुख्या, न तु जपोपि। अतः स नोक्तः। स्वेष्टप्रकारेण प्रियभावनमेवात्र पूजारूपम्। इदमेव भगवता 'मदर्चना'दित्यनेनोक्तमिति दिक्। किञ्च, **भगवानेव वा गुणातीत** इति पक्षे तु सर्वमवदातम्। अस्मिन्पक्षे उभयोरैक्येप्युत्तरस्या गुणविशिष्टत्वेन पूर्वस्याः सकाशाद्भेदः सिध्यति। तेन व्रतभेदोपि तथा। न चाचार्योक्तावान्तरफलत्वपरमफलत्वानुपपत्तिः, एककार्यत्व एव तत्सम्भवादिति वाच्यम्। स्वामिन्युद्देश्यत्वेन फलस्य परमत्वस्य तन्नान्तरीयकफलत्वेनेतरत्वस्य च विवक्षितत्वात्। एवं सत्येककर्मसाध्यत्वमप्रयोजकमिति ज्ञेयम्। अत एव पुरुषभेदेनावान्तरफलस्यैव परमफलत्वमपि भवति। अत एव ज्ञानमार्गीयमोक्षेच्छोर्योगेन दोषनिवर्तनं, ज्ञानेन च मोक्षसम्पादनं सङ्गच्छते।

अत्रैवाग्रे **वयस्यैरागत** इत्यस्य विवरणे। **एते हि बालका** इत्यारभ्य **तद्भो-**
१०-१९-८. **गार्थं** चेत्यन्तम्। अत्रेदं ज्ञेयम्। भगवान्सृष्टिं कुर्वन् काँश्चन जीवान्
पुंप्रकृतिकान् काँश्चन स्त्रीप्रकृतिकानसृजत्। शरीरस्यातथात्वेपि तेषां तेषां प्रकृतिस्तथैव भवति। पुंप्रकृतिकास्तु हरिं भजन्ते, पुरुषांशप्रवेशात्। नेतरे, केवलप्रकृत्यंशवत्त्वात्। अत एव भगवद्भजनविधाने 'को नु राजन्निन्द्रियवा'नित्यादौ सर्वत्र पुलिङ्गेनैवाधिकार्युक्तः। अन्यथा स्त्रीणां हरिभजनमकर्तव्यं स्यात्, अविहितत्वात्। तेन शरीरगतपुंस्त्वस्त्रीत्वे अविवक्षदुक्तरूपमेव विवक्षन्च्छास्त्रं भजनं विधत्त इति मन्तव्यम्। तथा च जीवेष्वपि पुंस्त्वस्त्रीत्वे स्त इति ज्ञायते। एवं सति पूर्वोक्तपयोपि पुंस्त्ववन्तः स्थिताः। ते चात्यन्तं प्रिया इति तत्सम्बन्धि सर्वं प्रियमिति महानुग्रहेण तद्धर्माणामप्यङ्गीकाराच्च तत्सम्बन्धि यत् किंचित् तदेयर्थ्यं न युक्तमिति तदीयपुंस्त्वाख्यं धर्म-

मप्येतासु स्थापयितुं तत्र तत्रावतारितवान्। इदमेवाधिदैविकत्वम्। अत एवर्षित्वदशाया-मुक्तं वचनं सत्यं कृतमित्येते जानन्तीति तान् साक्षित्वेन वक्ष्यति। 'तदिमे विदु'रिति। स्त्रीप्रेक्षणादौ सति विकारवत्त्वं सहजस्तद्दोषः, तस्मिन्सत्यपराधः स्यात्, तेन चानर्थ-सम्बन्धः स्यादिति क्षारेण मलनिवृत्तिवदतिक्रूरायां स्त्रियां पूतनायां प्रथमं सम्बन्धं कारितवान्। एतेषां महापुरुषत्वेपि तदा साप्ययं भगवानयं वा भगवानिति भाववतीति तानन्तर्निनाय। अत एव तदन्तःस्थितावपि नासुरभावप्रवेशः। तथा सति तत्सम्बन्धज-क्लेशेन तपसेव तद्दोषनिवृत्तौ स्वकृते च तेषां भक्षणमिति स्वानन्ददानाय तत्प्राणैः सह तानप्यानीतवान् स्वस्मिन्। कुमारीपूक्तरीत्या प्रसादरूपायाः शक्तेर्भगवतो वा प्रवेशेन तादृग्भोगयोग्यता परं सम्पादिता, सहजं पुरुषत्वं त्वेतासु स्थापितमेव। अन्यथा 'यत्रा-प्यतिशयो दृष्टः स स्वार्थानतिलङ्घना'दिति न्यायेन कामभाव एव स्यात्, न तु सर्वात्म-भावः, स्त्रीस्वभावस्यैव तादृशत्वात्। अत एव प्रौढभावोत्पत्तिः, येन लोकवेदनैरपेक्ष्येण भजनम्। भगवतोपि स्वच्छन्दभोग एतास्वेतासां च। यद्यपि भगवान् विनैव साधनं सर्वं कर्तुं समर्थ इति शक्यं वक्तुं तथापि तत्तद्वस्तुमर्यादास्थापनपूर्वकं भोगे महान् रस इति भगवतैव सर्वरसभोक्त्रा तथा क्रियते। अन्यथा विनापि स्त्रीत्वं स्वानन्दं दातुं समर्थ इति तथैव कुर्यात्। अत एव वात्स्यायनीयानुसारेणैव रमते। 'भगवानपि रन्तुं मनश्चक्र' इति वक्ष्यते चेति सर्वमवदातम्।

अत्रैवाग्रे **तासां वासांस्युपादायेत्यस्य** विवरणे। उपादायेत्यारभ्यान्यत्र **स्थापितमित्यर्थः** इत्यन्तम्। अत्रायमाशयः। वस्त्रग्रहणोक्तेरादायेत्ये-
१०-१९-९. तावतैव सम्भवेपि गृहीतस्य ग्रहीतृसामीप्ये अन्यतः प्राप्तेपि सामीप्य-वाच्युपसर्गकथनं तद्विशेषाभिप्रायकमिति मन्तव्यम्। स एव स्वान्तःस्थितेत्यादिना निरू-प्यते। तच्चिन्त्यते। 'यः पृथिव्यां तिष्ठ'न्नित्यादिश्रुतिनिरूपितत्वेन तस्य नैसर्गिकब्रह्मधर्म-त्वाद् वस्त्रैस्तदाच्छादनकथनं न युक्तिगम्यम्। भगवता सह व्यवधानासम्भवाच्च। अत एव तेषु दैत्यप्रवेशोपि तथा। प्रयोजनं चाच्छादनस्य न विद्मः। तदभावार्थं नीपारोह-णोक्तिरपि तथा। तत्र हि स्वयमारूढः। स्वनिष्ठत्वेन स्वद्वारा जगतस्तत्सम्बन्धो वाच्यः। एवं च सति भगवन्निष्ठत्वेनैव तत्प्रवेशासम्भवे तदारोहणं किमर्थम्।

उच्यते। एके हि शास्त्रार्थत्वेन हरिं ज्ञात्वा तन्माहात्म्यं च भजन्ते। तदपि न साक्षात्, किन्तु श्रवणादिधर्मद्वारा। वस्तुतस्तु धर्मानेव भजन्ते, तेन वैदिकास्ते। अन्ये च पुत्रत्वादिधर्मपुरःसरमिति लौकिकधर्मद्वारा। अतस्तदनुरूपमेव फलं तेभ्यो हरिर्ददाति। एता हि धर्मिमात्रे पर्यवसितमतयः, न तु तद्धर्मेष्वपि। न वा धर्मद्वारा। नारदादिवद्

१. किञ्च, शरीरमात्रसम्बन्धेनाप्यासुराणामपि सम्बन्धः स्याद्, नौकाप्रवाहवदप्रयोजकत्वेन पूर्व-मत्साधनानुसारेण फलं भवतीत्यत एवोक्तं सेवाफलविवृतावासुरोयं जीव इत्यादिना दिगित्यधिकं क्वचित्।

यशोदादिवच्च । अत एव भगवताग्रे वाच्य'मेवं मदर्थोज्झितलोकवेदस्वाना'मिति । अत एव स्वाभाविकलज्जात्यागोपि । एवं सति 'ये यथा मां प्रपद्यन्त' इति वाक्यादेतदनुरूपमेव भगवतापि कार्यम्, सर्वमर्यादात्यागपूर्वकमेतद्भजनमिति । भगवतापि स्वस्वरूपमर्यादाप्येतदर्थं त्यक्ता । अत एव 'आत्मारामोपी'ति वक्ष्यते । 'साधवो हृदयं मह्यमि'त्यत्र 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपी'त्यपि भगवतोक्तम् । अन्यथा अकुण्ठितज्ञानशक्तेस्तदन्याज्ञानकथनमनुपपन्नं स्यात् । एषा हि पुष्टिलीला । अत्र मर्यादामार्गवैपरीत्यं न दोषाय, किन्तु गुणाय । मार्गस्यैव तथात्वात् । एवञ्च सत्येतावद्दर्शनं स्वातिरिक्तस्य यथा न भवति तथाच्छादनं कृतमिति बुध्यस्व । 'नाहं तेभ्य' इति वाक्याद्यथा ज्ञानं नान्यविषयकम्, तथा स्वरूपमप्येतदर्थं प्रकटीभूतमेतदितरासम्बद्धमिति भगवता सह व्यवधानमपि सम्भाव्यते । अलौकिकश्चायमर्थो वचनबलेन भक्तिभावितान्तर्हृदयेन चावगन्तव्यः । अतो न व्यापकत्वेन तदसम्भवः शङ्कनीयः । अन्यथा 'हृदिस्थं कुरु केशवम् ।' 'विसृजति हृदयं न यस्य' इत्यादिकमनुपपन्नं स्यात् । श्रुतिरपि 'तद्दूरे तद्वन्तिक' इत्येतदभिप्रायिकैव । धर्मिग्राहकमानसिद्धं वस्त्वेव तथेति नानुपपत्तिः काचित् । यत्तु 'नीपारोहणानुपपत्ति'रिति तत्रोच्यते । भगवान् हि लीलां कुर्वन् शास्त्रार्थमपि बोधयति । एतद्भाववतामेव साक्षात्पुरुषोत्तमसम्बन्धः, अन्येषां दूरतः । तेष्वासुरधर्मप्रवेशश्चावश्यकः । स च भगवदधिष्ठितैर्वैष्णवैस्तदुक्तधर्मैः श्रवणादिभिश्च शीघ्रं निरस्य इति ज्ञापनार्थत्वमाच्छादनारोहणयोरित्येतत्तात्पर्यकोयं ग्रन्थ इति नोक्तानुपपत्तिः । ननु सेवकेषु सत्सु स्वयमीश्वरः कुतो वस्त्राणि जगृहे । अगृहीत्वैव तन्निकट एव वा कथं नाकारितवांस्तत्राह **तासामावरणमिति** । न ह्यत्र वसनग्रहणमुच्यते । किन्त्वेतासां साक्षाद्भगवत्सम्बन्धेन्तरायस्य हरणम्, तच्च नान्यशक्यमिति वस्त्रव्याजेन तद्दूत्यत्र पूर्वोक्ते स्थापितमित्यर्थः । भगवत्कृतिर्लौकिकवत् प्रतीयते, परं वस्तुतस्त्वलौकिकी । तत्त्वेन भानं च भगवद्दृष्ट्यैव भवति, नान्ययेति भावः ।

एतदग्रे **हसद्भिः प्रहसन्बालैरित्यत्र । तेषामपि मायाधिदैविकीत्यादि ।** यदि बालान् स्वसम्बन्धित्वेन जानीयुस्तदा पुरुषान्तरत्वज्ञानाभावेन तद्दृष्टिपातेपि

१०-१९-९. भयाभावज्ञानाभावात् प्रथमाकारण एवागच्छेयुः । ते च तथा न ज्ञापयन्त्यन्यथा च ज्ञापयन्तीति तत्कापट्यं माया । तथा च पुरुषान्तरत्वज्ञानेन स्वस्य चानन्यत्वेन तच्छङ्कया नागता इति । एतेषामाधिदैविकत्वेन भगवदिच्छानुसारित्वेन च तत्राधिदैविकत्वम् । प्रभोरिच्छा तु रसविशेषार्थं परीक्षासम्पत्त्यर्थं चेति । **अस्मदीयः काम इति** । लोके हि क्रियाफलस्य स्वसामानाधिकरण्यवैयधिकरण्यविवक्षयैव गतिक्रियायामागमनगमनशब्दौ प्रयुज्येते वक्त्रा, तथा चागत्येत्येनावतैव स्वनिकटदेशप्राप्तावेतेनेपदं किमर्थम् । न चाभिमुख्यमेवाऽर्थत्वेन देशविशेषाकांक्षापूरकत्वेनात्रपदं सार्थकमिति वाच्यम् । 'स्वं स्वं वासः प्रगृह्यता'मिति वाक्यादागमनस्य तदर्थत्वादन्यत्र स्थितौ ग्रहणासम्भवात्

तत एव तद्योग्यतत्प्राप्तेः । दण्डेन घटं कुर्वित्यत्र दार्ढ्यस्येव । अपरञ्च । आभिमुख्यपदार्थोपि विचारणीयः । न च सांमुख्यमात्रं सः । सम्मुखं स्थित्वा पश्चाद्गच्छत्यप्यागच्छतीति प्रयोगापत्तेः । किन्तु वक्तृनिकटदेशसंयोगफलकक्रियाजनकप्रयत्नः सः । इतोपि नात्रपदं सार्थकम् । न च तत्रागत इतिप्रयोगान्न तथेति वाच्यम् । तत्र प्रयोगद्वयमपि लोके दृश्यते । उक्तरूपाभिप्रायवतस्तु नियमत आङ्प्रयोगो दृश्यत इत्याङोऽत्र शक्तिः । तत्रागत इत्यादौ तु वक्ष्यमाणदेशसामीप्यत्वेन तत्र स्वस्थितिमिव मन्यमानस्यौपचारिकः प्रयोग इति त्वया-प्युररीकर्तव्यमिति चेत् ।

उच्यते । एतावत्पर्यन्तं भावनयैवैताः सर्वं कृतवत्यः, न तु साक्षाद्भगवत्प्राकट्येन । तच्च साक्षादप्राप्तावेवोचितम्, न तु प्राप्तावपि, एतदतुल्यत्वात् । जातेपि प्राकट्ये पूर्वोक्तस्थितिर्नोचितेति भावितं तत्कार्यं च त्यक्त्वा अत्र प्रकटे मय्यागत्य वासः प्रगृह्यतामित्यर्थः । किञ्च, एतावत्कालपर्यन्तं भावनयैव कामपूर्तिरासीत् । स च न मुख्यः कामः । किन्तु तदाभासः । अतो मुख्यं काममेव ददामि वासोरूपेण लोके परिदृश्यमानं परं वस्तुतस्तु मदीयकामरूपमिति सामानाधिकरण्यमुक्तं **कामं वास** इति । अत एवाग्रे न भावनामात्रेण कामपूर्तिः साक्षात्सम्बन्धं विना । एतदेवाभिसन्धायोक्तमाचार्यैरस्म-**दीयः कामः** इत्यादि । तत्र भावनायां मुख्यः कामभावो न भवतीत्यर्थः । अन्य-थेति । ईश्वरत्वेन तन्निमित्तकबलाभावस्याभावे रसमर्यादाभङ्गः स्यादित्यर्थः । दत्तस्यादानं ग्रहणम् । तत्र प्रियस्य रसवशात् स्वाधीनत्वे सति तदीयस्यादत्तस्यापि रसाधिक्येन बलाद्वा-ससो ग्रहणं प्रकर्षः प्रशब्देन ध्वन्यत इत्यभिप्रायेणाहुः **वासोपी**त्यादि । अत्र स्वं मदीयं स्वं स्वकीयं यथा भवति तथा प्रगृह्यतामित्यर्थः । एतेन भवतीषु नादेयं किञ्चिदस्तीति सूचितम् । सम्बोधनेन पूर्वं चलरहिता अपि मन्निकटे समागत्योक्तरूपचलवत्यो भवत्यो भव-न्त्वित्यप्यर्थः सूचितः । वाच्येर्थे वाससामेतदीयत्वस्यानुक्तिसिद्धत्वेन तदुक्तिवैयर्थ्यमाशंक्येत, तदपनोदनाय तद्ध्वनितमर्थं पक्षान्तरत्वेनाहुः **अस्मदीयाभि**रित्यादिना । अधुना हेता वस्त्रवत्कामभावमपि त्यक्त्वा विहरन्ति, मुदेतिपदाद्भावनयैव पूर्णमनोरथा इति ज्ञापनात् । तथा च सम्बोधनेन स्वातन्त्र्याभावात् स्वानधीनत्वेन स्वकीयत्वं ध्वन्यते, तेन ग्रहणे-धिकार उक्तो भवति, स्वपदाभ्यां च पूर्वसिद्धं स्वत्वमनूद्यत इति ऋपित्वदशायां प्रार्थनाहेतुर्यः कामः पूर्वः इहैव वा पूर्वकालीनो यः स ध्वन्यते । एतदेवोक्तमस्मदी-**याभिरेव पूर्वपरिग्रहः कर्तव्यः** इत्यनेन । पूर्वपरिग्रहस्त्यक्तार्थपरिग्रह इत्यर्थः । **अन्यथेति** । अस्माभिर्न्नतबलेनैतावत्साधितम् । तेनैव अन्यदपि साधयिष्यत इति भावे सति भगवदधीनत्वाभावेनोक्तरूपाधिकाराभावात् कर्मफलस्याल्पत्वेन तथाफलत्वेन दत्तवस्त्र-परिग्रहोऽनिष्टः स्यात् । सर्वभावप्रपत्त्यैकलभ्यो रसो हीष्टः । तदितरोऽनिष्टः स स्यादित्यर्थः । एतेन पूर्वं स्वं स्वकीयमेवाधुना त्यागात् पुनः स्वं यथा भवति तथा गृह्यतामित्यप्यर्थो

मूलस्य ध्वन्यते। पूर्ववत् प्रचुरभावयुक्ता भवन्त्विति भावः। भगवतो हि स एवेष्टः। अन्यथा रसाभासः स्यात् । एतदेवान्यथानिष्टः स्यादित्यनेनोच्यते। अथवा। वीप्सया नायिकाभेदेन यादृश्या यादृशो भावस्तादृशी तादृशमेव तं गृह्णातु, न विजातीयमित्यर्थो ज्ञाप्यते। विजातीयग्रहणे रसपोषो न स्यात् । एतदेवोक्तमन्यथेत्यादिना । उच्छलिते रसे त्वन्या व्यवस्थेति न काचिदनुपपत्तिः। तदर्थमेवैतत्करणं यतः । यद्वा । त्यागात्यागनिर्णयरूपत्वादेतत्प्रकरणस्य तन्निर्णयोऽप्यनेन ध्वन्यत इत्याहुः **अस्मदीयाभिरित्यादि**। अत्रायमाशयः। अधुनैतासां भाव्यवस्थान्तरस्फूर्तौ हि स्वत्वानुसन्धानपूर्वकं वसनस्थापनं तीरे स्यात्, किन्तु रसभरवशेनेयमेवावस्था मे सार्वदिकी कदाचित् तदपेक्षायां प्रियस्योत्तरीयमेव ग्रहीष्य इति प्रत्येकं भावोत्पत्तेर्वसनानां त्याग एव कृतः, न तु स्थापनमात्रम्। एवं सति त्यक्तार्थपरिग्रहत्वेन तद्ग्रहणं न युक्तं स्यादिति । तन्निषेधकवाक्यस्य मर्यादामार्गीयपरत्वात् धर्मिपराणां वचनानधीनत्वेन केवलं तदधीनत्वात् तद्दत्तस्य त्यक्तस्यापि ग्रहणं युक्तमेवेति। **अन्यथा** मर्यादामार्गीयत्वमित्यर्थः। किञ्च, केवलवस्त्राणां त्यागोभूत्, भगवांस्त्वधुना स्वकीयकामरूपाणि तानि ददातीति त्यक्तार्थतापि नात्र। आचार्यैस्तु लोकदृष्टिमपेक्ष्य समाहितम्, त्यागनिर्णयकथनार्थं च। वा, पूर्वपरिग्रह इत्यत्र नञ्प्रश्लेषो वा कार्यः। यद्वा। पूर्वपदेन पूर्वः पुंस्त्वाख्यो धर्म उच्यते। तदभावे सर्वभावप्रपत्तिर्न स्यादित्युक्तम्। तेन पूर्वं दण्डकारण्ये पुरुषा एव गोकुले समागत्य स्त्रियो जाता इति पूर्वसम्बन्धं स्वस्य स्मारयन्नत्रागत्यावला इत्यनेन सम्बोध्य कर्तव्यमाह। सः तच्छब्दस्य पूर्वपरामर्शित्वेन पूर्वः पुंस्त्वाख्यो धर्मः प्रगृह्यतामिति । अत्र स्वशब्दस्याव्ययरूपस्य कथनात् तद्विशेषणत्वम्। ध्वनितेर्थे लिङ्गादेरविवक्षितत्वेनापि तथा । क्रियाविशेषणं वा । सर्वभावप्रपन्नाभ्य एव स्वानन्दं शृङ्गाररसरीत्यैव दास्यति । स च मानखण्डितादिभावैरेव पूर्णो भवति। सर्वात्मभावस्फूर्तौ च न तत्सम्भव इति कदाचित् तत्सम्भवः कदाचिन्नेति विकल्पेन गृह्यतामित्याह वाशब्देन। विसर्गालोपश्छान्दस इति मूले ध्वनितोर्थो ज्ञेयः।

मानयं भो कृथा इति श्लोकस्य विवरणे उक्ता राजसादयो ये गुणास्ते स्वामिनीभावानामन्योन्यं वैजात्यं ज्ञापयितुं दृष्टान्तरीत्या, नतु प्राकृततद्वत्त्वा-
१०-१९-१५. भिप्रायेण । अथवा 'न तदस्ति पृथिव्यां वा' इति वाक्याद्गुणरहितं वस्तु त्रिलोक्यां न सम्भवतीति ग्रहिलवादिनं प्रत्युच्यते। अत्रैते भावा एव तद्रूपाः, न तु प्राकृता अत्र सन्तीति । एतेनात्र प्रकृतिरपि भिन्नैवेति ज्ञाप्यते। सा च स्थायिभावरूपैवेति ज्ञेयम्। अत एव भगवता पृथिव्यादय उक्ताः, न तु सामान्यतः। लीलाया अलौकिकत्वेनाजन्यत्वेन च पृथिव्यादिमध्यपातित्वाभावाद्ब्रह्मवत् । एतद्विद्वन्मण्डने प्रपञ्चितमस्माभिः।

---

१ वास इति पदे वा इति स इति पदच्छेदेन व्याख्यानं ज्ञेयम्।

१० टि०

अत्रैव ततो जलाशयादित्यत्र । मूले **तत** इत्यानन्तर्यमात्रमुक्तम् । न तु
श्रुत्वेत्यादिज्ञानवाचकम् । तत उक्तं **वाक्यार्थपरिज्ञानेपीति** । स चे-
१०-१९-१७. श्वरवाक्यमेव कर्तव्यमित्यादिनोक्तः । **ईश्वरवाक्येनेत्यादि** । **मानयं भो कृथा** इति श्लोकविवरणे ये राजसराजसादयो गुणा उक्तास्तद्भाववशात् तादृशवचनान्येवोक्तवत्यो, न त्वागताः, तदा प्रभुणा दासीत्वादेवागन्तव्यमित्यनुक्त्वा, यदीत्युक्तं यत्, तेनानागमने दासीत्वमपि न सेत्स्यतीति ज्ञापितम् । तच्चानिष्टमिति भयरस उत्पन्नः । सर्वान् भावांस्तिरोहितानकरोदितीश्वरवाक्येन तेषां तिरोभावे सर्वासामेकरूपत्वेनैकेनैव रूपेण सर्वा आगता इत्यर्थः । **नन्वत्यन्ततामस्य** इति । परपुरुषत्वादात्मानं बालेभ्यो न दर्शयिष्यामो, भगवदुक्ता अपीत्याग्रहस्तमश्शब्देनोच्यते । बालेषु स्वधर्मत्वेन पुरुषान्तरत्वाभावेपि तथात्वेनाज्ञानात् । एवं सति भगवद्वाक्यादागमनं न सम्भाव्यत इति कथमागता इत्यर्थः । एतत्समाधानेऽयमाशयः । स्वनिकटे समानेयाः, सर्वथा परीक्षार्थं बालकस्वरूपं च न ज्ञापनीयम् । एवं सति तदुभयसम्पत्त्यर्थं लीलोपयोग्याधिदैविकः कालो मुख्यः सेवकः स्वधर्मं शीतमन्तर्बहिश्चाविश्चकार जलान्तःस्थितौ बाधकम् । अत एवेतः पूर्वं जलविहारेपि न शीतमभूत् । तेन तत्र स्थातुमशक्ताः कर्शनोक्त्या पूर्वोक्ताग्रहस्यापि तिरोधानादागता इति । एतदेवोक्तं **स्वभावाधीना एवेत्यनेन** । नन्वेवं कालाधीनत्वं स्यान्न भगवदधीनत्वमिति चेत् । स्यादेवं यद्याज्ञया नागतं स्यात् । नत्वेवम् । पूर्वं स्वोक्तयोः पश्चाद्भगवदनूदितयोर्दासोक्तकारित्वयोः सिद्ध्यर्थमेवागमनात्, यतो भगवता तथैवोक्तम्, यदिपदेनाधुनानागमने पूर्वोक्तं द्वयमपि न सेत्स्यतीति ज्ञापनात् । अतोग्रेपि भगवदुक्तकरणं सम्पद्यतामिति मत्वा यत्रागमनं तत्रेतरसामयिकोक्तकरणं स्वतःसिद्धमिति बुध्यस्व । शीतोक्तिरुक्ताग्रहदार्ढ्यज्ञापनायेति ज्ञेयम् । एवंभूता अपि पूर्वं न निर्गता इति । ततः एवंभूतोस्त्यनन्तरं त्वागता एवेत्यर्थः । यदीति पदं श्रुत्वा स्वाग्रहविपरीते प्रियाग्रहं ज्ञात्वा स्वेष्टप्रतिबन्धं च ज्ञात्वा तथा चक्रुः । तत्रापि स्वप्रधानाङ्गमाच्छाद्येति निगूढाशयः । तेन कश्चन स्वाग्रहमत्यस्त्वैवागता इति **स्वभावाधीना एवेत्युक्तमाचार्यैः** । भगवदनभिमतकरणे कालधर्मा बाधन्त इत्यपि ज्ञापनाय शीतोक्तिर्ज्ञेया । सम्भवदुक्तिकः पूर्वमस्माभिरुक्त आशय इति सर्वमवदातम् । **ज्ञानदृष्टिः सर्वत्र न व्याप्तेत्यादि** । अत्रेदं ज्ञेयम् । भगवत एतत्सर्वाङ्गदिदृक्षातिप्रचुरेति तत्प्रतिघाते रोषोऽभवदिति तद्भानवर्णनं कृतमत**स्त्याज्या** इत्यनेन । मध्ये प्रसादितत्वोक्त्यायमर्थो लभ्यते । यत्र पाण्यन्तरायमपि न सहते, तत्र वस्त्राणि कथं ददातीतिशङ्काऽभावाय वृक्षस्कन्धनिधानतात्पर्यमाहुः **तासामाभरणानीत्यादि** । अत्रायमाशयः । पूर्वं भगवदन्तरायत्वेनान्यत्र स्थापितमित्युक्तम् । अतः परं यथा वैष्णवसङ्गो भगवद्व्यापकस्तथैतद्वस्त्राणामपीति वृक्षस्कन्धे निधानेन तादृग्धर्मयुक्तान् कृत्वेत्यर्थः । तेषां परार्थता भगवतैवानुपदं वक्ष्यते यत इति भावः । एतेषां तद्व्यापकत्वं

रसोद्बोधकत्वेन। तेन तादृक्संस्थानविशेषकृतिरपि लक्ष्यते। तदानीं प्रीतियुक्तत्वे विशेषहेत्वपेक्षायां तमाहुः **तासां निदानं श्रुत्वेति**। वयस्यसहिते त्वयि सति वास्यादनागमनमागमनं वा साध्वसाधु वेति वयं न विद्मः। केवलं त्वदीयाश्च वयम्, अतः किं कृते किं मनुते भवानिति शङ्कितहृदयासु यथोचिता रक्षा त्वयैव कार्येत्यादिरूपं श्रुत्वानन्यत्वं ज्ञात्वा तया जात इत्यर्थः। यद्वा। **निदानं** निज स्वरूपमित्यर्थः। तथाच पद्मिनीनां नीवीषु पद्मगन्धो भवतीति यदा वृक्षस्कन्धे विविच्य स्थापितास्तास्तदा मधुपकुलाकुलतया तदीयझङ्कृतिश्रवणमेव निदानश्रवणम्, तेन स्वानुरूपनायिकोत्तमत्वज्ञानेन रसभावोद्बोधात्तासु प्रीतोऽभवदित्यर्थः।

बद्धाञ्जलिमित्यत्र। **क्रियाशक्तिर्बाहू** इत्यर्थः। **क्रियामूलस्यापी**ति।
१०-१९-१९. बाहुमूलस्यापीत्यर्थः। वस्त्रदाने लोके वेदे च मुक्तेरेव परमफलत्वप्रसिद्धिरिति तस्या भक्तिमार्गेऽल्पत्वं प्रकटीकर्तुमाहुः **ननु तर्हि मुक्तिमेव दद्या**दित्यादि। सर्वदुःखाभावरूपत्वेन मुक्तेरुक्तरूपकरुणत्वस्य तदैवोपपत्तेरिति भावः। एतद्दाने हेतुत्वेन विशेषणव्याख्यानेन येषु नाथ तोषस्तेभ्य एव मुक्तिदानम्, न त्वेवंभूतेष्वपीति भावः सूचितः। तथा च तदल्पत्वं स्पष्टमेव।

दृढं प्रलब्धा इत्यत्र। लौकिकदृष्टभावस्याविचार्यत्वे बाधकमाहुः **अन्यथेति**।
१०-१९-२२. असूयाहेतुत्वेन लोके ये धर्माः प्रसिद्धास्तेष्वनुभूयमानेष्वपि तदसम्भवश्चेत्, तदा सिद्धमलौकिकत्वं भावस्येति तात्पर्येण मूले ते निरूपिताः। न च स्नेहमात्रमेतेनोक्तमिति वाच्यम्। तद्वतीनामपि खण्डिताकलहान्तरितादीनामसूयासम्भवात्। ईश्वरेऽसूयानिष्टहेतुरिति शास्त्रज्ञानवतां स्नेहरहितानामपि तदसम्भवाच्च। न च खण्डितादीनां सङ्गाभावात्तथात्वमत एवात्राप्यन्ते विशेषण तथेति वाच्यम्। यदा प्रलम्भनादिस्तदा वक्ष्यमाणसङ्गाभावात् तत्सम्भवात् खण्डितादीनां प्रियं प्रत्येव तथोक्तेः सङ्गाभावाभावश्च। न च पूर्वकालीनः स तथा। उत्तरेण सङ्गेन तद्बाधात्। न च पूर्वकालाधिकरणकसङ्गाभावस्तदाप्यस्ति, तस्यात्यन्ताभावरूपत्वाद्विशिष्टाप्रसिद्धावपि खण्डशः प्रसिद्धेरिति वाच्यम्। उत्तरकालीनातिरिक्तस्य सङ्गस्य प्रतियोगित्वे मानाभावात् गौरवाच्चात्यन्ताभावत्वाभावात्। नचैतेन दोषमात्राभाव उपलक्ष्यते एतास्विति वाच्यम्। दोषाणां हि मूलमभिमानस्तदभावश्चाञ्जलिबन्धपर्यन्ताज्ञाकरणेनैवोक्त इति पुनस्तदुक्तिवैयर्थ्यापत्तेः। तदेतदुक्तं **सर्वथा निरभिमानाना**मित्यनेन। एव च सति सङ्गे सत्यपि लौकिकरीत्या भावे सत्यसूया भवतीति तदभावोक्त्या लौकिकदृष्टभाव एवोक्तो भवति। स च न रूक्षः, किन्तु महारस इति ज्ञापनाय प्रत्येकविशेषणनिर्धारणीयार्थानाहु**र्भगवद्वचने** चेलादिना। एतासामेतादृशो विशुद्धभावो येन वसनद्वारापि सम्बन्धं साक्षादिवानुभवन्निति मूले प्रियसङ्गनिर्वृता इत्यनेनोक्तं तदभावहेतुभूतेन। अन्यथा हेतुत्वेनोक्तदृढप्रलम्भाद्यव्यवहितोत्तरक्षणेऽसूयोत्पत्तौ प्रतिबन्धकाभावादुक्तानुपपत्तिरिति भावः।

परिधायेत्यस्य विवरणे । **रसाकरा जाता** इति । रसः शृङ्गाररसः, स हि स्व-
१०-१९-२३. योग्येष्वेवाङ्गेषु प्रकटीभवतीति स्वशास्त्रे सिद्ध इत्यङ्गानामतादृक्त्वे रसाश्रयत्वमपि न स्यादिति तादृशत्वमत्र जातमिति ज्ञापनायैव धनुःकवचादिसम्पन्नाः रणार्थं सज्जिता वीरा इव प्रेष्ठसङ्गमसज्जिता जाता इत्युक्तमित्यर्थः । वाससां कामरूपत्वात् तदनन्तरं तथात्वमुक्तम् । ननु कुमारीणां तदैवोक्तरूपत्वमनुपपन्नमित्याशङ्क्य विपक्षे बाधकमाहुः **अन्यथेति** । तादृग्वयोङ्गादिसम्पत्त्यभावे कामशास्त्रोक्तनखदन्तताडनादिव्यापारोद्बोधनीयरसानामाश्रयाभावः स्यादित्यर्थः । तथाच मूलोक्तसङ्गमपदार्थबाधप्रसङ्ग इति भावः । उक्ताभावेपि यथाकथञ्चित्सङ्गमे पूर्णरसाभावेन क्षीणरसत्वं वा स्यादित्यर्थः । पूर्वं दारिकात्वकुमारीत्वोक्त्याधुना च रसाकरत्वनिरूपणेन भगवानेव गुणातीत इत्यादिनोक्तभगवत्स्वरूपात्मिकैवासां देहेन्द्रियान्तःकरणादिरूपा सामग्रीति ज्ञाप्यते । कालक्रमं विनैव तदैव तथात्वादिति ।

लज्जायितेक्षणा इत्यत्र । **पूर्वस्वदोषेति** । प्रथमाकारणेऽनागमनं दोषः । वस्तु-
१०-१९-२३. तस्त्वधुना प्रियप्रकटितरसभरभरितत्वेन तदन्यानुसन्धानमसम्भावितमिति तत्समयोचितभावदृष्टिरेवैषेत्याहुः **तदेयं भावदृष्टिरिति** ।

सङ्कल्पो विदित इत्यत्र । भवतीनामित्यस्य विवृतिः **सर्वासामेवाज्ञातस्वरू-**
१०-१९-२५. **पाणामिति** । स्वरूपतो धर्मतश्चेति द्वेधा वेदनं सम्भवति, इह तु भवतीनां सङ्कल्प इति पदव्यासेन सङ्कल्पस्यैव वेदनम्, न तु स्वरूपस्यापीति ज्ञाप्यते । स्वरूपस्य रसात्मकत्वेनानुभवैकवेद्यत्वादग्रे वेदनं भावि । संप्रति तु सङ्कल्प एव विदित इति रसोक्तिः । 'लोकवत्तु लीलाकैवल्य'मिति न्यायाद्रसमर्यादयैव भगवानेतत्स्वरूपानुभवं करिष्यतीत्याशयेनैवमुक्तम् ।

मयानुमोदित इत्यत्र । **अनेन कार्याधीनत्वादित्यादि** । असावितिपदेनोक्तोऽर्थः कार्यपदेनोच्यते । फलं च भगवद्रमणम् । तच्चैतन्निवेदितदेहेन्द्रियादिभोगरूपमेव । तच्चोक्तकार्यमध्यपाति । कार्यं चैतत्कर्तृकत्वेनैतदधीनमिति तथा । असाविति पदोक्तपूजाया भगवति विविधरसभावजनकत्वेन तत्पूर्वकस्मितविलासेक्षणादिभिरेतद्भावः पूर्यते, नान्यथेति परस्परं भोग एवाद्भुतः सम्पद्यते । इदं चोक्तपूजामध्यपाति । पूज्यकर्तृकनिवेदितभोगस्य पूजामध्यपातित्वात् । एतस्या एव रसमर्यादाक्रमेण पुष्टाया अग्रिमफलसाधकत्वमिति सुष्ठूक्तं **गोपिकाधीनमेव फलमिति** । अत एवाधुना न रमणम् । तेन कृष्णचेतस्त्वेन मानसनिश्चये सत्यपि 'यदि मे दास' इति वचनेन 'यूयं विवस्त्रा' इत्यादिवचनेन च जनितो यः फले संशयः सोपि निवारित इत्यर्थः ।

अत्रैव यातावला इत्यस्य विवरणे । **यथा भूमिरित्यादि** । अस्य कामस्य का-
१०-१९-२७. मान्तरानुत्पादकत्वेन दृष्टान्तीकृता धाना इति तद्व्यञ्जितोऽर्थोऽत्रोच्यते । ते हि पूर्वावस्थायां भूमावुप्ता अङ्कुरोत्पादकाः । तत्र न हि निजातीयाङ्कुरानु-

त्यर्थं रक्षार्थं भूरन्यत्र नीयते, किन्तु तदुत्पादका भौमा दोषा एव निरस्यन्ते । प्रकृते तु भगवानस्मानतःपरं यत्र कुत्रापि स्वसङ्ग एव नयत्विति स्वामिनीनां हृदयम् । तच्चाधुना रसपोषाय लौकिकविरोधाद्रसाभाससम्भवाच्च न कर्तव्यमत इयमाज्ञेति । यद्वा । भौमा एव भूसम्बन्धिनो ह्लादय एव परं भूसमीपं नीयन्त इत्यर्थः । तेन यथासम्भवं भवतीरुद्दिश्य सन्ध्यादिष्वहमेव व्रजमागमिष्य इति भावः ।

मयेमा रंस्यथेत्यत्र । रमणसहितास्ता इति । आसां क्षपाणामेतन्मात्रभोगार्थमेवाविर्भावादेतज्ज्ञापको धर्मविशेषः क्षपासु वर्तत इति तद्दर्शनेन स्वरमणनिश्चयोऽभूदित्याशयेनेदमुक्तमिति ज्ञेयम् । अत्रैवोपसंहारे **तासामर्थभक्तिरि**ति । अङ्गसङ्गाभावादर्धत्वम् ।

अत्रैवाग्रिमप्रकरणार्थनिरूपणे । **अन्यथा गोपालानामनर्थपर्यवसानं स्या**दिति । अत्राथ गोपैरित्यनेनोक्ता गोपाला उच्यन्ते, न तु पूर्वोक्ताः, वि-
१०-१९-२९. नियुक्तत्वात् । गोपपदेनैव च तल्लाभावृत्तिः, तेषु तदभावात् । अत एव मूले तेषु वयस्यत्वादिकमेवोक्तम्, न तु गोपत्वमपि । स्तोकादयो यदि व्रजस्थं वस्तुमात्रं न केवलं भगवदर्थं किन्त्वन्यार्थमपीति जानीयुस्तदा पूर्ववृत्तान्तं श्रुत्वा प्रभौ दोषारोपं कुर्युः । स एव चानर्थरूपः । यदि तदर्थमेव सर्वमिति जानीयुस्तदोक्तवैपरीत्यमित्यर्थः ।

अत्रैव **वृन्दावनाद्गतो दूरमित्यस्य** विवरणे । **वृन्दावनस्य स्त्रीप्राधान्या**दित्यादि । अत्रोपक्रान्तत्वात् परार्थताज्ञानमेव ज्ञानपदेनोच्यते । भग-
१०-१९-२९. वदीयव्रजस्त्रीणां तु रसभावभरेणास्मदर्थमेव प्रभुप्राकट्यमिति ज्ञानं दृढम् । अत एव वक्ष्यन्ति च 'व्यक्तं भवान् व्रजजनार्तिहरोऽभिजात' इति । एवं सति तद्वने तद्विपरीतज्ञानं न सम्भवतीत्यर्थः । भगवदतिरिक्ते वस्तुनि तूपेक्षेति तस्मिन् तदर्थत्वात्तदर्थत्वज्ञाने अपि न सम्भवत इति भावः ।

निदाघार्कातप इत्यत्र । **व्रजजातापेक्षये**ति । भगवदन्तिकागमने निवारकत्वाद्वृ-
१०-१९-३०. क्षाणां चैतद्रमणानुकूलत्वात्तथात्वमिति भावः । यद्वा, व्रजजाता वृक्षा एवात्रोच्यन्ते । तेषु लीलाविशेषानुपयोगात्तथात्वम् ।

परार्थैकान्तजीवनानित्यत्र । **परार्थजीवनानि**त्येतावतैव चारितार्थ्येऽपि यदेकान्तपदयोः कथनं तत्तात्पर्यमाहुः **तदा अन्ते धर्म** इत्यादि । जीवनस्य
१०-१९-३२. परार्थसाधनत्वेन तत्पूर्वकालीनस्य तस्य तथात्वं वाच्यम् । तथाचोत्तरक्षणे जायमानः परार्थः पूर्वक्षणीयजीवनस्यान्ते भवति । स च न प्रासङ्गिकस्तथा, किन्तूद्देश्यत्वेन मुख्यः । एतदर्थमेकपदम् । एतदेवोक्त**मन्ते या मति**रित्यादिना । एवं सति परार्थ एवैको मुख्योऽन्ते यस्येति मूलार्थः सम्पद्यते । अस्मिन्नेव पक्षे योजनान्तरमप्याहुः **एकान्तत** इति । **यथोपवासा** इत्यादि । एतस्यैव विवरणं **विद्यमान**मित्यादिना क्रियते । तथाहि । तद्दत्त्वा स्थितस्य रन्तिदेवस्य तदभावे अन्नाभावे सति ये जाता उपवासा-

स्ते तस्य मोक्षहेतवो जाता इत्यर्थः । तथा चैतादृशास्त उत्तमा इति भावः । स्वत इति । स्वत एवान्नाभावे सति न तु दानप्रयुक्त इत्यर्थः । ईदृशस्यान्यतोऽन्नप्राप्तिसम्भवेपि स्वस्यापेक्षासत्त्वेपि तत्पीडाभावाय तद्दत्तान्नाग्रहणेन य उपवासः स मध्यम इत्यर्थः । तदुभयाभाव इति । स्वतः परतश्चान्नाभावे सत्यन्नकामनायां सत्यां य उपवासः स तथेत्यर्थः । निर्हेतुश्चेदिति । ईदृशोऽपि चेदनेनोपवासेनास्येष्टं स्वस्य वा करिष्य इति संकल्पं न कुर्यात्तदा स उत्तमः । तस्मिन्सति मध्यमः । अग्रे स्पष्टम् ।

वातवर्षातपहिमानित्यत्र । **आद्यश्चतुर्णामिति** । चतुर्णां मध्य आद्यस्त्रयाणां सहकारीत्यर्थः । यद्वा । मन्दोऽनिलः स्वसजातीयानेकसहकारेण महत्कार्यमपि करोतीत्याशयेनेदमुक्तम् । तथा च यथाश्रुत एव ग्रन्थो बोद्धव्यः ।

विमुखा यान्ति नार्थिन इत्यत्र । **अग्रेपि वीनां मुखेन प्रविशन्ती**त्यादि ।
१०-१९-३३. अग्रेपि देहत्यागानन्तरमपीत्यर्थः । वीनां पक्षिणां गृध्रादीनां मुखानि भक्षणार्थं भवन्ति येषु ते विमुखास्तादृशाः सन्तो न यान्ति । दारुषु सत्सु देहस्य भस्मीभावात् । विशब्दस्य कालवाचकत्वेपि तथा । वृक्षमात्रभिक्षुकाः परमहंसाः ।

एतावज्जन्मेत्यत्र । **यदि सर्वतुल्यतेति** । ज्ञाने जातेऽप्यज्ञवत्स्वार्थपरता चेत्तदा
१०-१९-३५. तथेत्यर्थः । अत्रैव एतावज्जन्मेत्यस्य विवरणे । यथा पुमान् कुण्डलवान् कुण्डली भवति । न हि तत्र कुण्डलातिरिक्तं कुण्डलित्वमस्ति । तस्यैव विशेषणत्वात् । तथात्रापीत्याशयेनाहुः **एतावदित्यादि** ।

इति एकोनविंशोऽध्यायः ।

विंशतितमेऽध्यायेऽध्यायार्थसन्दर्भे । उभयोर्निर्णयो यादृगित्यादि ।
१०२००. उभयोर्ज्ञानकर्मणोः । भगवत्सम्बन्धं विना कर्मापि न सत्त्वशोधकम् । अन्यथा गोपवाक्यैरेव भगवद्भावः स्याद्विप्राणाम् । तथापि कर्मणो वैदिकत्वात् तस्य च भगवत्येव तात्पर्यवत्त्वात् पर्यवसानं भक्तावेव । तदपि न स्वतः, किन्तु भक्तसङ्गादेव । भक्त्यभावे वैयर्थ्यं च । भक्ताया इति वचनादेकस्याः प्रसङ्गेनान्यासामप्यङ्गीकारः । तादृशीनामपि सङ्गेन पुंसां भक्तिः । 'गृह्णन्ति नो न पतय' इतिवाक्यं श्रुत्वा हि तत्समाधानपूर्वकं प्रभुर्गमनमेवोक्तवान् । सम्पन्नं च तदेव । तेनान्यशेषतया भजनं प्रभुर्न मनुते । तेन च भगवदन्तराय एव भवति । अतो न पुरुषार्थसिद्धिरिति ज्ञाप्यते । अन्यासामपि स्नेहवत्त्वेऽपि प्रसादविषय एव तद्धेतुत्वेन भक्तत्वोक्त्याऽन्यभावतो वैलक्षण्यमेतद्भावे ज्ञाप्यते । तत्र सर्वात्मभावत्वमेवेति ज्ञेयम् । पुष्टिलीलायामङ्गीकार एवात्र प्रसादः, न तु शीघ्रं मुक्तिः । पूतनादिसाधारण्येन प्रसादविशेषोक्तिरत्र विरुद्धा भवेत् । शरीरस्य मर्यादामार्गीयत्वेन तन्नाशपूर्वकं देयं दत्तवानिति हृदयम् । एवंरूपस्तयोर्निर्णयोऽप्युच्यत इत्यर्थः ।

ननु 'नन्वद्धा मयि कुर्वन्ती'ति 'प्राणबुद्धिमनःस्वात्मे'त्यादिना च स्वस्मिन्सहजप्रियत्वोक्त्या स्वेतरेषु प्रीतेरौपाधिकत्वेनापुरुषार्थत्वं स्फुटमेव भगवतोक्तमिति तच्छ्रुत्वापि कथं पत्न्यो गृहान् गता इत्यत आहुः **साक्षाद्भगवतोक्तं हीति** । यथा यथावत् तात्पर्यज्ञानपूर्वकं पूर्वमेव न भासत इत्यर्थः । गोपद्वारा ब्राह्मणेभ्यो यदुक्तं तत्परम्परोक्तम्। उत्तमाधिकाररहितानामिति शेषः । एतच्च प्रायःश्रुतेतिश्लोकविवरणे स्फुटीभविष्यति ।

ननु देहत्यागोत्तरावधिकोत्कटभावोऽवश्यं पूर्वमप्यन्येषामपि ज्ञातः सम्भवतीति कथं प्रतिबन्धकरणमुपपद्यत इत्यत आहुः **स्त्रिया भाव** इति । परः सर्वासां पत्नीनां भावेभ्य उत्कृष्टः सर्वात्मभाव इति यावत् । स्त्रियाः उत्तमनायिकाया भावस्तथा । यथापूर्वं न भासत इत्यर्थः । वस्तुन एव तथात्वादिति भावः । यद्वा । तर्हि पत्नीनां परम्परोक्तभानं कथमित्यत आहुः **स्त्रिया भाव** इति । यथा प्रभुवाक्यं दुर्बोधम्, तथा स्त्रीणां भाव एवोत्कृष्ट इत्यर्थः । तथा च प्रियसम्बन्धिवार्ताश्रवणजनितोत्कटभावेनैवागताः, न तु वचनतात्पर्यं ज्ञात्वेति भावः । जात्यभिप्रायेणैकवचनमुक्तम् । यद्वा । ननु 'प्रसीद' त्रितिवाक्यात्प्रसादस्तस्यामवश्यं वाच्यः । स च देहत्यागः सद्योमुक्तिर्वेति न वक्तुमुचितम् । एतयोः पूतनादिसाधारणत्वादन्यस्य स्पष्टतयानुक्तत्वात् तत्कार्यं न किञ्चित्पश्याम इत्यत आहुः **स्त्रिया भाव** इति । यथा व्रजसीमन्तिनीनां तथास्या अपि भावः परः सर्वोत्कृष्टः सर्वात्मभावरूप इत्यर्थः ।तथाच यथैतासु लीलां कृतवानेवमेवास्यामपीति। मर्यादामार्गीयत्वाद्देहो नाशितः । यदीयमत्रागता स्यान्न निवर्तेतैव। सर्वात्मभाववत्त्वात् । अतोत्र प्रतिबन्धकं मर्यादादेहं नाशयित्वा नीतवानित्ययमेव प्रसादः । अन्यथा 'ये यथा मा' मिति प्रतिज्ञा न सङ्गच्छेतेति भावः । यद्वा । नन्वेकस्यामेव प्रसादे को हेतुरत आहुः **स्त्रिया** इति । परः सर्वासां भावेभ्य उत्कृष्टोऽस्या भावोऽतस्तथेत्यर्थः ।

भक्ताया विप्रभार्याया इत्यस्य विवरणे । **ज्ञानं हि ब्रह्मात्मकमि**त्यारभ्य
१०-२०-२. **कार्यक्षमं भवती**त्यन्तम् । अत्रायमाशयः । पूर्वाध्याये हि सर्वमन्नत्वं भगवदर्थमिति ज्ञानमुपदिष्टम् । एवं सति स्वविनियोगानर्हत्वज्ञानेन वस्तुमात्रे तथाकरणे व्यवहारविरोधेन च लीलाविरोधः स्यात् । अत एव क्षुन्निवारणस्यावश्यकत्वेन भगवदीयवस्तूपयोगभिया नूतनप्रार्थनम् । अन्यथा फलादिभ्य एव तत्सम्भवे प्रार्थनं व्यर्थं स्यात् । तेन यदुपयोगकरणे प्रभोरिङ्गितमस्ति तस्य तथाकरणम्। यत्रातथात्वं, न तत्र तथेति ज्ञानमपेक्षितम् । तत्रापि यदीदं मयैव ग्राह्यं मयैव भोक्तव्यमित्याग्रहः स्यात्तदैव बाललीलायां रसः स्यात्, अन्यथा शान्तरसमध्यपातित्वेन रसाभासः स्यात् । इदं चोपदिष्टज्ञाने जाग्रति न सम्भवतीति प्रथमं लोकानुरूपं पर्यवसानतो भगवद्धामि यज्ज्ञानं तद्यतो भवति तदिदमन्नमिति तथोक्तवान् । अन्नस्वामिनां बहिर्मुखत्वात् समर्पणकर्त्रीणां च भक्तत्वादुभयरूपत्वं तस्येति । अन्नस्य ज्ञानपोषकत्वं श्रुतिसिद्धम् ।

'**मां ज्ञापयते**त्यत्र । **तस्यान्नदोषो निरूपित** इति । पूर्वं यथेष्टमिति कामपदं
व्याख्यातम्, अधुना तस्यान्नविशेषणत्वमभिप्रेत्य तत्तात्पर्यमुच्यते । दोषः
१०-२०-१४. स्वभोगे ज्ञेयः स कथं निरूपित इत्यत आहुः **कामपदा**दिति । अत्रेदमाकूतम् । अन्नं हि पुरुषस्वामिकं भवतीति तदन्नं तैः स्वर्गकामनया यज्ञसंबन्धिदेवतान्तरोद्देशेन सङ्कल्पपूर्वकं निष्पादितत्वात् सकाममपि कामप्राचुर्यात् कामरूपमेव जातमिति ज्ञापनाय तथा विशेषणम् । तेन तेषामभक्तत्वं सूचितम् । तथा चान्योद्देशेन कृतमभक्तसंबन्धि स्वभोगयोग्यं न भवतीति दोषोक्तिः । किञ्च, 'मां ज्ञापयत पत्नीभ्यः' इत्युक्त्वा दानसमयेपि 'मह्यं दास्यन्ती'ति पात्रान्तरोक्त्या चोक्तदोष एवान्नस्य स्फुटीभवतीत्याशयेनोक्तं **व इति पदा**च्चेति । न च पूर्वोत्तरवाक्ययोः कथं संगतिरिति वाच्यम् । तासां भक्तत्वात् मदागमने ज्ञापिते मत्संबन्धित्वं ज्ञात्वा वो युष्मभ्यमपि दास्यन्तीति ज्ञापयितुमादौ स्वकथनम्, अग्रे दोषत्वमन्नस्य ज्ञापयितुं व इति कथनमित्युपपत्तेः । अन्यथा यथा भगवतोक्तं वो दास्यन्ति तथा ता अपि तेभ्य एव दद्युः, न तु स्वमत्रानयेयुः । तर्हि कथं तदन्नमेताभिरानीतं भगवानङ्गीकृतवानिति चेत् । अत्रैवं प्रतिभाति । पत्न्या आत्मनोऽर्धत्वात्तदन्ने तासामंशो भवितुमर्हति । स च तासां भक्तत्वादुक्तदोषरहित एवेति मन्तव्यम् । तथासति तस्य पूर्वमपृथग्भावात् समुदिताभिप्रायेण दोषोक्तिः । ततस्ताभिर्भगवदर्थं स्वांशे पृथक्कृते तदङ्गीकरणमावश्यकं प्रभोः । 'भक्त्युपहृतमश्नामी'ति वचनात् ।

यद्वा । 'अन्नमादाय भाजनै'रिति भाजनोक्त्या पृथग्भावासंभवेपि यथा तदन्ने पूर्वमन्योद्देशो दोषहेतुरभूत्, एवं पश्चाद्भगवदुद्देशस्तस्मिन्निवृत्तिहेतुरभूत् । अतः सर्वमेवान्नमङ्गीकरणयोग्यमित्युपपद्यते । न च तासां भक्त्या पुमंशः कथमदुष्टो भवतीति शङ्कनीयम् । तत्संबन्धात्तेषामपि भक्तत्वस्य वक्ष्यमाणत्वात् ।

अथवा, कामं यथेष्टमिति पक्षेपि तत्तात्पर्योक्तिस्**तस्यान्नस्य दोष** इति । अत्रायमर्थः । आधिदैविकं यज्ञं संपादयितुं पुंभिराधिदैविकयज्ञात्मकस्य भगवतस्तदाज्ञयाध्यात्मिकानां गोपानां याच्ञाभङ्गः कृतः । सोत्र दोषपदेनोच्यते । तथा सति कथमाधिभौतिकोपि स संपत्स्यत इति ज्ञात्वा साक्षादाधिदैविके दातुमशक्यत्वादाध्यात्मिकेभ्यो वो युष्मभ्यं यावता तृप्तिर्भविष्यति, तावद् दास्यन्ति । तेन चाधिदैविकस्य तृप्तिर्भविष्यति, आधिभौतिकश्च संपत्स्यत इत्याशयेनोक्तं कामपदाद्व इति पदाच्चेति । अन्यथा यज्ञीयान्नस्य यज्ञार्थमस्थापयित्वा यथेष्टदानकथनानुपपत्तेः । तास्तु 'यथा तरोर्मूलनिषेचनेने'ति ज्ञानेनाधिदैविकद्वारेणैव सर्वं भवत्विति तत्रैव सर्वमन्नमानीतवत्य इति सर्वमवदातम् ।[1]'

अत्रैव श्यामं हिरण्यपरिधिमित्यस्य विवरणे । **ज्ञानक्रिययोरि**त्यारभ्य **सर्वविरोधः परिहृतो भवती**त्यन्तम् । ननु स्वरूपस्योक्तरूपत्वे तासां व्या-
१०-२०-२४. घुट्य गमनं सर्वथा विरुद्धम् । तथाहि । ज्ञानं हि क्रियापर्यवसायि । तथाच

१. मामित्यारभ्य सर्वमवदातमित्यन्तं शोधपत्रमेकस्मिन्नेव पुस्तके लभ्यम् ।

बर्हधातुप्रवालेत्यादिविवरणे केवलधर्मसहितरसदानार्थोपस्थितिपरवशत्वयुग्मरसस्थापनादिक्रियया तदनुरूपमेव भगवज्ज्ञानमपीति ज्ञायते। तथा च व्याघुट्यगमनमेतदुभयविरोधि। इत एव मर्यादाविरोधः। न हि भगवज्ज्ञानादि विरुद्धं भवितुमर्हति। 'कृष्णाङ्घ्रिपद्ममधुलिण् न पुनर्विसृष्टगेहे'ष्वित्यादि भागवतं शास्त्रं रसशास्त्रं च तादृशमतस्तद्विरोधः। अङ्गानि भगवत्प्रेम्णः प्राचीनश्रवणादीनि विभावकानुभावकादीनि च। भगवत्सङ्गतानामन्यत्रापि पतित्वेन भजनमिति भक्तेर्विरोधः। व्यामोहेन समाधानस्यायमाशयः। यदि पूर्वोक्तरूपेष्वेकस्यापि स्फूर्तिः स्यात्, स्यात्तत्कार्यमेव। किन्तूक्तानां मूलरूपे मोहकसम्बन्धात् कस्यापि न स्फूर्तिरिति न तत्कार्यसम्भव इति। यद्वा। भगवतो ब्रह्मत्वेन तज्ज्ञानशक्तेरपि सर्वसमत्वेन विकाराजनकत्वादुक्तरीतेश्च तज्जनकत्वात् तथा। तत्क्रियाशक्तिरपि योगशास्त्रादिनिरूपिता मनःसमाधिहेतुत्वेनोक्तरूपैवेति तथा। ब्राह्मणीष्वेवंभावप्राकट्यं मर्यादाविरोधि। शास्त्राणि स्वस्वाधिकारानुसारेण भगवद्भजनं विदधते। तथा सति शुभं फलम्, विपरीते विपरीतमिति। एतासां विवाहितपुंभजनस्यैव तथात्वादुक्तरीतेश्चातथात्वहेतुत्वेन तथा। शास्त्रोक्तरीत्यैव भजनं भक्त्यङ्गमिति तद्वैपरीत्येन भावजनकरीतिप्राकट्यमङ्गविरोधि। जारत्वेन ह्यत्र भजनं स्यात्, तच्च भक्तिविरोधि। व्यामोहसमाधेरयमाशयः। लोके यो हि येन यदर्थं व्यामोहितः क्रियते, स तदनुगुणमेव करोति, न तु स्वानुगुणम्। तथाच पूर्वोक्तानामेवंभावेन भजन एव तात्पर्यमधुना सम्पन्नमिति तेषां पुष्टिमार्गीयत्वकरणान्न विरोधगन्धोपीति। यद्वा। ननु स्वरूपस्योक्तरूपस्योक्तरूपत्व इत्यादिनास्मदुक्ताशङ्कानिरासायाहुः **सर्वव्यामोहा**दिति। सर्वासां पत्नीनां सर्वांशे वा तासामेव व्यामोहो भगवता कृत इति पूर्वोक्तभगवदीयज्ञानक्रियादेः कार्यासम्पत्तिरभवदेतासु, तेन गेहं गताः। अत्रेदमाकूतम्। तासां गृहगमनोक्त्या भगवदीयज्ञानक्रियादिकार्यासम्पत्तिः स्पष्टैवेति ज्ञानाद्युक्तिर्निरर्थेति शङ्कानिरासायावश्य तत्प्रयोजनं वाच्यम्। तच्च मर्यादादेहं त्याजयित्वा पुष्टिमार्गीयं तं प्रापयित्वा समानीता या तन्निमित्तं प्रभुणा तादृशा धर्माः प्रकटीकृता इति तस्यां तत्कार्यं सम्पन्नम्। एतदर्थमप्राकट्यादेतासु तत्कार्यासम्भवेऽपि न विरोधः। अत एवैतद्दर्शनमस्मिन् श्लोके नोक्तम्। किन्तु पूर्वस्मिन्नेव। परन्तूभयदृष्टं रूपमेकमेवेति पूर्वेणास्य श्लोकस्य सङ्गतिः कृता। प्रतीयमानानामपि धर्माणामेतद्धृदयानारोहो व्यामोहादिति। पूर्वमप्रतीतिरेव धर्माणामुक्ता, संप्रति प्रतीतावपि हृदयाप्रवेश उच्यत इति विशेषः।

१ **प्राय:श्रुते**त्यत्र। कर्णपूरपदतात्पर्योक्तौ। **दृष्टानन्तर्याभावा**दिति। दृष्टं दर्शनम्। तदानन्तर्याभावादित्यर्थः। यद्युक्तानां भावानां तदनुरूपस्यीयभावैः
१०-२०-२३. साक्षादनुभवानन्तरं श्रवणं स्यात्, तदा पूर्वानुभवसंवादेन सर्वाङ्गे तद्रसाविर्भावः स्यात्, अत्र तु तथात्वाभावान्न तथेति भावः।

नन्वद्धा मयीत्यत्र । यावन्न भगवति प्रेमेत्यादि । अत्रायं भावः । भक्तिमार्गे स्वतन्त्रपुरुषार्थत्वं भगवत एवेति निरुपधिस्नेहस्तद्विषयक एव भवति ।
१० २०-२६. तदुपयोगित्वेन स्वात्मादेः परं तथात्वमिति वस्तुस्थितिः । अत एव 'यर्ह्यम्बुजाक्ष न लभेय भवत्प्रसादं जह्यामसू'निति महिषीवचनं गीयते । एवं यथा विषयिणामात्माध्यासप्रयुक्तस्नेहविषयत्वेपु देहेन्द्रियादिषु स्वात्माज्ञानेपि परमस्नेहः, तथा भगवत्स्नेहरहितानामपि मुमुक्षूणां विषयवैराग्यमिति ज्ञेयम् ।

पतयो नाभ्यसूयेरन्नित्यत्र । पित्राद्योपि पूर्वपूर्वोपाधीत्यादि । पतिपितृभ्रातृसुतादीनां मध्ये पूर्वस्यैतन्निषेधप्रयोजको यो धर्मः स उत्तरे नास्तीत्यर्थः ।
१० २० ३१. एतदेव विवृतं **नहीत्यादिना** । पितुस्तत्सुतदत्तपिण्डे लोभादेतन्निषेधः सम्भवति, स न भ्रातरि । भ्रातुः स्वसृसौभाग्येच्छा भवति तथा । सुते तु न सा । अस्य मातुर्निर्दोषत्वमपेक्ष्यम् । अन्येषां तदपि नेत्यर्थः । यद्यप्यन्यधर्माभावोऽनसूयायां न हेतुः, तथापि स्वनिष्ठतादृग्धर्माणामप्यधुना नाशात् तदुपलक्षकोऽयं ग्रन्थ इति ज्ञेयम् । एवं सत्यागमनसमये प्रतिबन्धकृतिहेतुभूतपत्यादिनिष्ठधर्मा एव पूर्वपूर्वोपाधिशब्देनोच्यन्त इत्यपि ज्ञेयम् ।

अथानुस्मृत्येत्यस्याभासे । एवं ज्ञानकर्मणी द्विविधे इति । विप्रतत्पत्न्योर्मर्यादापुष्टिभेदेन द्विविधे ते निरूप्ये इत्यर्थः ।
१०-२० ३७.

यद्विश्वेश्वरयोर्याच्ञामित्यत्र । विश्वेश्वरपदतात्पर्यमाहुः **वस्तुतो भगवतैवेत्यादि** । विश्वस्यैवेश्वरो नियामकः प्रवर्तको निवर्तकश्च यत इति भावः । **बलिवाक्यात् परम्परयापीत्यादि** । यद्यपि मामितिपदात् बलिना स्वविषयकमेवोक्तमिति न भगवद्धर्मनिरूपकं तद्वाक्यमिति भाति, तथापीश्वरस्यैवेदृशं वाक्यं भवतीत्यैश्वर्यधर्मरूपत्वात् तस्य च भगवदीयस्यैव बलौ सत्त्वाद्भगवद्वाक्यमेव पर्यवसतीति भावः । ननु याच्ञाभङ्गश्चेद्भगवत्कर्तृक एव, तदा विप्रापराधत्वेनास्य कथनं कथम् । अपरञ्च । पत्नीनां दीक्षितविमितात् प्रवास न ददातीति निष्युलङ्घन च कारितवानिति, प्रत्युत विप्रापकारकृतिरापद्यत इत्याशङ्क्याहुः **ब्राह्मणानामयमिति** । अयं सनलक्षणो धर्मोऽन्नसमर्पणेन न बाध्यते । 'शेपाद्भुञ्जीर'न्नितिविधेरन्नदानस्य विहितत्वायज्ञार्थनिर्दिष्टाज्यादेः शेषभूतान्नातिरिक्तवस्तुदानस्यैव निषेधस्य कृतत्वा'दन्नहीनं दहेद्राष्ट्र'मितिवाक्यादावश्यकत्वाच्चेति भावः । किञ्च, अग्रे फलदर्शनादपि साधनवैगुण्यं न वक्तुं शक्यमित्याहुः **स्नेहाच्चापीति** । यद्यपि तदीयान्नस्वीकारेण भक्तसङ्गेन च तेषां भक्तिर्जाता, तथाप्यग्रे तेषां कर्मफलासम्भवाद्वैदिककर्मणो वैयर्थ्यासम्भवादेतत्फलत्वेनापि भगवता भक्तिरेव सम्पादितेति ज्ञापनायापिशब्दः । यच्चोक्तं याच्ञाभङ्गश्चेदित्यादि, तत्राहुः **भिक्षारूपेणेति** । भगवता विहितैव सा बाध्यत इत्यर्थः । लौकिकी तु विप्रैरेवेति युक्तमपराधत्वेन कथनं याच्ञाभङ्गस्येति भावः । अतो याच्ञापराणि भगवद्वचनानि लौकिकतत्परत्वान्न निरुध्यन्त इत्याहुः **न्यासभूतानित्यादि** । यद्वा । ननु

भक्तवाक्परिपालकत्वाद्भगवतः कथं बलिवाग्विरुद्धं स्त्रीषु याचनं कृतवानित्यत आहुः **ब्राह्मणानामिति**। बलिवाक्येन वर्णाश्रमधर्मत्वेनोक्ता स्नेहप्रयुक्ता च या याञ्चा सा न बाध्यते, कन्यादिविषयिणी सा लौकिकी, सापि तथा। किन्तु दैन्यप्रयुक्तैव सा बाध्यत इत्यर्थः। प्रकृते च न दैन्यप्रयुक्ता सा। 'भक्तायाः प्रसीद'न्निति वाक्यादिति भावः। अत एव तादृग्वचनैरविरोध इत्याहुर्न्यासभूतावित्यादि।

विमुखा ये त्वधोक्षज इत्यत्र। **ज्ञानेप्यात्मसाक्षात्कार** इत्यादि। इन्द्रि-
१०-२०-३९. यजन्यज्ञानस्य पुरुषोत्तमाविषयत्वं प्रदर्शयन्ति **ज्ञानपीत्यादिना**। मनोज-न्यात्मसाक्षात्कारफलकज्ञानमार्गस्यात्ममात्रपर्यवसायित्वम्। कर्ममार्गस्याधिकारिभेदेन द्वैविध्यम्। बहिर्मुखानां तु क्रियारूपे भजनम्, तेनैवादृष्टद्वारा फलसिद्धिरिति यतस्तन्मतम्। श्रुतितात्पर्यज्ञानवतां त्वलौकिके यज्ञरूपे भजनमितीन्द्रियजज्ञानकृतविषयत्वेनाधोक्षजत्वं सिद्धमित्यर्थः। भक्तिमार्गे भगवत्साक्षात्कारो 'नाहं वेदै'"र्नतु मां शक्यसे द्रष्टु'मित्यादिवाक्यैर्नेन्द्रियजन्य इति भावः। दृष्टेपि भगवति यावत्सर्वेन्द्रियैः साक्षान्नानुभूयते, न तावत्स्वास्थ्यमिति, न साक्षात्कारमात्रं फलम्। 'दर्शयन् मुहुर्मनसि स्मरं यच्छसी'ति वाक्याद् दर्शनस्याग्रेतनभोगोपयोगित्वेनाङ्गत्वम्। यथेक्षुदण्डस्य रससम्बन्धाद्भक्ष्यत्वम्, तथा भगवदानन्दलेशसम्बन्धेनान्येषां रूपाणां भजनीयत्वमित्याशयेनेक्षुदृष्टान्तः। केवलरसात्मकः स्वयमधुनैव प्रकट इतीतः पूर्वमेव ते पक्षाः कर्तव्यत्वेन स्थिताः, नत्वतः परमपीत्याहुः **अत एतादृश** इत्यादि। इति **विंशोध्यायः**।

एकविंशाध्याये। **एतद्ब्रूहि महान्काम** इत्यत्र। शुश्रूषव इत्यग्रे कथनात् सम्प्र-
१०-२१-४. त्ययेनेच्छैवोक्तेति कामपदार्थमन्यमाहुः **अभिलषितोर्थ** इति। यद्यप्यन्यद्वारा कथनेपि शुश्रूषानिवृत्तिः सम्भवति, तथापि शुश्रूषवे महां साक्षाद्भगवत्कथनलक्षणोर्थो महानिति प्रातीतिकोर्थः। वस्तुतस्तु यागभङ्गलक्षणोर्थस्तथेति हृदयम्। तथाप्यन्यभजननिवारणपूर्वकस्वभजन एव प्रभुतात्पर्यमिति पक्षान्तरमाहुः **तद्विषयिणीच्छा** चेति। स्वयागविषयिणी सेत्यर्थः।

पर्जन्यो भगवानित्यत्र। **अन्यथा तद्रेतसे**त्यादि। भगवदतिरिक्तस्यैकस्याखिलजगदुत्पत्तिस्थितिहेतुत्वं न सम्भवतीत्येतत्परोऽयं ग्रन्थः।
१०-२१-८.

इत्यद्रिगोद्विजमखमित्यत्र। वासुदेवत्वेन शुद्धसत्त्वाकारमन्तःकरणं कृत्वा कर्मोपयोगिश्रद्धासामर्थ्याद्युपयोगित्वेन तत्राविर्भूय सर्वं कारितवानित्याशयेन
१०-२१-३८. **वासुदेवप्रचोदिता** इत्युक्तम्। प्रेरणे प्रकर्षोप्ययमेव। अन्यथा न वदेत्। अग्रे च गमने गोपानां मुख्यत्वं प्रभोस्तु गौणत्वमुक्तमित्यनावेशस्तदा सूच्यत इति तदुभयतात्पर्यमाहुः **भगवदावेशेनैतदि**त्यादि। इत्येक**विंशोध्यायः**।

द्वाविंशाध्यायार्थोक्तिसन्दर्भे तद् ज्ञापयति निश्चितमिति। दृष्टार्थे-

फलककर्माविष्ठाता दृष्टानिष्टजननद्वारा स्वत्यागे सति स्वानुभावं ज्ञापयतीत्यर्थः । अदृष्टानेकसाधनवत्त्वेपि गोवर्धनात्मकदृष्टसाधनेनैव रक्षणे तात्पर्यमाहुः **उभयोर्हैतुकत्वार्थ**मिति । एतज्ज्ञापनार्थमित्यर्थः । 'तच्छेषेणोपजीवन्ती'तिवाक्यात् स्वोपजीव्यान्नजनकत्वेनेन्द्रो यष्टव्य इति व्रजराजेनोक्तं यथा, तथा भगवतापि 'वयं गोवृत्तयोऽनिशं' 'वनशैलनिवासिनश्चा'त उपजीव्यत्वाद्धेतो'र्गवादीनां मख आरभ्यता' मित्युक्तमित्युभयोर्हैतुकत्वम् । **एवं भगवता कृत**मिति । दृष्टमेवानिष्टमन्यप्रतीत्या दृष्टेनैव तद्वारणं चेत्यर्थः । अन्यथा 'गोपाये स्वात्मयोगेने'तिपदं विरुध्येत । यद्रूपेण भुक्तं तद्रूपेणैव रक्षितवानिति तत्त्वम् । **दशश्लोक्यां प्रतिवाक्यार्थोक्तौ सर्वनाशना**दिति । सर्वपुरुषार्थनाशनादित्यर्थः । तेषामेतत्सङ्ख्यावत्त्वादिति भावः ।

कृष्णं मर्त्यमित्यस्य द्वितीयार्थोक्तौ । **अथवा कृष्ण**मित्यादि । विपरीतषड्गुण-
१०-२२-३. मिति मर्त्यपदव्याख्यानम्, मर्त्यस्यानीश्वरत्वादिधर्मैनैयत्येन विपरीतषड्गुणा लक्ष्यन्ते । तथाच शङ्के गृह्यमाणेपि पीतिमारोपवत्स्वधर्मारोपं सदानन्दे कृतवन्त इति मे अप्रियं चक्रुरित्यर्थः । तत्त्वेनोपाश्रितेत्यस्यैव विवरणं **भगवत्यपी**त्यादिना कृतम् ।

अहं चैरावतं नागमित्यत्र । **अक्षयो गजो जले स्थले चे**त्यादि । अमृ-
१० २२ ७. तमथनप्रस्ताव एवोत्पन्नत्वेनामृतधर्मा अप्यस्मिन्सन्तीत्यक्षयत्वम् । पूर्वं जल एव स्थितत्वादधुना च स्थले सत्त्वात्तथेत्यर्थः ।

शिलावर्षनिपातेनेत्यस्याभासे । **अन्यद्वा कर्तव्य**मिति । अधुना स्वस्मिन्प्र-
१०-२२-१४. वेशोऽन्यशब्दार्थो ज्ञेयः ।

तत्र प्रतिविधिमित्यत्र । **योगमाये**त्यस्याभासे । **न प्रशासनन्याये**नेति ।
१०-२२-१६. 'एतस्यैवाक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत' इति श्रुत्युक्तद्धारणवदत्र तन्न सम्भवतीत्यर्थः ।

गोपाये स्वात्मयोगेनेत्यत्र । **पर्वतधारण** इत्यारभ्य **भविष्यन्ती**त्यन्तम् ।
१०-२२-१८. अत्र हि द्वयं कार्यम् आसाराद्रक्षा पर्वतधारणेन, एतेषां जीवदेहादिरक्षा च । अन्यथा पर्वतधारणेपि प्रलयकालीनमेघानां स्तनितादिभिरेतत्प्राणस्थितिर्न स्यात् । तदेतदुक्तं **पर्वतधारण** इत्यारभ्य **योग एवे**त्यन्तेन । तेनात्मयोगेन गोपाये । स्वात्मयोगेन गोपाय इति मूलार्थो विवक्षितः, अन्यथा स्वपदं न वदेत् । अथवा । स्वश्चात्मयोगश्च तयोः समाहारस्तथा । युज्यते फलमनेनेति योगः साधनं सामर्थ्यं शक्तिरिति यावत् । आत्मनः सा योगमायैवेति सैवोक्ता । एवं सति स्वेन तत्प्राणादिरक्षा स्वरूपानन्ददानेन । तदुक्तं 'क्षुत्तृड्व्यथा'मित्यनेन मूले । तथाचाद्रिधारणं तेनासाराद्रक्षेति भावः । 'तस्मान्मच्छरणं गोष्ठ'मिति वाक्योक्त्यनन्तरं ग्रासाशङ्कानिरासायाहुः **प्रथमं क्लेशसम्बन्ध** इत्यारभ्य **ततो भवे**दित्यन्तम् । नन्वीदृक्परिग्रहे नन्दादीनामन्यभजनमसम्भवि । कथञ्चित्सम्भेव

वा ततो निवर्तनमेवोचितम्, न तु यागोपदेशोऽपि । स्वरूपेणैवैतत्परिग्रहात्साधनानन्तरानपेक्षणात् । न चाधुनैवायं परिग्रह इति वाच्यम् । 'स्वगोकुलमनन्यगति'मित्यादिवाक्यैः सार्वदिकत्वात् । किञ्च, स्वस्य सर्वज्ञत्वेन व्रजपरिग्रहस्य च पूर्वसिद्धत्वेन शरणागमनप्रार्थनपर्यन्तं तूष्णींभावोनुपपन्न इति चेत्तत्राहुः **प्रथम**मित्यादि । अत्रायं भावः । अत्र परिग्रहेणैव सर्वम्, न तु सोऽप्यन्यसाधनसाध्य इति ज्ञाप्यते । एवं सति पूर्वं विपरीतसाधनवत्त्वेपि स्वपरिग्रहेणैव तन्निवर्तनोक्तौ तत्सम्पद्यते, न तु पूर्वमेव तदभावोक्तौ । अत एवेतरसाधनासाध्यत्वोक्तिपूर्वकं 'यमेवैष वृणुते तेन लभ्य' इति श्रुतिरप्याह । इदमेवोक्तं **प्रथमं क्लेशो**त्यर्थेन । यागोपदेशप्रयोजनमाहुः **शरणागमन** इत्यादि । अन्यथा भगवद्वचनादिन्द्रयागे त्यक्तेऽस्माभिः क्लेशः प्राप्त इत्यसूयैवोत्पद्येत । तथा सति सर्वो निरोधो व्यर्थः स्यात् । परिग्रहस्य स्वतःप्राबल्यज्ञापनायैतेषां लोकसाधारणी रीतिर्यत उच्यते, अतो नासूयानुत्पत्तिशङ्कापि । पूर्वं देहेन्द्रियादीनामन्यत्र विनियुक्तत्वादपि तत्सम्भवः । अत एव तादृशत्वे इन्द्रियादीनां निरोधो न सम्भवतीति स्वकर्मणि विनियुक्तवांस्तानि तद्वस्तूनि च । तथा सति पूर्वदोषापगमात्प्रभौ न दोषारोपः, तच्छरणागमने च बुद्धिरभूत् । न च स्वरूपबलेनैव परिग्रहादेतन्नैरर्थ्यमिति वाच्यम् । परिग्रहान्तःपातित्वादस्य । परिग्रहो हि तेषां तदीयस्य च वाच्यः । तेषां च परिग्रहीतृनिष्ठत्वाभावे परिग्रहस्वरूपासम्भवात् । न च शरणागमनेन परिग्रहोऽन्यथासिद्ध इति वाच्यम् । तस्यैव रक्षाहेतुत्वात् । शरणागतिवर्णनं तु भगवत्परिगृहीता भगवन्तमेवैहिके पारलौकिके चार्थे प्रार्थयन्ति, नान्यमिति भक्तिमार्गीयमर्यादाज्ञापनार्थम्, परिग्रहोऽप्यनेन सिद्ध इति ज्ञापनार्थं च । अन्यथेन्द्रापराधेऽनिष्टं दृष्ट्वा, अतःपरं त्वद्यागमेव करिष्यामोऽस्मान्रक्षेतीन्द्रमेव प्रार्थयेयुः । इदमेवोक्तं **मर्यादास्थापनाये**त्यनेन । अथवा । मादकार्थमत्तस्येतरागणनवत्परिग्रहस्वभावेनैव को वा वराक इन्द्रोऽस्माकं कस्य वा भयमिति स्मयेन प्रभुमपि चेन्न प्रार्थयेयुस्तदापि रक्षणीया एव स्युः, परन्त्वेतद्भावानुसारेणैव । तथा सति गोवर्धनोद्धरणं न स्यात् । वृष्टिनाश एव कर्तव्यः स्यात् । एवं सति गोवर्धनोद्धरणेऽन्यापेक्षाराहित्यपूर्वकप्रियेक्षणकेवलभगवदीयत्वमाहात्म्यज्ञानगोविन्दनामधारणाभिषेकादिलीला यास्तासामननुभवोऽसम्भवश्च स्यात्, एतज्जनितनिरोधश्च न स्यात् । तथा सत्येतन्निरोधार्थमेव सर्वकरणमिति नियमरूपा या मर्यादा सा भज्येत अतस्तद्रक्षणाय तथेत्यर्थः । किञ्च, अस्य साधनप्रकरणत्वात् साधनमार्गानुसारेण या लीला कृता, सैवात्रोच्यते । अतोऽन्ययागनिषेधस्वयागकारणशरणागमनतदनन्तररक्षणादिकथनं च युक्तमिति भावः । विपक्षे बाधकमाहुः **अन्यथेति** । यद्येतान्सर्वतः पृथक्कृत्यात्मसात् करिष्यामीतीच्छयैव यागभङ्गादिकं न कृतं स्यात्, तदेन्द्रार्थमुद्दिष्टत्वेन तच्छेषीभूतमन्नं नोरीकृतं स्यात् । अन्येनाप्यन्नेन गोसवसम्भवात् । तथा सति गोकुले तदीयांशः स्थापित एव भवेत् । अत एव प्रभुणोक्तं 'य इन्द्रयागसम्भारास्तैरेवायं मखः साध्यताम्, नान्यै'रिति । अतः केवलात्मसात्क-

रणेनाग्रे केवलस्वरूपानन्ददानार्थमेव यागोपदेश इत्याहुरतो **यागोपदेश** इत्यादिना । किञ्च, एवमनन्यभक्तिमार्गः सिध्यति, अन्यथान्यसंवलितैव सा स्यात् । यावति कृते भक्ताः कालकर्मादिभ्यो मुक्ताः सन्तः केवलं स्वीया भवन्ति, तावति क्रियमाणे सति यदानुपङ्गिकमिन्द्रमानभङ्गादिकं भवति, तद्भवतु नामेत्यक्लिष्टकर्मत्वं च स्यादित्याहु**र्भक्तिमार्ग** इति ।

इत्युक्त्वैकेन हस्तेनेत्यस्याभासे । **विश्वासार्थ**मित्यादि । सार्धेनाद्येन गोपानां रक्षिष्यत्येवेति विश्वास उत्पादितः । स्ववचनकृतिहेतुकत्वज्ञाने स-
१०-२२-१९. त्यवश्यं तत्प्रतिकृतिर्भवतीति तज्ज्ञापनायापतो विलाद्युक्तम् । यतो वचनेन यागे कृते प्रत्यक्षं देवो दृष्टः । तदुक्तं **'कृष्णस्त्वन्यतम'**मित्यनेन । इन्द्रदमने क्रियमाणे 'त्विन्द्रस्य युज्यः सखे'ति श्रुतिविरोधो भवेत् । तत्र श्रीमदहरणोक्त्या हितकर्तृत्वेन स परिहृतः । आधिदैविकस्य सर्वत्रैव भगवद्रूपत्वात् तद्युक्तस्य च मदासम्भवादस्य च तद्युक्तत्वात् तद्रहितत्वेन मानभङ्ग आधिदैविकसम्मत एवेति ज्ञापनायोक्तं **नहि मद्भावयुक्तानामि**ति । अन्यथा मद्भावयुक्तानामिति न वदेदिति भावः । **गोपाये स्वात्मयोगेने**त्यनेनोक्तरीत्या तयोः प्रबोधनम् । आदिपदेन गोवर्धनस्थवृक्षपक्ष्यादय उच्यन्ते । तेषामावरणाभावान्नाशस्य चानिष्टत्वात् तेष्वपि स्वयोगो ज्ञाप्यते । अन्यथेत्युक्त्वा दधारेति न वदेत् । वचनं विनापि गोवर्धनोद्धरणेन रक्षासम्भवादिति भावः । **इति द्वाविंशोऽध्यायः ।**

त्रयोविंशाध्यायार्थोक्तौ । **अज्ञानमिति** । **निरुद्धानामज्ञानादि कृष्णगं** कृष्णविषयकं निवार्यत इत्यर्थः । प्रयोजनमाहुः **समत्वायेति** । गोवर्ध-
१०-२३-०. नोद्धरणेन कृतो यो निरोधः स तु सर्वेषां समान इति तज्ज्ञापनाय तथेत्यर्थः । **प्राकृतत्वेनेति** । स्वनिष्ठो हेतुः । **जातस्तादृश एवेति** । तादृश एव, अप्राकृत एव, प्रकट इति । अत्र भगवत्त्वप्राकृतत्वस्वसम्बन्धित्वयोर्विरोधाभावान्न सन्देह इति परः सिद्धान्तस्तथा, उच्यत इत्यर्थः । गर्गवाक्यानि परे सिद्धान्ते । **तथा,** हेतव इत्यर्थः । **तज्ज्ञानमिति** । भगवत्स्वरूपज्ञानं फलमित्यर्थः ।

एवंविधानीत्यस्य विवरणे । **हेत्वभावे नैवैतत्कार्यमिति** । अतिप्राकृतबुद्धितुल्यत्वज्ञापनायैवमुक्तमिति ज्ञेयम् । तेन भगवन्माहात्म्यं सूचितं भवति ।
१०-२३-१. यद्वा, हेतुत्वेन प्रतीयमानो यः प्रभुस्तदन्योन्याभाववता तदतिरिक्तेनेत्यर्थः ।

श्रूयतां मे वचः इत्यत्र । **पूर्वपक्षसिद्धान्तयोर्व्यत्यास** इति । नन्दस्यात्मनो देहाजातत्वाभावेन तथात्वं सिद्धान्तो भवितुमर्हति यद्यपि, तथाप्येतादृश
१०-२३-१५. एव स्वात्मज इति भगवता लीलार्थं तद्बुद्धिः सम्पादितेति तथात्वम् । न चास्या भ्रमरूपत्वेनास्य सिद्धान्ताभासत्वम्, नतु वस्तुतस्तथात्वमिति वाच्यम् । हेत्वसिद्धेः । भगवता तथैव लीलार्थमङ्गीकारात् । नित्यस्यैवंभावोनुपपन्न इत्याशङ्कानिरासाय तादृशस्य तथात्वे हेतुमाहु**रद्भुतकर्मेतीति** । लौकिकोपपत्तिरहितं ह्यद्भुतम् । तथा चात्र

तद्राहित्यं भूषणम्, नतु दूषणम् । अद्भुतकर्मत्वलक्षणस्वरूपसम्पादकत्वात् । अत एव 'तस्मान्नन्दात्मजोऽयं त' इति गर्गोक्तिरपीति भावः ।

वर्णास्त्रय इत्यत्र । **वाक्यान्यष्टश्लोकैरुक्तानी**ति नामकरणसमये गर्गेण छन्दो-
१०-२३-१६. ननुरोधेनैव वाक्यान्युक्तानि, तथैव नन्दैरपि, तान्येव व्यासेन श्लोकैरुपनिब-
द्धानीति तथोक्तम् । यद्यप्यासन्नित्यादीनि तानि सप्तैव, तथापि मन्ये नारायणस्यांशमित्यादिकं गर्गवाक्यफलितार्थनिरूपकत्वेन तद्रूपमेवेत्याशयेनाष्टसङ्ख्योक्ता ।

इति त्रयोविंशोऽध्यायः ।

चतुर्विंशाध्यायतात्पर्योक्तौ । गोरक्षा चेदित्यारभ्य जायत इत्यन्तस्यायं
१०-२४-०. भावः । साजात्यमात्रेणाप्यखिललौकिकगवाधिदैविकगामिनी पालनलीला पुरु-
षोत्तमातिरिक्तस्य न सम्भवतीति तत्त्वप्रमापिका तादृग्रूपसुरभिप्रपत्तिः । तदुक्तं 'भवताऽलोकनाथेन सनाथा वयमच्युत' इति सुरभ्या । लोकभिन्ना अलोका अलौकिक्य इति यावत् । तासां नाथेन पालनकर्त्रा त्वया वयमपि सनाथाः पालिता भवाम इत्यर्थः । लीलास्थपदार्थमात्र इयं व्यवस्थेति ज्ञापनायालोकेति सामान्योक्तिः, अन्यथोक्तरीत्यालोकनाथेति वदेत् । तत्र हेतु**रच्युते**ति । धर्मतोऽपि च्युतिराहित्येन पालनलक्षणो धर्मो यद्यस्मद्गामी न स्याद्गोत्वाविशेषात् तदास्मदंशे स च्युतः स्यादित्यर्थः । **तदेय**मिति । लीलापदं भावप्रधानम् । भगवल्लीलाप्रमाणमिति समस्तं पदम् । तथा चेयमुच्यमाना लीला भगवल्लीलात्वे प्रमाणं तथेत्यर्थः । ननु हेतुवादसिद्धत्वेनेन्द्रयागश्चेद्भग्नः, तदा प्रकृतेपि 'भवता लोकनाथेने'त्यादिना रक्षकत्वादिहेतूक्तिपूर्वक एवेन्द्राभिषेकः कृत इति को विशेष इत्यत आहुः **अतो हेतूक्तिरपी**ति । यतो यागभङ्गकरणप्राप्तसदोषत्वशङ्कापरिहाराय तद्भङ्गतदपूर्वकारणपालनानां केवललीलात्वं ज्ञापनीयम्[१] । तच्चाधिदैविकगामित्वनिरूपणेन भवतीति तद्रूपमेव । अतोऽत्र हेतूक्तिरपि । एषा लीलारूपैवेत्यर्थः । अत एव 'भवाय भवे'ति 'कृष्णेऽभिषिक्त एतानी'त्यादिना सत्फला वर्ण्यत इत्याहुः **सत्फले**ति । किञ्च, पारम्पर्यागतमर्यादाभङ्गोऽप्येवं न जात इत्याहु**रिन्द्रयागश्चे**ति । अग्रेपि प्रतिवर्षं गोसवं करिष्यन्तीति **भविते**त्युक्तम् । एतेन लीलासम्बन्धिलोकपालादयोपि न भगवदतिरिक्ता इति ज्ञापितमिति दिक् ।

गोलोकादाव्रजदित्यत्र । **न हि प्राकृतैः स्ववंशीयै**रिति । प्रकृतं लीला-
१०-२४-१. करणं तत्सम्बन्धिभिरित्यर्थः । तथा सति लीलारसविरोधः स्यादिति भावः ।
इन्द्रस्तुत्याभासे दशभिः प्राणश्लोकैरिति । भगवदपराधैराधिदैविकसर्वतिरो-
१०-२४-३. धाने तादृशाः प्राणा अपि तिरोहिता इत्ययं मृत इवाधुनेत्याधिदैविकतत्प्राप्त्या स्वजीवनसिद्ध्यर्थं तत्समानसङ्ख्याकैः श्लोकैः स्तुतिमाहेति सङ्ख्यातात्पर्यमु-

[१] केवलपुरुषोत्तमलीलात्व देवकार्यकृतिर्व्यूहकार्यत्वादित्यर्थः ।

त्तम् । ननु 'गोवर्धने धृते शैल' इतिवाक्यात् क्रियाशक्त्याविर्भावं कृत्वा यथायं बोधितस्तथा पूर्वमेव ज्ञानशक्तिमेवाविर्भाव्य कुतस्तथा न कृतवान्, तदा प्रभुमाहात्म्यज्ञानान्नापराधं कुर्यात्, अधुनाग्रेऽपि चेत्यत आहुः **क्रियाशक्तीति** । इन्द्रादीनां बाहुरूपत्वादिति भावः । ननु प्रयोजनमस्तीति कुतस्तथा नाकरोदित्याशङ्क्य तदनधिकारमाहुः **बाह्यश्चायमिति** । हेतुककर्मसम्बधित्वेन वेदबाह्य इत्यर्थः । अत एव गवादिद्रोहार्थमाज्ञप्तवानिति भावः । एतदेवाहुस्तथाविध इति । अतःपरं क्रियाशक्तिर्यावत्प्रयोजनार्थं स्वस्मिन्यावती च दत्तास्ति तदुपयोगिज्ञानमपि दत्तमस्तीति भगवदपराधेन चतुर्विधपुरुषार्थानां भगवद्दत्तगुणानां च तिरोधानं ज्ञात्वा तत्सिद्ध्यर्थं स्तौतीति तावत्सङ्ख्याकैः श्लोकैः स्तुत्वा ज्ञाप्यत इत्याहुः **पुरुषार्थप्रसिद्ध्यर्थमिति** ।

स्वच्छन्दोपात्तदेहायेत्यत्र । नटवदेव रूपमित्यादिग्रन्थः पूर्वोक्तरूपेन्द्रस्तुत-
१०-२४-११. मिप्रायेणेति ज्ञेयम् । **इति चतुर्विंशोध्यायः** ।

पञ्चविंशेध्याये तात्पर्योक्तौ । अन्यथा नन्दविज्ञानमिति । यदि वरुणैश्वर्य-तद्दासस्वानयनलक्षणं पुरुषसम्बन्धि यत्परं माहात्म्यं पुरुषोत्तमत्वेन ज्ञानजनकमिति यावत् । तद्दर्शनं न स्यात्तदा तत्तदेव पूर्वोक्तं नारायणांशत्वेन देवोत्तमत्वेन यज्ज्ञानम्, वस्तुतस्तु पुरुषोत्तमविषयकमेवं ज्ञान भक्तिमार्गविरुद्धं, पर्यवसायि पर्यवसानशीलं स्यादित्यर्थः । तथा सत्यग्रे भजनानन्दानुभवो न स्यात्, तद्विरुद्धज्ञानवत्त्वाद्, अतो निरवधिमाहात्म्यवत्त्वेन पुरुषोत्तमत्वेन ज्ञानं जननीयम्, भक्तिमार्गविरुद्धज्ञानवत्त्वेन निग्रहश्च कार्यः । वरुणद्वारा, भगवानुभयं कारितवानिति वरुणं सेवकत्वेन प्रभुर्मनुत इत्यर्थः ।

नमस्तुभ्यं भगवत इत्यत्र । विवादे सत्स्वित्यादि । ननु 'यावज्जीवमग्निहोत्रं जुहुया'दित्यादिकर्मकाण्डेन 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' 'यामिमां
१० २५-६. पुष्पितां वाच'मित्यादिना च विरोधात् कथं तत्तदुपास्यानां न नमस्तेत्या-शङ्क्य तत्र विषयव्यवस्थामाहुः **विवाद** इति । विषयस्य विवादविषयस्येत्यर्थः । देहाद्यध्यास-कृताधिकारकत्वेनाज्ञानमूलकत्वेन कर्मणो जघन्यत्वात् 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः, न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति प्रभुवचनाद्भक्तिमार्गान्मार्गान्तरस्य दौर्बल्यम् । तत्रोपास्यरूपाणां भक्तिमार्गसेव्यपुरुषोत्तमरूपाद् दौर्बल्यमिति भावः । भक्ति-मार्गाज्ञानदशायामेव कार्यता तेषां दौर्बल्यम् । अत एव 'मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायत' इति भगवतोक्तम् । ननु चार्वाकादिभिरीश्वरो नाङ्गीक्रियत इतीश्वरोऽपि न सर्वसिद्धान्तसिद्धः । किञ्च, ईश्वरवादिनामपीदं स्वरूपं शुद्धं ब्रह्मरूपमिति न सर्वेषां सम्मतमित्यत आहुः **सत्स्विति** । मोहकशास्त्रजमोहरहिताः सन्तः, तेषु परस्परं यस्मि-न्विषये विवादस्तत्र तथेत्यर्थः । अत एवाग्रे श्रुत्यादिकमेवोक्तम् ।

न यत्र श्रूयते मायेत्यत्र । लोकानामित्यादि । मायया मोहिता एव तथा कल्पयन्तीति तथा । कार्यो मोहः, कारणं सा । एतदेवाहुः **कार्यकारणरूपिणीति** ।

आनीतोऽयं तव पितेत्यत्रेदंप्रयोगं विनापि चारितार्थ्ये तत्प्रयोगात् तत्ता-
१०-२५-७. त्पर्यमुक्तं **वेपमानः पुरो वर्तत** इत्यनेन। तत्र भगवदैश्वर्यदर्शनज-
सात्त्विकभावात्तथेति ज्ञेयम्।

नन्दस्त्वतीन्द्रियमित्यस्याभासे। यथैकं वचनमिति। गोसवकर्तव्यताबोधकं
१०-२५-९. वचनं व्रजानन्यतेन्द्रमानभङ्गगोवर्धनोद्धरणव्रजजनाप्यायनतन्माहात्म्यज्ञाने-
न्द्रप्रणतिगोविन्दनामधारणाद्यनेककार्यं करोति तथेत्यर्थः।

ते तु ब्रह्महृदमित्यस्याभासे। विलय एवाभूदिति। अयमर्थः। लोकस्याक्षरा-
१०-२५-१६. त्मकत्वेनानन्दरूपस्य सर्वत्राविर्भावेन सर्वेषां देहेन्द्रियप्राणान्तःकरणात्म-
स्वप्याविर्भावे प्रकटाग्निसम्बन्धात् काष्ठान्तर्गताग्निप्रादुर्भावे तस्याप्यग्निरूपता-
पत्त्या काष्ठताविलयवदेतद्देहादीनामप्यानन्दतापत्त्या देहादिभावविलयोऽभूदिति। **प्रत्या-
पत्त्यर्थमिति**। पूर्वभावसम्पत्त्यर्थमित्यर्थः। **तदात्मकांशस्येति**। सर्वत्राविर्भावात् त-
त्तद्देहादिष्वप्याविर्भूतांशस्येत्यर्थः। **काष्ठाग्निवदिति**। काष्ठान्तर्गताग्निप्राकट्यार्थं योऽन्योऽ-
ग्निस्तत्र प्रविष्टस्तस्यापि तदतिरोधाने तिरोधानं न यथा, तथेत्यर्थः। **अर्धज्वलितानाम्-
मिति**। अत्रैवं ज्ञेयम्। व्रजवासिमनोरथपूर्त्यर्थं ब्रह्मानन्दाद्भजनानन्दे तारतम्यज्ञापनार्थं च
स्वलोकस्य हि प्रदर्शनम्। तारतम्यज्ञानं चाग्रे नैतत्स्मृतिं विना संभवति। सा चाधुनैत-
दनुभवं विना तथेत्यधुनैतदानन्दानुभवोऽपि वाच्यः। स च स्वस्मिंस्तद्भिन्नत्वज्ञानं विना-
नुपपन्नः। एवं सत्यानन्दात्मकत्वं स्वस्य भेदज्ञानपूर्वकमक्षरानन्दानुभवश्चेत्यर्धज्वलित-
त्वम्। पुनः काष्ठता तु पूर्वोक्तदेहादिष्वाविर्भूतलोकस्य तिरोधानेन तत्सम्बन्धजनिता-
नन्दात्मकत्वभानतिरोधानेन च यथापूर्वं स्थितिः। एवं करणस्यावश्यकतामाहुः **अन्यथे-
ति**। तद्धेतुमाहुस्तच्चेति। अत्रायं भावः। ज्वलितांशस्य पुनः काष्ठतावदानन्दात्मकता-
मापन्नस्य देहादेः पुनर्जडभावो ह्यशक्यः। प्रकृते तु लीलोपयोगित्वात्सर्वेषां देहादिभावे
सत्येव च तथात्वसम्भवाद्देहादिभावः प्रकृतिः, मुक्त्यवस्था विकृतिरेव। एवं सति विकृतिम-
पास्य प्रकृतिसम्पादकमेतादृशानां वेदब्रह्मैव भवितुमर्हति। कार्यस्यामर्यादत्वादेतदपि न
मर्यादामध्यपाति तथा भवितुमर्हत्यतो यथा हृदो नद्यन्तर्गत एव प्रवाहाद्भिन्नः सन् सदा-
तिनिर्मलः स्ववन्मरन्दारविन्दोदयहेतुः सततमतिगभीरतया स्वान्तःपतितपदार्थपूरणपटुस्तथा
वेदान्तःपात्येव मर्यादामार्गीयाद्भिन्नं सद्ब्रह्मत्वेन निर्दोषभजनानन्दानुभवहेतुर्विचित्रभावज-
नकं पुष्टिमार्गीयमेवेति ज्ञापनाय मूले वेदस्य ब्रह्मत्वं हृदत्वं चोक्तम्। एतदेवोक्तं **तद्भि-
तस्य जलात्मकमित्य**नेन। न चाक्षरात्मकत्वेन लोकस्य तदानन्दवाचकं ब्रह्महृदपदमिति
वाच्यम्। ब्रह्मानन्दस्य महत्त्वेन हृदस्याल्पत्वेन तत्त्वोक्त्यनुपपत्तेः। आनन्दपदं हित्वा
हृदपदोक्तावश्यं तात्पर्यं वाच्यम्। तत्तत्करूपमेव संभवति। एतेनैवाक्षरपरत्वं ब्रह्मप-

१. देहादिभावप्रकृतिप्राप्त्या भजनानन्दानुभवरूपमेत्यर्थः।

दस्य निरस्तम् । तत्त्वस्य पूर्वमेवोक्तेश्च । मध्ये शब्दब्रह्मयोजनायां हेतुमग्रे वक्ष्यन्ति **प्रमाणतो ज्ञान**मित्यादिना । एवं सत्यत्र हृदस्वमज्जनोक्तिभ्यां जलरूपतापि शब्दब्रह्मणोस्तीति मन्तव्यम् । तदाहुरत **एवे**ति । एतस्यापि व्यापकत्वात् क्वचिद् गोकुलनिकटे प्रकटीकृत्येत्यर्थः । एवं कृतेरावश्यकतामाहुः **तत्कार्यमिद**मिति । एतादृशानां पूर्वभावसम्पादनलक्षण कार्यं प्रमाणतो ज्ञान च तदेकसाध्यमित्यर्थः । अत्रोपपत्तिमाहुरग्रे चेति । 'यत्राक्रूरोध्यगात् पुरे'त्यनेन । तत्र हि शब्दब्रह्मात्मके जले भगवत्स्वरूप स ज्ञातवानिति । मज्जनपदार्थमाहुः **शब्दब्रह्मात्मका एव जाताः** । तत्र हेतुरुत्तमाधिकारिण इति । नन्वस्मादप्युद्धरणस्यावश्यकत्वे पूर्वस्मादेव किमिति नोद्धृत्य प्रकृतिभाव सम्पादितवानित्याशङ्क्य तत्र हेतुमाहुः **क्रमश्चाय**मित्यादिना । स्वकृतमर्यादास्थापनार्थं तथाकृतिरित्यर्थः । तमेवाहुः **परब्रह्मे**ति । परब्रह्मणा पूर्वं स्वस्मिन् स्थित पश्चात् स्वस्माद्विभक्त यद्वस्तु तच्छब्दब्रह्मात्मक भवति । ततस्तेन तथा कृत जगद्रूप भवतीत्यर्थः । इदमत्राकूतम् । साक्षाल्लीलोपयोगि जगद्धि सच्चिदानन्दात्मक स्वस्मिन् स्थित क्रीडेच्छया स्वस्माद्विभक्त करोति प्रभुः । यतोन्तःस्थित न बहिःकार्यक्षमम् । तच्चानन्दस्वरूपाद्वियुक्त सत् स्वरूपमलभमानमिव न किञ्चित्कार्यक्षम भवति । तदा प्रवृत्तिनिवृत्तिभ्यामलौकिकीभ्यामलौकिकार्थसम्पादनक्षमं शब्दब्रह्मेति तदात्मकतायां लीलोपयोगि प्रवृत्तिनिवृत्तिक्षम भविष्यतीति ज्ञात्वा तथा सम्पाद्योक्तसामर्थ्ये सम्पन्ने तस्य प्रमाणरूपत्वाल्लीलायां प्रवृत्तिनिवृत्ती स्नेहाधीने इति न तदुपयोग इति तस्मादप्युद्धृता इति । एतदेवोक्तमन्यथा **प्रमाणगृहीता** इत्यादिना । लीला हि स्वतन्त्रा । एते प्रमाणाधीनत्वे विहितमेव कर्म कुर्युर्नेतरदपीति तत्रानुपयुक्ता भवेयुरित्यर्थः । यद्वा । प्रमाणमार्गगृहीतत्व प्रमाणैकवशचित्तत्वम् । तच्च पुष्टिलीलाप्रवेशानधिकाररूपमेवेति तथेत्यर्थः । **तदार्द्रनयना** इति । जले निमग्नानामार्द्रे ते भवत एव । प्रकृते च तस्य शब्दब्रह्मात्मकत्वेन यादृश श्रुतिसिद्ध भगवत्स्वरूप तादृशमेव दृष्ट्वापि पश्यन्तीत्येतदेवार्द्रत्वम् । तदानन्दाश्रुभिरपि तथात्व ज्ञेयम् । सर्वस्यापि प्रघट्टकस्य तात्पर्यरूप गूढाभिसन्धिमुद्घाटयन्ति **ब्रह्मानन्दा**दिति ।

यद्वा । **ते तु ब्रह्महदं नीता** इत्यस्याभासः । **ततो दर्शनानन्तर**मित्यादि । अत्राय भावः । अक्षरानन्दाल्लीलात्मकानन्दस्याधिकत्वेप्येतेषां तद्रूपत्वेन तन्मध्यपातित्वेप्यक्षरानन्दस्येयदवध्यननुभवेन तारतम्याज्ञानाद् भगवता च लोकमध्य एव लीलाकरणात् स्वस्येतरलोकसाधारण्य मन्यमानानां स मनोरथोभूत् । तत्पूर्त्यर्थं स्वलीलात्मकत्वांश हस्तपिहितमिव कृत्वा साधारणीं रीतिं प्रकटितवान् । तस्यां तु सच्चित्प्राकट्यमेव जीवेषु, नानन्दांशस्य । तत्प्राकट्ये च ब्रह्मभावः सम्पद्यते । स चाक्षरानन्दांशभूतः । अक्षरानन्दाविर्भावे च जीवस्वरूपात्मकानन्दोपि तथाभूत् । बाह्याग्निसम्बन्धे दार्वन्तःस्थवह्निरिव । इदमेव विलयशब्देनोच्यते । अन्तरार्द्रदारुणो यथा बाह्यांश एवाग्नित्वम्, तथैतेष्वग्रे लीला-

याश्रिकीर्पितत्वेन तदात्मकत्वमार्द्रतास्थानीयमतो नाक्षरानन्दात्मकत्वसम्पत्तिः । बाह्यांशस्थानीयो जीवत्वांश एव । इदमेवार्धज्वलितत्वम् । अक्षरानन्दानुभवार्थं लीलात्मकत्वं यल्लीलात्मककार्यानुन्मुखं कृतवानासीत् साधारणीं च रीतिमप्रकटयत्तद्दूरीकृत्य पुनर्लीलाकार्योन्मुखत्वसम्पादनमेव काष्ठतासम्पादनम् । लोके ज्वलितांशस्य काष्ठता त्वशक्या कर्तुम्, अतस्तादृशमग्नितिरोधायकमपेक्षितं येन तत्तिरोधानं पुनः पूर्वरूपता च सम्पद्यते । तादृशं शब्दब्रह्मैव । यतो देहाद्यध्यासवत एव विषयीकृत्य देहधर्मरूपवर्णाश्रमधर्मान् कर्मज्ञानोपासनारूपान्निरूपयति । तत्सम्बन्धेऽक्षरानन्दाविर्भावाविर्भूतजीवस्वरूपात्मकानन्दतिरोभावेन जीवभावः सम्पद्यते । स चात्र पूर्ववल्लीलोपयोगित्वमेव । मूले ब्रह्मणो ह्रदत्वोक्त्या तस्य च जलरूपत्वेनैतस्य जलात्मकत्वमुच्यते । जलनिर्वाप्योऽग्निरिति तदपनेयस्याक्षरात्मकत्वस्याग्नित्वमुच्यते । अतः क्वचिद्गोकुलनिकट एव शब्दब्रह्म जलात्मकं प्रकटितवान् । अक्षरात्मकतातिरोधानमेव तत्कार्यम् । उक्तेऽर्थे प्रमाणमाहुरग्रे च **वक्ष्यतीति** । 'यत्राक्रूरोऽध्यगात्पुरे'ति शेषः । तस्य जलमध्य एव तदवगमादेतद्वचनेन तदभेदोक्त्या ह्रदत्वोक्त्या च जलरूपत्वं शब्दब्रह्मणो निःप्रत्यूहं मन्तव्यमिति भावः । सर्वांशेन तत्सम्बन्धज्ञापनार्था स्नानोक्तिः । **शब्दात्मका एव जाता** इति । ह्रदनयनोक्त्यैव तत्सम्बन्धप्राप्तावपि मज्जनोक्तिस्तदात्मकत्वमेव तस्यार्थ इति भावः । एवं करणे हेतुमाहुः **क्रमश्चायमिति** । पुष्टिमार्गप्रवेशनक्रम इत्यर्थः । शब्दब्रह्मणः सकाशात्परत्वेनाक्षरब्रह्मैव परब्रह्मशब्देनोच्यते । तथा च 'मुक्तोपसृप्यव्यपदेशादा'दौ ब्रह्मभावाद्वैकुण्ठाद्वा पृथक्कृत्वा 'न स पुनरावर्तते' इत्यादिवाक्यैस्तादृशानां पुनर्देहादिसम्बन्धस्य मर्यादाश्रुतिविरुद्धत्वात्, ततोपि पृथक्कृत्वा पुष्टिलीलात्मकजगत्त्वसम्पादनमित्यर्थः । **अत एवेति** । पुरुषोत्तमस्वरूपं साक्षाद्वक्तुमशक्तं कार्यद्वारा स्वानुभवज्ञापनद्वारा वा शक्तमित्यर्थः । यथा चैतत्तथा 'मनोरथान्तं श्रुतयो यथा ययु'रिति दृष्टान्तव्याख्यानविवरणे प्रपञ्चयिष्यते । **चकारादित्यादि** । वेदास्तु मर्यादानिरूपकाः । ब्रह्मानन्दनिमग्नानां ततः पृथक्करणं न तत्सम्मतम् । अतः श्रीकृष्णाज्ञारूपपुष्टिश्रुतिसम्मत्या पुष्टिलीलापरिगृहीता नास्मद्विषयाः, किन्तु मर्यादामार्गीया एवेति स्वस्माद्भिन्नाः कृताः । तदेतदुक्तं **वेदैरपि भगवदाज्ञयोद्धृता** इति । एतस्यावश्यकत्वायाहुरन्यथेति । मर्यादामार्गीयत्वे पुष्ट्यप्रवेशः स्यादित्यर्थः । **यतस्तदार्द्रनयना** इति । 'नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृता' इत्यनुपदमेव वक्ष्यमाणत्वात्तदानन्दाश्रुभिस्तथेत्यर्थः । अथवा । अग्निमपदैनेतपां प्रमाणतो ज्ञानकरणार्थं लोकं प्रदर्शितवानिति वक्ष्यमाणत्वाल्लोकदर्शनेन माहात्म्यज्ञानपूर्वकः स्नेह आर्द्रनयनत्वोक्त्या सूच्यते ।

नन्वेवं व्याकृतौ को हेतुः? यथाश्रुतव्याकृतेरपि साधीयसीत्वेन प्रतीयमानत्वात् । तथाहि । अतिगभीरत्वेन शुद्धत्वेन तापहारकत्वेन ब्रह्मानन्द एव ब्रह्मह्रदपदेनोच्यते । यथा ह्रदे मग्नो बाह्यमर्थं न जानाति, तथा तदानन्दभरेण देहाद्यनुस-

न्धानरहिता जाता इति ज्ञापनाय मज्जनोक्तिः । ततः कृष्णेन पूर्णानन्देन ततो गणितानन्दात्पृथक्कृताः देहाद्यनुसन्धानयुताः कृताः । तदा तल्लोकं ददृशुः । अत एव ब्रह्मण इति व्यस्तं पदमुक्तम् । दर्शनक्रियायाः पूर्वमसम्भवात् । एवं साधारणानां व्यवस्थामुक्त्वा श्रीनन्दादीनां विशेषत आह **नन्दाद्य** इति । किञ्च, 'दर्शयामासे'ति पूर्वं भगवत्कार्यमुक्त्वैतत्कर्तृकदर्शनं 'ददृशु'रित्यनेनोक्तम् । एवं सति तावत्पर्यन्तमेकवाक्यतैवोचिता, न तु वाक्यभेद इति चेत् । स्यादेतदेव यदि दर्शयामासेत्युक्त्वा विषयस्वरूपं चोक्त्वानुपदमेव ददृशुरित्युक्तं स्यात् । उच्यते च ब्रह्महृदप्रापणं तत्र मज्जनं तत उद्धृतिश्चेति क्रियान्तरसमुदायः । तत्रापि तुशब्देन पूर्वार्थव्यवच्छेदपूर्वकम् । त्वदुक्तरीत्या तु दर्शनात्पूर्वमेव तदानन्दे मज्जनमुक्तं भवति, तच्च नोपपद्यते, हेत्वभावात् । किञ्च, दर्शयामासेत्यनेनैवैतद्दर्शनस्य प्राप्तेस्त्वदुक्तरीत्या पुनस्तस्यैव दर्शनं ददृशुरित्यनेन न वदेत् । तस्मादाचार्योक्त एव ग्रन्थार्थ इति ज्ञेयम् । **पञ्चविंशत्यध्यायविवरणं समाप्तम् ॥**

इति साधनप्रकरणम् ।

फलप्रकरणम् ।

षड्विंशाध्याये प्रकरणार्थोक्तौ । ब्रह्मानन्दात् समुद्धृत्येति । ननु सर्वसमर्थत्वेन ब्रह्मानन्दवत्स्वगृहस्थिताभ्य एव स्वामिनीभ्यो भजनानन्दं कुतो
१०२६०. नादात्, लोकवेदत्याजनपूर्वकं विवक्षितरीत्या कुतो दत्तवानित्यत आहुर्ब्रह्मानन्दादिति । तथैवैतद्दाने एतस्यापि ब्रह्मानन्दमध्यपातित्वेन तत उद्धृतेर्वैयर्थ्यं स्यात्, भजनानन्दस्वरूपं चैतादृशमेवेत्येवंरूपानन्ददाने तददत्तमेव च स्यादिति भाव. । ननु स्त्रीभ्य एवैतद्दाने को हेतुः । तत्रापि पूर्वमन्यविवाहितासु । कुमारीष्वतथात्वेऽपि भगवता सम निवाहाभावात्तन्न्याय एव । अत एव वरदानानन्तरमपि 'लब्धकामा कुमारिका' इत्येवोक्तमित्याशङ्क्य तत्र हेतुमाहुः **लौकिकस्त्रीष्विति** । भजनानन्दो हि स्वरूपात्मकः । तच्च 'रसो वै स' इत्यादिश्रुतिभी रसरूपम् । स च यादृक्स्वशास्त्रसिद्धस्तादृगेव । तत्र च स्वाविवाहितायामेव मुख्यो रस इति निरूपितम् । अतो लोकसम्बन्धिन्यो लौकिन्यो भगवदतिरिक्तलोके विवाहलक्षणसम्बन्धवत्य इति यावत् । एतादृशीषु सम्यक् सिद्धो भवति । तत एतत्कथाश्रवणेन तद्भावोदये पुरुषेऽपि स रसो भवेत्, नान्यथेति स्त्रीष्वेव तद्दानमित्यर्थः । **सिद्ध** इतिपदेनैतद्रसस्वरूपसिद्धिश्चेत्पूर्वं स्यात्तदान्यत्रापि तत्प्राप्ति. स्यात् । सा चैतास्वेव सम्भवतीति तथेति ज्ञाप्यते ।

किञ्च । लक्ष्मीतुल्यतायां हि भगवद्रमणमिति मर्यादा । सा च ब्रह्मानन्दरूपा । तथा च पूर्वाध्याये ब्रह्मभावोक्त्या तद्रूपत्वमुक्तं जातमित्युक्तमर्यादापि सपन्नेतीतोऽप्यत्र रमणमित्याहुः **स्वानन्दानुभवार्थमिति** । यद्यपि स्वामिनीष्वेतावता न कोऽपि विशेष., तथा

---

१. आनन्दादान इति पाठ ।

'प्यधिकं तत्रानुप्रविष्टं नतु तद्धानि'रिति न्यायोत्रापिशब्देन ज्ञाप्यते । तथा च स्वपदस्य स्वामिनीवाचकस्यानुभवपदेन समं सम्बन्धो ज्ञेयः । आनन्दपदं भजनानन्दपरम् । यद्वा । बलदेवे स्वधर्मान्निरूपयता भगवता 'गोप्योन्तरेण भुजयोरपि यत्स्पृहा श्री'रितिवाक्ये श्रियोपि स्पृहानिरूपणेन तस्या अपि दुर्लभो यो रसस्तं प्राप्य गोप्यो धन्या इति व्रजस्त्रीष्वेव स्वानन्दानुभवयोग्यता निरूपिता, नान्येष्वन्यासु वेत्यर्थः । तथा च तत्रैवैतदधिकारवत्त्वात्तथेतिभावः। यद्वा । 'हेमन्ते प्रथमे मासी'त्यत्र तेषां प्रसादरूपा शक्तिः स्त्री भवतीत्यत्र या शक्तिरुक्ता तत्प्रवेशो यत्र, तत्र प्रभुसम्बन्धयोग्यता, स चैतास्वेव सम्पन्न इति पूर्वं निरूपितमित्यर्थः। एवं सत्येतत्प्रवेशो यत्र पुरुषेपि भविष्यति, तत्रैवंभावो भविष्यतीत्याशयेनाहुः **तद्द्वारेति** । तासामनुग्रहद्वारेति वार्थः । यत्रापि तत्प्रवेशोनुग्रहो वा तत्रापि स्त्रीत्वमृते नैतद्रसप्राप्तिरित्याहुः **स्त्रिय एव हीति** । तं पुरुषरूपं भगवन्तमित्यर्थः । ततः स्त्रीकर्तृकपानानन्तरं पुमान् भगवांस्तासु प्राक्पीतरसाधिकरणभूतासु तमेव रसं पातुं शक्त इत्यर्थः । रसाधिक्ये पुंभावात्तथेति भावः । यतस्ता एव रसयोग्यास्तत्पाने शक्ताश्चातो न कदाचिद्रमणे व्यवधानं करोतीत्याहुः **अतो हि भगवानिति** । **आन्तरं त्विति** । सखीवृन्दे मिथो गुणानुवादे लीलासहितप्रियतमप्राकट्येनान्तर्ये भावविशेषा उत्पद्यन्ते, न ते संगमेपीत्यस्य परत्वम्। 'नामरूपे व्याकरवाणी'ति श्रुतेः प्रपञ्चस्य द्विरूपत्वेन लीलाप्रपञ्चस्यापि तथात्वाद्गुणगानलक्षणनामात्मकभगवत्स्वरूपस्य परमानन्दरूपभावात्मकरमणलक्षणा लीला प्रिये दोषारोपादिदोषरहिताग्रे निरूप्यत इत्याहुः **ततः शब्दात्मिकेति** । सप्तमाध्यायव्यवस्थैषा । शब्दात्मिकाया अपि लीलायाः प्रवृत्तिनिवृत्तिभेदेन द्विरूपत्वेनोत्तरा सप्तमाध्याये निरूपिता । पूर्वस्याः सदोषत्वादत्रापि तत्पूर्वाध्याये वेदात्मकशेषरूपत्वेन बलदेवस्य तत्साहित्येन कृतलीलायां शंखचूडोक्त्या सदोषत्वं तद्वधोक्त्यात्र सापि निर्दुष्टेति ज्ञाप्यत इत्यर्थः । अत एवाध्यायद्वयेन निरूपणमिति भावः ।

यतो रूपं पञ्चात्मकमतस्तद्दानं पञ्चधातस्तन्निरूपणमपि तावद्भिरध्यायैः कृतमित्याहुः **तत इति** । पञ्चात्मके रूपे येनांशेन या लीला कृता तां तां लीलां क्रमेणाहुः **आत्मनेति** सार्धेन । 'यथेन्द्रियादिरूपत्वं शुद्धस्य ब्रह्मणस्तथा । आत्मत्वादिस्वरूपत्वं मन्तव्यं श्रुतिवाक्यतः । यथेन्द्रियादिसङ्घात आत्मनो मुख्यता तथा । प्रकृते स्वामिनीभावप्राधान्यं तत आदिमे । स एवोक्तः प्रभुर्यस्माद्रसरूपः श्रुतेर्मतः । आत्माधीनं यथा कार्यं सर्वमेवमिहापि हि । भावाधीनमतः प्रोक्तमात्मनेत्यादि सुष्ठु हि । अन्याप्राधान्यतः पूर्वं केवलेनेति तत्तथा । तत्तत्प्राधान्यतस्तत्तल्लीलेत्यग्रे तथोदितम् । मनःप्रभृतिसर्वस्वं तासु नास्ति हरेः परम् । इति ज्ञापितमेतेन विप्रयोगदशासु वै' । यद्वा । आत्मना प्रथमेत्यादिनोक्तं पञ्चविधत्वं प्रत्यध्यायोक्तलीलायामपि ज्ञेयम् । तथाहि । प्रियाभ्यः फलं दातुं तथा रूपप्राकट्यं कृत्वा स्थित इति भगवत्पदेनात्मना लीलोक्ता। 'मनश्चक्रे' 'कृष्णगृहीतमानसा' इत्यादिनाऽन्योन्यं चित्तव्यति-

पङ्गो निरूपित इति मनसा । ततः 'स्वागतं व' इत्यादिकथनाद्वचसा । तादृग्वचनश्रवणेपि प्राणानां स्थितिस्तु प्राणरूपेण भगवानेव वाग्द्वारा प्रविष्ट इति प्राणैः सा । अत एव मूले 'प्रतिभाषमाण'मित्युक्तम् । बलं हि प्राणानां धर्मः, एते चालौकिका इति भगवद्वशीकरणलक्षणं बलं संपन्नमिति स्वामिनीवाग्रूपत्वं प्राणरूपत्वं चेति तथा । तत इन्द्रियशरीरयोः सेति स्पष्टम् । तिरोधानमपि कायिकमिति तथेति प्रथमाध्यायस्थितिः । तिरोधानदशायमेतासामात्मा भगवत्येव प्रविष्ट इति स एवात्मत्वेनैतासु स्थितः कार्यं कृतवानित्यात्मना सा । एवमेव मनःप्रभृतीन्द्रियान्तं ज्ञेयम् । 'नात्मागाराणि सस्मरु'रिति वाक्याद्देहस्मृतिरहितानां पुनः पुलिनागमनं स्वतो न सम्भवतीति शारीरी सा । तृतीयेध्याये व्रजोत्कर्षहेतुत्वं दर्शनाभावेन वधहेतुत्वं रक्षकत्वमलौकिकत्वे सति ब्रह्मप्रार्थनया प्राकट्यं च स्वरूपमात्रस्यैवेत्यात्मना या लीला सा चतुर्भिरुक्ता । ततोग्रे निकटागमनद्विविधरमणमुख्यरसदानानि प्रार्थितानि, तानि चोद्दीप्तभावपूर्वकाणि । भावाश्च मनोनिष्ठा इति तल्लीला चतुर्भिरुक्ता । तत एकेन प्राणस्थितिहेतुत्वेन कथास्वरूपं निरूपितम् । तत्र वाक्प्राणरूपत्वं स्पष्टम् । ततोग्रे प्रहसितेक्षणादिकं चलनं चेन्द्रियकार्यमिति तल्लीलोक्ता । ज्ञानकर्मभेदेनेन्द्रियं द्विविधमिति द्वाभ्यामेवोक्ता । ततो दिनान्ते स्वयमागत्याननं प्रदर्शयतीति शारीरी सा । एतदग्रे शारीरीत्वं स्पष्टम् । अधरामृतदानस्य रतान्तःपातित्वेन तदपि तथा । अटव्यटनं स्पष्टम् । दर्शनेन्तरायस्य दुःखदत्वे हेतुः स्वरूपमेवेति सापि तथा । अग्रे त्यागोपि दैहिक एवेति तथा । अग्रे चाननोरसोर्देहमध्यपातित्वेन सापि लीला तथा । ततोग्रे स्वरूपाभिव्यक्तिप्रार्थनमिति तथा । अग्रे चरणाम्बुजरुहं देह इति स्पष्टम् । स्वामिनीनां हि बहिःप्राकट्यमेव भगवतोभीष्टम्, तदैवेश्वरवादोन्यदा शून्यवाद इति ज्ञापनायैश्वर्यसमानसंख्याकैः श्लोकैः दैहिकी सा निरूपिता । तुरीयेध्याये प्रियप्राकट्येन पूर्वदशाखिलापि विस्मृतेति ज्ञापनायोक्तक्रमातिक्रम उच्यते । दैन्यभावबहिःप्रकटनरूपाभ्यां साधनफलरूपाभ्यामात्मना सा । ततः सर्वासामुत्थानं भगवन्मनसैवेति सा तथा । तत इन्द्रियैरिति स्पष्टम् । ततोग्रिमलीलायोग्यस्थले गतिः, तत्रासन उपवेशनादिकं शारीरम् । ततो वाग्रूपत्वं भगवता चातिरोधानकथनाद्वाचः प्राणरूपत्वं चेति । पञ्चमेध्याये प्रतिबन्धकनिवर्तनेन स्वाङ्गैः पोषणेन च पूर्ववद्भावसंपन्नाः प्रियाः कृता इत्यात्मना सा । क्रीडाया मानसरसोद्गमहेतुत्वेन तदारम्भस्तथा । शोभोभयोरपि क्रीडासामयिकीति सापि मानस्येव । ततोग्रे भगवत्साम्येन गानं वाक्प्राणैः सा । ततः स्कन्धग्रहणाघ्राणरसास्वादनादि हस्ताब्जधारणान्तेन्द्रियैः सा । ततोग्रे शारीरी । अथवा । 'शास्त्राणां विषयस्तावद्यावन्मन्दरसा नराः । रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रम' इतिवाक्यादत्रोभयोरुद्भटभावव-

---

उेति पाठः । २. गमनाद्विविधेति पाठः ।

स्वेन सर्वत्र सर्वा लीलात्रोच्यत इति नायं क्रमो विवक्षितः । एतच्च यथा तथा स्वयमेव भावनीयम् ।

रूपं प्रतिष्ठितमिति । हरिप्रियास्विति शेषः । पूर्णस्वरूपानन्दो दत्तोभवदित्यर्थः । आद्येध्याये प्रभुरुक्तरूपात्मना लीलां कृतवानिति भक्तानामप्यात्मन्येव स्वानन्दं पूरितवानित्याहुः **जीवानानन्दय**दिति । आत्मन इत्यर्थः । अत एव प्रभुणा तादृग्रसभावः पूर्णोत्र कृतो येन प्रभुवचनेभ्योपि निरपेक्षा जाताः । ततः क्रमेणातिशयितभावस्तथा कृतो येन स्वरूपादपि निरपेक्षा जाताः, यतो मानोभूत् । तथा च भगवद्भावस्य नित्यत्वादयं भावः स्थायिभाववत्सदा स्वामिनीष्वस्तीति ज्ञेयम् । यतोस्मिन् रसे नायिकाप्राधान्यमेव निर्वहति । अग्रे यदार्त्यादेः कथनं तदेतस्यैव भावस्यावस्थाविशेषसम्बन्धिव्यभिचारिभावानामेव । अत एवाग्रे 'ईषत्कुपिता' इति वक्ष्यते । द्वितीयतृतीयादिलीलाकरणभूतमनोवाक्प्राणादिषु रसपूर्णं च तथैव भवेदिति तथेति भावः । 'यमेवैष वृणुत' इति श्रुतेरेतावत्स्वतो भगवता कृतम्, न तु साधनबलेनैतास्विलाहुः **स्वयमिति** । तर्हि नादेनाकारणं गमनबोधनादिकं चानुपपन्नमित्याशंक्य, तत्रोपपत्तिं वदन्तो भगवान् लीलां कुर्वन् शास्त्रमर्यादामपि प्रदर्शयतीत्याशयेनाहुः **ते चेत्समर्पितात्मान** इति सार्धेन । सर्वात्मभाववन्तश्चेद्भक्ता भवन्ति, तदैवायं रसः प्राप्यो, नान्यथेत्यर्थः । एतेनैतास्वेवैवं रमणं कृतो नान्यास्विति शंकापास्ता । सोपि भगवत्कृत एव भवति, नान्यथेति ज्ञापनाय तदुपायरूपरिरंसाचन्द्रोदयगाननिषेधवचनान्युक्तानीत्याहुः **तत्रोपायश्च रूप्यत** इति । तत्र समर्पितात्मत्व इत्यर्थः । अन्तर्गृहगतकथयैतद्भावरहितानां नैतत्प्राप्तिरित्यत्र निदर्शनमप्युक्तमिति चकारार्थः । मानतिरोधानाभ्यामन्यापि सा मर्यादा ज्ञाप्यत इत्याहुः **आत्मेति** । लडर्थे लुङ्छान्दसः । रसमर्यादामग्रे स्वयमेव वदिष्यन्त्यन्त्यश्लोकद्वये । अन्तःप्रपत्त्यभावे बाह्यतस्तिरोधत्ते । तत्र हेतु**रन्तःकरणसम्बन्धीति** । यथा पतिपुत्रादिः शरीरसम्बन्धी, तथा हरिः सर्वभावप्रपत्त्येकलभ्य इति, सा चान्तःकरणधर्म इति तथा । तथा च हेत्वभावे कार्याभावो युक्त इति भावः । तिरोधानमपि मानजदुःखहरणार्थमेवेत्याहुः **हरिश्च स** इति । अत्र हरिपदस्यायं भावः । 'एवं गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाभिमानाः । नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामरमयो हरिराविरासी'दिति वाक्याद्यथान्यैररक्षणे जाते स्वयमाविर्भूय रक्षितवान्, एवमन्वेषणादिसाधनानामसाधकत्वेतिदैन्ये सति तन्निवारणाय स्वयमाविर्भूय सर्वं कृतवानिति । अथवा । अन्तःकरणसम्बन्धी सन् तत्र स्थितः सन् बाह्यतस्तिरोधत्त इत्यर्थः । यद्वा । मानस्यायं हि सहजो धर्मो यन्नायकतिरस्कारोऽवचनानीक्षणादिभिः, प्रकृते च तत्कार्यं स्वयमेव प्रभुः कृतवान् । न केवलमधुनैवम्, किन्तु सार्वदिकीयं व्यवस्थेत्याहुः **सोऽन्तःकरणे**ति । सः पूर्वोक्तरसभावात्मक एव प्रभुः स मानात्मकः सन्नन्तःकरणसम्बन्धी चेत्तदा बहिस्तथेत्यर्थः । यद्वा । कायिकचेष्टया

मानापनोदनं कुतो न कृतवानित्याशंक्य तत्र हेतुमाहुः स इति । अन्तर्ज्ञानादिकार्यकरण येनेत्यन्त करण आत्मा तत्सम्बन्धी यतोऽतस्तथेत्यर्थः । आवेध्याय आत्मनैवैतदात्मनि स्वानन्द पूरितवानित्यन्तरेव च सोस्तीत्यन्तरेव प्रविश्य तद्धर्मापनोदन कृतवानित्युच्यते । यदा कायिकमानन्ददान करिष्यति, तदा बहिरेव तथा करिष्यतीति भावः । अत एव गीत-गोविन्दादिषु तथैव गीयते । हरिरिति पूर्ववत् ।

आद्यश्लोके **सर्वास्वेव रात्रिष्वित्यादि** । ननु तासां रात्रीणां नित्यत्वाद् दिवापि स-
१० २९ १. त्वेन तेष्वप्येतद्रात्रिप्राकट्य कृत्वा रमते, उत लौकिकीषु रात्रिष्वेव तथा कृत्वा
तथेति शङ्कानिरासायाहुः **सर्वास्वेवेत्यादि** । यावतीषु ता आरोपितवा-स्तावतीषु सर्वासु रात्रिष्वेव लौकिकीष्वित्यर्थः । अन्य 'थैव शशाङ्कांशुविराजिता' इति श्लोकेन लौकिकीनां तासामतिदेशो न सङ्गच्छेत । दिवापि तथोक्तौ दोहनपयोधिश्रयणसयावसिद्ध्यादिक गोपानां दिवा गोचारणादिपराणमेतासु स्वपार्श्वस्थत्वेन माननं च न सङ्गच्छत इति भाव. । **पूर्णत्वादिति** । रसशास्त्रीयाभिः सर्वाभि. कलाभि. पूर्णत्वादित्यर्थः । सकलकलापूर्णभगवन्मन.सम्बन्धिचन्द्रस्यापि सदा तथात्वात्तासु तत्प्राकट्यकरणेन तथात्वकरणमित्याशयेनाहुः **पूर्णिमेत्यादि** । अन्यदा सदोपस्य जलादेर्दोषनिवर्तकत्वं कमलादिलक्षणगुणाधायकत्व च शरदो लोके दृश्यत इति तस्यामसाधारणो धर्मोस्तीति ज्ञायते । इहापि रसानुपयोगिवस्तुनिरासपूर्वकः भगवद्भावपोषिकाऽलौकिकी शरद्भविष्यतीति तामेव कृतवानित्याहुः **ऋतुमपीति** । पुसा सदोपभावस्त्रीणामप्यत्र न प्रवेश इत्यपि ज्ञापयितु वसन्तादीना प्राग्पश्चाकरणमिति हृदयम् । ननु रात्रीणां नित्यत्वेन तद्धर्माणामपि नित्यत्वात् तासां कालात्मकत्वेनावश्यंभावाच्च तत्करणोक्तिर्विवरणे कथमुपपद्यते । न च मनस इवेति वाच्यम् । तथानाश्रुतेरिति चेत् । इत्यम् । अत्र हि वीक्षणस्य तथा मन.करणे हेतुत्वमुच्यते । तथा च सर्वविषयकापरोक्षनित्यज्ञानवतो नित्यरात्रिदर्शनस्यापि तथात्वेन तत्कार्यस्यापि तथात्वापत्तौ तत्समाधानाय वीक्षणे पूर्वस्माद्विशेषो वाच्यः । स चात्र विषयरूप एव वक्तु युक्त । स च विशेषणाद्य एव । पूर्वं तस्यानाविर्भावनादधुनैव तथा करणाद्रसोद्दीपिका सामग्रीं प्रभुरेव कृतवानिति सुष्टूक्तमाचार्यैः **कृत्वेति** । यद्यपि विशेषणस्यापि नित्यत्वेनोक्तदूषणानुद्धारस्तथापि भक्तानामपि दर्शनयोग्यता तत्र सम्पादितेति तथा । नायकभावेनेक्षणमेव विशेष इति ज्ञेयम् । अत एवोपसर्गो वीति । वस्तुतस्तु तत्तत्क्षणसम्बन्धिनी लीला नित्यैवोच्यत इति नानुपपत्ति काचित् । **यद्यपीत्यादिनाऽपिशब्दार्थ उक्तः** । **तथापि मर्यादेति** । रसमर्यादेत्यर्थ । **एवं कार्ये योगमायाया इति** । भजनानन्ददानलक्षणे कार्ये इत्यर्थः । **अन्यत्र स्थितं प्रमाणम्** । वेदात्मान सङ्कर्षण देवक्या स्थितं रोहिण्या

१ मर्यादेति पाठ । २ प्रकटितवानिति पाठ ।

योजितवती, स्वयमाविर्भूय मथुरायां स्थितमानन्दरूपं प्रभुं गोकुले, तथात्रापि पूर्वं गोपानां गृहेषु स्थिता ऋचोधुना भगवति योजयति, भगवति स्थितमानन्दं च तास्विस्यर्थः ।

अत्र कश्चिदाह । आनन्दस्य सुखरूपत्वादमूर्तस्यान्यत्र गमनासम्भवात्प्रियसङ्गनिमित्तकः स्वामिनीषु सुखविशेष उत्पन्न इत्येव वक्तुं युक्तम्, अतो योगमायाश्रयणनिमित्तकथनमनुपपन्नमिति । स वक्तव्यः । 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त' इत्यादिश्रुतिभ्य'आनन्दमयोभ्यासा'दित्यादिन्यायेभ्यश्च धर्मिग्राहकप्रमाणभूतेभ्य आनन्दमयत्वं भगवत्स्वरूपे मन्तव्यम्, अनिच्छतापि त्वया । तथैव चिद्रूपस्य धर्मरूपभगशब्दार्थज्ञानरूपत्वव'त्प्रकाशाश्रयवद्वा तेजस्त्वा'दिति न्यायाद्धर्मरूपतापि । तथा च 'तदेजती'ति श्रुतेस्तस्य गतिरूपत्वमप्यङ्गीकार्यम् । अत एव व्यापकत्वेपि गतिलीलोपपद्यते, दामोदरलीलेव । वस्तुतस्तु स्वरूपमर्यादामप्यतिक्रम्य भक्तार्थे लीलां करोतीति नानुपपत्तिः काचित् । अत एव 'रसं ह्येवायं लब्ध्वानन्दी भवती'ति श्रुतिः । सर्वात्मभावलक्षणः स्थायिभावो रसस्तमेव लब्ध्वानन्दवान् भवति । तादृशे प्रभुः स्वरूपानन्दं ददातीति तथा लाभकथनेन भगवद्दत्त एव प्राप्यते, नान्यथेति सूच्यते । एवकारः सर्वत्रानुषज्यते । तथाहि । रसमेव लब्ध्वा तथा । तं लब्ध्वा तथा भवत्येव । तथा भूत्वा आनन्द्येव भवति, न तु लौकिकदुःख्यपीति च । **अतः प्रमाणातिरिक्तमार्ग** इति । प्रमाणमार्गातिरिक्तो मार्ग इत्यर्थः । यतोन्यत्र स्थितं प्रमाणमन्यत्रापि योजयत्यतोन्यभजनरहितं विवाहितपतिभजनं विदधच्छास्त्रं तत्त्यागपूर्वकं भगवत्सेवामेव विधत्त इत्यर्थस्तु स्वामिनीनां तथा भजनेन तेन च फलसिद्ध्या 'या मामज'न्निति वाक्येन भगवता प्रत्युपकृतित्वेन कथनात्फलरूपेण चाधुना ज्ञाप्यते । तस्य मार्गत्वं च । अन्यथोन्मार्गत्वमेव भवेत् । अस्त्वेवमेतदित्यादिना प्रतिपादितं च ताभिः । ईश्वरवाक्यस्याखिलप्रमाणाधिकबलवत्त्वेपि स्वामिनीवाक्यैर्दुर्बलत्वमपि प्रमाणातिरिक्तो मार्ग इति ज्ञेयम् । यद्वा । प्रभुप्राप्त्यर्थं गुरूपसत्तिस्तदुक्तकरणं च भक्तानां प्रमाणमार्गः । प्रकृते च स्वामिनीप्राप्त्यर्थं योगमायाश्रयणादिकं प्रभुः करोति करिष्यत्यपीति प्रमाणातिरिक्तो मार्गः, यतोन्यत्र प्रतिष्ठितमानन्दमन्यत्र योजयत्यत एतद्भावेन भजनरूपोत्युत्कटस्नेहजविरहभावेन सर्वत्यागपूर्वकं स्वदेहादिविस्मृतिपूर्वकं भगवदन्वेषणपरत्वलक्षणश्च भक्तिमार्ग इत्यर्थः । इदं च द्वितीयतृतीयाध्यायादिषु स्पष्टम् । एवं सत्यस्मिन्मार्गे स्वामिन्य एव गुरव इति ज्ञापितं भवति । स्वामिनीनां विप्रयोगभावे सौभाग्यमदादिर्हेतुः । तत्र च भगवद्धर्मप्रवेश एव हेतुः । अन्यथा पादरजःप्रपन्नानामेतासां मदो मानश्च न स्यातामिति भावः । नन्वेवं 'शशांकांशुविराजिता निशा' इति वाक्याल्लौकिकीष्वपि रात्रिषु रमणमिति ज्ञायते । एवं सत्यलौकिकीत्वपरिग्रहे गौरवं विशेषाभावश्चेत्याशंक्य लौकिकीनामपि तासां स्वरूपमाहुः **याश्च रात्रय** इति । **निर्मिता** इतिपदात्सर्गादावेवैतदर्थमेव भगवता सृष्टाः काश्चन रात्रयो

भगवत्येव स्थिता एतावत्पर्यन्तं, लीलासमये लौकिकीष्वेव रात्रिषु स्थापयित्वा तां कृत-वानिति ज्ञाप्यते । लौकिकेन्दुप्रकाश्यत्वेन गीतगोविन्दाद्युक्तप्रकारेण लौकिकरीत्यैव रमणेन चैतासां लौकिकीत्वमुच्यते । तासु विवक्षितेन्दुप्रकाश्यत्वेन नायकमानोक्त्या नायिकाप्र-णिपातोक्त्यैतन्माननायकान्तर्धाननायिकादैन्योक्त्यैतद्धेतुकतदाविर्भावे तदधीनत्वोक्त्या प्रश्नोत्तरे परोक्षभजनोक्तौ पूर्वमननुभवेपि प्रत्यक्षभावेपि तदनुभवतद्वाग्विश्वासोक्त्या भग-वद्विचारितानुपूर्वीकस्वरजात्युन्नयनादिभिश्चालौकिकरीत्यैवालौकिकरसदानमिति ज्ञाप्यते । उक्तार्थेषु लौकिकवैलक्षण्यं स्पष्टम् । एवं सति स्वरूपत एव वालौकिकत्वमितिविवेकः । एवं कथन उपपत्तिमाहुः **अन्यथेति** । साधारणीनां रात्रीणां तल्लीलाश्रयत्वे तासां सर्व-त्रैव तुल्यत्वात् सर्वेषु देशेषु सर्वेषामेतदानन्दप्राकट्यं स्यादित्यर्थः । अन्यथेत्यस्यैव वि-वरणं **साधारणीत्यादि** । भूम्येकत्वेपि लीलाश्रयभूम्यधिष्ठानत्वेनास्या नानुपपत्तिरिति भावः। ननु सर्वज्ञस्य रात्रिदर्शनमपि सार्वदिकमित्यधुना को विशेष इति चेत्तत्राहुः **शरदि क्ष-तावित्यादि** । विशिष्टदर्शनं विशेष इत्यर्थः । ननु विशेषणस्यापि नित्यत्वान्न तथेति चेत् । सत्यम् । यादृशी लीलोच्यते तादृश्या एव नित्यत्वादधुनैवोक्तविशेषणवैशिष्ट्यमित्युक्तेपि न दोषः । एतद्यथा तथा विद्वन्मण्डने निरूपितमस्माभिः । ईश्वरस्यान्याश्रयणं हि लौ-किकी रीतिः, तदुक्त्यात्र तद्रीत्यापि रमणं सूच्यते । एवं सति मध्यस्थत्वेन तदा तस्या विशे-षत उपयोग इति तदाश्रयणमुक्तमिति ज्ञेयम् । किञ्च । स्वाशक्ये ह्यर्थेऽन्याश्रयणं क्रियते । तथा च सर्वसमर्थस्यापि स्वानन्ददानसमये ईश्वरत्वादिधर्माज्ञानं सम्पादयितुं रसपरवश-त्वेन न कर्तुं शक्यं, गोपानां चैतल्लीलाविषयकाज्ञानं तथा । आगमनसमये निषेधोक्त्या तज्ज्ञानस्य कथनात् अत एतदादिकार्यसिद्ध्यर्थं योगमायाश्रयणमलौकिकरीत्या रमणेपीति ज्ञेयम् । अत एव 'मोहितास्तस्य मायया' 'मन्यमानाः स्वपार्श्वस्था'निति वक्ष्यति । अत एव रसोपयोगि यद्यत्कार्यं तत्तदा तदा सम्पादयितुं शक्तेयमिति स्वनिकट एव मूर्तिमत्यास्तस्याः स्थापनमिति ज्ञापनायोपेत्युपसर्गः । एतदेवोक्तं **समीप एवाश्रित्येत्यनेन** ।

तदोडुराज इत्यस्याभासो **नूतने तस्मिन्नित्यारभ्य ससृज** इत्यन्तः । अत्रेदं प्र-तिभाति । आश्रितत्वोक्त्यात्रेश्वरत्वमर्यादामुलंघ्य भगवानधुना प्रवृत्त इति
१०-२६-२. ज्ञायते। अन्यथा रसमर्यादोच्छिद्येत । एवं सति यदवधि सर्वविकारराहित्येन नैवंविधं मनः प्रकटितमिति सपद्येतादृशस्य तस्य नूतनत्वम् । लौकिकीं रीतिमनुसृतवतस्तद्दे-वतापेक्षापि घटते । लोके देवताधिष्ठितस्यैव कार्यक्षमत्वात्, अन्यथा नियामकाभावेन सामर्थ्या-भावेन चाल्पेनैव यथा पूर्वमेव भवेत्, नतु रसैकपरवशं सदा। अत एवात्तगजेन्द्रलील इति व-क्ष्यति। करिणीस्पर्शमात्रेण परवशत्वं तत्र प्रसिद्धम्। युक्तं चैतद्यद्विभावादिकं विना न रसपोष इति । 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति'रिति वात्स्यायनसूत्रात् । वस्तुतस्तु 'रसो

१ तासामिति पाठः । २ तदन्त इति पाठः ।

वै स' इत्यादिश्रुतिभ्यो रसरूपत्वात्प्रभोस्स यादृशस्तच्छास्त्रसिद्धोऽस्ति तादृशो निरूप्यत इति नानुपपत्तिः काचित्। अत एवैवंभूतस्यैव नित्यत्वमपि। एतद्विद्वन्मण्डने द्रष्टव्यम्। तस्मात्सुमुक्तमनधिष्ठितं चेत्यादि। ननु चन्द्रस्योदयकर्तृत्वं मूले प्रतीयत इति भगवतः सृष्टिकर्तृत्वोक्तिरत्र विरुद्धेति चेत्। न। अनवबोधात्। यदा मनश्चक्रे तदैव य उडुराजोर्थादुत्पादितस्स उदगादिति मूलार्थस्य विवक्षितत्वात्। अन्यथा तदेति न वदेत्। सोप्युदगादित्येव वदेत्। किञ्चाग्रिमश्लोकोक्तचन्द्रदर्शनान्यथानुपपत्त्यैव चन्द्रोदयप्राप्तेरेतच्छ्लोकवैयर्थ्यापातः। एवं सति चिकीर्षितलीलाया वेदलोकयोरप्रतीतत्वेनापूर्वत्वात्तत्सामग्र्यप्यपूर्वैव सर्वा सम्पादितेति ज्ञापनाय तदेत्युक्तिपूर्वकं तदुदयवर्णनमिति ज्ञायते। अत एव **भगवन्मनश्चन्द्रस्येत्यारभ्य कदाचिदपीत्यन्तो** ग्रन्थो युज्यते। अन्यथा मूले पूर्णत्वादिधर्माः कण्ठोक्ता नेत्याचार्या अपि न वदेयुः। अत एव पूर्वश्लोके मनसोपि करणमुक्तं चक्रे इति पदेन। क्रीडायां मनस एव मुख्यत्वात्तस्य नूतनतया करणोक्त्यैव सर्वस्या अपि सामग्र्यास्तथात्वं ज्ञातं भविष्यतीत्यभिप्रायेण। एवं सति तादृशं चन्द्रं च प्रभुः ससृज इति हेतोरग्रे तदुदयमाह शुक इत्यामासार्थो ज्ञेयः। **तथापि क्रमेणैवेति**। अन्यथा रजन्येपेति प्रभुर्न वदेदिति भावः। नन्वस्या रात्र्या नित्यत्वेनैकयेव चारितार्थ्ये बह्वीनां तासां परिग्रहः किमर्थं इति चेत्। अत्र वदामः। नायिकाविशेषेषु प्रतिपदादितिथिनियतकर्तव्यताकबन्धादिविशेषैरेव रसः प्रादुर्भवतीति वात्स्यायननयसिद्धत्वात्तदर्थमेवोक्तरूपाणां तासां परिग्रह इति। रात्रीणामलौकिकत्वेन प्राकृतनक्षत्रारक्षकत्वेप्येतद्रात्रिप्रकाश्योडूनां चाप्रसिद्धत्वेपि यदुडुपपदोपादानं तत्त्वेतद्रात्रिष्वेव प्रकाशमानत्वेन स्वामिनीनां मनांस्येवात्रोडुत्वेनाभिमतानीत्याहुः **सोऽपि चन्द्र इत्यादिना**। इन्दोर्नक्षत्रसजातीयत्वं 'नक्षत्राणामहं शशी'तिवाक्यात्सिद्धम्। एतन्मनस्सु तत्त्वोक्त्यैतच्चन्द्रसजातीयत्वं सूच्यते। तच्च भगवन्मनःसम्बन्धित्वम्। तत्त्वं चात्र भगवन्मनोंशत्वम्। स्वमनःप्रवृत्तिनिवृत्तितोपादिकार्यार्थमाविर्भावितत्वं च। **प्राच्याः ककुभ इत्यत्र। प्रतिस्पर्धिन्यामिति**। प्रतीच्यां दिशीत्यर्थः। उत्तरसन्ध्यायामखिलद्विजोपास्यत्वेनेयमेव दिङ्मुख्येति मर्यादामार्गीयत्वं लक्ष्यते। रविश्च तथा। अतस्तेन तत्र रागसम्भवः। यत्रोक्तरूपेन्दुप्राकट्यं सा दिक्पुष्टिमार्गीयेति तस्या एतत्प्रतिस्पर्धिनीत्वम्। एतेन मर्यादामार्गे ताप एव, पुष्टिमार्गप्रवेशे तन्निवृत्तिरिति सूचितम्। प्रातः प्राच्या अपि तथाभूताया एवाधुनैवंभूतात्वकथनात् अधुना प्रभोरेवेन्द्रत्वेन तद्देवताकात्वेनाप्यस्यास्तस्याः सकाशादुत्कर्षः। पुष्टिमार्गोत्कर्षमेव प्रभुः करोति, नान्यत्रास्मादुत्कर्षं सहत इत्येतत्सर्वं हृदि कृत्वा तस्या मुखे न राग इत्याद्युक्तं प्रतिस्पर्धिनीत्वमप्युक्तमिति ज्ञेयम्। **स चर्षणीनामित्यत्र**। इदं ज्ञेयम्। चृष प्रजननैश्वर्ययोरिति पाठादयं धातुराविर्भावन ईशधात्वर्थे गमने च शक्तः। अथवेशस्य भाव ऐश्यं तत्र तथा। प्रकृते तु सर्वात्मभावैकलभ्यरसाधिकारिमात्रसृष्टावेव याः शक्तयोऽ

धिकृतास्ता भगवदाविर्भावं ज्ञात्वा तादृशीराविर्भाव्य फलसिद्धिं प्रतीक्ष्यन्त्यस्तत्पर्यन्तमन्यभावेभ्यस्ता रक्षन्तीति चर्षणीशब्देनोच्यन्ते । यद्यपि शाब्दिकैर्दृश्यशब्दस्य गत्यर्थकत्वमेवोक्तम्, तथापि गत्योरित्यनुक्त्वा यद्दृश्ययोरित्युक्तं तत् सोप्यर्थोत्र ज्ञेय इति ज्ञापनायेत्यस्माभिस्तथोक्तम् । गमनार्थत्वे तु यत्र ता आविर्भाविताास्तत्र गत्वा तत्फलसिद्ध्यनुकूलप्रयत्नवत्यो भवन्तीति तथा । तथा च स्वस्वामिनीषु भगवद्भोगयोग्यास्वपि तद्विलम्बं दृष्ट्वैतदार्तिं च चर्षणीनां परमस्नेहवशाच्छोकोजनि । एवं सत्ययमिन्दुः प्रियसंगाभावजदुःखं स्वामिनीनामपनयन्न केवलानां तदपनयति, किन्तु चर्षणीसहितानामिति मूलार्थः सम्पद्यते । स्वामिनीदुःखनिमित्तकस्तासां शोक इत्येतद्दुःखनिवारणेनैव तासामपि स निवर्तत इत्यमुख्यत्वात्सहभावस्तासामुक्तः । एतदिन्दुस्वाभाव्यादेतदुदये संगमनिश्चयेन च तन्निवृत्तिः । इदमेवोक्तं **चर्षणीसहितानां जीवानां** वेत्यादिना । आद्यपक्षे तु यत्सम्बन्धिनामेव परमानन्दानुभवस्ताः शक्तयः स्वयं तदर्थिन्यो भगवद्भक्तेष्वेतदतिरिक्तेष्वेतावत्कालपर्यन्तं परिभ्रान्ताश्चर्षणीशब्देनोच्यन्ते । मुक्तौ तदभावं ज्ञात्वा तादृशेभ्यः स्वयमेव निवृत्ता भवन्ति । भगवतैव तादृश्य एव ताः सृष्टा इति तेषु न प्रवेश इति ज्ञापनाय न लभन्त इत्युक्तम् । अत एवाग्रे स्वत एव निवृत्ता भवन्तीत्युक्तम्, न तु निवर्तिता इति । तथा चैतदुदये तच्छोकनिवृत्तिर्जातेति तथा । अस्मिन्पक्षे पुनश्चन्द्रपरामर्शस्य प्रयोजनाभावादेकस्मिन्वाक्ये वारद्वयं तत्कथनासम्भवात्पूर्वमप्रसिद्धत्वेनास्येन्दोः प्रसिद्ध्यर्थकत्वमपि तच्छब्दस्य न वक्तुं शक्यमित्यरुच्याग्रिमः पक्ष उक्त इति ज्ञेयम् ।

दृष्ट्वा कुमुद्वन्तमित्यस्याभासे । तस्य शब्दयोनित्वं निरूपयन्निति । वाचः पूर्वरूपं हि मनस्तच्च समानाधिकरणाया एव तस्यास्तथा । प्रकृते च गान
१०-२९-३. एतच्चन्द्रदर्शनस्य हेतुत्वोक्त्यापि गानसमानाधिकरणमनोधिष्ठातृत्वं तत्र ज्ञाप्यत इति भावः । न चैवं वनेपि तत्त्वापत्तिरिति वाच्यम् । विशेषणस्यैव तत्र प्रयोजनकत्वेनोक्तेः । **रमाननाभमित्यत्र लक्ष्म्या अयं भ्रातेत्यादि** । भगवान् रमणेच्छायां तद्रसपूरणार्थं ब्रह्मानन्दं लक्ष्म्यात्मकनायिकारूपमाविर्भावितवान् । तस्यैव रमणस्थानत्वात् चन्द्रोपि तथैवायमाविर्भावित इत्यस्य तद्भ्रातृत्वमत एव समानाकारत्वमिति भावः । **नवकुङ्कुमारुणमित्यत्र** । नवपदस्य तात्पर्यमाहुः **विवाहसमय** इत्यादि । कलत्वे गानस्य हेतुमाहुः **यदि व्यक्तमित्यादि** । यद्यपि स्वरूपदिदृक्षा न तच्छ्रवणनिमित्ता, तथापि गीतस्यार्थः स्वरूपमेवेति, तच्चार्थसंयुक्तमेवेति गीतस्य व्यक्तत्वेऽर्थस्यापि तथात्वं स्यात् । तथा च 'तदनङ्गवर्धनमि'तिवाक्यात्स्वरूपरसानुभवेच्छाया एवोद्गतत्वेन तदनुभवेनैवागमनप्रतिबन्धः स्यादिति भावः । **वामदृशामित्यत्र । यासां पुनर्दृष्टिर्-**

---

१ प्रतीक्ष्यमाणा इति पाठः ।

त्यादि । पुष्टिमार्गानुसारिभजनपरत्वमेवोत्तमत्वं दृष्टेः । अन्यथा चार्वादिपदान्यपहाय वामपदं न वदेदिति भावः ।

निशम्य गीतमित्यत्र । **यद्यपीति** । उपक्रम एतत्सम्बन्धिरात्रिदर्शनस्यैव
रिंसाहेतुत्वेनोक्तेरिति भावः । **तथापीति** । **तदनङ्गवर्धनमिति**वचना-
१०-२६-४. द्भगवदीयोनङ्गो यत्रास्ति तं तत्र वर्धयत्येवेत्येतास्वपि स्थितः । स तेन तथा
कृत इत्येता अप्यागता इत्यर्थः । अत एव वर्धकत्वमुक्तम्, न तु जनकत्वमिति भावः । एत-
देवोक्तमाह्वानं **सदृशमित्यनेन** । पूर्वापेक्षयाधुनात्युत्कटो जात इत्याशयेन **नूतन उत्पन्नः काम** इत्युक्तम् ।

दुहन्त्य इत्यस्याभासः । **प्रसङ्गादित्यादि** । अत्र पक्षद्वयं सम्भाव्यते । कुमारी-
णामेवाह्वानं मुख्यमित्येकः, अविशेषेण तथेत्यपरः । तत्राद्ये **प्रसङ्गादि-**
१०-२६-५. **त्यादि** । द्वितीये **तासामित्यादि** । एवमग्रेपि । गुणशब्दोत्र सर्वत्र भाव-
परो ज्ञेयः । भाववैलक्षण्यज्ञापनाय तथोक्तिः । **जातीत्यादि** । धर्मपदं त्रिष्वप्यनुपज्यते । दोहनाद्यपेक्षयाञ्जनस्यान्तरङ्गत्वादन्यस्मिन्मण्डने सत्यप्येतद्विना तेषां सौन्दर्याजनकत्वाद-सम्पूर्णस्याशोभाजनकत्वाच्च मुख्यत्वमिति तत्त्यागोऽशक्य इति तत्करणाद्दुर्लभाधिकार इत्युक्तम् । **ज्ञानमार्गशोधिका इति** तु शास्त्ररीत्या बुभुत्सूनां बोधायोक्तम् ।

काश्चित्कृष्णान्तिकमित्यत्र । **तन्मध्येपीति** । अन्यथा पूर्ववाक्ये काश्चि-
दित्युक्तत्वाद्वस्त्रादिव्यत्यासस्य जवकृतस्य सर्वसाधारणत्वादग्रे **काश्चिदि-**
१०-२६-७. तिपदमसम्बद्धं स्यादिति भावः ।

अन्तर्गृहगता इत्यस्याभासे । **यासां काल** इत्यादि । नन्वासां भक्तत्वा-
त्कालस्तथा कर्तुं न शक्नोतीति चेत् । अत्रेदमाकूतम् । 'उक्तं पुरस्ता'-
१०-२६-९. दित्यस्य द्वितीयव्याख्यानानन्तरं 'यासां साक्षा' दित्यादिनोक्तप्रयोजनार्थं
प्रतिबन्धोवश्यं कार्यः । भगवांस्तु भक्तानां स्वप्राप्तिप्रतिबन्धं न साक्षात्करोतीति वस्तु-स्थितिः । अतोधिकारी कालः प्रभुकार्यं कृतवानिति नानुपपत्तिः काचित् ।

उक्तं पुरस्तादित्यत्र । उक्तं निर्गलितार्थमाहु**र्यथाशास्त्रमित्यादिना** । अन्यथा
चैद्यस्यापि पक्षसमत्वेन नेदमुत्तरं स्यादिति भावः । एतेनाद्यश्लोकार्थ उक्तः ।
१०-२६-१३. **भगवानित्यादिनाग्रिमाणाम्** । किञ्च । पूर्वं ज्ञानभक्त्योरपि हेतुत्वमङ्गीकृ-
त्योक्तम्, अधुनात्वाविर्भावेनैव ते अन्यथा सिद्धे इति स्वरूपेणैव सर्वेषां **मुक्तिरित्याहुः ज्ञानभक्त्योरित्यादिना** ।

भगवतो नृपेत्यत्र । **सर्वैश्वर्यसम्पन्न** इत्यारभ्य **निरपेक्ष** इत्यन्तेन ग्रन्थेन
१०-२६-१४. भगशब्दार्थवत्त्वं विवृतं प्रकृतोपयोगित्वेनेति ज्ञेयम् ।

कामं क्रोधमित्यत्र । नन्ववतारसमये पूर्वोक्तभक्तनिमित्तं पृथगाविर्भावोपेक्षितो-
थवा तेनैव तत्फलसाधनमिति सन्देहे निर्णयमाहुः **एकस्येति** । उक्तस्थले
१०-२९-१५. तेनैव तत्फलसाधनं न पृथक्तदपेक्षेत्येकस्यैवाविर्भावस्योभयरूपत्वं भवति । एकत्र विनियुक्तस्यान्यत्र विनियोगो न न्यायसिद्ध इत्याशङ्कानिरासाय निर्णायकन्यायमाहुः **संयोगेत्यादि** । यथा होम एव नियुक्ता जुहूः पर्णमयीत्वगुणयोगात्पापश्लोकश्रवणाभावमपि साधयति, न त्वेतदर्थं पृथक्सा तन्मयी क्रियते। 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोती'ति श्रुत्या होमार्थाया एव तन्मय्यास्तस्या एतत्फलसाधकत्वोक्तेः, तथा प्रकृतेपि भूम्यादिक्लेशव्ययनिमित्तकाविर्भावस्यैव तत्तद्भक्तयोगे तत्तत्फलसाधकत्वमिति न पृथक्तदपेक्षेत्यर्थः । अत्रेदमपि ज्ञेयम् । पुष्टिमर्यादाभेदेन द्विविधानामपि भक्तानां फलसाधनं सर्वशक्तिप्राकट्यपूर्वकमवतीर्णेन पूर्णेनैकेनैव स्वरूपेणैव कर्तुं शक्यम् । तत्रापि केवलमर्यादामार्गस्थापनायाविर्भूतेन पुष्टिमार्गीयभक्तेष्टपूरणं न क्रियते । एवं केवलपुष्टिमार्गीयेणाप्याविर्भावेन । अत एव दण्डकारण्यस्थर्षीणामिष्टपूर्तिर्न कोसलेन्द्रेण कृता । श्रीमद्गोकुलचन्द्रेण च यज्ञपत्नीनाम्, पुष्टिलीलानधिकारात् । अग्रे मथुरादिषु प्रद्युम्नादिरूपेण लीलाकरणात्तत्तदनुरूपं फलदानमिति । **नित्यं हराविंत्यत्र** । **स हि सर्वदुःखहर्तेति** । भावनाविषयस्वभावादेव न दुःखभानमित्यर्थः । **नित्यमित्यादिना** तन्मयत्वं विवृतम् । तथा स्फुरण उपपत्तिमाहुः **सर्वत्र भगवदावेशादिति** । अतिविगाढभगवद्भावनायां देहेन्द्रियप्राणान्तःकरणजीवेष्वपि तदावेशात्तेषु तथा स्फूर्तौ तत्सम्बन्धिष्वपि तथैव भानमित्यर्थः । एतदेव **जीव** इत्यादिना विवृतम् । ननु प्रश्नोत्तरं त्वाद्याभ्यामेव सम्पन्नम्, अनेनापि श्लोकेन स एवार्थः पर्यवस्यतीत्येतत्कथनं व्यर्थमित्याशक्य तत्तात्पर्यमाहुः **तादृशीमिति** । एव बोधनार्थमित्यर्थः ।

ता दृष्ट्वेत्यत्र । यास्त्वित्यादि । अन्तर्गृहगता अनाकारिता एव नाद श्रुत्वोद्युक्ता
इति प्रतिबन्धोभूदिति शङ्कानिरासायाहुः याः पूर्वोक्तास्ता अप्याहूताः । तनो-
१० २९-२७. पपत्तिमाहुः **समागता** इति । अन्यथा तथा न स्यादिति भावः । गेहस्य देहसम्बन्धित्वात्तस्य नष्टत्वेनैतासां गृहाभावात्तत्र गमनं बाधितमिति न निवार्यन्ते । दोषनिवारणार्थं प्रतिबन्ध इत्युक्तम् । यावद्भिर्गुणैर्भगवद्रमणं भवति तावद्गुणसम्पन्ना अन्यत्र विवाहितो रसशास्त्रोक्तरसविशेषोपयोगिगुणवत्यश्च याः समागतास्ता अपि यद्यपि न निवारयितुं योग्यास्तथापि स्थातुमशक्ताः सत्यः स्वतो नागताः किन्तु शब्दश्रवणे सति । तथा च तासां नैशो निवारणीय इति शब्देनैव निवारणं कृतम्, न तु दृष्ट्वा । तदनङ्गीकारेण शब्दोपाधिकमागमनं चेत् स्यान्निवृत्तिरपि स्यादिति तदभावो ज्ञाप्यत इत्याहुर्**याः पुनरित्यादिना** । एवं करणे हेतुमाहुरन्यशेषपतयेति । एतेन भक्तिमार्गमर्यादा ज्ञापितेति भाव. । अपा-
मन्त्र इति । अन्तर्बहिर्विमर्शादो नागरीणां कदाचिद्भवेदपि, न त्वेतासाम् । व्रजसम्बन्धे-

नान्तरधर्मावरणासम्भवात्तथा चागमनं सर्वांशेनैव, नत्वन्यत्रापि केनाप्यंशेन हृदयं स्थापयित्वेति भावः । एतासां निवर्तने यावत्स्वसामर्थ्यमुपयुज्यते तावत्पूर्णमत्र प्रकटीकृतवान्प्रभुरिति ज्ञापनाय भगवानित्यादीनि प्रभुविशेषणानीति ज्ञेयम् । तेन स्वामिनीभावस्य महाबलवत्त्वं ध्वन्यते । तेन भक्तिमार्गोत्कर्ष एव सिध्यति । भावस्य भगवद्रूपत्वात्तदुत्कर्ष एवैवमपि पर्यवस्यतीति हृदयमाचार्याणाम् । नन्वत्र मोहने विशेष उक्तोऽन्यथा मोहिता इत्युक्तत्वेन पौनरुक्त्यं स्यात् । तथा च पूर्वस्मादाधिक्यस्य विशेषपदार्थत्वात्पूर्वस्य च भगवद्विषयकस्यैव तस्योक्तत्वात्तद्गत एव विशेषो वक्तुं युक्तो, न तु गृहादिविषयकस्य, पूर्वमसत्त्वादित्यरुच्या पक्षान्तरमाहुः **अथवेति** । स्थूणानिखननन्यायेनेति भावः । न च भगवद्विषयकमोहाद्विशेषो वक्तुं शक्यः, असम्भवात्, तथा सति गच्छेयुश्चेत्याहुः **अन्यथेति** । ननु तच्छब्देन सर्वत्यागसर्वात्मभावाद्युक्तधर्मपरामर्शात्तस्य स्वत एव दृढत्वात्तथा सत्युभयविशेषणकथनप्रयोजनाभावाच्च नैतत्साधीय इति चेत् । सत्यम् । उक्तानुपपत्त्या प्रभुणा स्ववाक्यानां गमनार्थकत्वात्रोधनाचाय एव पक्षे तात्पर्यमस्तीति यद्यपि ज्ञायते, तथापि स्वरूपस्य रसरूपत्वेन भावात्मकत्वं यदुच्यते, तत्तु तद्विरोधिवचनाविर्भावेनानुपपन्नमिति शंकानिरासाय तदविरोध्यर्थकत्वमप्युच्यते वाक्यानां तात्पर्यविषयत्वेन । एतदेवाहुः **रत्नोर्थेत** इत्यादिना । यतः स्थितावेव भगवत्तात्पर्यमतो हेतोरापाततः प्रतीयमानार्थप्रत्यायनान्निवारयन्नपि फलतः स्थित्यर्थकानीत्यप्युच्यन्त इत्यर्थः ।

भगवद्वाक्यसंख्यातात्पर्यमाहुः **दशविधानामिति** । सगुणनिर्गुणभेदेन दशविधानां तथा, नत्वेतासामिति भावः । एतासां वस्तुतो निर्गुणत्वेपि लीलारूपत्वेन प्रस-
१०-२६-१८. स्त्यभावेन तदभावोपि न वक्तुं शक्य इति तथा । तर्हि निषेधस्य कोपयोगः । क्षुब्धदध्नो नवनीतस्येव क्षोभकवाक्यैस्तथाभूताभ्यो हार्दप्रकटने प्रभुशुश्रूषापूर्तौ वाचनिक्या अपि प्रपत्तेः सिद्धौ लोके सर्वात्मभावमार्गप्राकट्ये चोत्कटभावोद्दीपने रसपोषादिषु चेति बुध्यस्व । एतासु नायिकाभेदेन भावभेदो बोधनीयः, ते च क्वचिदेकरूपाः, क्वचित्कदाचिन्मिश्राः, क्वचित्कदाचिदुत्तरेणोपमर्दिताः, केचित्क्वचिच्चिरं स्थिराः, केचित्किञ्चित्कालं, केचिदाशु नाशिन इत्येवंरूपत्वं सत्त्वादिगुणेष्वस्तीति तद्दृष्टान्तेन बोधयितुं तावद्भिः श्लोकैरेता निवार्यन्त इत्याशयेनाहुः **तमो रज** इत्यादि । तथा सत्युपचारेण भावा एव तमआदिशब्दैरुच्यन्ते । तथा च तेषां भेदा यत्रैतादृश्यस्ता निरूप्यन्त इति सम्बन्धः । वस्तुतस्तु लीलामध्यस्थाः सत्त्वादयः प्राकृतेभ्यस्तेभ्यो भिन्ना एवात्र सन्ति । यतः प्रभुसंगमविलम्बहेतोर्दैन्यं कर्तुं प्रिये स्वसंगविलम्बासहिष्णुत्वहेतुभूतभावमुत्पादयितुमेतस्यैव पालनेन स्थैर्यं कर्तुं च समर्थाः । अत एवादौ तम एवोक्तं, ततो रजस्ततः सत्त्वम् । एतदेवाहुः **स्वान्तेति** । स्वस्य तमआदेरन्तः फलं लयादि । उक्तरीत्यैतद्गुणानां तत्र पर्यवसानात्तथा निरूप्यन्त इत्यर्थः । **प्रियं किमित्यत्र** । **अर्थादेतामामिति** । स्वातिरिक्तस्य प्रश्नविषयीकरणादिति

भावः । किञ्च । प्रियस्यानेकविधत्वे हि तेषां मध्ये किं करवाणीति प्रश्नः संगच्छते । तेन तदनेकविधत्वं विवृण्वन्ति **तत्प्रयोजन**मित्यादिना । देशादिव्यवहितत्वमेवेष्टात् कामिते विशेषः । व इत्येनैव चारितार्थ्ये द्वितीयपदेपि तदुक्तेर्भिन्नविषयकत्वं तस्यावगम्यत इत्याशयेन पक्षान्तरमाहुस्तत्रापीति । स्वामिनीष्वप्युक्तरूपसत्त्वादिभिस्तथात्वमस्तीत्येकैक-विधाः प्रत्येकैकचरण इत्यर्थः ।

१०-२६-२०. **भ्रातर** इत्यत्र । अदृष्टेत्यादिना प्रासंगिको लोकस्थित्या प्राप्तोर्थ उक्तः । **दृष्टं वन**मित्यत्राप्युक्ता गुणाः पूर्वोक्ता ज्ञेयाः । स्थितिपक्षे **गृहे न गन्तव्य**-

१०-२६-२१. मिति यदुक्तं तत्र हेतुमाहुर्यदि **गृहगमने**त्यादि । सर्वं त्यक्त्वा वनं प्रविष्टस्य तदपेक्षायामेव प्रायश्चित्तं कृत्वा तत्र गमनं स्मृतिवचनेन बोध्यते यत इत्यर्थः । प्रकृते तदभावान्न गन्तव्यमेवेति भावः ।

पतीन् सतीरित्यत्र । द्वितीयाबहुवचनान्यथानुपपत्त्याहुः **पतिविशेषणं**

१०-२६-२२. वेति । तथा च तेषामुपहासवचनमिदं भवति । यतो लोकव्यवस्थैतादृशीति तामुक्तवन्तः **पूर्वजन्मनी**त्यादिना । **भवन्तश्चे**ति । जायमाना इत्यर्थः ।

भर्तुरित्यत्र । **स्त्रीणामि**ति बहुवचनेन भर्तुरित्येकवचनेन च सर्वासां य एको भर्ता तस्यैवाविधानाद्भगवत एव तथात्वाद्भजनमेव विहितं क्रियत इत्याश-

१०-२६-२४. येन स्थितिपक्षार्थमाहुः **स्वभावतो जीवाना**मित्यादिना । अत्र बन्धुप्रजाशब्दाभ्यां तत्सखीभावपरम्परे उच्येते ।

दुःशील इत्यादिना क्रमेण यशऐश्वर्यवीर्यज्ञानवैराग्यश्रीविरुद्धा धर्मा उक्ता इत्या-

१०-२६-२५. शयेनाहुः **षड्दोषः स** इत्तीति । स्थितिपक्षे स्वतोपि धर्मा दुष्ट इति पातकसम्बन्धोक्त्या ज्ञाप्यते । कदाचित्त्याज्यत्वेन नित्यमभजनीय इत्यपि तथा ।

अस्वर्ग्यमित्यत्र । उपपतिसम्बन्धे दोषोक्त्या प्रभोश्च सहजपतित्वेन स्पष्टः स्थिति-

१० २६-२६. पक्षः । कुलसम्बन्धाभिमानवतीनामुक्त्या तत्र तदभावादपि तथा ।

प्रेष्ठं प्रियेतरमिवेत्यत्र । शानजर्थानुपपत्त्या पक्षान्तरमाहुः **अथवा तस्या**-

१०-२६-३०. **मि**त्यादि । भाषणेनैव सर्वतिरोधानमुक्तमिति पुनरपि तथैव चेद्भाषणं स्यान्न स्यादेव विशेषाभावादतः पूर्वविलक्षणमेतद्वाच्यम् । ततो जीवनमुक्तिसामर्थ्यं चात्र जातम्, अन्यथैतन्न स्यादिति वैलक्षण्यमेव निरूपितं **तस्यामप्यवस्थाया**-**मि**त्यादिना । अत एव **प्रतिभाषणमुक्तं मूले** । औदासीन्यपूर्वकपूर्वभाषणविरोधिसहासभाषणाभिप्रायेण । **तदर्थविनिवर्तिते**त्यत्र । **यदि त्यक्तोऽपी**ति । भगवदर्थं सर्वत्यागो भगवतोक्तः, पूर्वं त्यक्तार्यापरिग्रहोपि, यतः शुकादयोपि तथा चरन्ति, अधुना गृहपरिग्रहं वदन्ति, एवं सति भगवदुक्तमिति गृहं चेद्वाच्यं, तदा तदविशेषात्सर्वत्यागपूर्वकं भगवानेव कृतो न ग्राह्यः, गृहस्यैव ग्रहणे विनिगमकाभावादित्यर्थः ।

देवो यथेत्यत्र । अनंगीकार इति । अन्यत्र रागोत्सत्त्या विवाहिते रागाभाव
१०-२६-३१. उचित इत्यर्थः । यद्वा । द्वितीयस्यानङ्गीकार उचितः, न तु भर्तुरभजनमित्यर्थः । अनेन दृष्टान्तेन स्वस्य सर्वत्यागपूर्वकं भगवद्भजनेप्युपपत्तिरुक्तेति ज्ञापनायैवमुक्तमाचार्यैः । अन्यथा मूले प्रभुकर्तृकभजने दृष्टान्तोक्त्या विरोधः स्यादिति ज्ञेयम् । स्वाप्ययेति । आविष्कृतमिति भावार्थकक्तान्तम् । तथाच सुषुप्तिमपेक्ष्य तत्साक्षिरूपस्य भगवतः सम्पत्तिर्ब्रह्मसम्पत्तिर्मोक्ष इति यावत् । तद्दानार्थं वा भगवतः स्वाविष्करणमित्यर्थः । केचित्तु स्वयं प्रकाशमहस्वरूपज्ञानातिरिक्तज्ञानाभावकथनम्, श्रुतौ तु तयोरन्यतरापेक्षम्, तत्र विनिगमकमाहाविष्कृतं हीति । हि यस्माद्धेतोस्तत्तत्प्रकरण एव तदुक्तमित्यर्थ इति वदन्ति । एवमपि सति ब्रह्मस्वरूपाविर्भावस्यैवोक्तज्ञानाभावे निमित्तत्वान्न पूर्वस्माद्विशेषः । प्रथमवचनश्रवणानन्तरं चित्तवैयग्र्यमभूदित्यग्रिमवाक्यानां व्युत्क्रमेणोत्तरदानमिति ज्ञेयम् ।

अस्त्वेवमेतदित्यत्र । एवमित्यस्य विवृतिः सर्वरूपेति । पत्यादिसर्वसेवा-
१०-२६-३२. रूपेत्यर्थः । एवमुक्तौ हेतुमाहुः अन्यत्रेत्यादिना । पत्यादिसेवाविधेर्भगवत्सेवाविधायकत्वोक्त्या त्वमेव सेव्य इति पक्षेप्युपपत्तिरुक्तेति ज्ञेयम् ।

कुर्वन्ति हीत्यत्र । स्नेहेन हीत्यादि । क्रियायाः स्नेहसमानविषयकत्वस्यौत्स-
१०-२६-३३. र्गिकत्वादात्मन एव निरुपधिस्नेहविषयत्वाद्भगवति कृतस्यैव च तद्गामित्वात् त्वय्येव रतिं कुर्वन्तीत्यर्थः । अत्रौपाधिकस्नेहकथनस्यायं हेतुः । भगवता हि स्वातिरिक्ते स्वात्मौपाधिकी प्रीतिर्जीवस्येति पक्षमाश्रित्योक्तम् । स्वामिन्यस्तु वादिरीत्या प्रतिवादिमतमङ्गीकृत्य प्रौढ्या तत्पक्षं निराकुर्वन्तीति न कश्चिद्दोषः । नित्यप्रिय इत्यत्र । अन्यथा जारसेवापीत्यादि । ननु धर्मत्वे विहितत्वस्य प्रयोजकत्वादत्र तदभावान्न तथेति चेत् । उच्यते । प्राग्जन्मनि विवाहिते पुंसि जीवति पुरुषान्तरेण विवाहे दोषाकथनात्तत्र जन्मावच्छेदकमिति वाच्यम् । एवं सत्येतत्समानयोगक्षेमत्वाद्दिनस्यापि तथात्वं सुवचम् । न च तत्र पतित्वाभावान्न तथेति वाच्यम् । 'स वै पतिः स्यादकुतोभयः स्वयं जीवच्छवं भजति कान्तमतिर्विमूढा । या ते पदाब्जमकरन्दमजिघ्रती स्त्री'त्यादिवाक्यैः कालमयवति पतित्वाभावेनोभयोस्तुल्यत्वात् । एवं सति पतिभजनं विदधच्छास्त्रं हरिसेवामेव विधत्ते । प्रमोर्दुरापत्वेन व्यवहारनियमार्थं परं तथा स्मृत्यादिषु कथनमिति भावः । अत एव वाग्दत्तापि कन्या ततः श्रेयसि उपपन्ने तस्मै दीयते न पूर्वस्मै । नरदेश्वरेति सम्बोधनेन व्यञ्जितमर्थमाहुरतो वयं क्लिष्टा इत्यादिना ।

सिञ्चाङ्गेत्यत्र । अत्र सिञ्चनस्यावश्यकत्वे हेतुरुत्तरार्धेनोच्यते । तत्रापि यान इति
१०-२६-३५. वर्तमानप्रयोगेण स्वजीवनस्य क्षणमात्रमपि तद्विलम्बासहिष्णुत्वं ज्ञाप्यते । एवं सत्येतत्कालीनं जीवनमुक्तिश्च [illegible]

नुपपत्त्या कल्प्यते । यद्यप्युत्तरदानसमये न तदस्ति, तथापि पूर्ववचनानामुत्तरदानार्थमेव हृदि स्थापितत्वात्तदनन्तरं तदभावे सति चेत्साक्षात्सुधादानमन्ततो भापणमपि वा न भवेत्तदोक्तैव रीतिर्भविन्नीति हृदि कृत्वा पितृचरणैरुक्तं **वयमित्यारभ्य वक्तव्यमित्यन्तम्। नो चेद्वयमि**त्यत्र । **हरेणैव** दग्ध इत्यादि । वियोगादिपदमनुक्त्वा विरहपदं यदुक्तवत्यस्तज्ज्ञापितं भावविशेषमाहुः **स विपरीत** इत्यादि । अयमग्निर्न पूर्वोक्तः । तथा सति पुनरद्युक्तिर्न स्यात् । तथा च पूर्वस्मादस्य कठिनत्वं वाच्यम् । तदाहुर्नामन्युत्पत्त्या । हरदग्धः कामोऽप्यवस्थोप्यस्ति । उक्तामृतेन जीवेदपि । अनेन तु दग्धः क्षणेनैव भस्मसाद्भवति पदार्थः, पुनर्जीवनाशारहितश्च । उक्तरूपदाहकर्तृवाचकपदस्थवर्णवैपरीत्येनैतद्वाचकपदस्थवर्णयोरेतद्वाच्ये तद्विपरीतधर्मवत्त्वं लक्ष्यते । सोऽस्माभिरुक्तोऽनेन त्वित्यादिना । एवकारोप्यर्थे । तथा चोक्तरूपदाहकर्त्रा हरेणापि दग्धो यत्र कामोऽधुनापि न जीवति, तत्रोक्तरूपेण दग्धाः कथं पुनर्जीवेयुरिति भावः । पूर्वं सिञ्चनेन जीवनकर्तृत्वलक्षणोपि तद्विपरीतो धर्म उक्त इति प्रसुप्तरूपमेवात्र **रहः**पदेनोच्यते । तत्स्वत एव समर्थं, तत्रापि कोटिकन्दर्पाविकलावण्येन विभावानुभावादिसाभग्र्या च विशिष्टं किंकिं न कुर्यात्। एतदेवोक्तं **तत्रापि विशिष्टो विरह** इत्यनेन। लोकप्रसिद्धमर्थमाहुरे**कान्ताभावे**ति । ननूक्तरूपत्वे कदाचिदपि सुखदत्वं न स्यादित्याशंक्य श्लिष्टार्थकोयं प्रयोग इत्याशयेनाहुरनेन **त्वयेत्यादिना** । स्वरूपस्यैव विरहत्वमित्यर्थः । शृंगाररसस्य संयोगविप्रयोगात्मकत्वात्तद्रूपत्वात्प्रभोस्तथात्वं युक्तमिति भावः । ततः काष्ठात् । **उपाधेरार्द्रेन्धनत्वस्य**। दार्ष्टान्तिके स्वरूपातिरिक्तः स्नेहहेतुरुच्यते। तेन सोपधिस्नेहे त्वनेवंभाव इति भावः सूच्यते।

यर्ह्यम्बुजाक्षेत्यत्र । तत्वविशेषणोक्तितात्पर्यमाहुरस्मा**भिर्विचारित**मित्यादि । १०-२६-३६. 'भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत् कूटस्थो रतिरात्मन् यतो भवे'दितिवद्भगवेदार्थं विचार्य निर्दोषपूर्णगुण एव सेव्यः। स च भगवानेव । स च निर्दोषेणैव सेवितुं शक्य इति निश्चित्याधिदैविकाध्यात्मिकदोषानप्यपहाय तं वत्र इति तथा । **अरण्यजने**त्यत्र । ननु चात्रत्यत्यागोक्त्यैवान्यसंगत्यागोप्युक्त एवेति **तेनापी**ति ग्रन्थो न युक्त इत्यत आहुः **संगाभाव** एवेति । पूर्वं दोषाभाव उक्तोऽधुना प्रीतिहेतुर्गुण उच्यत इति न तथेति भावः । अत एव मूले **प्रीति**रुक्ता । अन्यपदार्थमाहुः **सर्वथे**ति । **तद्धर्मे**ति । भगवद्भावप्राकट्यादित्यर्थः । **सर्वदैव स्वम** इति । पूर्वमपि रमणपक्षे तस्य गोप्यत्वादेवमुक्तमिति ज्ञेयम् ।

वीक्ष्यालकेत्यत्र । **चतुर्विधो मोक्ष** इत्यादिना पुरुषार्थत्रयविवरणम् । १०-२६-३९. अत्रालकावृतादिपदैर्मोक्षादिनिराकरणोक्तेरयमाशयः । मूले हि प्रभोरङ्गान्येवोक्तानि दासीभवनहेतुभूतेक्षणविषयत्वेन । तथा च त्वां वीक्ष्येत्येतावतैव

चारितार्थ्येऽपि यत्प्रत्यङ्गनिरूपणं, तत्रापि भूषणानां, तत्साभिप्रायमिति स निरूप्यत इति । **सारूप्यमिवेति** । सारूप्यमुक्तिमिवेत्यर्थः । अत्रालिसारूप्यवदलकैः सारूप्यमुक्तिमन्तो भक्ता लक्ष्यन्ते । केशा बद्धा अपि भवन्ति, न त्वलकाः । इतोपि तथा । 'मत्सेवया प्रतीतं च' 'सालोक्यसार्ष्टिसामीप्ये'त्यादिवाक्यैश्च तासां चतुर्विधानामपि दास्यान्न्यूनत्वं सिद्धम् । तत्रैतद्रसप्राप्त्यभावादेतस्य च ततोधिकत्वाद्धि तदवरणम् । अत एवात्राप्यावरणरूपत्वमेवोक्तम् । नह्यन्तःस्थितिं विना परितः स्थितिमात्रेण रसपानमलीनां सम्भवति । मुखस्याम्बुजत्वमप्येतेषां रसपानाभावज्ञापनायैव नोक्तम् । किञ्च, कमलं हि न पेयमपि तु तत्स्थो रसस्तथा न तदास्यं किन्तु स्वयमेव रसात्मकमित्यपि ज्ञापयितुं तत्त्वं नोक्तमिति ज्ञेयम् । बहुभिरावरणान्महारसत्वं व्यज्यते । किञ्च । लीलाया नादस्य वा श्रवणेन पूर्वं जनितो यो भावः स एतद्दर्शनेन पुष्टः क्रियते । प्रचुरार्तेर्लयो विविधरसभावोत्पत्तिश्चेति स्थितिलयोत्पत्तिकर्तृवाचकवर्णात्मकनाम्ना सूच्यते । अतो युक्तं दासीभवनमिति भावः । त्वत्सुन्दरस्मितेत्यादिनोक्ताधिकारवतीनां देये दास्ये सुखं स्वाधीनं भवतीति तच्छेषभूतानामनङ्गीकारः सर्वत्र । **गण्डस्थलेत्यत्र** । **स्थले हीति** । एतज्ज्ञापनायैव स्थलपदम्, अन्यथा नोक्तं स्यादिति भावः । **भुजदण्डयुगमित्यत्र** । **उभयत्रेति** । इन्द्रादीनां भयदैरपि दैत्यैर्भगवच्छासनमनुलङ्घ्यमित्यैहिकानिष्टनिवर्तकः । देवानामपि तत्तथा । यज्ञाकरणे द्विजान्दण्डयत्येवेत्यनुलङ्घ्याज्ञत्वेन मुक्तिहेतुभूतशुद्धिजनकहविर्दानेन पारलौकिकसुखप्रद इत्यर्थः । हविर्दानेन परलोकसाधने विशेषमाहुः तत इति । भगवत्क्रियाशक्तिरूपवैदिकक्रियासम्बन्धिहविर्भोगादित्यर्थः । सर्वथा अन्तःकरणस्थानामपीत्यर्थः । (भुजदण्डावित्यनुक्त्वा द्वित्वसंख्यावाचिपदमेकवचनान्तं यदुक्तं तत्रायं भावः । द्वयोः पृथक् प्रतीतौ ह्यपेक्षाबुद्धिः । तया च द्वित्वम् । प्रकृते चाश्लेषदशायामुभयोर्भुजयोरेकवत् प्रतीतिः । सा च न स्वाश्लेषसमये संभवति, किन्त्वन्यस्याः । तथा च तादृग्दर्शनं भावोद्बोधकं भवत्येवेति । तथापि द्वयपदमनुक्त्वा युगपदं यदुक्तं तेन युगस्वभावो यथा न निवर्तयितुं शक्यः केनापि, तथा भुजदण्डयोरप्येकवचनसूचितार्थलक्षणः स्वभावो न मर्यादाशास्त्रादिभिर्निवर्तयितुं शक्यो भवति च । तथैवेति ज्ञाप्यते । तेनास्माकं दासीभवनमावश्यकमिति ।)

का स्त्र्यंग त इत्यत्र । भगवत्साक्षात्कारे सति मोहासम्भवमाशंक्याहुः **तेषां**
१०-२६-४०. **बलमिति** । मर्यादामार्गीयभगवद्धर्मेभ्योपि पुष्टिमार्गीयास्ते बलिष्ठा इति भावः । **आर्यचरितादित्यत्र** । नन्वार्या हि श्रेष्ठाः, ते च भक्ता एवेति तच्चरितमेव सर्वत्यागपूर्वकं भगवद्भजनमिति कथमेवं कथनं युज्यत इत्याशंकानिरासायार्यपदार्थमाहुः **प्रमाणबलविवेकिन** इति । ननु विवाहितभजनं हि प्रमाणमार्गः, भगवान् सर्वात्मक इति 'गोपीनां तत्पतीनां चे'त्यग्रे वक्ष्यमाणत्वाच्च तन्न हीयते, अधिकं परं सम्पद्यत इति नैषोपपत्तिरित्यत आहुः **प्रमाणे** हीत्यादि । तन्मार्गे हि पतित्वादयो धर्मा देहनिष्ठा

एव । अतस्तद्भिन्नत्वेनोपस्थितस्तद्वचनविषयो न भवति । 'यावद्वचनं हि वाचनिक'मितिन्यायात् । एवं सत्ययं मार्गो वस्तुविचारं न सहते । न च विहितत्वेनैवोत्तमता, निषिद्धत्वेनैवाधमतेति वाच्यम् । 'शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुष्वि'ति भगवद्वाक्यविरोधात् । न चैतद्विरोधापरिहारात्तन्न कर्तव्यमिति वाच्यम् । प्रमेयमार्गस्य स्वतन्त्रत्वेनैतस्माद्बलिष्ठत्वेन चैतद्विरोधस्याप्रयोजकत्वात्, अन्यथा प्रमेयमार्गोच्छेदापत्तिः । एतदेवोक्तं **प्रमाणे हीत्यारभ्य न दूषणमित्यन्तेन** ग्रन्थेन । ननु प्रमाणमार्गीयाणां प्रमेयमार्गीयाणां च मिथो भेदात्प्रमाणवाक्यं न प्रमेयमार्गीयं विषयीकरोति, यागविधिर्यतिमिव, अतो न विरोध इति चेत् । स्यादेवं यदि प्रमेयमार्गेपि विधिः स्यात्, यत्याश्रम इव । तथा सत्यधिकारिविशेषणमहिम्नैवान्यस्याप्राप्तेरविरोधः स्यात् । प्रकृते च प्रभ्वनुग्रहैकलभ्यत्वेन विध्यभावाद्वर्णाश्रमविशेषाधिकारेण प्रवृत्तं वाक्यं न संकुचितुमर्हति । बाधकाभावात् । अतस्ततोन्यथाकरणे विरोधो दुर्निवारः । प्रमेयमार्गप्रामाण्यं तु 'धर्मव्यतिक्रमो दृष्ट' इत्यादिना 'यः श्रुत्वा तत्परो भवे'दित्यन्तेन शुकवाक्येनैव वक्ष्यत इति सर्वमनवद्यम् ।

व्यक्तं भवानित्यत्र । ननु यथार्तौ सत्यामपीयदवधि तत्र स्थितम्, तथाधुनापि स्थेयमित्याशङ्कानिरासायाधुनार्तिहरत्वोक्तितात्पर्यमाहुः **इदानीं यथार्तिरिति** ।
१०-२९-४१.

इति विक्लवितमित्यत्र । अत्र षड्भिः श्लोकैः रमणं स्वकार्यसहितं निरूप्यते । तत्र संख्यातात्पर्यमाहुः **षड्गुणैश्वर्येति** । अत्रायं भावः । भागवते हि परमकाष्ठापन्नं वस्तु भगवच्छब्देनोच्यते । तस्य च षड्गुणवत्त्वमर्थः । प्रकृते
१०-२९-४२.
च रमणमुच्यते । तच्च विविधभावसाध्यम् । ते च निर्विकारे ब्रह्मणि न सम्भवन्तीति मायया प्राकृतगुणसम्बन्धाद्वैतत्कृतमिति कश्चिद्बहिर्मुखः शंकेत, तन्निरासो रमणनिरूपकश्लोकसंख्ययैव रमणस्वरूपनिरूपणेन क्रियत इति । एतदेवाहुः **षड्गुणैश्वर्येत्यादिना** । षड्गुणे यो भगवत ऐश्वर्यभावः स्वामिभावः । रमणे यदा यस्य गुणस्योपयोगस्तदा तत्प्राकट्यकरणेन रेम इत्यर्थः । न तु मायाद्यधीनत्वेनेति भावः । अत एव स्वयं पदम् । अन्त्येन श्लोकेन तिरोधानोक्त्या विप्रलंभोपि निरूपितो भवतीति पूर्णो रसोत्र निरूपितो भवतीत्याहुः **स्वरूपेणापीति** । विशेषतो लक्षणानि त्वग्रे वाच्यानीति भावः । वाक्यार्थानाहुः **सामान्येत्यादि** । विशेषरमणं बाह्याभ्यन्तरभेदेन द्विविधमिति । द्वितीयेन बाह्यं तदुक्तमित्याहुः **विशेष इति** । तृतीयेनान्तरम् । अजातस्मरकेलिजातस्मरकेलिभेदेन द्विविधा विलासा इति द्वाभ्यां तदुक्तिः । ननु नायिकामानापनोदनं चाटुकारैरुक्त्वैवं कथं कृतवानित्यत आहुस्तात्पर्यं **नायं लौकिकेति** । एतच्च श्लोकविवृतौ स्फुटीभविष्यतीति तथा । **तदैव स्वरूपमेवेत्यारभ्य वचः स्फुटमित्यन्त**ग्रन्थस्यायं भावः । प्राकृतपुरुषस्येक्षणादिभिस्तदा सञ्जातः कामश्चेत्स्यात्, तज्जनितश्वाङ्गादिविकारः स्यात्, तदा प्राकृत-

स्येव तन्नाशोपि स्यात् । न चैवम्, किन्तु 'रसो वै स' इत्यादिश्रुतिभिः स्वरूपमेव रसात्मकमिति रसशास्त्रसिद्धा यावन्तो भेदास्तत्सर्वरूपं स्वरूपमेवेति तादृशमेव पुरुषोत्तमस्वरूपमिति नानुपपत्तिः काचिदिति । यथा दैत्यान्प्रति वीररूपेणैवाविर्भावः, तेषां तथैवाधिकारात्, तथात्रैवमाविर्भाव इति हृदयम् । हासस्य मोहकत्वेनाधुना तत्प्रयोजनाभावमाशंक्य तदाहुः **तासां यथेत्यादि** । हासे प्रकर्षोयमेव । सख्याङ्गीकार एव हास्यसम्भव इति तथा । अन्यथोक्तरूपेण समं साम्याभावाद्रसो न स्यात् । सख्यस्वभावादेव न स्वस्माद्भिन्नतया गणना । सा तु मर्यादायामङ्गीकारे भवति । तथा सत्येवंभूतानामपि मर्यादायां पातने भक्तिमार्गमर्यादानाशः स्यात् । तदेतदुक्तं **नाशनार्थमित्यन्तेन** । उद्धारोत्रैतदुक्ततापात् । उत्कटतापदर्शनेनैव तदुद्धरणार्थं दया । तथा च हासेनैव तापनाशः सूचितो भवति । अन्यथा रसाभासहेतुत्वेन तां न वदेत् । अथवा । मूले सदयं रेम इति सम्बन्धः । इदं हि रमणमभूतपूर्वमादावुक्तं सामान्यरूपं च । अतोत्र न पूर्णरसदानं, किन्त्वग्रे । तेन न भगवत्समानं सामर्थ्यमधुनास्तीत्यधिकक्रियाशक्त्याविर्भावने नायिकानामुपमर्दन रसनाशः स्यादिति, तदभावाय दयोक्ता । यद्यप्येवं रसः पुष्टो न भवति, तथापि रसाभासभावाभासैर्मुख्योरसः पोष्यत इतीदं रमणमग्रिमरसपोषायोपयुज्यते । अत एवाभासे तापापनोदनार्थं सामान्यलीलामाहेत्युक्तमाचार्यैः ।

(**क्रिया सर्वापि सैवेत्यत्र** । भगवतो भक्तानां चालौकिकत्वं लौकिककामाभावं चाहुः **क्रिया सर्वापीति** । अयमर्थः । लोके रससम्बन्धिनी क्रिया लौकिककामविषयिण्येव प्रसिद्धेति भगवच्चेष्टायाश्च तत्सजातीयत्वात्कामोपि लौकिक एव भविष्यतीति कस्यचिद्भ्रान्तस्याशंकां वारयितुमाहुः **परं काम** इति । लौकिकः कामो न विद्यत इत्यर्थः । ननु भगवान् पुरुषोत्तम इत्यस्तु नाम लौकिककामाभावः, एतासां लौकिकतद्वत्त्वमस्त्विति चेत्तत्राहुः **तासां कामस्येति** । अयमर्थः । यदि भक्तानां लौकिकः कामः स्यात्तर्ह्यलौकिकेन भगवत्कामेन पूर्णो न स्यात्, तयोः परस्परमेकजातीयत्वाभावात् । विजातीयेन विजातीयस्य पूरणासम्भवात् । अतो भगवत्कामेनैव तासां कामस्य पूर्तेर्भगवत्तुल्यत्वं तासामपीति ज्ञापनायोक्तं **तास्तथेति** । यथा भगवानप्राकृतो लौकिककामरहितस्तथैता अपीत्यर्थः । अन्यथा भगवतः पूर्णरसोद्बोधो न स्यात्, न्यूनाधिकत्वेन भाववैजात्यात् । ननु कामो न विद्यत इति कथनाद्भगवति तत्सम्बन्धात् भक्तेषु चोभयविधकामाभाव एवास्त्विति चेत् । न । पञ्चमाध्यायोक्तकारिकाविरोधात् । तत्र लौकिकनिषेधपूर्वकमलौकिकस्य भगवति निरूपितत्वात् । तथा हि । 'अत्रैव स्लोके प्रकटमाधिदैविकमुत्तमम् । कामाख्यं सुखमुत्कृष्टं कृष्णो भुंक्ते न चापर' इति । अत्र कामसुखस्य आधिदैविकत्वोत्तमत्वविशिष्टस्य प्रभोर्भोक्तृत्वकथनाल्लौकिकस्यैव तस्य निषेधो, न त्वलौकिकस्यापि, अतो भगवद्भोग्यास्वपि तथैव,

१ 'अत्र कारिकाव्याख्याने टिप्पणीपुस्तकेषु दृश्यते, तत् पाण्डुलिखने नास्तीति श्रीगोकुलनाथाना तत् प्रतिभाति, लेखरीत्यापि तथेतिचे'ति श्रीपुरुषोत्तमाः ।

अन्यथा भगवतो भोक्तृत्वमेव न स्यात् । तस्मात् सुष्ठूक्तं **तास्तथेति** । विपक्षे बाधकमाहुः **कामेनेति** । प्राकृतेनेति शेषः । तादृशस्य संसारजननावश्यकत्वात् । प्राकृतेषु सर्वत्रैव तथा दर्शनात् । अत्रत्यभक्तेषु संसाराभावात्प्राकृततदभावो निःसन्दिग्ध इति ज्ञापनायोक्तं **न संशय** इति । प्राकृतत्वाभावे हेत्वन्तरमाहुः **अतो न कापीति** । यतोस्य भावस्यालौकिकत्वम्, अत एव मर्यादामार्गीयमोक्षेच्छूनामपि प्रवृत्तिर्न बाधितेत्यर्थः । मोक्षमार्गे कामाभाववतामेवाधिकारात् । तथा च श्रुतिः 'श्रोत्रियस्य चाकामहतस्ये'ति । तस्माद्यद्यस्य भावस्य प्राकृतत्वं स्यात्, तदा तत्कृतलीलाया अपि तथात्वात्तच्छ्रवणे लौकिककाव्यादिवत् कामोद्बोधात्तेषामेतल्लीलाश्रवणस्य विपरीतफलकत्वात् प्रवृत्तिर्न स्यादित्यर्थः । चकाराद्भक्तिमार्गीयापि मर्यादा न भग्नेत्यर्थः । तस्मादस्य भावस्यालौकिकत्वात्तेषामेतल्लीलाश्रवणे फलमुखां प्रवृत्तिमाहुः **अत एतच्छ्रुताविति** । एतल्लीलाश्रवणेन लोकः सर्वोपि साधारणोपि लौकिककामरहितो भवेत् । नन्वेतादृक्श्रवणमात्रेण कथं लौकिकतदभाव इति चेत्तत्राहुः **भगवच्चरितं सर्वमिति** । वस्तुस्वभावादेवेत्यर्थः । यद्वस्तु यादृशं भवति तत्स्वनिष्ठमपि तादृशं करोति । एतल्लीलाया लौकिककामराहित्यादलौकिकत्वप्रतिपादकत्वादेतत्परोपि लौकिकतद्रहितः सन्नलौकिकनिर्हेतुकभगवद्भावयुक्तो भवतीत्यर्थः । श्रवणं तु लीलातात्पर्यावधारणपूर्वकम्, न तु यथा कथञ्चित् । **अतः कामस्येति** । यत इयं लीला लौकिककामरहिता अत एतच्छ्रवणेन लौकिककाव्यश्रवणवन्न लौकिकतदुद्बोधः । ततः कारणात् 'कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीर' इति शुकवचनं स्फुटं स्फुटार्थमित्यर्थः ।) **अतो न कापीति** । मोक्षफला मर्यादा कामे सति न मोक्षः, तदभाव एव सः, इति लक्षणापि न भग्नेति सम्बन्धः । तथा च श्रुतिः मोक्षरूपब्रह्मानन्दप्राप्तौ 'श्रोत्रियस्य चाकामहतस्ये'ति । तत्रोपपत्तिमाहुः **अत एतच्छ्रुताविति** । ननु कामलीलाश्रवणेन लौकिकभावोत्पत्तिर्लौकिकस्यावश्यं भवतीति विपरीतं प्रयोजनं स्यादित्यत आहुः **भगवच्चरितमित्येकं** श्लोकम् । वस्तुस्वभावादेवाद्भुतकर्मत्वाच्च प्रभोरेतच्छ्रवणे तदुद्बोधो नेत्यर्थः । यतो न भवत्यत एव शुक एतल्लीलाश्रवणादिफलं कामाभावमेव 'काममपहिनोती'ति प्रकटमेवाह । यद्यपि हृद्रोगमपहिनोतीत्येवमेव वाच्यम्, तावतैव चारितार्थ्यात्, तथाप्युक्तलीलास्वरूपं ज्ञापयितुं स्फुटमाहेत्यर्थः ।

उदारहासद्विजकुन्देत्यत्र । **कुन्दत्वं स्नेहस्येति** । काममात्रपर्यवसायी स्नेह इति ज्ञापनार्थमित्यर्थः । कुन्दानां रसमात्रोपयोगित्वादिति भावः । अत्रायं

१०-२९-४२. भावः । स्वामिनीनां सदा निरुपधिस्नेह एव चेत्स्यात्तदा खण्डितादिभावासम्भवेन पूर्णरसभोग उभयत्रापि न सम्भवतीति निरुपधित्वांशमाच्छाद्य कामोपाधिकत्वं सम्पादितवान्, नैतावता भक्तिमार्गे हीनता । आद्यप्रवृत्तेर्निरुपाधिकत्वाद्भगवता स्वानन्ददानार्थं स्वयमेतद्भावजननादिति । तर्हि कामनिवृत्तौ तन्निवृत्त्यापत्तिरित्याशंकानिरासो

दीधितिनिरूपणेन कृतः । स्नेहरूपदन्तेषु दीप्तिरुत्तरोत्तरमेकरूपेण प्रकाशमानत्वमेव । एतमेवार्थं परोक्षेणाहुः **तथा सती**त्यादिना । ननु भगवानेतत्प्रार्थनया रमते, न तु स्वयं विनैव प्रार्थनाम् । तथा सति स्वामिनीष्वियदवधि यावान्भावः सम्पादितोस्ति तत्पूरणमेवोचितम्, न त्वधिक(संपादन)म्, प्रयोजनाभावात्, तावतैव श्रोतॄणां कामदोषनिवृत्तिसंभवादुदारहासादिकरणं कुत इत्याशयेन **यद्यपी**त्यादिनाशंक्यात्र भगवद्रिरंसाया एवोपक्रान्तत्वात्स्वानुरूपसर्वसामग्रीसम्पादनमावश्यकम् । अत एव न पूर्णमनोरथ इवौदासीन्येनैतत्सन्तोषार्थमेव रमते । तथा सति रमणस्वरूपाभावेनैतत्सन्तोषासम्भवप्रसंगः, किन्तु लौकिकनायकवद्विकारयुक्तः । एतज्ज्ञापनायैव मूले दृष्टान्तोयमुक्त इति तत्समाधानमाहुस्**तथापी**त्यादिना । कलङ्कवत्त्वोक्त्या प्रकृते विकारभाववत्त्वं सूच्यते । स यथा पूर्णोप्यपूर्णो भवति, पुनः क्रमेण पूर्णोपि, न तु सदा पूर्ण एव, तथात्रापीति ज्ञाप्यत इति भावः । **वन्धातिरिक्ताः सर्वा** इति । स्वामिनीनामुडुस्थानीयत्वात्तेषामेवावरकत्वोक्त्यावरणस्य च बहिः परितः स्थितिनियमेनात्रापि बाह्या एव लीला उक्ता भवन्तीत्यर्थः ।

मालामित्यत्र । प्रकरणाद्रसपोषार्थत्वात्सर्वस्य चरणमपि तदर्थमेवेत्याशयेनाहुः
१०-२६-४४. **एषा हि गति**रिति । **इति षड्विंशोध्यायः ।**

सप्तविंशाध्यायार्थनिरूपणाय पूर्वाध्यायोक्तान्तर्धानतात्पर्यवर्णने । **पुष्टो यथा-**
१०-२७०. **न्त**रित्यादि । अत्रायं भावः । संगमे ह्यग्रिमाग्रिमरसार्थं नवो नवः प्रयत्नो भाव्यते, न तु पूर्वानुभूतो रसः पोष्यते । सर्वेषां तेषां स्वतन्त्रत्वात् । संयोगे यथा यथा रसानुभवाधिक्यं, तथा तथा विप्रयोगे दुःखाधिक्यमित्यनुभवसिद्धम् । एवं भावे संस्कारमात्रशेषस्य पूर्वरसस्योपमर्दकाग्रिमसंगमरसाभावेनान्तरेवातिपुष्टो भवति तथा, यथा पूर्वानुभूतलीलास्वरूपात्मका देहेन्द्रियप्राणान्तःकरणात्मानो भवन्ति । किमुत । अत एवासावहमित्यादिरूपं ज्ञानं तथैव क्रिया च भवतः । एतदनन्तरं जाते संगमे पूर्वसंगमादधिकरसत्वस्फूर्तिरप्यत एव । अन्यथा संगमत्वाविशेषेण तदनुपपत्तेरिति दिक् । यद्यपि संगमोत्तरकालीनविप्रयोगमात्र एवैतादृशत्वं सम्भवतीति नान्तःप्रवेशापेक्षा, तथाप्येतद्विप्रयोगस्यातिविषमत्वेन क्षणमात्रेणैवान्यथाकरण एतद्रसदानं नोपपद्यत इति रसात्मकत्वात्स्वरूपस्य स्वयमेव प्रविष्ट इत्याहुस्तदर्थं **भगवा**निति । **चत्वारोऽत्रे**ति प्रियप्राप्तिसाधनानुष्ठानरूपं तद्रसस्वभावप्राप्तं गुणगानं चतुर्थोर्थः । **रसासक्ति**रिति । रसासक्त्यादित्रयमस्मिन्नध्याय उच्यते । एता हि रसासक्त्यैवान्वेषणपराः, अन्यथा गृहानेव गच्छेयुः । एवं सति यदेव बहिः संवेदनं तदेवान्वेषणमिति तदुक्त्या रसासक्तिरेवोक्ता भवतीति तथा । अग्रे स्पष्टम् । उक्तार्थत्रयनिरूपणे प्रकारविशेषमाहुः **उद्देशत** इत्यादि । आद्यैस्त्रिभिस्त्रयाणामुद्देशः कृतः । अन्वेषणं रसासक्तेर्लक्षणमसाधारणो धर्मोनुमापक इति यावत् । लीलाया एतदन्तःस्थित्यनुमापक एतासु तदाविर्भावः । गर्वाभावज्ञापकं सपत्नी-

भाग्याभिनन्दनादिकम्। अन्वेषणफलं च पददर्शनम्। लीलावेशफलं प्रियाधीनत्वस्वानधीनत्वदर्शनेपि प्रिये दोषारोपाभावपूर्वको 'रेमे तया चे'त्यादिनोक्तो भावः। गर्वाभावफलमितरविस्मृतिपूर्वकं तत्प्राप्त्यर्थैकः प्रयत्नः।

१०-२७-१. **करिष्य इवेत्यत्र। तथात्र काल** इति। अवतारसम्पूर्तिकाल इत्यर्थः।

गत्यानुरागेत्यत्र। अतःस्मितेन मन्दहासेनेति। अन्यथा प्रकृष्टोदारहासस्यैव
१०-२७-२. पूर्वमुक्तत्वादधुना स्मितं न वदेदिति भावः।

गतिस्मितेत्यत्र। भगवति स्वधर्मानिति। स्वगतौ प्रियगतिभावना जातेति
१०-२७-३. तथा। **भगवद्धर्मेष्विति**। भगवत एतासां च मिथो वैलक्षण्यं गत्यादिषु सहजम्। अधुना तु भगवद्गत्यादिवदेव गत्यादि, संस्थानविशेषोपि तथा, न तु प्राग्वत्। तथा च तद्भावापन्ना मूर्तिर्जातेत्यर्थः।

गायन्त्य उच्चैरित्यत्र। प्रथमतो मिश्रभावादिति। सुप्तप्रबुद्धन्यायेन
१०-२७-४. वहिःसंवेदनासंवेदनाभ्यां संगमविरहविषयकसमूहालम्बनज्ञानं जनितमिति तथेत्यर्थः। ननु प्रभोरानन्दरूपत्वेन तद्भावेषु सत्सु सदानन्द एवोचितो, न तु वक्ष्यमाणावस्थेत्साशंकाभावाय तस्याः स्वरूपमाहुः **शब्दो हि धूमवदिति**। अत्रेदमाकूतम्। एतावत्कालपर्यन्तं भगवता स्वरूपानन्दो न प्रकटितः। तस्य स्वरूपात्मकत्वेन तत्प्राकट्यं विना तदनुभवासम्भवात्। 'तथा परमहंसाना'मिति वाक्यात् यादृशेन भक्तियोगेन तत्प्राप्तिस्तादृकृतत्प्रकटनायाधुनैव पुरुषोत्तमावतारात्। प्रभुप्राकट्यानर्थक्यापत्तिभिया श्रुत्याद्युक्तसाधनसाध्यत्वं स्वरूपानन्दस्यैतत्साधनभक्तियोगस्य च न वक्तुं शक्यम्। अत एव कुन्तीभिः पूर्णसाधनवतामप्ययं दुर्लभ इति ज्ञापनायैवाधिकारिविशेषणान्युक्तानि। एवं सति स्वरूपस्य रसात्मकत्वेन अत्रत्या भावाः सर्वे रसात्मका एवेति मन्तव्यम्। अन्यथैतच्छ्रवणमात्रेणापि स्नेहोत्पत्तिर्न स्यात्। एवं सति तद्वार्तानभिज्ञस्य तवेयमाशंका कंटकवेधदृष्टान्तेन कामिनीकुचकुम्भे नखवेधस्यापि दुःखहेतुत्वसाधनमनुहरतीत्यलमुक्त्या। एवं सति तापकत्वेन विरहोग्निरेव। स यथार्द्रेन्धननिष्ठमग्निं स्वयं तत्संयुक्तः प्रकटीकुर्वन्नार्द्रत्वेन प्रतिबन्धात्तत्रासमर्थो धूममेव जनयति, तथायमप्यग्निरापाततो वहिःसंवेदनेन न सर्वात्मना तिरोधानास्फूर्तिरिति तज्जनितत्वेन तादृश एव जातः। वहिःसंवेदनाभावे तिरोधानास्फूर्तिरिति यावानंशस्तस्य तावान्सोत्रार्द्रत्वस्थानीयः। अन्यथैकदेव पूर्णतत्प्राकट्ये क्षणमात्रेण सर्वं भस्मसात्कुर्यादेव। तथा सत्यस्याग्नेर्धूमो गानरूपः शब्द एव। एवं सत्यर्धज्वलितदारुतुल्यता सिध्यति। तदेतदुक्तं **याह्याभ्यन्तरयोगत** इत्यनेन। यथा स पूर्वमेकरूप एव भवति, ततोनेकधा, तथोत्तरोत्तरं विचित्रभावजननाद्गानमपि विचित्रं भवतीत्याहुः **विराजत** इति। यथाऽगर्वादिधूमस्य निर्गच्छतः शोभा, तथास्यापि शब्दस्य गानरूपत्वमिति ज्ञापनाय विराजत इत्युक्तम्। अतोऽ-

त्रेति । यतो हेतोर्भगवान्रसात्मकः, तदात्मका एव च भावाः, अतो हेतोरखण्डाद्वैतभानादिदं स्वामिनीनां ज्ञानमुत्तममित्यर्थः । एतदेव स्फुटयन्ति **धर्मिधर्माणामिति** । एते भावाः स्थायिभावस्य व्यभिचारिभावा इति धर्मिणः श्रीकृष्णस्य तद्धर्माणां विहारादीनां जीवतद्धर्मापेक्षयोत्कृष्टत्वात् तथेत्यर्थः । उक्तज्ञाने जीवतद्धर्मयोरेव सत्त्वात्तदपेक्षयैतयोर्न्यूनत्वादिति भावः ।,अथवा । यथा प्रियवद्विहारादिस्तथैवेदं गानमपीत्याहुः **यथा भगवत इति** । प्रीतिविषयाणामाकारणं भगवद्धर्मः सोत्रोक्तः । अत एव तदा स्वागमनवदधुना न प्रभोरागमनम् । तस्य स्वधर्मत्वात् । भगवान् कौतुकार्थमत्रैव कुत्रचिल्लीनोस्ति रसपरवशश्च । अतोस्मद्गानेनागमिष्यतीति ज्ञात्वा जगुरित्यर्थः । अस्मिन् पक्षे बहिःसंवेदनमेवास्ति, परं त्वद्दर्शनजालोक्तरीत्या तथा करणमिति ज्ञेयम् । सर्वथा बहिःसंवदने हि विचयनमिति । तत्र हेतुमाहुः **कृत्रिमत्वादिति** । आत्मनि भगवद्भावस्य कृत्रिमत्वात्तिरोधानमावश्यकम् । तद्धेतुर्विचित्रभाववतीनां मिथो मिलनं तदाहुः । यतो हेतोर्मिलितास्ततो हेतोः स्वतोन्यतश्च **विशेषविज्ञानात्तथेति** योजना । यद्वा । भगवद्भावापन्नाऽपरां सखीं मत्वाक्षेपादिकं करोतीति। स्वतो मिलनम् । तदान्यासामस्यां भगवत्त्वबुद्ध्यभावात् तद्भावानुरूपकरणेऽस्या विशेषविज्ञानमभूत् । अन्ययापि भगवद्भावापनयाऽस्यां सखीत्वज्ञानेन मिलनमन्यतो मिलनम् । तत्रापि पूर्ववत्तथा । नन्वग्रे पूतनासुपानकरणदशापन्नप्रभुभावापन्नैव पूतनायन्त्या एव स्तनमपिबदिति यथा, तथात्रापि कुतो न । तथा सति विशेषविज्ञानासम्भव इत्यत आहुः **कृत्रिमत्वादिति** । अग्रे लीलाविर्भावस्य वक्तव्यत्वाद्यादृशी लीला तादृश्येवाविर्भवतीति सर्वमुपपद्यते । प्रकृते तु प्रियादर्शने सत्युत्कटभावेन प्रियमात्रस्फूर्त्या स्वस्मिन्नपि तत्त्वेन भानमिति कृत्रिमत्वमस्य । एवं सत्यनेनैव भावेन यदोक्तन्यायेनान्यज्ञानं तदा तिरोभावस्फूर्तिरित्यर्थः । बहिःसंवेदने सत्यपि मादकद्रव्यस्वभावादुन्मत्तो विवेकरहितो भवति, एवं विरहभावस्वभावजवैकल्यात्तथेत्याशयेन तत्रापि न सर्वात्मनेत्याद्युक्तम् ।

आकाशवदन्तरमित्यत्र । **शुको** ह्रीत्याद्याभासमारभ्या**यमपीत्यन्तम्** । अत्रायं भावः । 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति भगवद्वाक्यात् भक्तिमार्गे ज्ञानं प्रतिबन्धकमिति मन्तव्यम् । युक्तं चैतत् । आत्मत्वेन भगवज्ज्ञाने तद्दिदृक्षादिजनितार्त्यसम्भवेन प्रभुप्रादुर्भावासम्भवात्सर्वस्वनाश एव यतः । एवं सति यत्र कालादिनियन्तृत्वज्ञानात्मकप्रतिबन्धके सत्यपि कंसादिभयज्ञानरूपः स्नेहकार्य एव देवक्यां जातः, तत्र प्रतिबन्धरहितानां स्नेहमात्रकार्यसम्भव इति किं वक्तव्यमिति कैमुतिकन्यायः सूच्यते । किञ्च । तत्र देवकीधर्मरूपं ज्ञानं प्रतिबन्धकत्वेनोक्तम्, अत्र तु विशेषणेन भगवद्धर्मस्तथोक्तः । एवं सति यत्रायमेव न प्रतिबन्धकः, तत्रान्यस्य का वार्तेत्यपि ज्ञापनायेदं विशेषणम् । तथा च हेतुसत्त्वेप्युक्तज्ञानाभावेन भक्त्युद्रेकः सूच्यते । एतदेवोक्तं **तासामज्ञानकथनार्थमिलनेन** । शुकस्यैवं ज्ञानाभावे

त्वेतत्कथनेप्यशक्तिः स्यात्, जीवनं वा न स्यादिति शुकज्ञानोक्तितात्पर्यं वेदितव्यम्। अपरञ्च। सर्वेष्वित्यादिपदमनुक्त्वा नपुंसकलिंगभूतपददानेन प्रभौ च पुरुषत्वोक्त्या यथा षण्ढस्य पुरुषनैकट्ये रसोत्पत्तिर्न, किन्तु स्त्रीणामेव। तथा प्रभुसान्निध्येपि भूतानां रसानुत्पत्तिः, एतासां तदुत्पत्तिश्च युक्तेति ज्ञाप्यते। तेनैतासामेव प्रभुरसाभिज्ञत्वमित्युक्तं भवति। एतावान्परं विशेषो, बहिःसम्बन्धे विलक्षणो भाव उत्पद्यते, अन्तरेव सम्बन्धे तु विलक्षण इति। कात्यायनीस्वरूपनिरूपणप्रस्तावे कथितं स्त्रीत्वमत्र विवक्षितमतो न शंका कापि। अपरञ्च। भगवति दृष्ट एवासां बहिरिदमन्तरिदमिति ज्ञानम्, अधुना तदभावेन तयोरप्यभावादप्यन्तरननुसन्धानमुचितम्। परन्तु प्राप्तिरपेक्षितेति यत्र कुत्रचित्प्रश्न इत्याशयेन बाह्याभ्यन्तरेत्यारभ्य पृच्छन्तीत्यन्तेनोक्तम्। सर्वत्रैव विद्यमानमित्याद्यविशेषणतात्पर्यम्। 'पुरि हृदयाकाशे शेत' इति व्युत्पत्त्या आत्मनीत्यादिद्वितीयविशेषणस्य। यद्वा। प्रकरणाद्भक्तिमार्गाद्भगवता ये बहिर्भाविता जीवास्ते बहिर्भूतपदेनोच्यन्ते। तथा च तेष्वेवाकाशवन्निराकार इवाप्रत्यक्षतयैव सन्तं तत्राप्यन्तरमेव न तु कदाचिदपि बहिःप्राकट्येन। वस्तुतस्तु भक्तिमार्गीयेषु पुरुषत्वेन साकारं बहिःप्रकटं भर्तृरूपमतो बहिर्विचयनमेवोचितम्। न हि स्त्रीणां स्वभर्तुरन्तरन्वेषणमन्तःस्थितिज्ञानं वा स्वास्थ्यहेतुः, पुरुषार्थाय वा भवतीति मूलार्थः।

नन्दसूनुर्गत इत्यत्र। **प्रभुपुत्र इति न ज्ञात** इति। चोरत्वेन न ज्ञात
१०-२७-५. इत्यर्थः। प्रभुपुत्रो यतो न चौर्यं करोतीति भावः। **प्रेमहासावलोकनै**रित्यत्र। **तमो रज** इत्यादि। यस्य यादृशं मनस्तस्य तादृश्यैव रीत्या तद्भरतीति भावः।

तुलस्यास्तदुभयमिति। पुष्पकृतः फलकृतश्च यो विधिविनियोग[1]स्तदुभयं
१०-२७-६. नास्तीत्यर्थः।

क्वचित्तुलसीत्यत्र। **सा चेत्यादि**। पूर्वं हि भक्तात्वेन निष्कामा निरन्तरं चरणारविन्दमेव सेवमाना स्थिता, लक्ष्म्यादीनामप्यत एवैषा पूजासाधनमन्यथा
१०-२७-७. सपत्नीत्वं ज्ञात्वा तथा लक्ष्म्यादयो न कुर्युः। तथा सति नायिकात्वे यो रसः स नानुभूतो भवतीत्यसप्रीतिमज्ञात्वा तूष्णीं तिष्ठेतेति मत्वा तथाहुरित्यर्थः। **अस्मदाद्यपेक्षयेति**। अवस्थाविशेषकृतदैन्याविर्भावज्ञापनायैवमुक्तम्। अन्यथा सपत्नीत्वं ज्ञात्वापि नेमां पृच्छेयुरिति भावः।

याहुं प्रियांस इत्यत्र। **समतया गमनेनेत्यादि**। यद्यपि चरणचिह्नादर्शनेपि भगवद्भावस्वभावादेव तल्लीलास्फूर्तिः सम्भवति, अत एवालिषु तुलसिकासम्ब-
१०-२७-१२. न्धित्वोक्तिः, तदनुसारेणाग्रे गमनाभावश्च, तथाप्यधुना प्रियदर्शनवता ज्ञापितः प्रियः शीघ्रं प्राप्स्यत इति ज्ञात्वा प्रश्नपरा इति, तत्राप्युन्मत्तदृष्टान्तस्योक्तत्वादत्यनवहिता इति

[1] विविधो विनियोग इति पाठः। द्विविधविनियोगः स्यादपि।

चिह्नदर्शनेपि तन्मार्गेण न गताः । किञ्च । यथा सहभूताया अपि स्वामिन्याश्चरणचिह्नादर्शनं पूर्वं पश्चाच्च दर्शनं तथेहाप्येकत्रैकदा पददर्शनं, नाग्रे । तीक्ष्णभावशान्त्यर्थमेव पदचिह्नानां दर्शितत्वात्तस्य च तावतैव शान्तेः । अग्रे तु भगवदावेशकार्यत्वेन वक्ष्यत इत्याशयेनाचार्यैरेवमुक्तम् । पदचाञ्चल्यज्ञापितालिनिवारणयत्नेनैव गृहीतपद्मत्वं ज्ञायते । तेनांजसा तदपीडनेन च तत्सम्भवात् । मदस्य संगाभावहेतुत्वमनुभूयते । तेषां च समदानामपि संगे मर्यादामार्गीयभक्तिरसजनित एव मदो भवितुमर्हतीति तुलसीसंबन्धकथनम् । अनवसरेपि गमनान्मदान्धतोक्ता । एवं रसासक्तस्येतरानुसन्धानासम्भवात् स्वमिलनं दुर्लभं जानन्ती तरुप्रणामं चेदनुसन्धास्यत्यस्मिन्नपि समये तदास्मानपि कदाचिदनुसन्धास्यतीत्याशयेन प्रश्नं चक्रे । अन्यथाऽलीनामन्धत्वनिरूपिकायास्तरुप्रणत्यभिनन्दनं प्रश्नोऽनुपपन्नः स्यादिति भावः ।

लीला भगवतस्तास्ता इत्यस्याग्रे । **भक्त्यातिमत्ता** इत्यादि । एतासां प्रिये स्नेहसाम्येपि क्वचिद्भगवद्भावे क्वचित्पूतनादिभावे हेतुमाहुः **भक्त्येत्यादि** ।
१०-२७-१४. नायिकाभेदेन हि भावभेदः । एकस्या अपि समयादिहेतुभेदेनापि तथा । एवं सति भगवत्तल्लीलातत्सम्बन्धिनां मध्ये यस्य यदा यादृग्रूपस्य यस्य स्मृतिस्तस्यास्तदा तदात्मकत्वं विशुद्धभावत्वाज्जलादिसम्बन्धिस्फटिकस्येवेति प्रघट्टकार्थः । तथा च भगवन्मात्रज्ञानमतिमत्तत्वम् । तत्सम्बन्धिनामपि ज्ञानमीषन्मत्तत्वम् । लीलासम्बन्धिनां येषां ये भावास्तदात्मकतायां ते भावा अपि स्वत एव भवन्तीति ज्ञापनाय **रोषत** इत्यादिना तदुद्देशः कृतः । भावेषु दृष्टान्तेन वैजात्यज्ञापनाय **सत्त्वाद्युक्तिः** । ननु तथापि भगवज्ज्ञानं विहाय पूतनादिज्ञानं यत्र, तत्र ततो न्यूनभावता गम्यते, तत्र हेतुरपि वक्तुं न शक्य इत्यरुच्या पक्षान्तरमाहुः **अतो न न्यूनभाव** इति । हि यस्माद्धेतोः शकटादिभिराविष्टा अतो न न्यूनतेत्यर्थः । अत्रैवं ज्ञेयम् । अत्र तापलीलाभगवतामन्योन्योपमर्दकभावेनाविर्भाव इति पूर्वमुक्तम् । सपदि तु लीलाया आविर्भाव एतासूच्यते । सा च भगवत्कृतितत्सम्बन्ध्यात्मिका विशिष्टा, न त्वन्यतरमात्ररूपा । तथा च यदंशो यत्राविर्भूतस्तत्र स एवांश उच्यते, अन्यथा पूतनासुपयःपानसामयिकदशापन्नभगवत्स्वरूपभावापन्नैव पूतनायन्त्याः स्तनं कथं पिबेत् । पूतनायन्ती च तस्यामेव पूतनावत् कथमाचरेत् । अतो न क्वापि कुतश्चिन्न्यूनतेति सारम् । अस्मिन्पक्ष एका लीला यत्राविर्भूता तत्र न द्वितीयेति सिध्यति । तथा सति चिरं विलासोयं न स्यादिति पक्षान्तरमाहुर्भगवद्भावापन्नायाः सकाशात् पूतनोलूखलादिभावापन्ना उत्कृष्टा इति ज्ञापनाय **सर्वत्रेति** । अत्युत्कटविरहभावेनातिदीनतया कथञ्चिच्चरणसम्बन्धं वाञ्छन्त्यो यत्र तत्सम्बन्धः पूर्वमनुभूतोस्ति तद्वदाचरन्ति । मयि चेन्न चरणं स्थापयति, तदा पूतनोलूखलादिबुद्ध्यापि वा स्थापयत्विति भावेन अत्यार्त्यैव सर्वत्र भगवद्बुद्धिः । अतस्तस्य प्रकर्षेण सिद्ध्यर्थं तथेत्यर्थः । **पुनरिति** पदादेकस्यां लीलायामनुकृतायामप्युक्तरीत्यार्तौ पुनरुलूखलादिभावोपि भवतीति ज्ञाप्यते । एवं सति भावप्राचुर्यादत्रोत्कर्षः सिद्ध इति भावः ।

कस्याश्चित्पूतनायन्त्या इत्यत्र । **अन्या अहं कृष्ण इत्युक्तवतीति** ।
१०-२७ १५. यद्यप्यत्रोक्तिप्रयोजनं नास्ति, पूतनासुपयःपानदशाया मुक्तिप्राकट्याभावाच नैवं सम्भवति । तथापि यथा तदा पूतना मां गृह्णात्वन्यथा तु कार्यं न भविष्यतीति भगवदिच्छा स्थिता, तथा कृष्णत्वेनेयं मां जानात्विति कृष्णायन्त्या अपि तदेच्छासीदिति ज्ञापनपरा तदुक्तिरिति ज्ञेयम् । **तस्यास्त्वित्यादि** । अत्र मुख्योपपत्तिर्भावनयैवाविर्भूतेत्यादिना पूर्वमेवाचार्यैरुक्तेति सर्वमवदातम् ।

तत्रैकोवाचेत्यत्र । **विरहेण दावाग्निं दृष्टवतीत्यादि** । अत्रेदमाकूतम् ।
१०-२७-२२. भगवता यदेयं लीला कृता, तदा पूर्वं गोपैर्दावाग्निर्दृष्टः, ततः प्रार्थितः प्रभुः, अत्र कथं तद्वैपरीत्यमुच्यत इति शंकानेन निरस्यते । अतिविगाढमावत्या एव भगवद्भावो भवति । तादृश्या एव च हृदये विरहाग्निः प्रकटो भवतीति सैव स्वामिनी तं दृष्टवती । तदेतदुक्तं **विरहेणेत्यादिना** । तदा पूर्वं ततः पालनमेव कृतमित्यधुनापि स्वामिन्या रक्षैव सम्पन्नेति भावः । अथवैतस्या एवैतल्लीलाभावनाभूदिति सैवोक्तवतीत्याहुः **भावनया वेति** ।

यातायां नन्दसूनुनेत्यत्र । प्रभोः सह भावोक्त्या गौणत्वेन सूचितमर्थमाहुः
१०-२७-२७. **तयैव प्रायेणेति** ।

भगवान्हरिरीश्वर इत्यत्र । **वैलक्षण्यज्ञापनार्थमिति** । तादृशं कर्म स्वकृतमिति
१०-२७ २८. स्वदोषज्ञाने मात्सर्यजं दुःखं न भवतीति तथेत्यर्थः । **तुल्यफलत्वेनेति** । यादृक्कर्म तादृगेव फलमिति तुल्यफलकं कर्म भवति । तथा च यथास्मास्वपि कर्मवैलक्षण्येप्यस्मान् भक्तिमार्गेऽङ्गीकृतवानिति सा च तुल्येति तुल्यं फलं कृतवान्, तथा चेत्तामप्यङ्गीकुर्यात्तदास्मत्तुल्यैव भवेत् । तस्यामाराधनबललक्षणं[1] कर्माधिकमस्तीति तां तन्मार्गे कुतोऽङ्गीकृतवानित्यर्थः । गोविन्दपदतात्पर्यनिरूपणे **साधारणेन्द्रोपीति** । यद्यपि 'इति गोगोकुलपतिं गोविन्दमभिषिच्य चे'ति वाक्यात् साधारण्येन सर्वस्यैव गोकुलस्येन्द्रः, न तु विशेषेणैकस्य कस्यचित् । अतस्तादृशस्यास्मदपेक्षया विशेषेणैकस्या भोगोचितः, तथापीश्वरत्वात्तथोपपद्यत इति भावः ।

धन्या अहो इत्यस्याभासे । **स्वभाग्याभिनन्दनमपीति** । चरणसम्बन्धाद्रे-
१०-२७-२९. णूनां धन्यत्वोक्त्या स्वस्यापि तथात्वात्तथात्वमायातीति तथा ।

रेमे तया चात्मरत इत्यत्र । **पुष्टत्वात्कामस्येत्यादि** । यथा प्राकृतः कामी
१० २७-३४. महानपि केवलं स्वार्थपरः सन्स्वयं यदि सुखी भवति तदा स्वकृतेपि दुःखिनं नानुसंधत्ते तथा । यथात्मारामत्वलक्षण स्वधर्ममप्यतिक्रान्तवांस्तयाऽस्मद्दुःखमप्यविचार्य स्वार्थमेवैतावत्सम्पाद्योद्धतभावः स्वयं तादृश्यैव तया च रेम इत्यर्थ

[1] आराधनलक्षणमिति पाठः ।

इत्याशयेनोक्तं **पुष्टत्वा**दित्यादि । तथा च स्वधर्माविचारकस्य परधर्माविचारे किमाश्चर्यमिति भावः । एवं सत्यात्मरत इत्यस्य स्वार्थपरत्वमर्थः पर्यवस्यत्यतो न पौनरुक्त्यमिति ज्ञेयम् । एवं सकामत्वेपि न निष्कामताक्षतिरिति ज्ञापनायात्मारामत्वोक्तिरित्याशयेनाहुर्**निष्काम एवे**त्यादि । प्रकारान्तरेणाप्यपौनरुक्त्यमित्याशयेनात्मरतत्वं प्रकारान्तरेणाहुः **रसाधारत्वाये**ति । अत्रेदमाकूतम् । रसात्मकत्वाद्भगवतस्तस्य च स्थायिभावात्मकत्वात्तमेतस्यां प्रकटीकृत्य रेमे । अन्यथैतद्रसानुभवासम्भवात् । न तु प्राकृतभावे सतीति । यद्वा । **आत्मरत** इत्यत्रात्मपदं स्वामिनीवाचकम् । तथा **चात्मारामोऽपि** तयात्मरतः कृतो रेमे । चकाराद्विशेषरमणं विविधबन्धादिविशिष्टमुच्यते । तथा सति नखदशनादिकार्यसम्भवेनाप्रह्वत्वशंका स्यात्, तन्निरासायाहुर**खण्डित** इति । यथा तस्यां रतोप्यात्माराम एव तथा दशनादिभिः खण्डितोप्यखण्डित एवेत्यर्थः । **कामिनां दर्शयन्दैन्यमि**त्यत्र । **कामिनस्त्वि**त्यारभ्य **एवं रेम** इत्यन्तम् । अत्रायमर्थः । पूर्वमात्मारामत्वोक्त्या तादृशोपि सन्यन्नायिकाधीनत्वमेवं भजते, तेन रसात्मको रसवांश्च भगवानेव, अन्ये तु कामिनो रसाभासिनो मलपूर्णे वस्तुन्यासक्त्या बीभत्सरसपूर्णा भ्रान्ताः सन्तस्तादृशीष्वेव दैन्यमात्रं फलं लभन्त इति ज्ञाप्यते । किञ्च । आत्मारामोपि यद्रसपरवशस्तत्रैव रसभरवशेन मानादिकं भवति, अन्यासु तु रसाभावान्न स मानः, किन्तु दौष्ट्यप्रकटनमेवेति । एतेनात्मारामस्यापि प्रभोर्यत्र रतिस्तत्रैव रसो नान्यास्विति फलितम् ।

यां गोपीमित्यत्र । बहिःप्रियसम्बन्धेन्तरायहेतुत्वेन माने दोषत्वोक्तिर्विवृताविति ज्ञेयम् । समानरसत्वेप्येतासां तदा मानोभून्नैकत्र । तत्राप्यधुना सो-
१०-२७-३५. भूत्, तत्र हेतुमाहुः **स्वगत्ययुक्तकरणा**दिति । नायिकानां हि प्रकृतिः सदा मानिनीत्वम् । प्रकृते चेयदवधि नायकाधीनत्वमेवाङ्गीकृतमिति स्वस्यापि नायिकाप्रकृतेर्या गती रीतिस्तस्यामयुक्तकरणान्नायकाधीनत्वेन स्थितेर्नायिकाप्रवृत्तिनिवृत्तिहेतुत्वेनाधिकारिण इवाधिकारिणो ये, आदिपदात्प्रौढा भावास्ते पूर्वभावान्कोमलान्नाशयामासुरित्यर्थः । **स्वयं त्वयुक्ते**ति पाठे स्वयंपदं स्वामिनीपरम् । शेषं पूर्ववत् । ननु पूर्वमेवास्या अपि स्वामिन्या मानः कुतो नाभूत्, रसप्राप्तेस्तुल्यत्वादिति चेत्, उच्यते । भगवान् हि भक्तेभ्यो भजनानन्दं दातुं लीलां करोति, स्वस्य तद्रसानुभवार्थं च । तथा च बह्वीष्वपि प्रियासु सतीष्वेकस्यां पृथङ्नयनेन विशेषरमणे यो रसस्स न सम्भूय रमणे । स च स्वरूपात्मक एवेति तत्स्वरूपं प्रकटीकृतवानिति न काप्यनुपपत्तिः । पूर्वं मानाभावे स्वामिनीभिरेव हेतुरुक्तोऽनयाराधित इत्यादिना ।

ततो गत्वेत्यस्याभासे । दोषाभावेनैवेत्यादिना दृष्टान्तवक्तुस्तात्पर्यमुच्यते । शक्तौ सत्यामपि प्राकृतकामिवत्कामाधीनत्वेन स्ववशत्वज्ञानेनाशक्तिख्यापने
१० २७-३७. स्वस्कन्धेनापि नेष्यतीति ज्ञानं भ्रमः । यथा भगवद्रमणे दोषभावासम्भवा-

द्भगवद्भावात्मकावेव सौभाग्यमदमानाविति 'तासां तत्सौभगमद'मित्यत्र निरूपितम्, तथा प्रकृतेपि प्रियाधीनत्वभावेनात्र रसो दत्त इति स एव भावोत्राजनि, न तु दोषरूपः। स एव हित्वा गोपीरित्यनेनोक्तः । एवं सत्यत्र विप्रयोगात्मकरसाननुभवे पूर्णरसदानं न भविष्यतीति ज्ञात्वा प्रभुः संयोगरसदित्सासंकोचमकरोत् । अयमेव भावः क्रियाशक्तिसंकोचप्रकाशको **न पारयेहं चलितुमि**त्यनेनोक्तः । अन्यथाऽनृतवादित्वं स्यात् । न हि भगवन्तं प्रति तदीयानामेवं सम्भवति । स त्वतिपूर्णरसाविर्भावेन स्तम्भरूपः सात्त्विकभावो भवितुमर्हति । दसत्वं ह्यमर्यादत्वम् । तथा चोक्तरीत्या निरवधिरसदातुस्तत्संकोचेच्छा रसमार्यादिकी न भवतीति तद्भावोदयोत्र दसापदेनोक्तः । रजस्तमोऽधिष्ठात्रोरपि तज्जं भावं दूरीकृत्य अमृतदातेत्यत्रापि पूर्णरसदानार्थमेव तद्भावजननं स्वतिरोधानं चेति ज्ञापनाय केशवपदोक्तिः । एवं सति पर्यवसानतो रसमार्यादिकीत्वमप्युक्तेच्छाया ज्ञायते । प्रियां त्विमं वृत्तान्तमजानन्ती पूर्ववदेव प्रियः करिष्यतीति ज्ञात्वा 'नय मा'मिति क्रियाशक्तिं प्रार्थितवती । परन्तु यत्र ते मन इत्यज्ञात्वाप्युक्तेर्भगवन्मन उक्तकार्येस्तीति पूर्ववत्क्रियोद्गमस्याशक्यत्वादुभयोः प्रभुरशक्यमेवोपदिष्टवान्प्रियायाः स्वस्कन्धारोहणम्, न तु स्वस्य। अग्रिमरसदित्सया प्रभुः स्वहार्दं न ज्ञापयतीति प्रिया प्रियस्कन्धमेव बुद्ध्वा तथैव कर्तुमुद्यताभूत् । तदा प्रभुस्तथाकरोत् ।

एतत्सर्वं हृदि कृत्वाचार्यैरुक्तमे**षा हि नृत्यमि**त्यादि । नटो हि नृत्यचेष्टया स्वान्तःस्थं रसं द्रष्टारमनुभावयति । एतद्धर्मसाम्येनात्रापि नृत्यपदप्रयोगः कृतः ।
१०-२७-३८. एतदेव विवृतं स्वान्तरित्यादिना । पूर्वं प्रभुणा सर्वथा तदधीनत्वेन रसो दत्तः । सोऽन्तःप्रियाया अस्तीत्यधुना स्वयं तं रसं प्रियमनुभावयितुं वाकृती प्रकटयति । तच्चाशक्यम्, भक्तस्नेहेनैव तद्वशीभूतस्तथा रमते, नत्वन्यथापि । प्रकृते हि 'न पारयेह'मित्यादिस्नेहरीतिविरुद्धम् । यद्रसमार्गाविरुद्धमिति तथा कर्तुमुचितं भवतीत्युच्यते । तन्न साधीयः । तथा सति रसस्याभाव्येन प्रियान्तःस्थरसच्युतेः किं प्रियमनुभावयेत्, अग्रिमरसदानप्रतिबन्धश्च भवेत् । इदमेवोक्तं **तद्भूमावि**त्यादिना । एतदर्थस्तु । **तत्** उक्ताभिनयनम् । **भूमौ** स्वान्तर्लक्षणस्थानं त्याजयित्वा बहिःस्वप्रौढ्या तत्प्रकटने न सम्भवतीति शेषः। तत्र हेतु**रूर्ध्वभावे**त्यादि । स्वान्तर्गुप्तो हि रसामृताब्धिरुत्तरोत्तरं भावतरङ्गाननुभावयति । इदमेवोर्ध्वभावत्वम् । स एव बहिः प्रकटितो रसत्वादेव बहिर्भवति । अतोयमेवोर्ध्वभावाभावः । **च्युतः** स्वरूपत एव नष्टो भवेदिति यावत् । अलौकिकरसाभिनयनम् । विरहेणार्त्यादिप्रकटनं तल्लौकिकरीत्या स्वाधिक्यज्ञापनं **भूमौ पदस्थापनम्** । त-

१ ततो भोगस्यानेत्यादिग्रन्थतात्पर्यमाहुः एवं सतीत्यादि । २ एषा हि नृत्यमित्यादिग्रन्थतात्पर्यमाहुः प्रियेत्यादि । ३ संयोगविप्रयोगयोरित्यर्थः ।

स्मिन्सति तत्र सम्भवतीत्यर्थः। अशक्ता चेदिति। 'यत्र ते मन' इति प्रौढ्या, न तु प्रार्थनरीत्या, सख्येन कथं वदेदित्यर्थः।

(एवं सति भंग्यन्तरेणाप्येतद्व्याकृतिः सम्भवति। तथा हि। भगवता ह्यस्यै प्रियायै पूर्णः स्वरसो दत्त इति भगवन्निष्ठा भावाः सर्वे हृदि स्फुरद्रूपा जाताः। तथा च सर्वत आधिक्यमपि स्वस्मिन् स्फुरितम्। तदुक्तं हित्वा गोपीरित्यादिना। एवं सति द्वितीयरसलीलाचिकीर्षा यदाभूत्सापि हृदि स्फुरिता। तामविपद्यां मन्यमानापि न कातरा जाता। किन्तु पूर्वरसगरिम्णा दृढा सती प्रियमब्रवीत्। एतदेव दृष्टा-पदेनोक्तम्। दुष्टगुणव्याप्तयोरप्यमृतं ददाति। अहं त्वेतद्गुणैरेव पूर्णेति अवश्यं सुखमेव दास्यति, न दुःखमित्यभिप्रायज्ञापनाय केशवपदम्। ततो भोगस्थानादग्रे वनसम्बन्धिनमुत्कृष्टं देशं स्वयं स्वेच्छया गत्वा, न तु प्रियेण नीता। गत्वाऽब्रवीदित्युक्त्या प्रियनैकट्यं ज्ञाप्यते। तेन तदधीन एव प्रियस्तत्संगे गत इति ज्ञापितं भवति। अथवा। वनमित्युद्देशो नाममात्रम्। वस्तुतस्तु महारसनिधानम्, तेन रसोद्दीपकमित्युक्तं भवति। एतादृशे वने मद्वियोगेन मां विचिन्वन् यदि प्रियो भवति, तदा कीदृशो रसः स्यादित्याशयेनाब्रवीत्। अत एव दृप्तात्वमुक्तम्। पूर्वरसातिमदात्तथा चेत्करिष्यतीति तदाहं चलितुं सन्दितुमपि न पारये, जीवनमेव न संपत्स्यत इति भावः। एवं चेत् किं कर्तव्यमित्याकांक्षायामाह नयेति। यत्र स्वान्तर्धाने ते मनस्तत्रान्तर्धाने मां नय, तिरोहितां मां कुरु, त्वं मा तथा भवेत्यर्थः। प्रियस्त्विदमत्यशक्यमित्याशयेनोत्तरयति स्कन्धेत्यादिना। यथा स्वस्कन्धारोहणमशक्यम्, तथा मत्तोऽन्तर्धानं भवत्याः। न हि पूर्णज्ञानशक्तेरविषयः कोपि भवितुं शक्नोति। यद्यपि विरुद्धसर्वधर्माश्रयत्वेन रसात्मकत्वेन च जानन्नेवाजानन्नपि भवितुं शक्नोतीत्येवमुत्तरं न सम्भवति, तथाप्यत्रातिप्रीतिविषयत्वेन तं धर्मं प्रकटयितुं न पारय इति भगवदाशयज्ञापनाय प्रियापदमुक्तम्। उत्तरदानमप्यत एव। अन्यथा त्वेवमुक्तस्तूष्णीं तिष्ठेत्तिरोधीयेतैव वा। प्रियात्वान्ममाशक्यं भवत्यास्तिरोधानम्, तत्सामर्थ्याभावाद्भवत्याः स्वतस्तिरोधानं तथेति भावः। एवं सति प्रियया प्रार्थितं देयं यद्यपि, तथापि प्रियात्वेन स्वाशक्यमिति लक्षणो यो हेतुस्ततो हेतोः स्वयमेव तथाऽकरोदित्याह ततश्चेति। एवं करणे प्रभुनिष्ठं हेतुमाह कृष्ण इति। अस्यां दशायां हृदि प्रकटः सन्नेवानन्दात्मकतद्रसपोषको यत इत्यर्थः।) इति सप्तविंशोध्यायः।

अष्टाविंशाध्यायार्थोक्तौ। स्वभावादपराधत इति। तदवस्थाया एव स्वभावो यद्गुणगानमेव भवत्येव। अतस्तत्स्वभावादेव गानं चक्रुरिति सम्बन्धः।

१०-२८-०. पक्षान्तरमाहुरपराधत इति। भक्तेभ्योपि स्वस्मिन्नाधिक्यज्ञानलक्षणमपराधं प्राप्यास्मान्यदि प्रार्थयिष्यति, तदा रसं दास्याम इति मानलक्षणा कृताऽवज्ञा यामि-

१ भगवतः। २ स्वस्कन्धारोहणवदन्तर्धानमित्यर्थः।

स्तादृश्यो यतोऽतः स्तोत्रं चक्रुरित्यर्थः । अवज्ञयाऽप्रसादे स्तोत्रेण प्रसादो भविष्यतीति तथेति भावः । यद्वा । स्वभावाद्रसस्वभावाद्योपराध इत्यग्रे पूर्ववत् । स्तोत्रमिति गानविशेषणम् । तथा च स्तोत्ररूपं गानं चक्रुरित्यर्थः । अग्रे गुणकथनं भाववैजात्यज्ञापनार्थमिति ज्ञेयम् । गूढाभिसन्धिना पक्षान्तरमाहुः **अथवेति**। प्रार्थनाश्च ता आद्याश्च प्रार्थनायाः याः प्रथमद्वितीयतृतीयपञ्चमपष्ठसप्तमाष्टमश्लोकैः कृताः, अन्ते त्रयोदशचतुर्दशाभ्यां च सान्निध्यात् कुमारिकाभिः कृताः । अन्ये तु प्रौढाभिरुक्ताः श्लोकाः। चतुर्थ्यो गुणातीतभावापन्नाः कोमलभावा इति यावत् । अतस्तथा श्लोकसंख्येत्यर्थः। ननु 'तदागमनकांक्षया जगु'रिति वचनाद्यथा मानेनापराधाद्वतः, तथा स्तोत्रेण सन्तुष्ट आगमिष्यतीति भावो लक्ष्यते, एवं सति दोषारोपादिरनुपपन्न इत्याशंक्य गूढाभिसन्धिमुद्घाटयन्तः स्तुतिस्वरूपमाहुः **तत्तदिति**। स्तुतिर्हि यथाधिकारं भवति । एतासामेतादृश एवाधिकारो येन कुहककितवादिवचनानामपि स्तुतित्वम् । अन्यथाग्रे तथानुवदिष्यंस्तदागमनकांक्षया जगुरिति न वदेत् । न ह्येवं ब्रह्मादिभिरपि वक्तुं शक्यम्। तथा च स्वस्वभावोद्गिरणे तच्छ्रवणेन प्रभोः परमसन्तोष इति तासां भाव एव निरूप्यत इत्यर्थः । विपक्षे बाधकमाहुः **अन्यथेति** । यद्यन्यस्तुतिवदत्रापि स्तुतित्वमेव स्यात्, न भावमात्रनिरूपणम्, तदोपालम्भादिप्रकारैरनेकरूपता स्तुतौ न सम्भवतीति सा नोच्येतेत्यर्थः ।

सुरतनाथेत्यत्र । (**सुरतं संभोग** इत्यादेरयमर्थः । रतं लौकिकं भोगशब्दवाच्यम् । तत्तु सृष्टिमारभ्य प्रवर्तते । तत्र न भगवदाज्ञापेक्षा । सृष्टिसमानयोगक्षेमत्वात्तस्य । एवं सति सुष्ठु अलौकिकं शोभनरूपं यत् रतं तत्
१०-२८-२.
सम्यग्भोगशब्दवाच्यम् । तदस्मास्वेव त्वदाज्ञयेच्छयेति यावत्, तयैव प्रवर्तते । यतो जगत् लौकिकम् । गच्छति, नश्यत्येव, न तु स्थिरम् । अतोत्यलौकिकं स्वरूपानन्दरूपं तत्र प्रकटीभवितुं नार्हति । एतादृशस्य तस्य भवानेव नाथः । प्रवर्तको रक्षकश्च । एवं सति स रसश्चेत् त्वय्येव निरुद्धस्तिष्ठेत्, तदा त्वलौकिका अपि भक्ताः शून्यहृदया भवेयुरिति त्वदिच्छां ज्ञात्वा त्वां प्रार्थयित्वा तादृशीर्वयं प्रकटीकृताः, यतः प्रतिबन्धनिवृत्तिः । अत एवाग्रे 'विखनसार्थित' इति वक्ष्यते । कामो भगवदीयः । मनसः पूर्वरूपत्वात् वाच उत्तररूपत्वात् 'मनश्चक्र' इत्युक्त्वा 'जगौ कलं वामदृशां मनोहरम्' 'ता दृष्ट्वान्तिक'मित्यादिकं च वाग्रूपमलौकिकभावप्रवर्तकं स्वप्रियास्वित्याशयेनाज्ञापदमुक्तम् । 'मैवं विभोर्हती'त्यादिवाचां भगवद्भावात्मकत्वात्तासामप्याज्ञारूपत्वमित्याशयः । तैरेव वचनैः प्रतिबन्धनिवृत्तिरपि ।) **अतो ब्रह्मणेति** । अत्रायं भावः । 'ब्रह्मादयो बहुतिथं यदपांगमोक्षकामा' इत्यत्र भगवद्भावकामाः सन्तः साक्षात्तमलभमानाः श्रियो-

---

१ सृष्टिसमानकालीनत्वादिति पाठः । २ शून्यहृदया इति पाठः । ३ तादृश्य- इति स्यात् । ४ प्रेरकत्वपरत्वादिति ।

पांगा भावोद्धारिणो निरन्तरं प्रियसंगतत्वेन तद्भावात्मकत्वं प्राप्ता इति तत्सम्बन्धे तदनुभावेन कदाचित्स भावोपि भवेदित्याशया तत्कामास्त्वपश्चरन्तीति निरूपितम् । प्रकृते च स्वयं प्रभुः प्रकट इति तन्मार्गप्रकटनार्थं द्वारभूता वयं तेन प्रकटिता इति । अत्र सुरतशब्देन सुष्ठु भगवता समं रतं येनेति भगवद्भाव एवोच्यते, न तु सम्भोगः, तस्यापामरमनुवर्तमानत्वेन त्वदाङ्घ्रीत्यादिना नाथत्वविवरणं यत्तदनुपपत्तेः । एतन्मार्गप्राकट्येन ब्रह्मणो न कोपि भावः सिद्ध इत्यरुच्या पक्षान्तरमाहुः **कामेन चेति** । भगवदीयभावरूपेणेति ज्ञेयम् । स्वामिनीदर्शने हि भगवतो भाव उद्रिक्तः सन् कामकार्यं करोत्यतस्तेनैव स्वार्थं वयं प्रकटीकृता इत्यर्थः ।

सख उदेयिवानित्यत्र । **पूर्वमपि सखा यथेच्छमित्यादि** । 'सुपर्णावेतौ सयुजौ सखाया'विति श्रुतेरन्तरात्मा जीवस्य सखा भवति । प्रकृते च
१०-२८-४. स्वरमणेच्छामनतिक्रम्य तदनुरूपमेवास्मान्प्रेरयसीत्यर्थः । अत एवास्माकं नायिकाभाव एव सार्वदिक इति भावः । एतादृशस्यागमनं नायिकायै स्वसमर्पणार्थमेव भवतीति तदेव कर्तुमुचितमिति भाव इत्याशयेनाहुः **आगतस्येत्यादि** ।

दिनपरिक्षय इत्यत्र **विभ्रत्पदतात्पर्योक्तौ** । **ज्ञानं वा भवेदिति** । भक्त्या-
१०-२८-१२. त्मकत्वात् मुखस्य स्नेहरसानुभव एव स्वादित्यर्थः ।

प्रणतकामदमित्यत्र । **अथवा यल्लोक इत्यादि** । लौकिककामखण्डनैश्वर्यस्वकामदानालंकरणापद्दूरीकरणात्मकं पञ्चविधमुपकारं करोति तच्चरणपङ्कजं
१०-२८-१३. तापनिवारणात्मकमेकमेवोपकारमस्मासु करोतीत्यर्थः । **पद्मजैरर्चितमिति** । चरणपद्मजैर्नखैस्तथेत्यर्थः । लोके तेषां संयोगिद्रव्यत्वेपि भगवन्नखानां सच्चिदानन्दरूपत्वेन स्वरूपात्मकत्वेन तथा वक्तुमशक्यं यद्यपि, तथापि स्वस्याधुना चरणसम्बन्धेत्यार्त्या यदेव तत्सम्बन्धि, तदेव पूर्णसाधनमित्याशयेन तथोक्तम् । अस्मिन्पक्ष उपपत्तिमाहुरन्यथेति । उक्तारुच्यैव पक्षान्तरमाहुस्तत्तुल्यं चेति । तैरतिशोभा । अतस्तैश्चरणपद्मं पूजितमिव भवतीत्यर्थः । ध्वजादिचिह्नानि चोक्तरूपाणि ज्ञेयानि ।

रहसि संविदमित्यत्र । **गुणत्रयसहितमिति** । मधुरत्ववल्गुवाक्यत्वबुधमनोज्ञत्वलक्षणं गुणत्रयं ज्ञेयम् । रहसि संविदो ज्ञानानि येन वाक्येन तत्तथा ।
१०-२८-१७. वाक्यनिरूपणे सति यादृशं तदस्ति तादृशमेव प्राप्यत इति गुणत्रयसहितमित्युक्तम् । अथवा । कारणत्रयस्यैव विशेषणमिदम् । कारणोद्देशो वाक्यमित्यादिना कृतः । कामेत्यादिना गुणानां बन्धादिबोधकत्वेन वाक्यं कामोद्बोधकम् । हास्यमानन्दस्य । श्रीधामत्वेनोरसाधिकारिणो बोध्यन्ते ।

एतावन्निरूपणेन भगवत्प्राप्तौ भक्तकृतसाधनस्य यावती पराकाष्ठास्ति, तावत्युक्ता

१०-२८-१९. जाता, भगवता च भक्तानां स्नेहपरीक्षायां क्रियमाणायां यावती तस्याः पराकाष्ठा, साप्युक्ता जातेत्युपसंहरन्ति **एवं साधनेति**। अत्र यावत्ताव-दित्यव्ययपदे । तथा चोक्तरीत्या साधनपरीक्षयोर्यावत्स्वरूपं तावद्रूपस्तापो निरूपित इत्यर्थः। **इत्यष्टाविंशोध्यायः।**

एकोनत्रिंशाध्याये । तासामाविरभूदित्यस्याभासे । ब्रह्मा विष्णु-
१०-२९-२. रित्यादि। अत्रेदमाकूतम्। आद्यब्रह्मकल्पे भगवानेव चतुर्मुखो ब्रह्माभूत्, तपश्च पूर्वं कृतवान्। स वाच्यवाचकतया 'भगवान् ब्रह्मरूपधृक् नामरूपक्रिया धत्त' इति वाक्या'च्छब्दब्रह्मेति यं विदु'रिति वाक्याच्छब्दसृष्टिमर्थसृष्टिं च कृत्वा तदेवानुप्रविश्य सर्वं कार्यं कृतवान्, स्वयं रजोरूपश्च। प्रकृते च पूर्वं रजोरूपमानरूपेणाविर्भूतः, ततस्तापरूपेण, ततो विविधगानप्रलापरूपेण, ततो विविधलीलारूपेण। विष्णुश्च विक्षेपरहितः शुद्धसत्त्वात्मको यथा यस्य पालनं भवति तथा पाति । प्रकृते च सखीवचनश्रवणानन्तरं स्वापराधहेतुकं गमनं प्रियस्य ज्ञात्वा चित्तविक्षेपं त्यक्त्वा पुनः स्वस्थानस्थिताः स्वजीवनार्थं स्वं स्वं भावं प्रकटीकृतवत्य इति तादृग्भावरूपेण प्रकटः। 'यदरोदीत्तद्रुद्रस्य रुद्रत्व'मिति श्रुतेः स्पष्टं रुद्रत्वम्। 'देवाः स्वधनमग्नौ निधाय संग्रामाय यदा गताः, तदाग्निस्तद्गृहीत्वा पलायितः, तदा देवा बलात्स्वकीयं धनमगृह्णन्, स तदा दुःखेनारोदी'दिति श्रुतावुपाख्यानम्। प्रकृते चादेयं रसं स्वं प्रभुः स्वामिनीभ्यो दत्तवान् स्वभोगार्थम्। स्वामिन्यस्तु मानेन स्वस्मिन्नेव तं रसं निरुद्धवत्यः, तदा मानेऽपहृतेऽतिदैन्यमाविष्कृतवत्य इति रुरुदुरित्युच्यते। यथा स सर्वनिरासकस्तथायं भावोऽखिलशास्त्रोक्तसाधनबलनिरासकः। यतः साधनबलस्फूर्तावेतदनुदयो भगवदनाविर्भावश्च, एतदुदये तत्स्फूर्तिनाशः प्रभोराविर्भावश्च । 'कृषिर्भूवाचक' इति वाक्यात्कृष्णशब्दवाच्यता यद्यपि सदैवास्ति, तथाप्येतद्भावोदयाव्यवहितोत्तरक्षणे यदि नाविर्भूयाद्, भक्तानां तदा देहादिसत्त्वैव न स्यात्, दैन्येनैवात्युपमर्दकभावेन प्राचीनसत्त्वनाशात् । अतः स्वयमाविर्भूय स्वस्वरूपात्मकं सत्त्वमानन्दं च तत्र स्थापयतीत्याविर्भूतस्य कृष्णतेति । **स्मयमानमुखाम्बुज** इत्यत्र । **स्मयमानाभ्यां** चेत्यादि । न ह्येतादृशोऽन्योस्ति यस्य एतादृशा भक्ता इति स्मयः। अत एवैताश्चेत् मां प्रार्थयिष्यन्ति, तदाऽन्यस्या अपि मद्भक्तायेमं रसं दास्ये, अन्यथा तु मुक्तिमेवेति मानः। अत एवाम्बुजत्वमुक्तम्। तद्धि रविकिरणसम्बन्धादेव विकसितं सद्रसं प्रकटयति। अत्रैतत्प्रार्थनैव तत्स्थानीयेति भावः। **भक्तानां दोष** इति। विचारे क्रियमाणे भगवद्रसपानानन्तरमेव तादृग्भावोत्पत्तेस्तस्यैव स धर्म इति निश्चीयत इत्यर्थः। **अथवा व्यापिवैकुण्ठेत्यादि** । 'मया परोक्षं भजते'तिवाक्यात् श्रीकृष्णस्त्वेतासामेव निकटे स्थितः । एवं सति 'तं विलोक्यागत'मिति यदागमनकथनम्, तेन येन रूपेण तत्रास्थितिः पूर्वम्, तेन रूपेणागमनमित्यवश्यं वाच्यम्, तत्र स्थित-

सैव आगमनासम्भवात् । अतो येन रूपेणागमनं तद्रूपमुक्तं **व्यापिवैकुण्ठेत्यादिना** । व्यापिवैकुण्ठे हि पुरुषोत्तम एव, नांशः, व्रजे तु 'श्रयत इन्दिरे'ति वाक्याल्लक्ष्म्याः कदाचिदपि नावसरः । इदानीमेतन्मानापनोदनं तदार्तिनाशनं चैकदैव करिष्यन् लक्ष्म्या रमणं येन रूपेण करोति, तेन रूपेण कृत्वा तत्स्वरूपस्य एतदभिन्नत्वात् तान् धर्मान् प्रकटीकृत्य प्रकट इत्याशयेनागमनमुक्तम् । एवं सत्येतेषां धर्माणां पूर्वमसत्त्वात् तद्विशिष्टस्यापि तथात्वात्तादृशस्यागमनमुक्तं भवतीति भावः । **ननु कन्दर्पेणेति पूतनोक्तेरि**-दमाकूतं ज्ञायते । पूतनया हि परपक्षनिरासः क्रियते । दुःखिता तु सा न तं कर्तुं समर्था । किन्तु सुखिता । स्वामिनीभिरपि सर्वात्मभावविरुद्धाः सर्वे भावा निरस्ताः । तथा च सर्वात्मभाववत्सु भक्तेषु दुःखसम्भवे मर्यादामार्गीया भक्ता अप्यस्मिन्मार्गे दुःखसम्भावनारहितान्मोक्षादप्याधिक्यं न ज्ञास्यन्तीत्येतन्मार्गप्रवृत्तिर्न भविष्यतीति ज्ञात्वा कुतोऽतिरोधानं न कृतवानिति । तथा च कन्दर्पशब्दः सर्वात्मभावपरः । एतासां कामभावोपि सर्वात्मभावात्मक एवेति ज्ञापनाय कन्दर्पपदप्रयोगः । **स्वपूतना खिन्नेति** । भविष्यतीति शेषः । यद्वा । दैन्येनाविर्भूतो न तु हेत्वन्तरेणेतीममर्थं स्फुटं कर्तुमत्रापि लौकिकरीतिं जानतो भ्रान्तस्याशंकामनुवदन्ति **ननु कन्दर्पेणेत्यादिना** । साक्षादित्यनेनाद्यपक्षे समाधानमेवं ज्ञेयम् । अस्मिन्मार्गे मोक्षादाधिक्यज्ञानाभावः किं रसवार्ताभिज्ञस्यापाद्यते, उत तदनभिज्ञस्य । तत्रान्त्ये ओमिति ब्रूमः । आद्ये तु विवरणोक्ताध्यात्मिकमन्मथरसस्यैव यत्र विप्रयोगे महारसत्वमुच्यते, तत्र तस्यापि तद्रूपस्य विप्रयोगे महारसत्वेन ज्ञाने का शंका नामेति । द्वितीयपक्षसमाधानं विवरणे स्फुटम् ।

काचित्कराम्बुजमित्यत्र । पूर्वमनेकविधा अपीति । अनाविर्भावे चित्त-
१०-२९-४. विक्षेपादनेकविधत्वं पूर्वाध्याय उपपादितं वचनरीत्या । अधुना तु भ्रुभंग-
शब्दार्थं प्रकटीकृत्य स्वयमाविर्भूत इति ता अप्याविर्भूतस्वरूपैकनिष्ठा इति तदात्मिका जाता इत्यर्थः । एवं सति स्वरूपस्य रसात्मकत्वेन तद्धर्माणामपि तथात्वात् भ्रुकुटिबन्धनादिभावा अप्युपपद्यन्त इति भावः । **निर्गुणाश्च शिष्टा** इति । चकारात्तमस्सजातीयभाव उच्यते ।

१०-२९-५. **चन्दनरूषितमित्यत्र । एवं सामग्रीत्यादि** । एतास्वनुग्रहविशेषो ज्ञापित इति भावः ।

एका भ्रुकुटिमाबध्येत्यत्र । तादृशभावस्येत्यादि । पूर्वं मानमात्रं निरूपि-
१०-२९-६. तम्, अधुना तु शतधापि मानापनोदनार्थं यत्ने कृते मानमहं न त्यक्ष्यामीति गाढमानो निरूप्यते । तथा हि । कालविलम्बेन हि मानः शिथिलो भवति, व्यभिचारित्वेनाचिरस्थायित्वात् । तथा चायं मानस्तथा यथा न भवति । गाढता तादृश्यैवास्य

१ गाढतादृशैवास्य इति पाठ, गाढतादृशैवेत्यपि पाठ ।

सार्वदिकी भवति । तथा कृतिरेव कालनियमनम् । प्रियवचनादिभिर्मानमवश्यं त्यजतीति नायिकास्वभावः, स मा भवतु, मानस्वभाव एव मम तिष्ठत्विति प्रयत्नस्तन्नियमनं स्वभावनियमनं नाल्पेन भवतीति संरम्भ उक्तः । मानस्य प्रियसंगमविलम्बहेतुत्वेन दुःखदत्वात् किमित्येवंकरणमित्याशंक्यैतद्विचारानुदयं तत्र हेतुत्वेन वक्तुमेतद्धेतुमाह **विह्वलेति** मूले । पूर्वानुभूतसंगमसुखस्मरणे तल्लोभात् कदाचिन्मानत्यागः स्यादिति तदभावाय दंशः । एवमत्याग्रहेपि हृदि प्रियस्थितेरावश्यकत्वान्मानस्यापि तत्रैव सत्त्वात् कदाचिदस्य तस्मिन् लयः स्याच्चेत्तदापि मानराहित्यं भवेदिति तदभावाय ज्ञाने कौटिल्यम् । निर्दोषभावे हि धर्मिणो मुक्तिः, तस्यातथात्वे तत्सम्बन्धाद्यत्र धर्मिणोपि न मुक्तिस्तत्र तस्य कथं सा भवेदिति भावः । **प्रमाणनिराकरणार्थमिति** । 'सर्वस्येशानः' 'य आत्मानमन्तरो यमयती' त्यादिश्रुतिभ्य ईशितृत्वनियामकत्वादिधर्मवत आज्ञोल्लङ्घनं तदग्रे स्तब्धत्वादिकं प्रभुश्चान्तःकरणं मानान्निवर्तयितुं यतते, अन्तःकरणं च न निवर्तत इति प्रमाणविरुद्धत्वान्न सम्भवति, तच्च प्रमाणबलनिराकरणे सम्भवतीति तद्धननमेव कृतं भवतीत्यर्थः । **यतो लौकिकी भक्तिरिति** । लोकरीत्यनुसारी स्नेह इत्यर्थः ।

१०-२९-७. **अपराऽनिमिषदित्यत्र** । **एषा हीत्यादि** । गतदोषा विस्मृतपूर्वदुःखेत्यर्थः ।

तं काचिन्नेत्ररन्ध्रेणेत्यत्र । पूर्वं **लौकिकीत्यारभ्य दृष्टिभेदः स्यादित्य**न्तम् । एका भ्रुकुटिमित्यनेन लौकिकस्वरूपभाववती निरूपिता । तथथा

१०-२९-८. तथोपपादितम् । भक्तिमार्गे हि स्नेहवशाद्बहिर्मुखारविन्ददर्शने तेनैव विस्मृतसर्वा तदन्यन्नापेक्षते, सा त्वपरेत्यनेन निरूपिता । योगे हि ध्याने प्रत्येकमंगं पृथक् चिन्त्यते, धारणायां तैः समुदितमेकत्वेन स्वरूपं चिन्त्यते । परस्परसम्बन्धास्मरणपूर्वकमेकाङ्गस्मरणस्यानुचितत्वेनापराधरूपत्वात् । प्रकृते तु स्वरूपस्य रसात्मकत्वेन भावात्मकत्वादेकैकस्यैवाङ्गस्य स्वामिनीभावविषयत्वे तत्र परस्परं भेदापत्तिः स्यात्, सा च अनेन भावेनापास्यते । इदमेवोक्तमन्यथा **दृष्टिभेदः स्यादित्यनेन** । दृष्टिकृतो भेदः स्वरूपे स्यादित्यर्थः । न च विषयत्वेन स्वरूपस्य भावाद्भेदो वाच्यः । एतन्नियमाभावात् । सर्वं ज्ञानं प्रमेयमित्यादौ व्यभिचारात् । ईश्वरज्ञानस्य सर्वविषयकत्वेन स्वविषयकत्वस्यापि सर्ववादिसम्मतत्वेन प्रकृते च स्वयंप्रकाशचिद्रूपत्वात् स्वरूपस्य न काप्यनुपपत्तिः । एतेषां भावानां व्यभिचारिभावत्वे तु न स्वरूपभेदकत्वं स्यात् । स्थायिभावत्वेन तद्भेदकत्वमावश्यकमिति तत्समाधानमावश्यकमिति भावः । **स्वकीयो वा भाग** इति । प्रभुरेताभ्यः प्रत्येकमाविर्भूय रसं ददातीति सर्वासां भागरूपो भवति । तथा च यदर्थमाविर्भूतं यद्रूपं तत् तस्या भागरूपमिति तथा । एतेन पितृधने पुत्राणामिव प्रभुस्वरूपे स्वामिनीनामेव स्वत्वमिति ज्ञापितं भवति ।

सर्वास्ताः केशवालोकेत्यत्र । **क्षुद्रगुणक्षोभयुक्तानामिति** । एतासां भग-
१०-२९-९. वतश्च गुणाः सर्वे महान्तः । परोक्षभजनस्याज्ञानं क्षुद्रो गुण एतासामिति हृदयम् । **मुक्ता एव ता इत्यादि** । तदात्यर्तितः प्राणेन्द्रियान्तःकरणजीवा भगवत्येव प्रविष्टास्तत्सम्बन्धेन च परमानन्दं प्राप्तवन्त इति पुनर्बहिरनुसन्धानमेतादृशीनामसम्भावितमित्यर्थः । **एवमत्रापीति** । एतास्तु न लौकिक्यो, नापि प्रसिद्धमुक्तिमार्गीयाः, किन्तु बहिः प्रियसंगमाभिलापवत्यः, भगवांश्च एतन्मनोरथं पूरयत्येवेति तथैव संपत्स्यत इत्यर्थः ।

१०-२९-१०. **ताभिर्विधूतेत्यत्र** । **प्राकृतीनामिति** । प्राकृतीत्व इत्यर्थः ।

श्रुतयो यथेत्यत्र । **श्रुतयो हीत्यारभ्य युक्तिं वेत्यन्तम्** । अत्रायं भावः ।
श्रुतिष्वस्त्यंशद्वयम् । भगवत्स्वरूपानुभूतिः, अन्येषां तत्सम्पत्तौ साधनत्वं च ।
१०-२९-१३. तत्र स्वशक्त्यैव चेत्तदनुभवो जातो भवेत्तदा 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे'ति न वदेयुः । भगवदनुग्रहेणानुभवैकवेद्यत्वाभावे श्रुतीनां वाग्रूपत्वादेवं कथने वदद्व्याघातश्च स्यात् । अतः श्रुतीनां पूर्वं तदप्राप्तिः, सततं तद्गुणवर्णनेन तदनुग्रहात्पश्चादनुभवो भगवदानन्दस्येति तथोक्तिरिति मन्तव्यम् । एतदेवोक्तं **श्रुतयो जाता** इत्यन्तेन ग्रन्थेन । अपरश्च । 'तं त्वौपनिषदं पुरुषं पृच्छामी'त्यादिश्रुतिस्मृतिभ्योऽन्येषां भगवज्ज्ञानं श्रुत्यादिभिरेव भवतीति निश्चितम् । तच्च श्रुतीनां वाग्रूपत्वा 'यतो वाचो निवर्तन्त' इत्यादिश्रुतिभ्योऽसम्भावितम् । एवं सत्युभयविरोधपरिहाराय श्रुत्युक्तभगवद्धर्मश्रवणेन तत्कृत्या च भगवदनुग्रहे भक्तौ जातायां स्वयमेव तदानन्दानुभवयोग्यता भवतीति वाच्यम् । तदेतदुक्तं **सर्वे चेत्यारभ्य युक्तिं वेत्यन्तेन** ग्रन्थेन । एवं सति प्रकृतेंशद्वयबोधनार्थमयं दृष्टान्तः । तेन सार्धाध्यायत्रयेण निरूपितस्नेहेन वशीकृतेन प्रभुणा कृत्वैतासां मनोरथान्तप्राप्तिः । अन्येषामपि कृतपुण्यपुञ्जानामेतदुक्तिश्रवणकीर्तनादिना एतद्भावानुसारेण भजनेन च भगवदानन्दानुभवो भविष्यतीत्युक्तं भवतीति । ननु सर्वथा वागविषयत्वे त्वेवं कथनमपि न सम्भवति । अनेनैव प्रकारेण तथात्वस्य प्राप्तेः । किञ्च । भगवदानन्दानुभवहेतुत्वेन हि गुणवर्णनं श्रुतीनां पूर्वमुक्तं तदप्येवं बाधितं भवेत् । तथा सत्येवं निरूपणमपि बाधितम्, अतो निषेधमुखेनैव वाग्विषयत्वं न विधिमुखेनेत्यस्याः श्रुतेस्तात्पर्यमिति चेत्, तत्राहुः **श्रुतिश्च तत्प्रतिपादिकेत्यादि** । प्रतिपादनं हि तद्बोधकवाक्यकथनम्, बोधश्च न शक्तिग्रहं विना । लोके तद्वाचकशब्दाप्रसिद्ध्या सोपि न सम्भवति, अतस्तदर्थबोधो भगवदिच्छयैवेत्यर्थः । अत एव भगवतोक्तं 'मतोस्मि लोके वेदे च प्रथित' इति । मुक्त्युच्छेदाभावाय तथेच्छा । यदप्युक्तं **सर्वथा वागविषयत्वेत्यादि** । तत्राप्युच्यते । जीवानां सर्वपुरुषार्थसिद्ध्यर्थं हि भगवान् वेदमाविश्चकार । तत्र येन रूपेण यः पुरुषार्थो यादृशाधिकारिणः सिध्यति, तद्रूपं तं पुरुषार्थं तमधिकारिणं च श्रुतिर्निरूपित-

वती मोक्षपर्यन्तम्। एवं करणे सन्तुष्टो भगवान् यद्रूपं प्रकटीकृत्य यमानन्दं दत्तवान्, तद्रूपं स आनन्दश्च पूर्वं न ज्ञातौ, अधुनापि मनोवागविषय इत्येतादृशमपि फलात्मकं वस्त्वस्तीति ज्ञापनाय चाहुः 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चने'ति । अत्र पूर्वार्धमानन्दस्य विशेषणम् । तथा चैतस्मात्पूर्वं 'रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवती'त्यादिना यद्भगवत्स्वरूपं निरूपितं, तत्सर्वात्मभावैकलभ्यम्, न त्वन्यथेति ज्ञापयितुं सर्वात्मभावस्य निर्वचनमशक्यमिति तद्व्यञ्जकं धर्ममाहोत्तरार्धेन । एतादृशमानन्दं यो विद्वान् ज्ञातवान् लब्धवान् वा स कुतश्चन लोकाद्वेदात् किं बहुना परीक्षार्थं साक्षाद्भगवदुक्तोल्लङ्घनान्मानादिदशायां तदतिक्रमादपि न बिभेतीत्यर्थः। मोक्षसाधनस्य स्वकृतिसाध्यत्वेन तत्र श्रवणादीनि साधनान्युक्तानि । अत्र तु भगवदनुग्रहैकलभ्यत्वेन स्वकृत्यसाध्यत्वादनुवाद एव कृत इति । **स्वैरुत्तरीयै**रित्यस्याभासे । **आधारधर्मसम्बन्धा**दित्यादि । स्वामिन्यो हि सर्वांशे स्वसम्बन्धमेव प्रियस्यापेक्षन्ते । तद्भावस्याभाव्यात् । प्रभुश्च तदर्थमेवाधुना प्रकट इति न तदन्यस्य तत्सम्बन्धयोग्यतापि । अत एवाग्रे वक्ष्यति **कल्पितासन** इतीति भावः ।

स ईश्वर इत्यत्र । **येषां जलक्रीडाया**मित्यादि । जलक्रीडानन्तरं येषामार्द्रता न तिष्ठतीत्यर्थः । **योगेश्वरान्तर्हृदी**त्यस्याभासे । **अपवित्रे**त्यादि ।
१०-२९-१४. लोके वेदे च पवित्रत्वेन यादृशं वस्तु नोपादेयं तादृशमप्येतत्सम्बन्धियोगेश्वरान्तर्हृदयादपि भगवत उपादेयं यत्र, तत्र लोकादिपूपादेयत्वेन प्रसिद्धं यादृशं तादृशस्य एतत्सम्बन्धिनो वस्तुनः का वार्तेति ज्ञापयितुमेवं कथनमिति ज्ञेयम् ।

सभाजयित्वेत्यस्याभासे । **स्वान्तःकरणदोषे**त्यादि । दोषस्यैव विवरणं स्वकृतन्मतामित्यादिनोच्यते । परोक्षं भजता प्रभुणा तादृशो रसो दत्त इति
१०-२९-१५. तदज्ञानं स्वकृतघ्नता । प्रभौ दोषाभावात्तदारोप एव तत्र सम्भवति । स च गृह्यमाणस्य स्मर्यमाणस्य वा वस्तुनः सम्भवति । स्वामिनीनां तु प्रियातिरिक्तधर्मास्फूर्तिनियमेन स्वनिष्ठस्यैव एतस्यायमारोप इति भावः । यद्यप्ययमपि रसमध्यपात्येवेति न दोषत्वं वक्तुमुचितम्, तथापि भगवति दोषाभावस्य शास्त्रसिद्धत्वादारोपस्य च भ्रमत्वनियमाच्छास्त्ररीतिमवलम्ब्य तथोक्तम् । अग्रेपि दोषपदं यत्र तत्रेदमेव तात्पर्यं ज्ञेयम्। **विभ्रमभ्रु**वेत्यत्र । **भ्रूयम** इत्यादि । यमयति नियमयतीति यमः, कालः। तथा च कालविलम्बेन स भावः कदाचिन्नश्येतेति तदभावाय तस्यैव भावस्य नियमनं सदा स्थितिं तादृशी भ्रूः करोतीति तथा । अथवा । फलस्यैव नियमनमत्राभिप्रेतम् । एतदेवाहुः **यावत्प्रसादे**ति । तत्रैवानंगभाव एवाशेषस्वरूपानन्ददाता, नान्यत्रेत्यर्थः । **ईषत्कुपिता** इत्यत्र । **साधनैर्निर्चर्तित** इत्यत्रापि दोषपदं पूर्ववज्ज्ञेयम् । काचित्कराम्बुजमित्यादिनोक्तस्वकृतक-

राम्बुजधारणादीनि साधनानि । ननु स्वरूपेणानिवर्तितो दोषो वचनेन कथं निवर्तिष्यते । तस्मात्तस्य दुर्बलत्वात्तदुपपादितमाद्येऽध्याय इति चेत् । अत्रायं भावः । 'रसो वै स' इत्यादिश्रुतिभिर्भावात्मको हि भगवान् । स चाधुना दोषात्मको, रसस्वरूपस्यैव तथात्वात् । स्वामिनीभावाविर्भावमूलकारणं वेणुनादात्मकः शब्दः इति निर्दोषपूर्णगुणरूपभावाविर्भावोपि वाग्रूपशब्देन भविष्यतीति किमनुपपन्नम् । किञ्च । यथा वीक्षणेन यो रसस्स न स्पर्शादिना । सम्भाषणेन च यः, स नेक्षणादिनेति तत्तद्रसस्वभावः । तथास्मांस्त्यक्त्वा गतः कथमिति भावस्वाद्दग्वचनैरेवेति शिशिरय निजहृदयम् । आद्येऽध्यायेप्येवमेव ज्ञेयम् । अतः सुष्ठूक्तं **साधनैर्निर्वर्तित** इत्यादि । ननु भजनाभजननिर्णयस्य प्रभुविषयकस्योद्देश्ये सति साधारण्येन प्रश्ने को हेतुरिति चेत्, उच्यते । भगवद्विषयकप्रश्नस्यैवाद्धा क्रियमाणे वयमेतादृश्यो भक्तास्त्वमेतादृशीरस्मान्कथं त्यजसीति हि प्रश्नः स्यात् । स च नायिकोत्तमानां स्त्रीरत्नानामग्रे भगवता स्तुत्यानां स्वामिनीनां मुखाम्बुजान्न निःसर्तुमर्हति, किन्तु ग्राम्याणां रसाभासयुक्तानामेव स्यात् । न हि विकचशारदसरोरुहात् तिन्त्रिणीरससन्दः सम्भवति । अतो व्याजेन प्रश्ने भावगोपनेन महान्रस इति मुख्यरसस्वाभाव्यादेव तथोक्तिरिति बुध्यस्व । भगवांस्तु जीवेभ्यः स्वस्य वैलक्षण्यं वक्तुं तत्स्वरूपज्ञानं विना ततो वैलक्षण्यं ज्ञातं न भविष्यतीति तत्स्वरूपमुक्त्वा स्वस्वरूपमुक्तवान् । अन्यथा स्वामिनीतात्पर्यविषयः स्वयमेवेति तान्न निरूपयेत् ।

भजतोऽनुभजन्त्येक इत्यत्र । **तेषां त्रयाणामित्यादि** । भजनानुसारेण भजनकर्ता प्रथमः, अभजतो भजनकर्ता द्वितीयः, उभयाभजनकर्ता तृतीयः ।
१०-२९-१६. द्वितीयो यमभजन्तं भजते स एकः प्रतियोगी । तृतीयो यं भजन्तं न भजते स द्वितीयः प्रतियोगीति ज्ञेयम् ।

भजन्त्यभजतो ये वा इत्यत्र । **धर्मशेषश्चेत्यादि** । धर्मार्थं यो भजते तस्य धर्म एव मुख्य इति भजनीयस्तच्छेषः । एवं सति भजनकर्तुः पातकादि-
१०-२९-१८. सम्भवे तद्दोषो निवर्तनीय एव, कृतघ्नतापरिहारायेत्यर्थः । ननु पुण्येनैव पापनिवृत्तिरित्यस्य तत्र नोपयोग इत्यत आहुः **तदीय एवेति** । धर्मशेषीय एव धर्मो भजनद्वारा भक्तेषु गच्छतीत्यर्थः । ननु विहितत्वात्तद्भजनस्यापूर्व एव धर्मस्तेनोत्पद्यत इति चेत् । मैवम् । तादृक्फलसाधकत्वेन तद्भजनविधाने भजनीयनिष्ठतादृग्धर्मवत्त्वस्यैव प्रयोजकत्वात् । 'तेजस्कामोग्निमेव तेजस्वन्तं स्वेन भागधेयेनोपधावती'त्यादिश्रुतिभ्यस्तथा निर्णयात् । अन्यथा तेजस्वन्तमिति न वदेत् । न चामूर्तत्वं बाधकमिति वाच्यम् । अलौकिकस्यार्थस्य लोकरीत्या निर्णेतुमयुक्तत्वात् । 'अलौकिकास्तु ये भावा न तांस्तर्केण योजये'दिति श्रुतेश्चेति दिक् । निषेधस्य प्राप्तिपूर्वकत्वनियमेनात्र चापवादनिषेधोक्तेर्यत्र धर्मापवादसम्भावना स एवात्र धर्मः परिगृहीतः, यत्र न तत्सम्भावना न सोऽत्र विवक्षित

इत्याशयेनाहु **तत्र धर्मं यत्रे**त्यादि । नित्य कर्म कर्तव्यत्वेनैव यत्र क्रियते तत्र तदेव प्रधानम् । यत्र देवताराधनेनैव धर्मस्तत्र सा प्रधानम् । न चोक्तेषु धर्माभावादविवक्षित त्वमिति वाच्यम् । भगवता हि निर्णय क्रियते । स च सन्दिग्धे कर्तुमुचित । उक्तेषु सन्देहाभावादत्राविवक्षितत्वात् ।

भजतोपि न वै केचिदित्यत्र । **ये दयाधर्माधिकारिण** इत्यादि । धर्मार्थं
१० २९ १९ भजत्सु धर्मं सम्पादयितुमधिकारिण समर्थास्तान् ये न भजन्ति ते त्वधमा इत्यर्थ । अकृतज्ञत्वादिदोषवत्त्वेन त एवाग्रे वाच्या । लौकिकमेव निमित्त भजने येषा ते लौकिकनिमित्तास्तान् ये न भजन्ति ते उत्तमा इत्याहु **ये लौकिकनिमित्ता** इति । त एव आत्मारामत्वादिधर्मवत्त्वेनाग्रे वाच्या ।

न पारयेऽहमित्यस्याभासे । **भक्तिमार्गविरोध**मित्यादि । ननु 'नाह तु सख्य'
१० २९ २२ इत्यादिना साधनमार्गीयभक्तविषयकमभजनमुक्तम्, प्रकृते च परोक्षभजनमुक्तम्, अनुवृत्तिवृत्त्यर्थं परोक्षभजने च हेतुत्वेनैव मदर्थेत्याद्युक्तम् । तथा चैतद्भजनानुरूपमेव स्वभजनमुचितम् । न तु कामपि मर्यादा स्थापयित्वा । तथा सति भक्तिमार्गविरोधापत्ति । एतादृशीना तु स्वदर्शनमपि स्वस्य तद्विरुद्धमिति प्राप्त उच्यते । अत्र स्वामिनीभजनानुरूप न भजनमिति हि तवाशङ्का । तत्तु प्रात्याहिकधर्म रूपम् । एतदेव भगवताप्युक्त मद्दत्तयत्फलार्थिनो यादृश भजन तत्फल दत्वा ततो निमुच्य इत्याशयेन 'ये यथा मा'मित्यादि । अत्र यथा तथेति पदाभ्या भजनप्रकार योरप्येकरूपत्वमुच्यते । प्रकृते च दास्य प्रकार । स च भक्तधर्म एव, नत्वीश्वरे सम्भवति । कदाचित्क्रियमाणमप्यनुकरणनद्भवति । न हि महाराज कदाचित्सतोषेण स्वसेवकाङ्गमर्दन कुर्वन् दासो भवति । तथा प्रकृतेपि रसवशात् मानिनीपदपद्मपरागानुराग कुर्वन्नपि पतिरेव, न त्वन्यथा भवतीति क्व प्रत्युपकृतिसम्भवो भजनानुरूप भजन वा । एव सति प्रत्युपकृत्यपेक्षया तदभावेन दोषारोपो न कार्य, अशक्यत्वादित्युक्त भवति । नन्वेव सति सुतरा परोक्षभजनमनुपपन्नम् । न ह्यप्रत्युपकार्यभजनासु तु स्वहेतुकृति सम्भवतीति चेत् । अत्र ब्रूम । रसात्मक प्रभुरित्यविवादम् । स च सयोगविप्रयोगभेदेन द्विविध । तत्रान्यतराभावे त्वसम्पूर्ण एव स स्यात्, अत सम्पूर्ण रस दत्वा तदुत्तरकालीनदोषारोपात्मकव्यभिचारिभावोत्पत्तौ तच्छान्तिर्निर्वचनै कृता । तस्माग्रिमरसानुभवविरोधित्वादिति न किञ्चिदनुपपन्नम् । एतेनैतादृशीषु तु स्वदर्शन स्वस्य भक्तिमार्गविरुद्धमित्यपि निरस्तम् । एव सतीश्वरत्वेनाशक्तौ हेतुरित्याशयेन प्रभुराहेत्याहु **भक्तिमार्गविरोध परि हर्तु**मिति । नन्वेतेन स्वस्येश्वरत्वमेवोक्त भवति, न त्वेतत्स्तुतिरिति चेत् । अत्राय भाव । यद्यपीश्वरत्वेनोक्तरीत्या प्रत्युपकारकरण न सम्भवत्येव, तथापि तर्कितमुच्यते, यदि कथञ्चिन्मयि दास्यमापद्येत, तथापि निरन्तर दास्यकरणेपि कदाप्यनृणो न

भवामीति प्रभुणा निरवध्युत्कर्ष उक्त इति का वान्या स्तुतिरेतदग्रे । अन्यथा विबुधायुपापीति न वदेत् । 'स्वसाधुकृत्य न पारये' इत्येतावतैव चारितार्थ्यात् । नन्विदमितरभक्तसाधारणमिव भाति । तथा हि । चतुर्वर्गार्थिषु तद्दानस्य प्रत्युपकृतिरूपत्वेपि प्राप्तात्यन्तिकभक्तियोगेषु सेवातिरिक्तानपेक्षणात्तस्याश्च स्वतन्त्रपुरुषार्थत्वात्किं वा प्रत्युपकृतित्वं भजेत । प्रकृतेपि दास्यातिरिक्तानपेक्षणान्न प्रत्युपकृतिः सम्भवतीति कोऽत्र विशेष इति चेत् । अत्रेद प्रतिभाति । न ह्यपेक्षितत्वेन प्रत्युपकृतित्वं सम्भवति । स्वल्पं कृत्वाऽधिकप्रेप्सोरधिकं कृत्वा स्वल्पप्रेप्सोश्चार्थे व्यभिचारात् । अतः स्वरूपतः पूर्वकृत्यनुरूपत्त्व मृग्यम् । तत्रापेक्षानपेक्षे अप्रयोजिके । स्वामिनीभजनानुरूपं भजनमीश्वरेपि न सम्भवति, किं पुनर्जीवे । यच्चोक्तं प्राप्तात्यन्तिकेत्यादि, तत्राप्युच्यते । ते हि पूर्वं सकामत्वेन नित्यकर्तव्यत्वज्ञानेन वा प्रवृत्ता मध्ये भगवदनुग्रहेण सेवारसानुभवे जातेन्यापेक्षां त्यक्तवन्तः स्वार्थं, न तु तदर्थं तथा । एवं सत्युत्तरोत्तरं तादृक्सेवासम्पादनेन तदेकसाध्यसुखदानमेव प्रत्युपकृतिस्तेषु । अत्र तु 'त्वदुपासनाशाः' 'एवं मदर्थोज्झितलोकवेदे'त्यादिवाक्यैस्तत्प्राप्तेः पूर्वमेव त्यागः । प्रभौ सहजस्नेहोऽतः तत्सुखे स्वोपयोगं मत्वा तत्प्रतिबन्धकं दूरीकृत्य स्वं निवेदितवत्यः । अत एव 'यत्ते सुजाते'त्याद्युपपद्यते । अत ए'वैवं मदर्थोज्झिते'त्यत्र स्वत्यागोप्युक्तः । स्वार्थमन्यत्यागो लौकिकानामलौकिकानां च पुंसां सम्भवति, न तु यथाकथञ्चिदपि स्वत्यागः । अत्र स्वपदेनात्मोच्यते । तथा च स्वात्मत्वेन स्नेहविषयत्वाभाव एवैतत्त्यागः । भगवदुपयुक्तत्वेनैव तस्य देहादेश्च स्नेहविषयत्वात् । एवं सति भगवदर्थमात्मा प्रियो, न त्वात्मार्थं भगवानित्यागतम् । खण्डितादिष्वपि स्वसम्पाद्यसुखानङ्गीकृतिरेव दुःखे माने च हेतुः । तथा च भगवत्सुखसम्पादनं केन प्रत्युपकृतं भवेत् । न चैतत्साधनसम्पादनमेव प्रत्युपकृतिरस्त्विति वाच्यम् । अत्र भावस्यैव साधनरूपत्वात् तस्य पूर्वकक्षापन्नत्वात्सदैकरूपत्वेन नित्यत्वेनासाध्यत्वाच्च । किञ्च । भावबलेनैव यद्भवति तत्र न भगवत्कृत्यपेक्षा, 'वशे कुर्वन्ति मां भक्त्ये'ति वाक्यात् । अन्यच्च । 'नैकात्मतां मे स्पृहयन्ती'त्युपक्रम्य सेवाकथारसासक्तियुक्तानां तेषां 'पश्यन्ति ते म' इत्यनेन स्वरूपरसानुभवमुक्त्वा एतादृशानपि 'भक्तिरनिच्छतो मे गतिमण्वीं प्रयुंक्त' इति कपिलदेवेनोक्तम् । इह तु रसमार्गरीत्याङ्गीकार इति न कदाचिदपि तदिच्छाननुरूपा कृतिः सम्भवति । तस्य रसस्य तादृशत्वादेव । अपरञ्च । स धर्ममार्गोऽयं धर्मिमार्ग इत्यन्येभ्य इयान् विशेष इति कथं वदामः, खद्योतेभ्य इव तरणेः । अतः सुष्ठूक्तं न पारय इति । यद्यपि गेहशृंखलाच्छेदस्य भावस्वभावकार्यत्वात्तस्य च भगवदनुग्रहैकलभ्यत्वाद्देहशृंखलाच्छेदोपि भगवतैव कारितो भवतीति नैतदुत्कर्ष आयाति, तथाप्येताभ्य एवायं भावो दत्तो, नान्येभ्य इत्येतदुत्कर्षः । अतएवैतस्यैव प्रत्युपकृतिरूपत्वं भगवतोक्तम् । तर्हि 'न पारय' इत्यनुपपन्नम् । प्रत्युत एतादृ-

ग्भावदातरि प्रत्युपकृत्यसम्भवाद्वैपरीत्यमापततीति चेत् । अत्रेदं प्रतिभाति । पूर्णाखिलशक्तिपूर्णस्यापि प्रभोरशक्तिर्यत्करणे तद्वस्त्वत्यन्ताभाव एवेति निश्चयः । न हि सर्वसामर्थ्यवत्त्वेन द्वितीयमीश्वरं कर्तुं समर्थः । अतएव प्रभुणोक्तं 'न शक्यन्तेऽनुसंख्यातुमनन्तत्वान्मयापि ही'ति, तथा प्रकृतेपि केवलभावस्य रसात्मकत्वेन भगवदात्मकत्वात्तदनुरूपवस्त्वभावादशक्तिरेव निष्प्रत्यूहेति मन्तव्यम्, अन्यथा ईश्वरत्वमेव न स्यात्, श्रुत्युक्तरूपाभावादिति बुध्यस्व । वैपरीत्यापत्तिरिति दूषणं यदुक्तम्, तत्रोच्यते । कर्मज्ञाने साधनमार्गीयभक्तिं च जीवार्थं कृतवान् भगवान्, फलमार्गीयभक्तिमार्गं तु स्वार्थमाविश्चकार । अन्यथा रसात्मकस्वस्वरूपानन्दानुभवो न स्यात् । 'तस्मादेकाकी न रमत' इति श्रुतेः । तथा च भावदानादेरपि स्वार्थत्वान्नोक्तदूषणम् । नन्वेवमपि 'न पारय' इति नोपपन्नमिति चेत् । न । अस्यानन्दस्य स्वरूपात्मकत्वेप्येताभ्य एव तदनुभवादनुभूतस्य च वस्तुन एवैतादृशत्वेनैवं कथनस्य तत्स्वरूपनिरूपकत्वात् । यथा 'विस्मापनं स्वस्य च सौभगर्द्धे'रित्यत्र वस्तुस्वरूपनिरूपणम्, तथात्रापीति सर्वमनवद्यम् । अत्र पूर्वार्धेनैवैतत्स्तुतिसंपत्तावप्युत्तरार्धकथनस्य तात्पर्यमाहुः **अतो मयीत्यादिना** । अत्रोपकृतेरेव प्रत्युपकृतिरूपत्वोक्त्या तद्भिन्नतदपेक्षायां सोपाधिभजनं कार्यं भवति, तथा च भजन एव तत्सम्भवात् । एतदेवोक्तं **नो चेदित्यनेन** । तच्च भवतीष्वसम्भावितमशक्यत्वादित्याहुः **न ह्यशक्यमित्यनेन** । प्रत्युपकृत्यशक्तावयं भगवन्निष्ठोपि हेतुरिति ज्ञेयम् । **इत्येकोनत्रिंशोऽध्यायः** ।

त्रिंशत्तमाध्यायार्थकथने । त्रिंशत्तमे हरिरित्यादि । इतिशब्दो हेतुवाची ।
१०-३०-०. **लीलां चक्रे** इति । लोके प्रकटामिति शेषः । तथा सत्ययं वाक्यार्थः । यद्यप्यतिगोप्यत्वादियं लीला न वक्तुमुचिता, तथापि प्रभुर्लोके प्रकटां लीलां चक्र इति हेतोरीर्यत इति, अन्यथा रासलीलेर्यत इत्येव वदेयुः । सा च 'यथा मदच्युद्द्विरदः करेणुभि'रित्यन्तेन ग्रन्थेनोक्ता । एदतत्रेतिदेशेन कामशास्त्रोक्तरीत्यापि सोक्तेत्याहुः **कामकृतामपीति** । इन्द्रो विषयभोगेभियुक्त इति तन्नामग्रहणम् । वस्तुतस्तु ब्रह्मादीनामपि दुर्लभैव । कामकृता सा हि लोकानुसारिणी भवति । एवं सति यत्र सापीन्द्रादिदुर्लभा, तत्र पूर्वोक्तलीलायास्तथात्वे किं वाच्यमिति भावः । लीलोक्तिप्रस्तावे फलश्रुतिरसंगतेत्याशंक्य तत्तात्पर्यमाहुः **अस्या** इति । लोके कामकथा तदुद्बोधिका दृष्टेति तच्छंकया वैराग्यार्थी कदाचिन्न शृणुयात्, तथा भक्त्यर्थ्यपि, मातॄणां रहस्यवार्ता न श्रोतुमुचिता, तथा सति चित्तवैषम्येतिमहान्दोषः स्यादिति शंकया, न शृणुयात् । एवं सति विषय्येवावशिष्यते । तथा सति तु हीनाधिकारिविषयत्वेनोत्तमत्वं न स्यादित्येतत्सर्वपरिहाराय फलश्रुतिरित्यर्थः । विषयिणः पूर्वं विषयत्वेन श्रवणेपि तत्स्वभावादेव दोषनिवृत्तिपूर्वकं परमपुरुषार्थप्राप्तिरिति भावः । अन्ते प्रश्नोत्तरयोस्तात्पर्यमाहुः **लौकिकवपीति** । सर्वथा प्रपन्ना दृष्ट्वाऽदेयमपि स्वरूपानन्दं दत्तवानिति तु वस्तुस्थितिः ।

भगवतो रसात्मकत्वेन तत्स्वरूपमध्यपातित्वमेतासामिति च। पूर्वमन्यत्र विवाहाभावे रसस्वरूपमेव न सम्भवति, यतस्तद्रसस्वरूपमर्यादा तथा। एतादृशेर्थे विषयत्वेनोभयोः प्रवृत्तिः, अतोनुचितमिदमिति बुद्धिः कस्यचिच्चेत्स्यात्, वस्तुतस्तु उपेक्ष्य एव सः, तथापि प्रभुः सर्वोद्धारक इति तादृशस्याप्यलौकिकी बुद्धिर्यथा भवति, तथा वक्तव्यमिति प्रश्नतात्पर्यम्। शुक'स्तुष्यतु दुर्जन' इतिन्यायेन तन्मतमेवानुसृत्योत्तरितवान्। अन्यथाग्रे 'गोपीनां तत्पतीना'मित्यनेन परदारात्वस्यैव दूषितत्वेन तद्दोषाप्रसक्त्या 'तेजीयसां न दोषाये'ति निषेधोनुपपन्नः स्यात्, 'नैतत्समाचरे'दित्यादिरपि। एवं सति ''कुल एव वन्ध' इत्यन्तमुक्तरीत्योक्तम्, अग्रे तु वस्तुस्थितिमनुसृत्येति भावः। नृत्यवन्धादेरुपयोगमाहुः **रसात्मक** इति। नृत्यवन्धाभ्यामुद्बुद्धे रसे भोगः संपन्न एवेति स्वरूपेणैवानन्ददानाच्च। जलानिलयोः क्वोपयोग इत्याशंक्याहुः **जलं वायुश्चेति**। रमणं जलस्थलभेदेन द्विविधम्। तत्राद्ये जलं सामग्री, द्वितीयेऽनिलः, तयोस्तथात्वे हेतुः स्वामिनीभगवतोः श्रमः। शीतत्वं जलानिलनिष्ठो हेतुरत्र सामग्रीत्वभवने। तथा च जलं वायुश्च रमण, उक्तहेतुभ्यां सामग्री, जायत इति योजना। जायत इति पदादपूर्वा सा भगवल्लीलार्थमेव तदैव जायत इति ज्ञाप्यते। **शीतादिति** भावप्रधानो निर्देशः। ननु भरतवात्स्यायनप्रणयनं हि जीवार्थम्। तथा च तदुक्तरीत्या प्रवृत्तस्य जीवस्यापि तथानन्दसम्भवादत्रावैशिष्ट्यापत्तिः। न च प्रभुस्वरूपमेव विशेषः। तस्योद्बुद्धरसात्मकत्वेन तदुद्बोधकानामप्रयोजकत्वादिति चेत्। मैवम्। अत्र हि रसात्मकं स्वरूपमेवोच्यते। तच्चोद्बोधकविशिष्टमेवोद्बुद्धम्, न तु केवलम्। अन्यथा रसात्मकत्वं न स्यात्। तत्स्वरूपस्यैव तथात्वात्। तच्च विशेषतो न भावयितुं शक्यमज्ञानादिति तज्ज्ञानार्थं भरतवात्स्यायनाभ्यां तत्स्वरूपं निरूपितम्, एवं भगवता नृत्यमकारि, एवं च रमणमिति। जीवास्तु ब्रह्मपरां श्रुतिमिवैतदपि द्वयं जीवपरमिति ज्ञात्वा प्रवृत्ताः क्लिश्यन्ति परमिति बुध्यस्व। एतदेवाहुः **कृष्णो भुङ्क्ते न चापर** इत्यनेन। तत्र हेतु**रुत्तम**मिति। क्षराक्षराभ्यामुत्तमं पुरुषोत्तमस्वरूपात्मकमित्यर्थः। न हि भगवत्स्वरूपमन्येन भोक्तुं शक्यमिति भावः। एतल्लीलाया भूमौ प्राकट्यकरणे प्रयोजनमाहुः **अत्रैवेति**। आधिदैविकत्वे संपन्ने हि पुरुषोत्तमभजनं साक्षात्सम्पद्यते। तच्च वैकुण्ठे भवति। प्रभुस्तु अस्मिन्नेव लोके आधिदैविकं रूपं जीवानां प्रकटं यथा भवति तथा भुङ्क्त इत्यर्थः। एतल्लीलाश्रवणेपि तथा भवतीति तथा। **उत्कृष्टमिति**। मोक्षसुखादपीति शेषः। **प्रमाणेन** वचनैरित्यर्थः। **प्रमेयेण** स्वरूपेणेत्यर्थः।

इत्थं भगवतो गोप्य इत्यत्र। **विपरीतभावेने**त्यादि। नागरीवत्कुतकोपहतमतयो न भवन्तीति तथा। **ननु ता वाच** इत्यादि। अनुभवविरो-
१०-३०-१. धित्वाद्वचनानां भगवति चाप्तत्वनिश्चयादिति भावः। **मनसि विचिकित्सायामेवेति**। मिथो विरुद्धत्वज्ञान एवेत्यर्थः। प्रकृते भगवद्वचनानुभावात्पूर्वसान्निध्यानुभवोऽधुना सम्पन्न इति नानुभवविरोधोतो न सन्देह इति भावः।

गोपीमण्डलमण्डित इत्यत्र । **उत्तरोत्तरेति** । उत्तरोत्तरक्षणसम्बन्धिभिरि-
१०-३०-३. त्यर्थः । **पूर्वपूर्वेति** । पूर्वपूर्वक्षणसम्बन्धीत्यर्थः ।

जगुर्गन्धर्वपतय इत्यत्र । **अन्यथा भगवद्धस्तेत्यादि** । अत्रायं भावः । यथा भगवल्लीलामात्रोपयोगिनो नटा इव विश्वावसुप्रभृतयः, तथा भगवद्गृह-
१०-३०-९. स्सदनादिमात्रोपयोगिक्रियाशक्तिमन्त इन्द्रादयो दिक्पालेभ्यो भिन्नाः सन्ति, ते त्वेतद्भुजदण्डमात्रावलम्बाः । तयो रसरूपत्वेन रसात्मकक्रियाशक्तिप्रधानानामेव तत्र स्थितेरुचितत्वात् । अतः सुष्ठूक्तं **भगवद्धस्तेत्यादि** ।

काचित्समं मुकुन्देनेत्यस्याभासः । **उत्पन्नस्य नादस्येत्यादि** । अत्रायं भावः । अयं नादो न लौकिकः, पूर्वसिद्धो वा, किन्त्वलौकिकोऽपूर्वः ।
१०-३०-१०. स च भगवतोऽन्यभावनिवृत्तिपूर्वकं स्वमात्रविषयकभावोत्पत्त्यर्थं प्रत्येकं कृतः । अयं च स्वामिनीनामप्युक्तभावानुरूपभगवद्विषयकभावविशेषोत्पत्तौ रसानुभावको भवति । मूलकारणत्वात्स्वामिनीगानस्य तथात्वम् । इदमेवामृतमयत्वम् । सा च भगवन्नादेनेति तथा कृतः । अपरञ्च । स्वामिन्याः स्वरजात्युन्नयने प्राधान्योक्त्या प्रभोस्तत्सहभावोक्त्या ततः सकाशादस्य माधुर्यं लक्ष्यते । अन्यथा प्रभोस्तारनादेनास्वाभिभवे रसाभास एतद्वैयर्थ्यं च स्यात् । साम्ये तूभयोः स्वातन्त्र्येण करणात्परस्परानुगुणत्वेन च मिथो रसानुपयोगित्वप्रसंगः । स्वयं नादस्वरूपमज्ञात्वा भगवन्नादं श्रुत्वा तत्स्वरूपनादकरणेपि तथा । अतो भगवद्विचारितानुपूर्वीं स्वयं ज्ञात्वा तथैवोन्नीतवतीति ज्ञेयम् । पूर्णरसोदयो भगवति जात इत्यपि ज्ञापनाय तदधीनत्वमपि ज्ञापयितुमेवं कथनम्, नायिकाप्राधान्यस्य एतद्रसस्वभावरूपत्वात् । एवं सति तारनादसाध्यजगत्पूरणं मधुरेण न भवति। अन्यधर्मनिवृत्तौ ह्येतेन पूरणं भवति । तदर्थमेतत्स्वरूपे रसाभिज्ञा निरूपिकाश्चैता एवेति । यथा 'तं त्वौपनिषदं पुरुष'मिति श्रुतेस्तदुक्तमेव ब्रह्मस्वरूपम्, तथैतन्निरूपितधर्मवदेव पुरुषोत्तमस्वरूपम्, नान्यधर्मविशिष्टमित्येतद्गानस्योपनिषद्वाक्यरूपत्वादेतच्छ्रवणेन भगवति प्राकृतधर्मराहित्यज्ञानं स्वस्मिंश्च तत्सम्बन्धित्वेनान्यधर्मराहित्यं तज्ज्ञानं च भवति । तदनन्तरं भगवदानन्दानुभवो भवति । एतत्प्रभुगानकार्यम् । एवं सत्येतेन जगत्पूरणं भवत्येवेति सर्वमवदातम् ।

काचिद्रासपरिश्रान्तेत्यत्र । **भगवतः स्थिरत्वायेति** । कदाचित्प्रभुर्गदामवष्टभ्य तिष्ठति चलति वा । यथैतस्तत्तश्चरणस्खलनं न भवति, तथा
१०-३०-११. तद्गृहीतस्कन्ध एव यथापूर्वं मण्डलं नृत्यं चानुवर्तयतीति ज्ञाप्यत इत्यर्थः । **पृक्षाधिरूढालिङ्गनमिति** । 'रमणचरणमेकेनोरुणाक्रम्य खिन्नश्वसितमपरपादेनाश्रयन्ती तदूरुम्। निजमथ भुजमेकं पृष्ठतोऽस्यार्पयन्ती'त्यादिना रसशास्त्रे निरूपितम् ।

हृष्टरोमा चुचुम्ब हेत्यत्र । **सदानन्दत्वादिति** । चुम्बनेन हि रस आस्वाद्यते ।
१०-३०-१२. अधरादिवद्बाहौ न रसोतः कथं तथेत्याशंकानिरासायेदमुक्तम् । चन्दनाले-
पतात्पर्यमाहुः **विवेकधैर्येति** । अंगरागस्यानुभावात्मकत्वेन प्रचुरभाव-
विशेषजननात्तेन तयोर्नाश इत्यर्थः । बाहौ तथा कृतिर्न लोकसिद्धाऽतः सखीनां समक्षं कथमेवं करोमीति विवेकः । एकान्तसमयप्रतीक्षया स्थितिर्धैर्यकार्यम् ।

कस्याश्चिन्नाट्यविक्षिप्तमित्यत्र । **अनेन तस्यै स्वविद्येति** । यथा सर्ववेदान्त-
१०-३०-१३. वाक्यानां निष्पीडितोर्थो ब्रह्मविद्या, तथोपनिषदादिवागधिपतिना रसात्मकेन
स्वान्तरेव भक्तविषयकस्नेहकलाभिर्निष्पीड्य स्थापितं ताम्बूलचर्वितमिति
तथेत्यर्थः । दानप्रयोजनमाहुस्तेनेयमेवेति । विप्रयोगदशायामुपस्थितमरणनिवर्तकवाक्यकथनेन सखीनां जीवयित्री भविष्यतीत्यर्थः । ब्रह्मविद्या हि ब्रह्मप्रापिका । अत्रापीयं स्वामिनी प्रियं प्रापयिष्यतीति भावः ।

नृत्यती गायतीत्यत्राभासः । **अपरा पुनर्वैराग्यात्मकमित्यादि** । अत्रायं
१०-३०-१४. भावः । स्वस्यापि स्नेहातिभरेण विप्रयोगासहिष्णुत्वेऽन्यासां समाधानं न
सम्भवतीति, तदापि यथान्यासां समाधाने शक्तिर्भवति, तथा पूर्वदत्तज्ञान-
कार्यसिद्ध्यर्थं क्रियाशक्तिरूपमच्युतीयत्वेन तदापि कार्यक्षममच्छिद्रत्वेन फलाव्यभिचार्यब्जत्वेन तदापि तापकार्यनिवर्तकं तथाऽकरोदिति तापनिवर्तकत्वं ज्ञानसहायत्वं च वैराग्ये प्रसिद्धम् । यद्यपि स भावोन्याप्रतिबध्यस्वभावस्तथापि प्रभुसम्बन्धित्वेन यथा स तथा तथा हस्ताब्जमपि तथेति । तदोभयोरनुवृत्त्योभयकार्यसम्भवेन विचित्रो महारसात्मको भाव उत्पद्यत इति भावः । ननु पूर्वोत्तरश्लोकोक्तनायिकयोर्मिथो भेदेनेदं सर्वमनुपपन्नमिति चेत् । मैवम् । अत्र ह्यैश्वर्यादिषड्गुणरूपा एता एव । अत एतद्विशिष्टमेव स्वरूपं भगवच्छब्दवाच्यमिति निरूप्यते । धर्मयोर्भेदश्चावश्यकः, तथापि धर्म्यभेदात्सर्वोपपत्तेः । तथाच भगवतो ज्ञानवैराग्ये वियोगदशायां स्वामिनीनामेवार्थ उपयुज्येत इत्युक्तं भवति । एतेन तस्मिन्समये प्रभोरपि रसात्मकत्वेन स्वामिनीविरहजभावकार्यशान्तिरेताभ्यां भवतीति सूच्यते ।

गायन्त्यस्तं विजह्निर इत्यत्र । **इयं क्रिया शक्तिरूपेति** । शक्तिरूपा भग-
१०-३०-१५. वत्सामर्थ्यरूपेत्यर्थः । तस्मिन्सति स्वातन्त्र्यमुचितमिति भावः ।

उपक्रमात्प्राप्तेपि नृत्ये यत्पुनर्वाद्योक्तिपूर्वकं नृत्यकथनं तत्कञ्चन विशेषमाश्रित्येति त-
१०-३०-१६. माहुः **अतः परं राधादामोदरवदिति** । अथवा रसावेशजनिता
मर्यादारहिता क्रिया विहार इति तदुक्त्योत्तरस्यादिना पूर्वस्यावसान-
मिति न्यायवत् पूर्वनृत्यविरामो ज्ञाप्यते । तथा सति पुनर्नृत्योक्तिरुचिता । तचेत्पूर्ववदेव

स्यात्तदा तत्त्यागो न स्यात् । रसार्थमेव तत्करणात्तदुदयं विना तत्त्यागासम्भवात् । एवं सत्यपूर्वरसार्थमेवापूर्वमेव नृत्यमथोच्यत इति ज्ञायते । तदेवाहुरतः **पर**मित्यादिना । **कर्णोत्पलालके**त्यत्र । **स्वतो वे**त्यादि । श्रमाभावज्ञापकधर्मश्रीकथनेन रसावेशादेवैतदपि नृत्यं जायत इति तस्मिन्भवति सति स्वत एव पूर्वविहारनिवृत्तिर्जातेति सूच्यत इत्यर्थः । अथवा । क्रीडाया अनिवृत्तिः क्रीडानिवृत्तिः । श्रमाभावसूचनेन पूर्वक्रीडाया निवृत्तिर्न स्वामिनीनामशक्येति सूच्यत इत्यर्थः । **गोप्य** इति । **भगवत** एवेत्यादि । भगवत्साम्येन नृत्यकृतिर्न पूर्वशिक्षया गोपजातीयानां, तत्रापि कुलवधूनां, तदसम्भवात्, किन्तु तथा रसाविर्भावो येन तथा नृत्यं स्वत एवाभूदिति ज्ञापनायेत्यर्थः ।

रेमे रमेश इत्यस्याभासे । **ननु प्राकृतीभि**रित्यादि । अत्राप्राकृतीत्वं निरूपयितुं
१०-३०-१७. तद्विपरीतधर्मोक्तिः पूर्वपक्षे । सिद्धान्तस्तु ब्रह्मानन्दरूपत्वेनाप्राकृती रमा ।
भगवांस्तु तदीशत्वेनाप्राकृतीरमणैकस्वभावः, तेनात्र रमणोक्त्यैवाप्राकृतीत्वमप्युक्तमेव भवतीति भावः । किञ्च । स्वामिनीनामप्राकृतत्वे का नाम शंका, यत एतत्सम्बन्धद्वारैव रमापि प्रभुसम्बन्धं प्राप्तवती, नान्यथेत्याहुः **रमापि भगवदाज्ञये**त्यादि । तदुक्तं 'श्रयत इन्दिरे'त्यादि । तथा च स्वामिनीषु प्रभोः स्नेहभरदर्शनेन स्वयं तत्र प्रविश्य तद्द्वारा प्रभुसम्बन्धं प्राप्तुमिच्छन्त्यपि तन्महत्त्वस्फूर्त्या स्वयं न प्राविशत्, किन्तु तदार्तिं दृष्ट्वा तन्निवृत्त्यर्थं प्रभुणाज्ञापिता तथाकरोदिति ज्ञापनायोक्तं **भगवदाज्ञये**ति । अपरञ्च । यदि नागरीवदस्मदतिरिक्तायाः प्रभुसम्बन्धो मा भवत्विति चित्तकौटिल्यं स्यात्, तदा रमा न तथा कर्तुं शक्नुयात्, एतास्तु सर्वथाङ्गीकृतव्रजसम्बन्धिन्य इत्यतिसौजन्यादिगुणवत्त्व इति सुखाराध्या इति रमायास्तथाकरणमित्याशयेनाहुस्ता **अप्यधिष्ठानयोग्या** इत्याहेति । नन्वेतद्रसप्राप्त्यर्थं ह्येतदाज्ञापनम् । सा चोभयोरपि दम्पतित्वभावस्य जागरूकत्वेनात्रासंभाविता । एवं सति प्रियस्यापि पूर्वभावविलक्षणभावोत्पत्त्या रसाभासप्रसंगेन पूर्वरसस्यापि भंजिकेयमाज्ञा, स्वोधःस्पर्शमप्यसहमाना शिक्यस्थमपि क्षीरं नीरे पातयन्ती गौरिव।अतस्तत्सम्पादनमनुचितम् । किञ्च । ब्रह्मभावे हि ब्रह्मानन्दाविर्भावो, रमा चैतद्रूपा । स्वामिन्यस्तु ततोऽधिकभगवद्रसभाववत्त्वोऽतस्तत्सम्बन्धोऽत्राशक्यवचन इत्याहुर्नन्वेत**दप्यनुचित**मित्यादिना । अत्रार्भकदृष्टान्तेन समाहितेरयमाशयः । यदुक्तं रमावेशे रसाभासप्रसंगः पूर्वरसविच्छेदश्चेति । तत्रोच्यते । यथा स्वप्रतिबिम्बं पश्यन् बालो दर्पणादौ गृहादिप्रतिबिम्बे सत्यपि स्वप्रतिबिम्ब एव रमते, नतु तदन्यस्मिन् । अत एव मूले स्वपदोपादानम् । तथा स्वामिनीषु रमासमागमेपि स्वस्य रसरूपत्वेन तदात्मकान् भावानत्र दृष्टवांस्तत्रैव तदनुरूपभावचेष्टावानेव रेमे, नतु रमास्फूर्तिरपि, येन भार्यात्वज्ञानेन पूर्वरसविच्छेदः स्यात् । तस्य रसस्य तादृक्स्वभावत्वादेव तथात्वं प्रभोः । अर्भकत्वस्वभावस्य तथात्वात्तस्यैव । रमायास्तु भगवति भर्तृभाववत्त्वेन न तुल्यरसप्राप्तिः, अत एव

'नायं श्रियोंग उ नितान्तरते'रिति श्रीमदुद्धववचनम् । किन्तूक्तभावविशिष्टप्रियांगसंगिव्रजांगनांगसंगित्वेनैव पूर्वमननुभूतजातीयः कश्चनानन्दविशेषः समजनि, येन सर्वविस्मृतिरभूत् । एतेनैव रमाप्रवेशे स्वामिनीनां भाववैलक्षण्येन पूर्वरसविच्छेद इति निरस्तम् । न हि प्रतिबिम्बाश्रयस्तज्ज्ञानं लोके क्वचिद्दृष्टचरम् । ज्ञानस्यात्मधर्मत्वेन तत्र तदसम्भवात् । अपिच । स्वामिनीनां प्रमोऽश्च तज्ज्ञानेपि न काचित्क्षतिः । यतो रसाभासभावाभासैर्मुख्यो रसः पोष्यते । प्रकृते च तदावेशतः क्षणमात्रं तथा भावोऽग्रिमक्षणजायमानरसविशेषानुभावक इतीष्ट एव । अतः प्रस्तुतखौघोमारधाराभरेण शिक्यस्थभाण्डान्यप्यतिशयेन पूरयन्त्यद्भुता गौरिवेयमाज्ञेत्युचिततरा । यच्चोक्तं ब्रह्ममायाभावात् तदानन्दरूपाया रमायाः सम्बन्धोऽनुपपन्न इति तत्रोच्यते । न हि ब्रह्मभावात्मकसाधनेनाविर्भवद्ब्रह्मानन्दो रमा । तस्य तद्विशिष्टेषु पुरुषेष्वप्याविर्भावात् । अस्याः पुरुषोत्तमैकनिष्ठत्वात्, किन्तु पुरुषोत्तमस्य रसात्मकत्वेन स यावद्विधस्तावद्विधोयं निरूपणीयः । तथा च स्त्रिग्वदम्पतीभावोऽप्येकस्तत्प्रकार इति तदात्मकानन्दप्रकाशिका । 'अर्धो वा एष आत्मनो यत्पत्नी'ति श्रुतेः स्वयमपि तदर्धत्वेनानन्दरूपा । ब्रह्मणः पुरुषोत्तमस्य या शक्तिः सा रमा ब्रह्मानन्दशब्देनोच्यते । तथा च एतादृश्याः सम्बन्धयोग्यतास्तीत्यत्र प्रवेश उपपद्यत इति । स्वामिनीनां प्रमोऽश्च रमाननुसन्धानपक्षमाश्रित्य 'बालको ही'त्यारभ्य 'स्थापयित्वे'त्यन्तो ग्रन्थ उक्तः । अनुसन्धानपक्षमाश्रित्य ब्रह्मेत्यादिः । अत्र ब्रह्मपदेनोद्दीपकानुभावकत्वाकृतिभिराविर्भावितो व्यभिचारिभावपुष्टो मुख्यो रस उच्यते । अविकृतो नित्योऽयं रस इति ज्ञापनाय ब्रह्मपदोपादानम् । **ब्रह्मानन्द**पदेन पूर्वोक्तो मुख्यरसपोषको रमावेशजनितो भावविशेष उच्यते । ननु स्वसामर्थ्यादिस्थापनेनैव चेद्रमणम्, तदा स्वत उत्तमनायिकात्वाप्राप्त्या स्वामिनीषु भगवतश्च स्वसामर्थ्यादियोजनव्यासंगेनोत्तमरसाननुभवप्रसंग इत्यरुच्या पक्षान्तरं वक्तुं तामुद्भावयन्ति **नन्वेतदपी**त्यादिना । सामर्थ्यादि योजयित्वा रमणे क्लिष्टकर्मत्वप्रसंगेनानुचितमिदमित्यर्थः । पक्षान्तरे दृष्टान्तस्याभासमाहुः **किमनेनेति चेदि**ति । स्वामिनीनामेवार्थे अस्या लीलायाः क्रियमाणत्वाद्रमावेशेन रमणेन स्वामिनीनां किं फलं सम्पादितवानित्यर्थः । इयमाशंका दृष्टान्तेनापास्यते । तथाहि । यदा यशोदारोहिण्यादिसमक्षं तत्संकोचतः स्वयमाश्लेषाद्यकरणेनात्यार्तानां व्रजसुन्दरीणामार्तिहरणार्थं बालभावव्याजेन तदुरस्सु विविधविहारान् करोति, तदैतासां रसरीत्यैव रसपूर्तिरार्तिहरणं च भवति, अन्यासां तु विचित्रबालचेष्टालभानेन बाललीलारसानुभव एव भवति, एवमिहापि स्वामिनीनां निजरसभावानुरूप एव रसानुभवो रमायास्त्वेतत्प्रसंगेन निजभावानुरूप एव स इत्यर्थः । तथा च दृष्टान्तद्वयमत्र ज्ञेयम् । यथार्भको रेमे तयेत्येकः, अग्रिमश्चापरः । सान्निध्यात्स एव तथाविधो यथेति । अत्रावृत्तेनार्भकपदेन लौकिकः स उच्यते । द्वितीयो दृष्टान्तः पूर्वोक्तप्रकारक एवेत्याचार्यैरत्र नोक्तः । एवं सति रमाप्रवेशत एवात्र रमणयोग्यतेति कश्चिन्मन्येतेत्यरुच्या पक्षान्तरमाहुः यद्वेत्यादि ।

कामार्दिताः शशाङ्कश्चेत्यत्र । एकस्मिन् वाक्य उक्तयावद्धर्मविशिष्टेन येन
१०-३०-१९. समं यस्योक्तस्यानुक्तस्योभयोर्वा समुच्चयस्तस्य तयोर्वा तावद्धर्मवत्त्वमावश्य-
कमिति चन्द्रेपि कामार्दितत्वं चकारेण बोध्यते । तत्रैतस्मिन्वाक्येऽनुक्तो-ऽकलङ्कश्चन्द्रोप्यनेन समुच्चीयत इत्याहुः **आनन्दमयोऽपीति** । अग्रे लौकिकेन्दोर्निरूपणम् । उक्तसमुच्चितमर्थमाहुः **चकारादित्यारभ्य तथा चन्द्रोऽपीत्यन्तेन** । **भगवति निवेशनार्थमित्यारभ्य जात** इत्यन्तेनालौकिकस्येन्दोः कथनम् । अन्यथा तथा चन्द्रोपीत्यतिदेशेनैव कामार्दितत्वं प्राप्तमेवेति पुनर्नोक्तं स्यात् । अत्रैवं निरूपणे नियामकमाहुः **अनेनाग्र** इत्यादिना । अत्रेदमाकूतम् । 'एवं परिष्वंगे'त्यादिना रसशास्त्रोक्तरीत्या रमणोक्त्या सहस्रवणादिकमपि प्राप्तमेव भवति । तस्य तावद्रूपत्वात्, परन्त्वखण्डरूपे भगवति स्वबुद्ध्या तन्नोपपादयितुं शक्यत इति गोप्यत्वाच्च प्रकटं न वक्तुं शक्यमित्यनेन प्रकारेण शुकदेवैर्ज्ञापितमित्याचार्यैस्तथाऽगादि । सोमस्य रेतोरूपत्वं श्रुतिसिद्धमिति नानुपपत्तिः काचिदंशनिवर्तन इति दिक् । ननु स्वरूपस्य रसात्मकत्वेनैव सर्वमुपपत्स्यत इति किमेतत्प्रवेशेनेति चेत् । मैवम् । अस्य रेतोरूपत्वात्तस्य चाध्यात्मिकरूपत्वेन स्वरूपान्तर्गतत्वात्तेन रूपेण प्रवेशस्यावश्यकत्वात् । न च तस्य तत्रैव स्थितेर्नेदं साधीय इति वाच्यम् । प्रकारबोधनपरत्वादस्या लीलायाः । अन्यथा तमिस्रायामियं लीला न स्यादिति ।

आत्मारामोऽपि लीलयेत्यत्र । **चन्द्रप्रवेशादिति** । रेतःपोषस्य भावपोषक-
१०-३०-२०. त्वादिति भावः । **अस्यामपि दशायामिति** । प्रमाणसिद्धत्वेनोभयो-
रत्र विरोधाभावादिति भावः । एतद्विद्वन्मण्डने प्रपञ्चितमस्माभिः । वस्तुतस्तु लीला स्वरूपात्मिकेति तन्मध्यपातिन्योपि तथैवेत्यात्मरमणमेवात्रापीत्याशयेनाहुः **तत्रापि आत्मरमण एवेति**। अत एवाग्रे वक्ष्यति 'गोपीनां तत्पतीनां चे'ति श्लोकम्। लीलापदध्वनितमर्थमाहुः **यथा महानपीत्यादिना** । ईश्वरोऽपि सन्नायिकाप्राधान्येन स्वस्य गौणभावेन रेमे । तस्य रसस्य तथात्वादित्यर्थः ।

गोप्यः स्फुरदित्यत्र । **गाने हीति** । एवमत्र ज्ञेयम् । पूर्वश्लोकेन हि स्वाधी-
१०-३०-२२. नभर्तृकात्वमुक्तम्, अस्मिन्नपि कुण्डलकुन्तलगण्डशोभा प्रियकरकमलसम्पा-
दितैव । अत एवास्या मानधारणे हेतुत्वम्। स्वनिष्ठत्वेन सहजत्वमस्य । एवं सत्युत्साहविशेषो यो गानजनकः स रजोगुणशब्देनोच्यते । तथा च पूर्वं मानेन दुःखमभूदिति तादृशत्वाभावाय गुणगानमिति । अत्रैव **मूलभूतगुणेति** । भगवच्चातुर्यकार्यमित्यर्थः । गानजः पुष्टो भावविशेषोऽलौकिकेष्टसाधकत्वेन पुण्यपदेनोच्यते ।

ताभिर्युत इत्यस्याभासे । **तुल्याभिरिति** । निर्दोषपूर्णगुणत्वेन भावैरानन्दा-
१०-३०-२३. त्मकत्वेन च तुल्याभिरित्यर्थः । अत एव प्रतिपेकः सम्पत्स्यते । रमणं
जलस्थलभेदेन द्विविधम् । तच्च पूर्णरात्रिसाध्यम् । तत्रैकस्य पूर्तावितरसारम्भ इति महारात्रसमय इत्युक्तम् ।

वैमानिकैरित्यस्याभासः । **ननु देवैरिति** । अविचारमत्यर्थं बहुभिरेकदा कृतः
१०-३० २४. परिषेको लोके व्याकुलतासम्पादको दृष्ट इत्यत्रापि तथा सम्भावनयान्तरंगभक्तैः स्वामिनीषु शनैः परिषेकः कार्यो नैवमिति विज्ञप्तिः कथं न कृतेत्यर्थः । अन्यस्य भक्तस्यापि तदा दर्शनं दुर्लभम्, परन्तु पूर्वं विमानशतसंकुलमित्युक्तमिति तत्स्थितानां दर्शनं सम्भाव्यते । तेषां तु प्रभुलीलोपयोगिमण्डपस्थितिलक्षणसम्बन्धेनैव जनितानन्देन भगवदिच्छया पुष्पवृष्टिस्तुतिरसाभिनिवेश एव भवति, न तु दर्शनमपीति भावः । यद्यपि दर्शनेपि तैर्न किञ्चिद्वक्तुं शक्यम्, भगवदतिरिक्तस्यैतासु चक्षुमनधिकारात्, तथापि यदन्यत्र दुःखदं दृष्टं तदेताभिः कृतं प्रभोरतिसुखदमिति ज्ञापयितुमाचार्यैराभासस्तथोक्तः । **अत एवात्तगजेन्द्रलील** इत्युक्तम् । अत एवोत्क्षिप्तजलप्रतीकार उत्तानपाणिभ्यां सम्भवत्यपि प्रभुर्न करोति, प्रत्युत तदभिमुखमेव बाहू प्रसारयतीत्याशयेनाहुः **सर्वे देवा** इत्यादि । बाह्वोर्देवतारूपत्वेन तदवयवभूताङ्गुलीकरतलादीनामपि देवत्वमिति भावः । **अन्यथा लोके** इति । भगवता निवारणे कृते स्वामिनीलक्षणे लोके तथा न भवेदित्यर्थः ।

यथा मदच्युदित्येतत्तात्पर्योक्तौ । ततः अविचारेणेति । पूर्वस्यां लीलायां
१०-३०-२५. देशकालनायिकाविचारपूर्वकं रमणं कृतम्, तदनन्तरं न तथेत्यर्थः ।

प्रश्नतात्पर्यं तु लौकिक्यपि यदा दृष्टिरित्यत्र निरूपितम् ।

प्रतीपमाचरदित्यत्र । धर्मो नष्ट इत्यादि । अधर्मनाशधर्मस्थापनतत्करण-
१०-३०-२८. तदुक्तितत्प्रश्नाणां पूर्वमुक्तानां प्रतीपा अर्था अनेनोक्ताः ।

नैतत् समाचरेदित्यस्याभासः । ननु तेजीयसामपीत्यारभ्य न्यायादित्यन्तः ।
१०-३०-३१. यद्यप्येतत्समाहितिर्नैतेन श्लोकेन भवति, तथाप्युत्तरार्धेऽन्यस्य कर्तुर्नाशोक्त्येश्वराणामनाशज्ञापनेन च समाहितिर्भविष्यतीत्याशयेनेदमप्युक्तमिति ज्ञेयम् । अन्तरङ्गैरेतेऽग्रे वक्ष्यन्ति च ।

इच्छयात्तवपुष इत्यत्र । वपुष्शब्दस्य वपुष्प्राकट्यपरत्वमित्याचार्याणामा-
१०-३०-३५. शयः । (अत्रैवाग्रे **यथान्नभेदेनेति** । यावदस्यान्नेन देहः पोषितो भवति, तावत्तदीयत्वेन लोके व्यवह्रियते । पुनरन्यस्यान्नेन पोषितः स एव तावत्तदीयत्वेनापि व्यवह्रियते । एवमेकदेहस्यान्नभेदेन भेदव्यवहार इत्यर्थः ।)

योन्तश्चरतीत्यत्र । वस्तुतस्तु नायमित्यादि । देहकृततत्तन्निषेधोत्र क्रियते ।
१०-३०-३६. प्रभुस्तु स्वत एव पुमान् । अत एव श्रुतावेकस्मिन्नेव वाक्ये पुरुषं पुरुषविधमित्युक्तम् ।

( ) चिह्नान्तर्गतं श्रीहस्ताक्षरपुस्तके नास्ति ।

भजते तादृशीः क्रीडा इत्यत्र । **तत्तद्धर्मप्रवेशेति** । श्रोतॄणामिति शेषः ।
१०-३०-३७. यल्लीलाश्रवणमेव भगवद्भावसाधकम्, तत्र तल्लीलामध्यपातिनां स्वरूपं किं वक्तव्यमिति भावः ।

ब्रह्मरात्र इत्यत्र । वासुदेवपदतात्पर्यमाहुः **यतो भगवानित्यादि** । दिवा
१०-३०-३८. विप्रयोगजार्तौ सत्यां दिनान्ते प्रियसंगमे य आनन्दो, न स सदा दर्शने इति सोऽत्र मोक्षपदेनोच्यते ।

श्रुतिसिद्धरसात्मत्वं प्रकटीकृत्य भूतले ।
क्रीडन्मल्लोचने शश्वच्छिशिरीकुरुते प्रभुः ॥ १ ॥

इति त्रिंशोध्यायः ।

अथैकत्रिंशाध्यायं विवृण्वन्त उक्तलीलानन्तरमन्यभजनं कुतुकादपि व्रजवा-
१०-३१-०. सिनामनुपपन्नमित्याशंक्य इदं प्रकरणं न सर्वथा पूर्वप्रकरणमध्यपातीति ज्ञापनाय पूर्वप्रकरणार्थमनूद्यैतदुक्तितात्पर्यमाहुः **नामलीलात** इत्यारभ्य **हरिणैव स्थितमन्तेन** । नामलीलातो यो रसस्तदर्थमन्यभजननिवृत्तिपूर्वकमिदं प्रकरणमुच्यत इत्यर्थः । यथा रूपलीला स्वतन्त्रा, तथा नामलीलापीति ज्ञापनाय भिन्नोपक्रमेणैतत्प्रकरणारम्भः कार्यः । तत्रान्यभजननिवृत्तिपूर्वकं भगवन्माहात्म्यज्ञानमंगं तदर्थं तथोच्यते । **एवमुद्धृतभक्ता** इति । इन्द्रभजननिवृत्तिपूर्वकमित्यर्थः । एतावान्परं विशेषो यद्रूपलीलारसानुभवे वैष्णवधर्माणामपि त्यागोंगम्, नामलीलारसानुभवेऽन्यदेवताभजननिवृत्तिस्तथा, न तु विहितानां भगवद्धर्माणामपि । विधेरपि नामलीलामध्यपातित्वात् मर्यादापुष्टिभेदेन तस्या द्विविधत्वान्मर्यादामिश्रपुष्टिमार्गीयाः पूर्वाध्याये कथ्यन्ते । शुद्धपुष्टिमार्गीया द्वितीये । मर्यादामार्गस्य सदोषत्वज्ञापनाय शंखचूडप्रसंगः ।

रजनीं तां महाभागा इत्यत्र । **अग्रिमानिष्टमिति** । सर्वथा परिग्रहो
१०-३१-४. भाग्ये महत्त्वं तद्वत्त्वादेतेषामन्यभजने दुःखसम्भवः, उपेक्षायां तु सुखमेव भवेदिति भावः ।

स्वेन पाप्मनेत्यत्र । **पूर्वं हीति** । ब्रह्मवृत्त्यपहारस्य सर्पयोनिफलकत्वादिति भावः ।
प्रपन्नोऽस्मि महायोगिन्नित्यत्र । **तव नैते पित्रादय** इत्यादि । सर्प-
१०-३१-१६. त्वादीनाधिकारित्वादेवं कथनमिति ज्ञेयम् ।

तदात्मवैभवमित्यत्र । **यत्र क्रियाज्ञानादीनामिति** । तेषां प्रयोजनाभाव
१०-३१-१९. इत्यर्थः । **कदाचिदथ गोविन्द** इत्यत्र । **इयं हि लीलेत्यादि** । तत्तत्काल एव कर्मविधानान्नामलीला कालप्रधाना । स चोपाधिरूपत्वेन सर्व-

क्षयिष्णुरन्यानपि कालयति, दैत्याश्च तादृशा इति तदनुगुणः कालो भवतीति कालप्रधाने मार्गे दैत्यानां बाधकत्वमावश्यकम्। राजसे मार्गे तामसानां प्रभावस्योचितत्वाच्च। एवं सति तन्निवारणे भगवन्माहात्म्येन जातेपि तत्र नामलीलात्वस्यैव प्रयोजकत्वात्तन्माहात्म्यं नामलीलापर्यवसाय्येव भवतीत्यग्रजाय मणिदानेन ज्ञाप्यत इत्यर्थः। अतएव प्रकृते शिवरात्रिरात्रिनिशामुखसंमाननान्युक्तानि। तत्र बाधनिवारणस्यावश्यकत्वायाहुः **लौकिकालौकिकेति**। लौकिकं शंखचूडवधश्चरणारविन्दस्पर्शमात्रेण ब्रह्मशापजाहित्वस्यापि नाशोऽपूर्वरूपसम्पत्तिश्चालौकिकम्। **ज्ञात एव**। लौकिकैः प्रत्यक्षतया ज्ञात एवेत्यर्थः। विपरीते बाधकमाहुरन्यथेति। लौकिकालौकिकमाहात्म्याननुभवे फलश्रुतेर्यथाश्रुतार्थस्य प्रत्यक्षबाधितत्वेन तथोत्प्रेक्षापरत्वं कल्प्येत। यथा यजमानस्य बर्हिर्मुष्टिरूपत्वं प्रत्यक्षबाधितमिति यजमानः प्रस्तर इति वाक्यं यागोपयोगित्वेन, उभयोस्तत्त्वेनोत्प्रेक्ष्यते यजमान इति कल्पयन्ति। वस्तुतस्तु लौकिकमानानुरोधेन वेदार्थबाधका भ्रान्ता एव। यतो लौकिकं मानमलौकिकार्थसमर्पणे न समर्थम्, अतो यथाश्रुतार्थ एव प्रामाण्यं श्रुतेर्मन्तव्यमितिभावः। **क्रियाशक्तिप्रधान** इति। इन्द्रत्वेन देवत्वात्तथेति भावः। **अनेन मध्यमाधिकारिणामिति**। प्रमाणरूपबलदेवपराणामपि युगपदङ्गीकारेणेति भावः। अतएवैतादृशानामधिकारिणामनन्यत्वभङ्गोपि नेत्याहुः **अन्यथेति**। आवेशामात्र इत्यर्थः। तेनैव तेषामङ्गीकारान्न तद्भङ्ग इति भावः। **अद्भुतविक्रम** इत्यस्य तात्पर्यान्तरमाहुः **केवलार्थपराणामिति**। अत्रायमर्थः। अद्भुतं हि लौकिकोपपत्तिरहितं मनस उल्लासकं भवति। प्रकृते वेदरूपरामस्य विक्रमः क्रियाशक्तिफलरूपो विचित्रः स्वर्गादिस्तन्निरूपकस्य वेदस्य श्रुतितात्पर्यविदुषां यथाश्रुतार्थपराणामुपयोगः। वस्तुतस्तु स्वर्गशब्देन 'यन्न दुःखेन सम्भिन्न'मिति वाक्यादात्मसुखमेवोच्यत इति तत्त्वनिबन्धे विस्तृतं पितृचरणैरिति तात्पर्यविदन्यभजनराहित्येन प्रभुमेव भजेत्। तथा च केवलार्थपराणामित्यस्य यथाश्रुत्यर्थपराणामित्यर्थो वेदपक्षे। भगवत्पक्षे तु स्वप्रयोजनपराणाम्, न तु निरुपधिभगवत्पराणामित्यर्थः। अत्र स्वरक्षा कामसुखं च स्वप्रयोजनम्। एवं सत्यधिकारिभेदेन भजनभेदात्फलभेदोपीति तदुपपत्त्यर्थमुभयरूपेण क्रीडेति भावः। विपरीते बाधकमाहुः **अन्यथेति**। उभयरूपेणैतल्लीलाया अकरणे शंखचूडवधः स्त्रीणां स्वप्रयोजनसमर्पणं चेति कार्यद्वयमेकेनैव रूपेण न सम्भवतीति तद्रक्षार्थं रूपान्तरं प्रकटनीयं स्यादित्यर्थः। नामलीलायां शब्दप्राधान्यं मत्वा पक्षान्तरमाहुः **वेदे वेति**। यदि साधनरूपेण यथाश्रुतार्थपराणामर्थनिरूपणं फलरूपेण च तात्पर्यविदुषामितरनिराकरणं न कुर्यात्तदा 'हिंसायां यदि रागः स्याद्यज्ञ एव न चोदने'ति वाक्या'त्तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायत' इति वाक्याच्च यागादिविधीनां 'पञ्चपञ्चनखा भक्ष्या' इति वाक्यस्य तदितरभक्षणनिषेधपरत्ववद्यागातिरिक्तकर्मनिषेधपरत्वमेव सिध्यति, न तु यागविधानपरत्वम्। अकरणे

प्रत्यवायश्रवणादवश्यकर्तव्यताकत्वविधानपरत्वं चेत्येकस्यैव विधेः स्वार्थपरत्वं स्वार्थातिरिक्तनिषेधपरत्वं चेति द्विगुणा वृत्तिः स्यादित्यर्थः ।

विरजाम्बरावित्यत्र । शुद्धा मायेत्यादि । वेदमार्गे हि द्विधा प्रवृत्तिः । कर्म-
१०-३१-२१. जडत्वेनैका, भगवदिच्छां ज्ञात्वा भगवत्परत्वेन चान्या । उभयत्रापि माया सहकारिणी । तत्र रजस्तमोयुक्ताऽद्ये । एतद्रहिता द्वितीय इति तथेति भावः ।

उदितोडुपतारकमित्यत्र । प्रमाणं चन्द्र इत्यादि । अत्रायं भावः । अत्र हि
१०-३१-२२. रामप्रभ्वोर्लीलोच्यते । तौ च प्रमाणफलरूपौ । सामग्र्यपि तद्रूपैवेत्युच्यते । तथा च रसप्रमापकत्वादिन्दुस्तथा । 'सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणी'ति श्रुतेः सुकृतफलानुभवसामयिकतेजोरूपत्वादुडूनां तदुदयोक्त्या फलोदयो ज्ञाप्यत इति । **मत्तालिजुष्टमित्यत्र । षट्पदत्वादिति ।** गत्यर्थशब्दानां ज्ञानार्थत्वाज्ज्ञानसाधनषट्कवत्त्वमत्र सूच्यते । तानि दर्शनरूपाण्येवेति सर्वज्ञत्वम् ।

मणिमादाय भास्वरमित्यत्र । मणिग्रहणेन मणिगता देवतेति ।
१०-३१-३२. गृहीतेति शेषः । तदधिष्ठानं विना भास्वरत्वाभावादन्यथा विशेषणं न वदेदिति भावः । **ताः कामयतीति पक्ष इति ।** चल इति शेषः । उपभोगायान्या अपि कामयत इति ज्ञापनाय बहुवचनम् । नन्वेवं चेद्देवताया एव ग्रहणमुचितम्, न तु मणेरपीत्यत आहुः **तत्रैवेति ।** मणिनियामकत्वलक्षणाधिकाररूपं देवतात्वं हि भगवद्दत्तम् । तच्च तत्रैव स्थिताया भवति । तथा च तत्रैव मणावेव स्थित्वा या देवतात्वं भजते तस्या अपीत्यर्थः । **यत्किञ्चित्करोतीति ।** यन्मार्गसम्बन्धि यत् करोति तत् तन्मार्गाधिष्ठातरि तथेत्यर्थः । प्रकृते प्रमाणमार्गसंबन्धिफलात्मकमण्याहरणं कृतवानिति तथेति भावः । तर्हि सर्वमूलत्वाद्भगवतस्तत्रैवास्य स्थापनमुचितम् । प्रभुकरस्पृष्टस्य मुक्त्यभावश्चानुपपन्न इत्याशंक्याहुः **प्रमाणबलमेवेति ।**

द्वात्रिंशाध्यायार्थोक्तौ । द्वात्रिंशेऽन्तरित्यादि । यद्यप्यानन्दः सर्वत्रैवा-
१०-३२-०. न्तरेवानुभूयते, तथापि बाह्यरमणे शरीरचेष्टयोरेव प्राधान्यात्स्वरूपस्य मूर्तत्वेन तदात्मकानन्दस्यापि तथात्वाच्छरीरेन्द्रियादिष्वपि स्वरूपतः स्थापितस्य मनसाऽनुभवो भवति । प्रकृते त्वन्तःसंगेन प्रकटेनानन्देन शरीरेन्द्रियादिषु बाह्यरमणेनेव धर्मा भवन्तीत्यभिप्रेत्यान्तरित्युक्तम् । **स्वानन्दं पूरयामास इतीर्यत इति** सम्बन्धः । ननु धर्मिस्वरूपविरहजदुःखनिवारणं धर्मरूपेण गुणगानेन कथं सम्भाव्यते । तत्रापि स्वरूपेणेवानन्दपूर्णं चेत्यत आहुः **येनैवेति ।** यथा स्वरूपं पूर्णानन्दात्मकम्, तथा नामलीलापीति सर्वमुपपद्यत इत्यर्थः । यद्वा । येन स्वरूपलक्षणेन हेतुना पूर्वं तथा कृतवांस्तेनैवान्तःस्थितेनैवात्युद्रेकेण मुखकमलद्वारा निर्गतेनाधुनापि तथा कृतवानित्यर्थः । **एतदेव विवृतमन्तःप्रविष्ट इत्यादिना ।** यद्वा । यया यया स्वविषयिकां भक्तानामार्ति

पश्यति भगवांस्तथातथा मुदितो भवतीति वस्तुस्थित्या दिवा विरहजार्तिपूर्णानां सायं मिलने यो रसो भगवतः स न दिवा संगमे सतीति च येनैव स्वानन्देन स्वयं पूर्णानन्दो ज्ञातो भक्तैस्तादृशं तं पूरयामासेत्यर्थः । यद्यपि गुणगानं भावस्वभावादेव भवति, न तु प्रयोजनानुसन्धानेन, तथापि पूर्वभावस्थैर्यमप्यनेन भवतीत्याहुः **अन्तःप्रविष्ट** इत्यनेन । पूर्वं या नादद्वारा सुधा प्रविष्टा भावात्मकभगवदात्मिका 'रन्ध्रान्वेणोरधरसुधया पूरयन्नि'त्यत्र निरूपिता सा पूर्वोक्तप्रकारैर्बहिःफलानुभवपर्यन्तैः क्रमेण पुष्टा सती स्वविषयरूपं स्वपोषकं बहिःसम्बन्धमलभमाना तदर्थं स्वयं गुणगानरूपेण प्रकटाप्यलब्धविषया सती स्वप्राकट्यात्पूर्वमन्तःसाक्षात्प्रियप्राकट्यात्पुनस्तत्रैव स्वस्यान्यासां च श्रोत्रद्वारा प्रविष्टा तत्र स्वविषयं पोषकं प्राप्य सुस्थिरा जाता । तदेतदुक्तम**न्तःप्रविष्ट** इत्यादिना । युग्मश्लोकैर्गाने हेतुमाहुः **शब्दार्थयोरि**ति । पूर्वं नादमात्रमनुभूतमिति नादप्राधान्येन अक्षण्वतामित्यादिना गीतम्, अधुना स्वरूपानुभवोपि साक्षाद्वृत्त इत्युभयोरपि महारसरूपत्वज्ञापनाय द्वाभ्यां कथनमुभयोरप्येकरूपत्वमिति ज्ञापनायैकवाक्यता चेत्यर्थः । संख्यातात्पर्यमाहुः **सर्वेष्वि**ति । निरूप्यते यत इति शेषः । अत्र हि वर्षे वर्षे यावतीं लीलां प्रभुः करोति, तावती सर्वा लीला क्रमेण स्वामिनीभिर्गीता, न त्वेतावन्मात्रेति ज्ञापनाय पूर्णवर्षस्य द्वादशमासात्मकत्वात् माससमानसंख्याका युग्माः श्लोका उच्यन्त इत्याहुः **अतोऽत्रे**ति । किञ्च । उपक्रमोपसंहाराभ्यां चैकं युग्मं भवति, तेनाधिमासेपि यत्करोति तदपि स्वामिनीभिर्गीयत इति ज्ञाप्यत इत्याशयेनाहुः **आद्यन्त** इति । समाहारोऽत्र । तत्र प्रतिपाद्यं रूपमाहुः **प्रक्रम** इति ।

गोप्यः कृष्ण इत्यत्र । **केवलपदा**दिति । गोत्रजयोषितामितिवदपकर्षज्ञापकधर्मानुक्तिपूर्वकं शुद्धभावज्ञापकगोपीपदात् रासमण्डलमध्यस्था एवोच्यन्ते,
१०-३२-१. न तु पूर्वाध्यायोक्ता इत्यर्थः ।

अन्त्ययुग्मद्वयतात्पर्योक्तौ **जानाति भगवानेवे**ति । **लताः पुंस्वि**ति । त्रिवि-
१०-३२-२. धेष्विति शेषः । लतानां तरुमध्यपातित्वेन पुंस्वेव गणना कृता ।

वल्गितभ्रुरित्यसाभासे । **मानुषभावा**दिति । मानुषभावमनतिक्रम्य लीलां करोतीति तथोक्तम् ।

मुकुन्दतात्पर्योक्तौ **वेणुनादे**नेति । परोक्षवादोत्र कृतो, विवक्षितार्थस्य गोप्यत्वात् ।
१०-३२-३. **शुद्धि**र्भगवद्भावान्यभावराहित्यम्, **मोक्षो** भजनानन्दानुभवः ।

हन्त चित्रमित्यत्र । **सोमोत्पत्तौ निर्णय** इति । तत्रामावास्यायां सोमस्य दिवा स्थितिस्थानमुक्तम् । 'त्रिमुहूर्तं वसेदर्के त्रिमुहूर्तं जले वसेत् । त्रिमुहू-
१०-३२-४. र्तं वसेद्गोषु त्रिमुहूर्तं वनस्पता'विति । एवं सति दिनस्य द्वादशमुहूर्तात्मक-

स्याक्षतिमुहूर्तं यां यां लीलां प्रभुः करोति, सा सा लीलाऽत्र गीयत इति संख्यया ज्ञापितं भवति। लीलासहितो भगवान् हृदि प्रकट इति यदा यां लीलां प्रियः करोति, तदैव सैव लीला स्वामिनीहृदयेषु स्फुरतीति नानुपपत्तिः काचित्। **हारहास** इत्यत्र। केवलमुक्ताहार-तुल्यत्वे चित्रता नास्तीति यथा रत्नैरित्युक्तम्। अधरप्रभाभिररुणत्वं दन्तानां सहजम्। हासविभागस्थैर्यसूचितमर्थमाहुः **अनेनेति**। भगवत्स्नेहेन सर्वात्मना मायाद्यपगमः प्रमाणबलम्। तत्स्थैर्यकृत्या तु तन्निराकरणं भवति। एवं सति स्नेहमायाकार्ययोः सहभाव-करणेन भगवत्स्नेहवतोऽपि जगतो ऽजीवजीवरूपस्य प्रपञ्चे विषयरूपे तथात्वं तथेत्यर्थः। इदमप्येकं चित्रम्। एतादृशस्य सूचितस्यार्थस्योक्तौ हन्तेति खेदोक्तिबीजम्। भगवति रागवतामन्यत्रापि रागदर्शने भक्तानां खेदोत्पत्तेरावश्यकत्वात्। अन्यथा तु स्नेहेन सर्वत्यागे तैः सह लोके लीला न स्यादिति तथा कृतिरिति भावः। लोके नैवं हासः सम्भवतीत्यत्राप्यसम्भावना मा भवत्विति प्रमाणमुक्तं **श्रुतार्थापत्तिरित्यादिना**। अग्रिमपदेप्येवमेव ज्ञेयम्। अचिरस्थायित्वधर्मसाम्येन विद्युत्पदेन धनं लक्ष्यते। यद्वा। हारवद्भगवदुरस्येव हासस्थित्या विभागस्थैर्यसूचिता या प्रपञ्चविषयिण्यासक्तिस्तामपि स्वविषयिणीमेव करोति। एवं सति प्रपञ्चे प्रपञ्चविषयको यो मोहस्तस्य स्वविषयकत्वेन जनकत्वं स्थिरीकृतं स्वस्मिन्निति टीकार्थः सम्पद्यते। स्वमात्रविषयकासक्तिजनकत्वं लोकेत्यप्रसिद्धमिति चित्रतात्र। एवमेवाग्रेपि ज्ञेयम्। अस्मिन्पक्षे **हन्तेति** हर्षे। अत्र न कस्यापि बलं प्रभवतीति ज्ञापनाय सम्बोधनम्। विशेषणयोर्मुख्यार्थोऽतिगोप्य इति पितृचरणैर्न लिखितः। अत एव स्वामिनीभिरपि गूढार्थज्ञानार्थं सावधानतया श्रोतव्य-मित्याशयेनेदं **शृणुतेरयुक्तम्**। अस्माभिरप्यत एव न लिख्यते। तदनुग्रहवतां स्वत एव तत्स्फूर्तेः, अन्येषां तज्ज्ञानस्यानुचितत्वात्। भगवन्मात्रस्नेहवतोन्यधर्मनिवृत्तिः स्वाभा-विकीति प्रमाणबलनिरासः।

कर्हिचित् सबल आलीत्यत्र। गोप्यतयायमर्थं इति। एतेन कर्हिचिदेव
१०-३२-६. सबलः, कर्हिचिदेव गोपैः सहित इत्यपि सम्बन्धो ज्ञाप्यते। तेन सदैकान्ते
मोक्तैवेति स इत्यनेनोच्यते। **मुकुन्द** इत्यत्र। दर्शनसुखमात्रं मोक्षः,
स्वरूपरसज्ञानं स्वरसस्थापनमिति ज्ञेयम्।

वनचर इत्यत्र। **सात्त्विकभावापन्न** इति। वृन्दावनस्य रसोद्दीपकत्वेन
१०-३२-८. स्तम्भादिसात्त्विकभावहेतुत्वात्तद्युक्त इत्यर्थः। आदिपुरुषस्य तद्रहितत्वेन
श्रवणात्तस्माद्भेदेन वर्णनमुचितमिति भावः। **वनलतास्तरव** इत्यत्र।
पञ्चधर्मयुक्ता इति। 'पश्यतैतान्महाभागा'नित्यादिनोक्ताश्चत्वारो भगवदीयत्वं चैक-मिति तथा।

१०-३२-११. एत्येत्यस्याभासे । ज्ञानरूपे वेति । आत्मन्येव ब्रह्मत्वेन ज्ञात इत्यर्थः ।
विदधत्प्रतपत्रमित्यस्याभासे । किन्तु राज्यमपीति । सुरभीकृतगोविन्दाभिषे-
१०-३२-१३. कवदस्यापि स्वाधिपतित्वेनैव वरणमिति तथोक्तम् ।

स्वरजातीरनयदित्यत्र । नूतनत्वेनेति । यद्यपि स्वरजातिप्रापकत्वमेव मूल उच्यते, निजशिक्षा इति विशेषणेनापूर्वत्वं च प्राप्यते, न तु नूतनो-
१०-३२-१४. त्पत्तिः, तथाप्यन्यज्ञानमपेक्ष्येदमुक्तमिति ज्ञेयम्, अतो नादब्रह्म नित्यमिति
पूर्वग्रन्थाविरोधोपि ।

रववञ्चितचित्ता इत्यत्र । इदानीमेवोपयोग इत्यादिना प्रतीतिप्रकार-
कथनम् । उपयोगो नायिकावदुपभोग इति यावत् । वेणुनादस्यैता-
१०-३२-१९. दृगनुभावो यदेतासामप्येवं भावस्तत्रान्यासां का वार्तेति भावः ।

वत्सलो व्रजगवामित्यत्र । गावो मुच्येरन्निति । एकैकेक्षणादिलीलारसस्य
१०-३२-२२. निरवधिमहारसत्वेनैकत्र निमग्ना नात्मानमपि जानीयुः, किमुतान्यदित्यर्थः ।

मदविघूर्णितेत्यत्र । रजोगुणो मुख्य इति उद्दीप्तो रसभाव इत्यर्थः । तस्मिन् स-
त्येव तत्करणात् । मदविघूर्णितेत्यत्र मदोत्रेत्यारभ्योक्तमित्यन्तम् । पूर्वानुभूत-
१० ३२-२४. विविधनायिकाविविधविलासस्मृतिधाराजनितानन्दसन्दोहानुभवः पूर्णावबोध
इत्युच्यते । स चेतरनिस्सारक इति मदरूपः । सोधुना भवतीनामिव ममापि भवतीसम्बन्धस्मृत्यैव वनेपि मोदः, न त्वन्यनायिकाविषयिण्या क्रिययापीति ज्ञापयितुं ज्ञानप्रापकनयनयोरेव मदः प्रदर्श्यते । ज्ञानमपि भवतीमात्रविषयकम्, न त्वन्यविषयकमपीति ज्ञापयितुं विघूर्णितत्वम् । तादृग्बहिःप्रसरद्रूपं न भवतीति तथा । प्रचुरप्रेमवतीनां तत्रापि दिवा क्लिष्टानां प्रियदर्शने तत्रैवात्मप्रवेशः स्यादिति तदभावायेषदेव मानं ददाति यावता पृथक्स्थितिर्भवतीत्याशयेनाहुः स्वरूपस्थित्यर्थमित्यादि । यद्वा । इयदवधि पृथक्स्थित इति ज्ञानेन माने सम्भवत्यपि ज्ञापितार्थज्ञानेनेषदेव मानो भवतीति तथा । अथवा । उक्तज्ञापनेनेषदपि मानं धत्तीत्यर्थः । यद्वा । प्रचुरस्मरभाव एव मदस्तेन तथेति पूर्ववत् । यद्यप्येतादृशस्य स्वप्रियाभ्यः पूर्णमेव सम्माननं कर्तव्यं भवति, तथापि मध्येमार्गमन्येपि पश्यन्तीति तेषामनुचितत्वज्ञानं यावता न भवति, तावदेव कृतवानितीषन्मानदः । अत्र हेतुः कीर्तिमत्त्वमेव, अन्यथा तु लोका अन्यथा वदेयुरित्याशयेनोक्तं वनमालीति । ईषत्त्वे हेतुमाहुः त्रिष्वपीति । त्रिष्वपि पक्षेष्वित्यर्थः । ते सम्माननमानमानखण्डनरूपाः । रूपेणागतानां स्मितेक्षणादिना य आश्वासः स स्वस्य एव कार्यः सम्माननस्य । पृथक्स्वरूपस्थितिमात्रं मानस्य । पूर्णमानवतीनामशेषमानखण्डने सति प्रचुरप्रेमवत्त्वेन लोकाद्यनुरोधाभाववत्त्वात्तदैव स्वानुरूपं सर्वं कुर्युः । अतस्तत्खण्डनं तावदेव यावता

तदा लोकविगीतं न भवति । **वदरपाण्डुवदनमित्यत्र** । **ईषन्मानदत्वादिति** । अग्रे पूर्णमानप्रद इति तस्माद्विशेष इत्यर्थः । **मृदुगण्डमित्यत्र** । **मृदुत्वं भोगार्थमिति** । रसविशेषानुभवार्थमित्यर्थः । तदुक्तं 'अनंकुरितकूर्चकः शृतसितोपलाढ्यं पयस्ततोङ्कुरितकूर्चकः सलवणाम्बु तक्रं पयः । ततः पलितकूर्चकः क्वथितगुग्गुलूद्वेगकृद्वन्ति हरिणीदृशां सततमेव भावाश्रय' इति ।

यामिनीपतिरिवैष इत्यत्र । **नन्वहर्पतिरपीति** । चन्द्रदृष्टान्तेन दिवा
१०-३२-२५. सुखदानं न प्राप्यते, तस्यातथात्वात् । भगवांस्तु दिवापि सुखं ददातीति
कथमयं दृष्टान्तो युज्यत इत्यर्थः । अंगीकृत्योत्तरमाहुः **सर्वालंकारेति** । सर्वासामलंकारभूतो वृन्दमध्ये तिष्ठति यस्ता विहाय स्थातुमशक्तः परस्परगुणानुवादश्रवणतद्भावानुभवजनितानन्दसमुद्रलहरीभिरार्द्रार्द्रो रसपोषायाप्रकट इव दिवा यः स एष इत्यनेन प्रदर्श्यते । इतोप्यानन्दपोष इति ज्ञायते । यथान्यासां लीलानां परिज्ञानं भावबलात्, तथा स्थितेरपि । परन्तु कादाचित्कमिदं ज्ञानम्, अन्यथा गानरस एव न स्यात् । तथा च दिवा निकट एवाप्रकटः सन्सुखयति प्रकारान्तरेण । दिनान्ते तु प्रकटः सन् दूरादेव चन्द्र इव तापनाशकः । यामिनीपतिपदाद्यथाग्रे यामिनीं पूर्णां साक्षाद्भुङ्क्ते सः, तथा प्रियोप्यस्मान् भोक्ष्यतीति ज्ञाप्यते । **मोचयन् व्रजगवामित्यत्र** । **गवां चेति** । सद्यःप्रसूतानामिति शेषः । यद्वा । यथा रात्रिजं विरहजं तापं दिवा स्वरूपनादादिभिर्गवां मोचयति, तथा व्रजस्थिताः सर्वे तदेकनाथत्वेन तदेकपोष्यत्वेन तदधीनप्राणादिधर्मत्वेन, यथा तद्देहप्राणादिरक्षार्थं दिवा ता वने नीयन्ते, तथा तदर्थं निशीति च गाव इवेति गोपदेन स्वामिन्य एवोच्यन्ते ॥

पितृपादाब्जकृपया निरोधविवृतिर्मया । स्फुटीकृता यथाशक्ति भक्तानां तुष्टये हरेः ॥ १ ॥
अनेनैव प्रकारेण निरोधविवृतौ बुधैः । छेत्तव्यः संशय इति तं प्रदर्श्योपरम्यते ॥ २ ॥
न हि व्रजवधूपदाम्बुजपरागरागं विना मनागपि विचारणे भवति शक्तिरस्मात्वतः । मया चिरविचारहृद्गततदीयतात्पर्यमाश्रितेन लिखितं सदा गिरिवरेशपादाम्बुजम् ॥ ३ ॥
संशयपङ्ककलंकितहृदया गोविन्दविहृतिविवृतौ ये । ते श्रीविट्ठलवाणीपाथोभिर्निर्मलाः सन्तु ४

इति श्रीगोपीजनवल्लभचरणैकतानश्रीविट्ठलेश्वरदीक्षितविरचितो दशमस्कन्धप्रकरणद्वयविवृतिप्रकाशः समाप्तः ॥

श्रीगोपीजनवल्लभाय नमः ।

भ्रमरगीताध्यायटिप्पणी ।

श्रीमद्विट्ठलेश्वरप्रकटिता ।

श्रीकृष्णः शरणं मम ।

विविधापराधकूटक्षमाक्षमांस्तातचरणयुगरेणून् ।
नत्वा तत्तात्पर्यं प्रकटीकुर्मो यथाशक्ति ॥ १ ॥
तत्पादरजसागत्य यादृग्भावः कृतो मम ।
तादृशेनैव तद्भावं वर्णयाम्यवशः क्वचित् ॥ २ ॥

ननु व्रजसीमन्तिनीनां 'ता मन्मनस्का' इत्यादिवाक्यैः प्रभुणा स्तुतानां ज्ञानोपदेशो
निरोधविरोधी, तयोः सहानवस्थाननियमात् । एवं सत्यस्याध्यायस्यैतत्स्कन्धा-
१०-४४-०. प्रवेशश्च स्यात् । 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः। न ज्ञान न च
वैराग्य प्रायः श्रेयो भवेदिह'ति भगवद्वाक्यादत्युच्चावस्थां प्रापितानां नीचावस्थाप्रापणमयुक्तं
चेत्याशंकानिरासमध्यायार्थोक्त्यैव कुर्वन्ति चतुश्चत्वारिंशोऽध्याय इति । अस्मिन्नध्याये
निरोधमेवाहेति संबन्धः । उद्देश्यत्वेन ज्ञानोक्तिव्यवच्छेदायैवकारः । 'त वीक्ष्ये'त्युपक्रमेण
'भक्त्युद्रेक व्रजौकसा'मित्युपसंहारेण च स्नेहस्यैवोक्तिः सम्यक्त्वम् । पूर्वमहर्निशं पूर्णो
भगवद्भावो निरूपितः । अधुना तु यथा प्रियेण समं स्वसंबन्धव्यवच्छेदकोपस्थितावार्ति-
तिशयोऽनिर्वचनीयो भवति लौकिकानामपि, तथा तादृग्ज्ञानोपदेशश्रवणेनातितप्ततैलपति-
तजलबिन्दुसदृशेनात्युत्कटभावो वर्ण्यत इति पूर्वस्माद्विशेषः । ननूपदेशस्य न भावजन-
कत्वम्, किन्तु स्थितस्यैव प्राकट्ये हेतुत्वम् । एव सत्येतदुक्तिर्व्यर्थेत्यत आहुः याते
कृष्ण इति । अन्यथेति शेष. । हृदि सर्वदा प्राकट्यान्नैकट्याभावो बाधित इत्यत उक्त
लोकरीत्येति । देहलीदीपवल्लोकरीत्येत्युभयत्र संबध्यते । तथा सति लोकरीत्यैव
याते, वस्तुतस्तु व्रज एव सदा प्रकट इत्यर्थः । लोकवन्नैकट्याभाव. पूर्वमपीति स्फुट-
मित्युक्तम् । यद्येतत्कथनं न स्यात्तदा बहिः प्राकट्याभावेपि कालक्षेपदर्शनात् सर्वेषां
भक्तानां तथा मतिः स्यात्, तदभावार्थमेतत्कथनमावश्यकमित्यर्थः । ननु ज्ञानोपदेश-
श्रवणेनापि सा मनिर्भवित्र्येवेत्यत आहुः सेवकेनेति । ता उक्तप्रकारैर्निरुद्धा एव ।
तत्र हेतवः सेवकेनेत्यादिनोच्यन्ते । यदि ज्ञानमार्गे प्रवेशयेत्, ज्ञानमार्गीयेणैवोपदेशं

कारयेत् । सेवकेन कृत्वोपदेशं यत्कारितवांस्तेन भक्तिमार्ग एव प्रवेशोऽभिमतो, नेतरस्मिन्नित्यर्थः । किञ्च । एताः पूर्वं प्रयोजनवशान्न निरुद्धाः । तथासति प्रयोजने जाते निरोधं गच्छेत् । किन्तु शुद्धभावप्रसादितः प्रीतः प्रोवाच सस्मितम् । 'माऽसूयितुं नार्हथ तत्प्रियं प्रियाः । न पारयेह'मित्यादिवाक्यैः भगवतो व्रजसीमन्तिनीविषयिणी या प्रीतिस्तयैव ता निरुद्धाः, अतः कथमन्यथा कुर्यात् । अतो **ज्ञानेन** उपदेशजनितज्ञानेनापीत्यर्थः । तत्र प्रकारमाहुः **आत्मत्वेनेति** । नहि स्वात्मनः स्वेन समं वियोगः स्वविस्मृतिः स्वाहिताचरणं वा संभवत्यतस्तथाभूतासु किं समाधेयमस्तीति स्वस्मिन्नसाधारणनिरुपधिस्नेहं प्रियस्य ज्ञातवत्य इति पूर्वस्मादतिविलक्षणः स्नेहभाव उत्पन्नः । अत एव मूले प्रियतमपदमुक्तमेवं **प्रियतमादिष्टमिति** । अथवा । **सेवकेनेत्या**दिना भगवतः कायवाङ्मनोभिरेतन्निरोध उच्यते । सेवकः कायरूपः, उपदेशो वाग्रूपः, प्रीतिर्मानसी । अत उपदेशजेनात्मत्वेन ज्ञानेनापि प्रियस्वरूपपरत्वमेवासाम्, न तु ज्ञानिनामिव स्वास्थ्यम्, अन्यथा 'कृष्णावेशात्मविक्लव'मिति न वदेत् । तथाचैतावत्पर्यन्तं स्वसत्ताज्ञानमपि स्थितम् । अतः परं तु तामपि न ज्ञास्यन्तीति पूर्वस्मादधिको निरोधः सेत्स्यतीत्यर्थः । अत एव **सर्वथेति**पदम् । एवं भक्तिमार्गविरोधं परिहृत्य ज्ञानोपदेशस्यावश्यकतामाहुः **वस्तुन** इति । 'विज्ञाय संदेशहर'मितिवाक्यात् स्वार्थमेवागत इति निश्चयेन मानोत्तिरिति निश्चयस्यापि दोषत्वम् । भगवदीयत्वनिश्चयाभाव उपालंभासंभवादिति भावः ।

चतुश्चत्वारिंशाध्यायविवरणे स्वामिनीभावेषु दोषशब्दप्रयोगस्यायमाशयः । लोके ह्यन्त्यावस्थाहेतुर्दोषो भवति, विरहभावस्य च तथात्वं प्रसिद्धमेव । यथातिप्रचुरे दोषे तीक्ष्णौषधदानं विषमाशीविषदंशश्च कार्यते मर्मस्थानेषु, तेन बहिःसंवेदनं तत्कालीनमरणनिवृत्तिश्च, ततो विविधरसैः शनैः शनैः सर्वात्मना दोषापगमे स्वाभाविकजीवनहेत्वन्नदानम्, तेन च सर्वात्मना स्वास्थ्यम्, तथात्राप्यत्यन्तप्राणबाधायां हि प्रिये दोषारोपः । स चाचिरादेवान्त्यावस्थाज्ञापको भवति, अतस्तं दृष्ट्वा तन्निवृत्त्यर्थमेवोक्तरूपसदृशोपदेशं दत्वा स्वयं प्रियभिषजा प्रेषित इत्युद्धवस्तादृशं तं दत्तवान् । तदा बाह्यानुसन्धानमभूत् । अत एव 'तत्संदेशागतस्मृती'रितिवचनम् । 'ततस्ताः कृष्णसंदेशैर्व्यपेतविरहज्वरा' इति ज्वरपदप्रयोगश्च । भगवतोऽत्रैव तात्पर्यमित्येतदेव फलत्वेनानूद्यते, न तु ज्ञानमार्गीयं ज्ञानम्, अन्यथान्ते 'कृष्णावेशात्मविक्लव'मिति न वदेत् । तर्हि ज्ञानोपदेशस्य कोपयोग इति चेत् । उच्यते । यथा योगिनो वपुर्योगसंस्कारसंस्कृतं सन्नाश्याद्युपद्रुतं भवति, तथा भगवानात्मेति महापुरुषोपदेशेन ज्ञानाख्यसंस्कारे संपन्ने विरहेन्त्यावस्था भवितुं न शक्नोतीति तत्रैवोपयोग इति । अत्रागतस्मृतित्वे विरहज्वरराहित्ये च हेतुः संदेशे प्रियसंबन्धित्वज्ञानमेव, न तु शास्त्रार्थीयमिति ज्ञानम् । अन्यथोपदेशपदमेव वदेदुभयत्र, न तु संदेशपदम् । किञ्च । ज्ञानोपदेशलक्षणसंदेशो युक्तरूप एव ।

तत्रोपक्रमे 'श्रूयतां प्रियसंदेश' इति संदेश एकत्वमेवोक्तम्। 'कृष्णसंदेशै'रिति बहुत्व पश्चादुच्यते। एवं च सति ज्ञानोपदेशस्य स्मृतावुपयोगो विविधान्तरङ्गवार्तानां तज्ज्वरापगम इति मन्तव्यम्। अत एव भगवतापि 'मत्संदेशै'रिति बहुत्वमुक्तं संदेशेषु। विप्रयोगे प्रियसंदेशस्यापि तत्तुल्यत्वभानेन तदा स्वास्थ्यस्य रसशास्त्रसिद्धत्वादपि। अपरञ्च। स्मृतिर्हि पूर्वानुभूतस्य, पूर्वमनुभवश्च निर्दोषपूर्णगुणस्य भगवत.। मध्ये विरहस्वाभाव्याद्दोषारोपक्षणे व्यभिचारिभावे जाते यथा पैत्तिकादिज्वरभरेण दोषवशात् प्रलापे सत्यञ्जनादिना प्रकृत्यनुसंधानेन प्रलापनिवृत्तिः, न तु ज्वरस्यापि, तथोपदेशसंदेशेन विरहभरनिवृत्त्या पूर्वोक्तव्यभिचारिभावनिवृत्तिः, न तु विरहस्यापीति। अत्र वयं त्वेवं मन्महे। पूर्वमुपक्रमे दुःखमेवोक्तम्, तत उपदेशः, तदनन्तरमपि 'हे नाथे' त्यन्तेन ग्रन्थेन क्लेशो निरूपितः। ततो विविधसंदेशैर्विरहतापनिवृत्तिर्भगवत्प्रात्मत्वेन ज्ञानं चोक्तम्। ततोन्ते 'दृष्ट्वा स्त्रीणां भगवति कृष्णावेशात्मविक्लव'मिति सर्वदानुवर्तमानः क्लेश उक्तः। एवं सत्युपक्रमोपसंहाराभ्यां विरहभाव एव दृढो निरूपितो भवति। मध्ये यत् 'ज्ञात्वात्मानमधोक्षज'मित्युक्तम्, तत्तु 'असावहं, कृष्णोहं' 'पश्यत गति'मितिवत्काादाचित्क एव भाव उक्त इत्युपसंहारानुरोधान्मन्तव्यम्।

नन्वेवं सत्युद्धवप्रेषणं किंप्रयोजनकम्, उक्तभावस्य सार्वदिकत्वादिति चेत्। अत्राप्युच्यते। उद्धवे हि प्रभोः परमा कृपा, अतः पूर्णो भगवद्भावो यादृशोस्ति, तादृशोत्र देयः। स च व्रजसुन्दरीष्वेव सिद्धः। पुंस्यक्तावसमानितश्च। अतो मद्भाव एतादृश इत्युद्धवाय प्रदर्शनमेकं प्रयोजनम्। ततस्तद्दर्शनेन सतत तद्भावनया प्रियसंदेशहारकत्वेन तासामत्यनुग्रहेण चोद्धवेपि तज्जातीयभावोत्पत्त्यर्थमिति द्वितीय प्रयोजनम्। विप्रयोगे प्रियसंदेशागमनेन यः कश्चन संतोषः स नान्यदा नान्यथा चेति तृतीयम्। 'मद्वियोगाधि'मितिवचनान्मध्ये मध्ये यदैव प्रियेणैवमेवं संदेशः प्रेषित आसीदिति स्मरिष्यन्ति, तदा च पूर्वनिलक्षणो भावो भविष्यतीति तुरीयम्। ज्ञानाद्भक्तिरधिका, यतस्तदुपदेशेपि भक्त्यैव तदुपमर्दो, न तु तेन भक्तेरिति निदर्शनार्थमपीति पञ्चमम्। अत एवैकादशे भगवद्वचन 'न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति। पित्रोः श्रीविजिनवमुक्तमेव। भगवतः स्वामिनीनां चान्योन्यसंदेशैरन्योन्यं ये भावा जायन्ते, तेनन्ता एवेत्यनन्तान्येव प्रयोजनानीति दिक्।

प्रकरणार्थमाहुः बीजमिति। वक्ष्यमाणस्तोत्रादौ बीजं स्नेहः। स पूर्वं निरूप्यते। स्तोत्रोपदेशयोरनन्तर दोषस्य प्रिये दोषारोपस्य मानस्य च निवृत्तिः, तया च पूर्वस्नेहोक्तिः। ततो ज्ञानस्य फलं प्रिये निर्दोषपूर्णगुणत्वज्ञान स्वस्मिन्नल्पत्वज्ञानं च। तत उद्धववाक्यैः कृतार्थत्वम्।

१०-४७-१. मानाद्दोषद्वयमिति। उपालंभो भ्रमरव्याजोक्त्या दोषोक्तिश्चेति द्वयम्।

जानीमस्त्वामित्यादिवाक्यप्रतिपाद्यार्थोक्त्यनन्तरं कस्याश्चिदेव तामस-
१०-४४-४. **तामस्या** इति । अत्युत्कटभक्तिमार्गीयभाववत्त्वेन ज्ञानमार्गीयज्ञानोदय-
संभावनारहिताया इत्यर्थः । सत्त्वरजस्तमांसि प्राकृतेभ्यो भिन्नानि भगवद्धर्मरूपाणि सन्तीति पूर्वमेव बहुधोक्तम् । समित्युपसर्गसूचितमर्थमाहुः **तत्रापीति** । भूषणादिसर्वसंपद्युक्त आगत इति । भर्तरि अपि कुशलं ज्ञायते तवापि तथेत्यर्थः । एवं कथने गूढाभिसन्धिमुद्घाटयन्ति **अन्यथेति** । स्वयमापद्ग्रस्तोऽन्यानुपेक्षेत चेत्, न दोषः स्यात्, सर्वतः कुशली स्वयमन्यान् दुःखितांश्चेदुपेक्षेत, तदा सा दोषायैव स्यात्, प्रकृते स्वोपेक्षाकरणात्तथात्वमिति भावः । दुःखिता अपि तदीयत्वममन्यमानाश्चेत्, तदा तदुपेक्षा न दोषाय स्यात्, न तु तद्विपरीतानामपीत्याशयेन स्वस्य केवलतदीयत्वमाहुः **भर्त्रेति-**पदेन । विवाहितो हि भर्ता भवति । अत्र तदभावेपि स्वस्य केवलतदीयत्वं वक्तुं तथोक्तम् । किञ्च । न पतित्वमात्रम्, किन्तु भरणकर्तृत्वमपि, एतादृशश्चेदुपेक्षते, तदा तासां जीवनमेव न भवतीति भावः ।

पुंभिः स्त्रीषु कृतेत्यत्र विवाहिताः पुमांसः स्त्रियश्च ज्ञेयाः । अत एव विरागे
१०-४४-६. श्रुत्युक्तत्यागोक्तिः । **स्नेहमेव कुर्वन्तीति** । न त्वपराधेपि क्रोधानुवृत्ति-
मिति भावः । अथवा । **कुर्वन्त्येवेति** संबन्धो ज्ञेयः ।

तत्र **सात्त्विकादिभावेष्विति** । आद्यो दृष्टान्तो राजससात्त्विकः । ततो राज-
१०-४४-८. सराजसः । ततस्तामसतामसः । ततस्तामसराजसः । ततो निर्गुणः । ततः
सात्त्विकराजसः । ततस्तामससात्त्विकः । ततः सात्त्विकसात्त्विकः । ततः सात्त्विकतामसः । ततो राजसतामस इति दश ।

मधुप कितवेत्यस्याभासे । प्रथमं तामसतामसीति । अत्रेदमाकूतम् ।
१०-४४-१२. विप्रयोगे प्रलापदैन्यादिवद्दोषारोपोपि व्यभिचारिभाव एव । तथा सति
रसात्मकत्वाविशेषेप्यत्युग्रभावोत्पत्तौ भगवद्धर्मरूपो रसात्मकः प्रमाणादिसर्वबलनिरासकोत्युग्रस्तामसत्वेनोपचर्यमाणो यः स एव हेतुरिति वाच्यम् । भावानां मिथ उपमर्द्योपमर्दकभावस्तु 'रजस्तमश्चाभिभूय सत्त्वं भवति भारत । रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथे'ति प्रभुवाक्यात्सत्त्वादीनां यथा, तथैवेति तत्त्वमुपचारेणोच्यते । एवं सति रसात्मकप्रभुधर्म एवाविर्भवतीत्यारोपो दोषस्यायमिति न वक्तुं शक्यम् । भगवदितरास्मरणात्, स्मर्यमाणस्य तस्य स न वक्तुं शक्यः । इत एव नानुभूयमानस्य प्रभुस्वरूपे तद्धर्मेषु वा दोषत्वाभावात् । ज्ञानवत आत्मस्फूर्तिश्चावश्यकी । एवं सति तदा तदभावादोषत्वेनैव प्रभुधर्मेषु ज्ञानादुच्यमानधर्मात्मकत्वमेव स्वामिन्यास्तदा संपन्नमिति तामसतामसीत्युक्तम् । श्रीमदुद्धवानामपि स्वामिन्या एतादृगवस्थादर्शनेन प्रभुरेतादृशीरेताः कथं न मिलतीति भावो दोषारोप इव जात इत्यपि ज्ञापनायैतत्स्वरूपत्व-

मेवोक्तम् । एतादृश्याः स्वामिन्या हृद्यागमनेनैतद्भावोदयात् । उपचारोयमित्यरुच्या पक्षान्तरमाहुः तद्भावयुक्ता वेति ।

मधुप कितवेत्यत्र । मतान्तरभाषेयमित्यादि । अत्रायमाशयः । शुद्धपुष्टिमार्गीयभक्तानां ज्ञानमार्गबोधनं भक्तिमार्गविरुद्धतमम्, अतो न समाधिभाषायामस्य प्रवेशो वक्तुं शक्यः। वर्ण्यते चात्युत्कटो रसात्मकः स्नेहभावः। स एव हि परमपुरुषार्थरूपः । तद्विघातकश्च सः । यद्यपि ज्ञानस्य स्वातन्त्र्येणात्रानुद्देश्यत्वम्, किन्तु प्रिये दोषारोपमात्रनिवर्तकत्वेन, तथापि तदारोपस्यापि रसात्मकत्वाद्व्यभिचारिभावत्वेनास्थिरत्वाच्च न सर्वथा ज्ञानस्योपयोगः । न ह्येतावत्पर्यन्तं साधिते निरोधे काचिन्न्यूनतास्ति, येन ज्ञानमुपयुज्येत। तस्मात् सुष्ठूक्तं **मतान्तरे**त्यादि। कथने तूपपत्तिरियमेव। यत्संगमस्तदार्तिर्वा पुरुषार्थ इतिशास्त्रार्थः । एवं सति विप्रलंभे प्रिये दोषस्फूर्तौ स्वदुःखदत्वज्ञानं हेतुः । तथा सति स्वसुखदत्वेनोत्तमत्वं प्रियत्वं च सिध्यति, न तु स्वरूपतः । तथा सति स्नेहस्य निरुपधित्वं भज्येतेति तत्समाधानायात्मत्वेन बोधनम् । तथा सति भगवत्स्नेतासामेतासु च भगवतः सहजः स्नेहः सूचितो भवति । दुःखदत्वासंभवश्च । यथा स्वाधिष्ठितं देहं पीडयितुं जीवात्मा नोत्सहते, तथा स्वाधिष्ठितं जीवात्मानं भगवानित्युक्तं भवति । अत एव श्रुतिराह 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वा'मिति । तथा च विप्रयोगेन्तर्लाभः, सयोगे बहिरिति तदा तदा तत्तद्धर्माः स्नेहवशादाविर्भवन्ति । तावपि स्नेहजनितावेव, अन्यथा सर्वेषां तौ स्याताम् । तथा च स्नेहस्यैव दोषस्फूर्तिहेतुत्वं पर्यवसतीति निर्दोषत्वं प्रिये भाति । इदं तु मर्यादारीत्योच्यते, वस्तुतस्त्वत्युत्कटस्नेहेनैव दोषः स्फुरति, सोपि भगवद्भाव एवेति न भ्रमरूपो, न वा दोषरूपः । रसात्मकभगवत्स्वरूपमेतादृशमेवेति नाधिकं विचारणीयमत्रास्ति । अन्यथा रसाभाव (रसाभासः ?) एव सिध्यतीति नः प्रतिभाति। ज्ञानात् भक्तेराधिक्यमप्यनेन ज्ञाप्यते ।

समाधिभाषायामिति । तत्र हि माहात्म्यज्ञानस्नेहौ क्वचिद्व्यस्तौ क्वचित्समस्तौ च निरूप्येते । प्रकृते तु 'काचिन्मधुकर'मित्यादिना प्रस्तुता कथा न तादृशीत्यस्याः कथायाः समाधिभाषात्वं तद्विरुद्धार्थकत्वं च विरुद्धमिति कस्यचिद्भाति, विहितस्नेहाभावेन भक्तिमार्गविरोधश्च तथा, स बोध्यते विरोधोत्र नास्तीति । तत्र मतान्तरभाषात्वं कामशास्त्रानुरोधित्वं चेति हेतुद्वयम् । अत्रेदं ज्ञेयम् । मर्यादामार्गीयमतात् पुष्टिमार्गीयं तत् मतान्तरमित्युच्यते । समाधौ तु व्यासैर्द्विविधोपि भक्तिमार्गो दृष्टः । 'अनर्थोपशमं साक्षाद्भक्तियोग'मिति वाक्यात् । तदर्थस्तु 'अनर्थोपशमं भक्तियोग'मिति पदेन साधनरूप उच्यते, 'साक्षाद्भक्तियोग'मिति पदेन फलरूपः । 'अजानतो लोकस्य' आद्यः । 'समाधौ दृष्ट्वा स्वयं विद्वानि'तिद्वितीयमपि तमुक्तवान् व्रजसीमन्तिनीषु । अयं पुष्टिमार्गीय इति मतान्तररूपः । एतादृशेषु ज्ञानोक्तिरपि तथा । कामशास्त्रानुसारेणैव पूर्वं स्व-

नन्दं दत्तवानित्यधुनापि तथैवोच्यत इति न कोपि विरोधः । तथाचेयं समाधिभाषैव । तथाचात्र समाधिभाषायां सत्यां भक्तिमार्गे च सत्युक्तरीत्या न विरोध इत्यर्थः ।

कालस्य दूतत्वमुपपादयन्ति **कालद्वारा** **ह्रीत्यादिना** । तत्तत्काले तथा तथा भगवत्पूजाध्यानस्तोत्रादेर्विहितत्वेन स स काल एव भगवत्प्रापकः, तदभावे तदकरणादिति भावः ।

प्रियसखेत्यत्र । **प्रथमपर्यायादित्यादि** । 'काचिन्मधुकरं दृष्ट्वे'त्यादिनोक्तः
१०-४४-२२. प्रथमः पर्यायः । तदैतद्दर्शनेन यादृशी बुद्धिर्जनिता तस्याः सकाशादन्यथा प्रकारान्तरेण बुद्धिमधुना जनयतीत्यागमनमपि तथैव संभावयतीत्यर्थः । कालपक्षे अर्थसंगतिमाहुः **हेमन्ते तासामित्यादिना** । पूर्वं वसन्ततोरागमनमुक्तम् । तथा च 'पुनरागा' इति पदात्तस्यैवाधुनाप्यागमनं वक्तुमुचितम्, न तु हेमन्तस्येति शंकां निरस्यन्ति **तासां साधनोपक्रम** इत्यादिना । अत्रेदमाकूतम् । पूर्वोक्तस्तु नेष्टसाधकत्वेन प्रतीतः, अधुना प्रतीयमानस्त्विष्टसाधकत्वेन प्रतीयते, तादृशश्च हेमन्त एव । व्रते कालस्याप्यङ्गत्वात्तेन तत्त्वमुच्यते । तथा च व्रततत्फलदानसमये पूर्वमागत आसीः, अधुना किं पुनरागा इष्टं साधयितुमित्यर्थः पर्यवसति । किञ्च । चैत्रादिकस्य संवत्सरस्य नवमो मासो, हेमन्तस्य प्रथमो मासो मार्गशीर्षो भवति । उक्तिश्चेयं नवमीति स एव तद्व्यापारविपर्यीक्रियते । गतस्य तस्यैवावृत्तिरसंभावितेतिशंकामावायाहुः **पुनर्दण्डकलितवदिति** । यथा गतोपि पुरुषः पुरुषान्तरेण दण्डेन प्रेरितः पुनरावर्तते, कुलालचक्रप्रान्देशो वा, तथा पुनरस्मदिष्टं सिषाधयिषुस्त्वां प्रेषितवानित्यर्थः । कालो हि सर्वनियामकः, तस्यान्यप्रेष्यत्वेनागमनमसंभावितमित्यत आहुः **सात्त्विक** इति । दोषाभावज्ञापनपूर्वकप्रियत्वादिज्ञानानुगुणत्वेन तथा । भक्त्यनुगुणत्वेन गुणातीतो वेत्यर्थः । प्रेषितो हि प्रेषकवाक्यमंगीकृत्यागत्य तदुक्तं वचनं निवेदयति । प्रकृते कालस्यादृश इति तस्मिंस्तद्धर्मानाहुस्त**दीयेत्यादिना** । कालपक्षे स्वस्य श्रुतिरूपत्वान्मन्त्रदेवतारूपत्वम् । तत्तत्काले कृतं पूजनादिकं मन्त्राधिष्ठातृदेवतावरेणैव फलितं भवतीति **वरयेत्युक्त**मित्यर्थः । **विभज्यैवेति** । शक्तीनां भगवद्धर्मत्वेन तत्स्वरूपाश्रितत्वेपि पृथक्कार्यकरणार्थं तथेत्यर्थः ।

सान्त्वयन् प्रियसंदेशैरित्यत्र । **तत्रापि प्रियसंदेशेनैव, न तु स्वत**
१०-४४-२२. इति । अत्रायमाशयः । एतादृशीनां सान्त्वनं प्रभुप्रादुर्भावं विना तद्वाक्यानामप्यशक्यम्, किं पुनर्मम, तचावश्यकम्, तत्र स्नेहस्यैवायं सहजो धर्मो यत्तत्संबन्धिन्यपि तत्त्वेनैव मानम् । तेन शब्दार्थस्यानभिप्रेतत्वेपि प्रियसंबन्धित्वेन शब्दज्ञानेनैव तच्छ्रवणेनापाततः सान्त्वनं भविष्यतीति ज्ञात्वा श्रीमदुद्धवैर्विवक्षितमुक्तमितिज्ञापनाय प्रियपदमुक्तमिति । अत एवोपक्रमोपसंहारयोरपि 'श्रूयतां प्रियसंदेश'

इति, 'तत्संदेशागतस्मृती'रित्येवोक्तम्, न तूपदेशपदम् । वस्तुतस्तु संदेशोप्येतादृशीषु न वक्तुं शक्यः, तथापि प्रभोराज्ञा तथेति तत्पालनार्थमुक्तमित्याहुराज्ञा चेत्यादि । स्वरूपातिरिक्तस्य सान्त्वनहेतोः स्वस्याज्ञानेप्याज्ञानुभावेनैव सान्त्वनं भविष्यति, नो चेत्प्रभुः कथं वदेदिति हृदिकृत्वा वदन्तीति भावः । एतदवस्थादर्शने तादृग्वाक्यश्रवणेपि यदेतेषां वाक्प्रसवः स तु 'मत्संदेशैर्विमोचये' त्याज्ञानुभावेन, न तु स्वसामर्थ्येनेति ज्ञेयम् । वस्तुतस्त्ववश्यंभाव्यसामर्थ्ये प्रेषणवैयर्थ्यं ज्ञात्वा स्वसामर्थ्यमेव वरमिव दत्तवान् 'मत्संदेशैर्विमोचये'ति वचनेनेति प्रतिजानीमः ।

अहो यूयमित्यादेरामासे । तासां स्वाभाविक इत्यादि । षड्भिः स्तोत्रक-
१०·४४·२३. रणे तात्पर्यमुच्यते । स्त्रीत्वादिस्तत्स्वभावश्च भगवद्गुणकृत एवेति । 'ता
मन्मनस्का' इति भगवद्वाक्याच्च तद्धर्मा भगवद्धर्मा एवेति निर्दोषगुणरूपा एवेति ज्ञापयितुमैश्वर्यादिगुणसंख्यासमानसंख्याकैः श्लोकैः स्तवनमित्यर्थः । भगवद्गुणैः अन्तःस्थितभगवत्स्वरूपा इति तद्धर्मा एव वागादिरूपेणाविर्भवन्तीति तथेत्यर्थः । **सापारप्यार्थाविति** । कतिपयानामेव न पूर्णार्थत्वम्, किन्तु सर्वासाम् । लोका अपि न तथा, किन्तु सर्वे इत्यर्थः । **तेषामिति** । लोकानामित्यर्थः ।

भवतीनां वियोग इत्यत्र । **जीवब्रह्मणोस्तु भेदेऽज्ञानमेव हेतु-**
१०·४४·२९. रित्यादि । अत्रेदं प्रतिभाति । 'एतावानस्य महिमा अतो ज्यायांश्च पूरुष'
इत्यादिश्रुतिभ्यो 'यस्मात्क्षरमतीतोह'मित्यादिवाक्यैश्च प्रपञ्चातीतत्वं पुरुषोत्तमस्य निर्विवादम् । 'एतावानस्य महिमा' 'सर्वं खल्विदं ब्रह्मे'त्यादिश्रुतिभ्यः प्रपञ्चस्य विभूतिरूपब्रह्मात्मकत्वम्, पुरुषोत्तमस्य तदतीतत्वं चोपपद्यते । एवं पुरुषोत्तमलीलापदार्थानां पुरुषोत्तमात्मकत्वमेव, न तु पूर्वमध्यपातित्वमिति मन्तव्यम्, अन्यथा 'ते ते धामान्युश्मसी'त्यादृक्षु 'विष्णोः परमं पद'मिति न वदेद्, 'विष्णोः कर्माणि पश्यत' 'तद्विष्णोः परमं पद'मित्यादि च । एवं सति सर्वस्यापि लीलापदार्थस्यात्मरूपेण सह भवतीनां वियोगो न संभवति । न हि स्वेन साकं वियोगः संभवति । एतदेव मूले **सर्वात्मनेति** पदेनोक्तम् । सर्वात्मना सर्वथेत्यर्थः । तथाच तत्तद्देशकालज्ञानक्रियातत्करणादेरातृणस्तम्बस्य नित्यत्वेन श्रीरासोत्सवस्वनृत्यप्रभुबाहुगृहीतकण्ठानि स्वस्वरूपाणि पूर्वमनुभूतान्यधुनापि वर्तमानैस्तैः साकमेतदवस्थापन्नानामपि स्वानामभेदज्ञापने पूर्वोक्तानामनिर्वचनीयनिरवध्यानन्दात्मकत्वात्तथात्वमेवाधुनापि स्वस्मिन्भातं भवतीति स्वास्थ्यं भवति । यद्यप्यस्य कादाचित्कत्वेन तस्य च सर्वोपमर्दित्वेन न सर्वात्मना स्वास्थ्यसंभावना, तथाप्यस्य प्रियसंगमरूपत्वेन निरवध्यानन्दरूपत्वेन भवतितरां तथात्वम्, येन तत्सामयिकोत्कटदुःखनिवृत्त्या किञ्चित्कालं सस्मितस्वामिनीमुखाब्जदर्शनेन स्वागमनसार्थकत्वज्ञानेन स्वस्यापि दुःखनिवृत्तिः । एवं सति भवतीनां मे वियोगो, मम च भवतीनां वियोगः, सर्वात्मना सर्वात्म-

रूपेण वर्तमानस्य मम न संभवतीत्यर्थः संपद्यते । अयमेवार्थोऽग्रे व्यक्तीकृतो यथा भूतानी-त्यादिना । आश्रयकरणकर्मणामभेदश्चोक्तः । आत्मन्येवेत्यादिना । सृष्टिः स्वरूपस्थि-तिहेतुः, सोत्र प्रभुसंगम एव । हननं वियोगकरणम् । सर्वतिरोधायकत्वात् । तदपि रसार्थ-मेवेत्यत्तु पश्चात्पालये स्वरूपानन्ददानेन । अत एवान्ते पालनमुक्तम् । अत्र हेतून् क्रमेणाह आत्मेत्यादिना । आत्मानुभावेन सृजे, तदपि माया योगमायान्तरङ्गा लीलोपयोगिनी तदनुभावेन माने सति हन्मि, तेन सर्वतिरोधाने भूतेन्द्रियगुणस्वरूपेण पुनराविर्भूयात्, पालये । ननु देहाद्यध्यासवानात्मा प्रतीयत इति कथं भगवदात्मकत्वमिति चेत्तत्राह आत्मा ज्ञानमय इति । ज्ञानप्रचुर इत्यर्थः । लीलासंबन्धिदेहानामपि तदात्मकत्वात्तद्ग्राहमिति ज्ञानं वास्तवमेव, न त्वविद्याकृतम्, यतः शुद्धोऽविद्यासंबन्धरहितः । अत्र हेतुर्व्यतिरिक्तः प्राकृति-केभ्यो जीवेभ्य इति शेषः । तत्र हेतुर्गुणाश्रय इति । पुरुषोत्तमगुणाश्रयत्वात्तथा । न हि प्रा-कृतेषु लीलां स्वयं करोतीति भावः । स्वापाद्यवस्थावत्त्वेनापि प्राकृतत्वं न शङ्कनीयम् । यतः सुषुप्त्यादयो लीलोपयोगिन्या मायया संपादिता या वृत्तयस्ताभिः स संबध्यते । 'लोकवत्तु लीलाकैवल्य' मितिन्यायेन लोकमध्ये क्रियमाणा लोकसमानाकारा चेन्न भवेत्, तदा ली-लारसो न भवेत् । अत एव व्यासैरपि लोकसमानाकारत्वम्, न तु लोकमध्यपातित्वमिति ज्ञापनाय लोकवदित्युक्तम् । ननु लीलाविषयिणी कस्यापि नैवं प्रतीतिर्दृश्यत इत्याशंक्य प्रतिबन्धकवशान्नैवं प्रतीतिर्लोकस्य, तदपगमे सा भवतीत्याशयेनाह येनेति । सर्वतो मनसो निवृत्तौ केवलभगवत्परत्वे तथैव प्रतिपद्यते जानातीत्यर्थः । नन्वेवं सति शास्त्रानेकत्वं कथ-मित्याशंक्य साधनप्रकारभेदत एव तद्भेदः, न तु तत्र फलभेदोप्यस्तीत्याह एतदन्त इति । नन्वेवं सति विशेषाभावात्संनिकर्ष एव कुतो न साध्यते, दुःखहेतुर्विप्रकर्षः किमर्थ इत्याशं-कायां तत्तात्पर्यमाह यथेत्यादिना । अत्रेदमाकूतम् । पूर्वमनुभावितो यो भजनानन्दः स तु ब्रह्मानन्दतः शास्त्रीयभक्त्यानन्दतश्च कोटिगुणाधिकोऽनिर्वचनीयश्च भवति । तथा च संनिकर्षे त्वग्रिमाग्रिमनूतननूतनरसाकांक्षा तदनुकूलो यत्नश्च भवति, न तु पूर्वानुभूतलीलास्वरूपतल-स्पर्शः कदापि । विप्रकर्षे तु मनआदीनां बहिःस्वविषयालाभेन्तर्विद्यमानमेव तं गृह्णन्ति, तदा यथा बहिः प्रकटाप्रियाद्रसानुभवः पूर्वमासीत्तथान्तःप्रकटाप्रियात् पूर्वस्मादपि विलक्षणो रसोनुभूतो भवति, यः संगमेपि दुरापः । अतो महारसदानार्थमेवैवंकरणम् । एतदेवोक्तं मदनु-ध्यानकाम्ययेतिपदेन, यथेत्यादिना च । संगमे मदुपयोगित्वेन देहादिस्फूर्तिरप्यस्ति, द्वितीये तु सापि नास्तीत्यपि रसाधिक्यम् । एतदेवोक्तं विमुक्ताशेषवृत्तीति विशेषणेन । एतेन रसानुभवे नैरन्तर्यमुक्तं भवति । बहिरनुसन्धाने तु तदेव बहिः साक्षात्संबन्धात्मकं फलं शीघ्रमेव साधयति । अतस्तथैव भविष्यतीत्याह अचिरादित्यादिना । एतासां त्वधुनैव बहिःसंगमोभिलषितः, तदभावादस्मदनभिप्रेतामप्यस्मदधिकारविरुद्धामपि ज्ञात्वेश्वरभावे-नाज्ञापितवान्, अनभिप्रेतमपि बलाद्दयितुमिलनाकर्णनीयमिदं भवति यद्यपि, तथापि

प्रियतमसम्बन्धीत्याकर्णनमावश्यकमिति तथा । एताभिः प्रियसंबन्धित्वेनैव श्रुतत्वात्तथैव फलिष्यति, न तूपदेशत्वेनेतिज्ञापनायाग्रे **संदेशपदम्** । एतेनैव 'ननु वयमिव भगवानपि पूर्वमस्मद्योगासहिष्णुरनुभूतः, अधुना तं कथं सहत' इत्याशंका निरस्ता । भगवदुक्तिष्वाज्ञात्वमेव प्रतीतम्, न तु प्रीतिवचनत्वम् । सा त्वीश्वरभावेनैव भवतीत्यैश्वर्यमेवाधुना स्वस्मिन् जानाति, ईशितव्यतामेवास्मासु जानातीति युक्तमनागमनम् । न चैवं भक्तिमार्गविरोध इति वाच्यम् । 'स्वागतं व' इत्यादिवचनवत्पूर्वतिरोधानवदस्यापि रसविशेषानुभावकत्वात् । एवमेव प्रभावपि ज्ञेयमिति दिक् । **मतान्तरभाषेयमि**त्याचार्यवर्यैः पूर्वमेवोक्तमिति नाधिकं शङ्कनीयं समाधेयं वास्त्यत्र । परन्तु 'यन्मायया दुर्जयया मुह्यन्ति ज्ञानकाशये'ति-वाक्याज्ज्ञानस्य मोहरूपत्वाद्धर्मिमात्रपराणामन्येन मोहासंभवात् तस्य फलत्वेन मोहकत्वासंभवान्न भगवद्भावच्युतिः कदापि भविष्यतीति सर्वं सुस्थम् । अत एव 'ज्ञानिनामपि वाक्येन न भक्तं मोहयिष्यती'त्याचार्यवचनमस्मत्सर्वस्वपालकमस्तीत्यतिनिश्चिन्ता वयम् ।

ईश्वरस्य कृतौ वाचि पूर्वपक्षसमाहिती ।
ब्रह्मादीनामप्यशक्ये तथापि स्वस्य सर्वथा ॥ १ ॥
तदीयत्ववशाद्धार्ष्ट्याद्यत्किञ्चित्कथयामि तत् ।
क्षमन्तां तातचरणास्तेनैवाशेषमुत्तमम् ॥ २ ॥
यो बीजावापमारभ्य फलपाकावधि स्वयम् ।
पोषितस्तं व्रजतरुं नाथो नापि जिहासति ॥ ३ ॥

इति श्रीमद्विठ्ठलेश्वरविरचितभ्रमरगीताध्यायटिप्पणी ।

परिशिष्टम् ।

श्रीहरिः । नम इति । श्रीकृष्णस्य यत्पादाब्जे तयोस्तले तत्र यद्रञ्जिते कुङ्कुमपङ्के तयोः रुचे नमः । श्रीकृष्णपदेन भक्तसहितलीलारसाविष्टत्वं सूचितम् । तादृशस्य चरणयोरब्जत्वोक्त्या लीलायां परस्परसम्बन्धेन उभयोस्तापहारकत्वं सुखदत्वं च ज्ञापितम् । किञ्च । अब्जं विकसितं भवति । अत्रापि तत्तद्गन्धादिषु तत्तथैव भवति । अब्जे अरुणत्वं भवति । तदत्र सहजमपि विशेषतः कुङ्कुमपङ्केन तादृशम् । पद्मिनीनां तलमप्यारक्तं भवति । शृङ्गारादिषु कुङ्कुमपङ्केन रञ्जितमपि क्रियते । अत एव रुचे नम इत्युक्तम्, न तु पङ्काय, तदभावादिति । तत्कान्तेः सर्वोत्कृष्टत्वज्ञापनाय नमनमेवोक्तम् । तदेवाहुः यदरुणमिति । मदीयं हृदयाम्बुजं यतः सम्बन्धेन शश्वदारक्तं जातम् । निरन्तरं तत्कान्तेः स्थित्या तदात्मकतया तादृशमेव जातमिति भावः । यद्वा । अत्र प्रभुचरणसरोजतलसम्बन्धि कुङ्कुमपङ्कमुक्तम् । तन्नायिकानामेव सम्भवति, न तु नायकस्येति कथमुपपद्यत इति चेत् । तत्रोच्यते । श्रीकृष्णपदेन गूढभावात्मकत्वम् । तेन तद्भावात्मकस्य विरचितप्रियावेषोचितसकलशृङ्गारस्य प्रभोश्चरणतलमपि तेन रञ्जितं क्रियत इति तत्स्मृत्वा तथोक्तम् । प्रियायास्तु पूर्वं तादृशमेवेत्युभयोश्चरणतलस्यारुणत्वमुक्तम् । अत एव पङ्कयोरिति द्विवचनं चोक्तम् । अन्यथा पङ्कस्यैकरूपत्वात्कथमेवं वदेयुः । तयो रुचे नम इति । तत्तलशोभां दृष्ट्वा प्रणयभरेणात्यातुरतया रसेन नमनम् । अन्यथा चरणं विहाय रुचे नम इति कथमुक्तं स्यात् । किञ्च । यत्सम्बन्धेन मामकं हृदयाम्बुजं सततमरुणं जातम् । रसात्मकतत्सम्बन्धेन हृदयमपि तल्लीलारसात्मकं जातम् । तादृशलीलासमये प्रियासहितप्रभुचरणतलं स्वकरतलेन यदा लालितं क्रियते, तदा तच्छोभादर्शनेन परमरसावेशेन तदात्मकतया तच्चरणतलं हृदये स्थाप्यते । तदा तदा तद्धृदयं पूर्वमप्यम्बुजत्वेन सरसं तथापि तदानीन्तनप्रचुरभावेनान्तर्लीलास्मरणेन पुष्टं विशेषतो जातमिति तथोक्तम् । अत एव तादृग्लीलाविवरणमभूत् । सर्वदा तल्लीलात्मकमेव तिष्ठतीति शश्वदित्युक्तम् । किञ्च । यथा रविसम्बन्धेन कमलं विकसितं भवति, तदा तदरुणकान्तिसम्बन्धेनैतद्धृदयाम्बुजमपि विकसितम् । पुनस्तस्य तद्रसात्मकतया तद्रूपत्वमेव जातमिति तथोक्तम् । किञ्च । यथा प्रियमिलने तदात्मकतया प्रियरूपत्वं भवति, तथा तलस्यारुणत्वे तत्सम्बन्धेन हृदयस्याप्यरुणत्वं युक्तमित्यारक्तादिपदानि विहायारुणपदोपादानादवगम्यते ॥ १ ॥

नमामि हृदये शेष इत्यस्य टिप्पण्यां । मूलेऽनुपायशब्दस्येत्यत्र ।

---

१ यत्पादाम्भोजनेत्रानां स्यादिति प्रतिभाति । २ श्रीहरिरायाणामिति प्रतिभाति ।

मूले 'निरोधोऽस्यानुशयन'मिति वाक्येऽनुशयनशब्दो भावार्थक एव प्रतिभाति । यतोऽनुशयनं नाम भगवतो भावात्मकस्य सर्वात्मभाववति भक्तहृदये तथाविधाखिललीलाविशिष्टस्य प्रभोर्निगूढभावरूपेण स्थायितया स्थितिः । तथाचात्र स्कन्धे क्रियमाणाखिललीलायाः कथं निरोधशब्दवाच्यता । अन्यथा 'प्रपञ्चे क्रीडनं हरे'रित्याचार्यविवृतिविरोध इत्याशङ्क्य तस्योभयार्थकत्वनिरूपणायाहुः **करणव्युत्पत्त्येति** । पक्षे त्वित्यत्र तुरप्यर्थे । तथा मूले भावार्थकत्वपक्षेपि अनुशय्यतेऽनेनेति करणव्युत्पत्त्या तथाविधस्वरूपस्थितिसम्पादकलीलायामपि तद्रूपत्वमुच्यत इत्युभयार्थकोयमनुशयनशब्द इत्यर्थः । अत एवाचार्यवर्यैरग्रे तथैव निरूप्यते । 'प्रपञ्चविस्मृतिः सर्वा तदासक्तिश्च वर्ण्यते' 'प्रपञ्चे क्रीडनं हरे'रित्यादि । प्रपञ्चविस्मृतियुतासक्तिर्व्यसनमिति निरोध एव । भरतेन 'या तु व्यसनसम्प्राप्तिर्निरोधः स तु कथ्यत' इति तथैव तल्लक्षणाभिधानात् । तथा च भगवतो निरोधो भक्तेषु तत्परतया लीला, भक्तानां प्रपञ्चविस्मृत्या भावरूपस्य प्रभोः स्थायित्वं हृदये निरोध इति बोधितम् । यद्यप्येवं तथास्थितिर्निरोध इति सिध्यति । अत एवोद्धवेपि व्रजसीमन्तिनीचरणरेणुसम्बन्धिगुल्मलतादिषु स्वजननाभिलापसञ्चितातुलभाग्यसन्ततावेवैव स्थितिरुक्ता । स्वामिनीसम्बन्धितया तद्द्वारकतद्विषयकप्रसादवता प्रभुणा स्वामिनी, यतो विदुरसविधे तेना'प्यात्मनः परमां स्थिति'मित्यनेन सामान्यतः सा तथैवानूदिता । तथापि स्थितेर्धर्मान्तरवन्न स्वरूपतो भिन्नत्वं लेशतोपीति तादृगवस्थापन्नं स्वरूपमेव स्थितिशब्देनोच्यते । अत एव प्रभुभिराभासो **निरोधरूपं भगवन्तं विवृण्वन्तीत्येवमेव** निरूपित इति नानुपपत्तिः काचित् । 'रसो वै स' इति श्रुतेः 'स्थायिभावो रसः स्मृत' इत्यादिवाक्यैर्भगवतो रसरूपस्य स्थायिभावात्मकत्वं तच्छास्त्रप्रसिद्धमिति न तथाभासनिरूपणेऽपि रसस्वरूपविद्भिः संशयितव्यमिति दिक् । अयमर्थो निजाचार्यचरणाम्बुजभावनात् । भासते भाग्यराशीनां सततं हृदि तिष्ठति ॥१॥

श्रीगोपीजनवल्लभाय नमः । **टिप्पण्यां तेन लोके सत्यं व्रत** चेत्यारभ्य **धर्मी चेति षोडशधेत्यन्ते** ग्रन्थे सत्यं विनियते । लोके सत्यं वचनम् । व्रतमेकादश्याद्युपोषणादिरूपम्, लोके लौकिकं नियामकं सत्यं तप्ततैलादौ शपथरूपम् । वैदिकं द्वादशविधम् । भगवतो व्रतानि 'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति' 'द्विःशर' मित्यादिना निरूपितानि । लोकानुसारेण देवहितकारिणो नियामकं भगवतो भगवद्वचनसत्यत्वम् । भूरादित्रयम्, कायादित्रयम् । इदमष्टविधं सत्यम् । लोके व्रतं शपथरूपं च सत्यमुक्तद्वादशविधं वैदिकं चेति द्विविधम्, लोके सत्यवचनम् । व्रतमेकादश्यादि तप्ततैलादौ शपथरूपं सत्यं चेदं त्रयं लौकिकत्वेनैकविधमुक्तद्वादशविधं वैदिकत्वेनैक-

१०. २. २६. १ इदं श्रीमत्कल्याणरायाणाम् ।

विधमिदं द्विविधमपि परत्वेनैकम् । शपथस्य नियामकत्वेनान्येपामुत्कृष्टत्वेन च परत्वात् । भगवतो व्रतं नियामकं भगवद्वचनं चेति द्विविधं, भगवद्धर्मत्वेनैकम् । भूरादयः फलरूपाः । कायादयः साधनानि । भूरादीनां फलत्वेन कायादीनां साधनत्वेन वैक्यम् । इदं चतुर्विधं सत्यं, प्रमाणरूपं सत्यं वेदो भगवद्धर्माः प्रमेयरूपं सत्यं सत्यस्य कारणरूपो भगवान् साधनरूपं सत्यं सत्ये स्थितः सत्यरक्षको भगवान् । फलरूपं सत्यं सत्यस्य लयस्थानमाधिदैविकसत्यरूपो भगवान् । भगवति प्रतिष्ठितं वस्तु सत्यं चैतदुभयं फलितसत्यत्वेन पञ्चमं सत्यम् । इदं पञ्चविधं सत्यम् । सत्यत्वेन परत्वेन साधनत्वेन ऐहिकफलमूलत्वात् फलत्वेन रमणादिकरणत्वेनेतिप्रकारैः पञ्चविधं सत्यं वेदे निरूपितम् । तदष्टविध एव प्रविशति । पूर्वोक्तमष्टविधप्रमाणादिरूपं पञ्चविधं चेति त्रयोदशधा । इदं त्रयोदशधा ज्ञानशक्तिद्वयं वेदो भगवद्धर्माश्च धर्मी चेति षोडशधा । वेदे भगवद्धर्माणां प्रमापकत्वात् प्रमाणत्वोपाधिना क्रियाशक्तिरूपं पञ्चविधसत्यमध्ये प्रवेशेपि द्रुतं भगवत्साक्षात्कारसाधकत्वेन तज्ज्ञानशक्तित्वेनापि निरूपणं न दोषाय, सर्वत्रोपाधिभेदेन भेदात् । इति सत्यविवरणम् ।

श्रीकृष्णाय नमः ॥ **निलायनैरित्यस्य विवरणे ब्राह्मणोपीत्यादेष्टिप्पणे** कारिकाभिरर्थनिरूपणे **सूक्ष्मरूपेणेत्यादि** । अत्र ब्राह्मणक्षत्रियभवनयोस्तात्पर्याणि यथाक्रमं निरूप्यन्ते, परोक्षवादप्रकाशनाय । तत्र यथा ब्राह्मणो नम्रतादिभिः कृत्रिमसूक्ष्मरूपेण स्वस्मिन् विश्वासमुत्पाद्य स्वकार्यप्रतिबन्धकनिवर्तकः । यतः सर्व एव शुद्धः साधुः प्रशान्तः, न चैतस्मात्किंचनान्यथा भविष्यतीति बुद्ध्या तादृशं तं विश्वस्य परिजननिकटस्थमपि रहसि विहाय स्वस्वकार्यायाव्यग्रा गच्छन्ति, तथा भगवानपि कृत्रिमतयाङ्गस्थापनादिना स्वस्मिन् शुद्धत्वादिकं विबोध्य सर्वेषां विश्वासमुत्पाद्य स्वलीलाप्रतिबन्धकनिवर्तक इत्यर्थः । तदेतदुक्तं **सूक्ष्मरूपेणेत्यारभ्य तेनैवापगत** इत्यन्तेन । **तेनैवेति** । विश्वासोत्पादनेन, नतु सामर्थ्यादिनेत्यर्थः । क्षत्रियभवनतात्पर्यमाहुः **स्वेष्टरूपमिति** । यथा क्षत्रियः स्वकीयानामन्यतः स्वतो वात्यार्तौ तन्निवर्तनाय स्वस्मिन् विद्यमानमेव तदनुकूलसामर्थ्यादिविशिष्टं युद्धोपयिकसकलसामग्रीसहितं तदिष्टं रूपं तत्प्रतिबन्धके निवृत्ते सुखे भाविनि प्रकटयति, तथा भगवानपि स्वतः परतो वा स्वजनार्तौ तदभावाय स्वस्मिन् विद्यमानमेव रसोपयोगिसकलसामर्थ्यवन्मन्मथायोधनानुकूलसकलसामग्रीविशिष्टनिजजनेष्टं रूपं तत्प्रतिबन्धकापगमे प्रकटयतीत्यर्थः । नन्वेकरसस्य ब्रह्मण एवं करणे किं तात्पर्यमित्याशङ्क्याहुः **भक्तार्तिहृतिरित्यादि** । अत्र हि द्वयं कर्तव्यम्, भक्तानामार्तिहृतिपूर्वकमिष्टप्रापणं तदतिरिक्तनिरोध्यनिष्ठप्रभुविषयकदोषारोपाभावश्च । तत्र प्रतिबन्धकाभावाय ब्राह्मणत्वप्राकट्ये प्रतिबन्धकसद्भावेन भक्तानामार्तिहृतिं क्षत्रियत्वानाविर्भावे तदिष्टप्राप्तिश्च न स्यात् । तस्माच्च स्वामिनीतरव्रजस्थेषु प्रभुविषयकदोषाभावश्चेत्यर्थः । तेषामपि निरोध्यत्वेन प्रभोः सर्वार्थमागतस्य तेषु तथाकृतेरुचितत्वात् । प्रभौ

स्वामिनीषु तल्लीलायां दोषारोपे तन्निरोधासिद्धेरिति भावः । पुनर्ब्राह्मणभवनतात्पर्यमाहुः कदाचिदिति । यथा ब्राह्मणो गुर्वाद्यधीन एव भवति, न स्वतन्त्रः, सर्वं कुर्वन्नपि तदनुज्ञयैव करोति, अनुज्ञापरतया निर्दोषश्च, तथा भगवानपि स्वभक्तपित्राद्यधीन एव, तदनुज्ञयैव च सर्वं करोति, भक्तानुज्ञापरतया भक्तिमार्गे निर्दोषश्चेत्यर्थः । एतादृशैर्थे आज्ञादातृत्वाय भक्तत्वमुक्तम् । अन्यथा अन्येषां भगवदिङ्गितातिरिक्तस्फुरणानियमात्तथा न स्यादिति भावः । पुनः क्षत्रियभवनतात्पर्यमाहुः क्वचिदिति । यथा क्षत्रियो गूढमन्त्रो महासाहसः सर्वथा स्वकार्यसाधको निर्भयः सर्वरसभोक्ता, तथा भगवानपि गूढः समन्त्रो वनसेवनान्महासाहसः कथञ्चिद्व्याजादिना सङ्केतितस्थले भक्तागत्या सर्वथा लीलारूपस्वकार्यसाधक इत्यर्थः । निर्भयत्वबोधनायैवानिशं रमत इत्युक्तम् । पुनर्ब्राह्मणभवनतात्पर्यमाहुः कदाचिद्भक्तेति । यथा ब्राह्मणः परमाग्रहः सकलासहिष्णुप्रतापवानसामर्थ्येऽपि चातुर्येणैव स्वकार्यसाधकः, तथा भगवानपि कदाचिदेव भक्तानां स्वामिनीनां ये पित्रादयस्तत्कृते एतत्सङ्गे न गन्तव्यमित्यादिरूपनिषेधेऽपि मया गृहीत्वैवैनां गन्तव्यमित्यतिविहिताग्रहः सर्वधर्षणक्षमप्रतापवान् बालभावेनासामर्थ्येऽपि व्याजादिप्रकल्पनचातुर्येण स्वेष्टदेशनयनरूपकार्यसाधक इत्यर्थः । पुनः क्षत्रियभवनतात्पर्यमाहुः कदाचिदित्यारभ्य सर्वत इत्यन्तेन । यथा क्षत्रियः कुतुकावेशी स्वधर्मज्ञापनपरः प्रतिपक्षागतिशङ्कया सेनासहितो दुर्गादिस्थितवस्तुग्रहणाय विविधोपायकारी सकलप्रतिबन्धनिवर्तकश्च, तथा भगवानपि बालक्रीडाकुतुकावेशी कूर्दनादिना स्वसामर्थ्यज्ञापको लीलाकृतिपरिपन्थिसमागतिशङ्कया कपिसेनासहितः पुलिनस्थितभक्तप्राप्तये च विविधसेतुबन्धनाद्युपायकर्ता निजभक्तसुखप्राप्तिप्रतिबन्धनिवर्तक इत्यर्थः । पुनर्ब्राह्मणभवनतात्पर्यमाहुः अन्यश्चेदिति । यथाभिमानेन स्वप्रयोजनप्रतिबन्धार्थमन्यस्मिन्नागते ब्राह्मणो निजाग्रहेणैव तन्निरासकः स्वविप्रत्वाग्रहेण तन्निरासको, न तु स्वसामर्थ्येन, ततश्च स्वकार्यसाधकः, तथात्र भगवानपि स्वसम्बन्धाभिमानेन भक्तनैकट्यमन्यस्मिंस्तद्बहिर्भूते समागते सति स्वनालमानाग्रहेणैव तन्निरासको, न तु स्वसामर्थ्येन, तेन तथाकृतौ तादृशरूपे, तथा सामर्थ्यदर्शनेनान्येषां ज्ञानात् सम्यक् लीलासिद्धेः । ततश्चानेकविधलीलारूपस्वकार्यसाधक इत्यर्थः । पुनः क्षत्रियभवनतात्पर्यमाहुः स्थापयित्वैवेति । यथा क्षत्रियो दुर्गादिष्वन्यप्रवेशप्रतिबन्धकभटादिस्थापकः स्वगतिमात्रसाधननिधाता, तथा भगवानपि पुलिनादिष्वन्यगतिमभानितस्थलेषु रक्षकगोपादिस्थापकः स्वमात्रगतिसाधनसेतुबन्धविधातेत्यर्थः । अतः परं भावेन रसमेकत्र स्थितमेवेत्यादितात्पर्यमाहुः भक्ता हीति । भक्ता हि भगवति प्रत्येकं स्पर्शादिविविधभाववन्तः, तथा भगवानपि तेषु । तथा चैकैकस्यामेव स्वामिन्यां सर्वानेवाखिलस्वामिनीजनमनःस्थितान् भावान् क्रमेणोत्पाद्य तत्तद्भावरसास्वादनेन मुह्य इत्यर्थः । एतेनैकत्र मुख्यो रसो निरूपितः । योगे प्रकारान्तरमाहुः कदाचित्प्रत्येक-

मिति । कदाचित्कपिवदुत्प्लुत्य तत्र तत्र तस्यां तस्यां स्वामिन्यां स्थितः प्रत्येकमखिलान् भावरसान् भुङ्क्त इत्यर्थः । **एकत्रे**त्यस्य तात्पर्यान्तरमाहुः **अथवे**ति । एकत्र पुलिने स्थितो वेणुवादनलीलया सर्वेषु भक्तेषु सङ्गतेषु अखिलानेव भावरसान् रासलीलास्थितानपि भुङ्क्त इत्यर्थः । एतेन मिश्ररूपेणाग्रे क्रियमाणाः सर्वा अपि लीला अत्र केवलरूपेण कृता इत्युक्तं भवति । अत एवोक्तमाचार्यैर्विवरणे **नतु तस्य कापि मर्यादा प्रतिबन्धिके**ति । अत्राप्युक्तम**त्युदारधी**रिति । वालो ह्युदारबुद्धिर्भवति । अत एवात्र परीक्षासाधनाद्यसम्पादकत्वं द्वितीयतृतीयाध्यायीयलीलयैव । एतेन लोकवेदातीतपुरुषोत्तमस्वरूपं सर्वलीलाविशिष्टमेतदिति समर्थितम् । उपसंहरन्ति **एतदे**वेत्यादि, **सुगोपित**मिति । आचार्यैस्तथोक्तमित्यस्माभिरपि तथैवोच्यत इत्यर्थः । अतः परं विवरणस्थमूलरूपलीलेत्यादेस्तात्पर्यमाहुः **एतदग्र** इति । **तद्भाव** इति । तात्पर्यवृत्तिनिरूपितोर्थः प्रकर्षेणोच्यत इत्यर्थः । **सम्यगि**ति । नात्र पूर्ववत्परोक्षवादरीत्या निरूपणमित्यर्थः । **तदनुग्रहत** इति । स्वाचार्याशयस्यानुग्रहैकलभ्यत्वादित्यर्थः । **स्फुट**मिति । अयं भावः । प्रकटन एव पूर्ववत् परोक्षरूप इत्यर्थः । रसात्मकेतरब्रह्मधर्माणामत्र निरूपणेन तत्साम्यस्यात्र प्रकटत्वादिति भावः । तमेवाहुः **प्रमाणाख्यप्रकरण** इति । तदुपक्रमे हि तथा प्राकट्येन तादृगुत्सवहेतुतया पूतनासुपयःपानादिचरित्रैः स्वामिनीकृतरक्षया च शुद्धत्वं ब्रह्मत्वं च भगवति निरूपितम् । तदुपसंहारेपि यदि नोच्येत तदोपक्रमोपसंहारविरोधात्तद्वयं न सिध्येत्, अतस्तत्परिचायकलीलात्रयं प्रोक्तमित्यर्थः । तदेवाहुः **सर्वाज्ञातस्वरूप**मिति । पूर्वं प्रपञ्चरूपेणाविर्भावात्पूर्वं सर्वेषां सूक्ष्मरूपेण तद्दूरस्थत्वेपि तेषामज्ञातमित्यर्थः । 'न तं विदाथेति' श्रुतेः । सृष्ट्युत्तरं तु तज्ज्ञानसम्भवोऽपि । सर्गस्य मोक्षं प्रति कारणत्वात् । 'दैवी सम्पद्विमोक्षायेति' वाक्यादित्यर्थः । अनेन ब्रह्मणो निलायनलीलोक्ता । सेतुबन्धसूचितमर्यादाधारतयाक्षिप्तां जगद्रूपलीलामाहुः **रिरंसया तत** इति । ततस्तदनन्तरं प्रपञ्चरमणेच्छयाखिलजगद्रूपं जडजीवान्तर्यामिभेदभिन्नतद्रूपमात्मानं कृत्वा तत्र प्रपञ्चरूपेतिदुस्तराः सर्वथानुल्लङ्घ्या मर्यादाः स्वलीलासिद्ध्यैव बन्धमोक्षरूपक्रीडासिद्ध्यै कुरुत इत्यर्थः । ननु सेतुबन्धैः परपारस्थितप्राप्त्युपायभूतैर्न प्रपञ्चमात्रपर्यवसितमर्यादासूचनं भवतीत्यरुच्या पक्षान्तरमाहुः **यद्वे**ति । प्रपञ्चातीतस्य स्वस्याप्तये प्राप्तये भक्तिमार्गान् सेतुबन्धरूपान् सर्वथानायासेन विवरणसाधनान् दृढान् कर्मादिवत् शैथिल्येन पातसम्भावनारहितानकरोदित्यर्थः । एवं जगद्रूपलीलां निरूप्य वेदरूपलीलां निरूपयन्ति **अशेषे**ति । अशेषाः सकला या वेदशाखास्तासूक्तं निरूपितं यत्फलं स्वर्गापवर्गादिरूपं तद्भोगाय स्वसृष्टजीवानां तत्प्राप्तय आत्मनः पूर्वमेव विद्यमानां वेदरूपतां प्रकटीकृत्य नामलीलयापि रूपप्रपञ्चे क्रीडतीति सूच्यत इत्यर्थः । शुद्धब्रह्मतापरिचायकतच्चरित्रत्रयमत्राप्यतिदिशन्ति **तथात्वाय भक्ता** इति । भक्तिमार्गे भगवतो मूलचरि-

त्प्राकट्यं भक्तार्थमेवेति ज्ञापनायाहुः **भक्ता** इति । यथा भक्ताः सर्वं गृहादिकं परित्यज्य प्रभुप्राप्त्यै रह एकान्ते सङ्केतितवृक्षमूलाद्याश्रयेण स्थिताः, तथा भगवानपि तदर्थं रहः स्थितश्चेत्तदा सर्वाज्ञातस्वरूपतया निलायनक्रीडावत्त्वेन परः पराकाष्ठापन्नो लोकवेदातीतः पुरुषोत्तम इत्यर्थः । एतेन 'ये यथा मां प्रपद्यन्ते' इत्यादिमर्यादाकर्तृत्वेन लीलासृष्टिजगद्रूपलीलाप्युक्ता । नन्वियं प्रतिज्ञा सर्वसाधारणी, नासाधारणब्रह्मधर्मो, यतः सर्वेप्येवमेव स्वप्रपन्नेषु वदन्तीत्याशङ्क्याहुः **यतो नान्यप्रतिज्ञेयमिति** । एतादृक्प्रतिज्ञाकरण भगवत एव सम्भवति, नान्यस्य, सर्वसामर्थ्याभावात् । परमफलप्रेप्सया प्रपत्तौ तद्दानाशक्तत्वात्, यतो मूलचरितमेवेदमिति भावः । सा केत्याकाङ्क्षायामाहुः । आदिपदेन 'न मे भक्तः प्रणश्यती' त्याद्या अनुसन्धेयाः । एतल्लीलाया मूलचरित्रत्वं प्रकारान्तरेणाहुः **साक्षादिति** । अस्यां भजनानुरूपभजनलीलायां साक्षात्स्वरूपदानम्, तच्च नान्यस्य सम्भवति । न हि साक्षात्स्वरूपं दातुमन्यः शक्तो, रसात्मकत्वाभावात्, मोक्षपर्यन्तमेव दातुं तच्छक्तेः, तत्र भगवतः प्राप्तिर्नत्वस्येति स्वरूपदानमप्येतल्लीलाया मूलचरित्रत्वे हेतुरित्यर्थः । वेदरूपलीलामप्यत्रातिदेष्टुं लीलासृष्टिस्थितस्वरूपमाहुः **लीलासम्बन्धीति** । अत्र लीलासृष्टौ सर्वं लीलासम्बन्धि । अत एव भगवदात्मकम्, लीलाविशिष्टस्यैव भगवत्त्वात् । अतस्तत्प्रवर्तकत्वमन्यस्य न सम्भवतीति स्वयमेव तत्प्रवर्तनाय तद्द्वारा सर्वफलभोगाय शब्दात्मकवेणुनादरूपेण प्रकटीभवतीत्यर्थः । एवं लीलात्रयमतिदिश्योपसंहरन्ति **एतत्सर्वमिति** । **गोप्यत्वं चापीति** । परोक्षवादरीत्या निरूपणेत्यर्थः ।

इति श्रीवल्लभाचार्यकृपामात्रसहायवान् । न्यरूपयन्निजस्वामिदासैस्तत्कारिकात्रयम् ॥ १ ॥
विदन्त्वेतेन विद्वांसः श्रुतिसारमखण्डितम् । लोकवेदाद्यतीतं यत् पुरुषोत्तमसंज्ञकम् ॥२॥

१०-११-५१. १. श्रीहरिरायाणामिति ।

शोधपत्रम् ।

श्रीमत्याष्टिप्पण्या मुद्रितपुस्तकवाचनारम्भकरणात् पूर्वमनेन शोधपत्रेण तत् संशोध्य वाचनीयमिति वैष्णवेभ्यो भगवदीयेभ्यो विज्ञप्तिः । मुद्रितपुस्तकस्थपाठाः केचित् क्वचित् मूलपुस्तकस्थपाठेभ्यः संस्कृता अपि सन्तीति नः प्रतिभाति । ते च श्रीमत्प्रभुचरणैरेव पश्चात् संस्कृताः स्युरित्यनुमीयते, परन्तु बहुवारं लेखकभ्रमाद् मूलस्थपाठा विकृता अपि दृश्यन्ते, तत्र त एवादर्तव्या इति । क्वचित् (पृष्ठ १४४) 'तक्रं पयः' 'सतत'मिति मूलपाठा एव 'तक्रोपमः' 'प्रियत्तमेषु' इत्यनुक्रमेण शोधिताः । ते च विद्यमानास्मद्दृष्टश्रीटिप्पणीपुस्तकेषु दृश्यन्ते । तथापि मूलस्था एव पाठास्त्वस्माभिरादृताः । श्रीहस्ताक्षरलिखितमेतन्मूलपुस्तकमेव श्रीपुरुषोत्तमचरणै रासपञ्चाध्यायीप्रकाशे पाण्डुलिखनत्वेनोपन्यस्यते । अतो मुद्रितपुस्तकस्थोचिततरपाठाः श्रीमत्प्रभुचरणैरेवादृता इति सुष्ठु निश्चीयते । क्वचित् टिप्पण्यां शोधः श्रीमद्गोकुलनाथचरणैरपि कृतो दृश्यते, क्वचित् पाठाश्च शोधिता इत्यतः पाठादरणे विवेकः कर्तव्य इति ।

पृष्ठम्	पंक्तिः	मुद्रितपाठः ।	मूलपाठः ।
२	१७	दशविधलीलाभ्यो	दशलीलाभ्यो
३	११	तद् देवव्रतं	देवव्रतं
४	१५	द्वादशस्कन्धे	द्वादशे स्कन्धे
४	१७	अङ्गादीनि	अङ्गादीन्
४	१९	तूकरीत्याहुरत	सूकरीत्यामित्याहुरत
४	२१	पूर्वभाव इति मूलस्थः पाठः । आविर्भावेति पाठस्त्वनिष्टः ।	
४	३०	दानोपरि मृत्यवमृत्योः इति टीका वर्तते.	
५	३	रूपत्वमुक्तवान्	रूपत्वमुक्तम्
५	१७	'वृष्णिभिः सह......संभवादपि तथा' इति हस्ताक्षरपृष्ठेषु न वर्तते, पश्चाद् ग्रन्थकारैः लिखितमिति प्रतिभाति ।	
६	९	कचित्	क्वचित्
६	१०	लीलानुपयोगिसंसारवतामिति मूलपुस्तके न वर्तते ।	
६	११	संस्मृतिरपि	संसृतिरपि
८	२१	असुर	आसुर
८	२४	परस्परं	परस्य परम् ।
८	२८	आविवेदेत्याद्याभासः ।	आविवेदेत्यस्याभासः ।
१०	८	व्याकुर्वन्ति । अतः परमिति	व्याकुर्वन्ति अतः परमिति ।
१०	११	एवमष्टविधत्वं सत्यस्य भगवतः कालरूपस्य । यदि-	एवमष्टविधत्वं सत्यस्य । भगवतः कालरूपस्य यदि-
११	९	अज्ञानमिद्धिशानं	अत्रैव अज्ञानमिद्धिशानं
११	११	स्वोक्तानाङ्गाया	स्वोक्तनाङ्गाया
१५	२९	ज्ञापयन्तीति	ज्ञापयन्ति
१५	२८	स्तुनिभ्यामिति	स्तुनिभ्यामपि

पृष्ठम्	पंक्तिः	मुद्रितपाठः ।	मूलपाठः ।
१५	३०	स्तुत्याः	स्तुत्योः
१५	३०	वैदिकोऽलौकिक	वैदिको लौकिक
१६	१	पूर्णमास	पौर्णमास
१६	२	चतुर्व्यूहात्मकश्चतुर्मूर्तिः ।	चतुर्व्यूहात्मकश्चतुर्मूर्तिः
१६	८	'अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति भगवद्वाचीति मूले नास्ति ।	
१६	११	आधिदैविकादिरूपत्रितयं	आधिदैविकादित्रितयं
१६	१६	प्रतिपत्ति	प्रपत्ति
१८	७	तद्दर्शनेपीति पाठः मूलस्थः ।	तद्दर्शनेइतिटिप्पणमशुद्धम्।
१८	२०	अष्टाक्षरा गायत्री	अष्टाक्षरा गायत्री ।
१८	२६	जुष्टत्वं	जुष्टतत्वं
१८	२८	जुष्टत्वे	जुष्टतत्वे
१९	२०	तदुक्तय	तदुक्तिः ।
१९	२६	तिष्ठेदेव	तिष्ठेतैव
२०	३	तादृश	तादृग्
२०	३०	सम्भवति	स भवति
२०	३१	भक्तार्थे	भक्तार्थ
२१	२	शेषे इदं सूत्रमिति मूले टिप्पणम् ।	
२१	१०	शास्त्र	शास्त्रीय
२१	१३	ग्राह्यः । तथा,	ग्राह्यः तथा ।
२१	१५	तथा चैतादृश	तथा चैतादृशः
२१	१९	ज्ञायते	ज्ञाप्यते
२२	५	दर्शनक्षणे इति पाठः मूलस्थः । लक्षणे लक्षणो वेति टिप्पणं न वाचनीयम् ।	
२२	७	अनिमित्त	अनिमित्तत
२२	२६	एवं सति	एवं सति न
२३	१८	तु मौढ्यात्	तु लोके मौढ्यात्
२३	३६	लौकिकत्वं	लौकिकं
२४	७	लीलाकरणे लौकिकत्वेन	लीलाकरणेऽलौकिकत्वेन
२४	२५	हीनत्वापादकत्वं	हीनत्वापादकं
२५	९	जम्भा	जृम्भा
२५	१९	एव वोत्सवं	एवोत्सवं
२६	८	अस्तु वा,	अस्तु वा तथा
२६	२३	यत्समपद्येति	यत्समपद्यतेति
२७	२०	निरीक्ष्यमाण	निरीक्षमाण
२८	११	अर्भकपदम् । मूले	अर्भकपदं मूले ।
२८	१६	दोषापत्तिः	दोषत्वापत्तिः ।
२८	३१	ज्ञानस्य	ज्ञानस्य च

पृष्ठम्	पंक्तिः	मुद्रितपाठः ।	मूलपाठः ।
२९	१३	तदज्ञापनम् ।	तज्ज्ञापनम् ।
२९	१६	धर्मास्फूर्तिः	धर्मास्फूर्तिः,
२९	१७	निरस्ता ज्ञेया ।	निरस्ता ।
३१	१९	सहज	अत्रत्यं टिप्पणं न वाचनीयम् ।
३२	३	मूले 'कंसस्यैतज्ज्ञानं स्यानिष्टमित्युक्तयेति नास्ति ।	
३२	११	तत्त्व	तत्र,टिप्पणस्थः पाठः मूलस्थः।
३२	१२	इति	इति ।
३२	१९	द्वितीयं टिप्पणं मूले नास्ति ।	
३२	१९	ज्ञानहेतुत्वेन	ज्ञाने हेतुत्वेन
३५	६	'स्वमति' इत्युपरिटिप्पणपाठः मूले नास्ति ।	
३५	२३	रक्ष्यति	रक्षति
३६	१९	भोगविषये	भोगविषये ।
३७	३०	तेन्नाश	अत्रत्यटिप्पणस्थः पाठः मूलस्थः।
३९	६	'तत्वात्' इत्यत्र टिप्पणमशुद्धत्वान्न वाचनीयम् ।	
४०	६	या इत्यत्र टिप्पणं न वाचनीयम् ।	
४०	७	लीलायाः	लीलया
४०	१२	पूर्वं इत्यत्र टिप्पणमशुद्धत्वान्न वाचनीयम् ।	
४०	२०	तदपेक्षाभावात्	तदपेक्षाऽभावात् ।
४०	२२	यत्नेन	यत्ने
४१	४	भगवद्वियोगे	भगवद्विप्रयोगे
४१	१५	तद्रूपत्व–	तत्तद्रूपत्व–
४१	१८	प्रकारकत्वा–	प्रकारत्वा–
४१	२६	उक्तेश्च	उक्तिश्च
४२	२१	वालौकिक	चालौकिक
,,	२५	तथाप्यनुचित	तथाप्यत्यनुचित
,,	३०	भनङ्गीकाराद् । क्रूरे	अनङ्गीकारात् क्रूरे
४३	१५	पुत्रव्यवहारः	पुत्रत्वव्यवहारः
,,	२२	(पुष्टि) पुष्टिमार्गे	पुष्टिपुष्टिमार्गे
४४	३	अतिक्रमणे	अतिक्रामणे
,,	१०	सुतरां	ततस्तरां
४५	६	पूर्ववदेवोपालम्भाद्	पूर्ववदेवोपलम्भाद्
,,	१९	भगवतीत्यत्र भवतीति टिप्पणं न वाचनीयम् ।	
,,	२३	सहमाननियमादित्यत्र भावेति टिप्पणं न वाचनीयम्	
४६	८	भवति । मूले	भवति मूले ।
,,	१५	पूर्वं	पूर्व
४७	४	ब्राह्मणोपीति	ब्राह्मणोपीत्यादि
,,	१३	स्थापयिम्बान्य	स्थापयित्वैवान्य

पृष्ठम्	पंक्तिः	मुद्रितपाठः ।	मूलपाठः ।
,,	२३	स्वयमेव	स्वयमेप
,,	१९	द्वयमित्यत्र मूले टिप्पणमेवम् 'प्रकरणस्य प्रमाणत्वं शुद्धमह्यत्वं च तलक्ष-णायोगात् प्रमाणाभावात्'	
५३	९	तदनुवादकत्वशङ्का	तदनुवादत्वशङ्का
५६	२९	न तेपीति	न तु तेपीति
५७	२०	–द्वारैव तथा	–द्वारैव तत्र तथा
५८	१३	ज्ञायते	ज्ञाप्यते
५९	९	तेनाग्र गृह्वन्तोपि	तेनाग्रमह्वन्तोपि
५९	२९	दशवाक्यानामर्थमुक्त्वाप्यचित्त	दशवाक्यानामर्थमुक्त्वाप
५९	,,	पत्रान्ते टिप्पणं न वाचनीयम् ।	
६०	११	एवाचप्युः	एवाचक्षुः
,,	१२	तदन्ते च ज्ञापित–	तदन्ते च तद्ज्ञापित–
,,	२४	तदुच्यते	च तदुच्यते
६१	१३	चिरस्थित्यादिकं	चिरं स्थित्यादिकं
,,	२४	व्यतिरिक्तेपु भक्तेपु तादृश–	व्यतिरिक्तेपु तादृश–
,,	२६	अपि 'वेदा	अपि वेदा 'वेदा (वेदा इत्यधिकं)
,,	२७	सार्वदिक–	त्रिपृष्ठे सार्वदिक–
६२	४	धारावद् मूलपाठः,	धारारूपेण इति पाठः न वाचनीयः।
,,	६	इति तत्र	इति तत्तद्
६३	७	सर्वात्मभावेन	सर्वात्मभावे
६३	२३	लोके वेदा–	लोकवेदा–
६३	३१	(स्वच्) चरणानां	चरणानां
६४	११	यथैव तासामपि	यथैतासामपि
६४	१६	प्रकटत्वाज्ज्ञान–	प्रकटत्वात्तद्ज्ञान–
६४	२४-२५	रसस्यापि तत्वात्	रसस्यामितत्वात्
,,	२७	सम्बध्यर्थौ	सम्बन्ध्यर्थौ
,,	२९	भगवान्निकट	भगवन्निकट
६५	१	सर्वतत्वं	सर्वं तत्त्वं
,,	११	वैतादृश्यं	वैतादृशं
,,	२१	गतमपि,	गतमपि
,,	२३	परमस्नेहो	परमः स्नेहो
,,	२७	स्त्रीपुंसेति	स्त्रीपुंसोरिति
६६	५	मन्त्राप्रयोजकं	मन्त्राप्रयोजनकं
६७	२	त्यनेकविधसंस्कारः	त्यनेकविधः संस्कार
,,	१८	तु त्यागो	त्यागो
६८	१	कोसले	कोशले
,,	३-६	आदिवाराहे......इत्याचार्यैरुक्तम् ।'	मूललेखटीका
,,	८	तदनुभवस्तु	तदनुभवश्च

पृष्ठम्	पंक्तिः	मुद्रितपाठः ।	मूलपाठः ।
,,	१८	भगवानेवेति	भगवानेव चेति
७०	११	अत	तव
,,	१२	स्वच्छन्दभोग	स्वच्छन्दं भोग
,,	,,	पत्रान्तटिप्पणं मूले नास्ति.	
७१	१८	सन्निकट	सन्निकटस्थ
,,	२४	भयाभावज्ञानाभावात्	भयाभावज्ञानात्
७२	८	न तु साक्षाद्	न तु तत्र साक्षाद्
,,	१०	पूर्वोक्तस्थितिर्नो	पूर्वोक्ते स्थितिर्नो
,,	२४	स्वानधीनत्वेन	स्वाधीनत्वेन
७३	१२	मार्गीयत्वमित्यर्थः	मार्गीयत्व इत्यर्थः
,,	१३	स्वकीयकामरूपाणि	स्वीयकामरूपाणि
,,	,,	पत्रान्तटिप्पणं मूले नास्ति ।	
७४	१४	कर्शनोक्त्या	कर्षणोक्त्या
७६	३१	नुत्पादकत्वेन	नुत्पादकत्वे
७७	१९	तदर्थत्वात्तदर्थत्व	तदर्थत्वातदर्थत्व
७८	१४	जन्मेत्यत्र	जन्मेत्यस्य विवरणे
७९	७	परः	परः ।
७९	१८	नाशयित्वा नीतवानि	नाशयित्वाऽनीतवानि
,,	२७	ज्ञानमपेक्षितम्	ज्ञानमप्यपेक्षितम्
८०	२-३	दोषः स्वभोगे ज्ञेयः	दोषः अत्र स्वभोगयोग्यत्वाभावो ज्ञेयः । इति कुत्रचित् पाठः।
८०	१	इदं शोधपत्रं मूले नास्ति ।	
८०	७	किञ्च, मां ज्ञापयत	किञ्च, पूर्वं मां ज्ञापयत
,,	८	दास्यन्ती'ति पात्रा-	दास्यन्ती'ति वक्तव्ये तदनुक्त्वा 'वो दास्यन्ती'ति पात्रा-
,,	११	अग्रे दोषत्व-	अग्रे सदोषत्व-
,,	१२	वो दास्यन्ति	'वो दास्यन्ति'
,,	,,	स्वमग्रानयेयुः	स्वयमग्रानयेयुः
,,	१४	तासामंशो	तासामप्यंशो
,,	१८	दुरेतात्रसिन्निवृत्ति-	दुरेतात्सन्निवृत्ति-
,,	२२	आधिदैविकं	आधिभौतिकं
,,	,,	-याध्यात्मिकानां	याध्यात्मिकयज्ञात्मकानां
,,	२३	गोपानां यात्रामङ्गः	गोपानां च यात्रामङ्गः
,,	२५	गृहिर्भविष्यति	गृहिर्भविष्यतीति
,,	,,	आधिभौतिकश्च	आधिदैविकश्च
,,	२६	यज्ञीयात्रस्य	यज्ञार्थीयात्रस्य
,,	२७	ज्ञानेनाधि-	न्यायेनाधि-

पृष्ठम्	पंक्तिः	मुद्रितपाठः ।	मूलपाठः ।
८१	१५	न तु स्वातु–	न स्वातु–
८२	४	एवं यथा	एवं सति यथा
,,	२०	वाक्यमेव	वाक्यत्वमेव
८४	१२	गृह्यमाणेपि पीतिमा–	गृह्यमाणपीतिमा–
,,	३१	सम्भेव	सम्भवे
८५	१	साधनानन्तरा–	साधनान्तरा–
८७	१४	लोकनाथ–	ऽलोकनाथ–
,,	,,	पत्रांतटिप्पणं न ग्रंथकर्तृणाम् ।	
८८	५	हेतुक	हैतुक
,,	१२	पञ्चविंशे	पञ्चविंशा
८८	२१	दुपास्यानां न नमस्य	उपास्यानां नमस्य
८८	३२	एतदेवाहुः	एतदाहुः
८९	८	रमकत्वेन	रमत्वेन
९०	१४	स्वरूप-	स्वस्वरूप-
९०	२४	मूले श्रीकृष्ण इति नास्ति ।	
९१	२९	इयं फक्किका मूले एवं वर्तते–नन्वेवमाचार्यैः कुतो व्याकृतम्? यथाश्रुतार्थस्यापि सुवचत्वात् ।	
९१	३०	शुद्धत्वेन तापहारकत्वेन	तापहारकत्वेन शुद्धत्वेन च
९२	१	पूर्णानन्देन ततो गणितानन्दात्	पूर्णानन्देन गणितानन्दात्
९२	५	एवं सतीति मूले नास्ति ।	
९२	७	ब्रह्महृदप्रापणं तत्र मज्जनं तत उद्धृतिश्चेति क्रियान्तरसमुदायः ।	उच्यते च ब्रह्महृदप्रापणादिः ।
९२	१८	स्वरूपानन्ददाने	स्वरूपानन्दादाने इति मूलस्थपाठः टिप्पणे शुद्धः ।
९३	१	न्याये 'न तु तद्धानि'रिति नास्ति मूले ।	
९३	२८	सर्वस्वं	सर्वं स्वं
९४	१	वचसा	वाचा सा
९४	१०	निकटागमनेति मुद्रितपाठ एव शुद्धः, टिप्पणस्थपाठस्त्वशुद्धः ।	
९४	१८	चरणाम्बुजरुहं	चरणाम्बुरुहं
९४	२१	प्रकटम	प्रकट
९४	२९	मन्द	मान्द
९५	३	पूर्णस्वरूपानन्दो	पूर्णः स्वरूपानन्दो
९५	९	प्राधान्यमेव	प्राधान्यमेवमेव
९५	२६	साधकत्वेन	साधनत्वेन
९६	३	तद्धर्मापनोदनं	सद्धर्मापनोदं
९६	१९	न च मनस इति पाठो मूलस्थः शुद्धः, टिप्पणपाठस्त्वशुद्धः ।	
९७	२७	भगवद्धर्मप्रवेश	भवद्धर्मप्रवेश
९८	१५	तदुक्त्यात्र	तदुक्त्यात्र

पृष्ठम्	पंक्तिः	मुद्रितपाठः ।	मूलपाठः ।
,,	२१	कार्यं तत्तदा	कार्यं तत्तत्तदा
९८	—	टिप्पणस्थाः तासाम्, तदन्त इति पाठौ न वाचनीयौ ।	
९९	१८	स्वामिनीनां मनांसे	स्वामिनीमनांसे
,,	२०	चूप्	चूप्
,,	२१	प्रकृते तु सर्वात्म–	प्रकृते सर्वात्म–
१००	२१	प्रयोजनकत्वे–	प्रयोजकत्वे–
,,	—	टिप्पणस्थपाठः न वाचनीयः ।	
१०१	१९	यासां	येषां
१०१	२४	यथाशास्त्रमित्यादिना	यथाशास्त्रद्वयमित्यादिना
१०२	४	निर्णायकन्याय–	निर्णायकं न्याय–
,,	१०	स्वरूपेणैव	स्वरूपेण
१०४	५	प्रत्येकैकचरण	प्रत्येकैकश्चरण
,,	१६	तथात्वात्तद्भजनमेव	तथात्वात्तत्तद्भजनमेव
,,	२३	मुक्त्या तत्र	मुक्त्यात्र
,,	२६	ततो	यतो
१०५	६	भगवतः	भगवतः ।
,,	१९	मङ्गीकृत्य	मप्यङ्गीकृत्य
१०६	११	सिञ्चनेन	सेचनेन
,,	१३	किं किं	किं
१०७	८	तदास्यं	दास्यं
१०८	२९	स्फुटीभविष्यतीति	स्फुटीभविष्यति ।
,,	३०	तथा । तदैव	तथा तदैव
११०	१९-२०	तथा च श्रुतिः......इतस्ते'ति मूलेनास्ति ।	
१११	४	नत्वधिकसम्पादनं	नत्वधिकं सम्पादनं
,,	११	तेषामेवा–	तेषामाय–
११२	३	तत्प्राप्त्यर्थकः प्रयत्नः	तत्प्राप्त्यर्थकप्रयत्नः
११२	२५	निरोधानास्फूर्तिरिति	निरोधानस्फूर्तिरिति
११३	८-९	पर स्वद्दर्शनजात्योक्त	पर स्वदर्शनजात्योक्त
११३	२२	मित्यत्र	मित्यस्य
११६	२	पूतनासुपय.पान–	पूतनासुपान
११६	२	दत्तायां मुक्ति	दत्तायामुक्ति
११६	११	स इष्टवर्ती	इष्टपत्री
११६	२०	टिप्पणस्थ आराधनलक्षणमिति मूलपाठः ।	
११६	२१	गोविन्देत्यारभ्य भाषेति कविनास्ति ।	
११८	२३	प्रतिबन्धश्च	प्रतिबन्धकश्च
११८	२६	अलोप–	अप–
११९	४	स्फुरद्रूपाः	स्फुरिता

पृष्टम्	पंक्तिः	मुद्रितपाठः।	मूलपाठः।
११९	१०	गत्वाऽब्रवीत्–	गत्वेति नास्ति।
११९	१४	अत एव इसात्वम्	अतो इसात्वम्।
१२१	९	सर्वं कार्यम्	कार्यमिति नास्ति।
१२२	१०	आविभूर्तः	आविर्भूतः
१२३	६	कन्दर्पेणेति	कन्दर्पेणेति।
१२३	२८	लक्ष्यामि	लक्ष्ये
१२३	३०	गाढतादशैवेति टिप्पणस्थपाठः मूलपाठः।	
१२८	१७	विमुच्य	विमुच्यते
१३१	९	दानाच्च।	दानाच्च
१३२	१६	तत्स्वरूप–	तत्सरूप
१४४	४	तक्रं पयः इति मूलपाठः।	तक्रोपम इति शोधितः पाठ।
१४४	५	सवतमेवेति मूलपाठः।	प्रियतमेष्विति शोधितपाठः।

पृष्ठम्	पंक्ति	मुद्रितपाठ ।	मूलपाठः ।
११९	१०	गत्वाऽब्रवीत्-	गत्वेति नास्ति ।
११९	१४	अत एव दृष्टात्वम्	अतो दृष्टास्वम् ।
१२१	९	सर्वं कार्यम्	कार्यमिति नास्ति ।
१२२	१०	आविर्भूतं	आविर्भूत
१२३	६	कन्दर्पेणेति	कन्दर्पेणेति ।
१२३	२८	लक्ष्यामि	लक्ष्ये
१२३	३०	गाढतादर्शेवेति टिप्पणस्थपाठः मूलपाठः ।	
१२८	१७	विमुच्य	विमुच्यते
१३१	९	दानाद्य ।	दानाद्य
१३२	१६	तत्स्वरूप-	तत्सरूप
१४४	४	तक्र पय इति मूलपाठ ।	तक्रोपम इति शोधित पाठ ।
१४४	५	सततमेवेति मूलपाठ ।	प्रियतमेदिवति शोधितपाठ ।

मुद्रितपुस्तकानि ।

१	सेवाफलम् । द्वादशविवरणसमेतम् ।	रु. १-०-०
२	निरोधलक्षणम् । पञ्चविवरणसमेतम् ।	रु. १-०-०
३	संन्यासनिर्णयः । अष्टविवरणसमेतः ।	रु. १-०-०
४	जलभेदः । चतुर्विवरणसमेतः । पञ्चपद्यानि । द्विविवरणसमेतानि । सेवाफलम् । विवरणत्रयम् ।	रु. १-०-०
५	श्रीपुरुषोत्तमनामसहस्रम् । नामचन्द्रिकायुतम् ।	रु. ०-१०-०
६	तैत्तिरीयोपनिषद्भाष्यम् । जयगोपालभट्टकृतम् ।	रु. १-०-०
७	शृङ्गाररसमण्डनम् । श्रीविट्ठलेश्वरप्रकटितम् ।	रु. २-८-०
८	श्रीमधुराष्टकम् । पञ्चविवरणसमेतम् ।	अमूल्यम् ।
९	प्रेमामृतम् श्रीविट्ठलेश्वरकृतविवृतिसमेतम् । परिवृढाष्टकम् श्रीगोपेश्वरकृतटीकासमेतम् ।	रु. ०-८-०
१०	वेदान्ताधिकरणमाला । श्रीमत्पुरुषोत्तमप्रणीता ।	रु. १-०-०
११	भक्तिवर्धिनी । चतुर्दशटीकासमेता ।	यन्त्रस्था ।
१२	त्रिविधनामावली टीकासमेता ।	यन्त्रस्था ।
13	Discuss how far S'ankaracharya truly represents the view of the author of the Brahma-Sûtras. (Zala Vedanta prize Essay)	Rs. 1 0 0

प्रापणस्थानम्—

१. चुनीलाल बुकसेलर, बडामंदिर भूलेश्वर, मुंबई.
२. नडीयाद पुष्टिमार्गीय पुस्तकालयः, नडीयाद.
३. पंडित मुख्याजी गोकुलदासजी,
श्रीविट्ठलनाथ पाठशाला, कोटा, राजपुताना.
४. पंडित गट्टूलालजी पाठशाला, फेथिडूलस्ट्रीट भूलेश्वर, मुंबई.

Printed by Ramchandra Yesu Shedge, at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay.

Published by Mulachandra Tulsidas Telivala B. A., LL. B., Vakil, High Court C. P. Tank Road, Girgaon, Bombay

॥ श्रीनवनीतप्रियो जयति ॥

महानुभावश्रीहरिरायचरणानां श्रीवल्लभानाञ्च टिप्पणीभ्यां समलङ्कृता, श्रीपुरुषोत्तमचरणविरचितप्रकाशेन विशदीकृता, श्रीमद्विट्ठलेशप्रभुचरणनिर्मिता

॥ श्रीवृत्रासुरचतुःश्लोकीविवृतिः ॥

गोस्वामिकुलावतंसगोस्वामिश्रीजीवनाचार्यात्मजविद्यानुरागिगोस्वामि-श्रीमद्रणछोडलालचरणानां निखिलप्रबन्धेन प्रादुर्भूता

शास्त्री चिमनलाल हरिशङ्कर.	शास्त्री हरिकृष्ण वीरजीभाई.
'साहित्यभूषण" "शुद्धाद्वैतरत्न"	"शुद्धाद्वैतविशारद"

इत्येताभ्यां संशोध्य

श्रीजीवनाचार्यपुष्टिमार्गसिद्धान्तकार्यालयात्

प्रकाशिता गुर्जरगिरानूदिता च

संवत् १९७८, सन् १९२२

मूल्यम् ०-१०-० दशाणकाः

प्रस्तावना

શ્રીમદાચાર્યચરણે ષોડશગ્રન્થ—ચતુઃશ્લોકીથી પુરુષાર્થચતુષ્ટયનું સ્વરૂપ દર્શાવ્યું. પ્રમાણમૂર્ધન્ય શ્રીમદ્ ભાગવતમાં શ્રીકૃષ્ણચંદ્રની દશવિધ લીલાનું નિરૂપણ કરતાં ષષ્ઠસ્કન્ધ પોષણલીલાનું ગાન કરે છે, આ પુષ્ટિનિરૂપક ષષ્ઠસ્કંધ ઉપર સ્વકૃત વિવરણ નહિ હોવાથી આ ચતુઃશ્લોકી ઉપર આચાર્યચરણોએ સ્વવિવૃતિ કરી ષષ્ઠસ્કંધના સારરૂપ પોષણલીલાનું અને પુરુષાર્થચતુષ્ટયનું સ્વરૂપ દર્શાવ્યું. આ ચતુઃશ્લોકીના ચાર શ્લોકો પૈકી પ્રથમ ત્રણ ઉપર શ્રીપ્રભુચરણનું વિવરણ છે, અને ચતુર્થ શ્લોક ઉપર શ્રીઆચાર્યચરણનું વિવરણ છે પરંતુ ચારે શ્લોકનું વિવરણ શ્રીપ્રભુચરણે સ્વનામથી જ પ્રકટ કર્યું છે.

સામ્પ્રદાયિકગ્રન્થોદ્ધારણપ્રયત્નાત્મા શ્રીરણછોડલાલજી મહારાજે પોરબંદરમાં નિજપિતૃચરણસરણ્યનુસાર વૈષ્ણવોને સાંજરે નિયમિત રીતે આ વૃત્રચતુઃશ્લોકી ટીકાસહિત ઉપદેશી. તેના શ્રવણથી ઉત્સુક વૈષ્ણવોએ મુદ્રણ કરાવાની વિનંતિ કરતાં આપે તેને યાવત્પ્રાપ્ય ટીકા સહિત મુદ્રણ કરવાની આજ્ઞા કરી. અને તે "શ્રી જીવનાચાર્ય પુષ્ટિસિદ્ધાંતકાર્યાલય" તરફથી અમે છપાવી પ્રકટ કરીએ છીએ. આ વિવરણ ગ્રન્થ ઉપર શ્રીહરિરાયજી, શ્રીવલ્લભજી, શ્રીપુરુષોત્તમજી, આ ત્રણ આચાર્યોની ટીકા ઉપલબ્ધ છે. આ ત્રણમાં શ્રીપુરુષોત્તમજીની ટીકા પુષ્ટિભક્તિસુધામાં પ્રકટી છે. અને તેનો અનુવાદ પણ શ્રીછગનલાલ શાસ્ત્રીજીએ પ્રકટ કર્યાનું સંભળાય છે. પરન્તુ શ્રીહરિરાયજી અને શ્રીવલ્લભજીની ટીકા મુદ્રિત થઇ નથી. શ્રીપુરુષોત્તમજીની ટીકાનો અનુવાદ તો જાણે યથાકથંચિત્ કોઇને પ્રાપ્ય છે, તેથી અત્રે શ્રીહરિરાયજીની ટીકાનો અનુવાદ મુક્યો છે. મુદ્રણની શુદ્ધતા અને ભાષાન્તરની સરલતા માટે અમારાથી બનતો પ્રયત્ન અને પુરતું ધ્યાન આપ્યું છે છતાં જીવગતદોષથી અથવા પ્રેસના અનવધાનથી અશુદ્ધિ દૃષ્ટિપથમાં આવે તો તેની ક્ષમા પ્રાર્થીએ છીએ. શુદ્ધમુદ્રણ માટે નીચે પ્રમાણે ટીકાઓની પ્રતિઓ મેળવી હતી. અને તે ટીકાની પ્રતો અર્પનારનો પરમ ઉપકાર સર્વથા સર્વદા અવિસ્મરણીય છે અને તેવી જ રીતે "શ્રીજીવનાચાર્યપુષ્ટિસિદ્ધાન્તકાર્યાલય" તરફથી ઉત્તરોત્તર પ્રકટ થતાં પુસ્તકો માટે પુસ્તક પ્રદાનથી સાહાય્ય કરી ઉપકૃત કરશે. એવી આશા રાખીએ છીએ.

ભાષાન્તરની સરલતા માટે કૃષ્ણદાસ અને વલ્લભદાસનો સંવાદ યોજ્યો છે. જેમાં પ્રશ્નકર્ત્તા કૃષ્ણદાસ છે અને સિદ્ધાન્ત કહેનાર વલ્લભદાસ છે.

નીચે પ્રમાણે પ્રતિઓથી આ પુસ્તકની શુદ્ધિ કરી છે.

(૧) ચતુઃશ્લોકી ઉપર શ્રીગુસાંઇજીની ટીકાઃ—

(૨) આ ટીકાની બે પ્રતિઓ શ્રીજીવનાચાર્યજીના સરસ્વતી ભંડારમાંથી ઉપલબ્ધ થઈ હતી.

(૨) બૃહન્મંદિરાધીશ્વર શ્રીગોકુલનાથચરણોએ પણ આ ટીકાની બે પ્રતિનું દાન કર્યું હતું.

(૧) મોહમયીસ્થ શ્રીલાલબાવાના મંદિરના મહારાજશ્રી શ્રીરણછોડલાલજીના સંગ્રહમાંથી આ ટીકાની એક પ્રતિ મળી હતી.

(૧) પુષ્ટિભક્તિસુધામાં પ્રકટ થયેલી ટીકાનો પણ એક પ્રતિ તરીકે ઉપયોગ કર્યો હતો.

(૨) શ્રીપુરુષોત્તમજીનો પ્રકાશઃ—

(૧) નિત્યલીલાસ્થ ગોસ્વામી શ્રીજીવનાચાર્યશ્રીના સંગ્રહમાંથી એક પ્રતિ ઉપલબ્ધ થઈ હતી.

(૨) પુષ્ટિભક્તિસુધામાં પ્રકટ થયેલ બીજી પ્રતિ તરીકે હતી.

(૩) શ્રીહરિરાયજીની ટિપ્પણીઃ—

(૧) એક પ્રતિ ગોસ્વામી શ્રીજીવનાચાર્યશ્રીના સંગ્રહમાંથી પ્રાપ્ત થઈ હતી.

(૨) બીજી ગોસ્વામી શ્રીગોકુલનાથજી મહારાજશ્રીએ સ્વસંગ્રહમાંથી આપી હતી.

(૩) ગોસ્વામી શ્રીરણછોડલાલજી મહારાજશ્રીના સંગ્રહમાંની હતી.

(૪) શ્રીવલ્લભજીની ટિપ્પણીઃ—

(૧) ગોસ્વામિ શ્રીગોકુલનાથજી મહારાજશ્રીના સંગ્રહમાંથી.

(૨) મોહમયીસ્થ શ્રીદાઉજી મંદિરવાલા શ્રીદ્વારકેશલાલમહારાજશ્રીના સંગ્રહમાંથી.

આ પ્રમાણે શ્રીગુસાંઇજીની ટીકા છ પ્રતિઓથી શ્રીપુરુષોત્તમજીનો પ્રકાશ બે પ્રતિઓથી શ્રીહરિરાયજીની ટિપ્પણી ત્રણ પ્રતિઓથી શ્રીવલ્લભજીની ટિપ્પણી બે પ્રતિઓથી શુદ્ધ કરી છે.

શ્રીગોકુલનાથજી મહારાજ પાસે જ્યારે અમો પુસ્તકો લેવા માટે ગયા ત્યારે "શ્રીજીવનલાલજી મહારાજ સાથે તો અમારે પરસ્પર પુસ્તકપ્રદાનનો વ્યવહાર જ છે." આવા ઉત્તમ વ્યવહારનું સ્મરણ કરાવી સહર્ષ જે ગ્રંથમુદ્રણમાં ગ્રંથપ્રદાનથી સહાય આપવાનું આપે સ્વીકાર્યું એ આપનો વિદ્યાનુરાગ અમને ઉપકાર મનાવે છે.

ભગવદ્ધર્મપરાયણ મગનલાલ શાસ્ત્રીજીએ તેમજ શુદ્ધાદ્વૈતભૂષણ પંડિત શ્રીરમાનાથ શાસ્ત્રીજી તથા પંડિત શ્રીબણુનંદજીએ પણ અમોને સમયોચિત સૂચના કરી ઉપકૃત કર્યા છે.

આ સ્વલ્પ પ્રયાસ અમો શ્રીજીનેશાચાર્યના ચરણકમલમાં સવિનય અર્પીએ છીએ.

શાસ્ત્રી ચીમનલાલ હરિશંકર
સાહિ..

શાસ્ત્રી હરિકૃષ્ણ વિરજીભાઈ
શુદ્ધાદ્વૈતવિશારદ.

ગુર્જરાનુવાદમાં વિષયાનુક્રમણિકા.

॥ श्रीनवनीतप्रियो जयति ॥

॥ श्रीकृष्णाय नमः ॥

॥ श्रीगोपीजनवल्लभाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

महानुभावश्रीहरिरायचरणानां श्रीवल्लभानाथ टिप्पणीभ्यां समलङ्कृता, श्रीपुरुषोत्तमचरणविरचितप्रकाशेन विशदीकृता, श्रीमद्विट्ठलेशप्रभुचरणनिर्मिता

॥ श्रीवृत्रासुरचतुःश्लोकीविवृतिः ॥

ननु पुरुषार्थाश्चत्वारस्तत्र त्रिवर्गविघातं भगवानेव करोति मोक्षस्तु भक्तानामेव नापेक्षित इति भक्तिमार्गे न कोपि पुरुषार्थः सिद्ध्यतीत्याशङ्क्य भक्तिमार्गीयं तच्चतुष्टयं भिन्नमेवेत्याह–चतुर्भिः,

पूर्वमिन्द्रं प्रति प्राह ततो भक्त्याग्रतो हरिम् ।
दृष्ट्वा तत् प्रार्थयामास पुष्टिदृष्टफला यतः ॥ १ ॥
आद्ये तु पुष्टिमार्गीयो धर्मः स्मरणकीर्तने ।
सेवा चेति त्रयं तेन प्रार्थितः स निरूप्यते ॥ २ ॥
आत्मनश्चाधिकारित्वमुत्तमं दीनभावतः ।
प्रार्थनीयतया तस्य साधनं च कृपोच्यते ॥ ३ ॥

धर्मं प्रार्थयन् प्रथममधिकारित्वं स्वस्य निरूपयति, अहमिति,

**अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः ।
मनः स्मरेतासुपतेर्गुणानां गृणीत वाक् कर्म करोतु कायः ॥ १ ॥**

हे हरे, अहं तव पादैकमूलदासानुदासो भवितास्मि भविष्यामीत्यर्थः । ननु सर्वस्यापि दुःखात्यन्ताभावोपेक्षितः स च मोक्षं विना न भवतीति किं दास्येनेत्यत आह–हरे इति, अत्रायं भावः, दास्ये हि त्वमेव दासानां त्रिविधमपि दुःखमपनयसि, मोक्षे तु ज्ञानं, तच्च तव धर्मस्तेन धर्मापेक्षया धर्म्याश्रयणमेव युक्तं, किञ्च मोक्षे दुःखनिवृत्तावपि प्रभुकृपया मम दुःखं गतमतोहं सुखेन वर्त इति भावस्तु दुर्लभ एव, भेदाभावात्,

दास्ये तु न तथेत्याशयेनास्मच्छब्देन भेदमुपपादयति–अहमिति। ननु दास्यं कथं सेत्स्यतीत्यत आह–तवेति त्वदीयोऽहमित्यर्थः तेनावयोः सेव्यसेवकभावः सहज इति सूचितम्, अन्यथा त्रिवर्गविघातमसुरत्वेपि सति कथं कुर्याः, ततो मोक्षे चानधिकार उक्तः, एवं चेत् कथं दास्यं न करोषीत्यत आह–भवितेति, जीवस्य त्वदीयत्वेपि देहस्यासुरत्वेनायोग्यत्वाद्देहान्तरे दासो भविष्यामीत्यर्थः, अतस्त्वदनुग्रहेणैव तथा भवितेत्यत्र विश्वासमाह–अस्मीति। साक्षात्प्रभुदास्ये हि स्वस्य दीनभावो गच्छतीति परम्परादासत्वमुक्तं, यद्वा, प्रभुदास्ये हि स्वस्य सर्वोत्तमत्वाभिमानेन भक्तान्तरे अपराधसम्भवात् प्रभुदास्यादपि भ्रंशो भवेत्तचानुभूतं चित्रकेतुदशायाम्, अतः परम्परादासत्वेन दैन्यमेवोचितमिति भावः।

अथवा तवेत्यादिपदसमुदायेन मोक्षादिक्रमेण वक्ष्यमाणपुरुषार्थचतुष्टयेप्यधिकाररूपं चतुर्विधं दास्यमुच्यते, तत्र पुष्टिमार्गे मोक्षो हि भजनानन्दानुभवः, स च देहेन्द्रियप्राणान्तःकरणयुक्तानामेव, 'अक्षण्वतां फलमिदं न परं विदाम' इत्यत्र श्रुतिप्रतिपादितः, तत्र चाधिकाररूपं प्रभुदास्यं 'भवाम दास्यः' 'पुरुषभूषण देहि दास्य'मिति श्रुतिवाक्यादतस्तवेति पदान्मोक्षाधिकाररूपं प्रभुदास्यमुक्तमतस्तवेत्यसमासः, अन्यथा त्वत्पादेति वदेत्, तव पादावेवैकं मूलं येषां ते तथा, अर्थाद्व्रजस्थितभक्ता एव, 'तेङ्घ्रिमूलं प्राप्ता' इति तेषामेवोक्तेः, तेन कामाधिकाररूपं तद्दासत्वमुक्तमन्यथा कामासिद्धेः, अत एवोक्तमाचार्यचरणैः 'तद्द्वारा पुरुषाणां च भविष्यति न चान्यथे'ति। अनुपदेन तद्दासदासत्वमर्थाधिकाररूपमुक्तम्, ततस्तव दासत्वं धर्माधिकाररूपमुक्तम्।

ननु सत्सङ्गाभावेप्येवम्भावस्तव कथं जात इत्यत आह–भूय इति, पूर्वमहं चित्रकेतुर्दास एव स्थितोऽतः पुनरपि तथा वितेति भावः। एवं स्वस्याधिकारचतुष्टयं प्रतिपाद्य तरतमभावादादौ धर्म प्रार्थयते मनः स्मरेतेति। असुपतेरिति गुणानामिति च कर्मणि षष्ठी, तथा च मनः असुपतिं स्मरेत चिन्तयेत्, स्मरणस्यात्मसुखैकसाधनत्वादात्मनेपदम्। वाक् तस्यैव गुणान् गृणीत कीर्तयेत्, कीर्तनस्यापि मुख्यः स्वार्थ एव परार्थस्त्वानुषङ्गिक इत्यात्मनेपदम्। कायस्तस्यैव कर्म सेवां करोतु, सेवा तु यथा प्रभोः सुखं भवति तथा क्रियते, न तु तत्राणुमात्रमपि स्वार्थपरत्वमतः परस्मैपदम्। स्मरणकीर्तनयोः श्रवणाधीनत्वेनान्यकथनसापेक्षत्वाद्द्विरुक्तः। सेवायां स्नेह एव नियामकः, स च प्रभुकृपैकसाध्य इति तत्राशीर्निरूपिता ॥ १ ॥

(१) भा० १०, २१, ७ (२) भा० १०, २९, ३९ (३) भा० १०, २९, ३८. (४) भा० १०, २९, ३८ (५) भा १० १०, २६, १

एवं मनोवाक्कायभेदेन त्रिविधमपि धर्मं सम्प्रार्थ्यार्थं निरूपयति–न नाकपृष्ठमिति।

न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम्।
न योगसिद्धीरपुनर्भवं वा समञ्जस त्वा विरहय्य काङ्क्षे ॥२॥

लौकिको वैदिकश्चार्थस्त्रिविधः प्राकृतैर्गुणैः।
क्रमेण ते भगवतो गुणैः षड्भिर्निराकृताः ॥ १ ॥
स्वर्गभूमिरसैश्वर्यं सात्त्विकादि तु लौकिकम्।
मोक्षश्च पारमेष्ठ्यं च सिद्धयश्चेति वैदिकम् ॥ २ ॥
प्रवृत्तिधर्मसाध्यत्वात्सामान्यं तत्तु लौकिकम्।
निवृत्तिधर्मसाध्यत्वाद्विशेषाद्वैदिकं परम् ॥ ३ ॥
प्रत्येकमेव ते चार्था न तु सम्भूय कुत्रचित्।
भगवत्यखिलात्मत्वाद्भवन्त्येव तथा हि ते ॥ ४ ॥
अतोऽर्थो भगवानेव पुष्टिमार्गेऽङ्गमन्यतः।
सर्वतो नैरपेक्ष्यं च तथात्र विनिरूप्यते ॥ ५ ॥

आदौ लौकिकसात्त्विकमर्थं निराकरोति–न नाकपृष्ठमिति, नाकः स्वर्गस्तस्य पृष्ठं राजासनम्, इन्द्रासनमितियावत्, तच्च नश्यति कालान्तरे, अतस्त्वय्यखण्डितैश्वर्यस्य विद्यमानत्वात्तन्न काङ्क्षे नेच्छामीत्यर्थः। वैदिकराजसमर्थं निराकरोति–न पारमेष्ठ्यमिति, परमेष्ठी ब्रह्मा, रजोवतारत्वात्तत्स्थानं राजसम्, तत्र च 'ब्रह्मणा सह मुच्यन्ते' इति वाक्यात्पारतन्त्र्येण फलसिद्ध्या स्ववीर्यहानिरेव, त्वयि चाखण्डितवीर्यस्य विद्यमानत्वात्तदपि न काङ्क्षे। लौकिकराजसमर्थं निराकारोति–न सार्वभौममिति, सर्वभूमेरीश्वरत्वे हि सर्वत्र लोके यशो भवति, तच्च दानादिसापेक्षत्वादौपाधिकं सावधिकं च 'तैव्ह्यायसं तीर्थ'मिति वचनात्स्वरूपतोपि दुष्टं 'राज्यान्ते नरकं ध्रुव'मिति वचनादवसानतोपि तथा, त्वयि चानवद्ययशसो विद्यमानत्वात्तदपि न काङ्क्षे। लौकिकतामसमर्थं निराकरोति–न रसाधिपत्यमिति, रसेत्युपलक्षणं तेनाधोलोकाः सर्वे निरूपिताः, तत्र च भूम्यपेक्षया सुखभोगोधिकः स च श्रिया भवति, सा च त्वया बलेरपहृता दत्ता च, त्वयि चानपायिन्याः श्रियो नित्यं विद्यमानत्वात्तदपि न काङ्क्षे। वैदिकतामसमर्थं निराकरोति–न योगसिद्धीरिति, अपक्वयोगिनो हि सिद्धिबलेनापेक्षितविषयान् संसृज्य भोगं कुर्वन्ति तेन योगादपि भ्रष्टा भवन्तीति तेषां ज्ञानं भ्रान्तमेव, त्वयि च नित्याखण्डितज्ञानस्य विद्यमानत्वा-

(१) भा. स्कं. १-९-१०।

त्ता अपि न काङ्क्षे । वैदिकसात्त्विकमर्थं निराकरोति–अपुनर्भवं वेति, 'सत्त्वात् सञ्जायते ज्ञान'मितिवचनाज्ज्ञानस्य सात्त्विकत्वेन तत्साध्यमोक्षस्यापि तथात्वमुच्यते, स च गणितानन्दत्वेन त्वदानन्दांश एव न तु त्वम्, तत्रापि सेव्यसेवकभावेन नान्योन्यं सापेक्षता भेदाभावादतस्तस्यार्थत्वाभावायापुनर्भवपदम्, जन्माभावातिरिक्तविशेषाभावात्, त्वं तु पूर्णानन्दो भक्तसापेक्षश्चेति 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपी'ति वाक्यादतो भक्तातिरिक्तरागाभावेन त्वय्यखण्डितवैराग्यस्य विद्यमानत्वात्तमपि न काङ्क्षे । मर्यादाया मोक्षस्तुरीयपुरुषार्थः स च पुष्टौ हेयत्वेनार्थमध्ये गणित इत्यनादरद्योतनार्थं वेत्युक्तम्, यत्र मोक्षस्याप्यनादरस्तत्रान्येषां किं वाच्यमिति च । तर्हि कोऽर्थस्तवापेक्षित इत्यत आह–समञ्जसेति, हे समञ्जस पूर्णत्वात्सकलार्थरूप, अतस्त्वा त्वां विरहय्य पृथक्कृत्योक्तार्थानहं न काङ्क्षे, किन्तु त्वामेव सर्वार्थरूपत्वादर्थत्वेन काङ्क्षे निरन्तरमिच्छामीत्यर्थः । यद्वा उक्तार्थान्पृथक्कृत्य त्वामेव चार्थत्वेन काङ्क्षे ॥ २ ॥

एवमर्थं निरूप्य कामं निरूपयति–अजातपक्षाइवेति ।

अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः ।
प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविन्दाक्ष दिदृक्षते त्वाम् ॥ ३ ॥

पुष्टिमार्गे हरे रूपदिदृक्षा मनसोऽस्य हि ।
कामो निरूप्यते तत्र दृष्टान्तत्रितयं यथा ॥ १ ॥
द्वितयं लौकिकं प्रोक्तमेकं शास्त्रीयमुत्तमम् ।
लौकिकस्त्रिगुणीभूय दृष्टान्तः स्याद्लौकिके ॥ २ ॥
अन्यथैकतरेणापि सिद्धेऽर्थे त्रितयेन किम् ।
क्षुद्रूपो लौकिकः कामो रसरीत्या तु शास्त्रतः ॥ ३ ॥
प्रभोस्तु रसरूपत्वात्स्वस्यैकत्वेन चोत्तमः ।
अयमेव हि दृष्टान्तस्तेनान्ते चैकतोदिता ॥ ४ ॥

हे अरविन्द ? मनुस्त्वां दिदृक्षत इति सम्बन्धः । नेत्रयोरम्बुजत्वेन तद्दिदृक्षया मनसो मधुपत्वं बोधितम् तथाचारविन्दे विकसिते मधुपस्य कामः सिद्धयति नान्यथेति तथा दृष्टिं मयि संपादयेति प्रार्थितम्, दिदृक्षाहेतुभूतं स्वरूपसौन्दर्यं च संबोधनेन ध्वनितम् । मनसः स्वतन्त्रत्वायास्मच्छब्दप्रयोगाभावः । किञ्च, दिदृक्षा दृशो धर्मः, स च मनसो निरूप्यते, तेन सर्वेन्द्रियाणामपि मनःसंनिकर्षात्पूर्णः कामो निरूपितः, अन्यथा भजनानन्दानुभवो न स्यात्

(१) गीता अ १४, १७ । (२) भा ९-४ ६८ । * अव्युषितमित्यपि पाठः ।

तस्य सर्वेन्द्रियैकवेद्यत्वात्। प्रभोः पूर्णकामत्वेन क्रियाफलस्यात्मगामित्वायात्मनेपदम्। मनसश्चञ्चलत्वान्मधुपत्वबोधनेन च कामान्तरं संभवतीति तदभावाय दृष्टान्तमाह—खगा इवेति, यथा पक्षिणः कदा किमानीय दास्यतीति मातरं द्रष्टुमिच्छन्ति, खगानां नियतभक्ष्याभावादनियतत्वस्य च क्षुधार्ततयार्थसिद्धत्वात्तदत्र नोक्तम्, तदपि न सर्वदा किन्तु कियत्कालपर्यन्तमेवेत्याह—अजातपक्षा इति, पक्षोदयानन्तरं न तथेति तावदेव दृष्टान्ततेत्यर्थः। तथाचात्र क्षुदुपाधिकृतत्वमनियतविषयत्वमनियतकालत्वं चेति दूषणत्रयं संभाव्य द्वितीयं दृष्टान्तमाह—स्तन्यं यथेति। वत्सतरा अतिबालवत्सास्ते यथा कदा स्तन्यं प्राप्स्याम इति तदिच्छन्ति तथेत्यर्थः। तेषां स्तन्यमात्रैककामत्वादत्र तदेव प्रोक्तम्, मातुरभावे तद्बुद्ध्या परस्या अपि स्तन्यं पिबन्तीति तदनुक्तिः। अत्रापि नियतविषयत्वेपि वत्सतरपदादनियतकालत्वं क्षुदुपाधिकृतत्वं चेतिदूषणद्वयं संभाव्य तृतीयं दृष्टान्तमाह—प्रियं प्रियेवेति, प्रियपदादुभयत्र निरुपाधिकस्नेहो निरूपितः, स्नेहस्य तथात्वं तदभिज्ञेनोक्तं 'आविर्भावदिने न येन गणितो हेतुस्तनीयानपी'ति, तेनोपाधिदूषणमत्र परिहृतम्, व्युषितमिति प्रवासिनमित्यर्थः, तेन गमनक्षणमारभ्यागमनावधि दिदृक्षाया एकरसत्वादनियतकालत्वं चापास्तम्। विषण्णेतिपदादनियतविषयत्वं च, अन्यथा विषादासम्भवात्, एवं दोषत्रयाभावादयमेव दृष्टान्तो युक्त इत्याशयेन स्वस्यैकत्वादत्राप्येकवचनमुक्तमन्यथा पूर्ववदत्रापि बहुवचनं वदेत्, बहुषु तथात्वस्यासंभवात्, अत एवान्ते च निरूपणं कृतम्, पूर्वोक्तद्वयमेकदेशाभिप्रायेणेति तत्कथनमपि नानुपपन्नम्। किञ्च, प्रिया हि विप्रयोगे केवलं विषादमात्रं न करोति किन्तु, प्रिये विविधरसभावानन्तःप्रकटयति, प्रकारान्तरेण जीवनमेव न स्यात्, जाते च जीवने प्रियत्वं तु बाधितं स्यात्। स्वस्य पुरुषत्वेन स्त्रीदृष्टान्तान्यथानुपपत्त्या च तज्जातीयरसभाव उक्तः, अतो रसस्यातिगोप्यत्वादयं भावः प्रियापदेनाभिव्यज्यते, विषादस्य तु बहिरप्यनुभूयमानत्वादन्यज्ञानविषयत्वाच्च तथाविशेषणम्, एवमनेकरसभावविशिष्टं विषण्णं च मनस्त्वां दिदृक्षते, न तु दर्शनमात्रमिच्छति, तत्तु पूर्वमर्थत्वेन काङ्क्षितत्वादत्रानुपपन्नं विशेषाभावात्, अन्यच्च, अस्मच्छब्दप्रयोगो हि देहाध्यासकृतो भवति साम्प्रतं तु रसानुभवयोग्यदेहाभावाद्वृत्रशरीरस्य च तत्प्रतिबन्धकत्वादध्यासाभावान्मन एवोक्तं न तु ममेति। दृष्टान्ते च तदध्यासस्य दृढत्वात्प्रियेति निरूपितं न तु मनः, अन्यथा प्रियेवाहं दिदृक्षे इति दृष्टान्तसाधर्म्ये वक्तव्ये मनो दिदृक्षत इति न वदेत्, अतो रसमार्गीयः कामो रसदृष्ट्यैव पूरणीय इति तथा सम्बोधनेन प्रार्थितम् ॥ ३ ॥

---

१ तिष्ठेतेति गपुस्तके पाठः। * अज्ञानविषयत्वादपीति पाठः।

एवं कामं निरूप्य मोक्षं निरूपयति—ममोत्तमेति,

ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः ।
त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् ॥ ४ ॥

पुष्टिमार्गे हरेर्दास्यं धर्मोर्थो हरिरेव हि ।
कामो हरेर्दिदृक्षैव मोक्षः कृष्णस्य चेद् ध्रुवम् ॥ १ ॥

पुष्टिमार्गे* मोक्षो निरूप्यते,

श्रीमद्वल्लभाधीशमहाप्रभुचरणकमलरेणुभ्यो नमः ॥

अथ श्रीहरिरायचरणविरचिता टिप्पणी ।

श्रीवल्लभाचार्यपदः स्वीयसर्वार्थसम्पदः ॥
प्रणमामि तदुक्तार्थबोधनाय मुहुर्मुहुः ॥ १ ॥

[१] अथ श्रीवल्लभाचार्यचरणाः पुष्टिमार्गे धर्मार्थकामानां पूर्वपद्येषु स्पष्टत्वमवगम्यमानत्वान्मोक्षमात्रस्य सन्दिग्धत्वादतिविलक्षणत्वाच्च तन्निरूपयन्ति—पुष्टिमार्ग इति, पुष्टिर्हि प्रभोरनुग्रहः स च फलदानेच्छा, सापि द्विधा, केवला विशिष्टा च, तत्र केवला निःप्रकारा, साधनं प्रकारस्तद्रहिता, विशिष्टाससाधना सैव फलप्राप्त्युपायतया मार्ग इत्यर्थः । तत्र **मोक्षो निरूप्यत** इत्यर्थः ।

अथ श्रीपुष्टिमार्गीयमुक्तिविवृतिप्रकाशः ।

दशदिगन्तविजयि–श्रीपुरुषोत्तमपाद–प्रणीतः ।

श्रीकृष्णाय नमः

प्रणम्य श्रीमदाचार्यचरणाँस्तत्कृपाबलात् ।
तदीयां पुष्टिमार्गीयमोक्षोक्तिं विवृणोत्ययम् ॥ १ ॥

[१] अथ श्रीमदाचार्यचरणाः पुष्टिप्रवाहमर्यादायां पुष्टेर्मार्गत्वस्य विवृतत्वेन तत्र पुमर्थानामवश्यवक्तव्यत्वात् पुष्टेः षष्ठस्कन्धार्थत्वेन तत्र सपरिकरायास्तस्या निरूपितत्वात् तत्रत्यैर्वाक्यैरेव तान्विवरिषवः पूर्ववाक्येषु धर्मार्थकामानां स्पष्टत्वात्तुरीयस्य चास्पष्टत्वात्तन्निरूपणं प्रतिजानते—**पुष्टिमार्गे मोक्षो निरूप्यत** इति,† "पोषणं तदनुग्रह" इतिलक्षणवाक्यात्पुष्टिरनुग्रहः, स च धर्मान्तरमिति भक्तिहेतुनिर्णये स्थितम्, स एव फलसाधनत्वान्मार्गः । तत्र मोक्षो (भा० २, १०, ६.) "मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिरि"तिवाक्योक्तलक्षणकमन्यथारूपत्यागपूर्वकं स्वरूपेणावस्थानम् । निरूप्यते इतरवैलक्षण्येन ज्ञाप्यत इत्यर्थः ।

---

१. इयं चतुर्थश्लोकविवृतिः श्रीमदाचार्यचरणानामेवेति तट्टिकात्रयेणावगम्यते दृश्यते चैतत्प्रमापत्रे पेद्रुगुहपो ग पुस्तके । * पुष्टिमार्गीय इत्यपि पाठः । † भा. २, १०, ४.

तत्र स्थितौ बन्धो नामाहन्ताममतास्पदेष्वासक्तिस्तदन्येषु सङ्गश्च, तस्य सहेतुकस्याभावो मोक्षश्च, पुष्टिस्तु तद्विपरीता, तत्र व्यवस्थया मोक्षद्वयमाह—**ममोत्तमेति** ।

टिप्पणी—[२] अत पर पुष्टिमार्गे बन्धमोक्षाभ्या वैलक्षण्य निरूपयन्ति तत्र स्थिताविति, तत्र स्थितौ पुष्टिमर्यादाया बन्धोऽहन्ताममतास्पदेषु पुत्रदारगृहधनादिषु आसक्तिः सर्वात्मना तन्निष्ठमनोवृत्ति, तदन्येष्वासक्तिविषयान्येषूदासीनेषु सङ्गश्च तस्य बन्धस्य सहेतुकस्य तदुत्पादककारणकलापसहितस्य योऽभावः स मोक्ष इत्यर्थ । पुष्टौ तद्वैपरीत्यमाहु—पुष्टिस्त्विति, पुष्टिः पुष्टिमार्गस्ताभ्या बन्धमोक्षाभ्या विपरीता, पुष्टिमार्गे बन्धो हि पुत्रादिष्वासक्तिविषयेषु भगवदीयत्वेनानासक्तिरुदासीनेषु भक्तेष्वसङ्गश्च, तदभावो मोक्ष । भगवदीयेषु पुत्रादिष्वासक्तिर्भगवद्भक्तसख्य च मोक्ष इति वैपरीत्यमित्यर्थ ।

प्रकाशः—[२] ननु "प्रसङ्गमजरं पाशमात्मनः कवयो विदुरि"ति (भा० ३, २५, २०) "स्नेहपाशैर्निबध्नाति भवान्सर्वमिदञ्जगदि"त्यादिवाक्यैर्बन्धस्य स्पष्टत्वेन तदभावरूपमोक्षस्यापि तथात्वात्तस्य च मार्गमात्रतुल्यत्वादपार्थोय प्रयास इति शङ्कायामाहु—तत्रेत्यादि, मोक्षस्येतरवैलक्षण्येन ज्ञाप्यतया वैलक्षण्यप्रतियोगिनोऽवश्यवक्तव्यत्वे, स्थितौ उपादेयतया प्रतियोगिभूतायाम्, बन्धः ससारकारणभूत उक्तविध, तस्य सहेतुकस्य "तत्र सत्वं निर्मलत्वादि"त्यादिगीतावाक्यात्तद्धेतवो गुणास्तत्सहितस्य बन्धस्याभावो ध्वसादिर्मोक्षः। पुष्टिः पुष्टिसरणी, तद्विपरीता विरुद्धलक्षणा, तथा च तत्र ससारास्पदेषु प्रसङ्गासक्ती मोक्षस्तदभावश्च बन्ध इत्यर्थ । तत्र मोक्षस्तु अत्र स्फुटिष्यति, बन्धस्तु तृतीयस्कन्धनवमाध्याये ब्रह्मस्तुतौ "अन्ह्यापृतार्त्तकरणा" इत्यस्य सुबोधिन्या व्युत्पादित । ये पूर्वजन्मनि ब्रह्मात्मभावचिन्तनपरा स्तेभ्य. स्वोक्तनिवृत्तिमार्गकरणाद्भगवान्प्रसन्नो भूत्वा सत्यादिलोकेष्विह वा किञ्चित्प्रसाद प्रयच्छति तदा नेदमस्माकमपेक्षितमिति ततो विमुखा ब्रह्मात्मभावचिन्तनेनैव "प्राप्तदेहावसानाश्च"तिश्लोकोक्तरीत्यैव सञ्चरन्तीति स्वमुक्तत्वाभिमानेन भगवद्दत्तप्रसादागृहाणा ऋषीणामप्येव भाव इति ।

श्रीकृष्णाय नम

अथ श्रीमद्वल्लभानामियं टिप्पणी ।

ममोत्तमेतिश्लोकविवरणे तत्रेति मोक्षविषये इत्यर्थ, स्थिताविति मर्यादामार्ग इत्यर्थ । पुष्टिमोक्षभेदबोधकतया प्राक्तन्निरूपणस्यावश्यकत्वात् । तद्विपरीतेति, स्वरूपत साधनत फलतश्चेत्यर्थ । स्वरूप कृपया नि साधनाङ्गीकार., साधन गृहस्थितिपूर्वक भजनम्, फल साक्षाद्भजनानन्दानुभव । अत एव फलप्रकरणे प्रमाणनिष्ठात्यागन तदनुभव, नो चेत् द्विजदारवत्तन्निष्ठायां गृहगमनमेव स्यात् । तत्र व्यवस्थयेति, पुष्टिमार्गे व्यवस्थयेत्यर्थ ।

१ गीता १४, ६

मोक्षो हि द्विविधः, पुष्टिमर्यादया पुष्टिपुष्ट्या च। † (मर्यादायां ज्ञानेनैव मुक्तिः, पुष्टौ च ज्ञानेन भक्त्या वा मुक्तिः) भगवत्पारोक्ष्यापारोक्ष्याभ्यां व्यवस्था, प्रत्यक्षेपि भगवति

टिप्पणी—[३] अथ पुष्टेः शुद्धमिश्रभेदेन द्विविधाया मोक्षैक्यस्य बाधितत्वाद्व्यवस्थया तद्द्वयमाहुः–**तत्रेति**, पुष्टिमार्गे व्यवस्थयैकेन पद्येनार्द्धाभ्यां मार्गभेदेन मोक्षद्वयमाहेत्यर्थः। **ममोत्तमेति मोक्षो हि द्विविध इति**, कर्मभिः संसारचक्रे भ्रमणेन भगवदीयत्वप्रकारेण पुत्राद्या सत्तया, चोत्तमश्लोकजनसख्यं मोक्ष इति द्विविध इत्यर्थः। उपायद्वैविध्यमाहुः–**पुष्टिमर्यादयेति**, पुष्टिमर्यादा ह्यनुग्रहे साधनसाहित्यम्। पुष्टिपुष्टिश्च तत्र तद्राहित्यमिति भेदः।

[४] ननु प्रकारभेदेपि तत्सख्यस्यैकरूपतायां कथं व्यवस्थया द्वैविध्यमित्याशङ्क्याहुः–**भगवत्पारोक्ष्येति**, पुष्टिमर्यादामोक्षरूपसख्ये भगवत्पारोक्ष्यं शास्त्रार्थतया गुणगानकर्तृशुकादिसख्ये तथात्वस्य स्पष्टत्वात्। अत एव * " **मथुराया व्रजङ्गता** " इत्यादिषु परोक्षेणैव कथनम्। पुष्टिपुष्टौ तु गुणगानविषयलीलाविशिष्टप्रभोरपारोक्ष्यम्, ‡ " **नन्दसूनुरय**"मित्यादिषु तथाके-स्त्वन्माययेत्याभिमुख्योक्तेश्च स्पष्ट एव व्यवस्थया भेद इत्यर्थः।

प्रकाशः—[३] ननु मार्गैक्ये साधनस्य समानतया वैजात्याभावात्फले कथं भेद इत्यत आहुः–तत्रेत्यादि, तथा च मार्गे अवान्तरभेदान्मोक्षभेद इत्यर्थः।

[४] ननु किंनिबन्धनो भेदः, कथं च मोक्षभेद इत्यत आहुः–**मोक्षे** हीत्यादि। वेदोक्ताः कर्मज्ञानभक्तयो मर्यादेति पुष्टिप्रवाहमर्यादायां स्थितम्, तेष्वत्र प्रकरणवशाद्विहितज्ञानभक्ती ग्राह्ये, योगोपासनादिग्रहणे त्रयो वा, तथा च तया ताभ्यां तैर्वा मिश्रितोऽनुग्रहः पुष्टिमर्यादा, तयैकः। अनुग्रहान्तरेण मिश्रितोऽनुग्रहः पुष्टिपुष्टिस्तयेतर इति भेदनिबन्धकमुक्तम्। स्वरूपभेदकमाहुः–**भगवदित्यादि**, तथा चाद्यया भगवतः परोक्षानुभवः, इतरया च प्रत्यक्षानुभवः, इति ताभ्यां कृत्वा भक्तरूपावस्थितिरूपमोक्षस्यापि स्वरूपभेद इत्यर्थः।

[५] एवं श्लोकार्थं सङ्गृह्य पूर्वस्य गुणभावं स्पष्टयितुं पूर्वार्द्धस्थपदानि विवृण्वन्तः पूर्वश्लोकेषु हरेसमञ्जसारविन्दाक्षपदैः संबोधनेन भगवत्प्रत्यक्षतायाः स्पष्टत्वादत्रापि संबुद्धिः संभाव्यते, तथा सति हे उत्तमश्लोक? उक्तविधस्य मम जनेषु सख्यं न भूयादिति जननादिधर्मवत्सख्याभावप्रार्थनं श्लोकार्थो भवति, स चाऽपुनर्भवपर्यन्तमनाकाङ्क्षतो मनसा भगवन्तं दिदृक्षतश्च प्रतिबन्धकनिरासस्य प्रागेव जातत्वात्तादृशां सख्याभावे स्यादेव निरस्त इति न युज्यतेऽतः समासमादृत्यान्य एवार्थो वक्तुमुचित इत्याशयेनाहुः–**प्रत्यक्षेपीत्यादि**, अप्रत्यक्षत्वादिनापि सम्बो-

श्रीवल्लभटि०—ननु एकस्मिन्नेव मार्गे कथं व्यवस्थाभेदः? तत्राहुः–भगवत्पारोक्ष्येति, पुष्टिमर्यादास्थाः परस्परं गुणसमाजनेनान्तःप्रकटेनैव भगवता पूर्णतां मन्वानाः लोकोपकारिणः शुकादय इवात्मारामा रमन्ते। शुद्धपुष्टिमार्गीयास्तु साक्षाद्बहिःसंबन्धमन्तरा नैतावतैव पूर्णतां मन्यत इति एतत्कृतो व्यवस्थाभेदः। अत एव फलप्रकरणे भगवद्भावसम्पत्त्या गुणगानेन च न तापशान्तिः, पश्चादाविर्भूते एव तस्मिंस्तच्छान्तिः।
ननु पुष्टिमर्यादास्थाः कदाचित्प्रत्यक्षे भगवति प्रमाणनिष्ठां परित्यज्य तमेव गृह्णीयुस्तदा कथं

† इयं पङ्क्तिर्नहि कैश्चिदपि टीकाकारैर्व्याख्याता तथा " घ " " च " पुस्तकयोरपि नोपलभ्यते।
* भा० १०, ६, ३१ ‡ भा. १०, ३९ ४.

शास्त्रार्थत्वाय उत्तमश्लोकजनेष्विति समासः। भक्तसंवलित एव भगवांस्तद्द्वारा फलं द-

---

टिप्पणी—[९] नन्वस्ति भगवान् शास्त्रार्थे "[1]वेदैश्च सर्वै"रितिस्मृते "त त्वौपनिषदं पुरुषमिति"श्रुते "सर्ववेदान्तप्रत्ययमि"ति न्यायाच्चातस्तत्प्राप्त्यर्थं तज्ज्ञानार्थं च तथाप्रतिपादकभक्तसख्यापेक्षा इति तदुपायापेक्षा। तत्र परोक्षे भगवति गुणगाने भक्तवाक्यप्रतिपाद्यतया तदपेक्षा। प्रत्यक्षे वचसा गौणतया न शास्त्रार्थता, साक्षादनुभूयमानत्वादिति तैदुत्तर तैदुपायरूपभक्ता नापेक्षन्त इति तदा किमिति तत्सख्यप्रार्थनमित्याशङ्क्याहु—प्रत्यक्षेपीति।

उत्तमश्लोकजनेष्वितिसमासेनैकार्थनाबोधकेन प्रभोर्भक्ताना च परस्पर सापेक्षता सूचिता। तथा च भक्ताना प्रभुसंवलितत्वमेव तत्सापेक्षत्व, प्रभोश्च तद्द्वारैव फलदातृत्वमिति सापेक्षत्वात्प्रत्यक्षेपि प्रभौ भक्तापेक्षासत्त्वान्न भक्तप्रतिपाद्यतारूपशास्त्रार्थत्वव्याहतिरित्यर्थ। एतेन प्रभुस्वरूपमनुभूयमानमपि भक्तनिरूपितमेव विदित भवतीति भाव।

प्रकाशः—

धनानुरोधेन बौद्धसन्निधानस्य "[4]अहं समाधाय मनो यथाह सङ्कर्षणस्तच्चरणारविन्द" इतिवाक्यात्पूर्वसर्वस्मरणस्य चावश्यवाच्यत्वात्तस्यैकान्तभक्तत्वमवश्य वाच्यम्, तथा तादृशस्या सुत्यागावसरे भीष्ममुक्ताविव भगवदनुकम्पा, तया दर्शनदान चावश्य मन्तव्यम्, तथा सति कानुपपत्ति प्रत्यक्षे ? तस्मादुक्त प्रत्यक्ष इति। एव यद्यपि भगवान्प्रत्यक्ष इति मम त्वदीयेषु जनेष्विति वक्तव्यम्, तथापि यदेवमुक्त तेन उत्तमैर्यथार्थशास्त्रार्थविद्भि श्लोक्यते कीर्त्यत इत्युत्तमश्लोकः। उत्तमा परापरविद्यागोचरा वा श्लोका कीर्तिर्यस्य स तथा। तस्य ये जना, "न कर्मबन्धन जन्म वैष्णवाना च विद्यते, विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिण"इति पाद्यात्तादृशजन्मयुक्तास्तेष्विति य समास स शास्त्रार्थत्वाय, भगवत शास्त्रार्थरूपत्व ज्ञापयितुमित्यर्थ। अत्र "क्रियार्थोपपदस्य च कर्मणि स्थानिन" इत्यनेन तुमुन प्रयोगे चतुर्थी। फलेभ्यो यातीतिवत्।

ननु शास्त्रार्थत्वमुत्तमश्लोकपदीयसमासेनैव प्राप्यते, न तु पदत्रयसमासेन। तथा च तादृशत्वेन सम्बोध्य प्रतिबन्धकाभावप्रार्थन सत्सङ्गादौ पर्यवसास्यतीति कथ सम्पूर्णस्य तदर्थ इत्यत आहु भक्तेत्यादि। तथा च वैयासकिः स भगवानथ विष्णुरातमि"त्यत्रैव तादृशनत्सङ्गे

श्रीवल्लभटि०—तद्भेदस्तत्राहु—प्रत्यक्षेपीत्यादि। कदाचित्तथात्वपि तेषां शास्त्रार्थत्वमेव। गुणसमाजनरूपेण शास्त्रेणैवार्थ पुरुषार्थो यस्य वै तथा। तद्भावस्तत्त्व तदर्थमित्यर्थ। समासतात्पर्यमाहु—उत्तमेति। उत्तमै शुकादिभि शास्त्रद्वारा श्लोक्यत एव न तु पुष्टिस्थैरिव बहिरनुभूयते। तत्सम्बन्धिनो जना। पयोरुभयोर्भगवतश्च श्लोकितृश्लोक्यभाव एव सम्बन्धो न त्वन्योपि वाक्यत्वया तेषु समासेन पदैकत्ववत्तदैकत्वमपि ज्ञापितमिति तद्वदेव त इत्यर्थ। तादृग्जनेषु सख्यप्रार्थनया तत्सम्मानशीलव्यसनत्वसिद्धौ मुक्तता सिद्धति सख्यस्य मोक्षत्वस्य सिद्धमिति स एव प्रार्थ्यते।

ननु भगवत्सख्यमेव कुतो न प्रार्थ्यते तत्राहु—भक्तसंवलित इति। तादृग्जनसख्यद्वारा वैकुण्ठादौ लक्ष्म्यादिभक्तसंवलित एव फलरूप स भवतीत्येकम्।

---

[1] गीता १५, १०। [2] प्रपञ्चोत्तरम्। [3] प्रपञ्चोपायरूपा [4] भा० ६, ११, २१

दातीति पौरुपसभाजनश्च (" येन्योन्यतो भागवता" इति तृतीयस्कन्धे दर्शनकारणं पौरुपसभाजनमुक्तं) फलम् । भक्तेषु दास्यपर्यन्तस्य साधनत्वात्सख्यं प्रार्थयते।

टिप्पणी—[६] ननु प्रकटे प्रभौ फलरूपे तत्सख्यं क्वोपयुज्यते तस्य तु गुणगानसाधनत्वादतः कथं शास्त्रार्थत्वप्रत्यय इत्यत आहुः—**पौरुपसभाजनश्च फलमिति** । उभयत्रापि पारोक्ष्यापारोक्ष्ययोः पौरुपसभाजनं लीलाभिनन्दनं विषजलाप्ययेत्यादिरूपं तदेव फलं, स्वरूपस्य तु गुणगानावसरमात्रप्राकट्यस्य तद्रूपस्य तदनुभवाधीनानुभवस्य तच्छेपत्वमिति तस्यैव फलतया प्राकट्येपि तद्भक्तसख्योपयोगेन शास्त्रार्थत्वसिद्धिरिति भावः ।

[७] ननु भक्तानामीदृशत्वे तेषु दास्यमप्रार्थयित्वा साम्यसम्पादकं सख्यं कथं प्रार्थितमित्याशङ्क्याहुः—**भक्तेष्विति** । भक्तेषु "[१]मद्भक्तपूजाभ्यधिके"त्यादिना श्रवणमारभ्य दास्यपर्यन्तस्य सर्वस्य सख्यरूपफलसाधनत्वात्फलप्रकरणत्वात् फलरूपं सख्यमेव प्रार्थयत इत्यर्थः ।

प्रकाशः—

तेष्वाविष्टो भगवांस्तद्द्वारा फलतीति पदत्रयसमासमहिम्ना लभ्यते, तदभावे तु केवलेन सम्बोधनेनोदासीनतया सत्सङ्गाक्षेपात्प्रार्थनमसङ्गतं स्यादतः पदत्रयसमास एवादरणीय इत्यर्थः ।

[६] ननु तादृशसत्सङ्गेपि शास्त्रार्थरूपस्य परोक्षेण प्रकाशात्तत्र चानुभवामीति प्रत्ययाभावात्कथं फलतीत्युच्यत इत्यत आहुः-पौरुपेत्यादि । "[२]**नैकात्मतां मे स्पृहयन्ति केचिन्मत्पादसेवाभिरता मदीहाः । येन्योन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौरुपाणी-**"त्यत्र श्रीकपिलदेवैर्भगवदीयानां परस्परासक्तिपूर्वकं भगवत्पौरुपसम्माननरूपं जीवतां साधनमुक्तं, तदपि "[३]**प्रायेण मुनयो राजन्निवृत्ता विधिषेधतः, नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः**" "[४]**परिनिष्ठितोपि नैर्गुण्य उत्तमश्लोकलीलया, गृहीतचेता राजर्षे आख्यानं यदधीतवान्**" "[५]**तदहं तेभिधास्यामि**" "[६]**निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरा-**"त्यादिषु गुणातीतानां स्वरूपावस्थितानां रतिविषयत्वेन च कथनात्फलम् । तथा च तद्दानेन फलतीत्यर्थः । यद्वा चः समुच्चये । तथा च यथा काव्यश्रवणे वर्णनीयस्य परोक्षज्ञानेऽपि विगलितवेद्यान्तर आनन्दो लौकिकानां, तथात्र स्वानन्दवद्गुणांश्च सभाजयन् स तथेत्यर्थः ।

[७] नन्वेतादृशं फलं श्रवणेपि भवति यथा परीक्षितः, तस्यापि "[७]**नातितृप्ये जुषन्युष्मद्वचो हरिकथामृतम्** " "[८]**येन येनावतारेणे**"त्यादीनां गुणसभाजनवाक्यानां दर्शनात् । तत्र च वक्तुरपेक्षया हीनभावस्य स्फुटत्वात् सङ्गममात्रमेव तदर्थं प्रार्थ्यं, सख्ये को विशेष इत्यत आहुः-भक्तेष्वित्यादि । इमानि वाक्यानि सभाजनप्रयोजकानि न तु सभाजनरूपाणि । स्वरूपादि-

श्रीवल्लभटि०—इह तादृशैः सह गुणसभाजने देहधर्मनिर्यापणपूर्वकं ब्रह्मानन्दादप्यधिकविलक्षणरसानुभवो भवतीत्यपरं फलम्, तदप्युक्तं **पौरुपसभाजनञ्च फलमिति** । तेन तत्सख्ये फलद्वयमिति तत्प्रार्थनेत्यर्थः । भगवत्सख्ये तु स एवैकं फलमिति कदाचिदर्जुनवत् (गीता. अ. ११–७–४१) "यच्चावहासार्थमसत्कृतोसी"ति वाक्येनापराधसंभवोपीति न तत्प्रार्थनेति भावः ।

---

१ भा. १०, ३१, ३. २ भा. ११, १९, २१. । ३ भा. ३, २५, ३४. । ४ भा. २, १, ७. । ५ भा. २, १, ९ । ६ भा. २, १, १० । ७ भा. १०, १, ४. । ८ भा. ११. ३. २. । ९ भा. १०, ७, १.

सर्वथा स्वतन्त्रत्वाय स्वनिष्ठभक्तविषयकीर्त्तनम् । गुणसभाजने स्वस्यापि स्वातन्त्र्यार्थं,

---

टिप्पणी—[८] ननु तन्निरूपितसख्यमप्रार्थ्यं मम उत्तमश्लोकजनेष्विति षष्ठीसप्तमीभ्यां निष्ठताविषयताबोधिकाभ्यां कथं स्वनिष्ठतद्विषयकसख्यप्रार्थनमित्यत आहु·—सर्वथा स्वतन्त्रत्वायेति । सख्यस्य भक्तिमार्गीयमोक्षतया स्वातन्त्र्यमुचितं, तत् स्वनिरूपितत्वे तन्निरूपितत्वे वा तस्य व्याहन्येत । अत· स्वनिष्ठभक्तविषयसख्यकीर्त्तनमित्यर्थः[1] । एतेनैतन्मार्गीयमोक्षस्यासाधनसाध्यत्वमुक्तं भवति ।

[९] ननु पौरुषसभाजनं हि फलं तदस्वातन्त्र्ये न भवति, तथा सति श्रवणमेव भवेन्न सभाजनमिति फलप्रतिबन्धकतया न सख्यं मोक्ष· । सभाजनविशिष्टस्यैव तस्य तथात्वादित्यत आहुः—गुणसभाजन इति । गुणानां सभाजने अभिनन्दने स्वस्यापि स्वातन्त्र्यार्थं स्वस्यापि

प्रकाशः—

ज्ञानपूर्वकतदनुवादस्य सभाजनत्वात् । "कलिं सभाजयन्त्यार्या गुणज्ञाः सारभागिन" इत्यादौ तथा दर्शनात् । परीक्षिद्वाक्यानां गुणादिज्ञानार्थत्वात् । अतस्तादृशभावस्य वक्तृप्रोत्सकत्वेन साधनत्वम् । तच्च दास्यपर्यन्तानां तुल्यं, सख्यस्य तु तदीयस्वरूपमानसजनकत्वमिति विशेषात्तत्प्रार्थनमित्यर्थः ।

[८] नन्वभयं विशोकत्वमपारतन्त्र्यं च मोक्षलक्षणं "अभयं वै जनक प्राप्तोसि" "समर्त्यश्चेच्छताभयं," "तरति शोकमात्मवित्" "तदस्य संसृतिर्बन्धः पारतन्त्र्यं च तत्कृतमि"त्यादिवाक्यात् । प्रकृते तु "निवृत्ता विधिषेधत" इत्यनेन "एष ह वा व तपतीति" श्रुत्यर्थस्फुरणात्तेषां भयाभावशोकाभावयोः सत्त्वेपि सख्यस्य ससम्बन्धकत्वेन पारतन्त्र्यान्न मोक्षत्वमित्यत आहुः—सर्वथेत्यादि । तथा च दयाप्रश्रयादिवत् ससंबन्धकत्वेपि स्वधर्मत्वेन तेषु विद्यमानः सख्यरूपो धर्मो मत्सम्बन्धोप्यस्त्वित्याशयेनात्र स्वनिष्ठस्य भक्तविषयस्य सख्यस्य कीर्तनं घृतद्रवत्वनैमित्तिकत्वेपि तस्य विद्यमानतया सर्वथा स्वातन्त्र्यं ज्ञापयितुं, तेन न मोक्षत्वहानिरित्यर्थः ।

[९] ननु सख्यस्य स्वतन्त्रत्वेपि स्वस्य सख्येन श्रोतृत्वे वक्तृपारतन्त्र्यान्मुक्तत्वहानिस्तेषाञ्च जनत्वेनोपान्त्यादिभावविकारदशापत्तौ प्रतियोग्यभावेन सख्यस्याप्यभावे देशकालपरिच्छेदात् सख्यस्य मुक्तित्वहानिरित्यत आहुः—गुणेत्यादि । तथा च बहूनां युगपद्वक्तृत्वासम्भ-

श्रीवल्लभटि०—ननु स्वाधीनत्वात्तादृग्जनदास्यमेव कार्यं तेन गुणसभाजनमपि सेत्स्यतीति किं सख्यप्रार्थनयेत्यत आहुः—सर्वथेति । तद्दास्ये लोकतः स्वातन्त्र्येपि दास्यव्यासङ्गेन तत्सभाजने सर्वथा तन्न स्यादिति तदर्थं स्वस्मिन् विद्यमानस्य लोकविषयसख्यधर्मस्य भक्तविषयक कथनमित्यर्थः ।

ननु गुणसभाजको महान् "मुक्तानामपि सिद्धाना नारायणपरायण. । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुन" इति वाक्यादेक एव भवति । तत्समाजनञ्च तदधीनमतः ततः स्वातन्त्र्यमसभावित तदपि तत्सख्ये सति भवति तादृशेन तदप्यसभाविनमिति किं तत्प्रार्थनयेत्यत आहुः—गुणसभाजने स्वस्यापीत्यादिना । जनेषु इति बहुवचनतात्पर्यं, न हि तादृश एक एव किन्तु

---

१ वा इति पक्षान्तरे सख्यस्य भक्तनिष्ठनिरूपितत्वे सति स्वातन्त्र्यं व्याहन्येत. २ सख्यस्य, ३ भगवत्प्रार्थनेन ।

मुक्तेरपरिच्छेदार्थं बहुचनम् । जनत्वादेव स्वातन्त्र्येण न दोषसंबन्धः। संसारस्य चक्रत्वादेव परिभ्रमणविषयोपार्जनक्लेशाभावः ।

टिप्पणी—
तत्कर्तृतया मुख्यत्वार्थं, मुक्तेः सख्यरूपाया अपरिच्छेदार्थं निरवधित्वाय, उत्तमश्लोकजनेष्विति बहुवचनमित्यर्थः । बहूनां सत्त्वे सत्रयाग इव न कस्यापि स्वातन्त्र्यमस्वातन्त्र्यं च । तथा च तन्मण्डलमध्यपाते स्वस्यापि स्वातन्त्र्यमिति भावः ।

[१०] ननु तेषु दैन्यमेवोचितं न स्वातन्त्र्यं, तथा सति स्वतन्त्रेषु स्वातन्त्र्यस्येश्वर इव दोषजनकत्वादित्याशङ्क्याहुः—जनत्वादेवेति । तेपि जनास्तदिच्छया जननादिधर्मयुक्ताः प्रभ्वधीना अस्वतन्त्रा इति तेषु गुणसभाजनार्थं स्वातन्त्र्ये न दोषसंबन्ध इत्यर्थः ।

[११] ननु भगवद्भक्तेषु सख्यं मोक्षस्ते च दुर्लभा इति क्व तत्संबन्धसंभावना इत्यत आहुः—संसारस्येति । संसारस्य अहंताममतात्मकस्य चक्ररूपतया तत्र स्थितो नैकत्र तिष्ठति परं भ्रमति, यतोहंताममते प्रतिक्षणं नूतने भवतोऽतः परिभ्रमणं विषयो यस्य तद्भक्तसख्यस्य तस्योपार्जनविषयकः क्लेशाभाव इत्यर्थः । चक्रस्थितस्यानायासेन तत्प्राप्तेः ।

प्रकाशः—
बाहुल्येन तेषां श्रोतृत्वस्फोरणात्स्वस्य वक्तृत्वे स्वातन्त्र्यसिद्धया प्रतियोगिबाहुल्येनैकप्रतियोगितिरोधानेपि वैशेषिकप्रतिपन्नसमवायवत्सख्यस्याप्यपरिच्छेदसिद्धया च न स्वस्य मुक्तत्वहानिर्न वा सख्यस्य मुक्तित्वहानिरित्यर्थः ।

[१०] ननु स्वस्य वक्तृत्वेन स्वातन्त्र्ये भक्तावज्ञादोषः सम्बध्येतेत्यत आहुः–जनत्वादित्यादि । तेषां शास्त्रार्थज्ञातृभक्तत्वेपि जननादिधर्मयोगेनास्वतन्त्रत्वबोधनात्तत्र स्वातन्त्र्येण दोषो न सम्बध्यते । यथा ज्ञानिषु सनन्दनस्य, तथेत्यर्थः ।

[११] ननु मोक्षे दुःखासम्भेदस्य सुखावच्छेदकत्वात्प्रकृतमोक्षसुखस्य श्रोतृसापेक्षत्वात्तादृशश्रोतृप्राप्तेर्विचयनसापेक्षत्वात्पौरुषस्य ज्ञानविषयत्वे सभाजनसिद्धेर्ज्ञानस्य च श्रवणेन जायमानस्य वक्त्रधीनत्वाद्वक्तृप्राप्तेरपि विचयनसापेक्षत्वाच्च प्रयासापरया दुःखसम्भेदेन तादृशस्य कथं मोक्षत्वमित्यत आहुः–संसारस्येत्यादि । चक्रे भ्राम्यन् हि तं तं देशं शीघ्रमुपयाति सदृशविसदृशौ संयुनक्ति वियुनक्ति चेति न तत्र तत्सम्पादनप्रयासः । तथा च परिभ्रमणञ्च विषयोपार्जनं च ताभ्यां यः क्लेशस्तदभावोत्र संसारस्य चक्रत्वकथनेन सूचित इति दुःखसम्भेदाभावान्न तत्सख्यस्य मोक्षत्वहानिरित्यर्थः ।

श्रीवल्लभटि०—
बहव इति न ततः स्वातन्त्र्यमसंभावितमिति स्वस्यापि स्वातन्त्र्यार्थमित्यनेनैकं तात्पर्यम् । तत्सख्याधीनं तदिति तत्सख्यमपि नासभावितमिति मुक्तेरपरिच्छेदार्थमित्यनेनापरम् । तदर्थं बहुवचनम् । अन्यथा तेषु बहुत्वं न वदेदित्यर्थः । तेन यथा ते तत्सभाजनेऽन्यापेक्षारहितास्तथा तत्सख्येन तद्गतभूयोधर्मवत्त्वेनाहमपि स्यामित्याशयः । मुक्तेरिति सख्यरूपमुक्तेरित्यर्थः ।

जनत्वादिति । तेषामपि जननधर्मवत्त्वेन तत्साम्ये स्वातन्त्र्येण न तत्संबन्धः । स्वस्मादधिकधर्मवत्त्व एव तत्संभवादित्यर्थः । संसारेत्यत्र । परिभ्रमणेन सख्यविषयतादृग्जनोपार्जनक्लेशाभाव इत्यर्थः ।

क्लेशसाधनपदेन कृपया साधनसंपत्तिश्च सूचिता । योग्यायोग्यदेहानां बहुधाजातत्वादिदानीं तदभावार्थं प्रार्थना । क्लेशे स्वामिनामग्रहणस्य हेतुत्वेनायुक्तत्वात्कर्मपदम् । आवश्यकत्वाय स्वपदम् । निरवधित्वाय बहुवचनम् ।

टिप्पणी—[१२] ननु तथापि भगवद्भक्तसख्ये किं साधनं, न हि ते संसारपरिभ्रमणमात्रेण मिलन्ति तत्सङ्गस्य भवापवर्गसाधनत्वात् "भवापवर्गो भ्रमत"[1] इति वाक्यादित्याशङ्क्याहु:—क्लेशसाधनेति । क्लेशसाधनपदेन परिभ्रमणपदेन कृपया सतां तत्सख्यसाधनसंपत्तिः सिद्धिः सूचितेत्यर्थः । ते हि कर्मभिर्भ्रममाणमवलोक्य सहजकरुणा कृपालवो भवन्ति[2] । सैव च साधनमिति तथेत्यर्थः । एतेन भक्तिमार्गस्य साशस्यापि निःसाधनत्वं द्योतितं, न हि तदीयोंऽशः कोपि साधनैः सिद्ध्यति ।

नन्वेवं सति कथं प्रार्थनेत्याशङ्क्याहु:—योग्यायोग्येति । संसारचक्रभ्रमणेन योग्यायोग्यदेहा बहवो जाता इतीदानीं क्लेशेन स्वधर्ममविचार्यापि तदभावार्थं प्रार्थना, न फलार्थमित्यर्थः ।

[१३] ननु कथं भक्तिमार्गीयस्य वृत्रस्य सख्योपयोगिचक्रभ्रमणहेतुत्वेन कर्म युज्यते इत्यत आहु:—क्लेश इति । स हि भक्तिमार्गीय एवेति भ्रमणरूपे क्लेशे हेतुत्वेन स्वामिनो नामग्रहणमयुक्तमिति हेतुत्वेन कर्मोक्तवानित्यर्थः[3] । ननु तानि कर्माणि त्यक्तव्यानि भ्रमणसाधनत्वादित्यत आहु:—आवश्यकत्वायेति । स्वकृतत्वेनावश्यमोक्तव्यतया कर्माणि न त्यक्तुं शक्यन्त इति भावः । ननु किं बलं कर्मणा स्वसाध्यत्वादित्यत आहु:—निरवधित्वायेति । बहुवचनेन कर्मणां निरवधित्वमुक्तं, नहि कश्चिदिति[4] वाक्यात् ।

प्रकाशः—[१२] ननु तथापि संसारपदेन क्लेशसाधनतापि स्फुटतीति कथं दुःखासम्भेद इत्यतस्तत्तात्पर्यमाहु:—क्लेशसाधनेत्यादि । तथा च तेन पदेन भगवन्तं प्रति तथा सा सूचितेति तदर्थं तत्पदप्रयोगो न क्लेशबोधनायेति न दुःखसम्भेद इत्यर्थः ।

नन्विदं सूचनं प्रार्थनाफलकं तथा सति कथं क्लेशाभाव इत्यत आहुः—योग्येत्यादि । तथा चेतः परं भगवद्दययाऽन्तिमदेहभावनादित प्रागेव क्लेशो, न त्वेतदुत्तरमपीति न दुःखसम्भेद इत्यर्थः ।

[१३] ननु कार्यमात्रं प्रति भगवदिच्छायाः कारणत्वेन क्लेशेपि तस्या एव तथात्वादीदृशभक्तस्य तत्स्फुर्तेरेवोचितत्वात् कथं तदनुक्तिरित्यत आहु:—क्लेश इत्यादि, बहुवचनमित्यन्तम् ।

आवश्यकत्वायेति । तत्फलभोगावश्यकत्वाय । तथा च तन्नोचितं, किन्तु कर्मपदमेवोचितम् । तथेदृशक्लेशे प्रार्थनाप्युचितेत्यर्थः ।

ननु "जनो वै लोक एतस्मिन्नविद्याकामकर्मभिः, उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन्नि"त्यत्र त्रयाणां भ्रमणकारणत्वसिद्धेः कथं कर्ममात्रस्यैव कारणत्वेन कथनमित्यत

श्रीवल्लभटि०—

क्लेशेति । क्लेशसाधनं ससारस्तत्पदेनेत्यर्थः । तत्र पतितस्य चेत्तादृग्जनसबन्धरूपसाधननिष्पत्तिः, सा तथैवेत्यर्थः

१ भा. १०, ५१, ५४. २ सहजकृपालुत्वेन । ३ भक्तिमार्गीयस्य भगवति अप्रार्थनालक्षणम्. । ४ गीता ३, ५.

चक्रपरिभ्रमणे दण्डस्येव मुख्योपयोगे तृतीया। अस्या मुक्तेर्गौणत्वाय नात्र प्रार्थनापदप्रयोगः। तथा च तादृशभगवद्भक्तसख्यं पुष्टिमर्यादायां मोक्ष इत्युक्तम्।

टिप्पणी—ननु संसारचक्रभ्रमणे साधनान्तराणामविद्याकामादीनां सत्त्वात्कथं कर्ममात्रं तत्साधनत्वेनोक्तमित्यत आहुः–चक्रपरिभ्रमण इति। सर्वेषां निमित्तकारणत्वेपि कारणता भोगविषयत्वेन मुख्योपयुक्तानां कर्मणामेव। घटे दण्डस्येवेति ज्ञापनाय तृतीयेत्यर्थः।

[१४] नन्वर्थतः प्रार्थनासिद्धावपि तद्वाचिपदप्रयोगाभावतात्पर्यमाहुः–अस्या इति। अस्याः पुष्टिमर्यादामुक्तेर्द्वितीयापेक्षया गौणत्वज्ञापनायात्र प्रार्थनापदानुक्तिः। निर्गलितार्थमाहुः–तथा चेति। एतादृशं पूर्वोक्तधर्मविशिष्टं चक्रभ्रमणादिक्लेशप्राप्यं भगवद्भक्तसख्यं पुष्टिमर्यादायां मोक्ष इत्युक्तम्।

प्रकाशः—

आहुः–चक्रेत्यादि। कर्माभावे ताभ्यां तथाभ्रमणाभावस्यानुभवसाक्षिकत्वाद्भ्रमणे मुख्योपयोगः कर्मणामेवातस्तेषामेव तथात्वं बोधितमित्यर्थः।

[१४] ननु भवत्वेवं तथापि सख्यं प्रार्थयत इति यदुक्तं तदसङ्गतम्। प्रार्थनावाचकपदस्यात्रानुपलम्भादतो व्याख्यानं सर्वमेव सन्दिग्धमित्यत आहुः–अस्या इत्यादि। तथा च तदप्रयोगमात्रेणोक्तेऽर्थे न सन्देह्यमित्यर्थः। सिद्धमाहुः–तथा चे त्यादि। पुष्टिप्रवाहमर्यादाया "तस्माज्जीवाः पुष्टिमार्गे भिन्ना एव न संशय" इति जीवभेदं पूर्वोक्तहेतुभिर्निगमयित्वा भगवद्रूपसेवार्थं तत्सृष्टिः, तेषां स्वरूपादिभिर्भगवत्तुल्यत्वं, सेवासिद्ध्यर्थमीषत्तारतम्यं चोक्त्वा तेषां शुद्धमिश्रभेदेन द्वैविध्यं प्रतिज्ञाय मर्यादामिश्राणां गुणज्ञत्वं लक्षणमुक्तं, तच्च भगवद्रूपसेवार्थं सृष्टत्वे सति स्वरूपादिभिर्भगवत्तुल्यत्वे सति सेवार्थमीषत्तारतम्यवत्त्वे सति भगवद्गुणज्ञत्वं मर्यादामिश्रपुष्टजीवत्वमिति फलति। तथा "वैदिकत्वं लौकिकत्वं कापट्यात्तेषु नान्यथा। वैष्णवत्वं हि सहजं ततोन्यत्र विपर्यय" इत्यन्यथारूपज्ञापनपूर्वकं सामान्यलक्षणं त्रयाणां तत्रोक्तम्। तन्मूले "नैकात्मतां मे" "प्रायेण मुनयः" "परिनिष्ठितोपी"त्येतेषु "तत्रा[1]भवद्भगवान् व्यासपुत्रः" "तं[2] व्यष्टवर्षं" "द्वैपायनाच्छुको जज्ञे भगवानेव शङ्करः। अंशांशेनावतीर्योर्व्यां संप्राप परमं पदं" "तं स्कन्द इत्याचक्षते" सुहृत्तमदिदृक्षितभङ्गे "गोविन्द[3]भुजगुप्तायां द्वारावत्यां कुरूद्वह। अवात्सीन्नारदोभीक्ष्णं कृष्णोपासनलालस" इत्यादिभिः शुकसनत्कुमारनारदेषु स्फुटम्, तथा "कायेन तु फलं पुष्टावि"ति पुष्टिफलस्य स्वरूपसाध्यत्वं तत्रोक्तम्। तदत्र "वैयासकिः स भगवानि"त्यनेनोक्तम्। तेन लौकिकत्ववैदिकत्वरूपा इत्यर्थ। अत्रापि पूर्वकक्षा परीक्षिति, उत्तरकक्षा सनत्कुमारादिषु ज्ञेया। छान्दोग्ये सनत्कुमारनारदसंवादे सर्वात्मभावविवरकतया तस्मिंस्तथात्वस्य शस्यवचनत्वाच्छ्रुतिगीतार्थनिर्णयस्य भजनार्थतायाः सुबोधिन्यां निर्णीतत्वाच्चेति। अयं मोक्षः प्रायस्तुरीयाश्रमाणां हंसपरमहंसानामेवेति भाति। उदाहरणस्य तेष्वेवोपलम्भादिति दिक्।

श्रीवल्लभटि०—अस्या इति। शुद्धपुष्टिमुक्त्यपेक्षया गौणत्वादित्यर्थः।

---

१ भा. १, १९, २६.। २ भा. १, १९, २६.। ३ भा. ११, २०, १.।

द्वितीयमाह—त्वन्मायय्रेति। समासादेव भिन्नतया न मायामोहनम्।

टिप्पणी—[१५] पुष्टिपुष्टिमोक्षं वक्तुं सजातीयत्वबोधनायाभासमाहुः—द्वितीयमाहेति। द्वितीयं भक्तिमार्गीयं मोक्षमाहेत्यर्थः। तस्य मर्यादाऽप्राप्यकेवलपुष्टिप्राप्तिप्राप्यत्वात् तत्सजातीयत्वसिद्धिरित्यर्थः। त्वन्माययेति। संसारचक्रे भ्रमतो भगवदिच्छया कुटुम्बासक्तस्य न किन्तु, त्वन्मायया तदासक्तस्य मे भूयादिति संबन्धः। पूर्वस्माद्वैलक्षण्यमाहुः—समासादेवेति। त्वन्माययेतिसमासेन तस्याः स्वरूपसंबन्धित्वमुच्यते। सा च स्वरूपसंबद्धैव तदर्थं मोहयति न तु पृथग्भावेन लीलार्थमेव तस्याः प्राकट्यादत एव तदुपक्रमे तस्या आज्ञापनम्। वैष्णवीं[1] व्यतनोन्मायामित्यादिष्वपि सैवोक्ता। सा च भगवान् यत्र प्रकटीभूय लीलाः करोति तत्रैवोपयुज्यते, तदभावे लीलाऽसंभवात्। एवं सति पुष्टिपुष्टिमोक्षस्य प्रकटलीलाविशिष्टप्रभुस्वरूपान्तररमणरूपत्वात् तदुपयोगित्वेन गृहादिष्वासक्त्यपेक्षणात् त्वन्माययेत्युक्तम्। पूर्वत्र तु पारोक्ष्येण साक्षाल्लीलाऽसंभवान्नासक्तेरुपयोगः। माया तु तत्रापि भगवदीया परं न स्वरूपसंबन्धिनी, "मम[3] माये—"तिव्यत्यासेन कथनात् तरणोक्तेश्च। अत एवात्रोक्तं न भिन्नतया प्रभुपृथग्भावेन मायामोहनमिति, किन्तु प्रभुरेव तया मोहयतीत्यर्थः।

[१५] प्रकाशः—अतः परं पुष्टिपुष्टिमोक्षं विवरितुमाहुः—द्वितीयमित्यादि। ननु "प्रसङ्गमजरं पाशमात्मनः कवयो विदुः। स एव साधुषु कृतो मोक्षद्वारमपावृतं"[4] "त एते साधवः साध्वि" "सत्सङ्गेन हि दैतेया"[5] इत्यादिवाक्यैः सत्सङ्गस्य मोक्षद्वारत्वात् पूर्वोक्तवाक्येषु गुणगानस्य फलत्वसाधनाच्च पुष्टिमर्यादामोक्षरूपत्वं तत्सख्यस्योचितम्। तच्च पूर्वार्द्धे भूयादित्यदूरान्वयाङ्गीकारेण सिद्धम्।

अतः परमुत्तरार्द्धे देहाद्यासक्तिबोधकं स्वविशेषणमवशिष्यते, निषेधो नाथपदञ्च। तथा सति देहाद्यासक्तिनिषेधः प्रार्थनीयत्वेन फलिष्यतीत्यासक्तिरूपो मोक्षः कथमत्र कथं वा देहाद्यासक्तेर्मोक्षत्वमित्याकाङ्क्षायां भगवदपरोक्षज्ञानेन पुष्टिपुष्टिमोक्षस्य पूर्वं व्यवस्थापितत्वादत्र तादृशत्वेन तस्या मोक्षत्वं वक्तुं देहाद्यासक्तिजनकमोहने विशेषमाहुः—समासादित्यादि। मायाशक्तिर्हि मोहने अधिकृता। तत्र यदि "माया चाविद्या च स्वयमेव भवतीति" श्रुत्या मायाविद्ययोरभेद आद्रियते तदापि "ससर्जाग्रेन्धतामिस्रमथ तामिस्रमादिकृत्। महामोहश्च मोहश्च तमश्चाज्ञानवृत्तय"[6] इति "तामिस्रमन्धतामिस्रं तमो मोहो महातम"[7] इति द्वादशविंशाध्यायवाक्ययोः पर्वक्रमभेदेनाविद्याभेदस्य तृतीयस्कन्धसुबोधिन्यां विंशाध्याये भगवत्कर्तृकत्वकथनपूर्वकं व्युत्पा-

१ गच्छ देवि व्रजं भद्रे इति। २ भा. १०, ८, ४३.। ३ गीता ७, १४. मम माया दुरत्ययेति गीतावाक्ये मन्मायेति पदं नोक्तम् तत्र मायाया मोहरूपत्वात्र तस्यास्तरणमुचितम् न तु लीलारूपमायायास्तरणम्। ४ भा. ३, २५, २४.। ५ भा. ११, १२, ३.। ६ भा. ३, १२, २.। ७ भा. ३, २०, १८.।

पूर्वस्मादेतस्य विशेषस्त्वत्पदेनोक्तः। आभिमुख्यञ्च। त्वदिच्छया प्राप्तस्यात्मात्मजादिषु सख्यं पुष्टिपुष्टिमोक्षः।

टिप्पणी—[१६] ननु को विशेषो मोहस्यैकजातीयविषयत्वादित्याशङ्कयाहु –**पूर्वस्मादिति**। **पूर्वस्मात् मोहादेतस्य पुष्टिपुष्टिमोक्षाय मोहस्य विशेष** आदरणीयत्व मोक्षाङ्गत्वा दिरूपस्त्वत्पदेन प्रकारतया तत्सम्बन्धसूचकेनोक्त इत्यर्थ। यद्वा, नन्वेतस्मिन्नपि मोक्षे मायामोहस्य तुल्यत्वात्को विशेष इत्यत आहु –**पूर्वस्मादिति**। **एतस्य पूर्वस्मात्** मोक्षाद्विशेषस्त्वत्पदेनोक्त। एतत्सम्बन्धिमायाया अपि सदा स्वरूपसाहित्यादिति भाव। किञ्चात्र मोक्षे विशेष प्रकारान्तरेणाप्युपपादनीय इत्याहु –**आभिमुख्यं चेति**। एतत्प्रार्थनावसरेपि यत्र वृत्रस्य प्रभु प्राकट्यम्, अन्यथा त्वत्पदं न प्रयुञ्ज्यात्। तत्र तदनुभवे तस्य का वार्तेति भाव।

प्रकाशः—

दनात्पूर्वापेक्षयोत्तमत्वस्य च ततोपि देहाहङ्कारो भगवत्सेवौपयिकत्वादुत्कृष्ट इति पञ्चमपर्वव्याख्यानेन सूचनाद्भगवद्वैमुख्येन महाभोगेच्छारूपस्य तत्प्रथमपर्वण इन्द्रे वर्त्तमानस्य मखभङ्गद्युतरहरणलीलोपयोगिताया, भोगेच्छारूपस्य द्वितीयस्योग्रसेनादौ, अज्ञानस्य तृतीयस्य "सैयो नष्टस्मृतिरि"त्यादौ, मोहस्य चतुर्थस्य कालियदमनादौ, महामोहस्य पञ्चमस्य सेवौपयिकताया सर्वत्र स्फुटत्वाच्च तदुत्तमतायाः स्फुटत्वेन प्रकारभेदो मोहने। यदि च "विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणां। मोक्षबन्धकरी आद्ये मायया मे विनिर्मित" इतिवाक्ये कार्यकारणभावोक्त्या भेद आद्रियते तदाप्यविद्याकृत मोहन ससाराय, मायाकृत तु भगवल्लीलार्थ, तदपि "वैष्णवीं व्यतनोन्मायां प्रजास्नेहमयीं प्रभुरि"त्यादौ स्फुटम्। प्रकृते च तदभिप्रेतमतस्तव माया त्वन्मायेति साक्षात्सम्बन्धबोधकात् त्वदविनाभूता माया त्वन्मायेति वा तथाभूतात्समासादेव भिन्नतया भगवत्सम्बन्धराहित्येन केवल ससारार्थतयेति यावत्। तथा न मायामोहनमित्यर्थ।

[१६] ननु शक्तेः शक्तिमदविनाभावस्य साक्षात्सम्बन्धस्य च सर्वजनीनत्वात् सर्वतन्त्रसिद्धत्वाच्च सर्वदैव तथात्वेन प्रागपि वैष्णव इति पूर्वजन्मीनस्यापि देहपुत्राद्यासक्तिरूपमोहस्य तथात्वेन तस्य च बन्धकताया मूले पुत्रशोकशापादिकथया स्फुटत्वेन प्रकृते तत को विशेषो? येन मोक्षत्वमित्यत आहु –**पूर्वेत्यादि**। अविनाभावस्यानुक्तसिद्धत्वेन तद्बोधकपदोक्तिप्रयोजनाभावेपि या तदुक्तिसेदानीं प्रार्थ्यमानस्य मोहस्य तच्चिकीर्षितलीलार्थत्व बोधयतीत्येष पूर्वस्माज्जन्मनो विशेष इत्यर्थ।

ननु भवतु लीलार्थत्व तथापि मायामोहो भगवदज्ञानस्य "ये[1] संवसन्तो न विदुर्हरिं मीना इवोडुपमि"त्यादिषु सिद्धत्वात् परोक्षज्ञानमपि चेद्दूरे कुतस्तर्हि प्रत्यक्षसभावनेति पूर्वोक्तव्यवस्था तु भज्येतैवेत्यत आहु –**आभिमुख्यं चेति**, तद्धि भगवतो नाभिमुख्ये, प्रकृते

श्रीवल्लभटि०—पूर्वस्मादित्यत्र। पूर्वत्र माया भिन्ना, तस्याश्च परित्याग। अत्र तु स्वरूपाभिन्नेति न तत्परित्याग, प्रत्युत स्वरूपविषयकासक्तिजनकत्वेन फलसाधकत्वाद्गुण एव, अतो विशेषस्तेनेत्यर्थ। आभिमुख्यञ्चेति। प्रत्यक्ष एव त्वत्पदव्यवहार इति तत्प्रार्थनायामेव भगवदाभिमुख्यमितीदमपि विशेषहेतुरित्यर्थ।

---

१ स्वपदेन मायाया इतरकृष्णतामूचकेनति स्पष्टोऽर्थ। २ भा १०, ८, ४४

त्वत्सेवौपयिकत्वेन चित्तस्य तेष्वासक्तिं नाथपदेन प्रार्थयते । तेषां नाथत्वे तथा भवतीत्यर्थः । चक्र एव परिभ्रमतः सख्यं न भगवदिच्छया हिरण्यकशिपुप्रभृतिष्विव कुटुम्बासक्तस्य, सर्वथानन्यत्वभङ्गप्रसङ्गात् ।

टिप्पणी—[१७] ननु त्वन्माययेति को विशेषो ? यथाकथञ्चिदपि पुत्रादेर्भगवदीयत्वेन तदासक्त्या तत्सख्यस्य मोक्षत्वादित्याशङ्क्याहुः—चक्र एवेति । चक्र एव परिभ्रमतस्तत्सख्यं भवतु, अनन्यत्वाक्षतेः पुष्टिमर्यादामोक्षरूपत्वाच्च, न तु भगवदिच्छया स्वावतारकारणीभूतया, हिरण्यकशिपुप्रभृतिषु यथा दैवगत्या प्रह्लादे पुत्रतया आसक्तिः सख्यञ्च पुत्रवात्सल्यरूपं, अन्यथा न शिक्षां दापयेत्, तथा कुटुम्बासक्तस्य मे न भूयात्किन्तु त्वन्माययेत्यर्थः । सोपि पुरा भक्त एव शापेनासुरो जात इति साम्येन प्रार्थनां तज्जातीयां मन्येत प्रभुरितिभिया निषेधप्रार्थनमिति भावः ।

ननु तथापि भगवद्भक्तासक्तेस्तत्सख्यस्य विद्यमानत्वात् को दोष इति चेत्तत्राहुः—सर्वथेति । भगवन्मायामन्तरा केवलं भगवदीयपुत्राद्यासक्तावप्यनन्यत्वभङ्गस्तदंशे तैत्संबन्धास्फूर्तेः । न हि अनन्याः कदाचिदपि तदसंबद्धं किञ्चिदपि स्मरन्ति । दृष्टं च हिरण्यकशिपौ प्रह्लादासक्त्या शिवभजनमतोऽन्यथा सर्वथैवानन्यताभङ्ग एव । तस्मात् त्वन्माययैव तथासक्तस्य सख्यं भूयादितिभावः ।

प्रकाशः—

प्रत्यक्षं भगवन्तं प्रति युष्मत्पदोक्त्याभिमुख्यं सूच्यते, तेन यथा " वैष्णवीं व्यतनोदि"त्यादौ मोहनं तथाभिप्रेतं, तत्र प्रत्यक्ष इति न व्यवस्थाभङ्गलेशोपीत्यर्थः ।

[१७] उक्तं विशेषं निगमयितुं पूर्वं जातयोः सख्यासक्त्योः स्वरूपं परिच्छिन्दन्तः प्रथमं सख्यं परिच्छिन्दन्ति—चक्र एवेत्यादि । पूर्वं नारदाङ्गिरसोर्मर्यादापुष्टभक्तयोर्यत्सख्यं तत्स्वकर्मभिः संसारचक्रे भ्रमत एव । अत एव " ज्ञात्वान्याभिनिवेशं ते पुत्रमेव ददावहमि"त्यन्तान्यङ्गिरोवाक्यानि, अमेम्बिकाशापो वृत्रदेहाप्तिश्च न भगवदिच्छया परीक्षित इव न कर्मबन्धत्याजिकया तयेति, पौर्वत्रिकसख्यस्वरूपं परिच्छिन्नम् । तेन एतादृशभगवद्भक्तसख्यं पुष्टिमर्यादायां मोक्ष इत्यत्रापि कर्मबन्धत्याजिकया भगवदिच्छयेति विशेषणीयमिति बोधितम् । अतः परमासक्तिं परिच्छिन्दन्ति—हिरण्येत्यादि । अत्र सख्यपदरहितां पूर्वफक्किकामनुषज्यासक्तिपदं चाध्याहृत्य योजनीयम् । तथा च तत्प्रभृतिष्विव स्वस्यापीतः पूर्वं वृत्रदेहे चित्रकेतुदेहे च शापप्रयोजकशिवोपहासादिना तथात्वादासक्तिरपीतः प्राक्तना चक्रे परिभ्रमत एव । न तु कर्मत्याजकपूर्वोक्तमोहसंपादकभगवदिच्छयेत्यर्थः । तेनैवं प्राक्तनोभयस्वरूपनिष्कर्षेण प्रार्थ्यमानयोर्विशेषो निगन्तव्य इति भावः ।

श्रीवल्लभटि०—चक्र एवेत्यत्र । यद्यपि हिरण्यकशिपुप्रभृतिषु भगवदिच्छया शापेन लोके जातेषु तत्कुटुम्बिनां सख्यमुत्तमश्लोकजनसख्यम्, तथापि तन्न मोक्षरूपम् । कुटुम्बित्वेनोपाधिप्रयुक्तत्वात् । भगवदीयत्वमप्रयुक्तमेव तत्तया, सर्वथाऽनन्यत्वसाधकत्वात् । तथा च तत्रैव परिभ्रमतस्तद्रूपादित्यर्थः । तदिच्छां विना तज्जनानां जन्माभावात्कुटुम्बित्वेन सख्याभाव इति भगवदिच्छयेत्युक्तम् ।

---

१ पुत्राद्यासक्त्यंशे सति । २ भगवत्संबन्धास्फूर्तेः । भा. ६, १९, २०. ।

कृतार्थत्वं तु नाथपदप्रयोगादेव सूचितम् । तदन्ते च प्रार्थना, *' भगवदीयत्वेनैव परिसमाप्तसर्वार्था' इतिसिद्धान्तात् ।

टिप्पणी—[१८] नन्वयं प्रकारस्तु लीलासृष्टिस्थेष्वेव, वृत्रस्य तु कथमेवंकथनाधिकार इत्यत आहुः—कृतार्थत्वं त्विति । स हि तद्भावहृद्यागत्यैव कृतार्थः पूर्णसर्वार्थः । न ह्येतदतिरिक्तमन्यस्य किञ्चित्फलं भवति । रसानुभवस्तु तेषामेव । अन्यः कामयमानोप्ययोग्यः पैतेदतस्तद्भावस्फुरणेन भगवदीयत्वसिद्ध्या कृतार्थ एव । अन्यथा नाथपदं न प्रयुञ्ज्यात् । न हि केचिदप्यभगवदीया भगवन्तं नाथत्वेन संबोधयन्ति, तदनधिकारात् । अनधिकारकृतस्य दोषावहत्वाच्च । प्रकृते तत्कथनाधिकारसिद्धौ सिद्धं तथात्वमिति भावः ।

[१९] नन्वेवं सति फलान्तरानभिलाषिणः प्रार्थना न घटत इत्याशङ्क्याहुः—तदन्ते चेति । नाथपदप्रयोगान्तेपि या सख्यप्रार्थना सा भक्तिसिद्धान्तबोधनाय । तत्र हि भगवदीयत्वमेव परमपुरुषार्थः । "भगवदीयत्वेनैव परिसमाप्तसर्वार्था" इतिवाक्यात् । स च तत्सख्येनैव भवतीति ज्ञापनाय तथाप्रार्थनमिति भावः ।

प्रकाशः—[१८] नन्वस्त्वेवं तथाप्यग्रे प्रार्थितं सेत्स्यतीत्यत्र किं गमकमत आहुः—कृतार्थेत्यादि । पूर्वसन्दर्भे भक्तत्वस्य स्फुटत्वादत्र च नाथपदप्रयोगेण दैन्याविर्भावबोधना"द्भक्तानां दैन्यमेवैकं हरितोषणसाधनमि"ति सर्वत्र दर्शनेन भगवत्तोषादिति तत्प्रयोगादेव तत्सिद्धिः सूचितेत्यर्थः ।

[१९] नन्वत्रासक्तिरूपैव कृतार्थतेत्यत्र किं गमकमत आहुः—तदन्त इत्यादि । इदं वाक्यं पञ्चमस्कन्धीयषष्ठे ऋषभचरितसमाप्तावस्ति, तत्र च पूर्वगद्ये चरित्रश्रवणश्रावणयोः फलं भक्तिरिति "भगवति तस्मिन् वासुदेव एकान्ततो भक्तिरनयोरपि समनुवर्तत" इत्यनेनोक्ता । तदग्रिमे "यस्यामेव कवय आत्मानमविरतं विविधवृजिनसंसारतापोपतप्यमानमनुसवनं स्नापयन्तस्तयैव परया निर्वृत्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्था" इति वर्तते । तत्र संसारावस्थावस्थितानां कवित्वेन भगवद्गुणगातॄणां भक्तिजन्यसुखेन भगवद्दत्तपरमोक्षानादरपूर्वकं भगवदीयत्वधर्मेण सर्वतः सम्यक्प्राप्तसर्वपुरुषार्थत्वमुक्तम् । तावता "सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत । दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः" "स एव भक्तियोगाख्य आत्यन्तिक उदाहृत"

श्रीवल्लभटि०—ननु सर्वसाधनापेक्षारहितेन कृतार्थेन पुष्टिमोक्षः प्रार्थ्य इति तत्राहुः—कृतार्थत्वं त्विति । सर्वसाधनैस्त्वं चेन्नाथस्तदा न किञ्चित्कर्तव्यमिति त्वत्पदेन तत्सूचितमित्यर्थः । तदन्ते चेति कृतार्थत्वान्ते । पुष्टिमोक्षप्रार्थनेत्यर्थः । पुष्टिमोक्षस्वरूपमाहुर्भगवदीयत्वेनैवेत्यनेन ।

---

* भा० ५-६-१७. १ अयोग्यमिच्छन्पुरुषः पतत्येव न संशयः । २ लीलासृष्टिस्थत्वम् । ३ भा. ३, २९, १३+१४. ।

धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्ध्यर्थं माया क्रमाद्देहाद्यध्यासं करोति । तत्र देहाध्यासे धर्मसिद्धिः प्रसिद्धा । पुत्रापेक्षया अन्यार्थस्योत्कृष्टस्याभावादर्थसिद्धिः ।

टिप्पणी—[२०] नन्विदमद्भुतमिवाभाति यन्मोक्षे मायातत्कार्यसंबन्धसाहित्यमित्याशङ्क्य मोक्षेऽद्भुतत्वसाधनाय वैलक्षण्यं निरूपयितुमाहुः—धर्मार्थेति । अत्रायमाशयः मर्यादामार्गीयमोक्षे हि तन्मात्रानुभवो न धर्मार्थकामानां प्रत्युत विरुद्धत्वं च । प्रकृते तत्साहित्याविरुद्धत्वादिबोधनायात्मात्मजदारगेहेष्वासक्तचित्तस्येत्युक्तम् । यतो माया क्रमात् देहेन्द्रियादिक्रमाद्देहाद्यध्यासं चतुर्विधपुरुषार्थसिद्ध्यर्थं करोति । तत्रैकेनैव देहाध्यासेन धर्मार्थकाममोक्षान्तान्साधयति । एवमिन्द्रियाद्यध्यासेनेति क्रमो ज्ञेयः ।

[२१] तत्र देहाध्यासं विवृण्वन्ति तत्रेति । तत्रेतेष्वध्यासेषु देहाध्यासे धर्मसिद्धिः प्रसिद्धा, तदध्यासवतामेव तत्राधिकारात् । अर्थसिद्धिरपि देहाध्यासेन यतः पुत्ररूपस्योत्कृष्ट-

प्रकाशः—

इति च स्मारितम् । तेन तादृशपरमभक्तियुजां संसारस्य मुक्त्याधिक्यं तत्र स्फुटति, तदत्रापि स्वविशेषणनाथपदप्रयोगाभ्यां स्फुटतीति तदन्वे तादृशसिद्धान्तं हृदि कृत्वा प्रार्थनैव तादृशासक्तिरूपकृतार्थत्वगमिकेत्यर्थः । सिद्धान्तादिति ल्यब्लोपे पञ्चमी ।

[२०] ननु भवत्वेवं तथापि त्रिवर्गस्य गृहाश्रमे संसिद्धेर्मोक्षस्येतरेषु संसिद्धेः प्रकृते च दारात्मजपदाभ्यां गृहाश्रमबोधनात् तस्मिन्नितरेतरविरुद्धचतुर्वर्गानुभवसिद्धिर्न बुद्धिमधिरोहतीत्याकाङ्क्षायां तदनुभवप्रकारमाहुः—धर्मेत्यादि । मायेति पूर्वोक्ता । करोतीति पुष्टिपुष्टिभक्तानां करोति ।

[२१] तत्रेति । तेष्वध्यासेषु । प्रसिद्धेति । ब्राह्मणत्वाद्यभिमानाभावे वासन्तिकाधानादिकरणायोगात्तदुपदेशशास्त्रादरतत्करणाभ्यां प्रसिद्धा । पुत्रेत्यादि । पुत्रे प्राणाधिकप्रियत्वभानात्तत्र ममतारूपस्तत्साकल्यवैकल्ये स्वसाकल्यवैकल्यभानान्नाशे देहप्राणवियोगाच्च तदाद्यर्थेऽहन्तारूपो वा प्राणाध्यासस्तस्मिन् सति तदुपार्जनप्रयत्नात् प्राणाध्यासेऽर्थसिद्धिः । प्रसिद्धेत्यध्याहारेण

श्रीवल्लभटि०—भगवदीयत्वेन सर्वार्थपरिसमाप्तौ प्रकारमाहुः—धर्मार्थकामेति । माया यथा सर्वपुरुषार्थसिद्ध्यर्थं जीवस्य देहाद्यध्यासं करोति, तं विना तदसंभवात्, तथा लिलौपयिकी माया पुष्ट्यङ्गीकृतस्य भगवदीयत्वेन तमुत्पादयति न तु लोकवदित्याशयः । तेन तत्तद्विषयेष्वपि तदीयत्वेनैव रागो न त्वन्यथापीति सिद्धम् । तत्रेति चतुर्विधाध्यासेष्वित्यर्थः । प्रसिद्धा लोक इति शेषः । तथात्र तदध्यासेन भगवद्दास्यसिद्धिरित्यर्थः । लोके यथेन्द्रियाध्यासेनार्थसिद्धिस्तथात्र भगवत्सेवौपयिकत्वेन पुत्रादिना तत्सिद्धिः । मूले अर्थनिरूपण आत्मजपद यदुक्त तदाशयमाहुः—पुत्रापेक्षयेत्यनेन । पुत्राभावे अन्यार्थस्याप्यप्रयोजक-

स्त्रिया कामसिद्धिः प्रसिद्धा । * 'भक्तानां गृह एव विशिष्यते' इति न्यायान्मोक्षः।

टिप्पणी—

स्यार्थस्य तदध्यासेनैव सिद्धेः । कामसिद्धिरपि स्त्रीसापेक्षा देहाध्यासमूलैव । गृहासक्तिरपि तन्मूलैव

[२२] चतुर्विधस्यापि मोक्षरूपत्वमाहुः—भक्तानामिति । भगवन्मायया लीलोपयोगिपदार्थत्वेन तत्रासक्त्या तन्निरोधेन ब्रह्मभावापेक्षया गृहमेव भक्तानां विशिष्टं, यतो ब्रह्मभावेऽस्तिलपुरुषार्थाननुभव इन्द्रियादिवैफल्यं च । अतोऽलौकिकदेहप्राप्त्या प्रभुप्राकट्येनाखिलपुरुषार्थरूपलीलायास्तद्भक्तसाहित्येनान्तररमणात्मकोऽनुभवो मोक्ष इति सिद्धम् ।

प्रकाशः—

योज्यम् ।तेष्वेव ममतारूपोऽध्यासो वा । मूले पुत्रपदमर्थमात्रोपलक्षकमित्याशयेनैवमुक्तम् । स्त्रियेत्यादि । अत्र इन्द्रियाध्यासः स्त्रियामेव, ममतादि वा तेन कामसिद्धिस्तथेत्यर्थः ।

[२२] भक्तानामित्यादि । † "ब्रह्मानन्दे प्रविष्टानामात्मनैव सुखप्रमा । सङ्घातस्य विलीनत्वाद्भक्तानां तु विशेषतः" "सर्वेन्द्रियैस्तथा चान्तःकरणैरात्मनापि हि । ब्रह्मभावात्तु भक्तानां गृह एव विशिष्यते " इति निबन्धकारिकाभ्यां, ‡ " पश्यन्ति ते मे रुचिरावतंसप्रसन्नवक्त्रारुणलोचनानि । रूपाणि दिव्यानि वरप्रदानि साकं वाचं स्पृहणीयां वदन्ति" तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः । हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुङ्क्ते" इति श्रीकपिलदेववाक्यद्वयार्थः सङ्गृहीतः, तदुक्तन्यायान्मोक्षानिच्छापूर्वकभगवदेकतानतारूपान्मोक्षस्तच्चिकीर्षितलीलोपयुक्तगृहासक्तिपूर्वकभगवदानन्दानुभवरूपो मोक्षः । गोपिकादितुल्यानां प्रसिद्ध इति योजना । तथा च दृष्टत्वात्परस्पराविरोधो व्रजभक्तादीनामिवेत्ययं प्रकार इत्यर्थः ।

श्रीवल्लभटि०—

स्यात्, तेन तत्सिद्धिरित्यर्थः । उत्कृष्टत्वन्तु भगवदर्थसंपादितार्थरक्षकत्वेन मुख्यतया सेवौपयिकत्वेन वंशजननद्वारा परम्परया सेवानिर्वाहकत्वेनैकविंशतिपुरुषोद्धारकत्वेन च । लोके पुनस्त्वार्थत्वेन प्रसिद्धय भावात् सा नोक्ता।

स्त्रियेति । तया यथा विषयार्थं कामसिद्धिः प्रसिद्धा तद्वत्रापि सेवायामुभयोश्चित्तचाञ्चल्याभावाय भगवदीयपुत्रोत्पत्त्यैव तत्सिद्धिरित्यर्थः । भक्तानामिति । यथा तेषां भजनोपयोगित्वेन विविधलीलारसानुभावकत्वेन शून्यस्थितितुल्यमोक्षापेक्षया गृहमेव विशिष्यते तन्न्यायेनैतस्यापि पुष्टिमार्गीयत्वात्तन्मार्गीयभक्तभावभावनया भजने तथैव परमानन्दानुभवे स ततो विशिष्यते । अयमेव "सोऽश्नुते सर्वान् कामान् सह"त्यत्र मुख्यतया निरूपितः पुष्टिमार्गीयो मोक्षो, न तु कैवल्यम् ।

* निबन्धशास्त्रार्थप्रकरणे का० ७१. † निबन्ध शा. ९३+९४. ‡ भा. ३, २५, ३५+३६

चित्तस्य वासुदेवात्मकत्वान्मोक्षप्रकरणत्वाच्चित्तपदप्रयोगः । क्रीडामतिबन्धकत्वात्प्रकृते विरोधाच्च निषेधप्रार्थना ।

टिप्पणी—[२३] ननु कथमस्य तदधिकत्वेपि मोक्षरूपत्वं, चित्तासक्तेः संसाररूपत्वादित्याशङ्कयाहुः—चित्तस्येति । चतुर्विधेऽन्तःकरणे चित्तस्य वासुदेवात्मकत्वात्तस्य च मोक्षदातृत्वात्तद्वाचिचित्तपदप्रयोगेण मोक्षरूपत्वं सिद्धमित्यर्थः । किञ्च, प्रकरणमपि मोक्षस्येतिज्ञापनायापि चित्तपदप्रयोग इत्याहुः—मोक्षप्रकरणत्वादिति ।

[२४]ननु भगवन्मायाजनितासक्तिमात्रं प्रार्थ्येत, किं केवलासक्तिनिषेधप्रार्थनेनेत्यत आहुः—क्रीडामतिबन्धकत्वादिति । केवलासक्तिनिषेधाभावे 'अप्रतिषिद्धमनुमतं भवती'तिन्यायेन भग-

प्रकाशः—[२३] प्रकृते तादृशोनुभवप्रकारो विवक्षितोन्तःकरणाध्याससाध्यश्चेत्यत्र किं गमकमत आहुः-चित्तस्येत्यादि । *यत्तत्सत्त्वगुणं स्वच्छं शान्तं भगवतः पदम् । यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकमितिकपिलवाक्येन सर्वेष्वन्तःकरणेषु चित्तस्य वासुदेवात्मकत्वात् सृष्टिस्थितिप्रलयमोक्षकर्तृषु प्रद्युम्नादिषु चतुर्षु वासुदेवस्य मोक्षदातृत्वादत्र मोक्षप्रकरणादत्र चित्तपदप्रयोगः । तथा च स एवोक्तप्रकारानुभवस्य तस्यान्तःकरणाध्याससाध्यतायाश्च विवक्षितत्वगमक इत्यर्थः।अनेन तादृशासक्तेर्मोक्षत्वे युक्तिरपि स्मारिता । तथा हि यत्रेदं चित्तस्य वासुदेवात्मकत्वबोधकं वाक्यं तत्रैव मनसोऽनिरुद्धत्वबोधकमहङ्कारस्य सङ्कर्षणत्वबोधकं च वाक्यमस्ति, तेन तत्तदन्तःकरणाधिदैविकत्वं तेषां व्यूहानां तत्र सिद्धम् । भक्तान्तःकरणरूपाश्च त एव । किञ्च, यो योऽध्यासः स सर्वोप्यहङ्काराध्यासमूलकः, अहङ्कारश्च सङ्कर्षणात्मकः, तत्रास्याहमित्यध्यासस्तदहङ्ग्रहोपासनातुल्यकक्षो भवति, अहङ्ग्रहोपासना च सर्वतापनीयसिद्धा । तथा च सा यथा मोक्षफलकत्वान्मोक्षरूपा तथायमध्यासोपि मोक्षफलकत्वान्मोक्षरूप इति तन्मूला देहाद्यासक्तिरपि तथेति ।

[२४] ननु सर्वमिदं तदोपपद्येत यदन्तरा नञ्प्रयोगो न स्यात्, दृश्यते च स इति नायमर्थः साधीयान् । किन्तु स्वकर्मभिः संसारचक्रे भ्रमतो मम उत्तमश्लोकजनसख्यं भूयात् तस्य प्रार्थनीयत्वे हेतुः त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य नेति "†भवापवर्गो भ्रमतो यदे"तिवाक्याद्देहाद्यासक्तौ तन्न भवतीति तदभावपूर्वकतत्सख्यमात्रप्रार्थनेत्ययं युक्त इत्यत आहुः—क्रीडेत्यादि । उक्तसख्यस्येति शेषः । अयमर्थः, त्वया ह्येतस्यासाधुत्वेन अनुपपत्तिमात्रमविवक्षितत्व-

श्रीवल्लभटि०—चित्तस्येति । चिती संज्ञान इति धातोश्चित्तं ज्ञानात्मकम् । तच्च सत्त्वजन्यम् । तदधिष्ठाता वासुदेव इति तदात्मकत्वमुक्तम् । इतः पूर्वं त्रिभिः श्लोकैः पुष्टिमार्गीयपुरुषार्थत्रयमुक्तम् । अत्र तन्मार्गीयो मोक्षो निरूप्यते इति तत्प्रकरणत्वम् । "ज्ञानान्मोक्ष" इतिन्यायेन चित्तपदप्रयोगो मूले । तेन शुद्धज्ञानात्मकत्व एव तस्य यथा मोक्षसाधकत्वं तथा शुद्धपुष्टिमार्गीयभावात्मकत्व एव तन्मोक्षसाधकत्वमित्यर्थो ज्ञापितः । क्रीडेति । संसारहेतुभूतमायामोहापगम एव तद्गृहे भगवान् क्रीडतीति तत्प्रतिबन्ध-

* भा० ३, २६, २१. † भा० १०, ५१, ५४.

तथा च कर्मसंबन्धव्यतिरेकेण केवलभगवन्मायया रमणरूपया भगवत्सेवाश्रवणादितत्पर-

टिप्पणी—

वन्मायायामपि तत्सत्त्वे तन्मिश्रणेन पुत्रादिषूभयप्रकारबुद्धौ केवलभगवन्मायाभावान्न भगवान् क्रीडतीति क्रीडायां प्रतिबन्धकत्वात्तन्निषेधप्रार्थनमिति भावः । अत एव "सैमागतान्पूजयती व्रजौकस"इत्यत्र भगवदीयत्वेपि ज्ञातिबुध्या तत्रासक्तौ मातृचरणानां तथाभाववर्णनं, लीलारसानुभवप्रतिबन्धकशकटभङ्गश्चेति । किञ्च, मोक्षविरुद्धत्वादपि केवलासक्तिनिषेधप्रार्थनमित्याहुः—प्रकृते विरोधाच्चेति। प्रकृते विरोधो नामावल्यां शकटभेदचरित्रे लौकिकभाववर्णनं चेति। मोक्षो हि भगवदीयत्वं, तच्च सर्वांशे तदीयत्वानुसन्धानरूपं, तत्र केवलासक्तेरंशतः सत्या अपि बाधकत्वान्निषेधप्रार्थनमित्यर्थः । [२९] सिद्धमर्थमाहुः—तथा चेति । कर्मसंबन्धव्यतिरेकेण संसारेपि प्रभुसंबन्धात्सर्व-

प्रकाशः—

गमकतयोच्यते, सा तु नास्ति । तथा हि अत्र संदर्भे "अहं समाधाये"त्यादिवाक्यैर्वृत्रस्य स्वपूर्वजन्मीनसर्ववृत्तान्तस्मरणं निश्चीयते । "त्रैवर्गिकायासे"तिवाक्यात्स्वस्मिन्प्रसादोऽनुमित इति च । एवं सति पूर्वजन्मीनान्याभिनिवेशाङ्गिरःसङ्गपुत्रदानतच्छोकनारदोपदेशभगवत्प्रसादविद्याधराधिपत्यशिवोपहासाऽम्बिकाशापा अपि तस्य स्मृतिगोचरा इति पूर्वप्रसादस्य परमफलसाधकत्वं स्मृत्वा साम्प्रतं प्रसादे किं भगवता विधेयमिति तदाशये सन्दिहानः इदानीं च मरणकाल इतीदानींगोचरो मोचयिष्यत्येवेति निश्चिन्वानः अनुगृहीतत्वात्पौष्टिकमेव दास्यतीति निश्चित्य पूर्वजन्मीननारदाङ्गिरःसख्यस्य भ्रमत्सख्यत्वञ्च निश्चित्य यदि पुष्टिमर्यादया दित्सति तदा पूर्ववन्माभूदिति सख्ये सविशेषणे हीति प्रकारनिषेधस्य पूर्वार्धेन प्रार्थना, सख्यं भूयात्परं तथा न भूयादिति । यदि पुष्टिपुष्ट्या दित्सति तदा तथाऽसक्तचित्तस्य पूर्वार्द्धप्रार्थितं सख्यं न भूयादितिविशेष्य निषेधस्योत्तरार्द्धेन प्रार्थनेति प्रकरणवशेनात्र वाक्यद्वयाङ्गीकारस्योपपन्नत्वात् तत्र नोपपत्तिरिति न सोर्थः किन्त्वयमेव साधीयानिति ।

[२५] सिद्धमाहुः—तथा चेत्यादि। "वैष्णवत्वं हि सहजमि"ति पुष्टिप्रवाहमर्यादायां पौष्टिकानां सामान्यलक्षणाच्चादृशः, "न कर्मबन्धनं जन्मे"तिपाद्मात्तद्व्यतिरेकेण केवला "अविद्याकामकर्मभिरि"तिवाक्योक्तभ्रमणसाधककामकर्मासंसृष्टा या क्रीडासाधिका भगवन्माया, तया गृहे गृहाश्रम एव "पश्यन्ति ते मे" इत्यत्रोक्तरीत्या तदनुभवन्, "पुँष्ट्या विमिश्राः सर्वज्ञा" इति तेषां विशेषलक्षणात्सर्वं भगवदाशयपर्यन्तं जानन् भगवदीयः "यावन्न मयि ते

श्रीवल्लभटि०—

कत्वम् । प्रकृतेऽर्थात् क्रीडैव प्रार्थ्यत इति तद्बाध्यबाधकविरोधाच्च तज्जनितासक्तिनिषेधप्रार्थना । तेन त्वन्माययाऽऽसक्तचित्तस्य ममात्मादिषु सख्यं भूयान्नेतरमायासक्तचित्तस्य लोकवदिति मूलार्थः पर्यवस्यति। तथा चेति। लोके कर्मसम्बन्धमन्तरा पुरुषार्थाननुभवस्तथा तं विनान तदनुभवः। "तस्मिन् दृष्टे परावर" इति

१ भा. १०, ७, ६,। २ बहिर्मुखभाव इत्यर्थः। मर्यादा अप्येवं बहिर्मुखा जायन्ते इति सुबोधिनी। ३ पु० प्र० म०।

तया गृह एव चतुर्विधपुरुषार्थसुखमनुभवन् भगवदीय इति द्वितीया मुक्तिरियमेव मुख्या, आशीरिति सर्वान्ते क्रियाप्रयोगः। हे नाथ ? मर्यादाज्ञानमोक्षो मे मा भूयादिति ॥

॥ इति श्रीमत्प्रभुचरणकृता वृत्रासुरचतुःश्लोकीविवृतिः संपूर्णा ॥

टिप्पणी—

या तत्संबन्धराहित्येन केवलं भगवन्मायया लौकिकासक्तिसंबन्धरहितया गृह एव लीलारूपचतुर्विधपुरुषार्थसुखमनुभवन् भावप्रकारेण लोकवेदातीतप्रभुस्वरूपेण सह सर्वलीलानुभवं कुर्वन् भगवदीयः स्वतन्त्रभक्त इति द्वितीया पुष्टिपुष्टिमार्गीया मुक्तिरित्यर्थः।

[२६] तदुदाहरणं तु स्वामिन्य एवावगन्तव्याः, एतस्यैव सकलफलमूर्द्धन्यफलत्वज्ञापनायाहुः—इयमेवेति। इयमेव नान्या मुख्याखिलफलेषु, आशीरिति ज्ञापनाय सर्वान्ते पद्यनिष्ठार्थजातनिरूपणान्ते भूयादित्याशीर्वादार्थक. क्रियापदप्रयोग इत्यर्थः ॥

प्रकाशः—

नाथे"तिविज्ञप्तिश्लोकोक्तरीत्या भगवता स्त्रीयत्वेन निश्चित इति द्वितीया पुष्टिपुष्टिकृता मुक्तिः। तथा च गृह एव तयानुभवत्वेन मर्यादापुष्टमुक्तव्यावृत्तत्वे सति "[1]निर्गुणो मदपाश्रय"इत्येकादशे गुणातीतकर्तृलक्षणाद्भगवदीयत्वेन त्रिविधलौकिककर्तृव्यावृत्तत्वं पुष्टिमिश्रपुष्टजीवत्वं तेषां स्वरूपं तेन रूपेण यावज्जीवं स्थितिः सेत्यर्थः। अत्रापि पूर्वकक्षा यादवादौ, उत्तमा श्रीमदुद्धवादौ ज्ञेया, "नोद्धवोऽण्वपि मन्न्यूनो यद्गुणैर्नार्दित" इति कर्मबन्धव्यतिरेकस्य "वृवणश्च मे मोहमहान्धकार" इत्यत्र "प्रसारितः सृष्टिविवृद्धये त्वये"ति भगवन्मायया देहाद्यासक्तेः, 'अथापि तदभिप्रेतं जानन्नि'ति तादृशत्वस्य स्फुटत्वादिति।

[२६] एवं पुष्टिमार्गे द्विविधं मोक्षं निश्चित्य "शुद्धाः प्रेम्णातिदुर्लभा" इत्यत्र विचारितानां शुद्धपुष्टानां फलस्य स्वरूपस्य चेतोप्यधिकत्वं हृदि कृत्वा प्रकृतानामेतदन्ततां ज्ञापयितुमाहुः—इयमित्यादि, इयमेव, नैवोधिकेत्यर्थः।

नन्वत्रायमेवाशय इत्यत्र किं मानमिति चेत् उच्यते। अत्र "भक्तानांगृह एव विशिष्यत" इतिन्यायोपक्षेपात् तद्व्याख्याने साधनं भक्तिः फलं मोक्षस्तथापि फलदशातः साधनदशैवोत्तमेतिकथनेन "अनिच्छतो गतिमण्वीं प्रयुङ्क्ते"इति मुक्तिदित्सासूचनात्। शुद्धपुष्टानां तु मुक्तीच्छायामपि तदनुक्तेरिति जानीहि। न च भक्तानामित्यस्य स्वतन्त्रभक्तानां गोपिकादितुल्यानामिति व्याख्यानान्नैवमिति शङ्क्यं, तस्य साधनदशामात्रोत्कर्षज्ञापनपरत्वात्। अन्यथाफलदशाकथनविरोधापातात्। व्रजस्थेषु वेणुगीते "स्वाश्रयप्रापणं च प्रत्यापत्तिरि"ति प्रत्यापत्तेरेवाङ्गीकारात्।

श्रीवल्लभटि०—

वाक्याद्भगवदीयस्य सर्वकर्मक्षयः पुरुषार्थः। भक्तिमार्गे हरेर्दास्यमित्याद्युक्तचतुर्विधपुरुषार्थसुखमित्यर्थः। अग्रे स्पष्टम् ॥

इति श्रीविठ्ठलरायात्मजश्रीवल्लभकृता"ममोत्तमे"त्यस्य टिप्पणी समाप्ता ॥

१ भा० ११, २९, २६, । २ भा० ३, ४, ३१. । ३ भा० ३, २६, ३९. । ४ बर्हापीडमित्यस्य स० भा० १०; २१, ९. ।

टिप्पणी—

इति श्रीवल्लभाचार्यकृपया विनिरूपितः । ममोत्तमेतिपद्यार्थव्याख्यानार्थो मया मुदा ॥ १ ॥
मयोदितमिदं भक्ता अवलोक्य विचारितम् । भवन्तु सततं श्रीमदाचार्यचरणाश्रयाः ॥ २ ॥
एतत्फलं तत्कृपातो भविष्यति न संशयः । अतस्तदुक्तमार्गेण भजनीयः प्रभुः सदा ॥ ३ ॥
स एव श्रीमदाचार्यपक्षपाती मम प्रभुः । करिष्यति स्वकीयानामैहिकं पारलौकिकम् ॥ ४ ॥

इति श्रीमत्प्रभुपादपद्मदासानुदासहरिदासविरचिता
ममोत्तमेतिपद्यव्याकृतिटिप्पणी समाप्ता

प्रकाशः—नन्वस्त्वेवं, तथापि परमभक्तिस्वरूपे साधने तारतम्याभावात् फलभेदः किंप्रयुक्तो यः स्वरूपं भिनत्तीति चेद्, उच्यते । उत्तरतन्त्रतार्तीयिकतृतीयपादीयाऽ'**क्षरधियां त्ववरोध**" इतिसूत्रोक्तौपसदन्यायेन भगवदिच्छाभेदादेवेत्यवेहि । ततस्तेष्वपि तारतम्यं भ्रमरगीतोक्तसंदेशस्वरूपाज्ज्ञातव्यम् । एकादशीयद्वादशाध्यायस्था '**न रोधयति मां योग**' इत्यारभ्य "**यास्यसे ह्यकुतोभयमि**"त्यन्तात् सर्वात्मभावपूर्वकशरणोपदेशसंदर्भाच्च । तेन पार्थो हि पुष्टिमर्यादायामङ्गीकृतो न तु पुष्टिपुष्टाविति "**न्यासादेशे**"ष्वित्यत्र प्रभुचरणोक्तेः । सात्त्विकप्रकरणोक्तानां तत्सजातीयभाववत्तां चाद्यः, राजसप्रकरणोक्तानां तादृशां चेतरः, तामसप्रकरणोक्तानां तु प्रत्यापत्तिरेवेति लीलापरिकरस्य यथास्थितस्य नित्यत्वमस्यामेव लीलायां सिद्ध्यतीति । किंच पूर्वोक्तोपदेशश्रवणोत्तरमपि"**संशयः शृण्वतो वाचं तव योगेश्वरेश्वर । न निवर्तत आत्मस्थो येन मे भ्राम्यति मन**" इतिश्रीमदुद्धवोक्तेरयं भावोतिदुर्लभो भगवत्परमप्रसादादेव लभ्य इति च । तथाग्रे "**त्वद्भक्तियोगं च महद्विमृग्यं**" "**आख्याही**"ति प्रश्ने '**भक्तियोगः पुरैवोक्त**' इति द्वादशाध्यायोक्तं तत्स्वरूपं स्मारयित्वा "**पुनश्च कथयिष्यामि मद्भक्तेः कारणमि**"त्यादिना तदुपायकथनात्तथा तदुपायत्वज्ञानपूर्वकतत्करणेन प्रसन्नाद्भगवत एव तादृशप्रसादसिद्धिर्नेतरथेत्यादिकमालोचनीयमिति तदेतत्सर्वं हृदि कृत्वोक्तमियमेवेत्यादि । इति दिक् ।

रससिन्धुचन्द्रमुखवारिरुहोद्गतपुष्टिपुष्टिमकरन्दरसः ।
इति कृष्णचन्द्रकृपया विदितः पुरुषोत्तमेन वचसा विवृतः ॥
इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीपीताम्बरतनुजपुरुषोत्तमकृतः
पुष्टिमार्गीयमुक्तिविवृतिप्रकाशः संपूर्णतामगात् ॥

॥ समाप्तोयं ग्रन्थः ॥

---

१ अ० भा० सू० ३. ३. ३३. अत्र उपसदाख्ये कर्मणि एकं तानूनप्त्रपर्याख्यं औपसदं कर्मास्ति, अस्मिन् कर्मणि सर्वेषां ऋत्विजां तानूनप्त्रत्वं समानं, तथापि " अयं यज्ञं यजमानमृच्छेदि"ति यजमानस्य यस्मिन्स्नेहातिशयः तमेव ऋत्विजं यजमानो वृणुते, न हि तत्र समानेषु तेषु कथं इच्छाभेद इति प्रश्नः संभवति। एवमत्रापि भगवदिच्छया फलभेद इत्याशयः । २ भा० ११. १२. १६.

श्रीनवनीतप्रियो जयति।

श्रीमदनमोहनो विजयते।

श्रीप्रभुचरणविरचितवृत्रासुरचतुःश्लोकीविवृति अने श्रीहरिरायजीप्रणीत तट्टिप्पणीनो गुर्जरानुवाद.

પુરુષાર્થ ચાર પ્રકારના છે. ધર્મ, અર્થ, કામ અને મોક્ષ.

શંકા–વૃત્રાસુર કહે છે કે–"હે [1]ઇન્દ્ર! પુરુષના ધર્મ, અર્થ, કામ, આ ત્રિવર્ગ (મેળવવા)-ના પ્રયાસને તો અમારા પતિ શ્રીકૃષ્ણચન્દ્ર દૂર કરે છે." આવી રીતે ભક્તનો ત્રિવર્ગવિઘાત પ્રભુ કરે છે, અને ભક્તને[2] જ મોક્ષની અપેક્ષા નથી, માટે ભક્તિમાર્ગમાં કોઈ પણ પુરુષાર્થ સિદ્ધ થતો નથી એમ કેમ ન કહેવાય?

સમાધાન–એવી શંકા કરશો નહિ, ભક્તિમાર્ગીય ચારે પુરુષાર્થ અમે આ વૃત્રાસુરોક્ત ચતુઃશ્લોકીથી દર્શાવીએ છીએ.

का० १–આ ચતુઃશ્લોકી ભાગવતના ષષ્ઠ સ્કન્ધાન્તર્ગત દ્વાદશાધ્યાયના ૨૪–૨૫–૨૬–૨૭ શ્લોકમાં છે. આ ચાર શ્લોક પહેલાં વૃત્રાસુર ઇન્દ્ર સાથે બોલી રહ્યો હતો, હવે આ ચાર શ્લોકથી તો ભક્તિથી સન્મુખ પ્રકટ થયેલા શ્રીહરિને નિરખીને પ્રાર્થના કરવા લાગ્યો, કારણ કે પુષ્ટિ–કૃપા–એ પ્રકટ ફલવાલી છે.

का० २–આ ચાર શ્લોક પૈકી પ્રથમ શ્લોકમાં વૃત્રાસુર પુષ્ટિમાર્ગીય ધર્મરૂપ સ્મરણ, કીર્તન અને સેવા, આ ત્રણની યાચના કરે છે. અને તે ત્રણનુ જ આ પ્રથમ શ્લોકમાં નિરૂપણ કરાય છે.

का० ३–વૃત્રાસુર પોતાનું ઉત્તમ અધિકારિત્વ દીનભાવથી પ્રાર્થના કરી બતાવે છે. અને એ ઉત્તમાધિકારીનું સાધન કૃપા છે.

ધર્મની પ્રાર્થના કરતા પહેલાં પોતાનું અધિકારિત્વ આ શ્લોકથી સાબીત કરે છે.

अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः।
मनः स्मरेतासुपतेर्गुणानां गृणीत वाक् कर्म करोतु कायः॥ १॥

[हे हरे] हे दुःखना हरनारा प्रभु? [अहं] हुं [तव] तमारा [पादैकमूलदासानुदासः] चरणकमल एज जेनुं मूल छे– आश्रय छे– एवा आपना दासनो दास [भूयः] फरीथी पण [भवितास्मि] अवश्य थइश.

---

[1] त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र॥ भा० ६.–११–२३

[2] "नेच्छन्ति सेवया पूर्णाः" "सालोक्यादिचतुष्टयम्"॥

[मनः] मन [असुपतेः] प्राणपतिना [गुणानां] गुणोनुं [स्मरेत] स्मरण करे–चिन्तवन करे. [वाक्] वाणी [गृणीत] तेना ज गुणोनुं रटन करे, [कायः] शरीर [कर्म] भगवाननी सेवा [करोतु] करो, ॥ १ ॥

ભાવાર્થ—હે દુઃખહર્તા હરિ! હું આપના ચરણકમલ જ જેનું અવલંબન છે એવા આપના દાસનો પણ દાસ પુનરપિ થઇશ. (મારું) મન પ્રાણપતિના ગુણોનું ચિન્તવન કરો, વાણી પ્રાણપતિના ગુણોનું રટન કરો, (મારું) શરીર એ જ પ્રાણપતિની સેવા કરો.

વિવેચન–"હે હરિ! હું ચરણકમલમાં જ આસક્તિવાળા આપના દાસનો પણ દાસ થઇશ" એ આ પૂર્વાર્ધનું સ્વારસ્ય છે.

મોક્ષ ન માગતાં દાસ્ય કેમ માગ્યું?

શ્રીહરિ–પ્રાણી માત્રને પણ દુઃખનો સમૂલ નાશ કરવાની ઇચ્છા હોય છે, તે દુઃખનો સમૂલનાશ મોક્ષ વિના થતો નથી, તો તું મોક્ષ માગવાને બદલે દાસ્ય કેમ માગે છે?

વૃત્રાસુર—આપ શ્રીહરિ છો, આપના હરિ શબ્દમાં જ ઉત્તમ સ્વારસ્ય રહ્યું છે, આપનું દાસ્ય સિદ્ધ થતાં આપ જ દાસોના આધિભૌતિક આધ્યાત્મિક આધિદૈવિક એવા ત્રણે પ્રકારનાં દુઃખોનું નિવારણ કરો છો, હવે આપ કહો છો કે મોક્ષ કેમ નથી માગતો? તેનું ઉત્તર આપું છું–મોક્ષ એ જ્ઞાનથી જ થાય છે. તે જ્ઞાન આપના છ ધર્મ પૈકી એક ધર્મ છે, તેથી તે ધર્મનો આશ્રય કરવા કરતાં આપ સાક્ષાત્ ધર્મી–જ્ઞાનાદિધર્મયુક્ત–પ્રભુનો જ આશ્રય કરવો વધારે યોગ્ય કહેવાય. મોક્ષમાં દુઃખની નિવૃત્તિ પણ આપની જ કૃપાથી છે. તેમ છતાં "પ્રભુકૃપાથી મારું દુઃખ નિવૃત્ત થયું હવે હું સુખી થયો" એવો ભાવ મોક્ષમાં થવો દુર્લભ છે, કારણ કે તેમાં અભેદ થઈ જાય છે, બ્રહ્મમાં લય થઈ જાય છે.

શ્રીહરિ—ત્યારે દાસ્યમાં શી રીતે એવો ભાવ રહેશે.

વૃત્રાસુર—દાસ્યમાં તો હું આપનો દાસ, **આપ** મારા સેવ્ય. હું આપનો સેવક. એવો ભાવ હંમેશ રહે છે.

શ્રીહરિ—તું દાસ્ય શી રીતે સિદ્ધ કરીશ.

વૃત્રાસુર–હું **આપનો** જ છું, એટલે મારે દાસ્ય સિદ્ધ થઈ ચુક્યું છે. આપનો સેવ્ય-સેવકભાવ સહજ છે. જો મને આપનું દાસ્ય સિદ્ધ ન હોય તો આપ મારા ત્રિવર્ગ–(ધર્મ, અર્થ, કામ)નો વિઘાત આ આસુરી અવસ્થામાં પણ ક્યાંથી કરો, આપે મારા ત્રિવર્ગનો વિઘાત કર્યો તે જ આપની આ દાસ ઉપર કૃપા સૂચવે છે.

શ્રીહરિ–તારો મોક્ષમાં અધિકાર નથી એવું તારા ત્રિવર્ગ શબ્દ કહેવાથી સમજાય છે, તો તું હાલ દાસ કેમ થતો નથી? (અને દાસ થઇશ એવું ભવિષ્ય વચન કેમ કહે છે?)

વૃત્રાસુર–હે પ્રભો! આ જીવ તો આપનો જ છે. પણ આ દેહ હાલમાં આસુર છે. તેથી આપના દાસ્યને લાયક નથી, તેથી આ આસુર દેહનો ત્યાગ કરી અપર જન્મમાં દાસ અવશ્ય થઇશ. અને આપના અનુગ્રહથી જ અવશ્ય એમ જ થશે. કારણ કે હું આપનો છું, તેથી મને સંપૂર્ણ વિશ્વાસ છે.

શંકા–વૃત્રાસુરે સાક્ષાત્ પ્રભુનું દાસ્ય ન માગતાં **દાસાનુદાસત્વ** કેમ માગ્યું?

સમાધાન–સાક્ષાત્પ્રભુના દાસ્યની માગણી કરવાથી પોતાની દીનતામાં ખામી આવે, માટે દીનતાસૂચક દાસાનુદાસત્વ જ માગ્યું, અથવા પ્રભુનું દાસ્ય મળતાં (ગોપીજનોને જેમ હુંપદ અથવા મોટાઈપણાનું અભિમાન આવ્યું હતું તેવી રીતે) સર્વોત્તમ–મોટાઈપણાનું અભિમાન થાય તો જરૂર કોઈ ભક્તનો અપરાધ થઈ જાય, અને પ્રભુના દાસ્યથી પણ ભ્રષ્ટ થઈ જાય, વૃત્રાસુરે આવો કડવો અનુભવ[1] પૂર્વજન્મમાં ચિત્રકેતુ અવસ્થામાં અનુભવ્યો છે, માટે પરમ્પરાદાસ એટલે દાસના પણ દાસ થઈ રહેવું એ જ દીનતા છે.

વૃત્રાસુરને ચારે પુરુષાર્થનો અધિકાર કેવી રીતે છે?

વૃત્રાસુર "तव" ઇત્યાદિ પદ સમુદાયથી મોક્ષાદિ ક્રમથી–મોક્ષ, અર્થ, કામ, ધર્મ, એવા ક્રમથી પોતાનો અધિકાર સાબીત કરે છે–

ભજનાનન્દાનુભવ ઇન્દ્રિયવાલાથી જ થાય—

"ભજનાનન્દનો અનુભવ" એ પુષ્ટિમાર્ગમાં મોક્ષ છે. અને તે દેહ, ઇન્દ્રિય પ્રાણ અન્તઃકરણવાળાને થઈ શકે છે. એવું ભા૦ સ્કન્ધ–૧૦–૨૧–૭ [2]શ્લોકમાં નિરૂપણ કર્યું છે કે– "ઇન્દ્રિયવાળાને પ્રભુના મુખારવિન્દદર્શનરૂપી ફલ છે, બીજું એથી ઉત્તમ ફળ નથી, આ વાત અમે યથાર્થ જાણીએ છીએ, કારણ કે અમે શ્રુતિરૂપા છીએ. શું ફલ છે? સખા સહિત ગાયોને વનમાં ચરાવતા શ્રીકૃષ્ણચન્દ્ર અને શ્રીબલદેવના મુખનું દર્શન થાય એનાથી શું ઉત્તમ

---

૧ પૂર્વજન્મમાં આ વૃત્રાસુર ચિત્રકેતુ નામનો રાજા હતો, તેને હજારો સ્ત્રીઓ છતાં પુત્ર ન હતો, અંગિરા ઋષિએ તેને હર્ષશોકપ્રદ એક પુત્ર આપ્યો. પટરાણી ઉપર દ્વેષથી બીજી રાણીઓએ તે પુત્રને ઝેર આપ્યું તેથી તે મરી ગયો. રાજા વિગેરે સર્વ બહુ જ શોક કરવા લાગ્યાં ત્યારે નારદ સહ અંગિરા ઋષિ આવી તેના શોકને દૂર કર્યો, અને વૈરાગ્યાદિ ભાવથી યુક્ત ચિત્રકેતુને એક ઉત્તમ વિદ્યા આપી કે જે વિદ્યાને સાત દિવસ પર્યન્ત જલનું ભક્ષણ કરીને ધારણ કરી. જેથી તેને વિદ્યાધરનું આધિપત્ય મળ્યું, પુનઃ આજ વિદ્યાના પ્રતાપથી સાક્ષાત્ ભગવાનના ચરણકમલમાં તેનો જવાનો અધિકાર સિદ્ધ થયો, ભગવાને તેને સાક્ષાત્ દર્શન આપ્યાં, મહાન્ ભક્ત તરિકે તેની પ્રશંસા કરી, ભગવાન્ અન્તર્ધાન થઈ ગયા.

એક વખતે વિમાનમાં બેશી જતાં ચિત્રકેતુએ સભામાં પાર્વતીજીને આલિંગન કરી બેઠેલા શંકરને જોયા. દેવીના સાંભળતાં હાસ્ય કરતો ચિત્રકેતુ તાણીને બોલવા લાગ્યો, "જટાધર તપસ્વી હોઈ આપ નિર્લજ્જની પેઠે પ્રાકૃત માણસ માફક સ્ત્રી સાથે સભામાં બેસો છો તે તદ્દન અયોગ્ય છે." શંકર તો આ વાત સાંભળી મૌન રહ્યા પણ પાર્વતીજીથી આ વાત સહન ન થઈ, તેથી ક્રોધસહ શ્રાપ આપતાં કીધુ કે "પાપવાળી આસુરી યોનિમાં તારો અવતાર થશે." કારણ કે તેં અમારું અપમાન કર્યું છે. હવે પુનઃ અપમાન ન કરીશ" ભક્ત ચિત્રકેતુએ શાપ પ્રણામ સાથે સ્વીકારી ક્ષમા માગી રથમાં બેશી ચાલ્યો. પુનઃ જ્ઞાન વિજ્ઞાનયુક્ત અવિસ્મૃત પૂર્વજન્મવૃત્તાન્ત વૃત્રરૂપે આ અવતાર થયો છે–ભા૦ સ્ક. ૬. અ. ૧૪–૧૫–૧૬ ઉપરથી.

(૨) अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः ।
वक्त्रं व्रजेशसुतयो रनुवेणु जुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ॥ ७ ॥

ફલ હોઇ શકે? અથવા બંસી બજાવતા અને અનુરાગ ભર્યા કટાક્ષને છોડતા મુખારવિન્દ જેમણે નિરન્તર પાન કર્યું છે, એ જ ઇન્દ્રિયોવાળાને ઉત્તમોત્તમ ફલ છે." શ્રીઆચાર્યચરણે તે જ શ્લોકની સુબોધિનિજીની [1]કારિકામાં આજ્ઞા કરી છે કે—ભગવાનની સાથે વાર્તાલાપ કરવો, દર્શન કરવું, અધરામૃતનું પાન કરવું, ભોગ, રોમાંચોદ્‌ગમ, વેણુનાદશ્રવણ, સુંઘવું, આપની પાસે જવું, આપનું સર્વ ધ્યાન-ભાવન કરવું, એ જ ઇન્દ્રિયવાળાને ઉત્તમોત્તમ ફલ છે. મોક્ષ પણ આ જ છે. અન્ય નથી.

ઉપર દર્શાવેલા મોક્ષના સ્વરૂપમાં વૃત્રાસુરનો અધિકાર—

વૃત્રાસુરે तव શબ્દથી મોક્ષાધિકાર દર્શાવ્યો છે. શ્રીરાસપંચાધ્યાયીના [2]"वीक्ष्यालकावृत" આ શ્લોકમાં મોક્ષ કરતાં દાસ્યની સર્વોત્કૃષ્ટતા દર્શાવતાં કહે છે કે—"લોકમાં ત્રણ પ્રકારના પુરુષાર્થ ધર્મ, અર્થ, કામ, અને ચારપ્રકારનો મોક્ષ, અને સ્વર્ગ, એ આ લોકમાં ઉત્તમોત્તમ કહેવાય, પરંતુ હમારે એ સર્વ દાસ્યમાં ઉત્તમ રીતે પ્રાપ્ત થાય છે. તેમાં સાલોક્ય, સામીપ્ય, સારૂપ્ય, સાયુજ્યાદિ ચાર પ્રકારનો મોક્ષ તે પણ દાસ્ય આગળ નકામો છે." તેમ જ તેના [3]આગળના શ્લોકના વિવરણમાં [4]"**સ્વતઃ પુરુષાર્થરૂપ દાસ્ય અમને આપો.**" એમ કહેલું છે આ પ્રમાણે શ્રુતિરૂપા ગોપીજનોના વાક્યોથી સિદ્ધ થાય છે કે—જેમ ગોપીજનોએ મોક્ષાધિકારરૂપ બલ્કે મોક્ષથી ચઢીયાતું **પ્રભુનું દાસ્ય** માગ્યું હતું તેમ વૃત્રાસુરે तव એ પદથી મોક્ષાધિકારરૂપ **પ્રભુનું દાસ્ય** માગ્યું છે. અને તેથી વૃત્રાસુરનો મોક્ષાધિકાર સિદ્ધ થાય છે. મૂલ શ્લોકમાં त्वत्पादैकमूल० ન કહેતાં तव पादैक मूल० કહેવાનો [5]આશય પણ એ જ છે **તમારો** દાસાનુદાસ થાઉં.

હવે વૃત્રાસુરનો કામાધિકાર સિદ્ધ કરે છે

" पादौ एव एकं मूलं येषां ते,"

અર્થાત્ ભગવાનના ચરણ એજ જેમનું મૂલ છે, એવાં ગોપીજનો જ છે. કારણ કે "ચરણકમલ એજ અમારુ મૂલ છે" એવાં ગોપીજનોનાં વચનોથી જ સાબીત થાય છે.

(१) श्रीसुबोधिनीजी-भगवता सह संलापो दर्शनं मिलितस्य च। आश्लेष. सेवनं चापि स्पर्शश्चापि तथाविध ॥
अधरामृतपानञ्च भोगो रोमोद्गमस्तथा। तत्कूजितानां श्रवणमाघ्राणं चापि सर्वतः ॥
तदन्तिकगतिर्नित्यमेवं तद्भावनं सदा। इदमेवेन्द्रियवतां फलं मोक्षोपि नान्यथा ॥
यथान्धकारे नियतास्थितिर्नाक्ष्णोः फलं भवेत्। एवं मोक्षोपीन्द्रियादियुक्तानां सर्वथा न हि ॥

(२) वीक्ष्यालकावृतमुखं तव कुण्डलश्रि गण्डस्थलाधरसुधं हसितावलोकम्।
दत्ताभयञ्च भुजदण्डयुगं विलोक्य वक्ष.श्रियैकरमणंच भवाम दास्यः ॥

(३) " तत्तात्मना पुरुषभूषण देहि दास्यम् "

(४) हे अनन्तकोटीकन्दर्पलावण्यरूप! स्वतः पुरुषार्थरूपं दास्यं देहि.

(५) જો त्वत्पादैकमूल० પદ રાખે તો त्वत् શબ્દના અર્થનો સબંધ ચરણ તરફ જાય અને તેથી તમારા ચરણ એજ જેનુ મૂલ છે એવો અર્થ થાય અને तव पादैकमूल० કહેવાથી तव શબ્દનો સંબંધ દાસ્ય તરફ જાય છે (ચરણ જોડે જતો નથી) તેથી ઉત્તમ રહસ્ય એ નિકળ્યુ કે "ગોપીજનોએ જેમ ભગવાનને કહ્યુ કે તમારું દાસ્ય આપો તેમ વૃત્રાસુરે પણ તમારો શબ્દ વાપરી દાસાનુદાસત્વ માગ્યુ" એ માર્મિક રહસ્ય છે.

"तत्रः प्रसीद वृजिनार्दन तेऽङ्घ्रिमूलं प्राप्ताः"

આ શ્લોકમાં કહે છે કે—"હે પાપને દૂર કરનારા અમે આપના ચરણારવિન્દના મૂલમાં આવ્યા છીએ. અમારા ઉપર પ્રસન્ન થાઓ." આ શબ્દોથી વૃત્રાસુરનો કામ પુરુષાર્થમાં અધિકાર સિદ્ધ થયો, જો પાદૈકમૂલ એવા સમર્થ ભક્તોનો આશ્રય ન કરે તો પોતાનો કામ મનોરથ–સિદ્ધ નજ થાય, માટે પાદૈકમૂલ શબ્દ કામાધિકાર દર્શાવે છે. શ્રીસુબોધિનીજીની કારિકામાં કહ્યું છે કે—"*ભજનાનન્દ સ્ત્રીઓમાં સારી રીતે સ્થિર થાય છે અને તે દ્વારા પુરુષોને પણ ભજનાનન્દ પ્રાપ્ત થશે." આવી રીતે પાદૈકમૂલ ગોપીજનોના દાસત્વથી વૃત્રાસુરને પણ પોતાનો ભજનાનન્દાનુભવરૂપી કામ અવશ્ય સિદ્ધ થાય જ તેથી પાદૈકમૂલ શબ્દ કામાધિકારદ્યોતક છે.

હવે વૃત્રાસુરનો અર્થાધિકાર દર્શાવે છે.

"દાસાનુદાસ" શબ્દ વૃત્રાસુરના અર્થાધિકારનું દ્યોતન કરે છે.[1]

હવે વૃત્રાસુરનો ધર્માધિકાર સિદ્ધ કરે છે.

तव दासत्वं અર્થાત્ પ્રભુની પાસે અન્ય કંઈ ન માગતાં દાસત્વ જ માગ્યું તે ધર્માધિકાર સૂચવે છે.[2]

શંકા—વૃત્રાસુરને સત્સંગ નહિ છતાં આવો ભાવ શી રીતે થયો ?

સમાધાન—"પૂર્વે હું ચિત્રકેતુ નામનો દાસ હતો પુનરપિ તેવો જ દાસ થઇશ." વૃત્રાસુરના એવા વચનથી તે ભક્ત હતો એવું સિદ્ધ થાય છે. તેથી તેને સત્સંગની જરૂર નથી.

આ પ્રમાણે પોતાનો ચાર પ્રકારનો અધિકાર પ્રતિપાદન કરીને ચારે પુરુષાર્થમાં વધારે અને પ્રથમ ઉપયોગી ધર્મની માગણી કરે છે. **મન** પ્રાણપતિના ગુણોનું સ્મરણ કરે, ચિન્તન કરે. મૂલ શ્લોકમાં "*ગુણાનામ્*" એ કર્મણિ ષષ્ઠી છે. કર્મણિ ષષ્ઠી થાય ત્યારે ષષ્ઠીનો પણ દ્વિતીયા જેવો વ્યવહાર કરી શકીએ, તેથી "પ્રાણપતિના ગુણોને" એવો અર્થ કરી શકીએ. પ્રભુનું સ્મરણ કરવામાં પોતાને જ સુખ થાય છે. એવું "*स्मरेत्*" એ આત્મનેપદનું સુંદર રહસ્ય છે.

વાણી પ્રાણપતિના ગુણોનું કીર્તન કરે, રટન કરે. કીર્તનમાં પણ પોતાને જ અધિક આનંદ થાય છે. પરને આનંદ થાય એ તો [3]આનુષંગિક છે. માટે જ गृणीत ક્રિયાપદ આત્મનેપદ છે.

---

*ततो हि भजनान्दः स्त्रीषु सम्यक् विधार्यते ॥
तद्द्वारा पुरुषाणांच भविष्यति न चान्यथा ॥ सु० का०

૧ કારણ કે પુષ્ટિમાર્ગમાં પ્રભુ જ અર્થરૂપ છે. "प्रभुः सर्वसमर्थो हि ततो निश्चिन्ततां व्रजेत्" च. श्लो. આ શ્લોકની ટીકામાં "समर्थ" શબ્દનો "सम्यक् चासौ अर्थश्च" સમાસ કરી સારા અર્થરૂપ પ્રભુ છે, એવો અર્થ કરે છે. આ અર્થરૂપી પુરુષાર્થ ત્યારે જ સિદ્ધ થાય કે જ્યારે પ્રભુના નિતાન્ત દાસની કૃપા થાય, માટે દાસાનુદાસ એ શબ્દ અર્થાધિકારદ્યોતક થયો.

૨ કારણ કે પુષ્ટિમાર્ગમાં "सर्वदा सर्वभावेन भजनीयो व्रजाधिपः" એ ન્યાયે પ્રભુની સેવા–દાસત્વ–એ જ ધર્મ છે.

૩ મુખ્ય કાર્ય કરતાં વચમાં જે સિદ્ધ થઈ જાય તે આનુષંગિક કહેવાય.

કાયા પ્રાણપતિની જ સેવા કરે, પ્રભુને જેમ સુખ થાય તેવી રીતે દાસ સેવા કરે છે, પોતાના સુખની લેશ પણ દરકાર નથી. તેથી તેમાં સ્વાર્થ નથી પણ પરાર્થ જ છે, માટે "करोतु" એ પરસ્મૈપદ ક્રિયાપદ છે. સ્મરણ અને કીર્તન શ્રવણને અધીન હોવાથી અને શ્રવણ પણ અન્યના કથનની અપેક્ષાવાળો હોવાથી "स्मरेत"એ વિધિ કહ્યો. સેવામાં સ્નેહ જ નિયામક છે, સ્નેહ જ સર્વ રીતે પ્રધાન છે, અને તે સ્નેહ પ્રભુકૃપાથી જ સાધ્ય હોવાથી ત્યાં "करोतु" એવું આશીર્લિંગ ક્રિયાપદ મુકયું છે. ૧

એ પ્રમાણે ધર્મનું નિરૂપણ કરીને હવે **અર્થનું નિરૂપણ કરે છે.**

न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा समञ्जस ? त्वा विरहय्य काङ्क्षे ॥ २ ॥

अन्वयार्थः—[हे समञ्जस ?] हे सकलार्थरूप, [त्वा] तने, [विरहय्य] त्यजीने, [नाकपृष्ठं] इन्द्रासननने, [न] नथी, [काङ्क्षे] इच्छतो, [च] अथवा, [पारमेष्ठ्यं] ब्रह्मासनने, [न] नथी, [काङ्क्षे] इच्छतो, [सार्वभौमं] साम्राज्यने, [न] नथी, [काङ्क्षे] इच्छतो, [रसाधिपत्यं] रसातलादिकना आधिपत्यने, [न] नथी, [काङ्क्षे] इच्छतो, [योगसिद्धीः] अणिमा, महिमादि सिद्धिने, [न] नथी, [काङ्क्षे] इच्छतो, [वा] अथवा [अपुनर्भवं] अक्षरब्रह्ममां लयादिकने, [न] नथी, [काङ्क्षे] इच्छितो.

ભાવાર્થ—હે સકલ અર્થરૂપ! આપને ત્યજીને ઇન્દ્રાસનને નથી ઇચ્છતો, બ્રહ્માસનને નથી ઇચ્છતો, સામ્રાજ્યને નથી ઇચ્છતો, રસાતલાદિકના આધિપત્યને નથી ઇચ્છતો, યોગની સિદ્ધિને નથી ઇચ્છતો, અથવા સાયુજ્યાદિ લયને પણ નથી ઇચ્છતો, અર્થાત એ સર્વને ત્યજીને આપને જ ઇચ્છું છું. ॥ ૨ ॥

વિવેચન—પ્રાકૃત સત્વગુણ રજોગુણ અને તમોગુણ એમ ત્રણ ગુણથી લૌકિક અર્થ ત્રણ પ્રકારનો છે, અને વૈદિક પણ ત્રણ પ્રકારનો છે. તે છએ પ્રકારના અર્થને ભગવાનના ઐશ્વર્ય, વીર્ય, યશ, શ્રી, જ્ઞાન અને વૈરાગ્ય આ છ ધર્મથી ક્રમે ક્રમે ત્યાગ કર્યો છે. અર્થાત્ ભગવાન્માં છ પ્રકારનું ઐશ્વર્ય બિરાજે છે તેથી તે લૌકિક વૈદિક છ પ્રકારના અર્થની ભગવાન્થી જ સિદ્ધિ થઇ જાય છે માટે તેની અપેક્ષા નથી, તેથી તેનો વૃત્રાસુર ત્યાગ કરે છે. ૧

આ શ્લોકની અંદર છ વસ્તુનો અનાદર વૃત્રાસુરે કર્યો. તેમાં ઇન્દ્રાસન, સામ્રાજ્ય, અને રસાતલાદિકનું ઐશ્વર્ય આ ત્રણ લૌકિક છે. મોક્ષ, બ્રહ્માસન, અને સિદ્ધિઓ એ ત્રણ વૈદિક છે.૨

આપણે ઉપર લૌકિક અને વૈદિકનો વિચાર કરી ગયા તેમાં જે લૌકિક છે તે પ્રવૃત્તિધર્મે સાધ્ય હોવાથી તે સામાન્ય છે. (ઇન્દ્રાસન, સામ્રાજ્ય, અને રસાતલાદિકનું ઐશ્વર્ય આ ત્રણેમાં અનહદ પ્રવૃત્તિ જ ભરેલી છે. અને પ્રવૃત્તિ ધર્મથી તે પ્રાપ્ત થાય છે. દાખલા તરીકે અનેક યજ્ઞોથી ઇન્દ્રાસન મળે, યજ્ઞકર્મ પ્રવૃત્તિધર્મ છે. માટે જે પ્રવૃત્તિધર્મથી સાધ્ય છે તે **સામાન્ય** જ કહેવાય. મોક્ષ થવો, બ્રહ્માસન, સિદ્ધિઓ મેળવવી. એ સર્વ વૈરાગ્યાદિક નિવૃત્તિધર્મથી મળી શકે છે, તેથી તે વૈદિક અને પર—શ્રેષ્ઠ—છે. ૩

ઉપર છ અર્થો ગણાવ્યા (ઇન્દ્રાસન, સામ્રાજ્ય, ઐશ્વર્ય, મોક્ષ, બ્રહ્માસન, સિદ્ધિઓ,) તે પ્રવૃત્તિધર્મથી સાધ્ય હો કે નિવૃત્તિધર્મથી સાધ્ય હો, પણ છ પૈકી સાધકને એક જ અર્થ સિદ્ધ થાય છે, કોઇને મોક્ષ મળે તો બ્રહ્માસન ન મળે, ઇન્દ્રાસન મળે તો મોક્ષ ન મળે, પરંતુ ભગવાન્ સર્વરૂપ હોવાથી ભગવાન્માં એ છએ અર્થ હોય છે. (અને તે છએ અર્થનો ભક્તોને એકી વખતે અનુભવ થાય છે. એ આ વૃત્રાસુરનું વચન સ્પષ્ટ સાબીતી આપે છે.) ૪II

ઉપર છ વસ્તુ સમજાવીને છએ મહાન્ અર્થરૂપ છે. પણ છએ એકી વખતે મળવી મુશ્કેલ છે. પરંતુ પુષ્ટિમાર્ગમાં તો સાક્ષાત્ ભગવાન્ જ અર્થરૂપ હોવાથી વૃત્રાસુરને છએ અર્થનો અનુભવ ભગવાન્માં થતાં વૃત્રાસુર અન્ય સર્વમાં નિરપેક્ષતા દર્શાવે છે. એજ રહસ્ય આ શ્લોકમાં દર્શાવામાં આવે છે. ૫

(૧) આરંભમાં **લૌકિકસાત્વિક અર્થનું નિરાકરણ કરે છે**–હું નાકપૃષ્ઠની ઇચ્છા રાખતો નથી, નાક એટલે સ્વર્ગ, અને પૃષ્ઠ એટલે રાજાસન, અર્થાત્ ઇન્દ્રાસનને નથી ઇચ્છતો. હું ઇન્દ્રાસનની શા માટે ઇચ્છા કરું, "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" પુણ્ય ક્ષીણ થતાં તે કાલાન્તરે મૃત્યુલોકમાં આવે છે. હું તો આપનામાં જે **અખણ્ડિત ઐશ્વર્ય** વિદ્યમાન છે તેને પ્રત્યક્ષ અનુભવું છું, માટે મારે ઇન્દ્રાસનની ઇચ્છા નથી.

(૨) **વૈદિકરાજસ અર્થનું નિરાકરણ કરે છે**–હું પારમેષ્ઠ્યની ઇચ્છા રાખતો નથી, પરમેષ્ઠી એટલે બ્રહ્મા એ રજોગુણાવતાર છે, તેથી તેનું સ્થાન પણ રાજસ જ હોય એ સ્વાભાવિક છે. આ બ્રહ્માસનમાં એક મહદ્દુઃખ છે. "ब्रह्मणा सह मुच्यन्ते" "બ્રહ્મલોકસ્થ સર્વે લોકની બ્રહ્માની સાથે મુક્તિ થાય છે" આ વાક્યથી પરતંત્રતાથી ફલસિદ્ધિ થઇ એમ નિશ્ચય થાય છે. અને પરતંત્રતાથી ફલસિદ્ધિ જ્યાં થાય ત્યાં સ્વવીર્યની હાનિજ થાય. હું તો આપનામાં **અખણ્ડ વીર્યનું** દર્શન કરી રહ્યો છું તેથી સ્વવીર્યની હાનિરૂપ બ્રહ્માસનની મારે ઇચ્છા નથી,

(૩) **લૌકિકરાજસ અર્થનું નિરાકરણ કરે છે**–હું સાર્વભૌમની ઇચ્છા રાખતો નથી, સાર્વભૌમ એટલે સર્વભૂમિનું ઇશ્વિરત્વ, સર્વભૂમિનું ઇશ્વિરત્વ પ્રાપ્ત થાય તો સર્વ લોકમાં યશ ફેલાય. યશ પણ દાનાદિક કરે તો પ્રાપ્ત થાય માટે તે યશ દાનાદિકને અધીન ગણાય, એટલું જ નહિ પણ તે નાશવંત છે. "तद्वायसं तीर्थमुशन्ति मानसा" પ્રભુના યશનું વર્ણન જેમાં ન આવે તે વાયસતીર્થ કહેવાય છે; આવી રીતે સ્વરૂપથી પણ દુષ્ટ જ છે. પરિણામે તો "राज्यान्ते नरकं ध्रुवम्" નરકગામિ છે. માટે તેનું પરિણામ પણ દુષ્ટ જ છે. હું તો આપનામાં અવિગીત અનિન્દિત–યશને પ્રત્યક્ષ નિરખી રહ્યો છું. માટે મારે સામ્રાજ્ય પણ નથી જોઈતું.

(૪) **લૌકિકતામસ અર્થનું નિરાકરણ કરે છે**–હું રસાધિપત્યની ઇચ્છા નથી રાખતો, રસ શબ્દ તો માત્ર એક અર્થસૂચક છે પણ તેનાથી નીચેના પાતાલના–સર્વે લોક સમજવાના છે. પૃથ્વીની અપેક્ષાએ એ લોકમાં ભોગ અધિક હોય છે. ભોગ શ્રી–લક્ષ્મીથી જ થાય, બલિરાજાને શ્રી–લક્ષ્મી–અપાર હતી, આવા સમર્થની શ્રીને આપે હરી લીધી અને પુનઃ આપે જ અર્પી, અર્થાત્ શ્રી આપને અધીન છે. હું તો આપનામાં કોઇનાથી હરી ના શકાય એવી અખંડ શ્રીને નિત્ય બિરાજેલી જોઉં છું તેથી મારે રસાધિપત્યની પણ ઇચ્છા નથી.

(૫) વૈદિકતામસ અર્થનું નિરાકરણ કરે છે–હું યોગસિદ્ધિની ઇચ્છા રાખતો નથી. કારણ કે અપક્વયોગિઓ પોતાને પ્રાપ્ત થએલી સિદ્ધિના બલથી મનમાનતા વિષયો સરજી ભોગ કરે છે, અને તેથી તે યોગથી ભ્રષ્ટ થાય છે. જો યોગિઓનું જ્ઞાન સ્થિર હોય તો આવી દશા ન આવે, પણ તેમનું જ્ઞાન ભ્રાન્ત જ છે. હું તો આપનામાં નિત્ય અખણ્ડિત જ્ઞાનને નિરખી રહ્યો છું, માટે તે સિદ્ધિઓ મારે ના જોઈએ.

(૬) વૈદિકસાત્વિક અર્થનું નિરાકરણ કરે છે–હું મોક્ષની પણ અપેક્ષા નથી રાખતો, "सत्वात्सञ्जायते ज्ञानम्" "સત્વગુણથી જ્ઞાન થાય છે" અને જ્ઞાનથી મોક્ષ થાય છે. આ પ્રમાણે જ્ઞાન સાત્વિક છે, તો સાત્વિકજ્ઞાનથી થતો મોક્ષ પણ સાત્વિક જ કહેવાય. મોક્ષ અક્ષરબ્રહ્મમાં થતો હોવાથી તે ગણિતાનન્દ છે. આપના આનંદનો એક અંશ જ છે. આપ તેવા નથી, આપ તો પૂર્ણાનન્દ છો, અન્ય પણ મોક્ષમાં ખામી છે. અક્ષરમાં લય થયા પછી તેમાં સેવ્યસેવકભાવથી થતી સામાસામી કોઈ પણ જાતની પ્રીતિનો આનંદ મળતો નથી, તેથી આપની લીલારસનો અનુભવ તેમાં નથી મળતો, કારણ કે તેમાં સમુદ્રમાં ફેંકેલા સિન્ધાલુણની માફક અભેદ થઈ જાય છે. માટે તેને ખરેખર અર્થ કહી શકાય નહિ. આ જ હેતુથી 'મોક્ષ' શબ્દ નહિ લખતાં "અપુનર્ભવ" પદ લખ્યું છે. સારાંશ કે તેમાં પુનઃ જન્મનો અભાવ–પુનઃ જન્મ ન લેવો પડે–એ વિના કંઈ પણ વિશેષ માહાત્મ્ય નથી.

આપ તો **પૂર્ણાન્દ** છો. ભક્તની સદૈવ અપેક્ષા રાખનાર છો. હે ભગવન્ આપે પ્રતિજ્ઞા કરી છે કે–"मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि" "મારા ભક્ત મારાથી અન્ય કંઈ પણ જાણતા જ નથી. મને જ સર્વસ્વ ગણે છે. હું પણ તેમનાથી અન્ય જરાપણ જાણતો નથી." આવી રીતે આપ ભક્તની અપેક્ષા રાખનારા છો, તેથી આપને ભક્ત સિવાય અન્યમાં જરા પણ રાગ નથી, અર્થાત્ અન્યમાં વિરાગ અને ભક્તમાં જ રાગ, તેથી આપનામાં **અખણ્ડિત વૈરાગ્ય** વિદ્યમાન છે, તેથી મને અપુનર્ભવ–મોક્ષ–ની પણ ચાહના નથી,

મર્યાદામાં મોક્ષને ચતુર્થ પુરુષાર્થ તરીકે સ્થાન આપ્યું છે. જ્યારે પુષ્ટિમાં તેનો ત્યાગ કરાવાને **અર્થ** નામના પુરુષાર્થની ગણત્રીમાં ગણ્યો છે, માટે ભક્તિમાર્ગમાં તેનો અનાદર છે, એ જ મોક્ષથી અધિક આનંદદાયક પુષ્ટિમાર્ગની બલિહારી છે. (મૂલમાં "वा" શબ્દ છે તેનું આ સ્વારસ્ય છે.)

આ પ્રમાણે વૃત્રાસુરે બધા અર્થનું નિરાકરણ કરી દીધું. તો ભગવાન્ તેને પુછે કે "ત્યારે તારે કેવા અર્થની અપેક્ષા છે?" તો તેમને ઉત્તર આપતાં કહે છે કે–હે સમંજસ? હે સકલ અર્થથી પૂર્ણ? આપને ત્યજીને ઉપર કહેલા અર્થોની હું ઇચ્છા રાખતો નથી. પરંતુ સર્વાર્થરૂપ આપની જ અર્થરૂપે ઇચ્છા રાખું છું, સદૈવ મારા **અર્થરૂપ** આપ જ હો, અથવા પૂર્વોક્ત અર્થને ત્યજીને આપની જ અર્થરૂપે ઇચ્છા રાખું છું,

તાત્પર્યાર્થ—પુષ્ટિમાર્ગમાં ભગવાન જ ભક્તોના અર્થરૂપ છે.

પુષ્ટિમાર્ગીય તૃતીય કામ પુરુષાર્થનું નિરૂપણ

अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः ।
प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविन्दाक्ष दिदृक्षते त्वाम् ॥ ३॥

अन्वयार्थः-[हे अरविन्दाक्ष!] हे कमलनेत्र! [अजातपक्षाः] पांख विनानां [क्षुधार्ताः] भूख्यां [खगाः] पक्षीनां बचां [मातरमिव] माताने जेम [क्षुधार्ताः] भूख्यां [वत्सतराः] नानां वाछरडां [स्तन्यं यथा] दुधने जेम [विषण्णा] खेदयुक्त [प्रिया] वहाली स्त्री [व्युषितं] प्रवासे गयेला [प्रियमिव] वहाला पतिने जेम [मनः] मन [त्वां] आपने [दिदृक्षते] जोवानी इच्छा राखे छे.

ભાવાર્થ—જેને પાંખ ઉત્પન્ન નથી થઈ એવાં તથા ભૂખ્યાં થયેલાં પક્ષીનાં બચ્ચાં જેમ પોતાની માતાને જોવા આતુર બને, તથા ભૂખ્યાં નાનાં વાછરડાં જેમ પાન કરીને ક્ષુધા મટાડવા માટે દુધના દર્શનની ઈચ્છા રાખે, પતિના પ્રવાસથી ખેદ પામેલી વહાલી સ્ત્રી પરદેશ ગયેલા વહાલા પતિને નિરખવા જેમ અધિરી બને, તે પ્રમાણે હે કમલનયન! મન આપના દર્શનની ઈચ્છા રાખે છે.

વિવેચન—આ શ્લોક ઉપર વચનામૃત કરતાં શ્રીગુસાંઈજી આરમ્ભમાં ચાર કારિકાઓથી સંપૂર્ણ શ્લોકનું તાત્પર્ય સમજાવે છે. તેનો અર્થ આ પ્રમાણે-(૧) શ્રીપુષ્ટિમાર્ગ-પ્રભુના અનુગ્રહમાર્ગ-માં શ્રીહરિના રૂપની દર્શનેચ્છા થવી, તે તૃતીય પુરુષાર્થ **કામ** કહેવાય છે અને આવા પ્રકારનો કામ તે અલૌકિક કામ કહેવાય છે. આ અલૌકિક કામ સમજાવવા માટે શ્રીવ્યાસજીએ મૂલ શ્લોકમાં ત્રણ દૃષ્ટાન્ત આપ્યાં છે, પક્ષી, વાછરડાં, અને સ્ત્રી.

(૨) આ ત્રણ દૃષ્ટાન્ત પૈકી પહેલાં બે દૃષ્ટાન્ત લૌકિક છે. કારણ કે તેમાં લૌકિક ક્ષુધારૂપ કામ બતાવ્યો છે. ત્રીજું સ્ત્રીનું દૃષ્ટાન્ત શાસ્ત્રીય છે અને તેજ ઉત્તમ છે. એક દાર્ષ્ટાન્ત[1] સમજાવવા માટે ત્રણ દૃષ્ટાન્ત આપવાનું કારણ એ છે કે લૌકિક દૃષ્ટાન્ત ત્રણ ગણા થઈને જ અલૌકિક દાર્ષ્ટાન્તમાં દૃષ્ટાન્ત થઈ શકે છે.

(૩) જો એમ ન હોય તો એક જ દૃષ્ટાન્ત મૂલમાં આપવું હતું તેમતો નથી કર્યું, તેથી માલુમ પડે છે કે લૌકિક ત્રણ ગણા દૃષ્ટાન્ત થઈને જ અલૌકિક સિદ્ધાન્ત સમજાવી શકે છે. પહેલાં બે દૃષ્ટાન્તમાં બતાવેલો કામ તે લૌકિક છે કારણ કે તે ક્ષુધારૂપે વર્ણવ્યો છે. ત્રીજા પ્રિયાના દૃષ્ટાન્તમાં બતાવેલો કામ શાસ્ત્રીય છે. કારણ કે તે રસશાસ્ત્રની રીતિથી વર્ણવેલો છે. (૪) ત્રીજું પ્રિયાનું જ દૃષ્ટાન્ત ઉત્તમ છે, તેનું કારણ એ છે કે પ્રભુ "रसो वै सः" ઇત્યાદિ વાકયથી રસસ્વરૂપ છે, અને મૂલમાં જેમ વહાલી સ્ત્રી એક છે અને રસભાવયુક્ત પ્રિયને ચાહે છે, તેમ અહિં વૃત્રાસુર પણ એક છે અને અનેક સ્વરૂપયુકત પ્રભુના બીજા કોઈ પણ સ્વરૂપને નહિં ચાહતાં રસરૂપ પ્રભુને જ ચાહે છે.

આ શ્લોકમાં "હે કમલનેત્રવાળા!" આવું સંબોધન આપવાનો હૃદયંગમ અર્થ-વૃત્રે પ્રભુના નયનને કમલની ઉપમા આપીને મનને ભ્રમર સૂચવ્યું છે, એટલે કે કમલ વિકાસ પામે ત્યારે જ ભ્રમરની ઈચ્છા પૂરી પડે છે, તેમ આપ પણ મારી ઉપર વિકસિત દૃષ્ટિ કરો. બીજું પણ તાત્પર્ય એ સૂચવ્યું છે કે આપનું સ્વરૂપ સૌન્દર્ય જ એવું મનોહર છે કે મન આપની સ્વરૂપ સુન્દરતા નિરખવા લલચાય જ.

---

૧ જે વાતને સમજાવવા દૃષ્ટાન્ત અપાય છે તે દૃષ્ટાન્તથી સમજાવાતી વાત દાર્ષ્ટાન્ત કહેવાય છે.

શંકા—અહિં એક એવી શંકા ઉદ્ભવે છે કે જેમ લોકમાં 'ત્યાં જવા મારું મન છે' 'મારુ મન આ ચીજ જોવા ઇચ્છા રાખે છે' વગેરે વ્યવહારમાં મન ઉપર પોતાનો કાબુ દર્શાવય છે, ત્યારે વૃત્રે પણ (मम मनः) ' મારું મન' આપના દર્શનની ઇચ્છા રાખે છે આમ કહેવું જોઇએ!

સમાધાન—લોકમાં જે મન ઉપર પોતાપણું દર્શાવવાનો વ્યવહાર છે તે ભ્રાન્ત છે, કારણ કે જે ચીજ ઉપર આપણો કાબુ હોય તે ચીજ ઉપર આપણે ચાહે તેમ કરી શકીયે છીએ. જેમકે મારુ ઘર તો ઘર આપણા તાબેની ચીજ હોવાથી આપણે તેને ભાંગી શકીએ, રીપેર કરાવી શકીએ, પણ તે પ્રમાણે મન આપણા તાબામાં નથી. ઉલ્ટા આપણે તેના તાબામાં છીએ તેથી જ મન જ્યાં ચાહે ત્યાં આપણને લઇ જાય છે. તેથી લોકનો જે મન ઉપર પોતાપણાનો વ્યવહાર છે તે ભ્રાન્ત જ કહેવાય. પણ વૃત્ર તો ભ્રાન્ત નથી તે સમજે છે કે મન સ્વતન્ત્ર છે તેથી તેણે (मम) 'મારુ મન' આવો સ્વાધીનતાસૂચક અસ્મત્ શબ્દનો પ્રયોગ નથી કર્યો

શંકા—વ્યવહારમાં આપણે એમ બોલીએ કે ચક્ષુ જોવાની ઇચ્છા રાખે છે અને અહિં વૃત્રે તો "મન જોવાની ઇચ્છા રાખે છે" એવું તે કેમ કહ્યુ!

સમાધાન—તેનું તાત્પર્ય એ છે કે સર્વે ઇન્દ્રિયો મનના સમ્બન્ધથી જ કાર્ય કરી શકે છે, જો મન આપણું ન હોય તો નેત્ર ખોલીને ઉભા હોઇએ છતાં જોઈ શકતા નથી તેથી વૃત્ર સમજે છે કે સર્વે ઇન્દ્રિયોમાં પ્રધાન મન, છે અને તેનેજ પ્રભુના સ્વરૂપમાં લગાડવું કે જેથી બધી ઇન્દ્રિયો પોતપોતાના વ્યાપાર જોવું, સાંભળવું, વગેરેમાં નિષ્ફલ થઈ પ્રભુમા આવી લાગશે, અને તેથી મને ભજનાનન્દનો અનુભવ થશે, કારણ કે સર્વે ઇન્દ્રિયોથી જ ભજનાનન્દનો અનુભવ થઈ શકે છે, તેથી વૃત્રે 'મન જોવાની ઇચ્છા રાખે છે' તેવું કહ્યુ

શ્લોકમાં 'दिदृक्षते' ક્રિયાપદમાં આત્મનેપદ મુકયું છે તેનું રહસ્ય.

આ શ્લોકમાં વૃત્રે માગેલો પૂર્ણકામ તે પોતાને અપેક્ષિત છે, પ્રભુને અપેક્ષિત નથી જ, કારણ કે તે તો પૂર્ણ કામ છે. તેથી ફલને એટલે કે પૂર્ણ કામરૂપી ફલને પોતાના તરફનું છે એવું દર્શાવવા આત્મનેપદ મુકયું છે.

'चंचलं हि मनः कृष्ण' આ ગીતાવાક્યથી 'મન ચંચલ છે' એવું સાબીત થાય છે. તેમજ મનને ભ્રમરની ઉપમા આપી છે, તેથી ભ્રમર જેમ વિકાસ પામેલા બીજા કમલ પાસે પણ જાય છે, તેમ મનમાં પણ બીજી ઇચ્છા ઉદ્ભવવા સંભવ છે, તેના અભાવ માટે દ્દષ્ટાન્ત આપે છે કે જેમ ક્ષુધાથી પીડિત પક્ષીનાં નાનાં બચ્ચાં પોતાની માતા ભક્ષ્ય લેવા ગયેલી છે તે કંઇક લઈ આવી આપશે આવી આશાથી જેમ પોતાની માતાને જોવા ઇચ્છા રાખે છે તેમ મન આપને જોવાની ઇચ્છા રાખે છે.

આ દ્દષ્ટાન્તમાં ગુસાંઇજીએ દર્શાવેલાં દૂષણો.

(૧) પક્ષીઓનું ભક્ષ્ય કંઇ નિયત હોતું નથી, તેમજ ક્ષુધાથી પીડિતને તો કોઇ પણ ચીજથી કામ સરે છે, તે (क्षुधार्ताः) ભૂખ્યાં આવું વિશેષણ આપવાથી પણ ભક્ષ્યની અનિયતતા પ્રાપ્ત થાય છે અને ભક્ષ્યની નિયતતા ન હોવાથીજ મૂલમાં પણ ભક્ષ્યનું નામ જેમ બીજા દ્દષ્ટાન્તમાં (स्तन्यं) (દુધ) આવું પદ મુકી દર્શાવ્યું છે, તેવું કોઈ પણ પદ મુકી દર્શાવ્યું નથી. તેમજ આ દ્દષ્ટાન્તમાં (अजातपक्षाः) (જેને પાંખો ઉત્પન્ન નથી થઈ) આવું

વિશેષણ પક્ષીઓને આપ્યું છે, તેથી પાંખ ઉત્પન્ન થયા પછી પક્ષીઓ માતાને જોવાની ઇચ્છા રાખતાં નથી અર્થાત્ પક્ષીઓની દર્શનેચ્છા સદા એક સરખી નથી તેથી કાલની અનિયતતા ...પ એટલે કે પાંખ ઉત્પન્ન નથી થઈ તે વખત સુધી જ પછી નહિં આવું એક દૂષણ આ દ્રષ્ટાંતમાં પ્રાપ્ત થાય છે.

(૨) બીજું દૂષણ ક્ષુધાથી પીડિત છે માટે માતાના દર્શનની ઇચ્છા રાખે છે તેથી ક્ષુધાની ઉપાધિ પણ માતાના દર્શનમાં કારણ હોવાથી નિરુપધિક પ્રેમથી માતાના દર્શનની ઇચ્છા ન કહેવાય, તેથી ક્ષુદ્રુપ ઉપાધિએ કરેલું આવું બીજું દૂષણ આવે છે.

(૩) ત્રીજું, વિષય જે ભક્ષ્ય તે નિશ્ચિત નથી તેથી વિષયની અનિયતતા પણ છે. તો આ પ્રમાણે ઉપરોક્ત ત્રણ દૂષણથી પ્રથમ દૃષ્ટાન્ત દૂષિત છે. તેથી બીજું દૃષ્ટાન્ત આપે છે કે-ભૂખ્યાં નાનાં વાછરડાં જેમ દુધની ઇચ્છા રાખે છે, તેમ મન આપને જોવા ઇચ્છા રાખે છે. આ દૃષ્ટાન્તમાં પણ નાનાં વાછરડાં કહેવાથી મોટાં થયાં એટલે તેની દુધની ઇચ્છા નષ્ટ થાય છે પછી તેની માતાને જોવાની ઇચ્છા રહેતી નથી એટલે આ દૃષ્ટાન્તમાં પણ કાલની અનિયતતા-કાલની અવધિ-બતાવી છે, અને ક્ષુધાથી પીડિત આવા વિશેષણથી ક્ષુધાની ઉપાધિ પણ બતાવી છે, તેથી આ દૃષ્ટાન્તમાં બતાવેલો પ્રેમ પણ સોપાધિક છે અને સાવધિક છે, તેથી નિર્દુષ્ટ ત્રીજું દૃષ્ટાન્ત વહાલી સ્ત્રીનું આપે છે. વહાલી સ્ત્રી પરદેશ ગયેલા વહાલા પતિને જેમ જોવા ઇચ્છા રાખે તેમ હે પ્રભો? મન આપના દર્શનની ઇચ્છા રાખે છે. આ દૃષ્ટાન્તમાં પ્રિય પદના પ્રયોગથી જ પતિપત્ની બન્નેમાં નિરુપધિક સ્નેહ છે એવું પ્રતીત થાય છે, કારણ કે કોઈ પણ ઉપાધિથી કરવામાં આવેલો સ્નેહ તે સ્નેહ ન કહેવાય પણ તે તો સ્વાર્થ જ કહેવાય તેવા ઉપાધિ વગરના સ્નેહનું નિરૂપણ કરતાં કોઈ સ્ત્રી કહે છે કે "[1]જે સ્નેહના ઉત્પન્ન થવામાં કંઈ પણ કારણ જોવામાં નથી આવ્યું, અને જે સ્નેહને કંઇક અપરાધ થઈ જતાં ઘટતો નથી જોયો તથા જે સ્નેહને બહુ નમન કરવાથી વધતો નથી જોયો આવા અમૃતને પણ ટક્કર મારે તેવા તથા ત્રણ લોકના દુઃખને નાશ કરનારા એવા સદા એક રસ અને સ્વરૂપથી જ મોટા તે પ્રેમને વાણીથી હું શું વર્ણવું-વાણીથી વર્ણવી ન માપી શકાય તેવા પ્રેમને વાણીના માપમાં શામાટે લાવું. તો આવો પ્રેમ ઉપાધિથી રહિત અને શુદ્ધ કહેવાય કારણ આવા સ્નેહમાં કંઇપણ ઉપાધિનું દૂષણ નથી. પરદેશે ગયેલા વહાલા પતિમાં સ્ત્રીનો સ્નેહ પતિના પરદેશ ગયાના સમયથી આરમ્ભી ને આગમન સુધી એક રસ-એક સરખો-રહે છે તથી આ દૃષ્ટાન્તમાં કાલની અનિયતતાનું દૂષણ પણ નથી અને ખેદ યુક્ત રહે છે તેથી વિષય પણ નિશ્ચિત છે અન્યથા ખેદ થાય નહિં. આ પ્રમાણે પહેલાં બે દૃષ્ટાન્તોમાં દર્શાવેલા દોષ પૈકી એક પણ દોષ આ દૃષ્ટાન્તમાં નથી તેથી આજ દૃષ્ટાન્ત યુક્ત છે.

વૃત્ર પોતે એક છે તેથી દૃષ્ટાન્તમાં પણ (પ્રિયા) આવું એક વચન વાપર્યું, એમ ન હોય તો જેમ પહેલાં બે દૃષ્ટાન્તમાં બહુવચન વાપર્યું છે તેમ આંહી પણ બહુવચનનો ઉપયોગ કરવામાં શી હરકત હતી. બીજું પણ એકવચનનું તાત્પર્ય એ છે કે ઘણે ઠેકાણે તેવો સ્નેહ હોતો નથી, આ વાત પણ જણાવવા એક વચન વાપરી સહુની છેલ્લે આ દૃષ્ટાન્તનું નિરૂપણ

---

१ आविर्भावदिने न येन गणितो हेतुस्तनीयानपि क्षीयेतापि न चापराधविधिना नत्या न यो वर्धते पीयूषप्रतिवादिनस्त्रिजगतीं दुःखद्रुहः साम्प्रतं प्रेम्णस्तस्य गुरोः किमद्य करवै वाङ्निष्ठतागौरवम् ॥

કર્યું છે. પહેલાંના બે દૃષ્ટાન્ત પણ એક દેશના અભિપ્રાયથી થઇ શકે છે તેથી તેનું નિરૂપણ પણ અત્રે અયોગ્ય ન ગણાય.

સ્ત્રી, પતિના વિરહ કાલમાં કેવલ ખેદ કરીને જ નથી રહેતી પરન્તુ વહાલાના નિમિત્ત વિવિધ રસભાવોને પોતાના અન્તઃકરણમાં પ્રકટાવે છે, નહિતર તેનું જીવન જ ન થઇ શકે કારણ કે–વિપ્રયોગકાલમાં પતિવિષયક વિવિધ રસભાવો જ જીવવાનું સાધન હોય છે. કદાચિત્ કોઈ સ્ત્રી, પતિના વિરહકાલમાં પતિનિમિત્ત અનેક રસ ભાવોને પ્રકટાવ્યા વિના પણ જીવે તો તે પ્રિયા જ ન કહેવાય, તેથી જ એક પરદેશ ગયેલા પુરુષે નવીનશ્યામ મેઘની પંક્તિને જોઇને કહ્યું છે કેઃ–[1]'યદિ પ્રિયા ન જીવતી હોય તો મને ઘેર જવાથી શું ફલ? અને જો તે જીવતી હોય તો તે પ્રિયતમા જ કેમ કહેવાય? તેથી મારે ઘેર જવું નિષ્ફલ છે એમ સમજી પ્રવાસી પોતાને ઘેર જતો નથી' ઇત્યાદિ વાક્યોથી સિદ્ધ થાય છે કે–પતિના પરદેશ ગમન પછી પ્રિયાનું જીવન પતિવિષયક વિવિધ રસભાવોથી જ ટકી રહે છે.

વૃત્ર તો પુરુષ છે અને દૃષ્ટાન્ત સ્ત્રીનું આપ્યું છે, તેથી અહીં એ રહસ્ય સમજવાનું છે કે સ્ત્રીના દૃષ્ટાન્તથી સ્ત્રીજાતીનો રસ ભાવ અત્ર વિવક્ષિત છે, અને તે રસ અતિગોપ્ય છે તેથી ખુલ્લી રીતે નહિ કહેતાં પ્રિયાપદથી સૂચવ્યો છે. ખેદનો તો બહાર પણ અનુભવ થઈ શકે છે, તેમ બીજાઓ પણ ખેદને જાણી શકે છે તેથી 'ખેદ વાળી' આવું વિશેષણ આપ્યું છે. આ પ્રમાણે અનેક રસ ભાવથી યુક્ત અને ખેદયુક્ત એવું મન આપના દર્શનની ઇચ્છા રાખે છે. કેવલ દર્શન માત્રની ઇચ્છા નથી, કારણ કે દર્શનની ઇચ્છા તો બીજા શ્લોકમાં અર્થ પુરુષાર્થ તરીકે માગી લીધેલું છે તેથી, હે નાથ! પ્રિયાની પેઠે અનેક રસભાવયુક્ત મન આપને જોવા તલપે છે આવો તાત્પર્યાર્થ અહીં સમજવો.

મન ઉપર 'મારું' શબ્દનો પ્રયોગ ન મુકવાનું વૃત્રનું આંતરિક મર્મ.

'મારું'–શબ્દનો પ્રયોગ દેહાધ્યાસનો સૂચક હોવાથી દેહાધ્યાસથી જ મુકી શકાય છે. પરન્તુ હમણાં તો વૃત્ર સમજે છે કે આ દેહ રસાનુભવ કરવાને યોગ્ય નથી બલ્કે પ્રતિબન્ધક છે અને તેથી જ વૃત્રને આ દેહમાં અધ્યાસ પણ નથી. તેથી જ આંહી અસ્મત્ શબ્દનો (મારું) આવો પ્રયોગ પણ નથી કર્યો. દૃષ્ટાન્તમાં તો દેહાધ્યાસ દૃઢ છે તેથી જ (प्रिया) આવો દેહાધ્યાસ યુક્તનો પ્રયોગ કર્યો છે, મનનો નહિ. વૃત્રને પણ દેહાધ્યાસ જો હોત તો प्रियेवाहं दिदृक्षे (પ્રિયાની પેઠે હું જોવાની ઇચ્છા રાખું છું.) આ પ્રમાણે પ્રયોગ કરતા કારણ કે તેવો પ્રયોગ કરવાથી દૃષ્ટાન્ત પણ બરોબર યુક્ત થાય છે તે ન કહેતાં (प्रियेव मनः दिदृक्षते) પ્રિયાની પેઠે મન જોવાની ઇચ્છા રાખે છે તેવું કહ્યું તેનું તાત્પર્ય એજ છે કે વૃત્રને દેહનો અધ્યાસ નથી જ.

રસમાર્ગીય કામ રસ દૃષ્ટિથી જ પુરણ કરજો આવું (હે કમલ નેત્ર!) આવા સંબોધનથી[2] પ્રાર્થ્યું છે. ॥૩॥

---

૧ किं गतेन यदि सा न जीवति जीवति प्रियतमा कथं भवेत् । इत्यवेक्ष्य नवमेघमालिकां न प्रयाति पथिकः स्वमन्दिरम् ॥

૨ સામે ઉભેલાને નામ દઇને બોલાવવું તે સંબોધન કહેવાય.

તૃતીય શ્લોકમાં પુષ્ટિમાર્ગીય તૃતીય પુરુષાર્થ કામનું નિરુપણ કરી આ ચતુર્થ શ્લોકમાં વૃત્ર પ્રભુ પાસે મોક્ષરૂપી ચતુર્થ પુરુષાર્થની પ્રાર્થના કરે છે. આ શ્લોકમાં **પુષ્ટિમર્યાદામોક્ષ** તથા **પુષ્ટિપુષ્ટિમોક્ષ** આમ બે પ્રકારના મોક્ષનું નિરુપણ છે, તેથી આ શ્લોકનો અન્વય પણ તે બે રીતિથી જુદો જુદો કર્યો છે.

પુષ્ટિમર્યાદા પ્રમાણે શ્લોકનો અન્વયાર્થ.

[हेनाथ ?] हे स्वामिन् ? [स्वकर्मभिः] પોતાનાં કર્મોવડે [संसारचक्रे] સંસારરૂપીચક્રમાં [भ्रमतः] ભ્રમણકરતા [मम] મને [उत्तमश्लोकजनेषु] ભગવદીયોમાં [सख्यं] મૈત્રી [भूयात्] થાઓ [आत्मात्मजदारगेहेषु] દેહ, પુત્ર, સ્ત્રી, અને ઘરમાં [आसक्तचित्तस्य] આસક્તચિત્તવાળા [मम] મને [उत्तमश्लोकजनेषु] ભગવદીયોમાં [सख्यं] મૈત્રી [न] મા [भूयात्] થાઓ.

ભાવાર્થ—હે સ્વામિ ! મ્હારાં પોતાનાં જ અનેક જન્મોનાં કર્મોવડે આ સંસારરૂપી ચક્કરમાં ભ્રમણ કરતા મને ભગવદીયોમાં સખ્ય થાઓ, પણ સંપૂર્ણ વિશ્વને મોહ કરનારી આપની માયાવડે દેહ, પુત્ર, સ્ત્રી, અને ઘર વગેરે અહન્તામમતાસ્પદ પદાર્થોમાં આસક્તમનવાળા મને ભગવદીયોમાં સખ્ય ન થાઓ. એટલે કે ચિત્રકેતુ અવસ્થામાં પણ ભગવદીય એવા નારદ, અંગિરા સાથે સખ્ય હતું પણ તે સખ્ય તો આ ભગવદીયો મને પુત્ર આપશે આવી પુત્રમાં આસક્તિથી થયું હતું અને તેવા સખ્યથી તો મારે એટલું ફરવું પડ્યું તેથી, હે નાથ ! હવે ચિત્રકેતુ અવસ્થામાં પ્રાપ્ત થયેલું અહન્તામમતાસ્પદ સખ્ય મને ન થાઓ.

પુષ્ટિપુષ્ટિ પ્રમાણે શ્લોકનો અન્વયાર્થ.

[हे नाथ!] हे स्वामि! [त्वन्मायया] તમારી લીલોપયોગિની માયાવડે [आत्मात्मजदारगेहेषु] દેહ, પુત્ર, સ્ત્રી, અને ઘરમાં [आसक्तचित्तस्य] આસક્તચિત્તવાળા [मम] મને [उत्तमश्लोकजनेषु] ભગવદ્ભક્તોમાં [सख्यं] મૈત્રી [भूयात्] થાઓ. [स्वकर्मभिः] પોતાનાં કર્મોવડે [संसारचक्रे] સંસારના ફેરામાં [भ्रमतः] ભટકતા [मम] મારુ [उत्तमश्लोकजनेषु] ભગવદીયોમાં [सख्यं] સખ્ય [न] મા [भूयात्] થાઓ.

ભાવાર્થ—હે નાથ ! આપની [1]લીલોપયોગિની માયાવડે દેહ, પુત્ર, સ્ત્રી, અને ઘરમાં

---

૧ લીલોપયોગિની માયા એટલે જે માયાનું પ્રાકટ્ય શ્રીકૃષ્ણચંદ્રપ્રભુની શ્રીવૃન્દાવનમાં રમણેચ્છાથી શ્રીગોકુલમાં થયું અને જે માયા પ્રભુની આધિદૈવિક લીલામાં સ્વીકૃત થયેલા જીવોને જ મોહ કરે તે માયા લીલોપયોગિની કહેવાય.

કૃષ્ણદાસ-શું પ્રભુની આધિદૈવિક લીલામાં વરણ પામેલા જીવને પણ મોહની જરૂર હશે?

વલ્લભદાસ-હા. જો તેમાં જીવને મોહ ન હોય તો ગોપીકાદિ વ્રજભક્તોની પેઠે ક્રીડામાં માનાદિ ન સંભવે, તેથી લીલાપ્રવિષ્ટ જીવને પણ પ્રભુની માયા મોહ કરે છે. તેથી જ લીલોપયોગિ જીવોની પ્રભુએ આધિભૌતિક અવિદ્યારૂપ પૂતનાનો નાશ કર્યો અને તામસ પ્રકરણાન્તર્ગત પ્રમેય પ્રકરણમાં ધેનુકાદિ દુષ્ટોનો નિગ્રહ કરી ભક્તોની આધ્યાત્મિક અવિદ્યા દૂર કરી,

આ બધી ચીજો ભગવત્સેવામાં ઉપયોગિ છે આવું સમજી આસક્તિ કરનારા એવા મને ઉત્તમ શ્લોકજન–ભગવદીયોમાં સખ્ય–સખાભાવ થાઓ, પરન્તુ નિજકર્મોવડે સંસારના ફેરામાં ભ્રમણ કરતા મને ભગવદ્ભક્તોમાં સખ્ય ન થાઓ. અર્થાત્ હે નાથ! મર્યાદામોક્ષ મને ન થાઓ.

હવે આ શ્લોકનું વિવેચન કરતાં શ્રીહરિરાયચરણ આરમ્ભમાં આ પ્રમાણે મંગલાચરણ કરે છે.

श्रीवल्लभाचार्यपदः स्वीयसर्वार्थसंपदः ।
प्रणमामि तदुक्तार्थबोधनाय मुहुर्मुहुः ॥ १ ॥

(પોતાના ભક્તોના ચારે પુરુષાર્થની સંપત્તિરૂપ શ્રીઆચાર્યજી શ્રીમહાપ્રભુજીના ચરણારવિન્દને આપશ્રીની વાણીના અર્થને સમજવા માટે વારંવાર પ્રણામ કરુ છું).

વિવેચન-શ્રી આચાર્યચરણ આ ચતુર્થ શ્લોકમાં મોક્ષનું નિરૂપણ કરે છે. પાછલ ત્રણ શ્લોકોમાં ધર્મ, અર્થ, કામ, આ ત્રણ પુરુષાર્થનું સ્પષ્ટ રીતે પ્રતિપાદન થઈ ચુક્યું છે તેથી હવે તેનું નિરૂપણ ન કરતાં મોક્ષનું નિરૂપણ કરે છે, બીજા માર્ગોના મોક્ષ કરતાં પુષ્ટિમાર્ગીય મોક્ષ વિલક્ષણ છે. તેથી તેમાં સન્દેહ થાય, એ સન્દેહ દૂર કરવાને આ ચોથા શ્લોકમાં મોક્ષનું નિરૂપણ કરે છે.

પુષ્ટિમર્યાદામાં મોક્ષ, તથા બંધનું નિરૂપણ.

કૃષ્ણદાસ–પુષ્ટિ એટલે શું?

વલ્લભદાસ–પુષ્ટિ એટલે પ્રભુનો અનુગ્રહ "पोषणं तदनुग्रहः" પ્રભુની જીવને ફલદાન કરવાની* ઇચ્છા, તે પુષ્ટિ કહેવાય. તે બે પ્રકારની છે કેવલા અને વિશિષ્ટા.† શુદ્ધ અને મિશ્ર. શુદ્ધપુષ્ટિને સાધનની અપેક્ષા નથી, મિશ્રપુષ્ટિને સાધનની અપેક્ષા છે. આનેજ ફલપ્રાપ્તિના ઉપાયરૂપ હોવાથી આપણે માર્ગ પણ કહીએ છીએ. અનુગ્રહ એ ખાસ પ્રભુના ધર્મો પૈકી એક ધર્મ છે. ફલસાધક અનુગ્રહ હોવાથી તેજ માર્ગ છે. આ માર્ગથી મોક્ષનું નિરૂપણ કરાય છે.

કૃષ્ણદાસ–(૨) પુષ્ટિમર્યાદાના બંધ અને મોક્ષ કરતાં પુષ્ટિપુષ્ટિના બંધ અને મોક્ષ જુદી જાતના હશે વારુ?

વલ્લભદાસ–હા. જુદા જુદા છે. પુષ્ટિમર્યાદામાં બન્ધ મોક્ષનું સ્વરૂપ કહું છું તે સાંભળો. અહન્તા અને મમતાના સ્થાનરૂપ સ્ત્રી, પુત્ર, ગૃહ, ધન વિગેરેમાં આસક્તિ

પરન્તુ આધિદૈવિક અવિદ્યાનો નાશ ન કરતા લીલોપયોગિની હોવાથી રહેવા દીધી છે તે એમ સૂચવે છે કે લીલાપ્રવિષ્ટ જીવોને પણ મોહની જરૂર છે.

'अविद्या पूतना नष्टा' 'पञ्चधैवानुभावीऽत्र दुष्टनिग्रहरूपवान् ।
आध्यात्मिकीमविद्यां वै दूरीकर्तुं तथाकृतिः ॥ मु० का०

* "पोषणं तदनुग्रह" इतिवाक्यात् पोषणलीलायाः स्वतन्त्रत्वात् "यस्यानुग्रहमिच्छामि" इतिवाक्याच अनुग्रहो धर्मान्तर एवेति भक्तिहेतुनिर्णये । अत्र तु दृष्टान्त त्वं स्वीकृतं श्रीहरिरायचरणै रिति उभयेषां मत मिश्रितत्वं प्रतिभाति ।

† વિશિષ્ટા એટલે મિશ્રપુષ્ટિ, તે ત્રણ પ્રકારની છે. પુષ્ટિપુષ્ટિ, પુષ્ટિમર્યાદા, પુષ્ટિપ્રવાહ,

રાખવી, અને આસક્તિના સ્થાન શિવાય બાકીના સગાઓમાં સંગ રાખવો એ પુષ્ટિમર્યાદામાં બંધરૂપ છે. આ બંધનનો તથા બંધને ઉત્પન્ન કરનાર અહંતા મમતાનો જે સમૂલનાશ તે પુષ્ટિમર્યાદામાં મોક્ષ છે.

કૃષ્ણદાસ–હવે પુષ્ટિપુષ્ટિના બંધ અને મોક્ષનું સ્વરૂપ કહો.

વલ્લભદાસ–પુષ્ટિમાર્ગમાં મર્યાદામાર્ગ કરતાં બંધ મોક્ષનાં સ્વરૂપ વિપરીત છે. પુષ્ટિમાર્ગમાં તો આસક્તિના સ્થાનરૂપ પુત્ર ધન ગૃહ વિગેરેમાં ભગવદીયત્વે કરીને–ભગવાનને માટે જ આ સર્વ છે એવી બુદ્ધિથી જો આસક્તિ ન કરવામાં આવે અને ભગવદીયોમાં સંગ ન રાખે તો ખરેખર પુષ્ટિમાર્ગમાં બન્ધ કહેવાય છે. અને પુત્રાદિકમાં ભગવદર્થ ઉપયોગી જાણી–ભગવદીય બુદ્ધિથી–તેમાં આસક્તિ રાખે અને ભગવદીયોમાં સંગ રાખે તે પુષ્ટિમાર્ગીય મોક્ષ છે.

કૃષ્ણદાસ–આ તો તદ્દન વિલક્ષણ થયું, જે મર્યાદામાં બન્ધ તે અત્ર ભગવદીય બુદ્ધિથી મોક્ષ. જે મર્યાદામાં મોક્ષ તે અત્ર બંધ.

કૃષ્ણદાસ–[૩] પુષ્ટિ તો શુદ્ધ અને મિશ્ર એવા બે પ્રકારની કહી. તો મોક્ષ પણ બે પ્રકારનો સ્પષ્ટ સમજાવો.

વલ્લભદાસ–સાંભળો. આ પ્રમાણે છે. ચતુર્થ શ્લોકમાં પૂર્વાર્ધ અને ઉત્તરાર્ધથી બે પ્રકારના મોક્ષનું નિરૂપણ છે, પુષ્ટિમર્યાદા મોક્ષનું નિરૂપણ પૂર્વાર્ધમાં છે, ઉત્તરાર્ધમાં પુષ્ટિપુષ્ટિમોક્ષનું નિરૂપણ છે.

૧. પોતાના કર્મોવડે સંસાર ચક્રમાં ભ્રમતાં ભગવદીયોનો સંગ કરવો, તે પુષ્ટિમર્યાદા મોક્ષ છે.

૨. ભગવદીયબુદ્ધિથી પુત્રાદિકમાં આસક્તિ અને ભગવદીયોનો સંગ એ પુષ્ટિપુષ્ટિમોક્ષ છે.

જેવા મોક્ષ બે પ્રકારના છે તેમ ઉપાય પણ બે પ્રકારના છે. પુષ્ટિમર્યાદામાં ભગવાન સાધનની અપેક્ષા રાખે છે અને પુષ્ટિપુષ્ટિમાં સાધનની અપેક્ષા નથી.

કૃષ્ણદાસ–[૪] વાહ મોક્ષનું સુન્દર સ્વરૂપ સમજાવ્યું. પરન્તુ આપ ભગવદીયોનો સંગ કરવાની જરૂર તો બન્ને પ્રકારના મોક્ષમાં બતાવી ગયા તેથી બન્ને મોક્ષ એક સરખા જ લાગે છે.

વલ્લભદાસ–ના. બન્ને પ્રકારના મોક્ષમાં બહુ જ તફાવત છે. હું બન્ધ અને મોક્ષની વ્યવસ્થાથી જે ઉપર તફાવત બતાવી ગયો તે ઉપરાન્ત બીજો મોટો તફાવત છે તે સાંભળો.

પુષ્ટિમર્યાદામોક્ષમાં ભગવાન્ પરોક્ષ રહે છે. અર્થાત્ સાક્ષાત્ દર્શન થતાં નથી, પુષ્ટિપુષ્ટિમોક્ષમાં સાક્ષાત્ દર્શન થાય છે.

કૃષ્ણદાસ–સાબીતી શી?

વલ્લભદાસ–પુષ્ટિમર્યાદામોક્ષમાં શ્રીશુકદેવજીનુ દૃષ્ટાન્ત આપું છું. ભગવાન્ શાસ્ત્રાર્થરૂપ છે, એવું જાણી શાસ્ત્રાર્થ કરનાર શ્રી શુકદેવજીના સખ્યમાં આ વાત સ્પષ્ટ થઈ છે. શ્રીશુકદેવજીના વચનો પણ આ વાતની સાક્ષી પૂરે છે. શ્રીમદ્ભાગવતમાં શ્રીશુકદેવજી શ્રીકૃષ્ણની લીલાનું વર્ણન કરતાં કહે છે કે–

આ બધી ચીજો ભગવત્સેવામાં ઉપયોગિ છે આવું સમજી આસક્તિ કરનારા એવા મને ઉત્તમ શ્લોકજન–ભગવદીયોમાં સખ્ય–સખાભાવ થાઓ, પરન્તુ નિજકર્મોવડે સંસારના ફેરામાં ભ્રમણ કરતા મને ભગવદ્‌ભક્તોમાં સખ્ય ન થાઓ. અર્થાત્ હે નાથ! મર્યાદામોક્ષ મને ન થાઓ.

હવે આ શ્લોકનું વિવેચન કરતાં શ્રીહરિરાયચરણ આરમ્ભમાં આ પ્રમાણે મંગલાચરણ કરે છે.

श्रीवल्लभाचार्यपदः स्वीयसर्वार्थसंपदः ।
प्रणमामि तदुक्तार्थबोधनाय मुहुर्मुहुः ॥ १ ॥

(પોતાના ભક્તોના ચારે પુરુષાર્થની સંપત્તિરૂપ શ્રીઆચાર્યજી શ્રીમહાપ્રભુજીના ચરણારવિન્દને આપશ્રીની વાણીના અર્થને સમજવા માટે વારંવાર પ્રણામ કરુ છું).

વિવેચન- શ્રી આચાર્યચરણ આ ચતુર્થ શ્લોકમાં મોક્ષનું નિરૂપણ કરે છે. પાછલ ત્રણ શ્લોકોમાં ધર્મ, અર્થ, કામ, આ ત્રણ પુરુષાર્થનું સ્પષ્ટ રીતે પ્રતિપાદન થઈ ચુકયું છે તેથી હવે તેનું નિરૂપણ ન કરતાં મોક્ષનું નિરૂપણ કરે છે, બીજા માર્ગોના મોક્ષ કરતાં પુષ્ટિમાર્ગીય મોક્ષ વિલક્ષણ છે. તેથી તેમાં સન્દેહ થાય, એ સન્દેહ દૂર કરવાને આ ચોથા શ્લોકમાં મોક્ષનું નિરૂપણ કરે છે.

પુષ્ટિમર્યાદામાં મોક્ષ, તથા બંધનું નિરૂપણ.

કૃષ્ણદાસ–પુષ્ટિ એટલે શું?

વલ્લભદાસ–પુષ્ટિ એટલે પ્રભુનો અનુગ્રહ "पोषणं तदनुग्रहः" પ્રભુની જીવને ફલદાન કરવાની* ઇચ્છા, તે પુષ્ટિ કહેવાય. તે બે પ્રકારની છે કેવલા અને વિશિષ્ટા.† શુદ્ધ અને મિશ્ર. શુદ્ધપુષ્ટિને સાધનની અપેક્ષા નથી, મિશ્રપુષ્ટિને સાધનની અપેક્ષા છે. આને જ ફલપ્રાપ્તિના ઉપાયરૂપ હોવાથી આપણે માર્ગ પણ કહીએ છીએ. અનુગ્રહ એ ખાસ પ્રભુના ધર્મો પૈકી એક ધર્મ છે. ફલસાધક અનુગ્રહ હોવાથી તે જ માર્ગ છે. આ માર્ગથી મોક્ષનું નિરૂપણ કરાય છે.

કૃષ્ણદાસ–(૨) પુષ્ટિમર્યાદાના બંધ અને મોક્ષ કરતાં પુષ્ટિપુષ્ટિના બંધ અને મોક્ષ જુદી જાતના હશે વારુ?

વલ્લભદાસ–હા. જુદા જુદા છે. પુષ્ટિમર્યાદામાં બન્ધ મોક્ષનું સ્વરૂપ કહું છું તે સાંભળો. અહન્તા અને મમતાના સ્થાનરૂપ સ્ત્રી, પુત્ર, ગૃહ, ધન વિગેરેમાં આસક્તિ

પરન્તુ આધિદૈવિક અવિદ્યાનો નાશ ન કરતા લીલોપયોગિની હોવાથી રહેવા દીધી છે તે એમ સૂચવે છે કે લીલાપ્રવિષ્ટ જીવોને પણ મોહની જરૂર છે.

'अविद्या पूतना नष्टा' 'पञ्चधैवानुभावोऽत्र दुष्टनिग्रहरूपवान् ।
आध्यात्मिकीमविद्यां वै दूरीकर्तुं तथाकृतिः ॥ सु॰ का॰

* "पोषणं तदनुग्रह" इतिवाक्यात् पोषणलीलायाः स्वतन्त्रत्वात् "यस्यानुग्रहमिच्छामि" इतिवाक्याच्च अनुग्रहो धर्मान्तर एवेति मतिहेतुनिर्णये । अत्र तु इच्छारूपत्वं स्वीकृतं श्रीहरिरायचरणै रिति उभयोर्मतं भिन्नभिन्नमिव प्रतिभाति ।

† વિશિષ્ટા એટલે મિશ્રપુષ્ટિ, તે ત્રણ પ્રકારની છે. પુષ્ટિપુષ્ટિ, પુષ્ટિમર્યાદા, પુષ્ટિપ્રવાહ,

રાખવી, અને આસક્તિના સ્થાન શિવાય બાકીના સગાઓમાં સંગ રાખવો એ પુષ્ટિમર્યાદામાં બંધરૂપ છે. આ બંધનનો તથા બંધને ઉત્પન્ન કરનાર અહંતા મમતાનો જે સમૂલનાશ તે પુષ્ટિમર્યાદામાં મોક્ષ છે.

કૃષ્ણદાસ–હવે પુષ્ટિપુષ્ટિના બંધ અને મોક્ષનું સ્વરૂપ કહો.

વલ્લભદાસ–પુષ્ટિમાર્ગમાં મર્યાદામાર્ગ કરતાં બંધ મોક્ષનાં સ્વરૂપ વિપરીત છે. પુષ્ટિમાર્ગમાં તો આસક્તિના સ્થાનરૂપ પુત્ર ધન ગૃહ વિગેરેમાં ભગવદીયત્વે કરીને–ભગવાનને માટે જ આ સર્વ છે એવી બુદ્ધિથી જો આસક્તિ ન કરવામાં આવે અને ભગવદીયોમાં સંગ ન રાખે તો ખરેખર પુષ્ટિમાર્ગમાં બન્ધ કહેવાય છે. અને પુત્રાદિકમાં ભગવદર્થે ઉપયોગી જાણી–ભગવદીય બુદ્ધિથી–તેમાં આસક્તિ રાખે અને ભગવદીયોમાં સંગ રાખે તે પુષ્ટિમાર્ગીય મોક્ષ છે.

કૃષ્ણદાસ–આ તો તદ્દન વિલક્ષણ થયું, જે મર્યાદામાં બન્ધ તે અત્ર ભગવદીય બુદ્ધિથી મોક્ષ. જે મર્યાદામાં મોક્ષ તે અત્ર બંધ.

કૃષ્ણદાસ–[૩] પુષ્ટિ તો શુદ્ધ અને મિશ્ર એવા બે પ્રકારની કહી. તો મોક્ષ પણ બે પ્રકારનો સ્પષ્ટ સમજાવો.

વલ્લભદાસ–સાંભળો. આ પ્રમાણે છે. ચતુર્થ શ્લોકમાં પૂર્વાર્ધ અને ઉત્તરાર્ધથી બે પ્રકારના મોક્ષનું નિરૂપણ છે; પુષ્ટિમર્યાદા મોક્ષનું નિરૂપણ પૂર્વાર્ધમાં છે, ઉત્તરાર્ધમાં પુષ્ટિપુષ્ટિમોક્ષનું નિરૂપણ છે.

૧. પોતાના કર્મોવડે સંસાર ચક્રમાં ભમતાં ભગવદીયોનો સંગ કરવો, તે પુષ્ટિમર્યાદા મોક્ષ છે.

૨. ભગવદીયબુદ્ધિથી પુત્રાદિકમાં આસક્તિ અને ભગવદીયોનો સંગ એ પુષ્ટિપુષ્ટિમોક્ષ છે.

જેવા મોક્ષ બે પ્રકારના છે તેમ ઉપાય પણ બે પ્રકારના છે. પુષ્ટિમર્યાદામાં ભગવાન સાધનની અપેક્ષા રાખે છે અને પુષ્ટિપુષ્ટિમાં સાધનની અપેક્ષા નથી.

કૃષ્ણદાસ–[૪] વાહ મોક્ષનું સુન્દર સ્વરૂપ સમજાવ્યું. પરન્તુ આપ ભગવદીયોનો સંગ કરવાની જરૂર તો બન્ને પ્રકારના મોક્ષમાં બતાવી ગયા તેથી બન્ને મોક્ષ એક સરખા જ લાગે છે.

વલ્લભદાસ–ના. બન્ને પ્રકારના મોક્ષમાં બહુ જ તફાવત છે. હું બન્ધ અને મોક્ષની વ્યવસ્થાથી જે ઉપર તફાવત બતાવી ગયો તે ઉપરાન્ત બીજો મોટો તફાવત છે તે સાંભળો.

પુષ્ટિમર્યાદામોક્ષમાં ભગવાન્ પરોક્ષ રહે છે. અર્થાત્ સાક્ષાત્ દર્શન થતાં નથી, પુષ્ટિપુષ્ટિમોક્ષમાં સાક્ષાત્ દર્શન થાય છે.

કૃષ્ણદાસ–સાબીતી શી ?

વલ્લભદાસ–પુષ્ટિમર્યાદામોક્ષમાં શ્રીશુકદેવજીનું દૃષ્ટાન્ત આપું છું. ભગવાન્ શાસ્ત્રાર્થરૂપ છે, એવું જાણી શાસ્ત્રાર્થ કરનાર શ્રી શુકદેવજીના સખ્યમાં આ વાત સ્પષ્ટ થઈ છે. શ્રીશુકદેવજીના વચનો પણ આ વાતની સાક્ષી પૂરે છે. શ્રીમદ્ભાગવતમાં શ્રીશુકદેવજી શ્રીકૃષ્ણની લીલાનું વર્ણન કરતાં કહે છે કે–

तावन्नन्दादयो गोपा मथुराया व्रजङ्गताः । भा० १०–६–३१,

પૂતનાનો આકાશમાંથી પાત થયો, મહાન્ ખળભળાટ મચી ગયો, બધા ગોપો ભેગા થઇ ગયા, ગોપીઓ શ્રીકૃષ્ણચન્દ્રની રક્ષા કરવા લાગ્યાં, ડાકિની શાકિનીથી રક્ષા કરી, શ્રીકૃષ્ણચન્દ્રને સ્તનપાન કરાવી પલનામાં શયન કરાવ્યું, **તેટલાકમાં નન્દાદિ ગોપો મથુરામાં કંસને કર આપવા ગયા હતા ત્યાંથી વ્રજમાં ગયા.** "મથુરાથી વ્રજમાં ગયા" એ પરોક્ષ વાત થઈ, શુકદેવજીનું હૃદય મથુરામાં છે, તેથી તેમને ભગવાન્ પ્રત્યક્ષ નથી, એ સ્પષ્ટ થયું.

હવે પુષ્ટિપુષ્ટિમાં હું ગોપીજનોનું દૃષ્ટાન્ત આપું છું, આપણી પ્રત્યક્ષ વસ્તુને આપણે આ શબ્દ વાપરી શકીએ, પ્રત્યક્ષમાં 'આ વસ્તુ' પરોક્ષમાં 'તે વસ્તુ' એમ આપણે બોલીએ છીએ, ગોપીજનોને ભગવાન્ પ્રત્યક્ષ હતા, તેમના નેત્ર આગળ શ્રીકૃષ્ણચન્દ્રનું વેણુનાદ કરતું સ્વરૂપ પ્રત્યક્ષ હતું. તેથી ગોપીજનો કહે છે કે–

"नन्दसूनुरयमार्तजनानां नर्मदो यर्हि कूजितवेणुः" भा० १०–३५–४

વેણુનાદ કરનાર, દુઃખીજનોને સુખી કરનાર, **આ** નન્દપુત્ર. ગોપીજનોનું વર્ણન પ્રત્યક્ષ પ્રભુ બિરાજતા હોય એવું જ થયું. હવે સ્પષ્ટ થયું કે મર્યાદામાં પરોક્ષ અને પુષ્ટિમાં પ્રત્યક્ષ પ્રભુ બિરાજે છે, એ મહાન્ ભેદ ભુલાવવો ન જોઇએ.

વૃત્રાસુરને પણ પ્રભુ પ્રત્યક્ષ જ છે. કારણ કે વૃત્રાસુર પણ ગોપીજનોની માફક "त्वन्मायया" **તમારી માયાવડે** મને આસક્તિ થાઓ, એમ **તમારી** શબ્દથી પ્રભુ સાથે પ્રત્યક્ષ વાતચિત કરે છે.

કૃષ્ણદાસ–[પ] તમે કહી ગયા કે પુષ્ટિમર્યાદામાં ભગવાન્ સાક્ષાત્ નથી, એટલે પરોક્ષ બિરાજે છે. અને પુષ્ટિપુષ્ટિમાં ભગવાન્ સાક્ષાત્ છે, પ્રત્યક્ષ દર્શન થાય છે. એ વાત હું બરોબર સમજ્યો, પરન્તુ મને એક શંકા ઉદ્ભવી છે તે પુછવાની રજા લઉં છું.

"ભગવાન્ પરોક્ષ બિરાજતા હોય તો ભગવદ્ભક્તોના સખ્યની અપેક્ષા પણ ભગવાન્ પ્રત્યક્ષ થયા પછી ભગવદીયના સખ્યની શી અપેક્ષા ?

વલ્લભદાસ–તમારી શંકા વિવેચનથી સમજાવો.

કૃષ્ણદાસ–મારી શંકા એ છે કે–ભગવાન્ શાસ્ત્રના અર્થરૂપ છે, સર્વ શાસ્ત્ર ભગવાનનું જ પ્રતિપાદન–ગુણગાન કરે છે. [1]"સર્વ વેદોથી વેદ્ય હું જ છું" એવી ભગવાનની આજ્ઞા છે. "હું ઉપનિષત્ પ્રતિપાદ્ય બ્રહ્મને પુછું છું." "સર્વ વેદાન્તથી પ્રત્યય–જ્ઞાન–જેનું થાય છે એવું બ્રહ્મ છે." આ સર્વપ્રમાણોથી એમ સિદ્ધ થયું કે ભગવાન્ શાસ્ત્રના અર્થરૂપ છે.

આ શાસ્ત્રાર્થરૂપ ભગવાન્ પ્રત્યક્ષ ના થયા હોય તેથી તેમની પ્રાપ્તિ થવા માટે અથવા ભગવાનનું યથાર્થ જ્ઞાન થવા માટે ભક્તના સખ્યની જરૂર છે, કારણ કે ભગવદીયો શાસ્ત્રપ્રમાણે ભગવાનના સ્વરૂપનું પ્રતિપાદન કરે છે સમજાવે છે, તેથી પરોક્ષ ભગવાનને પ્રત્યક્ષ

---

૧ "वेदैश्च सर्वैरहमेव वेद्यः" । "तं त्वौपनिषदं पुरुषं पृच्छामि" । "सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्" (૨–૩–૧. બ્ર૦ ભા૦)

કરવાના ઉપાયોમાં ભગવદીયોનો સંગ ગુણગાન કરવા ઘણો જ ઉપયોગી છે, તે હું કબુલ કરું છું. પરન્તુ ભગવાન્ પ્રત્યક્ષ થયા પછી ભક્તના વચનોથી ભગવાનના સ્વરૂપને સમજવાની જરૂર રહેતી નથી, ભગવાન્ પ્રત્યક્ષ થયા ભગવાનનો પ્રત્યક્ષ અનુભવ કર્યો પછી ભક્ત વચનોની કે ભકતોનો સંગ કરવા જવાની શી જરૂર છે? મારા ધારવા પ્રમાણે વૃત્રાસુરને પણ ભગવાન્ પ્રત્યક્ષ થયા છે, પછી ભગવદીયોના સંગ સખ્ય–માગવાની તેને પણ જરૂર નથી, છતાં સખ્ય કેમ તેણે માગ્યું?

વલ્લભદાસ–હું તમારો પ્રશ્ન સમજ્યો, કે ગુણગાન સાંભળવા કે ભગવત્સ્વરૂપનું જ્ઞાન થવા ભક્તના સખ્યની જરૂર પણ ભગવાન્ પ્રત્યક્ષ થયા પછી સખ્યની શી જરૂર? એ પ્રશ્નનો સાર છે. હું હવે તેનું ઉત્તર આપુ છું. ભાઈ કૃષ્ણદાસ? ભગવાનને ભકતો બહુ વહાલા હોય છે. ભક્તને જેમ પ્રભુની અપેક્ષા છે તેમ પ્રભુને ભક્તની પણ અપેક્ષા છે. ભકતોને પ્રભુ પ્રત્યક્ષ થયા હોય એવા ભકતોની જ અપેક્ષા છે. વાહ પ્રભુ કેવા દયાળુ છે? પ્રભુ ભક્તદ્વારા જ ભક્તને ફ્લ અપાવે છે. માટે ભગવાન્ પ્રત્યક્ષ બિરાજતા હોય તો પણ ભક્તના સખ્યની જરૂર છે. ભગવાન્ ભક્ત વિના ઓળખી શકાય જ નહિ, ભગવદીયો જ ભગવાનને ઓળખાવે. તેથી ભક્ત જે શાસ્ત્રના અર્થરૂપ ભગવાનનું પ્રતિપાદન કરે છે તે જ ખરું, તેથી ભગવાન્ શાસ્ત્રના અર્થરૂપ છે એમાં જરા પણ આઘાત ન થયો, અને પ્રત્યક્ષમાં પણ ભગવદ્ભકતોના સખ્યની અપેક્ષા છે એ સિદ્ધ થયું. મૂળ શ્લોકમાં ઉત્તમશ્લોક–ભગવાન્ અને તેમના જન–ભગવદીયો–આ બન્ને એક જ છે એવું સમજાવાને "ઉત્તમશ્લોક-જન" એવું આખુ પદ મુકેલું છે. માટે ભગવદીયોના સખ્યની જરૂર બન્ને મોક્ષમાં છે.

કૃષ્ણદાસ–(૧) વાહ ભક્તના સખ્યની મ્હોટાઈ હું આજ સમજ્યો. પરન્તુ ભાઈ? ફ્લરૂપ ભગવાન્ પ્રત્યક્ષ બિરાજતા હોય ત્યારે ગુણગાનના સાધનરૂપ ભકતોનું સખ્ય કેવી રીતે ઉપયોગમાં લે છે? અને ભગવાન્ પ્રત્યક્ષ બિરાજ્યા પછી આ શાસ્ત્રના અર્થરૂપ ભગવાન્ છે. એવું ભાન શી રીતે થાય? તે જરા સમજાવશો.

વલ્લભદાસ–સાંભળો. ભગવાન્ પ્રત્યક્ષ હો વા ન હો, તો પણ બન્ને અવસ્થામાં ભગવદીયો ભેગા થઈ ભગવાનના પરાક્રમોને–પ્રેમથી ગાય છે, આજ ફ્લ છે, આને માટે તૃતીયસ્કન્ધના પચીશમા અધ્યાયનો શ્લોક કહું છું.

नैकात्मतां मे स्पृहयन्ति केचित् मत्पादसेवाभिरता मदीहाः ।
येन्योन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौरुषाणि ॥

"મારી સેવામાં પ્રીતિવાલા મને જ ચાહનારા મારા કેટલાક ભકતો આરામાં લય નામના મોક્ષની ઈચ્છા પણ રાખતા નથી, કે જે ભગવદીયો સામાસામી ભેગા મળી મારા ગુણગાનને જોરથી ગાય છે."

ગોપીજનોએ પણ ભેગા મળી ગુણગાન ગાતાં કહ્યું છે કે—

विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् ।

"હે પ્રભો ? આપે વિષજલમાંથી બચાવ્યાં, વ્યાલ રાક્ષસથી બચાવ્યાં, વિગેરે અનેક દુ:ખમાંથી બચાવ્યાં." આવી રીતે ભક્તોના સખ્યનો ઉપયોગ થાય છે, ભગવદીયો ભેગા મળી ગુણગાન કરે, એ જ પરમફલરૂપ છે. જ્યાં ગુણગાન થતાં હોય ત્યાં જ પ્રભુ પ્રકટ બિરાજે છે, ભગવાનના સ્વરૂપનો અનુભવ ભગવદીયોને જ હોય છે. ભગવદીયો આપણને ભગવાનના સ્વરૂપનો અનુભવ કરાવે છે. તેથી આપણને જે અનુભવ થાય છે તે ભગવદીયોને અધીન છે. ભગવદીયોના અનુભવથી જ આપણને ભગવત્સ્વરૂપનો અનુભવ થાય છે, [1]એ જ ફલરૂપ છે. ભગવાન્ પ્રકટ હોય તો પણ ઉપર કહ્યા મુજબ ભગવદીયોના સખ્યનો ઉપયોગ કરવો જ પડે છે; તેથી ભગવદીયોનાં વચનોથી ભગવાન્ શાસ્ત્રાર્થરૂપ છે. એ પણ સિદ્ધ થયું.

કૃષ્ણદાસ–[૭] ભક્તોની જ્યારે એટલી ઉચ્ચ કક્ષા છે કે જેની સાથે–જેના મંડળમાં બેસી પ્રભુના ગુણગાન કરવામાં પ્રભુનો સાક્ષાત્કાર પણ એક અંગ છે એટલે સહાયક છે તો પછી તેવા મહાન્ ભક્તોનું તો વૃત્રે દાસ્ય જ પ્રાર્થવું ઉચિત હતુ સામ્યસંપાદક–બરોબરી કરનારુ–સખ્ય કેમ માગ્યું ?

વલ્લભદાસ–જો કે તેવા મહાનુભાવ ભક્તોનું દાસ્ય જ માગવું એ જ યોગ્ય ગણાય. તો પણ એકાદશસ્કન્ધના ઓગણીશમા અધ્યાયમાં પ્રભુ ઉદ્ધવના પ્રતિ આજ્ઞા કરે છે કે–હે ઉદ્ધવ ! 'मद्भक्तपूजाभ्यधिका' મ્હારા ભક્તોની પૂજા મ્હારા કરતાં વિશેષ કરવી, કારણ કે ભગવાનને પોતાના ભક્તોમાં વિશેષ પ્રીતિ રહે છે બીજાં પણ તેના આગળના શ્લોકોમાં ભક્તિ થવાનાં સાધન ઉપદેશ્યાં છે તેમાં શ્રવણથી આરમ્ભીને દાસ્ય સુધીની ભક્તિને સાધનરૂપ કહેતાં સખ્યને ફળરૂપ ગણ્યું છે તેથી, તથા આ પ્રકરણ પણ ફલનું–મોક્ષનું છે તેથી પણ વૃત્રે તેવા ભગવદીયોનું દાસ્ય ન યાચતાં સખ્ય પ્રાર્થ્યુ છે.

કૃષ્ણદાસ–[૮] આ શ્લોકમાં રહેલા [मम] મ્હારું उत्तमश्लोकजनेषु ભગવદીયોમાં (સખ્ય થાઓ) આવા ષષ્ઠી તથા સપ્તમીવિભક્તિના પ્રયોગથી એમ સમજાય છે કે–વૃત્રે પોતામાં રહેલું જે સખ્ય તે ભગવદીયવિષયક થાઓ. અર્થાત્ વૃત્રે ભગવદીયોને પોતાના સખા સમજવાની પ્રાર્થના પ્રભુ પાસે કરી છે, પરન્તુ તેવી પ્રાર્થના કરવી તે તો અયુક્ત ગણાય, કારણ કે વૃત્ર તો ભગવદીયોને પોતાના સખા સમજે જ તેમાં વળી પ્રાર્થનાની શી જરૂર ? પ્રાર્થનાનું સ્વરૂપ આવું થવું જોઈએ કે હે પ્રભુ ! તે ભગવદીયો મને પોતાનો સખા–મિત્ર સમજે–પોતાના મંડળમાં આપના ગુણનું સભાજન કરવા યોગ્ય સમજે.

વલ્લભદાસ–આપની શંકા યોગ્ય છે તો પણ તેનું ગૂઢ રહસ્ય તમોને કહું છું તે સાંભળો. આંહી વૃત્રે માગેલું સખ્ય, ભક્તિમાર્ગીય મોક્ષ છે તેથી તે મોક્ષરૂપ સખ્ય એક પ્રભુ શિવાય બીજા કોઈને અધીન ન હોઈ શકે, હવે આંહી જો વૃત્ર એમ માગે કે 'ભગવદીયો

૧ તેથી જ આપણને જે ભગવાનના સ્વરૂપનો અનુભવ થાય છે તે ભગવદીયો સાથે ગુણગાનના શેષરૂપ કહેવાય.

મને પોતાનો મિત્ર સમજે' તો તે સખ્ય, ભગવદીયોને અધીન થયું તેથી ભગવદીયોની અનુકૂલતા પ્રમાણે વૃત્રને વર્તવું જોઇએ નહિતર સખ્ય[1] નભી શકે નહિ અને તેઓની અનુકૂલતા પ્રમાણે વર્તવામાં વૃત્રને પરાધીનતા આવે અને પરાધીનતામાં વૃત્રને મુક્ત ન કહી શકાય કારણ કે જેનો મોક્ષ થયો તેનું પારતન્ત્ય ન સંભવે.

કૃષ્ણદાસ–ત્યારે વૃત્રે પ્રભુ પાસે એવી પ્રાર્થના કરવી જોઇએ કે હે નાથ? ભક્તોમાં રહેલો જે સખ્યરૂપ ધર્મ તે મ્હારે અધીન થાઓ એટલે કે તેનું સખ્ય મારે અધીન રહે?

વલ્લભદાસ–તેવી પ્રાર્થનામાં પણ સખ્ય રૂપ મોક્ષને તો પારતન્ત્ય પરતન્ત્રતા જ આવે છે કારણ કે તેવી પ્રાર્થનામાં વૃત્રની અનુકૂલ ભક્તોને રહેવું પડે છે, તેથી સખ્યરૂપ મોક્ષને પારતન્ત્ય–પરતન્ત્રતા–કોઇ પણ રીતે ન આવે તેવી પ્રાર્થના વૃત્ર આંહી આવા શબ્દોથી કરે છે કે–હે નાથ? જેમ ભગવદીયોમાં રહેલો જે સર્વ પ્રાણી ઉપરનો સખ્યરુપ ધર્મ તે મારા વિષયક પણ છે એટલે કે તે ભગવદીયો જેમ પ્રાણી માત્રને પોતાના સખા સમજે છે તેમ મને પણ પોતાનો મિત્ર સમજે છે તેમ હું પણ તે ભગવદીયોની પેઠે સ્વતન્ત્ર રીતિથી તે ભગવદીઓને મ્હારા મિત્ર સમજું. તેથી આ વાત પણ સાથે જ સિદ્ધ થઇ રહે છે કે–ભક્તિમાર્ગીય મોક્ષ પ્રભુ આપે તો જ મળે પણ સાધનથી સાધ્ય–મળે તેવો નથી.

કૃષ્ણદાસ–તમોએ ભગવદીયોના સખ્યને મોક્ષ બતાવ્યો પણ પહેલાં એવું સિદ્ધ થયું છે કે પુષ્ટિમર્યાદા તથા પુષ્ટિપુષ્ટિમાં પ્રભુનાં ચરિત્રોનું [2]સભાજન કરવું તેજ ફ્લ છે, પણ તે ફ્લ તો ભગવદીયોનું સખ્ય પ્રાપ્ત થતાં જો પરતન્ત્રતા પ્રાપ્ત થઇને પ્રભુના ચરિત્રોનું શ્રવણ કરવાનુ જ મળે તો સભાજન કરવાનું ન બને અને ગુણ સભાજન કરવું એ તો ફ્લ છે તે તો ભગવદીયોના સખ્ય પ્રાપ્ત થતાં બનતું નથી તેથી તેવું સખ્ય, મુખ્ય ફ્લરુપ ગુણસભાજનને અટકાવનારુ હોવાથી મોક્ષરૂપ ન કહી શકાય કારણ કે જેમાં પ્રભુનાં ગુણોનું સભાજન થઇ શકતું હોય તેવા સખ્યને જ મોક્ષ કહેવાય?

વલ્લભદાસ–ભગવદીયોના સખ્યને મોક્ષ કહેવામાં કોઇ બાધ આવતો નથી કારણ કે તેઓની સાથે વૃત્રનું સખ્ય થતાં તે ભક્તો ઘણા છે તેથી કોઇ એક વક્તા થાય ત્યારે બીજા શ્રવણ કરે તેમ વૃત્ર પણ કોઇ વખતે ગુણોનું સભાજન કરે ત્યારે બીજા શ્રોતા બની સાંભળે તેથી જેમ સત્રનામક યાગવિશેષમાં ઘણા યજમાનો હોવાથી કોઇ એક કાર્ય સિદ્ધ કરે બીજો બીજું કર્મ સિદ્ધ કરે તેમાં કોઇને સ્વતન્ત્રતા કે કોઇને અસ્વતન્ત્રતા પ્રાપ્ત થતી નથી તેમ આંહી ગુણસભાજનમાં પણ સમજવું.

કૃષ્ણદાસ–શ્લોકમાં उत्तमश्लोकजनेषु (ભગવદ્ભક્તોમાં) આવું બહુવચન વાપર્યું તેનું તાત્પર્ય શું હશે?

---

૧ લોકમાં પણ એવી રીત છે કે જેની સાથે સખ્ય થયુ હોય તેની અનુકૂલ વર્તવુ જોઇએ નહિંતર સખ્ય નભી ન શકે.

૨ પ્રભુનાં સ્વરૂપ ગુણ ચરિત્ર વગેરેને સમજી તેને વખાણવું તે સભાજન કહેવાય છે.

વલ્લભદાસ–એક તાત્પર્ય તો પહેલાં કહેવાયું છે કે તે ભગવદીયોની સંખ્યા અધિક હોય તો વૃત્રને પણ ગુણસભાજન કરવાનો સમય મળે. બીજું એ છે કે ભગવદીયોના સખ્યને મોક્ષ કહ્યો છે તેથી તેમાં કદી પણ વિચ્છેદ ન પડવો જોઇએ તેથી એક ભગવદીયનું તિરોધાન થાય તોપણ બીજાઓનું સખ્ય તો છે જ તેથી સખ્યમાં વચ્ચે ત્રુટિ ન આવી તેવું સમજાવવા આંહી 'ભગવદીયોમાં' આવું બહુવચન વાપર્યું છે.

કૃષ્ણદાસ–વૃત્રને તો તેવા ભક્તોની સાથે દીનતા જ રાખવી જોઇએ કારણ કે સર્વ-તન્ત્ર સ્વતન્ત્ર ઈશ્વર ઉપર સ્વતન્ત્રતા દેખાડવી તે જેવી દોષયુક્ત છે તેવી જ તેના ભક્તો ઉપરની સ્વતન્ત્રતા પણ વૃત્રને દોષ કરનારી થશે?

વલ્લભદાસ–તે પણ ભગવાનના જન છે. એટલે કે જન્મ લેવો, તિરોધાન થવું, વગેરે ધર્મો તેને પણ લાગેલા છે અને તેઓ પ્રભુને અધીન છે. તેથી તેવા ભક્તો ઉપર ગુણ-સભાજનાર્થે પ્રાપ્ત થતું સ્વાતન્ત્ર્ય વૃત્રને દૂષિત કરનારું ન કહેવાય કારણ કે વૃત્ર પણ તેઓની બરોબર ધર્મવાળો છે. એટલે કે જનન, તિરોધાન, ભક્તત્વ વગેરે ધર્મવાળો છે.

કૃષ્ણદાસ–તમોએ ભગવદીયોના સખ્યને મોક્ષ કહ્યો પણ તેવા ભગવદીયો તો દુર્લભ છે તેથી તેવાઓની સાથે સખ્યની સંભાવના પણ કેમ કરી શકાય?

વલ્લભદાસ–અહન્તામમતારૂપ આ સંસાર એકપ્રકારનું ચક્ર છે તેથી ચક્રમાં પડેલો જેમ એક ઠેકાણે ન સ્થિર થઇ શકે પણ ભમ્યા જ કરે તેમ સંસારચક્રમાં પડેલો પણ જ્યાં ત્યાં ભમ્યા જ કરશે કારણ કે અહન્તા, મમતા, ક્ષણ ક્ષણમાં બદલાય છે અને તે જ સંસાર છે તેથી ભ્રમણ કરતાં કરતાં જ તેવા ભગવદીયોનું સખ્ય પણ વિના કલેશે પ્રાપ્ત થવા સંભવ છે જ.

કૃષ્ણદાસ–તોપણ ભગવદીયોનું સખ્ય વિના સાધને થઇ જાય તે કંઇ સમજમાં આવતું નથી કારણ કે તેઓનું સખ્ય સંસારથી[1] અપવર્ગ–મોક્ષ કરાવનારું છે આવું વાક્ય શ્રીમદ્‌ભાગવતના દશમસ્કન્ધના એકાવનમા અધ્યાયમાં મળે છે તેથી આ વાત સ્પષ્ટ સમજાવો?

વલ્લભદાસ–પુષ્ટિમાર્ગ–કૃપામાર્ગમાં સાધનની બહુ શોધ કરવાની જરૂર નથી કારણ આ માર્ગમાં તો બધું શ્રીપ્રભુની કૃપાથી જ સિદ્ધ થાય છે તેમ આંહી પણ ભગવ-દીયોની કૃપાથી જ તેઓનું સખ્ય વૃત્રને સિદ્ધ થશે તેઓ અત્યન્ત કૃપાલુ હોય છે તેથી પોતાનાં કર્મવડે સંસારમાં ભટકતા જીવો ઉપર તે કૃપાયુક્ત બની પોતાનું સખ્ય સિદ્ધ કરાવેછે. તેથી ભક્તિમાર્ગનો કોઇ પણ અંશ સાધન સાધ્ય–સાધનથી મળે તેવો નથી આ વાત સ્પષ્ટ થાય છે.

કૃષ્ણદાસ–વૃત્ર સમજે છે કે ભક્તિમાર્ગીય કોઇ પણ ફલ સાધનથી મળે તેવું નથી છતાં પ્રભુ પાસે સખ્યરૂપ મોક્ષની પ્રાર્થના શા માટે કરી હશે?

વલ્લભદાસ–આંહી વૃત્રે પ્રભુ પાસે ફલની પ્રાર્થના કરી જ નથી પણ પોતાને અનેક યોગ્ય અયોગ્ય દેહ ધારણ કરવા પડ્યા છે તેથી કંટાળી તેવા દેહો ન ધારણ કરવા પડે તેવી પ્રાર્થના પ્રભુ પાસે કરી છે ફળ માટે નહિ.

1 भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः ।

કૃષ્ણદાસ–ભક્તિમાર્ગીય વૃત્રે સંસાર ચક્રમાં ભટકવાના કારણરૂપે પોતાના કર્મોને શા માટે કહ્યાં હશે? ભગવદીયને તો સુખ દુઃખ બધું પ્રભુ ઇચ્છાથી જ થાય છે તો પ્રભુનું નામ લેવું યુક્ત હતું?

વલ્લભદાસ–વૃત્ર ભક્તિમાર્ગીય છે તેથી પોતાના સંસારચક્રમાં ભમવારૂપી દુઃખમાં પોતાના સ્વામિને કારણપણું આપવું એ અયુક્ત કહેવાય તેથી દુઃખના કારણ તરીકે કર્મોને જ બતાવ્યાં છે.

કૃષ્ણદાસ–ત્યારે તેવાં સંસારમાં ભમાવનારાં કર્મોનો ત્યાગ કરવો જોઈએ.

વલ્લભદાસ–પોતાનાં કરેલાં કર્મો પોતાને અવશ્ય ભોગવવાનાં હોય છે તેથી તેનો ભોગ કર્યા શિવાય ત્યાગ થઇ શકતો નથી.

કૃષ્ણદાસ–કર્મો કરવાં તો પોતાને હાથ વાત છે તો તેવાં દુઃખદાયક કર્મો કરવાં જ શા માટે?

વલ્લભદાસ–તે કર્મો ઘણાં છે અને 'એક ક્ષણ પણ કર્મ કર્યા શિવાય કોઇ પણ રહી શકતું નથી' આવું શ્રીભગવાનનું અર્જુન પ્રતિ ગીતામાં વાક્ય છે તેથી પણ તેનો ભોગ કરવો જ પડે છે.

કૃષ્ણદાસ–સંસારચક્રમાં ભમાવનારાં સાધનો તો કર્મ શિવાયનાં પણ કાલ, કામ, અવિદ્યા વગેરે છે જ તો પછી વૃત્રે બીજાં કાલાદિ કારણોનાં નામ ન આપતાં કેવલ કર્મોનું જ કથન શા માટે કર્યું હશે?

વલ્લભદાસ–કાલાદિ કારણો રહેતાં છતાં પણ મુખ્ય કારણતા તો કર્મમાં જ છે કાલાદિની તો નિમિત્ત કારણતા છે જેમ ઘટના પ્રતિ દંડની છે તેમ.

કૃષ્ણદાસ–પહેલાં કરેલી વ્યવસ્થા પ્રમાણે શ્લોકના પૂર્વાર્દ્ધમાં–પહેલા અર્ધામાં પુષ્ટિ-મર્યાદામોક્ષની પ્રાર્થના વૃત્રે કરેલી છે, પણ પ્રાર્થનાવાચક–પ્રાર્થનાને કહેનારો–કોઇ પણ પદનો પ્રયોગ [भूयात्] થાઓ, વગેરેનો નથી કર્યો તેનું શું કારણ?

વલ્લભદાસ–પહેલા અર્ધા શ્લોકમાં પ્રાર્થેલો પુષ્ટિમર્યાદામોક્ષ; ઉત્તરાર્દ્ધ–બીજા અર્ધાશ્લોકમાં પ્રાર્થેલા પુષ્ટિ–પુષ્ટિમોક્ષ કરતાં ગૌણ છે ઉતરતો છે એવું જણાવવા પૂર્વાર્દ્ધમાં 'થાઓ' આવો પ્રાર્થનાવાચક પદનો પ્રયોગ નથી કર્યો.

કૃષ્ણદાસ–એટલા પ્રશ્નોતરથી સંપૂર્ણ અર્ધાશ્લોકનું તાત્પર્ય શું નિકળ્યું તે કૃપા કરી કહો.

વલ્લભદાસ–જેમાં સ્વતન્ત્રતાને હાનિ ન પહોંચતી હોય, જેમાં પ્રભુના ગુણોનું સભા-જન કરવાનું મળતું હોય, જે સંસારચક્રમાં ભ્રમણ કરતાં કરતાં ભગવદીયોની કૃપાથી જ મળી જતું હોય એવું જે ભગવદીયોનું સખ્ય, તે પુષ્ટિમર્યાદામોક્ષ અને તે જ સંપૂર્ણ અર્ધ શ્લોકનો સંક્ષિપ્ત અર્થ થયો.

કૃષ્ણદાસ—આપે પુષ્ટિમર્યાદામોક્ષ કહ્યો હવે પુષ્ટિપુષ્ટિ મોક્ષ કહો.

વલ્લભદાસ—[૧૫] બન્ને પ્રકારના મોક્ષ સજાતીય છે—

દ્વિતીય પુષ્ટિપુષ્ટિમોક્ષ કહેવાને આભાસ–મૂળ શ્લોકને ઉદ્દેશીને આચાર્યચરણ કહે છે કે–આ ઉત્તરાર્ધમાં બીજો પુષ્ટિપુષ્ટિમોક્ષ કહેવામાં આવે છે. પુષ્ટિપુષ્ટિમોક્ષ અને મર્યાદામોક્ષ ઉભય સજાતીય–એક જ જાતના છે. અર્થાત્ બન્ને ભક્તિમાર્ગીય છે. બન્ને પ્રકારના મોક્ષ પ્રભુના અનુગ્રહથી જ મળે છે. તેથી સજાતીય છે. મર્યાદામોક્ષ જ્યારે અનુગ્રહમિશ્ર મર્યાદાથી પ્રાપ્ત થાય છે ત્યારે આ પુષ્ટિપુષ્ટિમોક્ષ મર્યાદાથી ન મળી શકે પણ કેવળ અનુગ્રહથી જ મળી શકે. તેથી સજાતીય છે.

હવે, સ્વરૂપ સંબંધી લીલારૂપ માયાની ઉત્તમતા સાંભળો.

હે નાથ સંસારચક્રમાં મને ભગવદિચ્છાથી કુટુંબાસક્તિ ન થાઓ, પણ આપની લીલારૂપ માયા વડે મારી કુટુંબમાં આસક્તિ થાઓ. કારણ કે આપની લીલારૂપ માયાવડે જે કુટુંબમાં આસક્તિ થાય છે તે જ ખરેખર મોક્ષરૂપ–ફલ છે.

પૂર્વાર્ધમાં કહેલા મર્યાદામોક્ષ કરતાં પુષ્ટિપુષ્ટિમોક્ષની વિલક્ષણતા છે. આ વિલક્ષણતા तव मायया ન કહેતાં त्वन्मायया એવું શ્લોકમાં સમાસ કરી કહેલું હોવાથી સ્પષ્ટ થાય છે.

કૃષ્ણદાસ–સમાસમાંથી શી રીતે સ્વારસ્ય નિકલ્યું ?

વલ્લભદાસ–સાંભળો. "त्वन्मायया" એવો સમાસ પ્રભુ અને માયાનો સ્વરૂપ સંબંધ દર્શાવે છે. જે સ્વરૂપસંબંધિની માયા તે લીલારૂપ કહેવાય અને તે સ્વરૂપ સંબંધ કરાવવા જ મોહ કરે, અને તેથી જ મોક્ષ થાય, અર્થાત્ તે તારનારી છે. અને બીજી મોહિકા માયા છે, કે જે પ્રભુના સ્વરૂપ સંબંધિની નથી તેને તો આપણે તરવાની છે. તેના મોહથી તો પાત જ થાય, આ બે માયાભેદ ભુલાવવા ન જોઇએ.

કૃષ્ણદાસ–બે પ્રકારની માયામાં લીલારૂપમાયાને આપે મોક્ષ આપનારી કહી તેમાં દૃષ્ટાન્ત ?

વલ્લભદાસ–ભગવાનને જ્યારે લીલા કરવાની ઇચ્છા થઇ ત્યારે લીલારૂપ માયાને આજ્ઞા કરી–"**હે ભદ્ર તું વ્રજમાં જા**" આ માયા પ્રભુલીલાર્થ વ્રજમાં પધારી તેથી તે લીલારૂપ માયાનું વર્ણન કરતાં શુકદેવજી કહે છે કે–"वैष्णवीं व्यतनोन्मायाम्" "વૈષ્ણવી માયાને ફેલાવી" જ્યાં ભગવાન્ પ્રકટ થઇને લીલા કરવાની ઇચ્છા કરે ત્યાં લીલારૂપ માયાનો ઉપયોગ કરે છે. તેના વગર લીલા થઇ શકે નહિ, આ દૃષ્ટાન્ત.

કૃષ્ણદાસ–શું સ્વારસ્ય આવ્યું ?

વલ્લભદાસ–પુષ્ટિપુષ્ટિમોક્ષમાં પ્રકટલીલાયુક્ત પ્રભુના સ્વરૂપના રમણનો અનુભવ થાય છે, અર્થાત્ પ્રકટલીલાયુક્ત પ્રભુના સ્વરૂપસહ રમણ એ પુષ્ટિપુષ્ટિમોક્ષ છે. આ મોક્ષમાં ગૃહ બંધનરૂપ નથી પણ મોક્ષરૂપ છે પ્રભુનું લીલારૂપ છે. આવા ઘરની અંદર આસક્તિની આવશ્યક્તા છે. આવા લીલારૂપ ગૃહમાં આસક્તિ તે ઉત્તમ સ્વરૂપસંબંધી માયાથી જ સંભવે, માટે વૃત્ર "त्वन्मायया" શબ્દથી સ્વરૂપસંબંધીમાયાથી ગૃહમાં આસક્તિરૂપ પુષ્ટિ–પુષ્ટિમોક્ષ માટે પ્રાર્થના કરે છે,

કૃષ્ણદાસ–પૂર્વોક્તમોક્ષમાં ત્યારે કેવી માયા હતી ?

વલ્લભદાસ–મર્યાદામોક્ષમાં માયા ભગવદીય ખરી પણ સ્વરૂપસંબંધિની નહિ, મર્યાદામોક્ષમાં સાક્ષાત્ લીલા નથી, પારોક્ષ્યથી લીલાનુભવ થાય, તેથી પુષ્ટિપુષ્ટિમોક્ષની માફક આમાં–મર્યાદામોક્ષમાં–ગૃહાસક્તિની પણ જરૂર નથી, માટેજ ગીતાજીમાં "मम माया दुरत्यया" ત્યાં "मन्माया" શબ્દ ન મુક્યો, કારણ કે તે લીલારૂપ માયા નથી પણ મોહિકા માયા છે. તેથી તે દુઃખથી તરી શકાય એવી છે અને તેને "मायामेतां तरन्ति ते" ઇત્યાદિ વાક્યથી શરણાદિકથી તરવાનો ઉપદેશ આપે છે. અર્થાત્ **મોહિકા માયાથી મોહ અને તે માયાને તરવાની આવશ્યકતા છે. લીલારૂપ માયાથી લીલાનુભવ અને તે માયા તારનારી છે**—આજ હેતુથી શ્રીઆચાર્યચરણ આજ્ઞા કરે છે કે ભિન્નતાથી–પ્રભુ વિના–માયા મોહ નથી કરતી પરંતુ પ્રભુજ તેનાથી– લીલારૂપ માયાથી–મોહ કરે છે. ગૃહાસક્તિ કરાવે છે.

લીલારૂપ માયામોહ અને બંધનરૂપમાયાના મોહમાં તફાવત.

કૃષ્ણદાસ–[૧૬] લીલારૂપ માયાના મોહમાં અને બંધનરૂપ માયાના મોહમાં કંઇ તફાવત ખરો ?

વલ્લભદાસ–હા. હમે ઉપર વારંવાર તફાવત દર્શાવેલો છે. તથાપિ અત્ર સ્ફુટ કરીએ છીએ.

પૂર્વે બંધનરૂપ મોહ કરતાં પુષ્ટિપુષ્ટિમોક્ષાર્થ મોહ વિશેષ આદરણીય છે, આ મોહ મોક્ષનો અંગભૂત છે કારણ કે "त्वन्मायया" પદ સમાસથી એ મોહ પ્રભુના સંબંધને કરાવનારો છે, એવું આપણે પૂર્વે નિશ્ચય કરી ગયા.

કૃષ્ણદાસ–આ મોક્ષમાં પણ માયામોહ અને મર્યાદામોક્ષમાં પણ માયામોહ, તો પછી મોક્ષમાં વિશેષતા શી છે તે સમજાવશો ?

વલ્લભદાસ–હા. સાંભળો મર્યાદામોક્ષ કરતાં આ મોક્ષમાં પ્રભુના સ્વરૂપસંબંધિ સર્વ લાભ મળે છે. એ માયા પણ સાક્ષાત્ પ્રભુ સંબંધિની હોવાથી સ્વરૂપ સંબંધ કરાવનારી છે હજુ પણ આ મોક્ષમાં પ્રકારાન્તર–બીજી રીતથી–વિશેષતા દર્શાવવા ઇચ્છા છે ?

કૃષ્ણદાસ–હા, દર્શાવો.

વલ્લભદાસ–આ પ્રાર્થના વખતે પ્રભુનું **આભિમુખ્ય** છે, અર્થાત્ આ પ્રાર્થના વખતે પણ જ્યાં પ્રભુ વૃત્રાસુરની પ્રકટ–સન્મુખ–બિરાજે છે ત્યાં પ્રભુના સ્વરૂપનો અનુભવ થાય એમાં તો કેવું જ શું ? માટે જ વૃત્રાસુર "त्वत्" પદથી વ્યવહાર કરે છે. "त्वत्" પદનો વ્યવહાર પ્રભુ સન્મુખ બિરાજતા હોય તોજ સંભવે, અન્યથા નહિ.

લીલારૂપ માયાથી જ વૃત્રાસુર સખ્ય માગે છે.

કૃષ્ણદાસ–તમો "त्वन्मायया" ઉપર આટલો બધો ભાર શા માટે મુકો છો, તેમાં શો

વિશેષ છે? મોક્ષ મેળવવા માટે, તો મોક્ષ તો કોઈ પણ રીતે મળી શકે છે. પુત્રાદિકમાં ભગવદીય બુદ્ધિથી આસક્તિ થાય અને તે આસક્તિથી સખ્ય થાય, તે સખ્ય, મોક્ષરૂપ છે.

વલ્લભદાસ–હું જે પુત્રાદિકમાં આસક્તિ માગી રહ્યો છું તે (स्वन्मायया) ભગવાનની માયાથી મારી આસક્તિ માગી રહ્યો છું, માટે જ તેના ઉપર ભાર મુકું છું. તમારા કહેવા મુજબ લીલારૂપ માયા વિના હર કોઈ રીતે પુત્રાદિકમાં મારે આસક્તિ જોઈતી નથી, કારણ કે તમે કહો છો તે સખ્ય તો સંસારચક્રમાં ભમતા એવા મને ભલે થાઓ, (એવું પૂર્વાર્ધમાં મર્યાદામોક્ષ વખતે કહેવાયું છે.) પણ તેમાં મારી અનન્યતા તૂટી જશે. અને તેવું સખ્ય મર્યાદામોક્ષરૂપ હોવાથી મને અપેક્ષિત નથી, તેથી મારે લીલારૂપ **માયાથી** જ પુત્રાદિકમાં જે આસક્તિરૂપી મોક્ષ છે તે જ જોઈએ છે.

કૃષ્ણદાસ–જરી દૃષ્ટાન્તથી સમજાવશો?

વલ્લભદાસ—હા સાંભળો. અત્ર હું હિરણ્યકશિપુનું દૃષ્ટાન્ત આપું છું. જેમ ભગવાનને પોતાને અવતાર ધારણ કરવાની ઇચ્છા થઈ તેથી હિરણ્યકશિપુ વિગેરેની દૈવગતિથી પ્રહ્લાદ વિગેરેમાં પુત્રરૂપે આસક્તિ થઈ. પુત્રવાત્સલ્યરૂપ સખ્ય પણ તેના ઉપર થયું, અને તેથી હિરણ્યકશિપુએ પ્રહ્લાદને ભણાવ્યો. (આ સખ્યથી કંઈ પણ ઉત્તમ ફલ ન થયું) તેથી કહું છું કે મારે હિરણ્યકશિપુ જેવી કુટુંબમાં આસક્તિ ન થાય પણ ભગવાનની લીલારૂપ માયાથી મારી આસક્તિ થાઓ.

હિરણ્યકશિપુ પણ પૂર્વ જન્મમાં ભક્ત જ હતો ભગવત્પાર્ષદ હતો; શાપથી જ આસુર બન્યો હતો. હું પણ પૂર્વજન્મમાં ભક્ત હતો અને અત્યારે આસુર છું તેથી મારી પ્રાર્થના હિરણ્યકશિપુ જેવી ભગવાન્ વખતે માની લે, એવી બીકથી હું એવા સખ્યની ચોખી ના પાડું છું.

કૃષ્ણદાસ–તમે તેવા સખ્યની ના પાડો છો, પણ ભગવદ્ભક્તમાં આસક્તિ, એ તેમાં તેનું સખ્ય રહેલું છે તેમાં શો દોષ છે?

વલ્લભદાસ–તે ભગવદ્ભક્તમાં આસક્તિરૂપી સખ્ય પણ ભગવાનની લીલારૂપ માયાથી જ મને થાઓ. ભગવાનની માયા વિના કેવલ ભગવદીય પુત્ર વિગેરેમાં આસક્તિ કરવાથી અનન્યતાનો ભંગ થાય છે. કારણ કે ભગવાનની લીલારૂપ માયાના વિના જો આસક્તિ કરવામાં આવે તો ભગવત્સંબંધની સ્ફૂર્તિ ન જ થાય. અનન્ય ભક્તો કદાપિ પણ ભગવાનના સંબંધ વિનાની વસ્તુનું સ્મરણ પણ કરતા નથી. આવી રીતે હિરણ્યકશિપુમાં અનુભવ્યું.

આવી રીતે ભગવત્સંબંધ વિના જો પુત્રાદિકમાં આસક્તિ કરવામાં આવે તો સર્વથા અનન્યતાનો ભંગ થાય. માટે ભગવાનની લીલારૂપ માયાથી જ મારી પુત્રાદિકમાં આસક્તિ થાઓ અને સખ્ય થાઓ. લીલારૂપ માયા વિના નહિ.

આવા ઉત્તમ ફલ માટે અધિકારવિચાર.

કૃષ્ણદાસ—આવી ઉત્તમ ભાવના તો ગોપીજનો જેવામાં સંભવે. આ વૃત્રાસુર શી રીતે આવું કહી શકે છે?

વલ્લભદાસ—વૃત્રાસુરમાં પણ તે વ્રજભક્તોનો ભાવ હૃદયમાં પ્રકટેલો હોવાથી વૃત્રાસુર પણ અત્યારે કૃતાર્થ પૂર્ણ-મનોરથ-પૂર્ણસર્વપુરુષાર્થ-થઈ ગયો છે.

રસાનુભવ તો વ્રજભક્તોના જેવા ભાવવાળાને જ થાય છે. જેને આવો ભાવ ન હોય તેમને આવું ઉત્તમ ફલ પણ ન જ હોય એ સ્વાભાવિક છે. વ્રજજનોના જેવા ભાવ વિનાને જો આવી (ગૃહાસક્તિરૂપી મોક્ષની) કામના-ઇચ્છા-કરે તો તે નાલાયક થઈ તેનો પાત થાય છે. જો વ્રજજનોના જેવો ભાવ સ્ફુરે ભગવદીયત્વ સિદ્ધ થાય તો કૃતાર્થ થઈ જાય. વૃત્રમાં તેવો ભાવ છે માટે તે પ્રભુને **નાથ** શબ્દથી સંબોધે છે. જો આવો ભાવ ન હોય તો **નાથ** શબ્દ ન યોજે. કેટલાક ભગવદીયો હમે જોયા છે કે-ભગવાનને **નાથ** શબ્દ વાપરી બોલાવતા નથી, તેમનો નાથ શબ્દ વાપરવાનો અધિકાર નથી, અધિકાર વિના જો વાપરે તો બિચારો દોષિત થાય. વૃત્રે **નાથ** શબ્દનો વ્યવહાર કર્યો, તેથી વૃત્રનો ઉચ્ચાધિકાર સાબિત થાય છે.

વૃત્રાસુરે ફલ મેળવવા પ્રાર્થના કરી નથી.

કૃષ્ણદાસ—વૃત્રે પ્રાર્થના કરી કે મને સખ્ય થાઓ, આ પ્રાર્થના કંઇ પણ અભિલાષા વિના ન સંભવે.

વલ્લભદાસ—**નાથ** પદનો પ્રયોગ કર્યા પછી પણ જે સખ્યની પ્રાર્થના કરી છે તે, ભક્તિસિદ્ધાન્તનું ભાન કરાવનારી છે. આ બીજા મોક્ષમાં ભગવદીય થવું, એજ પરમ-પુરુષાર્થ રૂપ છે. "भगवदीयत्वेनैव परिसमाप्तसर्वार्थाः" (ભા૦ સ્કં૦-૫.) "ભગવદીયપણાથી જ જેના સર્વ પુરુષાર્થો સિદ્ધ થઇ ચુક્યા છે" એ ઉત્તમ ભગવદીયનું લક્ષણ છે. આવી રીતે થવું તે તેના સખ્યથી જ સંભવે. એવું જણાવવાને આ પ્રાર્થના કરી છે.

મોક્ષ મેળવવામાં પણ માયા સહાયક છે.

કૃષ્ણદાસ—અરે? આ તો મને આશ્ચર્ય ઉત્પન્ન કરે છે કે મોક્ષમાં પણ માયા અને તેના કાર્યના સંબંધવાળાં સાહિત્યનો ઉપયોગ થાય? એ શું આશ્ચર્ય ઉત્પન્ન કરે એવું નથી?

વલ્લભદાસ—પુષ્ટિપુષ્ટિમોક્ષની એ જ વિલક્ષણતા છે એ જ તેની અદ્દભુતતા છે કે જેમાં માયા અને માયાનાં સાહિત્યો સર્વથા અનુકૂલ રહે છે.

કૃષ્ણદાસ—કેવી રીતે?

વલ્લભદાસ—સાંભળો. અત્ર આ આશય છે. મર્યાદામાર્ગીયમોક્ષમાં તો કેવળ મોક્ષ-નો જ અનુભવ થાય છે ધર્મ, અર્થ, કામ, આ પુરુષાર્થત્રયનો નહિ બલ્કે એ પુરુષાર્થત્રય વિરુદ્ધ ભાસે છે. પુષ્ટિપુષ્ટિમોક્ષમાં તો માયાનાં સાહિત્યો સર્વ રીતે અનુકૂલ છે. એવું સૂચવવાને વૃત્ર આત્મા, પુત્ર, સ્ત્રી, ગૃહમાં આસક્તિ માગે છે. કારણ કે માયા ક્રમથી એટલે દેહાધ્યાસાદિ ચાર અધ્યાસથી ચાર પ્રકારના પુરુષાર્થ સિદ્ધ કરે છે. તેમાં પણ દેહાધ્યાસથી ધર્મ, અર્થ, કામ, અને મોક્ષ, આવા ચારે પુરુષાર્થોને સાધે છે એવી રીતે ઇન્દ્રિયાધ્યાસથી, એવી જ રીતે પ્રાણાધ્યાસથી, એવી જ રીતે અંતઃકરણાધ્યાસથી, તેમાં પ્રથમ દેહાધ્યાસનું

વર્ણન કરે છે. આ અધ્યાસોમાં દેહાધ્યાસથી **ધર્મસિદ્ધિ** થાય છે. જો દેહાધ્યાસ ના હોય તો ધર્મ પાળવામાં અધિકાર ન રહે. કારણ કે ધર્મ માત્ર દેહને ઉદ્દેશી કહેવામાં આવે છે. **અર્થસિદ્ધિ** પણ દેહાધ્યાસથી જ થાય છે. પુત્રરૂપી ઉત્તમોત્તમ અર્થ પણ દેહાધ્યાસ હોય તોજ ઉત્પન્ન થાય. **કામસિદ્ધિ** પણ દેહાધ્યાસથી જ થાય છે. કામસિદ્ધિમાં સ્ત્રીની અપેક્ષા, તે પણ દેહાધ્યાસ વિના કેમ થાય! અને વૃત્રાસુર લીલારૂપ માયાથી ગૃહાસક્તિરૂપી મોક્ષ માગે છે તે પણ દેહાધ્યાસ વિના કેમ સંભવે? માટે દેહાધ્યાસથી જ ચારે પુરુષાર્થ સિદ્ધ થશે.

ભગવાનની લીલારૂપ માયાથી ભગવાનની લીલામાં ઉપયોગી સર્વ પદાર્થો છે એવી ભગવદ્ બુદ્ધિથી તે પદાર્થોમાં આસક્તિ થાય છે અને તે આસક્તિથી ભગવાનમાં તે જીવોનો નિરોધ થાય છે. અને આ ભગવલ્લીલારૂપ ગૃહમાં આ ભક્ત ભગવલ્લીલાનો આન્તર અનુભવ કરે છે. (આ જ ભક્તની સર્વોત્કૃષ્ટ દશા છે) માટે મોક્ષમાં લય થઈ બ્રહ્મભાવ થાય એની અપેક્ષાએ આવા ભક્તોનાં ગૃહ ભગવલ્લીલાનુભવથી ઉત્કૃષ્ટ હોય, એમાં કહેવું જ શું?

કૃષ્ણદાસ–બ્રહ્મભાવ કરતાં ભગવદ્ભક્તોનાં ગૃહરૂપની અધિકતા સમજાવશો?

વલ્લભદાસ–બ્રહ્મભાવમાં તો મોક્ષ વિના અન્ય પુરુષાર્થનો અનુભવ નથી પરંતુ ભક્તના ગૃહમાં ચારે પ્રકારના પુરુષાર્થનો અનુભવ છે. બ્રહ્મભાવમાં સર્વ ઇન્દ્રિયોનો લય થઈ જાય છે ત્યારે ભક્તના ગૃહમાં તો સર્વ ઇન્દ્રિયો ભગવાનની અલૌકિક સુંદર લીલાનો અનુભવ કર્યા કરે છે. માટે બ્રહ્મભાવ કરતાં ભક્તનાં ગૃહો સર્વ રીતે શ્રેષ્ઠ છે. તેથી અલૌકિક દેહ પ્રાપ્ત થઈને નિજ અન્તરંગ ભક્તોની સાથે પ્રકટ થયેલા પ્રભુની અખિલ પુરુષાર્થરૂપ લીલાનો આન્તર રમણાત્મક અનુભવ કરવો તેનું નામ છે પુષ્ટિપુષ્ટિમોક્ષ. અને તેનેજ વૃત્ર માગી રહ્યો છે.

કૃષ્ણદાસ–તમે બ્રહ્મભાવ કરતાં પણ તેની ઉત્તમતા દર્શાવી પણ મને ગૃહાસક્તિને મોક્ષરૂપ કહેવામાં જરા શંકા રહે છે કે ચિત્તની આસક્તિ એ સંસારરૂપ કેમ ન કહેવી? અને જે સંસારરૂપ કહેવાય તેને મોક્ષત્વ શી રીતે?

વલ્લભદાસ–ચિત્ત, બુદ્ધિ, મન, અને અહંકાર આ ચાર પ્રકારનું અન્તઃકરણ છે. તેમાં ચિત્ત એ વાસુદેવાત્મક છે અને જે વાસુદેવ છે તે મોક્ષદાતા છે. માટેજ વૃત્રાસુર ઉપરના ચાર પૈકી ચિત્ત વાપરી કહે છે કે "હું લીલારૂપ માયાથી આત્મા વિગેરેમાં **આસક્ત ચિત્તવાળો** થાઉં." માટે મોક્ષરૂપત્વ છે (જે ચિત્ત સંસારમાં આસક્ત હોય તેને સંસારજ ફલ.) પણ અહીં તો ભગવદ્લીલારૂપમાયાથી ભગવલ્લીલારૂપ ગૃહમાં ભગવદીયત્વે કરીને પુત્રાદિકમાં વાસુદેવાત્મક ચિત્તની આસક્તિ તે સાક્ષાત્મોક્ષરૂપ છે. તેમાં સંસારાસક્તિ ક્યાં રહી? તેમજ આ મોક્ષપ્રકરણ ચાલે છે તેથી કરીને આની અંદર સંસારાસક્તિ સંભવે નહિ.

કૃષ્ણદાસ—વૃત્રે ભગવન્માયાથી ઉત્પન્ન થએલી આસક્તિ માત્ર માગી તો ઠીક, પરંતુ

તેની સાથે "ભગવન્માયા વિનાની કેવલ આસક્તિ ન થાઓ" એવું નિષેધવચન શા માટે માગ્યું? એકજ માગતાં બીજાનો નિષેધ આપોઆપ થઈ જાય છે.

વલ્લભદાસ—જો કે "ભગવાનની લીલારૂપ જ માયાથી મને પુત્રાદિકમાં આસક્તિ થાઓ" એવું કહેવાથી જ ભગવાનની લીલારૂપ માયા વિનાની આસક્તિ સમજાઈ જતી હતી તો પણ વૃત્રને એમ લાગ્યું કે **"જેની સ્પષ્ટના ન કહી હોય તે કબુલ કર્યું કહેવાય"** એ ન્યાયથી વૃત્ર ન ભૂયાત્ કહી નિષેધ કરે છે.

કૃષ્ણદાસ—ન ભૂયાત્ કહી નિષેધ ના કર્યા હત તો શું નુકસાન થાત?

વલ્લભદાસ—ભગવાનની માયામાં મોહકત્વ અને લીલારૂપત્વ ઉભય રહેલાં છે. તેથી પુત્રાદિકમાં ઉભય પ્રકારની આસક્તિ થઇ જાય, તો ભગવાન્ તે ભક્ત સાથે–ક્રીડા ન કરે. ભગવાન્ કેવલ લીલારૂપ માયા વિના કદાપિ ક્રીડા ન જ કરે. આવી રીતે લીલારૂપ માયા વિનાની લૌકિક આસક્તિથી ક્રીડામાં પ્રતિબન્ધકત્વ–અડચણ–આવે તેથી વૃત્ર સ્પષ્ટ ના કહે છે.

લૌકિક આસક્તિથી શ્રીયશોદાજીને પણ બહિર્મુખત્વ થયું.

એક વખતે શ્રીયશોદાજી શ્રીકૃષ્ણચન્દ્રને સ્નાનાદિક કરાવી, બ્રાહ્મણો પાસે સ્વસ્ત્યયન કરાવી. બ્રાહ્મણોને અન્ન વસ્ત્ર વિગેરે આપી, હવે આ શ્રીકૃષ્ણચન્દ્રને નિન્દ્રા આવી જાણી પોઢાડ્યા. પુનઃ અનેક [1]લૌકિક કાર્યમાં તે રોકાયાં. ઘેર આવેલાને સામા લેવા જવામાં, યશોદાજી રોકાયાં, લૌકિકમાં આસક્તિ થાય એટલે ભગવત્સંબંધ ગૌણ થઇ જાય, ત્યારે ભગવદ્દર્શનનો પણ ત્યાગ કરી લૌકિક આગતા સ્વાગતા કરતાં માલા કુંકુમાદિકથી તામસ જેમાં અધિક છે એવા વ્રજૌકસો–વ્રજવાસીઓનું સંમાન કર્યું આ સંમાનમાં ભગવત્કાર્ય ગૌણ થયું અને લૌકિક કાર્ય મુખ્ય થયું. સ્તનાર્થી ભગવાનનું રૂદન પણ ન જાણ્યું. તેથી શ્રીઆચાર્યચરણ 'શ્રી યશોદાજીને તેટલા પુરતી બહિર્મુખતા થઇ' એમ આજ્ઞા કરે છે. બહિર્મુખતાનાં ફ્લ તો તુરત જ મળ્યાં. લીલારસના અનુભવનો આનંદ લુંટી રહ્યાં હતાં તેના પ્રતિબન્ધકરૂપ શકટ ભંગ કર્યો.

લૌકિક આસક્તિથી બહિર્મુખતા થવામાં પ્રમાણ.

આવી રીતે લૌકિક કેવલાસક્તિ મોક્ષમાં વિરુદ્ધ હોવાથી ભગવાનની લીલોપયોગિની માયા વિના કેવલ આસક્તિનો નિષેધ કર્યો. નામાવલીમાં "शकटभेदबालचरित्राय नमः" એવું બાલચરિત્રનું ૩૦ મું નામ છે. તેની વિવૃતિ કરતાં શ્રીગોકુલોત્સવજી કહે છે. સાક્ષાત્ ભગવાનને ભજીને અન્ય આસક્તિ જરૂર અનુચિત છે, માટે જ આપે શકટ ભંગ કર્યો. [2]ભગવાન્ ભક્તોનું વેદમાં સ્વાસ્થ્ય ન થવા દે તો લોકમાં સ્વાસ્થ્ય શી રીતે થવા દે. શકટ ભંગ

१ औत्थानिके कर्मणि शोभार्थं यद् औत्सुक्यम् उत्सुकता लौकिकाभिनिवेशः, तत्रैव मनो यस्या इति भगवत्संबन्धस्य गौणत्वात्प्रवाहस्य बलिष्ठत्वात् भगवद्दर्शनमपि परित्यज्य लौकिकसमावनार्थमभिमानवती च जाता इत्याह–मनस्विनीति । एवं बाह्याभ्यन्तरभेदेन तस्या बहिर्मुखत्वं जातं स्वकार्यमपि कृतवतीत्याह—**समागतान् पूजयतीति** । ये लौकिकव्यवहारेण सम्यग् आगताः तान् पूजयती मालाकुङ्कुमोपहारैः, बालाः, पुरुषाः, स्त्रियश्च सर्वे पूजिता इति पुंल्लिङ्गनिर्देशः। ते चेत् सन्तो भवेयुः सर्वथा भगवदीयाः तथापि न दोषः स्यात् इति तद्व्यावृत्त्यर्थमाह–व्रजौकस इति। व्रजे एव तामसे ओकः स्थानं येषां इति। तामसभूयिष्ठा एव स्थिताः न तां पदवीं आरोढुमर्हन्ति ॥ **"इति श्रीसुबोधिन्याम्"** १०–७–५

२ लोके स्वास्थ्य तथा वेदे हरिस्तु न करिष्यति.

પછી લૌકિકાસક્તિ તરત દૂર થતાં શ્રીયશોદાજીની તુરત શ્રીમાં આસક્તિ થઈ. માટે સારાંશમાં કહેવાનું કે **મોક્ષ એટલે સંપૂર્ણ ભગવદીયત્વ.** આવી રીતે સર્વપ્રસંગમાં સર્વ વસ્તુમાં ભગવદ્બુદ્ધિ થવી જોઈએ. આવી ભગવદ્બુદ્ધિમાં કેવલાસક્તિ–ભગવદ્બુદ્ધિ શિવાયની આસક્તિ બાધક થાય માટે કેવલાસક્તિનો વૃત્રાસુરે નિષેધ કર્યો.

કૃષ્ણદાસ–જરા પણ અન્યાશ્રય એ સર્વથા બાધક થાય જ. પણ પ્રભુ કૃપાળુ છે તેથી દૂર કરે છે.

વલ્લભદાસ–હવે હું તમને આ સર્વ સંદર્ભ ઉપરથી પુષ્ટિપુષ્ટિમોક્ષનો અર્થ કહું છું.

આ સર્વ સંદર્ભ ઉપરથી પુષ્ટિપુષ્ટિમોક્ષનો અર્થ એ થયો કે—સંસારમાં રહેતાં છતાં પણ કર્મ સંબન્ધ વિના કેવલ પ્રભુના સંબંધથી જ આપની સ્વરૂપ સંબન્ધિની માયાવડે ગૃહમાં જ લોકવેદાતીત શુદ્ધ પુષ્ટિમાર્ગીય પ્રભુસ્વરૂપ સાથે સર્વ લીલાનો અનુભવ કરવામાં ભક્તને સ્વાતન્ત્ર્ય પ્રાપ્ત થવું તેને જ પુષ્ટિપુષ્ટિ મોક્ષ કહેવાય. આનું ઉદાહરણ તો શ્રી ગોપીજનો છે. આ જ મોક્ષ સર્વ ફલમાં ઉત્કૃષ્ટ છે એવું જણાવવાને સર્વના અન્તમાં પદ્યમાં જે વર્ણવાનું હતું તે વર્ણવ્યા બાદ આશીર્વાદાત્મક ક્રિયાપદ “ भूयात् ” “ થાઓ ” મુકયું છે.

ઉપસંહાર–આ પ્રમાણે શ્રીઆચાર્યચરણની કૃપાથી આ “મમોત્તમ” પદ્યના વ્યાખ્યાનનો અર્થ મેં (શ્રી હરિરાયજીએ) હર્ષથી દર્શાવ્યો છે. ॥૧॥

મારા વિચારી વદેલા વિવેચનને વિચારીને ભક્તો નિરંતર શ્રીમદાચાર્યચરણમાં આસક્તિવાળા થાઓ. ॥૨॥

પુષ્ટિપુષ્ટિમોક્ષરૂપી ઉત્તમ ફલ પણ તમને શ્રી આચાર્યચરણની કૃપાથી થશે. માટે તમો સસારાસક્તિ છોડી શ્રી આચાર્યચરણોક્ત ભક્તિમાર્ગથી ભજો. ॥૩॥

તે જ મારા પ્રભુ શ્રી આચાર્યચરણ ભક્તનો પક્ષ લેનારા છે. તે પોતાના ભક્તોનું ઐહિક અને પારલૌકિક ઉભય સિદ્ધ કરશે.

આ પ્રકારે શ્રીપ્રભુચરણકમલપરાગાનુરાગીશ્રીહરિરાયચરણવિરચિત “ મમોત્તમ ” પદ્ય વિવરણની ટિપ્પણીનો અનુવાદ સંપૂર્ણ થયો.

नीचेने ठे० पुष्टिमार्गीय सर्व प्रकारना पुस्तको मळशे
श्रीजीवनेशाचार्यपुष्टिसिद्धान्तपुस्तकभंडार
लालबावाना मदिर भुलेश्वर—मुंबई

मोहमय्यां
'मणिलाल इच्छाराम देसाई' इत्यनेन स्वीये
'गुजराती' मुद्रणयन्त्रालये मुद्रिता ।
कोट सासुनबिल्डिंग नं० ८

श्रीकृष्णाय नमः ।

श्रुतिरहस्यम् ।

काशीस्थश्रीमद्गोस्वामिश्रीगिरिधरचरणविरचितम् ।

सागरस्थ-
नेतोपनामश्रीरामकृष्णभट्टकृतप्रकाशसमेतम् ।

श्रीवीरक्षेत्रस्थ भगवद्धर्मपरायण परी मोतीलाल गोकुलदास(परी
व्रजभूषणदास अम्बाइदासवाला) इत्यस्य द्रव्येण
'भृगुपुरस्थ मूलचन्द्र तुलसीदास तेलीवाला
बी. ए., एल्.एल्. बी. वकील हाइकोर्ट'
इत्यनेन संशोध्य 'गुजराती न्यूस'
मुद्रणाख्ये मुद्रयित्वा
प्रकटीकृतम् ।

श्रीवल्लभाब्दाः ४४८ संवत् १९८२.

मूल्यमेकमुद्रिका।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्र-
चूडामणिश्रीमद्वल्लभाचार्यचरणाः।



प्राकट्यम् सं १५३५ चैत्र कृ ११ तिरोधानम् सं १५८७ आषाढ शु २

श्रीकृष्णाय नमः ।

श्रीगिरिधरजी ।

શ્રીશ્રુતિરહસ્ય ગ્રન્થના પ્રણેતા કાશીસ્થ શ્રીમદ્ગોસ્વામિશ્રીગિરિધરજી મહારાજ શ્રીમત્પ્રભુચરણના ૫૪ પુત્ર શ્રીયદુનાથજીથી આઠમી પેઢીએ થયા છે. પુષ્ટિમાર્ગનું પ્રાકટ્ય શ્રીમદાચાર્ય શ્રીમદ્વલ્લભાધીશ્વરચરણે કર્યું, તેનો પ્રચાર શ્રીમત્પ્રભુચરણે કર્યો, અને તેનું નિયમન શ્રીમત્પ્રભુચરણના ચતુર્થ લાલજી શ્રીગોકુલનાથજી તથા શ્રીહરિરાયજીએ કર્યું. જેવી રીતે સાંપ્રદાયિક આચારમર્યાદાનું નિયમન શ્રીગોકુલેશાદિએ કર્યું, તેવું જ નિયમન અને વિસ્તાર શ્રીપુરુષોત્તમજી અને યોગી શ્રીગોપેશ્વરજીએ ' સાંપ્રદાયિક વિચારમાં કર્યો. કાશીસ્થ શ્રીમદ્ગોસ્વામિશ્રીગિરિધરજી આ પ્રથમ પંક્તિની ઉભય કોટિમાં નથી, પરન્તુ શ્રીયદુનાથજીના ગૃહમાં આ એક જ પ્રસિદ્ધ પ્રતાપી બાલક થયા કે જેમણે સાંપ્રદાયિક ઇતિહાસ ઉપર નિજ પ્રભાવ પાડ્યો છે.

કાશીસ્થ શ્રીગિરિધરજી મહારાજનો પ્રાદુર્ભાવ સંવત્ ૧૮૪૭ના માર્ગશીર્ષ વદી તૃતીયાને દિવસે થયો હતો. શ્રીગોપાલલાલજી એઓશ્રીના પિતૃચરણ અને શ્રીકૃષ્ણાવતીજી એઓશ્રીના માતૃચરણ હતા. શ્રીદ્વારકાનાથજી મહારાજ એઓશ્રીના બ્રહ્મસંબન્ધદાતા ગુરુ થાય. આપશ્રી શ્રીગોપાલના પરમ ઉપાસક હતા. શ્રીગોપાલની ઉપાસનાના સાધનથી આપશ્રીએ સાંપ્રદાયિક નિધિઓ પ્રાપ્ત કરી. ૫૪ ગૃહની અનિશ્ચિતતા દૂર કરવાનો પણ આપશ્રીએ પ્રબલ પ્રયાસ આદર્યો. આપશ્રીના સમયમાં શ્રીનાથદ્વારમાં ટિકૈત તરીકે શ્રીદામોદરજી મહારાજ વિરાજતા હતા. શ્રીદામોદરજી સાથે શ્રીગિરિધરજીનો ગાઢ સંબન્ધ હોય એમ લાગે છે. શ્રીદામોદરજીના વહુજી શ્રીલક્ષ્મીજી અને શ્રીગિરિધરજીના વહુજી એ બે બહેનો હતાં. આ લૌકિક સંબન્ધ ઉપરાન્ત શ્રીગિરિધરજીનું ભાવનાવિષયક પ્રાવીણ્ય, સેવામાં કૌશલ્ય, વિદ્યાવિલાસ અને વાક્ચાતુર્યથી આપશ્રીએ શ્રીદામોદરજી ટિકૈત મહારાજ ઉપર સારી છાપ પાડી હોય એમ લાગે છે. શ્રીગિરિધરજી સંવત્ ૧૮૮૦ માં શ્રીનાથદ્વાર પધાર્યા; ત્યારે સંપ્રદાયના સર્વતન્ત્રસ્વતંત્ર વિદ્વાન્ શ્રીગોપેશ્વરજી દ્વિતીય પીઠાધીશ્વર વિદ્યમાન હતા. શ્રીગિરિધરજીને અધ્યયન કરવાનો ઉપદેશ શ્રીગોપેશ્વરજીએ કર્યો એમ શ્રવણ કર્યું છે, તથાપિ આપશ્રીએ શ્રીગોપેશ્વરજી પાસે કેટલું અને ક્યાં સુધી અધ્યયન કર્યું તે જાણવાની સાધનસામગ્રી ન્યૂન છે. શ્રીદામોદરજી સાથેના આપશ્રીના ગાઢ સંબન્ધનો પૂર્ણ લાભ આપશ્રીએ લેવાનો પ્રયત્ન કર્યો દિસે છે. શ્રીમત્પ્રભુચરણના શ્રીરુક્મિણીજીના સર્વમાં કનિષ્ઠ લાલજી શ્રીયદુનાથજી હતા. શ્રીગુસાંઇજીએ સર્વ લાલજીના ગૃહની વ્યવસ્થા સ્વયં કરી, પરન્તુ શ્રીયદુનાથજીના ગૃહની વ્યવસ્થા થઈ ન હતી એમ આપશ્રીના એક પત્ર ઉપરથી જણાય છે. 'स्वजन्त्रियां कृत्वा यदुनाथगृहं कारणीयम्.'

આ નિર્દેશથી આપણે એટલું અનુમાન કરી શકીએ કે અન્ય ૭ બાલકોના ગૃહ સિદ્ધ થઇ ગયા હતા, જ્યારે શ્રીયદુનાથજીનું ઘર સિદ્ધ કરાવવાને શ્રીગુંસાઇજીની આજ્ઞા હતી. શ્રીગુંસાઇજીના શ્રીરુક્મિનીજી વહુજીના શ્રીયદુનાથજી કનિષ્ઠ પુત્ર હતા અને એમનાથી ન્હાના શ્રીપદ્માવતીજીના શ્રીઘનશ્યામજી હતા. યદ્યપિ શ્રીઘનશ્યામજીના ઘરની અવ્યવસ્થા રહેત, પરંતુ શ્રીઘનશ્યામજી ચતુર્થલાલજી શ્રીવલ્લભને અતિપ્રિય હોવાથી

અને શ્રીગુંસાઇજીના ઘરના વ્યવહારચતુર નાયક એ સ્વયં હોવાથી શ્રીઘનશ્યામજીને દાયભાગમાં શ્રીમદનમોહનજીનું સ્વરૂપ શ્રીગુંસાઇજીદ્વારા પધરાવાવ્યું એટલે સપ્તમલાલજી શ્રીઘનશ્યામજીના ગૃહની સિદ્ધિ શ્રીયદુનાથજીના ગૃહની સિદ્ધિ પહેલાં જ થઇ ગઇ. શ્રીયદુનાથજી બહુ જ સરલ હૃદયના હોવા જોઇએ. શ્રીગુંસાઇજી પણ આપને મહારાજજી એમ સંજ્ઞાથી સંબોધતા. શ્રીગુસાંઇજીના બાલકોનું મહારાજ તરીકેનું સંબોધન જે હાલ પ્રચલિત છે, તેનો પ્રથમ પ્રયોગ શ્રીયદુનાથજીનાં સંબન્ધમાં શ્રીગુસાંઇજીએ જ કર્યો કે કેમ એ સંશય છે.

શ્રીયદુનાથજીની આ ઉદારતાને લઇને શ્રીગુંસાઇજીના છ લાલજીઓની જેવી રીતે પોતાના ઘરની સ્વતંત્ર સિદ્ધિ થઈ, તેવી રીતે શ્રીયદુનાથજીની ગૃહસિદ્ધિ ભૂતલપર આપ બિરાજ્યા ત્યાં સુધી થઇ હોય એમ લાગતું નથી. શ્રીયદુનાથજીને શ્રીગુંસાઇજીએ સુરતવાળા શ્રીબાલકૃષ્ણજી પધરાવી આપ્યા અને તે આપે ન સ્વીકારવાથી તૃતીય લાલજી શ્રીબાલકૃષ્ણજીએ એ શ્રીબાલકૃષ્ણજીને શ્રીદ્વારકાધીશની ગોદમાં પધરાવ્યા. અર્થાત્ શ્રીગુંસાઇજીએ પષ્ઠલાલજીને પધરાવી આપેલું શ્રીબાલકૃષ્ણજીનું સ્વરૂપ તૃતીય લાલજીના વંશયોને માથે બિરાજ્યું. શ્રીહરિરાયજી સ્વયં શ્રીબાલકૃષ્ણજીને શ્રીયદુનાથજીના સેવ્ય તરીકે જણાવે છે, તો પણ આ ઘરની અવ્યવસ્થાનું ઉપર જણાવેલું કારણ મુખ્ય છે. શ્રીયદુનાથજીના નિત્યલીલામાં પધાર્યા પછી શ્રીયદુનાથજીના જ્યેષ્ઠ વંશ્યને માથે શ્રીગોકુલનાથજીએ શ્રીકલ્યાણરાયજી પધરાવી આપ્યા. એ સમયથી શ્રીયદુનાથજીના જ્યેષ્ઠ વંશ્ય તરીકે તે બાલકોએ શ્રીકલ્યાણરાયજીના સ્વરૂપને શ્રીયદુનાથજીના ઘરનું સ્વરૂપ માન્યું. પરંતુ આ માન્યતા સર્વગ્રાહ્ય થઈ નહિ. શ્રીયદુનાથજીના ચતુર વિદ્વાન્ વંશ્ય તરીકે કાશીસ્થ શ્રીગિરિધરજીને આ અવ્યવસ્થા હૃદયમાં બહુ જ પરિતાપ કરતી. એ અવ્યવસ્થા દૂર કરવાને આપમાં સામર્થ્યનું પ્રભુએ દાન કર્યું હતું એમ આપશ્રી માનતા, એટલું જ નહિ પણ સયોગો પણ આપને અનુકૂલ મળી ગયા. આપના સમયમાં શ્રીનાથજીના ટિકેત શ્રીદામોદરજી મહારાજ હતા. આ શ્રીદામોદરજી શ્રીગિરિધરજીના સાઢુ થતા હતા. અર્થાત્ શ્રીગિરિધરજીના વહુજી અને શ્રીદામોદરજીના વહુજી એ બન્ને બ્હેનો હતાં. વળી શ્રીગિરિધરજી શ્રીગોપાલના ઉગ્ર ઉપાસક હતા. શ્રીગોપાલની ઉપાસનાના સામર્થ્યથી શ્રીગિરિધરજીએ ઘણા ભૌતિક ચમત્કારો દર્શાવ્યાનું ગાથાઓ જણાવે છે. આપણે એ ગાથાઓ સાથે અત્ર સંબંધ નથી, પરંતુ શ્રીગોપાલની ઉપાસનાનું શ્રીગિરિધરજીને એક પ્રકટ ફલ મળ્યું. શ્રીનાથજીના ટિકાત શ્રીદામોદરજીને ગોપાલમંત્રની દીક્ષા લેવાનો મનોરથ થયો. સંપ્રદાયમાં શ્રીગોપાલની દીક્ષા આપે એવા સુયોગ્ય વિદ્વાન્ તરીકે શ્રીગિરિધરજી આપને જણાયા. તેથી શ્રીદામોદરજી મહારાજે ગોપાલમંત્રની દીક્ષાની દક્ષિણામાં કહે છે કે શ્રીમહાપ્રભુજી દિગ્વિજયયાત્રામાં જે સ્વરૂપને ભોગ ધરીને લેતા અને જે સ્વરૂપ શ્રીનાથજીસમીપ બિરાજતું તે શ્રીમુકુંદરાયજીનું સ્વરૂપ પધરાવી આપવાનો લેખ લખીને શ્રીગિરિધરજીને આપી ગયા. શ્રીદામોદરજી મહારાજના જીવનમાં તો શ્રીમુકુંદરાયજી કાશી ન પધાર્યાં, પરંતુ શ્રીદામોદરજીના પધાર્યા પછી શ્રીદામોદરજીના વહુજી શ્રીલક્ષ્મી વહુજીએ પોતાના બનેવી શ્રીગિરિધરજી મહારાજને શ્રીમુકુંદરાયજીનું સ્વરૂપ પધરાવી આપ્યું. શ્રીલક્ષ્મી વહુજીએ પોતે પણ શ્રીગિરિધરજી પાસે ગોપાલમંત્રદીક્ષા લીધી, અને અનંતશેષ શાલગ્રામજી જેમને શ્રીમહાપ્રભુજી નિરંતર નિજ કંઠમાં

વારણ કરતા હતા, તે અનંતશયનજી પણ પધરાવી આપ્યા. આ રીતે સંવત્ ૧૮૮૬ કે
તે અરસામાં શ્રીગિરિધરજીએ શ્રીમુકુંદરાયજીને શ્રીનાથજીથી કાશી પધરાવ્યા. શ્રીનાથ-
જીના ઘરમાં ષષ્ઠ ગૃહની પાલખીઆદિનો અધિકાર શ્રીદામોદરજીએ શ્રીગિરિધરજીને આપ્યો.
આથી શ્રીગિરિધરજીના પ્રતાપબલથી ષષ્ઠગૃહના મુખ્ય પ્રતિનિધિ તરીકે કાશી તરફના
વૈષ્ણવો આપને જાણવા લાગ્યા. શ્રીદાઉજી મહારાજે શ્રીગિરિધરજીને જે લેખ લખી
આપેલો જણાવ્યો છે તેમાં શ્રીઠાકુરજી પધરાવી આપવાનું જણાવેલું છે, પરંતુ શ્રીમુકુંદ-
રાયજી પધરાવી આપવાનું કથન જોવામાં આવતું નથી, કહે છે કે શ્રીદામોદરજીએ તો
શ્રીગિરિધરજીને શ્રીનાથજીની સમીપમાંના શ્રીબાલકૃષ્ણજીનું સ્વરૂપ પધરાવી આપ-
વાનું જણાવેલું, પરંતુ શ્રીલક્ષ્મી વહુજીએ શ્રીગિરિધરજી મહારાજને એમના પ્રતાપ-
બલેથી શ્રીમુકુંદરાયજી પધરાવી આપ્યા. ગમે તેમ હો પણ શ્રીગિરિધરજી મહા-
રાજને શ્રીમુકુંદરાયજી પોતાને માથે કાશીમાં પધરાવવાનો અને શ્રીનાથજીના ઘરમાં
શ્રીયદુનાથજીના ઘરનું નામ રાખવાનો પ્રયત્ન સર્વથા શ્રીયદુનાથજીના વંશ્યને માટે સ્તુત્ય
ગણાશે. શ્રીયદુનાથજીને સંતતિમાં એક બેટીજી શ્રીશ્યામાબેટીજી હતા. આ બેટીજીએ
નિજ પિતૃચરણને પગલે ચાલી નિત્યલીલામાં પધાર્યા ત્યાં સુધી શ્રીમુકુંદરાયજીની ટેહેલ
કરી. આ લાભ મળવામાં કારણ એ થયું કે શ્રીગિરિધરજીએ પોતાના જીવનમાં
કોઈ પણ ગોસ્વામી બાલકને ગોદે ન લીધા. શ્રીમુકુંદરાયજી ૧૮૮૬ માં પધાર્યા અને
ત્યાર પછી ૧૦ દશ વર્ષ સુધી શ્રીગિરિધરજીએ શ્રીમુકુંદરાયજીની તનમનધનથી એવી
સેવા કીધી કે જે ઉક્ત ગોસ્વામીશ્રીનું ઉર્જ્વલ ભગવન્મયત્વ સૂચવે છે.

ટિકાન શ્રીદામોદરજી અને એઓશ્રીના વહુજી શ્રીલક્ષ્મીજીની કૃપાથી શ્રીગિરિ-
ધરજીએ શ્રીનાથદ્વારમાંથી શ્રીમુકુન્દરાયજી, શ્રીઅનન્તશેષજી, શ્રીવેણુજી અને શ્રી-
મહાપ્રભુજીના શ્રીહસ્તાક્ષર પધરાવ્યા. શ્રીમહાપ્રભુજીના શ્રીહસ્તાક્ષરમાં લખેલા પ્રથમા-
ધ્યાયના ચતુર્થપાદના ભાષ્ય પ્રાપ્ત થયા. સંભવ છે કે આજ શ્રીહસ્તાક્ષરભાષ્યવિભા-
ગનું શ્રીપુરુષોત્તમજીએ દર્શન કર્યું હોય. એ જ પાદના ભાષ્યપ્રકાશમાં શ્રીપુરુષોત્તમજી
નીચે પ્રકારે આજ્ઞા કરે છેઃ—ક્વેતિ પાઠઃ શ્રીહસ્તાક્ષરેષુ સંદિગ્ધત્વાદ્બોધ્યઃ। ૧-૪-૯. શ્રીદામોદરજી
મહારાજ કાંઈ સમગ્ર ભાષ્ય શ્રીહસ્તાક્ષરલિખિત પધરાવી આપે નહિ, તેથી સંભવ છે
અવશિષ્ટ મૂલ શ્રીહસ્તાક્ષરલિખિત ભાષ્યવિભાગ શ્રીનાથદ્વારમાં હોય. શ્રીગુસાંઈજીના
વંશ્યો નિજ નિજ માથે વિરાજતા શ્રીહસ્તાક્ષરનું સૂચિપત્ર પ્રસિદ્ધ કરે, તો આચાર્યશ્રીના
ઘણા ગ્રન્થો સમગ્ર મલે એટલુંજ નહિ, પણ તેના પાઠાદિ સુનિશ્ચિત થઈ શકે.
શ્રીગિરિધરજીને ભાષ્યવિભાગ ઉપરાંત શ્રીસંન્યાસનિર્ણયનું શ્રીહસ્તાક્ષરલિખિત એક પત્ર
શ્રીદામોદરજીએ પધરાવી આપ્યું.

આ રીતે શ્રીગિરિધરજીએ પ્રથમ શ્રીહસ્તાક્ષર અને શ્રીવેણુજી પધરાવ્યા. શ્રીદામો-
દરજીએ જ શ્રીગિરિધરજીને પધરાવી આપ્યા. શ્રીમુકુન્દરાયજી અને અનન્તશેષજી આપને
શ્રીલક્ષ્મીવહુજીએ શ્રીદામોદરજીના નિત્યલીલામાં પધાર્યા પછી પધરાવી આપ્યા. શ્રી-
મુકુન્દરાયજીને માટે કાશીમાં શ્રીગિરિધરજી મહારાજે એક ભવ્ય મંદિર સિદ્ધ કરાવ્યું.
શ્રીમુકુન્દરાયજીને ત્યાં પધરાવી દશ વર્ષ પર્યન્ત શ્રીની સેવાદિ શ્રીગિરિધરજીએ કર્યા.
વૈષ્ણવો આપશ્રીની લાખો રૂપીઆની હુંડીઓ સ્વીકારતા, આપે હિરા પન્ના, મોતી
માણેક આદિના અનેક આભૂષણો તથા સાજ સિદ્ધ કરી શ્રીમુકુન્દરાયજીને નિવેદન કર્યાં.

સાગરસ્થ નેતોપનામક રામકૃષ્ણભટ્ટજી શ્રીમુકુન્દરાયજીના પધાર્યા પછી શ્રીગિરિધરજીને શરણે આવ્યા. રામકૃષ્ણભટ્ટજી તૈલંગ માથુર ભટ્ટ હતા. પરમ વિદ્વાન્ હતા. શ્રીગિરિધરજીને ઉક્ત પંડિત પરમ આરાધ્ય માનતા. આ પંડિતના શરણે આવ્યા પછી શ્રીગિરિધરજીની નામસેવામાં પ્રવૃત્તિ સતત થઈ. શુદ્ધાદ્વૈતમાર્તંડ, હરિતોષિણી વિદ્વન્મંડનની ટીકા, શ્રીમદણુભાષ્યનું વિવરણ, બાલપ્રબોધિની ઇત્યાદિ ગ્રન્થો એ દશ વર્ષમાં જ સિદ્ધ થયા. આ ગ્રન્થો સંસ્કૃતમાં છે. આપે વ્રજભાષામાં ગદ્યટીકા પણ લખી. કેટલાંક અષ્ટકો પણ આપે લખ્યાં છે. તિલકાદિવિષયમાં આપશ્રીએ ઊર્ધ્વપુણ્ડ્રમાર્તણ્ડ યોજ્યો.

શ્રુતિરહસ્ય. આપશ્રીએ શ્રુતિરહસ્ય શ્રીમુકુન્દરાયજીના પધાર્યા પહેલાં જ સિદ્ધ કર્યો હોય એમ લાગે છે. ઉક્ત ગ્રન્થના આરંભ કે અન્તમાં શ્રીમુકુન્દરાયજીનું સ્મરણ નથી. ભાષા તથા વિચારશૈલીની પ્રૌઢતા હરિતોષિણી આદિ જેવી નથી; તથાપિ આપશ્રીની શ્રીમન્મહાપ્રભુચરણ વિષે નિરતિશય ભક્તિ પ્રતિપદ આ ગ્રન્થમાં પ્રકાશે છે. આચાર્યશ્રીના સ્વરૂપમાં કેવી નિગૂઢ નિષ્ઠા આપશ્રીની હતી તે આ ગ્રન્થના પર્યાલોચનથી આપણે જાણી શકીએ એમ છે. આ જ શ્રુતિરહસ્યનું ઉપબૃંહણ આપશ્રીના સેવક નેતોપનામક રામકૃષ્ણભટ્ટજીએ તત્પ્રકાશમાં કર્યું છે. શ્રુતિરહસ્ય મૂલ અને એના પ્રકાશ એ બન્ને ગ્રન્થ અત્ર મુદ્રિત છે. સહૃદય ભક્તિમાન્ વિદ્વાન્ વાંચકને આ બન્ને ગ્રન્થનું વાચન અવશ્ય વિલાસ કરાવશે.

પ્રત્યેક સંપ્રદાયમાં તત્પ્રવર્તકના સંબન્ધમાં બે પ્રકાર તદનુયાયીઓમાં જોવામાં આવે છે; એક બાહ્ય વા પ્રમાણવાદી અને બીજો અન્તરંગ પ્રમેયવાદી. પ્રથમ વર્ગના વિચારક તત્પ્રવર્તકને માટે તદુક્ત શબ્દોને અવલંબીને નિજ ભાવના બાંધે છે. આ પ્રકારની ભાવના ઐતિહાસિક દૃષ્ટિથી સમર્થિત હોવાથી સંપ્રદાયના તથા બહારના સર્વ વિચારકોને સમજાય એવી છે, એટલું જ નહિ પણ ગ્રાહ્ય છે. દ્વિતીય વર્ગ નિજ ઉત્કટ ભાવનાનુરૂપ તત્પ્રવર્તકનું સ્વરૂપ બાંધે છે. આ ભાવનાની ઉત્કટતા એટલે સુધી જાય છે કે આચાર્યસ્વરૂપની જ ભાવનાદિમાં તત્સેવ્યાદિ ભગવદાકારાદિના દર્શનાદિની અપેક્ષા રહેતી નથી. સંપ્રદાયપ્રવર્તક જ પરમ તત્ત્વ તરીકે સ્ફુરે છે, અને તદનુસાર ભક્તો ભાવના ગુણગાનાદિ કરે છે. આવા ભક્તો પણ વિવિધ પ્રકારના હોવાથી તત્તત્કૃત ભાવનાગુણગાનાદિમાં પરમ વૈવિધ્ય જોવામાં આવે છે. કોઈ કોઈ સમય એક જ ભક્તમાં ઉભય ભાવના એક જ સમય કે ક્રમશઃ જોવામાં આવે છે. સૂત્રકાર શ્રીબાદરાયણ વ્યાસને પ્રથમ નમન કરીને પછી ભાષ્યકારને મંગલાચરણમાં નમન એ બાહ્ય પદ્ધતિનું અનુસરણ છે, સૂત્રકારને નમન કર્યા પહેલા ભાષ્યકારને નમન કરવું એ પ્રમેયમર્યાદાની ભાવના છે. શ્રીપુરુષોત્તમજીના ભાષ્યપ્રકાશનું મંગલાચરણ અને લાલૂભટ્ટની શ્રીમદણુભાષ્યની યોજનાનું મંગલાચરણ પ્રમાણ અને પ્રમેયના દૃષ્ટાન્તરૂપ છે. શ્રીપુરુષોત્તમજી પણ 'શ્રીવાલ્લભાચાર્યાન् प्रणम्य श्रीविठ्ठलेश्वरान् व्यासाचार्यान्' એ ક્રમ સ્વીકારે છે. અર્થાત્ સંપ્રદાયપ્રવર્તક આચાર્યશ્રીને જ પરમ તત્ત્વ માનીને સર્વ નિર્વાહ કરવાનું એક પક્ષે સ્વીકાર્યું. આચાર્યશ્રીનું અલૌકિકત્વ સ્વીકાર્યા પછી એઓશ્રીને વિષે પુરુષોત્તમત્વાદિભાવનાઓ તે તે ભક્તોને સ્ફુરે એ સ્વાભાવિક છે. આચાર્યશ્રી જેમ શ્રીગુસાંઇજીને વસ્તુતઃ કૃષ્ણરૂપે સ્ફૂર્યા, તેમ શ્રીગુસાંઇજી, શ્રીગિરિધરજી, શ્રીગોકુલનાથજી આદિ તત્તદ્ભક્તોને પુરુષોત્તમરૂપે સ્ફૂર્યા અને નિજનિજ સ્ફૂર્તિપ્રમાણે તે તે સ્વરૂપના ગુણગાનાદિ તેઓએ કર્યા. આ સર્વ ભાવનાઓનું મૂલ સંપ્રદાયમાં જ

છે અને તથી અમુક સ્વરૂપને મુખ્ય માની અન્યને ગૌણ ગણી કોઇ ભક્ત માત્ર તે જ સ્વરૂપનું ગુણગાનાદિ કરે તેટલા માત્રથી એ પુષ્ટિમાર્ગીય નથી એમ કહેનારા સંપ્રદાયના શુદ્ધ દૃષ્ટિબિન્દુથી ચ્યુત થાય છે.

સંપ્રદાયમાં આચાર્યશ્રી અને શ્રીમત્પ્રભુચરણ પ્રવર્તક તરીકે સ્વીકારવામાં આવે છે, સંપ્રદાયનું ગુરુત્વ પણ પિતાપુત્રમાં સ્વીકારાયું છે, શ્રુતિ પણ 'यथा देवे तथा गुरौ' એમ આજ્ઞા કરે છે. આ દૃષ્ટિબિન્દુથી શ્રીગોકુલનાથજી શ્રીમન્મહાપ્રભુચરણ અને શ્રીમત્પ્રભુચરણની જ પુરુષોત્તમત્વભાવનામાં જ શ્રેય જોતા. પુરુષોત્તમત્વની ભાવના જે લોકો પોતાને વિષે કરતા તેમને પણ આપે નિષેધ સ્પષ્ટ શબ્દોમાં કર્યો છે, 'તેવાઓ આચાર્યશ્રીની પ્રસન્નતા સિદ્ધ કરી શકશે નહિ, તેવાઓનો આગ્રહ દુષ્ટ છે, ઇત્યાદિ. (मां पुरुषोत्तमं निश्चित्य भजन्ते किं तेन आचार्याणां प्रसन्नता सिध्यति न कदापीत्यर्थः । एतेषामाग्रहविषये भगवदिच्छाया एव नियामकत्वादस्माकमपि आग्रहो नास्ति दुष्टाग्रहवतां स्वभावपरावरात्तौ ॥)

શ્રીગોકુલેશની આવી સ્પષ્ટ આજ્ઞાનો અનાદર કરીને પુરુષોત્તમભાવનાને , સર્વસાધારણ કરી નાખવામાં સંપ્રદાયે એ અલૌકિક ભાવનામાં સ્થિત ગૌરવનું તિરોધાન કરી નાંખ્યું છે. ભૂતલ ઉપર નિજ વિશ્વોદ્ધારક સ્વરૂપ પ્રકટ કરવાને સાક્ષાત્ શ્રીકૃષ્ણ શ્રીમદ્વલ્લભાધીશ્વરસ્વરૂપે પ્રકટ થયા એ ભાવનામાં પ્રકટ થતું આચાર્યશ્રીનું વસ્તુતઃ કૃષ્ણત્વ સમજી શકાય એવું છે. આચાર્ય સ્વરૂપે પ્રકટિત કૃષ્ણમાં સામર્થ્યન્યૂનતાની શંકા જ નથી, તથાપિ આવિર્ભાવની મર્યાદા છે. પુરુષોત્તમ આચાર્યસ્વરૂપે શ્રીગોપીજનવલ્લભવત્ ભગવદ્દાસ્ય અને સંપ્રદાયમાં ઉપદિષ્ટ સર્વસ્વનિવેદન ન જ સ્વીકારે, કારણ કે તેમ કરવામાં આચાર્યસ્વરૂપનું વૈશેષ્ય તિરોધાન થઈ જાય. 'येन रूपेण यत्कार्यं करोति तेन रूपेण समर्थोपि तदतिरिक्तं न करोति, तथैव तल्लीला यतः'–આચાર્યશ્રીનું પુરુષોત્તમત્વ માત્ર કથન નહિ કરતા, પણ અનુભવતા એવા પરમ ભાગ્યવાન્ શ્રીપદ્મનાભદાસાદિ ભગવદીયોએ સર્વસ્વનિવેદનાદિ શ્રીમન્મથુરેશાદિ ભગવત્સ્વરૂપમાં જ કર્યાં, અને શ્રીદામોદરદાસાદિ મહાનુભાવો પણ શ્રીમત્પ્રભુચરણને શ્રીગોપીજનવલ્લભની જ રહસ્યલીલાના ગુણાનુવાદમાં સહાયક થયા. આ સૂક્ષ્મ મર્યાદાની વિસ્મૃતિમાં પુરુષોત્તમત્વભાવના આચાર્યશ્રીના વંશ્યોને વિષે તથા વૈષ્ણવ જનસમાજને માટે હિતકર્ત્રી નથી નિવડી એમ ઘણાનો અનુભવ સાક્ષી પૂરી શકશે. આજ કારણથી પ્રમેયના ઉંડા કુવામાં ભુસકો મારવા જવામાં અહિત થાય, તેના કરતા આચાર્યશ્રીને તચ્છબ્દને જ અવલંબીને સૃષ્ટિમાં થઇ ગયલા સર્વ આચાર્યોના શિરોમણિ તરીકે જે સ્વીકારે, તો તેને સ્વલ્પ પણ પતનનો ભય નથી, એટલું જ નહિ પણ એ ભાવના એટલી બધી પ્રકટ સુદૃઢ શ્રેયસ્કર અને કલ્પનારહિત છે કે જેનો સ્વીકાર સાંપ્રદાયિકો વિના સંકોચે કરી લે છે અને સંપ્રદાયેતરને સમજવામાં ક્લેશ પડતો નથી. આ ભાવના પ્રમેય દૃષ્ટિવાળાઓને કનિષ્ઠ લાગે, તથાપિ એ કનિષ્ઠતા તેમના શબ્દમાં જ છે; પરિણામે એ જ ભાવના આચાર્યશ્રીના તાત્ત્વિક સ્વરૂપનો યથાર્થ પરિચય કરાવવામાં પ્રથમ સોપાનરૂપ હોવાથી નિજ ઉત્તમત્વ સિદ્ધ કરે છે. આ પ્રકારે પ્રમાણ અને પ્રમેય સરણિ સંપ્રદાયમાં પ્રચલિત છે. શ્રીગિરિધરજી શ્રુતિરહસ્યમાં પ્રમેયસરણિને અનુસરે છે.

આ પ્રકારે પ્રસ્તુત શ્રુતિરહસ્યગ્રન્થ પણ દ્વિતીય કોટિનો છે. શ્રીમદાચાર્યજીનું પુરુષોત્તમત્વ શ્રીગિરિધરજીને સ્ફુર્યું. નિખિલ વેદ શ્રીમદ્વલ્લભાધીશ્વરનું જ પ્રતિપાદન કરે છે એમ આપશ્રીએ અનુભવ્યું. જે પ્રકારે આપશ્રીને અનુભવ થયો તે પ્રકાર આ ગ્રન્થમાં આપ-

શ્રીએ દર્શાવ્યો છે. 'असद्वा इदमग्र आसीत्' અને 'नमो वाचे' ઇત્યાદિ તૈત્તિરીય શ્રુતિઓમાં આપશ્રીને આચાર્યસ્વરૂપનું જેવું દર્શન થયું તેવું પરમ ભક્તિથી પ્રતિપાદન કર્યું છે. શ્રી ગિરિધરજીનો આ ભક્તિવિલાસ છે એમ આપશ્રી સ્વયં ગ્રન્થાન્તે આજ્ઞા કરે છે. શ્રી ગિરિધરજીનું દૃષ્ટિબિન્દુ નહિ સમજનારા લોકોને માટે આપશ્રીનો પ્રયત્ન નથી જ. આચાર્યસ્વરૂપ વિષે ધર્મિવિપ્રયોગાદિની સાંપ્રદાયિક ભાવનાઓનું મૂલ આ ગ્રન્થમાં હોય એમ લાગે છે.

સંપ્રદાયમાં પુરુષોત્તમત્વની ભાવના સર્વવ્યાપી અને સરલ થઈ ગઈ હતી એમ શ્રીગિરિધરજીને લાગ્યું હોય એમ લાગે છે. સંપ્રદાય તો આચાર્યશ્રીના વંશ્ય માત્રને યોગ્યતાદિનો વિચાર કર્યા વિના કેવલ આચાર્યશ્રીના સંબંધનેજ મુખ્ય માનીને, પુરુષોત્તમ તરીકે કથન કરે છે. પરંતુ શ્રીગિરિધરજી આ સાંપ્રદાયિક માન્યતાનો કાંઇક અંશે સંકોચ કરતા હોય એમ લાગે છે. આચાર્યશ્રીનું વાચસ્પતિત્વ પ્રતિપાદન કરતાં આપશ્રી આજ્ઞા કરે છે કે 'વાચસ્પતિ શબ્દથી હાલમાં વિદ્યમાન શ્રીમદાચાર્યકુલમાં ઉત્પન્ન જેમનું ભાષ્ય નિબન્ધસુબોધિની આદિ સકલ ગ્રન્થોનો ઉપદેશ કરવાનું સામર્થ્ય છે તેમનું ગ્રહણ કરવું.' શ્રીગિરિધરજીની આ આજ્ઞા સંપ્રદાયે સ્વીકારી હોય એમ ઇતિહાસની સાક્ષી નથી. જો કે શ્રીગિરિધરજીની આજ્ઞાનું અનુસરણ થયું હોત તો સંપ્રદાયને લાભ જ થાત એ નિઃસંશય છે.

આ સિવાય તિલક તથા માલાની સંપ્રદાયમાં આવશ્યકતા છે તે પુરાણવાક્યોના ઉપન્યાસથી આપશ્રી સારી રીતે આનુષંગિક જણાવી દે છે.

શ્રીગિરિધરજીનું હાર્દ શ્રીરામકૃષ્ણભટ્ટજી સુન્દર રીતે દર્શાવે છે. આ ગ્રન્થનો સાર પણ તેજ છે. 'સર્વે વેદ શ્રીમહાપ્રભુજીનો જ બોધ કરે છે.'

मम तु प्रतिभात्येवं सर्वे वेदा महाप्रभोः ।
श्रीवल्लभाचार्यरूपं हि बोधयन्त्येव निश्चितम् ॥

આ દૃષ્ટિબિન્દુથી સર્વ વેદ શ્રીમહાપ્રભુજીનું પ્રતિપાદન કરે છે, અને પુરુષોત્તમનું જ સર્વ વેદ પ્રતિપાદન કરતા હોવાથી આચાર્યશ્રી સ્વયં પુરુષોત્તમ છે એમ શ્રીગિરિધરજી મહારાજનું ધ્રુવ છે. श्रीकृष्णार्पणमस्तु ।

ગંગાદશમી, ૧૯૮૨. મૂલચન્દ્ર તુલસીદાસ તેલીવાલા

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

શ્રુતિરહસ્યનો ગુર્જરભાષામાં અનુવાદ.

કાશીસ્થ ગોસ્વામિશ્રીગિરિધરજી મહારાજે શ્રીઆચાર્યચરણનું સ્વરૂપ શ્રુતિપ્રતિપાદિત પુરુષોત્તમાભિન્ન છે એમ બતાવી આપનાર શ્રુતિરહસ્ય નામનો ગ્રન્થ સંસ્કૃત ભાષામાં રચ્યો છે, તેનો સાધારણ ગુજરાતી ભણેલાને પણ સમજાય એવી સરલ ભાષામાં અનુવાદ કર્યો છે.

ગ્રન્થના આરંભમાં મંગલાચરણ કર્તવ્ય છે. તેથી શ્રીગિરિધરજી મહારાજ શ્રીગોપાલને નમસ્કારાત્મક મંગલ કરે છે.

સમગ્ર પ્રાકૃત ધર્મથી રહિત એક વેદવડે જ જાણી શકાય તેવા અને સ્વાભાવિક ઐશ્વર્યાદિક સર્વ ઈશ્વરધર્મ સહિત એવા શ્રીગોપાલને નમસ્કાર કરું છું.

પોતાના અંતરંગ ભક્તોને સ્વસ્વરૂપ બતાવનાર સ્નેહમાર્ગરૂપી કમલને પ્રકાશ કરવામાં સૂર્યરૂપ શ્રીવલ્લભાચાર્યચરણને હું નમું છું.

શ્રુતિના અર્થમાં નવીન બુદ્ધિકલ્પનાનું દાન કરનાર ભક્તિમાર્ગરૂપી વેલીનું પોષણ કરવામાં નવીન મેઘરૂપ લોકવ્યાપિ યશને ફેલાવનાર પર-પુરુષોત્તમરૂપ શ્રીપ્રભુચરણ શ્રીવિઠ્ઠલનાથજીને મારી નતિ હો.

તે શ્રીગુસાંઇજીના છઠ્ઠા પુત્ર શ્રીયદુનાથજીને વંદન કરું છું કે જે વિપ્રયોગ રસનો અનુભવ કરાવનાર છે અને બુદ્ધિવગરનો માણસ પણ જેને નમન કરવા માત્રથી બુદ્ધિમાન્‌ની પદવીને પામે છે.

એ પ્રમાણે શ્રીગિરિધરજી મહારાજ શ્રીકૃષ્ણ શ્રીમહાપ્રભુજી શ્રીગુસાંઇજી તથા શ્રીયદુનાથજીને નમસ્કાર કરી સ્વદૈન્ય ખ્યાપન કરવાને માટે આજ્ઞા કરે છે કે શ્રુતિનો અર્થ અતિ ગંભીર હોય છે તે ક્યાં, અને તેનો અર્થ કરનાર મંદમતિવાળો હું ક્યાં ? તો પણ તેનો અર્થ કરવા જતાં ખલ એવા વિદ્વાનોના ઉપહાસને પાત્ર થઇશ.

તો પણ શ્રીમદાચાર્યચરણની કૃપાથી મારું રચેલું અને તેઓશ્રીની જ પ્રેરણાથી જણાયેલું શ્રુતિરહસ્ય વિદ્વાનો આનંદથી અવલોકો.

શ્રીમદાચાર્યચરણ શ્રીવલ્લભાચાર્યજી છ ઐશ્વર્યાદિ તથા સંયોગ અને વિપ્રયોગ એમ બે ભેદવાળો રસ તદ્રૂપ હોઇને ધર્મ તથા ધર્મિરૂપ એ આઠ ધર્મયુક્ત ધર્મિરૂપ શ્રીવલ્લભાચાર્યનું સ્વરૂપ વેદે વર્ણવ્યું છે. તેનું વર્ણન શ્રુતિપ્રમાણથી મારી બુદ્ધિ પ્રમાણે હું વર્ણવું છું.

વાદી શંકા કરે છે કે, શ્રીઆચાર્યજીનું સ્વરૂપ શ્રુતિપ્રતિપાદિત છે એવું તો સાંભળવામાં નથી, છતાં તમે તો કહો છો કે વેદમાં તેનું સ્વરૂપ વર્ણવ્યું છે, તો તે કેમ ઘટે? તેના ઉત્તરમાં કહે છે કે જે અંતર્મુખ દૈવી જીવો છે, તેમને તમે કરી તેવી શંકા થતી નથી, પણ બહિર્મુખ આસુર જીવોને તમે કરી તેવી શંકા થાય છે. જેની કલિકાલના

તામસભાવથી બુદ્ધિ ઢંકાઈ ગઈ છે, તેને તો વેદ પણ શ્રીઆચાર્યજીનું રૂપ બતાવી શકતા નથી, કારણકે બહિર્મુખનો તે સ્વરૂપ જાણવાનો અધિકાર નથી. તેથી જ ગીતામાં તેવા-ઓને માટે ભગવાન્ આજ્ઞા કરે છે કે, મન નહિ મળતાં તેવા બહિર્મુખો અધમગતિને પામે છે. શ્રીમહાચાર્યચરણના સ્વરૂપનું પ્રતિપાદન વેદની તૈતિરીય ઉપનિષદની આનંદ-વલ્લીમાં કર્યું છે, ત્યાં ब्रह्मविदाप्नोति परम् બ્રહ્મને જાણનાર પરને પામે છે. ત્યાં બ્રહ્મજ્ઞાન સાધન અને પરબ્રહ્મજ્ઞાન ફલ છે એમ કહી तदेषाऽभ्युक्ता ત્યાંથી લઈને તેનું વ્યાખ્યાન કોશથી લઈને જગતની ઉત્પત્તિ સુધી કહ્યા પછી, રસાત્મક પુરુષોત્તમને મળવાના પ્રસ્તાવમાં તે રસાત્માને મળવાનું સાધન તો શ્રીઆચાર્યજી છે એમ કહેવાને માટે ત્યાં શ્રીઆચાર્યચરણનું સ્વરૂપ બતાવતાં કહે છે, પ્રથમ ત્યાં આચાર્યચરણનો ભૂતલ ઉપર પ્રાદુર્ભાવ ન થયો; અને હવે પ્રાદુર્ભાવ થયો છે તેનું હેતુપૂર્વક વર્ણન આ પ્રમાણે શ્રુતિ કરે છે. असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानं स्वयमकुरुत तस्मात्तत्सुकृतमुच्यत इति । यद्वै तत्सुकृतं रसो वै स॰, रसं॰ ह्येवायं लब्ध्वानन्दी भवति–આ શ્રુતિનો અર્થ–અસત્ આ પ્રથમ હતું એમાં અસત્ શબ્દથી જગત્ તો ન લેવાય, કારણકે 'હે સોમ્ય આ બધું સત્ હતું' એ શ્રુતિનો વિરોધ આવે. તેથી શ્રુતિમાં જગતને તો સત્ કહ્યું છે, તેથી સત્પદથી લીલાસ્થ દૈવી જીવો લેવા. આગળ પણ જ્યાં એક વચન આવે ત્યાં જાતિવડે એકવચન લેવું. જે વખતે નિત્યલીલાસ્થ દૈવી જીવ ભૂતલ ઉપર નથી પ્રકટયો, તે સમયને અસત્ શબ્દથી કહ્યો છે. તેથી શ્રીઆચાર્યચરણ પધાર્યા પહેલાં આ જગત્ એવા દૈવી જીવના પ્રાકટયવગરનું હતું, તે પછી દૈવી જીવો ઘણો વખત નિત્યલીલામાં રહી ત્યાંથી ભગવાનની ઈચ્છા ભૂતલ ઉપર તેમને મોકલવાની થતાં તેઓ કોઈ નિમિત્ત કરી આ જગતમાં આવ્યા, ત્યારે આ જગત્ પહેલાં असत् હતું તે હવે દૈવી જીવો આવવાથી सत् થયું. દૈવીજીવોવાળું આ જગત્ નિશ્ચય થયુ. તે સમયે જે દૈવી જીવો ભૂતલ ઉપર આવ્યા, તેનો ઉદ્ધાર કરવાને માટે રસાત્મક પુરુષોત્તમે પોતે પોતાના સ્વરૂપને શ્રીવલ્લભાચાર્યરૂપે ભૂતલ ઉપર પ્રકટ કર્યું, ભૂતલ ઉપર બીજા આચાર્યો થયા છે ખરા, પણ તે રસાત્મક પુરુષોત્તમ સ્વરૂપનુ પ્રતિપાદન કરતા ન હોવાથી રસાત્માનો પ્રાદુર્ભાવ તો શ્રીવલ્લભાચાર્યજીના સ્વરૂપમા જ ઘટે છે, કારણકે તેમણે જ રસાત્મક માર્ગ પ્રકટ કર્યો બીજા આચાર્યો રસાત્મક માર્ગ પ્રકટ કરવામા સમર્થ નથી. તેથી જ તેઓ પુરુષોત્તમરૂપ પણ નથી તેથી જ દૈવીજીવનો ઉદ્ધાર કરનાર પધાર્યા તેથી જ શ્રુતિમાં આગળ કહે છે કે तत्सुकृतमुच्यते. તે શ્રીઆચાર્યજી પ્રકટ થઈને દૈવી જીવોને सुकृत એટલે ભગવત્સેવારૂપી સુકૃત કરવાનો ઉપદેશ કરે છે. તેથી દૈવીજીવોને બીજું કર્તવ્ય નથી એમ બતાવતી શ્રુતિ કહે છે કે यद्वै तत्सुकृतं तस्मात् નિશ્ચયથી જાણો કે શ્રીવલ્લભાચાર્યે કહ્યું તેજ સારું કર્તવ્ય છે. બીજુ કર્તવ્ય જીવનું નથી. એ શ્રીઆચાર્યજીના ઉપદેશનુ ફલ હવે કહે છે કે તેમણે જે સેવા બતાવી છે તે કરતાં દૈવીજીવને રસાત્મક ફલ થાય છે, તે રસરૂપ થઈ જાય છે. રસરૂપ અને રસાત્મક ફલરૂપ શ્રીકૃષ્ણ તેજ છે કે જે બ્રહ્મવિદ્ પરને પામે છે, ત્યાં પરશબ્દથી જે કહેલ છે તે શ્રીકૃષ્ણ છે. તેને જીવ પ્રાપ્ત થાય છે.

ત્યાં શંકા કરે છે કે ब्रह्मविदाप्नोति परम् એ શ્રુતિમાં કહેલ ફલાત્મક પુરુષોત્તમને રસરૂપપણું કેમ ઘટે? તે શંકા મટાડવા માટે વ્યાસસૂત્રના आनन्दमयाधिकरणमां ब्रह्मणा विपश्चिता એનો અર્થ વિવિધ ભોગચતુર એવો વિપશ્ચિત્ શબ્દનો અર્થ કર્યો છે. તેને

વ્યાકરણના પૃષોદરાદિ ગણથી સિદ્ધ કર્યો છે. એવા અનેક પ્રકારના ભોગમાં ચતુર એવા બ્રહ્મની સાથે જીવ સર્વ કામાશન કરે છે. તે બ્રહ્મના રસને આ જીવ પ્રાપ્ત કરીને શ્રી-મહાપ્રભુજીએ બતાવેલું સેવારૂપી સુકૃત કરનારો જીવ આનંદી બને છે. સેવાફલમાં ત્રણ ફલ બતાવ્યાં છે. અલૌકિક સામર્થ્ય, સાયુજ્ય, અને સેવોપયોગી દેહ વૈકુણ્ઠ આદિમાં, એ ફલમાંથી એકને પામીને આનંદમય વિગ્રહ થઈ જાય છે. એમ શ્રુતિમાં વર્ણન કર્યું છે; આગળ को ह्येवान्यात् ઇત્યાદિ પુરુષોત્તમના સ્વરૂપનું વર્ણન છે.

ભગવાન્ ગીતાજીમાં આજ્ઞા કરે છે કે બધા વેદવડે હું જણાઉં છું; તેથી બધો વેદ પુરુષોત્તમના સ્વરૂપને કહેનાર છે. આચાર્યનું સ્વરૂપ પુરુષોત્તમરૂપ છે તે ભગવાને શ્રી-ભાગવતના એકાદશ સ્કંધમાં કહ્યું છે કે आचार्यं मां विजानीयान्नावमन्येत कर्हिचित्. આચાર્યનું સ્વરૂપ એ મારું સ્વરૂપ સમજવું, ત્યાં માં આચાર્ય મને જાણો. ત્યાં અભેદ આચાર્યથી કહ્યો છે. તેથી શ્રીવલ્લભાચાર્યજીને પુરુષોત્તમરૂપ કહેવામાં કાંઇ બાધક નથી. શ્વેતાશ્વેતર ઉપ-નિષદમાં यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः જેની પ્રભુમાં પરમભક્તિ હોય, અને તેવી જ ભક્તિ ગુરુમાં હોય, તેવા મહાત્માનેજ શાસ્ત્રમાં કહેલા અર્થો હૃદયમાં પ્રકાશે છે. ભક્તિરહિતને શાસ્ત્ર પણ કાંઇ કરી શકતું નથી. ઉપલી શ્રુતિમાં દેવ અને ગુરુને તુલ્ય કહ્યા છે; તેથી શ્રીવલ્લભાચાર્યજીને પુરુષોત્તમરૂપે શ્રુતિ વર્ણવે તો તેમાં કોઇને શંકા કરવાનું કારણ રહેતું નથી.

વળી શ્રીવલ્લભાચાર્યજીના સ્વરૂપનું શ્રુતિ વર્ણન કરે છે, તે બતાવે છે.

नमो ब्रह्मणे नमोस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्य:, नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि। આ શ્રુતિનો અર્થ-બ્રાહ્મણરૂપ ધારણ કરનાર, શ્રીવલ્લભાચાર્યને નમસ્કાર હો. શ્રુતિમાં શ્રીવલ્લભાચાર્યજીનું નામ દેખાતું નથી, તો શ્રી વલ્લભાચાર્યપરત્વે તે શ્રુતિનો અર્થ છે, એમ શા ઉપરથી સમજવું? આવી શંકા કોઇને થાય તો તે ન કરવી, કારણ કે શ્રીવલ્લભા-ચાર્યજીના બધા ધર્મો શ્રુતિમાં સ્પષ્ટતાથી બતાવેલા છે. તેવા ધર્મવાળા ધર્મી શ્રીવલ્લભાચાર્યજીના સ્વરૂપનુંજ તે શ્રુતિ પ્રતિપાદન કરે છે એવો નિશ્ચય થાય છે. જેમ चत्वारि शृङ्गा એ શ્રુતિ મહા ભાષ્યકારે સમાનધર્મ જણાતાં વ્યાકરણશાસ્ત્રપરત્વે ઘટાવી છે, તેમ અમે આ શ્રુતિમાં કહેલા બધા ધર્મો શ્રીમદ્‌વલ્લભાચાર્યજીમાં હોવાથી તત્પર અમે તેનું વ્યાખ્યાન કર્યું છે. હવે કહે છે કે બ્રાહ્મણરૂપ તો ભગવાને વામનાદિ અવતારમાં ધર્યું છે, તેથી આ શ્રુતિ વામનજીના રૂપને પ્રતિપાદન કરનારી છે એમ કોઇ શંકા કરે; તો ત્યાં બીજું વિશેષણ બતાવે છે કે બ્રાહ્મણમાં અવતાર ધારણ કરવા છતાં અગ્નિરૂપ છે. શ્રીવલ્લભાચાર્ય અગ્નિ-રૂપ છે; એટલે વામનાવતાર બ્રાહ્મણ છે; છતાં અગ્નિ નથી. શ્રી વલ્લભાચાર્યજી બ્રાહ્મણ છતાં અગ્નિસ્વરૂપ છે. ત્યાં કહે છે કે અગ્નિરૂપ ધારણ કરનાર સૂર્યાદિ લોકમાં દેવ હોય છે, મનુષ્ય અગ્નિરૂપ કેમ થાય એ શંકાની નિવૃત્તિ માટે ત્રીજું વિશેષણ કહે છે, नमः पृथिव्यै, પાર્થિવ રૂપ ધારણ કરનાર એમ કહેવાથી આ લોકમાં પ્રાદુર્ભાવ થયાનું સૂચન કર્યું છે. શા માટે પ્રાદુર્ભાવ થયો એમ કોઈ કહે તો તેના ઉત્તરમાં શ્રુતિ કહે છે કે नम ओषधीभ्य:, આપ ઓષધિ રૂપે ભૂતલ ઉપર પ્રકટ્યા છો. જીવોને ભવરૂપી રોગ લાગ્યો છે તેને મટાડવા આપ ઓષધિરૂપ ધારણ કરી પ્રકટ થયા છો. એટલે જીવના સંસારને મટાડી તેનો ઉદ્ધાર કરવા માટે આપનું પ્રાકટ્ય છે. ત્યાં કહે છે કે ભગવાને પ્રલ્હાદની રક્ષા કરવા માટે અને હિરણ્યકશિપુને મારવા નૃસિંહાવતાર ધારણ કર્યો; તત્પરત્વે આ શ્રુતિનું તાત્પર્ય હશે, તો ત્યાં બીજું

વિશેષણ કહે છે જે नमो वाचे આ શ્રીવલ્લભાચાર્યજીના અવતારમા કોઈને મારીને ઉદ્ધાર કરવાનો નથી, પણ વાણીવડે એટલે વચનદ્વારા ઉદ્ધાર છે ભક્તિમાર્ગનો વચનદ્વારા ઉપદેશ કરી દૈવી જીવોનો જન્મમરણથી ઉદ્ધાર કરવામા એમને સામર્થ્ય ક્યાથી થયુ એ શકાના સમાધાનાર્થે બીજુ વિશેષણ કહે છે नमो वाचस्पतये શ્રીવલ્લભાચાર્યચરણે આપે જ ભાગવતના પ્રથમ સ્કન્ધના સુબોધિનીજીના આરભમા भर्ग तस्य विनेचित એ શ્લોકમા પુરુષોત્તમના મુખારવિંદના અધિષ્ઠાતૃરૂપ એવુ નિજ સ્વરૂપ છે એમ શ્રીમુખથી આજ્ઞા કરી છે એટલે वाचा वह्निर्मुखक्षेत्र એ ન્યાયથી આપશ્રી વાણીના પતિ હોઈને વાણીથી ઉદ્ધાર કરવાને સમર્થ છે ત્યા શકા કરે કે અધિષ્ઠાતૃરૂપ કહો છો, ત્યારે તો કોઈ અશાદિ અવતાર હશે, પૂર્ણ પુરુષોત્તમ તેને કેમ કહી શકાય, એ શકાના ઉત્તરમા એક બીજુ વિશેષણ શ્રુતિ આપે છે—नमो विष्णवे ગુણાવતાર વિષ્ણુ છે એમ કોઈને શકા ન થાય તદર્થે તેનો અર્થ કરે છે કે વ્યાપક એવા પૂર્ણ પુરુષોત્તમરૂપ એવા શ્રીવલ્લભાચાર્યને નમન હો ઋગ્વેદમા તો महते करोमि એવો પાઠ છે એનો અર્થ એજ કે મોટા એવા વિષ્ણુને નમન કરુ છુ એવા વિશેષણો જેનામા સાર્થક થાય છે એવા શ્રીવલ્લભાચાય પ્રાકૃત શરીરવાળા નથી, પણ સર્વત્ર વ્યાપ્ત છે એમ કહેવાથી नम पृथिव्यै એ વિશેષણથી પ્રાકૃત શકાને પણ અહિં સ્થાન નથી

नमो ब्रह्मणे એ શ્રુતિનો બીજો અર્થ પણ થાય છે તો તમે શ્રીવલ્લભાચાર્યપરત્વે કેમ લગાડો છો? એવી કોઈ શકા કરે તેના ઉત્તરમા કહેવાનુ કે શ્રીભાગવતમા કહ્યુ છે કે ભક્ત પોતાની બુદ્ધિવડે જેવા જેવા ઈશ્વરસ્વરૂપની ભાવના કરે, તેવુ તેવુ રૂપ તે તે ભક્તના અનુગ્રહને લઈને પ્રભુ ધારણ કરે છે એ ન્યાયથી ભક્તની ભાવનાને અનુકૂલ રૂપ પ્રભુ ધારણ કરે છે તેમ દેવ શબ્દ પણ બ્રહ્માત્મક ભગવદ્રૂપ હોવાથી ભક્તની ભાવનાને અનુસારે પોતાના અર્થને બતાવનાર થાય છે જો એમ ન હોય તો નિરુક્તમા चत्वारि शृङ्गा એ શ્રુતિ યજ્ઞપરત્વે વર્ણવી છે, તે જ શ્રુતિ મહાભાષ્યકાર વ્યાકરણશાસ્ત્રપરત્વે લગાવે છે બન્ને ઋષિ પ્રામાણિક છે, એકનુ કહેવુ સાચુ અને બીજાનુ કહેવુ ઠીક નહિ એમ કોઈથી બોલાય નહિ માટે જે શાસ્ત્રમા જે રૂપે શ્રુતિનો અર્થ વર્ણવ્યો હોય તે શાસ્ત્રની દૃષ્ટિએ શ્રુતિનો તે જ અર્થ છે એમ સમજવુ માટે જ વિદ્યારણ્યસ્વામિએ चत्वारि शृङ्गा એ શ્રુતિને, ઋષિએ કહેલ વેદના અર્થને બાજુ પર મૂકી, પોતે પ્રણવપરત્વે તેનો અર્થ કરેલો છે તે શ્રુતિ નીચે પ્રમાણે અર્થસહિત આપે છે

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यांआविवेश । આ શ્રુતિનો નિરુક્તકાર યાસ્ક મુનિ આ પ્રમાણે અર્થ કરે છે ચાર વેદ એ તેના શૃઙ્ગ છે, ત્રણ સવન એના પાદ છે, પ્રાયણીય ઉદયનીય એ બે તેના શીર્ષ છે સાત છદ તેના હાથ છે અને તે મત્ર બ્રાહ્મણ અને કલ્પ એ ત્રણ પ્રકારે બધાયલો છે એવો વૃષભ એટલે શ્રેષ્ઠ તે ઋગ્વેદવડે પ્રશસા કરે છે, યજુવડે યજન કરે છે, સામવડે સ્તુતિ કરે છે એ તેનુ રોરવણ છે આવો યજ્ઞ મનુષ્યોમા આવિષ્ટ થઈને યજન કરાવે છે મહાભાષ્યકાર પતજલિમુનિ આજ શ્રુતિનો અર્થ બીજો કરે છે. તેજ આપે છે નામ, આખ્યાત, નિપાત, ઉપસર્ગ એ વ્યાકરણશાસ્ત્રના ચાર શૃઙ્ગ છે ભૂત ભવત, ભવિષ્યત્ એ ત્રણ કાલરૂપ તે શાસ્ત્રના ચરણ છે નિત્ય અને કાર્યરૂપ શબ્દ તે બે શીર્ષ છે (શબ્દ અને અર્થ તેમા પણ વ્યગ્ય અને વ્યજક તેમા શબ્દ વ્યજક અને અર્થ વ્યગ્ય

તે. નિત્ય અને કાર્યરૂપે પણ થાય છે). સાત વિભક્તિ એ તેના હાથ છે. ત્રણ સ્થાનમાં એ શબ્દશાસ્ત્ર બંધાયેલ છે. (ઉરસ્ શિરસ્ અને કણ્ઠ એ ત્રણમાં તે બદ્ધ છે) વર્ષણ કરવાથી એ વૃષભ કહેવાય છે; તે રોરવીતિ એટલે શબ્દ કરે છે. (રુ ધાતુ શબ્દ કર્મક છે) એ શબ્દરૂપ મોટો દેવ તે મનુષ્યોમાં પ્રવેશ એટલા માટે કરે છે કે હું પણ મોટો દેવ થાઉં. તેથી વ્યાકરણશાસ્ત્ર ઉપરની શ્રુતિમાં કહ્યા એવા ગુણવાળું હોવાથી તે બધાંયે ભણવું જોઇએ એમ વ્યાકરણશાસ્ત્રપરત્વે અર્થ થયો.

રામાનુજાચાર્યને અનુસરનારાઓ તેનો અર્થ બીજી રીતે આ પ્રમાણે કરે છે. જે પરમાત્માને ચાર વેદરૂપી શૃંગ છે, નિત્યજીવ, મુક્તજીવ અને બદ્ધજીવ એ ત્રણ પરમાત્માના ચરણ છે, શુદ્ધ સત્ત્વ અને ત્રિગુણ સત્ત્વ એ બે શીર્ષ છે, મહદાદિ પ્રકૃતિની સાત વિકૃતિયો તે પરમાત્માના હસ્ત છે, એવા વૃષભ એટલે શ્રેષ્ઠ વાસુદેવ છે. તે અનિરુદ્ધ સંકર્ષણ અને પ્રદ્યુમ્ન એ ત્રણથી બંધાયલા છે. તે બધી વસ્તુને વ્યવહારરૂપે કરે છે. એવો મહાદેવ તે ચેતનાચેતન પદાર્થમાં અન્તરાત્મતાથી પ્રવેશ કરે છે.

ફરીને આ શ્રુતિનો જ અર્થ વિદ્યારણ્ય મુનિ આ પ્રમાણે અર્થ કરે છે. પ્રણવમાં અકાર, ઉકાર, મકાર અને અર્દ્ધમાત્રા એ ચાર તેના શૃંગ છે; જેનાથી જવાય તે પગ કહેવાય એવા વિશ્વતૈજસ્ અને પ્રાજ્ઞ એ ત્રણ પ્રણવના પગ છે. એ અધ્યાત્મ કહ્યા અધિદૈવ લઇયે તો વિરાટ્ હિરણ્યગર્ભ અને અવ્યાકૃત એ ત્રણ પગ છે. એમ સમજવું. ચિત્ અને અચિત્ એ બે મસ્તક છે. તેના ભૂરાદિ સાત લોક સાત હાથરૂપ છે. અકાર ઉકાર અને મકારમાં ત્રણ પ્રકારે બંધાયલો પ્રણવ તેજોરૂપ બ્રહ્મતત્ત્વ છે. એ જ પ્રણવ તત્વસૃષ્ટિ કરે છે. તે જ મનુષ્યમાત્રમાં અક્ષરરૂપે પ્રવેશ કરે છે. બીજી શ્રુતિ પણ પરમેશ્વર મનુષ્યમાં પ્રવેશ કરે છે એમ કહે છે.

રામાનુચાર્યના મતવાલાઓ તો આ શ્રુતિને વાસુદેવ પરત્વે વર્ણવે છે. પણ વાસુદેવ તો વ્યૂહાંતર્ગત હોવાથી પુરુષોત્તમપરત્વે શ્રુતિને ઘટાડવી એ ઉત્તમ વ્યાખ્યાન ગણાય. વિદ્યારણ્યે પ્રણવપરત્વે શ્રુતિનો અર્થ કર્યો, પણ પ્રણવ તો શબ્દ બ્રહ્મરૂપે પુરુષોત્તમને કહેનાર છે. પ્રતિપાદક કરતાં પ્રતિપાદ્ય શ્રેષ્ઠ ગણાય તેથી પુરુષોત્તમ પરત્વે વર્ણન કરવું તે જ ઉચિત છે. પુરુષોત્તમનું સ્વરૂપ તો સર્વ વેદ જેને વર્ણવે તે છે. બધા વેદથી હું જ જણાઉં છું ઇત્યાદિ શ્રુતિમાં વેદૈકવેદ્ય ગણ્યું છે. ગીતાજીમાં પણ કહ્યું છે કે બધાં ભૂત તે ક્ષર–કૂટસ્થ તે અક્ષર અને તે બન્નેથી પર તે પરમાત્મા પુરુષોત્તમ તેથી પુષ્ટિલીલાવિશિષ્ટ પુરુષોત્તમપરત્વે વર્ણન કરવું તે જ ઉચિતતર છે. તે જ વ્યાખ્યાન નીચે પ્રમાણે કરે છે.

પુરુષોત્તમ પરત્વે આ શ્રુતિનો અર્થ કરતાં ચાર શૃંગવાલી ગાયો જે પુરુષોત્તમના વ્યાપિવૈકુંઠમાં છે. ગાયને તો બે શીંગડાં હોય તો ત્યાં કહે છે કે यत्र गावो भूरिशृङ्गा એ શ્રુતિમાં ચાર શૃંગની ગાયોની સાબેતી આપશું. અથવા–ચાર યૂથ નિત્યસિદ્ધા–શ્રુતિરૂપ ઋષિરૂપા અને તુર્યપ્રિયા એ ચાર યૂથ રૂપ ચાર શૃંગ છે. લીલાસ્થ પુરુષોત્તમને પ્રાપ્ત કરાવનાર ત્રણ પગ તે તનુજા વિત્તજા અને માનસી એ ત્રણ પ્રકારની સેવાથી જ પુરુષોત્તમ પ્રાપ્ત થાય માટે તે ત્રણ પાદ ગણ્યા છે. ભક્તિ વિના ત્રણે પ્રકારની સેવા સંભવે નહિ માટે નવ ભક્તિમાં છેલ્લી બે સખ્ય, આત્મનિવેદનરૂપ બે ભક્તિ તે બે શીર્ષ છે. તેને શીર્ષ કહેવાનું કારણ તો એટલું જ કે તે ભગવંત્કૃતિસાધ્ય છે. કેવલ જીવકૃતિ-

તે ઉત્તમ હોવાથી શ્રવ
પાદ્ય તે બે નથી તેથી તેને ઉત્તમતા માટે શીર્ષરૂપ કહી છે ત્યા શકા કરે છે કે
ણાદિ સાત ભક્તિને ન કહેતા પ્રથમ જ તે બે ભક્તિને ગણાવી છે તેના ઉત્તરમા કહેવાનુ કે સાત
સખ્ય ભકિત તો દ્વિનિષ્ઠ હોવાથી કેમ જીવથી તે થઇ શકે, સાત ભકિત કરતા પ્રભુ દાસના સ્નેહને
શ્રવણાદિ ભકિત જીવકૃતિસાધ્ય હોવાથી તે આત્મનિવેદનને મેળવવામા સાત
જોઇને તેને સખ્યનુ દાન કરે છે, તેથી સખ્ય અને એમ નવ પ્રકારની ભકિત કરનાર
ભકિત સાધનરૂપ હોવાથી તેને હાથરૂપ ગણી છે એટલે તે પ્રમાણે સેવા કર
જીવ સેવા કરતા ત્રણ પ્રકારના સેવાના ફલમા બધાય છે પણ તે સેવા
નાર ભકતને સેવાફલોકત ત્રણ ફલમાથી કોઇ એક ફલ અવશ્ય મળે છે, પ્રમાણે નવધા ભકિત
કરતા પહેલા તેને ગુરુને શરણે જવુ પડે અને તે ગુરુના કહ્યા વર્ષાદ વર્ષે છે તેમ ગુરુ
કરે તો જ ભકિતમાર્ગનુ ફલ તેને મળે, માટે વૃષભરૂપ ગુરુ–જેમ ભકિત અકુરિત–પુષ્પિત–
પણ કૃપારૂપ વર્ષણ કરે, ત્યારે તે ભકતના હૃદયક્ષેત્રમા
ફલિત થાય છે

ગુરુ સેવા કરવાનો ઉપદેશ કરે છે અને સેવા કરનારને અલૌકિક સામર્થ્ય સાયુજ્ય
કે વૈકુઠાદિકમા સેવોપયોગિ દેહ એ ત્રણ ફલને વર્ષે છે તેથી જ ઋષભ તેનુ નામ છે તે
फल वर्षतीति ऋष भातीति भ भक्ताना सकलदोषदूरीकरणद्वारा सर्वोत्कृष्टत्वेन भाति भ ऋषश्चासौ भश्चे
તિ ઋષભ વર્ષે તે વૃષ અને ભક્તના બધા દોષ દૂર કરીને શોભે તે ભ કહેવાય–એટને
સમુદાય અર્થ એટલોજ કે સેવકના બધા દોષને દૂર કરે છતા પોતે પોતાના તેજને ન
છોડે અને તેને સર્વ સેવાફલ આપીને શોભે એવા ગુરુ તો શ્રીવલ્લભાચાર્યજીજ હોઇ શકે

હવે વલ્લભપદનો અર્થ કરે છે भा ધાતુ પ્રકાશાર્થક છે તેનુ भ એવુ રૂપ સપદાદિ
ગણનો ક્વિપ પ્રત્યય અને અર્શાદ્યમ પ્રત્યય કરતા થાય છે वद् ધાતુ જ્ઞાનાર્થક છે ला
ધાતુ ગ્રહણાર્થક છે તે બે મળીને વલ્લ થાય છે, वल्ल અને भ મળીને વલ્લભ થાય છે
અથવા वद् અને लभ ગુણગાન કરનાર ભક્ત તે वद् કહેવાય તેમને लभ् એટને પ્રાપ્ત
થાય તે वल्लभ કહેવાય અથવા वलुयाचने માગણી કરે તે वल કહેવાય અને તેને પ્રાપ્ત થાય
તે लभ કહેવાય, તેથી वल्लभ અથવા નામનો એક દેશ બોલવાથી આખા નામનુ જ્ઞાન થાય
છે તેમ અહિં भ માનથી वल्लभ એવો અર્થ પણ લેવાય દેવતાઓ પરોક્ષપ્રિય કહેવાય છે,
તેથી એવા સકેતથી પણ અર્થો થઇ શકે છે, એના શ્રીવલ્લભાચાર્યજી ભકતોને સ્વવચનદ્વારા
વારવાર કહે છે નામ નિવેદન મત્ર ગ્રથોપદેશ વિગેરેથી જીવનો ઉદ્ધાર કરે છે એમ
જીવને અવાતર ફલ એ થાય છે કે શ્રીવલ્લભાચાર્યના ઉપદેશથી તે જીવોમા
ભગવાનના પ્રવેશમાત્રથી જીવની અવિદ્યા નષ્ટ થાય છે प्रविष्ट
..., તેનો દો... ધુનોતિ शमल कृष्ण सलिलस्य यथा शरत् પોતાના જલના
भावतोदय એને શ્રેષ્ઠ તે શ્રીકૃષ્ણ તે જીવની અવિદ્યાને મટાડે છે, જેમ જલના
મલમા પ્રવેશ કરનાર એ તેનુ ફેરવણ છ ... ાર્યજી વાણીદ્વારા ઉદ્ધારક છે તે સિદ્ધ થયુ
મટાડે છે એમ પતજલિમુનિ આજ ... વાથી ગાયો છે તેમા પ્રમાણરૂપ શ્રુતિ પ્રથમ
કુંડ ગોલોકમા શ્રીઆસિપાન, ઉપગર્ગ એ વ્યાક ... આ મત્ર છે તે તે धामा प्रथमति मनकं गात्रो
પાડકમા ચાર શીઘ્... તે શાસ્ત્રના ચરણ ... म परमत्रमाति भूरे ॥ त्रिणो कर्माणि ...
... છઠ્ઠા અનુ... તેમા પણ વ્યગ્ય અને ... पद सदा पश्यति सूरय दिवीव चक्षुराततम। અથ,
... ભૂમ ભગવાન્ શ્વેતદ્વીપ રમાવૈકુઠ વ્યાપિ
રૂપ

વૈકુંઠ વિગેરેને પામવાને અમે વેદો ઇચ્છા રાખીયે છીયે. અથવા ગમધ્યૈનો અર્થ એવો કરવો કે ગમન કરવાનાં સ્થાન કે જ્યાં ચાર શીંગ અથવા મોટા શીંગવાલી ગાયો છે. ઐરાવત હાથીને ચાર દાંત છે એમ ભગવાનના ધામમાં ચાર શીંગવાલી ગાયો છે એમ કહીએ તો કાંઈ ખોટું ન ગણાય; ત્યાં નાશરહિત એટલે નિત્ય સર્વ પદાર્થો છે. લીલામાં નિત્ય સર્વ પદાર્થો છે. લીલા નિત્ય તેથી ત્યાં રહેલ પદાર્થો પણ નિત્ય છે અથવા ભગવાનની સાથે રાસક્રીડામાં રહેલા વ્રજભક્તો બિરાજે છે. એવા ભગવદ્ધામનો ઉત્કર્ષ વેદ પોતે ગાય છે. આ વ્યાપિ વૈકુંઠમાં વિષ્ણુનાં ઘણાં રૂપો છે. તેમાં જે રાસક્રીડાનું સ્વરૂપ છે તેનું ભક્તો ગાન કરે છે. મોટું રૂપ એટલે બહુરૂપ એમ મહત્ શબ્દના બે અર્થ થયા. તેથી એકમાંથી અનેકરૂપ તો ભગવાને રાસ વખતે કર્યાં છે. તે જ શુકદેવજી આજ્ઞા કરે છે. कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः तासां मध्ये द्वयोर्द्वयोः. જ્યાં રાસાદિલીલા થાય છે તે વિષ્ણુનું પરમ પદ છે તે સ્વતઃ પ્રકાશરૂપ છે. તે જ ગીતાજીમાં કહ્યું છે न तद्भासयते सूर्यो न शशाङ्को न पावकः यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम સર્વ કરતાં પરપણું નિત્યલીલામાં છે, તે સ્થાનને જ છે.

હે ભગવદીયો, વિષ્ણુના કર્મોને જુઓ. અર્થાત્ ગોલોકધામમાં બિરાજતા પુરુષોત્તમની લીલાને નિહાળો. ભગવાન્ પુરુષોત્તમના કર્મ તો ગોચારણ વગેરે છે. તેથી કહ્યું છે કે જ્યાં બહુ શીંગવાલી ગાયો છે. ઇન્દ્રના સખા કહ્યા તેથી પરમૈશ્વર્યયુક્ત હોવાથી રાસાદિ લીલારૂપ તેમનાં કર્મ સંભવે. તેવી લીલાના અધિકારવાળા ભક્તો તે જ લીલાના દર્શન કરી શકે; તેથી પુષ્ટિભક્તિના ત્રીજા ફલ સેવોપયોગી દેહ વૈકુંઠાદિમાં કહ્યો છે તેવા ભક્તોને ઉદ્દેશીને લીલાનાં દર્શન કરવાનું વેદ કહે છે. તેથી અનધિકારીને તે દર્શન અતિદુર્લભ છે. यज्ञो वै विष्णुः કહ્યા તેથી યજ્ઞથી તેવા ફળની પ્રાપ્તિ થાય એમ કોઈ શંકા કરે ત્યાં કહે છે કે એવા સેવાફળને માટે કાત્યાયનીવ્રતાદિ ભગવાને કરવાનું કહ્યું છે, અથવા તનુજા વિત્તજા માનસી વગેરે કરવાનું શ્રીઆચાર્યરૂપે પ્રકટ થઈને કહે છે. એવો ભક્ત તે ઇદ્ર એટલે પુરુષોત્તમનો મિત્ર બને છે. એ ધામને સદા સ્નેહવાળા ભક્તો ખુલ્લાં નેત્રથી જુવે છે. જેમ સ્વર્ગમાં જાય ત્યાં ઇદ્રાદિની ક્રીડા આંખથી જોઇ શકે, મનુષ્યલોકમાં રહેતાં તે લીલા ન દેખાય, એમ નિત્યલીલામાં પ્રવિષ્ટ ભક્તો પુરુષોત્તમની રાસક્રીડાને આંખથી જુવે છે. સ્વર્ગમાં રાસાદિક્રીડા છે તે અનિત્ય છે. ભગવલ્લીલા નિત્ય છે; તેથી એ બન્નેનો ભેદ સમજવાનો છે. અહિં આંખથી જોવાનું કહ્યું ત્યાં આંખ તો ઉપલક્ષણમાત્ર છે, કહેવાનું તાત્પર્ય તો અગ્યાર ઇદ્રિયો વડે જીવ ભગવદ્રસનો અનુભવ ત્યાં કરે છે. ઉપરની શ્રુતિનો અમે અર્થ કર્યો તે જ ખરો છે. એમ ન હોય તો શ્રીકૃષ્ણ જન્મખંડમાં વ્યાસજીયે ગોલોકનું વર્ણન આપ્યું છે; ત્યાં રાસલીલાનું વર્ણન ન કરતે, પણ વેદની શ્રુતિ રાસલીલાનું વર્ણન કરે છે તેને અનુસારે વ્યાસજીયે પણ રાસાદિલીલા વર્ણવી છે. કારણકે શ્રુતિના અર્થને સ્મૃતિ અનુસરે છે. એજ ગોલોકધામ ભૂતલ ઉપર ગોકુલરૂપે પ્રકટ થયું છે. તેથી જ પ્રભુચરણે વિદ્વન્મણ્ડનમાં શ્રી ગોકુલને ગોલોકરૂપે વર્ણવ્યું છે તેમાં કાંઈ વિરુદ્ધ જેવું નથી.

શ્રીવલ્લભાચાર્યજીને નમસ્કાર હો એવો અર્થ नमो ब्रह्मणे શ્રુતિનો કર્યો, તેમાં એક नमः શબ્દથી ચાલત, છતાં સાતવાર नमः શબ્દ લખ્યો છે. તેથી છ ધર્મ અને એક ધર્મિને નમસ્કાર હોવાનું શ્રુતિનું તાત્પર્ય જણાય છે. તમે તો પ્રથમાવતરણમાં અષ્ટપ્રકારનું

ઐશ્વર્ય શ્રુતિ વર્ણવે છે એમ કહો છો, તે તો ઘટતું નથી એમ કોઈ શંકા કરે, તેના ઉત્તરમાં કહે છે કે તેમાં વૃહતે એ વિશેષણમાં ચતુર્થી વિભક્તિ છે, તે જૂદુ રૂપ બતાવે છે, અને ધર્મિરૂપ સંયોગ અને વિયોગ એમ દ્વિરૂપ છે; તેથી અષ્ટરૂપતા થાય છે. વળી ધર્મિમાં નમઃ પદ નથી. તેનું કારણ તો એટલું જ કે રસમાં નાયિકાપ્રાધાન્ય હોવાને લીધે નમનનું કાંઈ પ્રયોજન નથી. બીજા બધામાં નમઃ પદ હોવાથી છ ગુણ અને બે ધર્મિ મળી આઠ પ્રકારના ઐશ્વર્યવાળું શ્રીવલ્લભાચાર્યજીનું સ્વરૂપ શ્રુતિ પ્રતિપાદન કરે છે. અને જ્યારે તે પુરુષોત્તમરૂપ છે તો પછી જીવ તેને નમન વિના બીજું શું કરી શકે? તેથી નમન કરવાનું શ્રુતિ કહે છે તે યોગ્ય જ કહે છે. હવે શ્રીઆચાર્યચરણને બ્રહ્મરૂપ ક્યાં કહ્યા છે એમ કોઈ શંકા કરે; ત્યાં કહે છે કે છાંદોગ્ય ઉપનિષદમાં आत्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु आत्मस्वन्नमत्तीतिः અતતિનામ વ્યાસ થાય તે આત્મા કહેવાય છે. એવા આત્મા પુરુષોત્તમરૂપ વૈશ્વાનર એટલે શ્રીવલ્લભરૂપને ધારણ કરનાર વલ્લભ એ વૈશ્વાનરનામવાળા છે. ત્યાં શંકા થાય કે આચાર્યજીનું નામ તો વલ્લભ છે તે વૈશ્વાનર કેમ કહેવાય? ત્યાં કહે છે કે પરોક્ષવાદને માટે વલ્લભ એ જ વૈશ્વાનર કહેવાય છે, દેવ પરોક્ષપ્રિય હોય છે. ભગવાનનું કહેવું પણ એવું છે કે વેદમાં પરોક્ષવાદ છે અને મને પણ પરોક્ષ પ્રિય છે. તેથી જ શ્રીભાગવતમાં રાધા નામનું સ્પષ્ટ ઉચ્ચારણ ક્યાંય પણ નથી. પણ પરોક્ષપણાથી છે. તેથી તે પુરુષોત્તમ અને આત્મા વૈશ્વાનર શ્રીવલ્લભાચાર્યજીને ભક્તો સેવે છેઃ સર્વ લોકમાં વૈકુંઠાદિમાં શ્રીવલ્લભાચાર્ય ભગવાનના મુખારવિંદરૂપ હોવાથી તેની ઉપાસના કરવી યોગ્ય છે. તેથી જ સર્વભૂત બ્રાહ્મણ ક્ષત્રિય વૈશ્ય શૂદ્રાદિ તેની સ્ત્રીઓ તથા ગોસ્વામિ બાલકોને આચાર્યરૂપે ભક્તો વૈશ્વાનરને સેવે છે. પોતાના વંશમાં પોતાનું માહાત્મ્ય મૂક્યું છે; તેથી તેમાં તદ્રૂપતાથી સેવે છે. અને સર્વમાં અન્નનું ભોજન કરે છે. શ્રીમદાચાર્યજીના પ્રાકટ્યમાં ગીતા પણ પ્રમાણરૂપ છે. તેમાં કહ્યું છે કે જ્યારે જ્યારે ધર્મ ઘટે છે અને અધર્મ વધે છે; ત્યારે ત્યારે મારા આત્માને ભૂતલ ઉપર ઉતારું છું એમ ભગવાન્ આત્મરૂપે શ્રીવલ્લભાચાર્યજીને મોકલે છે એવો તેનો અર્થ છે. ત્યાં શંકા કરે છે કે ઉપરની શ્રુતિમાં આત્મા વૈશ્વાનરરૂપ શ્રીવલ્લભાચાર્યને તમે કહ્યા, પણ વૈશ્વાનર શબ્દ તો અગ્નિવાચક છે. એ શંકાના ઉત્તરમાં કહે છે કે વૈશ્વાનરથી લૌકિક અગ્નિ એમ સમજવાનું નથી; પણ વૈશ્વાનરશબ્દ બ્રહ્મને કહેનાર છે. તેમાં વ્યાસ સૂત્ર પ્રમાણરૂપે બતાવે છે કે वैश्वानरः साधारणशब्दविशेषात्. ત્યાં આત્મા કોણ? બ્રહ્મ કોણ? એ શંકાના ઉત્તરમાં વ્યાસજી એ સૂત્ર આપે છે. તેમાં *વૈશ્વાનરનું મસ્તક પ્રકાશવાળું છે એમ કહી વૈશ્વાનર શબ્દથી સંવત્સર અશ્વત્થ અગ્નિ* લેવા એમ કહી સંવત્સર છે તે પ્રજાપતિ છે એમ કહીને આ વાક્ય હિરણ્યગર્ભની ઉપાસનાને કહેનાર છે એમ પૂર્વપક્ષ કરી, પછી આ સૂત્ર એનો નિર્ણય કરવાને વ્યાસજી યોજે છે, તેમાં કહે છે કે વૈશ્વાનર શબ્દનો અર્થ પરમાત્મરૂપ છે; કારણ કે શ્રુતિમાં પ્રાદેશ માત્ર કહી દ્યુમૂર્ધસ્વરૂપ કહ્યા તેથી વિરુદ્ધધર્માધાર તો પરમાત્મા જ સંભવે અન્ય કોઈ સંભવે નહિ; તેથી વૈશ્વાનર શબ્દ બ્રહ્મવાચક છે; અગ્નિવાચક નથી; વળી શ્રીવલ્લભાચાર્ય પુરુષોત્તમ છે તેમાં સમાધિ ભાષા શ્રીભાગવત પણ પ્રમાણરૂપ છે. તે જ કહે છે. आचार्यं मां विजानीयान्नावमन्येत कर्हिचित् । न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरुः મને જ આચાર્ય જાણ; મારાથી જરા પણ ન્યૂન છે એમ ન જાણવું. તેથી જ આચાર્ય-

ચરણનું સ્વરૂપ વર્ણન કરતાં પ્રભુચરણ આજ્ઞા કરે છે કે अग्निर्त्वं वर्णितं ते कविभिरपि सदा वस्तुतः कृष्ण एव. (ડાહ્યા પુરુષો તમને અગ્નિ કહે છે; પણ ખરી રીતે તો આપજ શ્રીકૃષ્ણ છો.) તેથી જ આચાર્યચરણ ભગવદ્રૂપ નથી એમ તેની અવગણના ન કરવીઃ જીવ જેવું પ્રાકૃત રૂપ છે એમ પણ ન કહેવું. કારણ કે જીવનો ઉદ્ધાર કરવા માટે મનુષ્યનાટ્ય દેખાડે છે. વસ્તુતાથી તો કૃષ્ણરૂપ છે. મનુષ્ય રૂપ ન દેખાડે તો જીવને સખ્ય ન થાય; તેથી જીવને સમાનશીલવ્યસનતા કરાવવા મનુષ્યનાટ્ય બતાવે છે. શ્રીમહાપ્રભુજી જીવના બધા મનોરથો એક રૂપે કેમ પૂર્ણ કરી શકે તેથી બીજાનો આશ્રય કરવો જોઇયે એમ શંકા ન કરવી; કારણ કે તે આચાર્યજી ગુરુરૂપ થાય છે અને સર્વ દેવરૂપ પણ પોતે થઇ ભક્તોના સકલ મનોરથને એક કાલે પૂર્ણ કરવાને સમર્થ છે; તેથી તેને છોડી બીજાનો આશ્રય ન કરવો. જે ફલ આપવાની શ્રીમદાચાર્યચરણની ઇચ્છા નથી તે ફલ બીજા કોઇથી અપાય તેમ નથી; તેથી શ્રીવલ્લભાચાર્યને છોડી બીજાને ભજવાનો સંકલ્પ પણ ન કરવો.

હવે કહે છે કે જે કોઇ વેદ અને શાસ્ત્રને જાણતો હોય તેને ગુરુ કરવા એ યોગ્ય ગણાય. શ્રીવલ્લભાચાર્ય અને તેના વંશને જ ગુરુ કરવાનું શું પ્રયોજન છે? ત્યાં કહે છે કે ગુરુને લાયક તો શ્રી વલ્લભાચાર્ય જ છે. श्रीकृष्णज्ञानदो गुरुः એવું આપનું નામ છે. વળી ગુરુનાં લક્ષણ કહે છે કે (કૃષ્ણની સેવા કરનાર ગુરુ હોવા જોઇયે. દંભાદિ દોષથી રહિત અને તે પણ પુરુષરૂપ હોવા જોઇયે. શ્રી ભાગવતના તત્વને જાણનાર એવા ગુરુને ભજવા જોઇયે) એવા ગુરુનાં સર્વ લક્ષણ તો શ્રી વલ્લભાચાર્યજીમાં જ મળી શકે. તેમના પુત્ર શ્રી વિઠ્ઠલનાથજીમાં અને તેમના કુલમાં મળે, કારણ કે भवत्स्वकुलं निष्कलङ्कं श्रीकृष्णेनात्मसात्कृतं એમ આપે શ્રીમુખે આજ્ઞા કરી છે. તેથી બીજા ગુરુ કરે તો તેનાથી પુરુષોત્તમ મળે નહિ. 'જેના મંત્રોપદેશ માત્રથી મનુષ્યો મુક્ત થાય છે. પૂર્વ અને પર કોટિ પુરુષો સાથે તે મુકાય છે. મંત્ર લેવા માત્રથી કરોડો જન્મનાં પાપ છૂટી જાય છે. પૂર્વ કર્મ છુટી જતાં પોતે મુક્ત થઇ જાય છે' તેથી બધાની ગુરુદ્વારાજ સદ્ગતિ થાય છે. 'જે પુત્રોને સ્ત્રિયોને, સેવકોને અને બંધુઓને સન્માર્ગ બતાવે છે તેની જ ગતિ થાય છે' એમ શાસ્ત્ર કહે છે.

સ્ત્રીપુરુષ એક ગુરુ પાસે ઉપદેશ લે તો તે ભાઇબેન જેવાં ગણાય એમ કોઇ શંકા કરે તો તેનો ખુલાસો કરતાં કહે છે કે आचारो धर्ममार्गश्च गुरुर्मन्त्रश्च देवता । दम्पत्यपत्यभृत्याद्यैः एकीकृत्य महत्फलम् (આચાર, ધર્મમાર્ગ, ગુરુમંત્ર, દેવતા, એ સ્ત્રીપુરુષ અને છોકરાંને એક હોય તો તેનું વિશેષ ફલ છે) विष्णुतत्त्वं परिज्ञाय चैकं वानेकभेदवत् । दीक्षयेन्मेदिनीं सर्वां किं पुनश्चोपसन्नतान् વિષ્ણુનું તત્ત્વ જાણ્યા પછી (એક છતાં અનેક ભેદવાળું છે એટલો નિશ્ચય થઇ ગયા બાદ સર્વ પૃથિવીને દીક્ષા આપવાને તે સમર્થ છે તો શરણે આવેલાનો ઉદ્ધાર કરે તેમાં તો શું જ કહેવું.)

ગુરુનો ઉત્કર્ષ કહે છે કે 'ભગવાન્ કોપ કરે તો ગુરુ રક્ષા કરે છે; પણ ગુરુ કોપે તો કોઈ રક્ષા કરનાર નથી.' માટે સર્વ પ્રયત્નવડે ગુરુને જ પ્રસન્ન કરવા. ગુરુ રહેતા હોય છતાં તેને ન ગણતાં કોઇ કુબુદ્ધિવાળો બીજાને પૂજે છે તો તે દુર્ગતિને પામે છે અને તેનું આપેલું ફોકટ થાય છે. 'પહેલાં પ્રયત્નવડે ગુરુને આપી પછી બીજાને આપવું. વિદ્યારહિત અથવા વિદ્યાવાળો પણ ગુરુ તેજ ભગવાન્ છે.' ગુરુને આપવું તેમાં स्वस्ति ન

કહેવરાવતા જ ફલ છે તે કે 'ગુરુને, બાપને, અધ્યક્ષને અધ્યાત્મવ્રતવાળાને સ્વસ્તિ કહ્યા યા વગરજ આપવાનુ અનત ફલ છે, 'સાગરનો છેડો છે પણ દાનનો છેડો નથી' લક્ષ્મીને ચરણમા મૂકાવવામા તેની અવજ્ઞા થાય એમ કોઈ કહે ત્યા કહે છે કે 'મનુષ્યના પગમા રહેલી લક્ષ્મી પોતાના ધામમા તેને લઈ જાય છે' એમ માર્કણ્ડેયનુ વચન છે ગુરુ અને ભગવાનની સેવા એ બન્ને બરોબર છે એમ શ્રી ભાગવતમા કહે છે 'જેને સાક્ષાદ્ભગવદ્રૂપ જ્ઞાન આપનાર ગુરુમા ભક્તિ નથી તેનું કર્તવ્ય બધુ કુજરશૌચ જેવુ નિરર્થક છે' 'ગુરુ બ્રહ્મા છે, ગુરુ વિષ્ણુ અને ગુરુ મહાદેવસ્વરૂપ હોવાથી બ્રહ્મસ્વરૂપ ગુરુને જ હુ નમુ છુ' 'જે મત્ર છે તેજ ગુરુ છે જે ગુરુ છે તજ સાક્ષાત્ હરિ છે, ગુરુ જેની ઉપર પ્રસન્ન થાય છે તેને જ ભગવાન્ પોતાની મેળે પ્રસન્ન થાય છે' સર્વથા અવૈષ્ણવને ગુરુ ન કરવો કહે છે કે 'મોટા કુલમા જન્મ્યો હોય, સર્વયજ્ઞની દીક્ષા લીધી હોય અને હજાર શાખાનો ભણનાર હોય છતા તે 'અવૈષ્ણવ હોય તો તેને ગુરુ ન કરવો' 'અવૈષ્ણવ ગુરુથી મત્ર લે તો નરકે જાય, માટે તેમ થયુ હોય તો પુન વૈષ્ણવ ગુરુ પાસે જઈ વિધિ પ્રમાણે મત્ર ગ્રહણ કરવુ' એમ શ્રુતિસ્મૃતિશ્રીભાગવતાદિના પ્રમાણોથી શ્રીવલ્લભાચાર્યજી પુરુષોત્તમ છે એમ સિદ્ધ થાય છે, ત્યારે તો તેને જીવોએ નમન કરવુ યોગ્ય છે કહ્યુ છે કે તમારે ગરુડ જેવુ આસન છે તેને અમે આસન તેનાથી ઉત્તમ બીજુ શુ આપી શકીયે? જેને કૌસ્તુભ જેવુ ઘરેણુ છે તેના જેવુ અમે ઘરેણું ક્યાથી આપી શકીયે? વળી સાક્ષાત્ લક્ષ્મી જેની સ્ત્રી છે તેને અમે શુ આપી શકીયે? વાણીના પતિની સ્તુતિ કરવી પણ અમારાથી અશક્ય છે, માટે જીવે ભગવાનને નમન કરવુ

હવે નમો બ્રહ્મણે એ શ્રુતિના અર્થથી શ્રીવલ્લભાચાર્યમા પુષ્ટિમાર્ગીય ષડૈશ્વર્યાદિ છે તેનુ વર્ણન કરી તેમા ઘટાવે છે તેમા પ્રથમ વિશેષણ नमो ब्रह्मणे છે તેનગ કુળને દીપાવનાર બ્રાહ્મણ રૂપ ધારણ કરનાર શ્રીવલ્લભાચાર્ય છે આ વિશેષણથી ઐશ્વર્યગુણ બતાવ્યો કારણ કે વેદ વ્યાસસૂત્ર ગીતા અને શ્રીભાગવત જેનુ વર્ણન કરે છે તેવા તે ઐશ્વર્યવાળા છે એમ સિદ્ધ થાય છે

પુષ્ટિમાર્ગીય ઐશ્વર્યનુ સ્વરૂપ બતાવે છે ईश्वर पूज्यते लोकैर्मूढैरपि यदा तदा । निरुपाधिकमैश्वर्यं वर्णयन्ति मनीषिण (જ્યારે મૂઢો પણ ઈશ્વર જાણીને પૂજે ત્યારે ડાહ્યા પુરુષો તેને નિરુપાધિક ઐશ્વર્ય કહે છે) નિ સાધન સ્ત્રી શૂદ્ર વિગેરે શ્રીવલ્લભાચાર્યને પૂજે છે, તેથી તેમનામા ઐશ્વર્ય છે એમ સિદ્ધ થાય છે

नमोस्त्वग्नय એ વિશેષણથી વીર્ય ગુણવાળા એમ કહે છે અગ્નિરૂપને ધારણ કરનાર હોવાથી अग्निस्त्व वर्णित त क्वचिभि ઇત્યાદિ વાક્યોમા શ્રીવલ્લભાચાર્યજીને અગ્નિરૂપ કહ્યા છે, ત્યા શકા થાય કે અગ્નિ તો અતિ તેજસ્વી હોય તો એને નમન ન થઈ શકે, ત્યા કહે છે કે अस्तु હો એમ પ્રાર્થના કરે છે આચાર્યચરણનુ અગ્નિરૂપ ભક્તને તાપ કરનાર નથી પણ ભક્તના દોષને દાહ કરવા માટે છે ત્યા શકા કરે છે કે તમે તો આચાર્યજીને પુરુષોત્તમરૂપ કહ્યા છે, અત્યારે અગ્નિરૂપ કેમ કહો છો, ત્યા કહે છે કે अग्निर्वै मुखम् પુરુષોત્તમનુ મુખ અગ્નિરૂપ છે, તે રૂપ શ્રી આચાર્યજી છે, તેથી તેમા પુરુષોત્તમત્વ નથી એમ નથી ઉપદેશમાત્રથી દૈવી જીવોના ભવદોષ બાળી નાખનાર હોવાથી अग्निरूप કહ્યા છે તેથી મોટુ વીર્ય કહ્યુ કારણકે વીર્યનુ લક્ષણ वीर्यं दर्पः तथापि धैर्यं तथापि कामत । सान्निध्ये दिव्यानां च मूर्छा तत तनो महत् શ્રીમહાપ્રભુજીએ જ પોતાનુ અગ્નિ સ્વરૂપ પોતે જ બતા પુ

છે; તેથી ભગવાનના મુખારવિંદના અધિષ્ઠાતૃ અગ્નિરૂપ હોવાથી વેણુવાદન સંભવે તેનાથી દેવાંગનાને મોહાદિ થાય એ મોટું વીર્ય, वीर्यं देवेषु प्रतिष्ठितम् એમ શ્રુતિ કહે છે. દેવ શબ્દથી શિવજી લેવા त्वं च रुद्र महावाहो मोहशास्त्राणि कारय એવી ભગવદાજ્ઞા થતાં શૂન્યવાદ અને માયિકવાદ વિગેરે પ્રકટ થતાં અગ્નિરૂપ શ્રીવલ્લભાચાર્યજીયે સાકાર બ્રહ્મવાદનું સ્થાપન કર્યું; તેથી માયાવાદરૂપ તૂલને બાળવાથી વીર્યગુણ વર્ણવ્યો છે. ત્યાં કહે છે કે त्वं च रुद्र महावाहो ઇત્યાદિ વાક્યો કલ્પિત છે એમ કોઈએ ન જાણવું. કારણકે વારાહ પુરાણ અને પદ્મપુરાણમાં તે વાક્યો જોવામાં આવે છે. તે જ વાક્યો નીચે આપે છેઃ–

त्वं च रुद्रमहावाहो मोहशास्त्राणि कारय । अतथ्यानि वितथ्यानि दर्शयस्व महाभुज ॥ १ ॥
प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु । मां च गोपय येन स्यात्सृष्टिरेषोत्तरोत्तरा ॥ २ ॥

इति वाराहपुराणे उक्तम्

पद्मपुराणे च

त्वंच रुद्र महावाहो मोहनार्थं सुरद्विषाम् । पाषण्डाचरणं धर्मं कुरुष्व सुरसत्तम ॥ १ ॥
तामसानि पुराणानि कथयस्व च तान्प्रति । मोहनानि च शास्त्राणि कुरुष्व च महामते ॥ २ ॥
मच्यभक्ताश्च ये विप्रा भविष्यन्ति महर्षयः । स्वच्छत्तया तान्समाविश्य कथयस्व च तामसान् ॥३॥
काणादं गौतमं शाक्तमुपमन्युं च जैमिनिम् । दुर्वाससं च कपिलं मृकण्डं च वृहस्पतिम् ॥ ४ ॥
भार्गवं जमदग्निं च दशैतान् तामसानृषीन् । तत्र शक्तिं समाविश्य कुरुते जगतोहितम् ॥ ५ ॥
त्वच्छत्तयाभिनिविष्टास्ते तमसोद्रिक्तया भृशम् । तामसास्ते भविष्यंति क्षणादेव न संशयः ॥ ६ ॥
कथयिष्यन्ति ते विप्रास्तामसानि जगत्रये । त्वमेव लोके तांल्लोकान् मोहयस्व जगत्रये ॥ ७ ॥
तथा पाशुपतं शास्त्रं त्वमेव कुरुसत्तम । कङ्कालशैवपाखण्डमहाशैवादि भेदतः ॥ ८ ॥
अवलम्ब्य मतं सम्यग्वेदवाह्या द्विजाधमाः । भस्माक्षधारिणः सर्वे भविष्यंति न संशयः ॥ ९ ॥
त्वां परत्वेन वक्ष्यंति सर्वशास्त्रेषु तामसाः । तेषां मतमधिष्ठाय सर्वे दैत्या महावलाः ॥ १० ॥
भविष्यन्ति मद्विमुखाः क्षणादेव न संशयः । अहमप्यवतारेषु त्वां च रुद्र महावल ॥ ११ ॥
तमोवतां विमोहाय पूजयामि युगे युगे , मात्स्यं कौर्मं तथालैङ्गं शैवं स्कन्दं तथैव च ॥ १२ ॥
आग्नेयं च षडेतानि तामसानि निबोध मे । वैष्णवं नारदीयं च तथा भागवतं शुभम् ॥ १३ ॥
गारुडं च तथा पाद्मं वाराहं शुभदर्शनम् । सात्त्विकानि पुराणानि विशेषेण शुभानि वै ॥१४॥
ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च । भविष्यं वामनं ब्राह्मं राजसानि निबोध मे ॥ १५ ॥
सात्त्विका मोक्षदाः प्रोक्ताः राजसाः स्वर्गदाः शुभाः । तथैव तामसा देवि निरयप्राप्तिहेतवः १६
तथैव स्मृतयः प्रोक्ता ऋषिभिस्त्रिगुणात्मिकाः॥ इति पद्मपुराणे ।

(હે રુદ્ર મહાબાહો! તમે મોહશાસ્ત્ર કરો, ખોટું અને વિરુદ્ધ લાગે એવું તમે બધું બતાવો. તમારા આત્માને પ્રકાશમાં લાવો અને મને ગુપ્ત કરો કે જેનાથી આ સૃષ્ટિ ઉત્તરોત્તર ચાલ્યા કરે એ વારાહ પુરાણનું વાક્ય છે.

પદ્મપુરાણમાં

(હે મહાબાહો રુદ્ર, તમે દેવતાના શત્રુને મોહ કરવા માટે પાખંડ આચાર છે એવા ધર્મને કરો. તેમની પ્રત્યે તામસ પુરાણ તમે કહો. હે મહામતે મોહન કરનારાં શાસ્ત્ર રચો. મહર્ષિયો મારાથી વિમુખ થશે. તેમાં તમે શક્તિવડે પ્રવેશ કરીને તેને તામસ

પુરાણુ કહો. કણાદ, ગૌતમ,, શક્તિ ઉપમન્યુ, જૈમિનિ, દુર્વાસા, કપિલ. મૃકંડ, બૃહસ્પતિ ભાર્ગવ અને જમદગ્નિ એ દશ તામસ ઋષિઓ છે તેને તમારી શક્તિનો પ્રવેશ થતાં તે તામસો થશે. તે બ્રાહ્મણો ત્રણે જગતમાં તામસ ધર્મો કહેશે. તે લોકોને તમે મોહ કરો. તમે પાશુપત શાસ્ત્ર કરો. જેમાં કંકાલ શૈવ પાખંડ મહાશૈવાદિ ભેદને જોઈને વેદ બાહ્ય તે બ્રાહ્મણો થઈને બધા ભસ્માક્ષધારી થશે. તે તામસો તમને પરત્વે કરીને કહેશે. તેમ તને આગળ કરી સર્વે દૈત્યો મહાબળવાળા થઈ મારાથી વિમુખ થશે; એમાં સંદેહ નથીઃ હું પણ અવતાર લઈ તામસોને મોહ કરવા માટે યુગયુગમાં તમને પૂજીશ. માત્સ્ય, કૌર્મ, લૈંગ, શૈવ, સ્કાંદ, આગ્નેય એ છ તામસ પુરાણો છે. વિષ્ણુપુરાણ, નારદ-પુરાણ, ભાગવતપુરાણ, ગરુડપુરાણ, પદ્મપુરાણ, વારાહપુરાણ એ સારાં છે અને સાત્વિક છે. બ્રહ્માંડ, બ્રહ્મવૈવર્ત, માર્કંડેય, ભવિષ્ય, વામન અને બ્રહ્મપુરાણ એ છ રાજસપુરાણો છે. તે સ્વર્ગને આપનાર છે; તામસપુરાણ નરક પહોંચાડનાર છે. તેવી જ ત્રણ ગુણવાળી સ્મૃતિયો પણ છે.)

એવી શિવને આજ્ઞા થતાં તેમણે મોહ શાસ્ત્ર રચીને પ્રકટ કર્યાં છે. એમ વીર્યનિરૂપણ કરીને યશોરૂપ ધર્મને નિરૂપણ કરે છે. नमः पृथिव्यै. એ વિશેષણથી પૃથિવીરૂપ આપ છે એટલે ગોકુલાદિમાં જ્યાં આપની બેઠકો છે; ત્યાં શ્રી આચાર્યરૂપે આપ પૃથિવીનું રૂપ ધારણ કરી તત્સ્થાનસ્થિત દૈવી જીવનો ઉદ્ધાર કરે છે.

ત્યાં શંકા કરે છે કે શ્રી આચાર્યજીને પુરુષોત્તમ રૂપ કહીને અહિં પૃથિવી રૂપ કેમ કહો છો; તો ત્યાં કહે છે કે यस्य पृथिवी शरीरं यं पृथिवी न वेद ઇત્યાદિ શ્રુતિમાં પૃથ્વીરૂપ શરીર પુરુષોત્તમનું કહ્યું છે; તેથી પુરુષોત્તમને પૃથ્વીરૂપ ધારણ કરવામાં ગૌણતા નથી. જેમ શ્રીવલ્લભાચાર્યના પ્રાકટ્યસમયમાં દૈવી જીવોએ સેવા કરી તેનો ઉદ્ધાર થયો, તેમ હાલમાં તેમની બેઠકમાં સેવા કરનારને અત્યારે પણ ઉદ્ધાર કરે છે તે મોટું યશ છે. ત્યાં શંકા કરે છે કે શ્રીઆચાર્યજી તો નિયત સ્થાન ઉપર બિરાજતા હોય ત્યાં સર્વ દૈવી જીવો જઇ ન શકે, તો સર્વનો ઉદ્ધાર કેમ સંભવે એમ કોઈ કહે, તેના ઉત્તરમાં કહે છે કે આપ પૃથિવીરૂપ ધારણ કરે છે, એટલે સ્વયં આનંદમાત્રકરપાદમુખોદરાદિરૂપ છતાં વંશરૂપે અવતરે છે, એટલે શરીર પાર્થિવ અંશ છે. એ પ્રાકૃતો માને છે. તે દ્વારા સર્વનો ઉદ્ધાર કરે છે. स्ववंशे स्थापिताशेषस्वमाहात्म्यः એ વાક્યથી અદ્યાપિ વંશ દ્વારા ઉદ્ધાર કરે છે, તેથી મોટું તેમનું યશ છે. यशो यदि विमूढानां प्रत्यक्षासक्तितारणात्। स्वधर्मे योजयेत्तेषु तदा भवति नान्यथा સ્ત્રી શૂદ્ર વગેરેને પણ લૌકિકમાંથી પ્રત્યક્ષ આસક્તિને છોડાવી તેને બ્રહ્મસંબંધ કરાવી દૈવી કોટિમાં દાખલ કરી સ્વધર્મ ભગવત્સેવામાં તેને જોડીને કૃતાર્થ કરે છે; એથી મહદ્યશ વર્ણવ્યું.

नम ओषधीभ्यः એ વિશેષણથી શ્રીનું નિરૂપણ કરે છે. શ્રીગોકુલમાં બેઠક ઉપર શમીનું વૃક્ષ છે તે ભગવદ્રૂપ હોવાથી ઓષધિરૂપને આપે ધારણ કર્યું છે, જેમ વિષ્ણુને શાપ થવાથી પિપલારૂપે પૃથ્વીમાં અવતાર છે એમ અહિં નથી. પણ અહિં તો જીવોને કૃષ્ણા-ધરામૃતાસ્વાદ આપવાને માટે વૃક્ષરૂપે આપનું પ્રાકટ્ય છે. શ્રીભાગવતમાં ભગવાન્ अहो अमी देववर ઇત્યાદિથી વૃક્ષોની સ્તુતિ કરે છે. તે વૈષ્ણવરૂપ છે અને અહિં બીજાં વૃક્ષો નહિ કહેતાં શમીરૂપે પ્રકટ થવાનું કારણ તો શમી અગ્નિરૂપ છે; તેથી આપ તે રૂપે બેઠકમાં દર્શન માત્રથી સર્વ પાપનું દહન કરનાર છે એમ બતાવવા અગ્નિરૂપ શમી વૃક્ષરૂપે આપ પ્રકટ છે. તેથી આપની શ્રીનું વર્ણન થયું.

શ્રી મહાપ્રભુજીના પાદુકાજીની સેવા થાય છે તે પાદુકાજી ચરણમાં રહેવાથી ચરણરૂપ ગણાય તેને સેવામાં ભોગ પણ ધરાય છે. તે પાદુકાજી ચરણરૂપ હોઇને ભોજન કેમ કરે? કારણ ભોજન કરવું તે તો મુખનું કાર્ય છે એવી કોઇ શંકા કરે તેના ઉત્તરમાં કહેવાનું કે नम ओषधीभ्यः એટલે ઓષધિરૂપ ધારણ કરનાર શ્રી આચાર્યજી છે તમને નમસ્કાર હો. હવે પાદુકાજી કાષ્ઠ જેવાં દેખાય છે; તેથી તે ઓષધિરૂપ છે તેના સ્વરૂપનો વિચાર કરીયે તો તો તે આનંદરૂપ છે. પણ સંસારથી ઉદ્ધાર કરનાર હોઇને તેને ઓષધિરૂપ ગણ્યાં છે. શ્રીભાગવતના શ્રવણને પણ ઓષધિરૂપ भवौषधात् એ જગ્યોયે કહ્યું છે. તેથી જ્યાં પાદુકાજી વિદ્યમાન છે ત્યાં તે આનંદ માત્ર કરપાદમુખોદરાદિ એટલે ભગવદ્રૂપ હોવાથી તેને તિલક ભોગ સામગ્રી વિગેરેથી સેવા થાય તે વ્યાજબી છે. તેમ જ તે સેવાનો સાક્ષાત્સ્વીકાર પાદુકારૂપે પ્રભુ કરે તેમાં શંકા કરવા જેવું કાંઇ નથી. वैष्णवा वै वनस्पतयः वैष्णवैस्तद्रुपावत्ते એવી શ્રુતિ છે. શ્રીમદાચાર્યજી ધર્મિસ્વરૂપની તે પાદુકાજી શર્કરાકંટકાદિથી રક્ષારૂપ સેવા કરતાં હોવાથી પાદુકાજીને સેવકપણું પણ છે. પુષ્ટિમાર્ગીય શ્રીનું લક્ષણ તો સેવક પણ સ્વામિ જેવા હોય ત્યારે શ્રીની પરમકાષ્ઠા કહેવાય; તો અહિ શ્રીઆચાર્ય જીવનો ઉદ્ધાર કરે, તે પ્રમાણે તેમના પાદુકાજી જે સેવકરૂપે ઉપર વર્ણવ્યાં છે તે પણ ઉદ્ધાર કરવામાં સમર્થ હોવાથી શ્રીનું ઘટે છે. તેથી શોભાની પરિસીમા પણ શ્રીમહાપ્રભુમાં જ સંભવે છે. આગળ શ્રીમદાચાર્યજીને વિષ્ણુરૂપે કહેવાના છે તે રીતે પાદુકાજી વૈષ્ણવ ગણાય. અને વૈષ્ણવજ પાદુકાજીની સેવા કરે છે.

અથવા શ્રીમદાચાર્યજીના પાદુકાજી તો દુર્લભ હોવાથી બધા ભક્તોને તે પાદુકાજી મલી શકે નહિ; તેથી તે બધા શ્રીપાદુકાજીની સેવા ક્યાંથી કરી શકે ત્યાં ઉપલી શ્રુતિ કહી તેનો અર્થ કરે છે. वैष्णवा वै वनस्पतयो वैष्णवैस्तद्रुपावत्ते એટલે વનસ્પતિ વૈષ્ણવ છે એટલે તુલસી વનસ્પતિરૂપ અને વિષ્ણુ દેવતા છે. તેને વૈષ્ણવ માત્ર કંઠમાં ધારણ કરે છે. તે વનસ્પતિરૂપ તુલસી તે શ્રીમહાપ્રભુજીનું જે ઓષધિરૂપ ઉપર જણાવ્યું તે જ રૂપ તુલસીનું છે, અને જેમ પ્રતિશરીર અંતર્યામિ સ્થિત છે, તેમ દરેક વૈષ્ણવની કોટમાં તુલસીની માલારૂપ (ઓષધિરૂપ ધારણ કરનાર શ્રીઆચાર્યજી)ની સ્થિતિ છે. તે વડે બધા વૈષ્ણવો કંઠમાં તુલસીમાલાના દર્શન સ્પર્શાદિ કરે છે; તેનાથી શ્રીઆચાર્યજીની સેવા તદ્રૂપે કરી જીવ કૃતાર્થ થાય છે. ભવને (સંસારને) મટાડનાર તુલસી છે; તેથી તે ઓષધિરૂપ કહેવાય છે. શ્રીઆચાર્યજીનું પ્રાકટ્ય પણ ભવનિવારક હોવાથી ઓષધિરૂપે વૈષ્ણવના કંઠમાં રહી તેના સંસારને દૂર કરવા માટે ઓષધિરૂપ વેદમાં વર્ણવ્યું છે.

વેદમાં आचार्यवान् पुरुषो वेद. આચાર્યવાળો પુરુષ બ્રહ્મને જાણે છે. માલા આચાર્યરૂપ હોવાથી માલા ધારણ કરનાર પુષ્ટિમાર્ગીય જીવ ભગવાનના સ્વરૂપને જાણે છે એવો ઉપલી શ્રુતિનો અર્થ છે. માલા એ આચાર્યરૂપ હોવાથી માલા ધારણ કરનાર આચાર્યવાલો કહેવાય અને એવો પુરુષોત્તમના સ્વરૂપને જાણનાર પુરુષ જ સેવાનો અધિકારી હોઇ શકે. આચાર્યરૂપ સ્વરૂપને ન જાણે અને માલાને કંઠમાં ન ધારણ કરે એવો અવૈષ્ણવ સેવાનો અનધિકારી ગણાય છે;

અંતર્યામિ જીવની સાથે રહે છે તેમ આચાર્યરૂપ વનસ્પતિરૂપ તુલસીમાળા વૈષ્ણવના કંઠમાં રહે છે એમ કહેવાથી તુલસીની માલા સદા ધારણ કરવી જોઇએ. તેમાં પ્રમાણ શું ત્યાં વિષ્ણુધર્મમાં ભગવાન આ પ્રમાણે આજ્ઞા કરે છે.

तुलसीकाष्ठमालांच कण्ठस्थां वहते तु यः । अप्यशौचोप्यनाचारो मामेवैति न संशयः ॥

તુલસીના લાકડાની માલા જે કંઠમાં ધારણ કરે છે તે અપવિત્ર કે અનાચારી હોય તો પણ મને જ પામે છે એમા સંશય ન સમજવો.

સ્કન્દ પુરાણમા કહ્યુ છે કે'–

धात्रीफलकृता माला तुलसीकाष्ठसंभवा । दृश्यते यस्य देहे तु स वै भागवतोत्तम. ॥
सन्निवेद्यैव हरये तुलसीकाष्ठसंभवाम् । माला पश्चात्समाधत्ते स वै भागवतोत्तम. ॥
तुलसीकाण्ठसभूता माला यो वहते नर. । तारितं च कुलं तेन यावद्रामकथा क्षितौ ॥

ગરુડ પુરાણમાં માર્કંડ્ય કહે છે કે –

निवेद्य केशवे माला तुलसीकाष्ठसंभवाम् । वहन्ति ये नरा भक्त्या तेषा वै नास्ति पातकम् ॥
सदा प्रीतमनास्तस्मिन् कृष्णो देवकिनन्दन. । तुलसीकाष्ठसंभूता माला यो वहते नरः ॥
प्रायश्चित्तं न तस्यास्ति नाशौच तस्य विग्रहे । तुलसीकाष्ठसंभूता शिरोबाहुविभूषणाम् ॥
धारयेत् कण्ठदेशे तु तस्य वै नास्ति पातकम् । तुलसीकाष्ठमाला तु प्रेतराजस्य दूतिका. ॥
दृष्ट्वा नश्यन्ति दूरेण वातोद्धूत यथा रजः । तुलसीकाष्ठसभूते माले कृष्णजनप्रिये ॥ ,
बिभर्मि त्वामहं कण्ठे कुरु मा कृष्णवल्लभम् ॥

આમલાના ફલની બનાવેલી માલા તુલસીના લાકડામાથી બનાવેલી માલાને જે પોતાના શરીરમા ધારણ કરે છે તે ભગવદ્ભક્તમા ઉત્તમ કહેવાય. ૧

તુલસીના લાકડાની માલા બનાવી ભગવાનને નિવેદન કરી જે પાછળથી ધારણ કરે છે તે ઉત્તમ ભગવદીય ગણાય. ૨

તુલસીના લાકડાની માલા ભગવાનને નિવેદન કરી જે પોતે કઠમા ધરે છે તેણે જ્યાસુધી જગત્મા રામની કથા રહે, ત્યા સુધી પોતાના કુલને તાર્યું છે એમ સમજવુ. ૩

જે તુલસીના કાષ્ઠની માલા ભગવાનને નિવેદન કરી પોતે ધારણ કરે છે તેને કોઈ પ્રકારનુ પાપ લાગતુ નથી (૪) જે તુલસીની માલા પહેરે છે તેની ઉપર દેવકીજીના પુત્ર શ્રીકૃષ્ણ સદા પ્રસન્ન રહે છે. તેને પ્રાયશ્ચિત્ત કરવુ પડતુ નથી તેને અશૌચ લાગતુ નથી. (તેના શરીરમા કોઈ પ્રકારની અપવિત્રતા થતી નથી એવો આશૌચ શબ્દનો અર્થ છે) જેણે હાથ અને મસ્તકમા તુલસીના બનાવેલા ઘરેણા ધાર્યા છે, વળી જેણે કંઠમા તુલસીમાળા ધરી હોય તેને પાપ લાગતું નથી જેમ વાયુ ચાલતા રજ દૂર ભાગવા માડે તેમ જેણે તુલસીના કાષ્ઠની માલા પહેરી હોય તેનાથી યમરાજની દૂતિકાઓ દૂર ભાગે છે. માલાની પ્રાર્થના આ પ્રમાણે કરી તેને કઠમાં ધારણ કરવી કે તુલસીના કાષ્ઠમાથી બનેલી માલા, તું કૃષ્ણ જનને પ્રિય છો, હું તને કઠવડે ધારણ કરું છુ, તેથી તું મને કૃષ્ણની પ્રીતિ કરાવ.

ગરુડપુરાણ અને પદ્મપુરાણમાં કહે છે કે –

धारयन्ति न ये माला हैतुकाः पापबुद्धयः । नरकान्न निवर्तन्ते दग्धाः कोपाग्निना हरेः ॥
तुलसीकाष्ठमालांच कण्ठे वा मस्तके करे । निन्दा कुर्वन्ति ये मूढा म्लेच्छजास्ते न संशयः ॥

अत्रातिशयमालोक्य तुलसीं द्वेषयन्ति ये । बहुनोक्तेन किं पार्थ सर्वे ते ह्यन्यवीर्यजाः ॥
यज्ञोपवीतवद्धार्या कण्ठे तुलसिमालिका । नाशौचं धारणे तस्या यतः सा ब्रह्मरूपिणी ॥
જે હૈતુકલોકો (એનું કારણ શું એમ પૂછનારા) પાપબુદ્ધિવાળા હોઇને કંઠમાં તુલસીની માલા ધારણ કરતા નથી તે ભગવાનના ક્રોધાગ્નિથી બળીને નરકમાંથી છૂટતા જ નથી. ૧.

કોઇના કંઠમાં કોઇના હાથમાં કે કોઇના મસ્તક ઉપર તુલસીના કાષ્ઠને જોઇને જે લોકો નિંદા કરે છે તે મ્લેચ્છથી ઉત્પન્ન થયેલ છે એમ સમજવું; એમાં સંદેહ ન સમજવો. તુલસીમાલામાં અતિશય જોઇને જે તેનો દ્વેષ કરે છે તેને માટે વધારે તો શું કહેવું પણ તે અન્યવીર્યથી ઉત્પન્ન થયેલ છે એમ સમજવું. (૩) વળી સ્કન્દપુરાણમાં કહ્યું છે કે જનોઇની પેઠે સદા તુલસીની માલા ધરવી. તેમ કરવાથી અપવિત્રતા થતી નથી; કારણકે તુલસીની માલા બ્રહ્મરૂપિણી છે.

કેટલાક લોકો તુલસીની માલા ધરે છે. પણ સેવા વખતે જ ધરે છે; પછી કંઠમાંથી ઉતારી નાખે છે. અને નીચે લખ્યા પ્રમાણે આપે છે તેઓ તે પ્રમાણોના તાત્પર્યને સમજતા નથી, તેમાં કેવલ તુલસીમાલા લખી હોય ત્યાં તુલસી પત્રની માલા સમજવી. જ્યાં કાષ્ઠ શબ્દ લખ્યો હોય, ત્યાં આપણે ધરીયે છીયે તેવી માલા સમજવી; તેથી જ્યાં નિષેધ જોવામાં આવે છે; ત્યાં તુલસીપત્રની માલાનો છે. કાષ્ઠની માલા સદા ધારણ કરવાનો વિધિ છે તે જ વિરુદ્ધ વચનો નીચે પ્રમાણે છેઃ–

भोजने मैथुने चैव मलमूत्रविसर्जने । तुलसी धार्यते येन विष्णुद्रोही न संशयः ॥

ભોજન અને મૈથુન તથા મલમૂત્ર કરતી વખતે જે તુલસી ધારણ કરે છે તે વિષ્ણુનો દ્રોહી છે એમાં સંદેહ નહિં.

तुलसी धार्यते कण्ठे मलमूत्रविसर्जने। नरके पच्यते मूढो यमदण्डेन पीडितः ॥

મૂત્ર કરતી જે તુલસીની માલાને કંઠમાં ધારણ કરે છે તે મૂઢ યમદંડથી પીડિત થઇ નરકમાં પાપના ફળને ભોગવે છે.

स्नानकाले यदा कण्ठे तुलसी धार्यते क्वचित् । तद्वारि पतितं पादे स पापिष्ठो नराधमः ॥

સ્નાનસમયે જે તુલસી કંઠમાં રાખે છે અને તુલસીને અડેલું જલ પગ ઉપર પડે છે તેનાથી તે પાપીજન મનુષ્યમાં અધમ થઈ રહે છે. તુલસી એ લક્ષ્મી છે અને લક્ષ્મી તુલસીરૂપ છે ઇત્યાદિ વચનોથી પાંચ ઠેકાણે તુલસી ધારણ કરવાની હારિત મુનિ ના પાડે છે; તેથી કોઈ એમ કહે કે પૂજા વખતે માલા પહેરવી અને પછીના વખતમાં ન પહેરવી તો ત્યાં બીજાં વચનો આપી સદા ધારણ કરવી એવો સિદ્ધાન્ત સિદ્ધ કરે છે કે જ્યારે માલાને યજ્ઞોપવીત જેમ ધારણ કરવાનું કહે છે તો યજ્ઞોપવીત તો સદા ધારણ રહે છે. કર્મકાલે ધારણ થતું નથી. તેમ મલમૂત્ર વખતે કાઢી નાંખવામાં આવતું નથી. તે યજ્ઞોપવીતની પેઠે તુલસીની માલાને સદા ધારણ કરવાનું નારદ પંચરાત્રમાં કહ્યું છે.

आशौचे वाप्यनाचारे कालेऽकाले च सर्वदा । तुलसीमालिकां धत्ते स याति परमं पदम् ॥

આશૌચ. અનાચાર સમયાસમયે પણ જે તુલસીમાળા ધારણ કરે છે તે પરમ પદને પામે છે. સ્કંદપુરાણમાં લખ્યું છે કેઃ–

तुलसीकाष्ठमालां यो धृत्वा स्नानं समाचरेत् । पुष्करे च प्रयागे च स्नानं तेन मुनीश्वरः ॥

તુલસીકાષ્ઠની માલા પહેરીને જે સ્નાન કરે છે તે પુષ્કર ક્ષેત્રમાં અને પ્રયાગમા ન્હાયો એમ હે મુનિશ્વર જાણે, વળી

तुलसीकाष्ठमाला यो धृत्वा भुक्ते द्विजोत्तमः । सिक्थेसिक्थे च लभते वाजिमेधफलं मुने ॥

તુલસીકાષ્ઠની માલા પહેરીને જે બ્રાહ્મણ ભોજન કરે છે તેને એક એક ગ્રાસે અશ્વમેધ યજ્ઞનુ ફલ મળે છે. એમ જ પદ્મપુરાણમા પાર્વતીજીને શિવજી કહે છે કે

स्नानकाले तु यस्याङ्गे दृश्यते तुलसी शुभा । गङ्गादिसर्वतीर्थेषु स्नातं तेन न संशयः ।
तुलसीमालिका धृत्वा यो भुङ्क्ते गिरिनन्दिनि । सिक्थे सिक्थे स लभते वाजिमेधफलं शुभम् ॥
बहुना किमिहोक्तेन शृणु त्वं वरवर्णिनि । विड्उत्सर्गादिकाले च न त्याज्या कण्ठमालिका ।
अन्तकालेपि यस्याङ्गं तुलसीमालिका स्पृशेत् । तस्य देहोद्भवं पापं तत्क्षणादेव नश्यति ॥
कण्ठे शिरसि बाहुभ्यां कर्णयोः करयोस्तथा । बिभृयात्तुलसीं यस्तु स ज्ञेयो विष्णुना समः ॥
यत्कण्ठे तुलसी नास्ति ते नरा मूढमानसाः । अन्नं विष्ठा जलं मूत्रं पीयूषं रुधिरं भवेत् ॥
तत सर्वेषु कालेषु धार्या तुलसिमालिका । क्षणार्द्धं तद्विना योपि विष्णुद्रोही न संशय ॥

સ્નાનસમયે જેના કંઠમા સુંદર તુલસીની માલા દેખાય છે તેણે સર્વતીર્થમા સ્નાન કર્યું એમા સંદેહ ન સમજવો (૧) હે ગિરિનંદિનિ, તુલસીની માલા પહેરીને જે ભોજન કરે છે તેને કોળીયે કોળીયે અશ્વમેધ યજ્ઞનુ ફળ મળે છે (૨) હે વરવર્ણિનિ બહુ કહેવાથી શું ફાયદો છે પણ મલમૂત્રત્યાગમા પણ તુલસીની માલા દૂર ન કરવી (૩) અંતકાલ સમયે જેના અંગને તુલસીની માલાનો સ્પર્શ થાય તેના દેહના પાપ તે ક્ષણે જ નાશ પામે છે (૪) કંઠ, મસ્તક, બે હાથ, બે બાહુ, બે કાન એટલા સ્થાનમા જે તુલસીને ધારણ કરે છે તેને વિષ્ણુની બરોબર સમજવો (૫) જે મૂઢ મનવાળાના કંઠમા તુલસી નથી તેના હાથનુ અન્ન વિષ્ટા બરોબર, જલ મૂત્રવત્ અને અમૃત રુધિર બરોબર સમજવુ (૬) માટે સર્વદા તુલસી માલા ધારણ કરવી એક પલ પણ તેની વગર રહે તે વિષ્ણુનો દ્રોહી સમજવો

વળી જેના કપાલમા ગોપીચંદન વડે તિલક કરેલુ હોય અને કંઠમાં તુલસીની માલા છાતી સુધી લટકતી હોય તેને યમના દૂત સ્પર્શ કરી શકતા નથી ઊર્ધ્વ પુંડ્રના વચમા જગ્યો રહે છે તેમા ભગવાન લક્ષ્મીની સાથે રહે છે એ વચનથી શ્રીનુ ધારણ કરવુ તે ઘટતું નથી પણ તિલકની વચ્ચે 'શ્રીગોપીજનવલ્લભાય' એટલા અક્ષરવાળી મુદ્રા પુષ્ટિ માર્ગીયો ધારણ કરે છે.

એ પ્રમાણે તુલસીકાષ્ઠની માલા નિત્ય ધારણ કરવાનુ ઉપરના વાક્યોથી સિદ્ધ થયુ નિષેધ વાક્યો તુલસીપત્રની માલા પરત્વે લેવા. આથી વિરોધ આવતો નથી એ સિદ્ધ થયુ

જીવના ઉદ્ધારને માટે જીવની સાથે પરમાત્મા અંતર્યામિરૂપે રહે છે તેમ પુષ્ટિ માર્ગીય ભક્તોના ઉદ્ધારને માટે શ્રી આચાર્યજી ઓષધિ એટલે તુલસીરૂપે પ્રકટ થઇ તેના કંઠમા સદા તેના ઉદ્ધારને માટે રહે છે, છતાં જીવ તેનો બદલો કેમ આપતો નથી તેના ઉત્તરમા કહેવાનું કે જીવથી કાંઇ પણ ઈશ્વર ઉપર ઉપકાર થઇ શકતો નથી તે વાત ઉદ્ધવજીયે એકાદશ સ્કંધમા ભગવાનને ઉદ્દેશીને કહી છે.

नैवोपयन्त्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरन्तः ।
योन्तर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ति ॥

હે ઇશ ! આપના ગુણનું કિર્વન કરનાર ભક્તો બ્રહ્માના આયુષ સુધી પણ આપના ઉપકારનો બદલો આપી શકતા નથી અને આપની લીલાનું સ્મરણ કરતાં હર્ષયુક્ત થઇને આપને ભજે છે. જે આપ ઇશ્વરરૂપે ભક્તના અંતર્દોષને દૂર કરો છો અને આચાર્યરૂપે પ્રકટ થઇને બહારના દોષને દૂર કરી આપની ગતિને જીવને માટે પ્રકટ કરો છો. (જીવને મોક્ષનું દાન કરો છો) તે પ્રમાણે શ્રીઆચાર્યજી ઔષધિરૂપે પ્રકટ થઈ જીવના કંઠમાં રહી તેમની વિષયવાસનાને દૂર કરીને સ્વરૂપપ્રાપ્તિના માર્ગને બતાવે છે. વસ્તુતાયે તો પુષ્ટિમાર્ગીય જીવને આ લોકમાં આવવું થયું તેજ રોગ અને તેને પાછા સ્વધામમાં પહોંચાડવા માટે પ્રભુનું શ્રીઆચાર્યરૂપે પ્રાકટ્ય છે, તેથી જીવને નિઃસાધનતા છતાં સ્વપ્રાપ્તિ કરાવનાર શ્રીઆચાર્યજીનો ચતુર્થ ધર્મ શ્રીરૂપ આથી વર્ણન કરાયો.

नमो वाचे એ પદથી જ્ઞાનરૂપ પંચમ ઐશ્વર્યનું શ્રીઆચાર્યજીમાં નિરૂપણ કરે છે. શ્રીઆચાર્યજી ભૂતલ ઉપર પ્રકટ થઇને વાણીદ્વારા ઉદ્ધાર કરવા માટે બ્રહ્મસૂત્ર ભાષ્ય, નિબંધ સુબોધિનીજીરૂપે પ્રકટ થયા છે, તે પણ શ્રીઆચાર્યજીએ પ્રકટ કરી તેમાં સ્વયંપ્રવેશ કર્યો છે. ત્યારે જ તે વાણીદ્વારા જીવનો ઉદ્ધાર થાય. ત્યાં શંકા કરે છે કે જીવનો ઉદ્ધાર તો આપ સ્વરૂપથીજ કરશે તો હવે નામથી ઉદ્ધારનું શું પ્રયોજન છે? ત્યાં આજ્ઞા કરે છે કે ज्ञानी चेद्भजते कृष्णं तस्मान्नास्त्यधिकः परः એવું આપશ્રીનું વાક્ય છે. વળી ज्ञानादेव तु कैवल्यम् જ્ઞાની જો શ્રીકૃષ્ણને ભજે તો તેનાથી બીજો કોઈ શ્રેષ્ઠ નથી–જ્ઞાનથી જ મોક્ષ મળે છે. એવી શ્રુતિ છે. તેથી શ્રીઆચાર્યજીનો ધર્મિરૂપે પ્રાદુર્ભાવ થયો. ત્યારે મુખારવિંદવડે પુષ્ટિમાર્ગીય વૈષ્ણવોને જ્ઞાન સિદ્ધ કરાવે છે. તે પુષ્ટિસિદ્ધાન્તનું જ્ઞાન તેને આપશ્રીજ કરાવે છે. જો ભાષ્ય સુબોધિની વિગેરે ન પ્રકટ કરેથી આધુનિકોને પણ સ્વમાર્ગનું જ્ઞાન ન થાય તો તે માર્ગની મુક્તિ પણ તેને ન મળે તેથી આધુનિકોને પણ સ્વમાર્ગનું જ્ઞાન કરાવવા માટે સ્વયં વાણીરૂપે પ્રકટ બિરાજે છે. વળી જ્ઞાનનો ઉત્કર્ષ ત્યારે જ કહેવાય કે જ્યારે સ્વભાવ જીતી જવાય. શ્રીઆચાર્યજીના ગ્રંથોનું શ્રવણ કરે તો જીવ ઇંદ્રિય વગેરેમાં પ્રાકૃત અંશ હોય તે જતો રહે અને સેવામાં ઉપયોગી અપ્રાકૃત ભાવ પ્રકટ થાય છે. તેથી સ્વભાવ વિજયરૂપ જ્ઞાનરૂપ ગ્રંથના અભ્યાસથી પ્રાપ્ત છે. આનું નામ જ્ઞાનરૂપ પંચમ ઐશ્વર્ય. આ સેવકમાં આવે છે; ત્યારે એ વાણી જેના શ્રીમુખથી પ્રકટ થઇ છે તેમ તો પુષ્ટિમાર્ગીય જ્ઞાનરૂપ ઐશ્વર્ય હોય તેમાં શું કહેવું ? તેથી नमो वाचे એ વિશેષણથી જ્ઞાનનું નિરૂપણ થયું.

नमो वाचस्पतये એ શ્રીઆચાર્યજીનું વિશેષણ શ્રુતિ યોજે છે. તેનાથી પુષ્ટિમાર્ગીય વૈરાગ્યરૂપ છઠ્ઠા ઐશ્વર્યનું આચાર્યચરણમાં પ્રાકટ્ય છે એમ સિદ્ધ કરે છે. શ્રીવલ્લભાચાર્ય વાણીના પતિરૂપે પ્રકટ્યા છે તેને હું નમું છું એમ શ્રુતિ કહે છે. શ્રીવલ્લભાચાર્યજી પૂર્વે પાંચ વિશેષણોથી જીવોનો ઉદ્ધાર કરવાને સમર્થ છે; છતાં વાણીના પતિરૂપ શા માટે થયા તેના ઉત્તરમાં કહે છે કે શ્રીવલ્લભાચાર્યજીએ પ્રથમસ્કંધ સુબોધિનીજીમાં આજ્ઞા કરી છે કે,

अर्थं तस्य विवेचितुं नहि विभुर्वैश्वानराद्वाक्पते–
र्न्यस्तत्र विधाय मानुषतनुं मां व्यासवच्छ्रीपतिः ।
दत्त्वाज्ञां च कृपावलोकनपटुर्यस्मादतोहं मुदा
गूढार्थं प्रकटीकरोमि बहुधा व्यासस्य विष्णोः प्रियम् ॥

આ શ્રીભાગવતનુ પ્રાકટ્ય ભગવાને વ્યાસરૂપે પ્રકટ થઇને કર્યું પણ તેનો ખરો અર્થ વાણીના પતિ એટલે શ્રીમુખારવિંદના અધિષ્ઠાતા અગ્નિરૂપ શ્રીવલ્લભાચાર્ય થયા તે ભાગવતનો ગૂઢ અર્થ જે વ્યાસજીને પ્રિય છે તેને જ હું પ્રકટ કરુ છુ, એમજ શ્રીવલ્લભાચાર્ય શ્રીમુખથી પોતે વાણીના પતિ છે એમ કહે છે પુરુષોત્તમના બાર અગ છે તેમ ભાગવતના બાર સ્કધ છે, તેથી ભાગવત પણ પુરુષોત્તમનુ નામાત્મક સ્વરૂપ છે તે પુરુષોત્તમના રૂપને પુરુષોત્તમ વિના બીજો કોઈ જાણી શકે નહિ, તેથી ગીતામા અર્જુન કહે છે કે स्वयमेवात्मनात्मान वेत्थ त्वं पुरुषोत्तम હે પુરુષોત્તમ, આપ પોતે જ આપના સ્વરૂપને જાણો છો તેથી જ શ્રીવલ્લભાચાર્યજી સ્વય પુરુષોત્તમ હોવાથી પુરુષોત્તમાત્મક શ્રીભાગવતના અર્થને જાણે તેથી સ્વય પ્રકટ થઇને વ્યાસના અભિપ્રાયરૂપ ભાગવતના અર્થને પ્રકટ કર્યો. તે જ અર્થ ભાષ્ય સુબોધિની નિબન્ધ વિગેરેથી વ્યાકૃત કર્યો તે જ नामरूपे व्याकरवाणि એ શ્રુતિમા કહ્યા પ્રમાણે સ્વયમેવ તે કરવાને સમર્થ છે તેથી જ શ્રીઆચાર્યજી वाचस्पति રૂપ છે. આથી વૈરાગ્યરૂપ ગુણ શ્રીઆચાર્યજીમા છે એમ બતાવ્યુ તે વૈરાગ્યનુ લક્ષણ બતાવી તેને શ્રીઆચાર્યચરણમા ઘટાવે છે

हरेश्चरणयो. प्रीति स्वसर्वस्वनिवेदनात् । उत्कर्षश्चापि वैराग्ये हरेरपि हरिर्यदि ॥
भक्तया च तादशत्व च सा सेवा सेवकोचिता ॥

પોતાનુ સર્વસ્વનિવેદનપૂર્વક ભગવાનમા પ્રીતિ એનુ નામ વૈરાગ્ય બીજે બધે વૈરાગ્ય હોય તો જ ભગવાનમા પ્રીતિ સભવે તેમા પણ વૈરાગ્યનો ઉત્કર્ષ ત્યારે જ ગણાય કે જ્યારે સર્વના દુ ખને હરનાર હરિના દુ ખને પણ હરણ કરે સેવક વસ્ત્રાદિ ઉપચારથી સેવા કરી ભગવાનની ઠડી ગરમી વિગેરે મટાડી ભગવાનનો પણ હરિ થાય છે. બીજા માર્ગવાલા કહે છે કે ભગવાનને શ્રમ નથી હોતો. સિદ્ધાન્તમા પ્રભુને શ્રમ પડે છે. તે સુબોધિની દશમસ્કધના યુગલગીતના પ્રસગમા કહેલુ છે વલી अनश्नन्योऽभिचाकशीति એ શ્રુતિમા મર્યાદામાર્ગમા પ્રભુ આરોગતા નથી, પણ પુષ્ટિમાર્ગમા તો ભક્તના ભાવથી तदहं भक्त्युपहृतमश्नामि प्रयतात्मन એ વાક્યથી પ્રભુ આરોગે છે એ વાત દશમસ્કધના આઠમા અધ્યાયના ટિપ્પણીજીમા કહી છે. પૂતનામોક્ષપ્રસગે ગોપીએ સ્નેહથી ભગવાનની રક્ષા કરી છે. તે ભ્રમથી નથી પણ સ્નેહનો ધર્મ છે અને ભક્તના સ્નેહને લઇને ભગવાનને તે તે લીલા કરવી પડે છે એમ ત્યા ભગવાનના દુ ખને ભક્ત મટાડે છે એમ કહ્યુ છે. વેણુગીતમા दृष्ट्वातपे व्रजपशून् એ શ્લોકમા મેઘે પોતાના સર્વસ્વરૂપ કુસુમાવલી વર્ષાવી પોતાના શરીરથી ભગવાનને છાયા કરીને સેવા કરી છે તેને વૈરાગ્ય કહેલુ છે એમ સેવકમા પણ વૈરાગ્ય સિદ્ધ થાય છે, તો શ્રીમદાચાર્યજીમા વૈરાગ્યનુ શું કહેવુ ?

ईश्वरः पूज्यते लोके ઇત્યાદિ કારિકાઓ શ્રીઆચાર્યજીએ હરિણી વગેરેની બાબતમા કહી છે તેને તમો અહિં કેમ બધબેસતી કરો છો, તેના ઉત્તરમા કહેવાનું કે नैकस्य दाहरणं योतारकम प्रयोजयति એમ ભાષ્યમા કહ્યુ છે તેથી ઉદાહરણ ભિન્ન હોય છતા તે અન્યત્ર ઘટે ત્યાં તેનો ઉપયોગ કરી શકાય છે. તેથી જ શ્રીહરિરાયજીએ તે શ્લોકો શ્રીયમુનાજી પરત્વે યોજી તેમા પુષ્ટિમાર્ગીય ઐશ્વર્યનો અતિદેશ કરેલો છે ત્યાં બીજી શકા કરે છે કે જ્યારે શ્રીઆચાર્યજી વાચસ્પતિરૂપે ભૂતલ ઉપર પ્રકટ્યા, ત્યારે જેને જેને ભાષ્ય સુબોધિનીજી વિગેરે સમજાવ્યા તેને પુષ્ટિમાર્ગીય ભગવત્સ્વરૂપનુ જ્ઞાન થયુ અને તેનો તન્મા

ર્ગીય ઉદ્ધાર થયો તે વાત ઠીક છે, પરંતુ આધુનિક જીવોને તે લાભ ન મળવાથી ઉદ્ધાર નહિં થાય ત્યાં કહે છે કે વાચસ્પતિ શબ્દથી હાલમાં બીરાજતા શ્રીઆચાર્યજીના કુલના બાલકો જેઓ ભાષ્ય સુબોધિની નિબંધ વિગેરેને યથાર્થ જાણી બીજાને સમજાવી શકે છે, તેવા લેવા. તેવા આધુનિકના મુખથી સિદ્ધાન્તજ્ઞાન પુષ્ટિમાર્ગીય જીવોને થઈ શકે છે. તેથી માહાત્મ્યજ્ઞાનપૂર્વક સુદૃઢ સ્નેહ થવાથી બધા આધુનિક જીવોનો પણ ઉદ્ધાર થશે જ. તેથી જ શ્રીઆચાર્યચરણ નિબંધમાં આજ્ઞા કરે છે કે–

सात्विका भगवद्भक्ता ये मुक्तावधिकारिणः, भवान्तसंभवा दैवात्तेषामर्थे निरूप्यते ॥

જે સાત્વિક છે ભગવદ્ભક્ત છે મુક્તિના અધિકારી છે અને અન્તિમ જન્મવાલા છે તેને માટે આ બધો શાસ્ત્રાર્થ કહીએ છીએ.

એમ વૈરાગ્ય–નિરૂપણ કરીને સંયોગાત્મક ધર્મિસ્વરૂપનું નિરૂપણ नमो विष्णवे એ વિશેષણથી શ્રુતિ કરે છે. વિષ્ણુરૂપધારી વલ્લભાચાર્યને હું નમન કરું છું. અહિં ફલાત્મક કૃષ્ણપદ ન કહેતાં વિષ્ણુપદ કહ્યું છે તેથી વ્યાપક હોવાથી પૂર્વોક્ત છ ધર્મવિશિષ્ટ આપ ધર્મિરૂપ છે. એ વિષ્ણુપદ પુરુષોત્તમવાચક છે. તેથી જ देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः। आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः ત્યાં વિષ્ણુ વ્યાપક પુરુષોત્તમ જેને વેદાન્તમાં બ્રહ્મ કહે છે તે સર્વત્ર વિદ્યમાન હોવાથી વિષ્ણુ કહેવાય છે એમ તેની વ્યાખ્યા કરેલી છે. सत्यतद्धूलतो विष्णुर्नान्यथा तु करिष्यति ત્યાં પણ શ્રીગોકુલનાથજી વિષ્ણુશબ્દથી પુરુષોત્તમનું ગ્રહણ કરે છે. કારણ કે તે બાહાર અને અંદર વ્યાપી છે. વલી શ્રીવલ્લભાચાર્યજી ધર્મિરૂપ છે એમ શ્રુતિ કહે છે. इन्दिराया नलिनीमन्दिरायाः वल्लभो वासुदेवो देवगीतो दिविजानन्ददायी देवदेवो यतनो वैभवेन सा कस्मीरमिता नो बभूव सन्ततं भूरिभोगम् પરમ ઐશ્વર્ય જેને પ્રાપ્ત થયું છે એવા મુખ્ય સ્વામિનીના અતિપ્રિય એવા શ્રીવલ્લભાચાર્યજી જે પ્રકટ દશામાં સ્વામિનીભાવથી સેવા કરે છે, બન્નેના મધ્યસ્થ પણ છે તેથી પણ વલ્લભ એવું નામ છે. તે જ વાસુદેવ એટલે નંદનંદનરૂપ પણ છે. વાસુદેવશબ્દથી નંદનંદન કેમ લેવાય ત્યાં કહે છે કે द्रोणो वसूनां प्रवरः એ શ્લોકમાં નંદરાયજી દ્રોણનામના વસુ હતા એ વસુમાં જે ક્રીડા કરે તે વાસુ અને તે જ દેવ એટલે નંદનંદન. હવે અહિં વાસુદેવશબ્દ ઉપર વ્યાકરણને લઇને શબ્દશક્તિનો વિચાર કરે છે કે વાસુદેવ શબ્દથી પુરુષોત્તમ ન સમજાય પણ વસુદેવના પુત્ર એટલે ऋष्यन्धक એ સૂત્રથી અપત્યાર્થમાં अण् પ્રત્યય કરવાથી વાસુદેવશબ્દ સિદ્ધ થાય છે અને તેનો અર્થ વસુદેવના પુત્ર એટલો જ થાય ત્યાં કહે છે કે ભાષ્યમાં આ બાબત વિશેષ ઊહાપોહ કરીને કહ્યું છે કે संज्ञैवामगवत', તેથી અહિં અપત્યાર્થક अण् પ્રત્યય નથી. गोत्रक्षत्रियाख्येभ्य' એ સૂત્રથી થતો वुञ् પ્રત્યય પણ નથી. તેથી પુરુષોત્તમનું જ વાસુદેવ એવું નામ છે તે જ વાત કહી છે કેઃ–

सर्वत्रासौ समस्त च वसत्यत्रेति वै यतः । ततोऽसौ वासुदेवेति विद्वद्भिः परिगीयते ॥

સમસ્ત પદાર્થમાં અને સર્વ ઠેકાણે આ વસે છે તેથી વિદ્વાનો તેને વાસુદેવ એ નામથી ગાય છે. ભૂતમાં જે વસે અને ભૂતો જેમાં વસે તે વાસુ અને તે જ દેવ એવી રીતે વાસુદેવ કહેવાય છે. તેથી અહિં ગોત્રવાચક કે ક્ષત્રિયવાચક પ્રત્યયોની કાંઈ જરૂર નથી. એવા વાસુદેવ પુરુષોત્તમરૂપ શ્રીવલ્લભાચાર્ય છે. વલી કેવા છે કે દેવો બ્રહ્માજી વગેરે જેનું ગાન કરે છે. તે જ વલી દૈવી જીવોને આનંદરૂપ ભગવાનનું દાન

કરનાર હોવાથી દિવિજાનંદદાયી છે. એવું ફલ આપવાનું સામર્થ્ય ક્યાંથી આવ્યું ત્યાં કહે છે કે દેવના પણ તે દેવ છે, પુરુષોત્તમસ્વરૂપ પોતે છે. શ્રીવલ્લભાચાર્યજી તો સન્મનુષ્યાકૃતિ છે તે પુરુષોત્તમ કેમ કહેવાય ત્યાં કહે છે કે अयतन છે એટલે ભગવાનને માટે જ જેનો યત્ન એટલે વ્યાપાર છે. શ્રીભગવાનની આજ્ઞાથી જ ભૂતલ ઉપર આપનું પ્રાકટ્ય છે. તેથી જ स्वयदासार्थकृताशेषसाधनः એવું આપનું નામ છે. તે જ શ્રીવલ્લભ અમને સેવાનું સામર્થ્ય આપવા માટે તે લક્ષ્મીરૂપે અમારે માટે પ્રકટ હો. અર્થાત્ અમારામાં રસ ભગવાનની સાથે ક્રીડા કરવાનું સામર્થ્ય અને યોગ્યતા પ્રાપ્ત કરાવવા માટે લક્ષ્મીરૂપે આપ અમારામાં પ્રવેશ કરે એટલે બ્રહ્માનંદરૂપા લક્ષ્મી આવવાથી ભજનાનંદરૂપ રસનો અધિકાર અમારો સિદ્ધ થાય. એ દાન કરનાર શ્રીવલ્લભાચાર્યજી છે તે જ્યારે સામ્ય સંપાદન કરે ત્યારે જ રસને માટે યોગ્યતા પુષ્ટિમાર્ગીઓમાં થાય છે. સામ્ય વગર રસનો અધિકાર સિદ્ધ થતો નથી. તે પુરુષોત્તમ સ્વસ્વરૂપ તેમાં પ્રવેશ કરાવે ત્યારે જ સમતા થાય છે. તે વાત કહી છે કે स्वरूपेणावतारेण लिङ्गेन च गुणेन च । तारतम्यं न स्वरूपे देहे वा तत्क्रियासु वा ॥ तथापि यावता कार्यं तावत्तस्य करोति हि. તેવા શ્રીવલ્લભ છે; છતાં આપ ભૂરિ ભોગને માટે પ્રકટ થયા છે તે વાત यस्मादस्मिन् स्थितो यत्किमपि कथमपि क्वाप्युपाहर्तुमिच्छत्यद्धा तद्रोविशेषः स्वयवदनकमले चाद्धाते करोति એમાં કહ્યા પ્રમાણે ભગવાનને ભોગ આપશ્રી તરફથી મલે છે અને તત્પ્રસાદત્વેન તદુચ્છિષ્ટતાથી જીવોને પણ ભોગ મલે છે તે વાત ઉદ્ધવજીએ કહી છે. त्वयोपभुक्तस्रगन्धवासोऽलङ्कारचर्चिताः । उच्छिष्टभोजिनो दासास्तव मायां जयेमहि ઉચ્છિષ્ટરૂપ ઐહિક ભૂરિભોગ અને પરલોકમાં સેવા ફલમાં કહ્યો ભોગ અલૌકિક સામર્થ્ય સાયુજ્ય અને સેવોપયોગી દેહ વૈકુંઠાદિમાંથી અન્યતમ યથાધિકાર આપની કૃપાથી મળે છે.

આ શ્રુતિનું બીજું વ્યાખ્યાન લક્ષ્મીજી મુખ્ય સ્વામિની શ્રીરાધિકાજી લેવા અને તેના વલ્લભ શ્રીકૃષ્ણ તે અજને ભૂરિભોગ આપો એવી રીતનું વ્યાખ્યાન વ્યુત્પત્યંતરથી કરેલ છે. અહિં વાસુદેવ શબ્દથી ચતુર્વ્યૂહાંતર્ગત વાસુદેવ વ્યૂહ ન લેવો. તેમાં પ્રમાણ બતાવે છે કે सात्विकेषु तु कल्पेषु यः शेते सलिले हरिः । वासुदेवः स विज्ञेयो यस्यांशोऽनन्त उच्यते એમ કહી निशीथे तम उद्भूते એના સુબોધિનીજીમાં देवक्यां प्रद्युम्नः नंदगृहे वासुदेवः એમ કહ્યું છે. તેથી વાસુદેવથી પુરુષોત્તમ જ લેવાય વ્યૂહાદિ ન લેવાય એમ સિદ્ધ થાય છે. પણ ત્યાં પુરુષોત્તમ પદ ન કહેતાં વાસુદેવ પદ મુકયું તેનો કાંઈ અભિપ્રાય તો હોવો જોઈએ તે બતાવે છે કે વાસુદેવ જેમ પ્રથમ કલ્પમાં બ્રહ્માદિકને ઉત્પન્ન કરે છે તેમ હમણાં તેજ વાસુદેવ વલ્લભરૂપે ભૂતલ ઉપર પ્રકટ થઈને પુષ્ટિને પ્રકટ કરનાર થયા. તેનાં બીજા વિશેષણો બધાં વાસુદેવ પરત્વે વર્ણવી આ શ્રુતિનો અર્થ સંપૂર્ણ કરી नमो विष्णवे એ વિશેષણથી ધર્મિસંયોગરૂપે શ્રીવલ્લભાચાર્યનું વર્ણન થયું. હવે તે પ્રથમની શ્રુતિમાં છેલ્લું વિશેષણ બાકી રહ્યું છે તેનાથી ધર્મિવિપ્રયોગનું વર્ણન કરે છે. बृहते करोमि વ્યાપકરૂપને ધારણ કરનાર શ્રીવલ્લભાચાર્યજીને નમન કરું છું એમ શ્રુતિ છેલ્લે કહે છે. અહિં સંયોગ અને વિપ્રયોગ એમ બે ભેદથી ધર્મિનું વર્ણન કર્યું. તે રસ સંયોગવિપ્રયોગ એમ દ્વિદલાત્મક છે. તે રસરૂપ પુરુષોત્તમ છે અને તેનો જ પ્રાદુર્ભાવ ભૂતલ ઉપર વલ્લભરૂપે થયો છે; તેથી જ જેમ વિપ્રયોગાત્મક રૂપનું ભક્તના હૃદયમાં દર્શન થાય છે, જેમ શ્રી ગોપીજનોનું વર્ણન છે કે तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः। तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः, ત્યાં શંકા

કરે છે કે વિપ્રયોગાત્મક રૂપ તો અમૂર્ત્ત હોવું જોઇએ ત્યાં કહે છે કે વિપ્રયોગ થતાં થતાં બહાર પ્રાકટ્ય થાય તો જ તે પ્રકટરૂપ કાર્યક્ષમ ગણાય. હૃદયસ્થરૂપ કાર્યક્ષમ ન ગણાય. તે જ વાત કહી છે કે

यावद्बहिःस्थितो वह्निः प्रकटो वा विशेन्न हि । तावदन्तः स्थितोप्येष न दारुदहनक्षमः ॥
एवं सर्वगतो विष्णुः प्रकटश्चेन्न तद्विशेत् । तावन्न लीयते सर्वमिति कृष्णसमुद्यमः॥

કાષ્ઠમાં અગ્નિ રહ્યો છે છતાં બહારનો અગ્નિ તેને લાગે નહિં ત્યાં સુધી અંદર રહેલો અગ્નિ લાકડાને બાળી શકે નહિં એમ સર્વત્ર વ્યાપ્ત એવા ભગવાન્ બધા જીવના અંતઃકરણમાં છે પણ તે જીવને બહાર પ્રકટ થઇને તેના હૃદયમાં ભગવાન્ ન પધારે ત્યાં સુધી તેનો જીવભાવ મટે નહિં; તેથી કૃષ્ણ બહાર પ્રકટ થયા અનેક લીલાવડે જીવના હૃદયમાં વ્યાપ્ત થઇને તેના જીવભાવને નિવૃત્ત કરે છે. તેથી વિપ્રયોગાત્મા હૃદયમાં પધારે તેની પરાકાષ્ઠાએ બહાર પ્રાકટ્ય થાય તેનો પાછો ધર્મિવિપ્રયોગ થાય ત્યારે તે જીવને કરવાનું કાંઇ ન રહે. તે બતાવે છે.

अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशाम् ॥

ઉપરના શ્લોકથી વ્રજસ્ત્રીમન્તિનીઓને ક્ષણ માત્રનો વિયોગ પણ સહન થતો નહતો તો મથુરા પધાર્યા; ત્યારે તેમનું જીવન થયું તેથી જ ભગવાન્ તેની પાસે પ્રકટ થઈ દર્શન દેતા એ વાત સિદ્ધ થાય છે. તેથી વિપ્રયોગાત્મક ભગવત્સ્વરૂપ અત્યંત તાપ થાય ત્યારે ભક્તના અંતઃકરણમાંથી બહાર આવી ભક્તનો જેવી લીલાનો અધિકાર હોય તેવી લીલાનો અનુભવ કરાવે છે. ઉત્તરાર્ધમાં પણ पीतशेषं मदात्मजः પીતશેષ સંભવતું નથી કારણ કે પ્રાકટ્ય પછી વાસુદેવ તો તુરત વ્રજમાં પધાર્યા છે. તેથી પણ દેવકીને ત્યાં પ્રકટીને વાસુદેવે સ્તનપાન કર્યાનું એ વાકયની અન્યથાનુપપત્તિથી સિદ્ધ થાય છે. દેવકીજીને જ્યારે પોતાના પુત્રમાં સ્નેહકલા અતિભૂમિએ પહોંચે છે ત્યારે ભગવાન્ તેના હૃદયમાંથી બહાર પ્રકટ થઇને તેના સંતોષને માટે દેવકીજીના સ્તનનું પાન કરે છે. અતિ તાપથી બહાર પ્રકટ થાય તેજ વિપ્રયુક્ત ધર્મિ સ્વરૂપ સમજવું.

વિપ્રયોગનું વર્ણન શ્રુતિમાં પણ છે તે શ્રુતિ બતાવે છે.

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनुर्न तदामो अश्नुते श्रितास इद्वहन्तस्तत्समाशत ॥

હે બ્રહ્મણસ્પતે અક્ષરના સ્વામી પુરુષોત્તમ તમારો વિસ્તાર–આગળ અતપ્તતનુ કહ્યા છે તેથી જણાય છે કે ભગવાન્ મથુરા પધાર્યા પછી પણ તેવા વિપ્રયોગી ભક્તોને તે તે રૂપે પ્રકટ થઇને સુખ આપ્યાં છે. તેથીજ તે સ્વરૂપ પ્રાકટ્યરૂપ વિસ્તાર–તે વિરહમાં કામાદિ દુઃખ દે છે તેનાથી આપનું સ્વરૂપ રક્ષણ કરે છે. તેમ કરવામાં આપ પ્રભુ એટલે સમર્થ છો. ભક્તનાં શરીરને ચારે તરફથી વ્યાપ્ત થઈ રહો છો તેથી ભક્તો પણ અયોગોલક અને અગ્નિની પેઠે ભગવાનથી વ્યાપ્ત થઇને જ રહે છે. એમ વિપ્રયોગની સ્તુતિ કરી તેની દુર્લભતાનું વર્ણન કરે છે કે જેનું શરીર વિરહથી બળતું નથી તેને વિપ્રયોગાત્મક ધર્મિસ્વરૂપનો અનુભવ થતો નથી. તે તો જે આશ્રય કરીને રહે છે અને શ્રીભાગવતાદિ-

લીલાને સાભળે છે તેજ તે સ્વરૂપનો મારી રીતે અનુભવ કરી શકે છે રાસપચાધ્યાયીમા ધર્મિવિપ્રયોગ ન થવાનું કારણ તો એટલુજ કે જેટલો જોઇયે તેટલો તાપ તેમને ન હતો તેથીસયોગ થયો પછી જ્યારે તેમનો અધિકાર થયો છે ત્યારે તેમને ફલાત્મક વિપ્રયોગ થયો છે

આ શ્રુતિને કેટલાક તપ્તમુદ્રા ધારણ કરવા પરત્વે પણ વર્ણન કરે છે, પણ તેના પૂર્વાપર ભાગ ઉપર નજર કરતા તેવુ કાઈ પ્રકરણ જણાતુ નથી કે તેવો અર્થ કરીએ ભગવત્પર અર્થ કરવામા તો सर्वे वेदा यत्पदमामनन्ति એ શ્રુતિથી બધા વેદ ભગવાનનુજ વર્ણન કરી રહી છે તેથી વિપ્રયોગરૂપનુ વર્ણન કરવુ યોગ્ય છે જેવુ શ્રીઠાકુરજીનુ વિપ્રયોગ ધર્મિસ્વરૂપ છે તેવુ શ્રીઆચાર્યજીનુ પણ સ્વરૂપ છે, તેનો અનુભવ દામોદર દાસજી વિગેરેને જ્યારે સયોગાવસ્થાનો વિરહ હોય ત્યારે અનુભવમા આવે છે આધુનિક જીવોને પણ પ્રભુમા અથવા શ્રીઆચાર્યજીમા જો પરાકાષ્ઠાએ તાપ થાય તો ધર્મિસ્વરૂપનો પ્રભુ તેમજ શ્રીવલ્લભાચાર્યજી અનુભવ આજે પણ કરાવે એ કેટલાક અનુભવીઓ જાણે પણ છે એ બધી બાબત અનુભવથી વેદ્ય હોવાથી વધારે કહેવાની જરૂર નથી

ઉપરના ગ્રથથી શ્રીઆચાર્યચરણ શ્રીવલ્લભાચાર્યજીનુ સ્વરૂપ પુરુષોત્તમાભિન્ન છે એમ શ્રુતિ વર્ણવે છે એ વાત કહી હવે તેમના પુત્રથી વિઠ્ઠલનાથજી પણ પુરુષોત્તમરૂપ છે તેજ શ્રુતિથી સિદ્ધ કરી બતાવે છે

अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे । आत्मा वै पुत्र नामासि स जीव शरद शतम् ॥

શ્રીવિઠ્ઠલનાથજી સ્વય પુરુષોત્તમ હોવાથી શ્રીવલ્લભાચાર્યજીનુ પુરુષોત્તમપણુ તેનેજ જાણવામા આવ્યુ તેથીજ કહ્યુ છે કે नहि ते भगवन् व्यक्तिं विदुर्देवा न दानवा । स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम, ઓ ભગવાન્ તમારા સ્વરૂપને દેવ કે દાનવ જાણતા નથી આપ પોતેજ આપનુ સ્વરૂપ હે પુરુષોત્તમ જાણો છો માટેજ શ્રીવિઠ્ઠલનાથજીએ શ્રીવલ્લભાચાર્યજીના સ્વરૂપનું વર્ણન કર્યું છે

कचित्पाण्डित्यं चेन्न निगमगतिः सापि यदि न
क्रिया सा सापि स्याद्यदि न हरिमार्गे परिचय ।
यदि स्यात्सोपि श्रीव्रजपतिरतिर्नेति निखिलै-
र्गुणैरन्यः को वा विलसति विना वल्लभवरम् ॥

ક્યાક પાડિત્ય હોય છે, પણ વેદમાર્ગ પ્રમાણે તે ચાલતા નથી જેમ બુદ્ધાવતારમા પાડિત્ય ખરુ પણ વેદમાર્ગ પ્રમાણે ન ચાલતા તેની નિંદા કરી તેથીજ જયદેવ કહે છે કે श्रुतिजात निन्दसि હવે ઋષભદેવજીના અવતારમા પાડિત્ય છે અને વેદમાર્ગ પ્રમાણે ચાલવાનું છે પણ ત્યા ક્રિયા નથી એટલે વૈદિક ક્રિયા કરવાનુ નથી મળમુત્ર થાય છે તો તેને ધોતા નથી એટલે તે પણ બરાબર નહિ હવે કપિલાવતારમા પાડિત્ય વેદમાર્ગમા જ્ઞાન અને તત્કૃતિ પણ છે પણ ભગવન્માર્ગમા ચાલવુ જોઈએ તેની ખામી છે, કારણ કે તત્વનુ જ્ઞાન માતાને કરાવ્યુ પોતે પણ બધુ જાણીને કાઇ તેને કૃતિમા લેવા પ્રયત્ન ન કર્યો ભક્તિનો માતાજીને ઉપદેશ કર્યો, પણ તત્વજ્ઞાન થવા માટે ભક્તિ તેના અગરૂપે કહી તત્વજ્ઞાનને ભક્તિના અગરૂપે ન કહ્યુ, તેથી ભક્તિ ગૌણ કહી, તે ભગવત્પ્રાપિકા ન થાય એટલે તે અવતારમા ભગવન્માર્ગના પરિચયનો અભાવ રહ્યો વ્યાસના અવતારમા એ ચારે બાબતો છે પણ શ્રીકૃષ્ણચદ્રમા સ્નેહ નથી કારણ કે જ્ઞાનનો અવતાર છે જ્ઞાન

અને સ્નેહ એ વિરુદ્ધ ધર્મો છે. તેથી જ શ્રીભાગવતમાં કહ્યું છે કે न ज्ञानं न च वैराग्यं प्रायःश्रेयो भवेदिह. એ પાચે બાબતો શ્રીવલ્લભાચાર્યમાં જ ઘટે છે તેથી અવતારાંતરનો આશ્રય છોડી શ્રી વલ્લભાચાર્યજીનો આશ્રય કરવો. તે જ જીવનું મુખ્ય કર્ત્તવ્ય છે. એ સંપૂર્ણ ગ્રંથનું તાત્પર્ય કહી ગ્રંથકાર આ ગ્રથને સમાપ્ત કરતાં નીચેની કારિકાઓથી પોતાનું દૈન્ય પ્રદર્શિત કરી ગ્રંથ સમાપ્ત કરે છે.

यद्यप्ययोग्य एवाहं तत्स्वरूपनिरूपणे ।
तदीयत्वेन कृपया सर्वं संपादितं मयि ॥ १ ॥
यथामति विलासेन प्रेमोल्लासेन वर्णितम् ।
श्रीमदाचार्यचरणाः प्रसीदन्तु स्वतः सदा ॥ २ ॥
इति श्रीवल्लभाचार्यचरणाब्जप्रसादतः ।
निगमोदिततद्रूपं वर्णितं हि यथामति ॥ ३ ॥
यद्यप्यज्ञानदोषेण ह्यन्यथा वर्णितं भवेत् ।
क्षमन्तां श्रीमदाचार्याः स्वीयेषु करुणाकराः ॥ ४ ॥

इति श्रीप्रभुचरणात्मजमहाराजश्रीयदुनाथकुलोद्भवगोस्वामिश्रीगोपालसुतश्रीगिरिधरविरचितं श्रुतिरहस्यं समाप्तम् ॥

જો કે હું તેના (શ્રીવલ્લભાચાર્યજીના) સ્વરૂપનું વર્ણન કરવાને અયોગ્ય છું પણ તેનાપણું (તદીયત્વ) જ મારામાં છે તેણે એ સ્વરૂપનું વર્ણન મારા મુખથી કરાવ્યું છે (૧) કાંઈક વિલાસથી કાંઈક પ્રેમ વધવાથી મેં મારી બુદ્ધિમાં આવ્યું એમ શ્રીવલ્લભાચાર્યનુ સ્વરૂપ વર્ણવ્યું છે. તેનાથી તે સ્વયં પ્રસન્ન થાઓ. (૨) શ્રીવલ્લભાચાર્યજીના ચરણકમલની કૃપાથી વેદમાં કહેલુ તેમનુ સ્વરૂપ મેં યથામતિ વર્ણવ્યું છે (૩) મેં મારા અજ્ઞાનરૂપી દોષને લઈને સ્વરૂપમાં ન ઘટે એવું કાંઈ વર્ણવ્યું હોય તો તે શ્રીવલ્લભાચાર્યજી કે જેઓ પોતાનો ગણે છે તેની ઉપર કૃપા કરનાર છે તેઓ મારા દોષને માફ કરો.

એ પ્રમાણે શ્રીવિઠ્ઠલનાથજીના છઠ્ઠા લાલજી શ્રી યદુનાથજીના કુલમાં પ્રકટેલ શ્રી ગોપાલલાલજીના પુત્ર શ્રીગિરિધરજીએ કરેલ શ્રુતિરહસ્ય સંપૂર્ણ થયું.

श्रीकृष्णाय नमः

प्रास्ताविक नोंध.

શ્રુતિરહસ્ય તથા એના પ્રકાશનું મુદ્રણ નીચે જણાવેલા પુસ્તકોના આધારે થયું છે. મૂલ શ્રુતિરહસ્યના પાઠ છ પુસ્તકોના આધારે યોજાયા છે. આ પુસ્તકોમાં એક પં. ગટ્ટૂલાલજીની સંસ્થાસંગ્રહનું, બીજું શ્રીમથુરેશજીના કોટાના મન્દિરના સંગ્રહમાંનું, ત્રીજું પોરબંદરવાળા શ્રીમદ્ગોસ્વામિશ્રી રણછોડલાલજીનું, ચોથું શ્રીમદ્ગોસ્વામિ શ્રીગોકુળનાથજીનું, પાંચમું પ્રકાશ સાથે લખેલું. અને છઠું પ્રકાશસહિત લખેલુ. પાંચમું પં. ગટ્ટૂલાલજીની સંસ્થાનું હતું અને છઠું કાશીસ્થ શ્રીમદ્ગોસ્વામિશ્રીમુરલીધરજી મહારાજનું. શ્રુતિરહસ્યપ્રકાશની ત્રણ પ્રતો મળી હતી. એક પં. ગટ્ટૂલાલજીના સંગ્રહમાંથી, દ્વિતીય કાશીના શ્રીગોપાલમંદિરના સંગ્રહમાંથી. આ બે પુસ્તકો પૂર્ણ હતા. ત્રીજું ત્રુટિત પ્રકાશનું પુસ્તક સ્વર્ગસ્થ ઇચ્છારામ સૂર્યરામ દેસાઇના ગુજરાતી પ્રેસ સંગ્રહમાંથી રા. નટવરલાલ ઇચ્છારામ દેશાઇએ આપ્યું. ગોસ્વામિ બાલકોના પુસ્તકો તેમના શાસ્ત્રીઓ દ્વારા પ્રાપ્ત થયાં હતાં. શાસ્ત્રી રમાનાથજી, હરિકૃષ્ણ વિરજીભાઇ તથા હરિશંકર ઓંકારજીનો તદર્થં પરમ ઉપકાર થયો છે. ગુર્જરભાષાન્તરકાર્યમાં સંપ્રદાયના વિદ્વાન્ શાસ્ત્રી કલ્યાણજી કાનજીભાઇએ પરમ સાહાય્યં કર્યું છે. પ્રેસ કોપી સિદ્ધ કરવામાં તથા શોધવામાં નિર્ણયસાગરના વિદ્વાન્ શાસ્ત્રી વાસુદેવ લક્ષ્મણ પણસીકારનો પરમ ઉપકાર થયો છે.

શ્રુતિરહસ્યના મુદ્રણમાં સાંસારિક તથા અન્ય વ્યાવહારિક પ્રતિબન્ધોને લઇને ધાર્યા કરતાં વિશેષ વિલંબ થયો છે.


આચાર્યોપાસનાના ઉત્કટ ભાવનાપોષક આ ગ્રન્થરત્નદ્વયનું મુદ્રણ વડોદરાના વૈષ્ણવ ભગવદ્ધર્મપરાયણ મોતીલાલ ગોકુલદાસ પરીખના દ્રવ્યથી થયું છે. વૈષ્ણવ સમાજ તદર્થં તેમનો પરમ ઋણી છે.

શ્રીમદાચાર્યચરણજીનું ભાવનાત્મક પ્રાચીન ચિત્ર તથા કાશીસ્થ શ્રીગિરિધરજી મહારાજનું ચિત્ર અત્ર ધર્યું છે.

મુંબઈ
વૈશાખ કૃષ્ણ ત્રયોદશી, ૧૯૮૨. }

મૂલચન્દ્ર તેલીવાલા

श्रीगोस्वामिश्रीमद्गोस्वामिश्रीगिरिधरजी-
महाराजचरणाः।



प्रादुर्भाव संवत् १८४७ मार्गशीर्ष कृष्ण तृतीया

श्रीविट्ठलपदद्वन्द्वनखचन्द्ररुचे नमः ।
मन्मनःकैरवं शश्वद्यत्प्रादुर्भावतोऽस्फुटत् ॥ ८ ॥
भूयाच्छ्रीव्रजराजनन्दनपदद्वन्द्वैकरत्यग्रणी–
र्यद्विश्वासबलादमुष्य विवृतौ जाता प्रवृत्तिर्मम ॥ ९ ॥
शेषः शाब्देऽथ काव्ये कविकुलतिलकाराध्यपादाम्बुजश्री–
र्न्याये न्याय्यार्थवर्यो विमलतरमतिः साङ्ख्यसङ्ख्यावदार्ये ।
वेदे वेदान्तशास्त्रे हरिरतिनिपुणः कर्मशास्त्रे गुरुर्यो
योगे योगीन्द्रवन्द्यो निजजननिवहोद्धारकृत्कृष्णचन्द्रः ॥ १० ॥
काश्मीरो गुणकुङ्कुमे हिमकरः सन्तापनिर्वापणे
धर्माम्भोजवने नवाम्बरमणिर्दावो द्विषत्कानने ।
सिन्धुः कीर्तिकलानिधौ निरुपधिर्बन्धुः प्रपन्ने जने
श्रीमान् भाति विधुर्गुरुर्गिरिधरस्तत्पादपद्मं नुमः ॥ ११ ॥
जयन्ति श्रीमदाराध्यचरणाम्बुजरेणवः ।
यत्स्पर्शान्निर्मलमभून्मम मानसदर्पणम् ॥ १२ ॥
जयति श्रीमदाराध्यमुखाम्बुजविनिर्गता ।
गूढश्रुत्यर्थसन्दर्भा भाति गङ्गेव भारती ॥ १३ ॥
वागीशेन्द्र मुहुर्विधाय विनतिं कश्चिद्वरं प्रार्थये
मच्चेतोवचसोर्निकाममधुना त्वं सन्निधिं कल्पय ।
येनाहं करवै तवैव विभवादाराध्यपादप्रभो–
र्ग्रन्थेऽस्मिन् वचनार्थयोर्निपुणता विद्वन्मुदे कामपि ॥ १४ ॥
श्रीमच्छ्रुतिरहस्याख्ये सन्देहध्वान्तवारकम् ।
नेतोपाह्वो रामकृष्णः प्रकाशं कुरुते सुधीः ॥ १५ ॥
यद्यप्ययोग्य एवाहमीश्वरोक्तिविचारणे ।
श्रीमदाराध्यचरणाः क्षमन्तां मम साहसम् ॥ १६ ॥
श्रीमदाचार्यवर्याणां गुणगानेन जन्मनः ।
साफल्यमीहते लब्धुं गुरुपादावलम्बनः ॥ १७ ॥
शेषः शक्तो न यस्योज्ज्वलगुणगणनायां सहस्रेण वक्त्रै–
र्मादृक् तद्वर्णनायां कथमपि न पुनर्गण्यतेऽप्रविष्टः ।
यद्यप्येवं तथापि स्वमतिपरिमितं वर्णयेऽहं यथाम्भो
गृह्णात्येवाम्बुराशेर्विमलितपयसः स्वानुरूपं हि कुम्भः ॥ १८ ॥

नौमि श्रीगोपालं प्राकृतमात्राशेषधर्मरहितम् ।

अथ श्रीमदाचार्याणामाकारस्य तद्धर्माणां च तदीयानां सर्वेषामेवालौकिकत्वभानादलौकिकस्य लोके जन्माद्यसम्भवाज्जन्मादीनां कर्माधीनत्वादलौकिकस्य कर्मानधीनत्वाल्लोके लौकिकजनसाधारण्येन जन्मादीनां प्रतीयमानत्वात्तदीयानां तत्र कारणाज्ञानाद्भवति सन्देह इति तत्र श्रीमत्प्रभुचरणाः स्ववचनामृतसरीतरङ्गिणीलहरीपूरप्रवाहैः स्वीयानां संदेहसंदोहपङ्किलचेतसो निर्मलीकरणाय श्रीमद्वल्लभाष्टकं प्रकट्यामासुः । तत्र चरमश्लोके 'अज्ञानाद्यन्धकारप्रशमनपटुताख्यापनाय त्रिलोक्यामग्नित्वं वर्णितं ते कविभिरपि सदा वस्तुतः कृष्ण एव । प्रादुर्भूतो भवा-' निति निरूप्य, 'मानाधीना मेयसिद्धि'रितिन्यायात् 'इत्यनुभवनिगमाद्युक्तमानैरवेत्य । त्वां श्रीश्रीवल्लभेमे निखिलबुधजना गोकुलेशं भजन्त' इति निरूपितम् । यद्यप्यनुभवाग्रे प्रमाणान्तरापेक्षा नास्ति, तथापि 'तं त्वौपनिषदं पुरुषं पृच्छामि', 'नावेदविन्मनुते तं बृहन्तम्', 'औपनिषदः पुरुषः श्रोतव्यः श्रुतिवाक्येभ्य' इति श्रुतिभ्य उपनिषत्प्रतिपाद्यत्वेनापेक्षितं ज्ञानम् । किञ्च, 'प्राकृतधर्मानाश्रयमप्राकृतनिखिलधर्मरूपमिति । निगमप्रतिपाद्यं यत्तच्छुद्धं साकृति स्तौमी'त्युक्तं श्रीमत्प्रभुचरणैः । तत्र कोसौ निगमः श्रीमदाचार्यप्रतिपादकः, कथं निगमप्रतिपाद्यत्वं श्रीमदाचार्येष्विति सन्दिहानानां स्वीयानां सर्वसन्देहनिरासाय श्रीमदाचार्यप्रतिपादकनिगमतदर्थनिरूपणं चिकीर्षवः श्रीमदाराध्यचरणाः श्रुतिरहस्याभिधेयं ग्रन्थमाविर्भावयामासुः । तत्र चिकीर्षितार्थनिर्विघ्नपरिसमाप्तिहेतुकं विशिष्टशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं नमस्काररूपं मङ्गलं शिष्यशिक्षायै समाचरन्ति नौमीति । 'भगवति जीवैर्नमनमेव कर्तव्य'मिति श्रीमदाचार्यचरणैरुक्तम्, 'मद्याजी मां नमस्कुरु', 'कृष्णप्रणामी न पुनर्भवाये'ति स्मृतिपुराणवाक्यैश्च नमनमेव कर्तव्यत्वेन निरूपितम्, नौमीति नुतेरुत्कृष्टनिष्ठस्वापकृष्टत्वबोधानुकूलव्यापारार्थकत्वादिति स्वस्मिन् हरिदासत्वं ज्ञापितम् । एतेन नमनं दासधर्म इति सूचितम् । अत एवावरणभङ्गे 'अत्यन्तपतितेष्वपि दैन्यादेव प्रसादोक्तेर्मानादिना तिरोभावोक्तेश्च दैन्यस्यावश्यकत्वात्तत्प्रयुक्तं नमनमेव कर्तव्यत्वेनावशिष्यत' इतिश्रीपीताम्बरचरणैरगादि । 'नहि साधनसम्पत्त्या हरिस्तुष्यति कस्यचित् । भक्तानां दैन्यमेवैकं हरितोषणसाधन'मिति श्रीमदाचार्यचरणैः सुबोधिन्यामुक्तम् । नौमीत्युत्तमपुरुषप्रयोगेणैकवचनेन च स्वस्मिन्नुत्तमत्वं मुख्यत्वं च ध्वनितम् । उत्तमत्वं विना 'नादेवो देवमर्चये'दित्यादिवाक्यैर्नाधिकारोऽर्चने । अत एव ब्रह्मसम्बन्धादिना देहजीवनिष्ठपञ्चदोषनिवृत्त्यानुत्तमत्वेन भगवत्सेवाधिकारो भवति जीवस्येति ध्वनितम् । श्रीगोपालः सदानन्दः परमकाष्ठापन्नः श्रीयशोदोत्सङ्गलालितो नान्यः । ननु श्रीगोपालपदेनाखिलगुणार्णवत्वेन विशेषाणां प्राकृतत्वाच्छ्रीविग्रहः प्राकृतधर्मविशिष्ट इति चेत्तत्राहुः प्राकृतमात्रेत्यादि । प्रकृतिसहकृतेन्द्रियजन्यज्ञानविषयत्वं प्राकृतत्वम् । प्राकृतमात्रा येऽशेषधर्मास्तै रहितमित्यर्थः । अत्र

१ तरङ्गिणीपूर इति पाठः ।

वेदैकसमधिगम्य स्वाभाविकसर्वधर्मसहितम् ॥ १ ॥

मात्रपदमवधारणे । 'मात्र कात्स्न्र्येऽवधारणे' इत्यमर । ननु प्राकृतसम्बन्धशून्यमेव ब्रह्मेति प्राप्तिपूर्वकस्य निषेधात् कथ तेषा निषेध इति चेन्न । भूमावग्निश्चेतव्यो, नान्तरिक्षे, न दिवी तिवन्निषेधस्य नित्यानुवादरूपत्वात् । प्राकृतमात्रशून्यत्वोक्त्या 'अष्टादशमहादोषै रहिता भगवत्त नु'रिति वैष्णवतन्त्रोक्तमपि क्रोडीकृतम् । ते च विष्णुयामले 'मोहस्तन्द्रा भ्रमो रूक्षरसता काम उल्बण । लोलता मदमात्सर्ये हिंसा खेदपरिश्रमौ । असत्यक्रोध आकाङ्क्षा आशङ्का विश्वविभ्रम । विषमत्व परापेक्षा दोषा अष्टादशोरिता' इति । 'अज्ञत्व पारवश्यत्व देहत्यागादिक तथा । असुराणा विमोहाय दोषा विष्णोर्न कर्हिचि'दिति पुराणवाक्यात् सर्वदोषशून्यम् । अत्र प्राकृतधर्मात्यन्ताभाव एव । अत एव श्रीमदाराध्यचरणैर्मात्राशेषपदे उक्ते । 'आनन्दमात्रकरपादमुखोदरादि', 'आनन्दमयोऽभ्यासात्', 'तमेक सच्चिदानन्दविग्रह वृन्दावनसुरभूरुहतलासीनम्', 'नन्दव्रजजनानन्दी सच्चिदानन्दविग्रह' इतिश्रुतिसूत्रपुराणवाक्यैरिति दिक् । ननु प्राकृतगुणशून्य ब्रह्म प्रत्यक्षानुमानोपमानशाब्दप्रमाणैर्न ज्ञातु शक्यते । तथाच विद्वन्मण्डने जीवस्याणुत्वप्रतिपादने चतुर्भि प्रमाणैरगम्यत्व जीवब्रह्मणोरुपपाद्य किन्तु श्रुत्येकसमधिगम्यमित्युक्त श्रीमत्प्रभुचरणै, तथैवातीन्द्रियत्वेन प्रत्यक्षादिप्रमाणाविषयतया ब्रह्मण शास्त्रैकप्रमाणत्वादिति 'शास्त्रयोनित्वा'दितिसूत्रे श्रीरामानुजभाष्ये श्रीमाध्वभाष्येपि वेदैकगम्यत्व निरूपितमिति वेदेनैव पर ब्रह्मज्ञान भवतीत्यभिप्रेत्याहु वेदैकसमधिगम्यमिति । अत एव तत्त्वदीपे 'अलौकिक तत्प्रमेय न युक्त्या प्रतिपद्यते । तपसा वेदयुक्त्या च प्रसादात्परमात्मन' इतिश्रीमदाचार्यचरणैरुक्तम् । किञ्च, प्रत्यक्षादीना लौकिकत्वादलौकिकेन वेदेनैव तत्स्वरूपज्ञानसम्भवादित्यर्थ । ननु 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे'ति श्रुत्या वागविषयत्वेन कथ वेदैकसमधिगम्यमिति चेत्, उच्यते । 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्द ब्रह्मणो विद्वान्न बिभेति कुतश्चने'ति सम्पूर्णा श्रुति । अर्थस्तु पुरुषोत्तमानन्दानुभवे सत्यनुभवैकगम्योऽयमानन्दो न मनोवाग्विषय इति ज्ञात्वा लोकवेदेभ्योपि न बिभेतीति श्रीमदाचार्यचरणैरणुभाष्ये आनन्दमयाधिकरणे निरूपित । तथा टिप्पण्यामपि फलप्रकरणे 'श्रुतयो यथ'त्यस्य व्याख्यानेऽस्या अर्थ उदित, अत्र पूर्वार्धमानन्दस्य विशेषणम् । तथा चैतस्मात् पूर्वं 'रसो वै स, रसꣳह्येवाय लब्ध्वानन्दी भवती'त्यादिना यद्भगवत्स्वरूप निरूपित तत् सर्वात्मभावलभ्यम्, न त्वन्यथेति ज्ञापयितु सर्वात्मभावस्य निर्वचनमशक्यमिति तद्बोधक धर्ममाहोत्तरार्धेन । एतादृशमानन्द यो विद्वान् ज्ञातवान् लब्धवान् वा स कुतश्चन लोकवेदात्, किं बहुना, परीक्षार्थं साक्षाद्भगवदुक्तो द्वन्नान्मानादिदशाया तदतिक्रमान्पि न बिभेतीति श्रीमत्प्रभुचरणैर्विस्तरस्तु तत्रैव निरूपित ते । यदत्र ब्रह्मणो वागविषयत्वमनया प्रतिपादित स्यात्, तर्हि श्रुतीना वाग्रूपत्वात् 'त त्वौपनिषद पुरुष पृच्छामि', 'नावेदविन् मनुते त बृहन्तम्', 'औपनिषद पुरुष श्रोतव्य श्रुतिवा-

वन्दे श्रीवल्लभाचार्यान् स्नेहमार्गाब्जभास्करान् ।
निजान्तरङ्गभक्तेभ्यः स्वस्वरूपप्रदर्शकान् ॥ २ ॥

क्येभ्य', 'वेदैश्च सर्वैरहमेव वेद्य' इत्यादिश्रुतिस्मृतिभ्य श्रुतिभिरेव परब्रह्मणो ज्ञान सम्भव तीति निश्चित विरुध्येत । किञ्च, वाङ्मनसयोर्ब्रह्मणि प्रवृत्त्यभावेन निष्प्रमाणक ब्रह्मेत्युच्यते इति भ्रान्तिजल्पित 'यतो वाचो निवर्तन्त' इति तस्मादुक्त एवार्थ । ननु परमानन्दालौकिकानेकधर्मा आगन्तुका इति चेत्, तत्राहु स्वाभाविकसर्वधर्मसहितमिति । 'न तस्य कार्य करण च विद्यते', 'न तत्समश्चाभ्यधिकश्च दृश्यते', 'पराऽस्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया चे'ति श्रुते । एतेन सर्वेषा ब्रह्मधर्माणा ब्रह्मत्वमेवेति महता प्रबन्धेन विद्वन्मण्डने श्रीमत्प्रभुचरणैर्निरूपितम् ॥ १ ॥

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्था प्रकाशन्ते महात्मन' इति वाक्याच्छ्रीमत्पुरुषोत्तमवत् श्रीमदाचार्येभ्यो जीवैर्नमन कर्तव्यमित्यभिप्रेत्याहु वन्दे इति । श्रीवल्लभपदे षष्ठीतत्पुरुष । अतएव 'त्वा श्रीश्रीवल्लभेमे निखिलबुधजना गोकुलेश भजन्त' इत्युक्त श्रीमत्प्रभुचरणै । एतेन श्रीमहालक्ष्मीविशिष्टवन्दन फलितम् । पुरुषोत्तमत्व च ध्वनितम् । 'इन्दिराया नलिनीमन्दिराया' इति श्रुतौ श्रीवल्लभत्व स्पष्टमुदितम् । स्नेहमार्गप्रतिबन्धकान्धकारनिवारणार्थमवतार इत्यभिप्रेत्याहु स्नेहमार्गेत्यादि । यद्यपि 'तत प्रेम तथाऽऽसक्ति र्व्यसन च यदा भवेत् । स्नेहाद्रागविनाश स्यादासक्त्या स्याद्गृहारुचि । यदा स्यात् व्यसन कृष्णे कृतार्थ स्यात्तदैव हि' इति भक्तिवर्धिन्या व्यसनस्य परमावधिभूतत्वमुक्तम्[1], तथापि स्नेहवृद्धिपराकाष्ठा व्यसनमिति स्नेहान्नातिरिच्यते । तद्व्याख्यातृभि श्रीवल्लभचरणै पूर्व स्नेहाङ्कुरो भवति, तदनन्तर प्रौढभावे सति आसक्तिर्भवति, तत प्रौढभाव सति व्यसन भवतीति स्नेहादित्यत्र अल्पस्नेहाङ्कुरोत्पत्त्या भगवदतिरिक्तरागो न भवति, तदनन्तर यदाऽऽसक्तिर्भवति, तदा प्रौढभावो भवति, तस्यैव स्नेहपराकाष्ठामाहु यदा स्यादिति । यदा यस्मिन् काले कृष्णे फलात्मके व्यसन स्यात्, तद्दर्शनादिव्यतिरेकेण तत्सम्बन्धव्यतिरेकेण वा स्थातुमशक्तिर्व्यसनमिति व्याख्यातम्, अत एव 'माहात्म्यज्ञानपूर्वस्तु सुदृढ सर्वतोधिक । स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथे'ति, 'सा परानुरक्तिरीश्वर' इति नारदपञ्चरात्रशाण्डिल्यसूत्रोक्त सगच्छत । 'व्रजपतिरतिर्नेति निखिलैर्गुणैरन्य को वा विलसति विना वल्लभवर'मितिपद्ये श्रीमत्कृष्णचन्द्ररति श्रीमदाचार्येष्वेवेति निरूपित श्रीमत्प्रभुभि । 'य सेवते हरिं प्रेम्णा श्रवणादिभिरुत्तम' इति तत्त्वदीप श्रीमदाचार्यचरणैरप्युक्तमितिदिक् । श्रीमदाचार्यकृपामन्तरा तथा स्वरूपदर्शनमन्तरङ्गभक्तानामपि दुर्लभम्, किन्तु कृपयैव स्वस्वरूप तान् प्रदर्शयन्तीत्यभिप्रेत्याहु निजान्तरङ्गभक्तेभ्य इति । स्वीया परमकृपापात्रभूता श्रीदामोदरदासादय परमान्तरङ्गभक्ता

[1] 'परमावधि मूलत्व' इति पाठ ।

श्रीविट्ठलान् प्रभून् नौमि श्रुत्यर्थप्रतिभाकरान् ।
भक्तिवल्लीजलधरान् स्फुरत्कीर्तिकरान् परान् ॥ २ ॥

स्तेभ्य स्वमखिलानन्दमय सकलकल्याणनिदान ‘सत्य विज्ञानमानन्द ब्रह्म’, ‘आनन्दमात्रकर पादमुखोदरादी’त्यादिश्रुतिभिर्वक्ष्यमाणाभिश्च प्रतिपादित ‘तत्सारभूतरासस्त्रीभावपूरितविग्रह’ इति वा तस्य प्रदर्शकानित्यर्थ । प्रदर्शकत्वोक्त्या जीवकृतिराहित्य सूचितम् । ‘यमेवैष वृणुते तेन लभ्य’ इति श्रुते । एतेन श्रीमदाचार्यचरणसेवका द्विविधा अन्तरङ्गा बहिरङ्गाश्चेति सूचितम् । श्रीमदाचार्यचरणस्मरणानुवशात प्रादुर्भूतातिदु सहतापाविर्भावेन शरीरधारणमसहमानानामुपरि कृपारसभराम्बुनिधय श्रीमदाचार्यचरणा निजान्तरङ्गभक्तवत्स्वस्वरूप प्रकाशयन्ति । श्रीमदाचार्याणा प्राकट्य देवाना जीवानामासुरभावनिवृत्तिपूर्वकस्वस्वरूपप्रदर्शनेनोद्धारार्थमितिभाव ॥२॥

श्रुत्यधिष्ठातृणा नमने श्रुत्यर्थ स्फुरतीत्यभिप्रत्याहु श्रीविट्ठलानिति । श्रीविट्ठलपदनिरुक्तिस्त्वग्रे व्युत्पादयिष्यते । प्रभुपदेन स्वाभीष्टफलप्रदानसमर्थत्व सूचितम् । ततश्च तेषा नमनेनास्माकमिष्टसिद्धिर्निष्प्रत्यूहेति ध्वनितम् । श्रुत्यर्थप्रतिभाकरत्वोक्त्या तेषा नमनेन सकलश्रुत्यर्थ स्वाभीष्टोऽनायासेन प्रकटो भवतीति बोधितम् । विमतमतस्थे स्वस्वगीत्यार्थकल्पनवत् स्वीयानामपि तादृशार्थाभावपूर्वक याथार्थ्येन स्फुरण भवति येषा कृपयेति । ‘वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाह’मिति गीताया वेदवेत्तृत्व भगवत श्रीविट्ठलस्येति फलितम् । ‘कृष्णवाक्यानुसारेण शास्त्रार्थं ये वदन्ति हि । ते हि भागवता प्रोक्ता शुद्धास्ते ब्रह्मवादिन’ इति तत्त्वदीपे श्रीमदाचार्यचरणैर्गदितम् । एतद्विवृतौ शास्त्रार्थं वेदार्थमित्युक्तम् । वेदयाथार्थ्यप्रकाशकत्वेन भक्तिमार्गस्थापनार्थमेवावतार इत्यभिप्रेत्य विशिंषन्ति भक्तिवल्लीजलधरानिति । यथा वल्ली जलधराश्रयेण वर्धते तथा श्रीमत्प्रभुजलधराश्रयवता भक्तिवल्लीसमृद्धिर्निष्प्रत्यूहा । भक्तिवल्लीवर्धकत्वमूलक प्रभुषु जलधराश्रयत्वारोप प्रभुजलधरवर्षापकत्वमूलको भक्तौ वल्लीत्वारोप इति परम्परितरूपकालङ्कार इति । मायावादादिमतखण्डनादिकसम्पादनमाचार्यवर्यै कृतम्, अत श्रीमत्प्रभूणामवतार साक्षात्पुष्टिभजनरूपभक्तिप्रथनार्थमेव । तथा चोक्तम्, ‘श्रीमत्पुरुषोत्तमो विचारयामास, अहो मया साक्षात् स्वानन्दमय स्वास्य प्रादुर्भूतमपि लोके ब्रह्मवाद एव सतन सहृदयदृढ जातम्, नतु पुष्टिभक्तेराधिक्यम्, इति विचार्य श्रीकृष्णशरणैकरतिनामक सेवन प्रैव सकलपुरुषार्थफल भगवदनुग्रहैकलभ्य स्वास्य सेवनस्य रैकनयत्वेन लोके भक्तिमार्गप्रथनाय ब्रह्माण्डपुराणोक्तभगवद्वाक्यमाकल्याय ‘श्रीपूर्णपुरुषोत्तम प्रादुर्बभूवे’ति श्रीदेवकीनन्दनैश्वरिचिन्तामणौ । ब्रह्माण्डपुराणेपि भक्तिमार्गप्रथनार्थमेव प्रादुर्भावकारणमोक्त । तद्वचासि स्फुटीभविष्यन्त्यग्रे । स्फुरत्कीर्तिकरानिति । ‘त्रिजगद्व्यापिमत्कीर्तिधवलीकृतमेचक’ इति नामरत्ने । कीर्तिकरत्व च भक्तक्लेशापहत्वेनाचिन्त्यमहिमत्वेन श्रीमत्पूर्णपुरुषोत्तमानुग्रहलभ्यत्वेन महापति

१ कृपामराम्बुनिधय इति पाठ । २ विमतस्थे इति पाठ ।

वन्दे श्रीयदुनाथांश्च विप्रयोगानुभावकान् ।

तपावनत्वेनानेकमरणिक्लिष्टजीवानन्ददातृत्वेन सकलविमतान्धकारनाशकत्वेनाखिलपण्डितमण्डली-मुकुटत्वेन सकलसमाश्रयणीयत्वसर्वभ्रमनिरासकत्वाद्यनन्तकल्याणगुणगणत्वादिना धवलीकृतमेच-कत्वोक्त्याऽखिलनिजजनस्वान्तध्वान्तनिरासो ध्वन्यते । 'सर्वोद्धारप्रयत्नात्मा कृष्णः प्रादुर्बभूव हे'ति श्रीमदाचार्यचरणैरुक्तमिति श्रीकृष्णवत् सर्वोद्धारकत्वं श्रीमत्प्रभुषु । परत्वोक्त्या परब्रह्मत्वं निरूपितमित्यग्रे विस्तरः ॥ ३ ॥

स्वस्य श्रीमद्यदुनाथकुलोद्भवत्वेन तेषां साक्षाद्भगवद्वियोगासहिष्णुत्वेन भगवत्संयोगरससागा-द्यनुभवतया वियोगरसेऽतितापानुभवत्वेन 'अङ्गादङ्गादि'ति वक्ष्यमाणश्रुतिरीत्या 'स्वानुरूपसुत-प्रसूरि'ति वाक्याच्च वक्ष्यमाणश्रुतिभिश्च पूर्णपुरुषोत्तमत्वेन सकलनिजजनबुद्धिदत्वेनान्यत्कर्तुमस-मर्थतया तान्नमन्ति वन्दे इति । श्रीयदुनाथत्वोक्त्या भगवद्भजनैकनिष्ठधर्मवतां रक्षणकर्तृत्वं सुचितम् । विप्रयोगेति । अनेन विप्रयोगानुभववतामेव साक्षात् पुष्टिपुरुषोत्तमसंयोगरसपुष्टिरिति ध्वनितम् । यथोक्तं 'संयोगो विप्रयोगेन विना पुष्टिं न चाश्नुते । काषायिते हि वस्त्रादौ भूयान् रागोऽभिजायत' इति । अत एव श्रीमत्प्रभुचरणैः'विरहानुभवैकार्थसर्वत्यागोपदेशकः' इति नाम श्रीमदाचार्याणामुदितम् । तद्विवृतौ श्रीगोकुलनाथचरणैः 'यद्यपि रासलीलाप्रदर्शकग्रन्थेनैवैतत्प्रति-पादितसंयोगविप्रयोगरसानुभवस्य श्रोतृणां तदीयानां तद्रसभावनया रसानुभवः सिद्ध्यति, तथापि केवलो विप्रयोगभावो भावान्तररहितः स्वतन्त्रतया तत्तद्दशया विकलत्वम्, अस्वास्थ्यम्, मूर्च्छा, पुनर्जागरणं तादात्म्येन यत्किञ्चिन्नस्वास्थ्यं प्रलापाद्यवस्थाभेदेनानुभवसिद्ध्यर्थं कथनन्व-ज्ञापनायोक्तम्, 'विरहानुभवैकार्थसर्वत्यागोपदेशकः' इति निरूपितम् । एतद्रसस्योदाहरणादिकं गीतगोविन्द-श्रीभागवतादौ । तत्र भगवद्रूपतायां उदाहरणं यथा 'मधुरिपुरहमिति भावनशीले'ति । 'कृष्णोऽहं पश्यत गतिं ललितामिति तन्मना' इति च । तथामरुशतके 'प्रासादे सा, दिशि दिशि च सा, पृष्ठतः सा, पुरः सा, पर्यङ्के सा, पथि पथि च सा, तद्वियोगातुरस्य । हंहो चेतः प्रकृतिरपरा नास्ति ते कापि सा सा, सा सा सा सा जगति सकले कोऽयमद्वैतवादः' इत्युक्तम् । 'स एवाव-स्ता'दित्यादिश्रुतेः । अस्मिन् रसे भगवानेव भातीति महत्कौतुकम् । यथा 'तन्मनस्का'इति-श्रीभागवते । अतएव 'गोपिकाविरहाविष्ट' इति प्रभूणां नाम । किञ्च । भगवन्तमन्तरा क्षणमपि स्थातुं न शक्यमतो भगवदीयानां सदैव श्रीकृष्णानुभवो यथा श्रीमद्व्रजसुन्दरीषु । 'क्षणं युगशतमिव यासां येन विनाऽभवदि'ति । 'यथाऽधनो लब्धधने विनष्टे तच्चिन्तयार्तोऽनिभृतो न वेदे'ति श्रीमद्भागवते । जीवे एतद्भावनिरोधादेव भगवत्प्राप्तिरिति श्रीमदाचार्यहृदयेनद्भावस्फू-र्तिरिति सदैव निरोधिभिर्भगवदीयैर्विप्रयोगानुभवः कर्तव्यः । तथाच संन्यासप्रकरणे 'विरहानुभवार्थं तु परित्यागः प्रशस्यते' इति । यद्यपि संयोगपूर्वकत्वादस्य जीवानां तदभावात् कथं रसानुभव-

---

१ न हि कार्यीह इति पाठ. ।

यद्वन्दनेन मन्दोपि लभेत् बुद्धिमतां पदम् ॥ ४ ॥
श्रुत्यर्थः क्वातिगम्भीरः क्वाहं मन्दमतिस्ततः ।
विदुषामुपहास्यत्वं यास्यामि पिशुनात्मनाम् ॥ ५ ॥
तथापि श्रीमदाचार्यकृपया मयि बोधितम् ।

स्तथापि पुष्टिमार्गीयभगवदीयानां भगवत्स्वरूपस्यानश्यकत्वात् तत्र भावपूर्वकश्रीमुखदर्शनतत्तदङ्गस्पर्शजनितसङ्गाभिलाषाया अतिप्रचुरत्वेन तच्छान्त्यजननात् सङ्गमपूर्वकत्वमस्य । ननु दुःखस्वरूपत्वात् कथं श्रैष्ठ्यमितिचेत्, सत्यम्, दुःखरूपत्वादेवोत्कृष्टत्वम् । श्रीकृष्णस्य रसरूपत्व 'रसो वै सः' इति श्रुत्या प्रतिपादितत्वाद्रसस्य संयोगविप्रयोगात्मकत्वेन द्विरूपत्वाद्यथा क्रोधकृतक्षतताडनकोपादीनां दुःखात्मकत्वम्, तथा क्षतत्वादिसाजात्येपि संयोगरसात्मकत्वेन परमानन्दरूपत्वम्, तथा विप्रयोगरसजनितवैकृव्यादीनामपि विप्रयोगरसात्मकत्वेन शोकादिजन्यवैकल्यवत्प्रतीयमानत्वेपि रसरूपत्वान्न तेषां दुःखरूपत्वम् । यथानन्दादप्यश्रूणि, शोकादप्यश्रूणि । नहि तत्राश्रुत्वसाजात्यादुभयोरेकफलत्वं सेत्स्यति, तथात्रापि तद्धर्मसाम्येपि न तद्रूपत्वम् । अतएव 'यच्च दुःखं यशोदाया नन्दादीनां च गोकुले । गोपिकानां च यद्दुःखं तद्दुःखं स्यान्मम क्वचि'दिति **निरोधलक्षणे** श्रीमदाचार्यचरणैरुक्तम् । 'भूमिर्माता तथा चान्ये दुःखभाजो हरिप्रिया' इति **सुबोधिन्यां** दुःखभाक्षु हरिप्रियात्वमुदितमिति मञ्जुलमखिलम् । नमनफलमाहुः यदिति । शास्त्रार्थग्रहणासमर्थो **मन्दः** । सोपि **बुद्धिमतां पदं लभेदिति** सम्बन्धः । भारती भगवत्कृपयैवेति भावः । यद्वा । **मन्दो** भगवद्भावमन्दोपि **बुद्धिमतां** सूरीणां पदं प्राप्यस्थानं **लभेत्** । यद्वा पदं भगवद्व्यसनरूपं वस्तु लभेदित्यर्थः । सूरित्वं च शब्दब्रह्मपरब्रह्मवित्त्वम् । परब्रह्मज्ञानं भक्त्यैवेति 'भक्त्या मामभिजानाति', 'भक्त्याहमेकया ग्राह्यः' इति वाक्याभ्यां बुद्धिमत्पदेन भक्ता उच्यन्ते ॥ ४ ॥

दैन्यादिनैव भगवत्प्रसादेऽभिमतयाथार्थ्यवेदार्थज्ञानमित्यभिप्रेत्याहुः **श्रुत्यर्थ** इति । गम्भीरत्वोक्त्या समुद्रता व्यज्यते । तेन स्वयुक्त्या प्रतिपादनमशक्यमिति बोधितम् । तथा च 'नहि स्वबुद्ध्या वेदार्थं परिकल्प्य तदर्थविचारं कर्तुं शक्यः' इत्युक्तं श्रीमदाचार्यैरणुभाष्ये । मन्दमतित्वोक्त्या स्वस्मिन् दैन्यप्रकटनेनानुकम्प्यत्वं ध्वनितम् । **पिशुनात्मनां विदुषामुपहास्यत्वं** यास्यामीत्यनेन पूर्वोक्तलक्षणलक्षितविद्वांसो मन्दमतिषु कृपां कुर्वन्तीति व्यज्यते ॥ ५ ॥

'अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते । तपसा वेदयुक्त्या तु प्रसादात्परमात्मनः' इति श्रीमदाचार्योक्तवाक्यात् स्वयुक्त्या वेदार्थनिर्वचनस्याशक्यत्वात् 'निःश्वसितमस्य वेदाः' इति श्रुतेः श्रुतीनां भगवद्वाक्यरूपत्वादलौकिकाग्नेश्च तदधिष्ठातृत्वाच्छ्रीमदाचार्याणां चालौकिकाग्निरूपत्वाच्छ्रुतीनां तदेकपरत्वात्तत्तात्पर्यस्य तयैव ज्ञापनाच्छ्रीमदाचार्योक्तार्थस्यैव वरीयस्त्वम्, अतः श्रीमदाचार्यकृपया बोधितं मयोच्यते, न तु स्वबुद्धिकल्पितमित्याहुः तथापीत्यादि । यद्यपि सर्वथा स्वशक्त्याऽशक्यत्वम्, तथापि श्रीमदाचार्यकृपया बोधितं तथैव कृतम् । मे इति

कृतं श्रुतिरहस्यं मे विद्वद्भिर्दृश्यतां मुदा ॥ ६ ॥

अथ श्रीवल्लभाचार्या रूपाष्टकसमन्विताः ।

सम्बन्धसामान्ये षष्ठी, मयेत्यर्थः । मया विरचितं श्रुतिरहस्यं पूर्वोक्तलक्षणलक्षितविद्वद्भिर्दृश्यतामित्यर्थः । श्रुतिरहस्यमित्युक्त्या तथा रहस्यपदार्थस्यान्यस्य ज्ञानं संभवति, किन्तु रहस्यविद एव तद्बोधनेन वा ज्ञानम्, एवं श्रीमदाचार्यकृपया बोधितस्य मम ज्ञानमिति मयोच्यत इति सूचितम् । किञ्च, रहस्यपदेन विजातीयाग्रे प्रकाशनमयोग्यम् । 'विजातीयजनाक्रान्ते गोपनीयं स्वयोनिवत्', 'गोपयेन्मातृजारव'दित्यादिवाक्यात् । स्वबुद्ध्यारूढत्वात् क्रियमाणस्यापि करिष्यतीत्युक्तम् । श्रीमदाचार्याणां वाक्पतित्वेन तदुक्तार्थस्यैव याथार्थ्यादन्योक्तस्य श्रुतिहार्दज्ञानाभावादिति श्रीमदाचार्यकृपयेत्यादिना सूचितम् । तथाच श्रुतिः 'उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् । उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः' । अयमर्थोऽस्याः । त्वशब्दोऽन्यवाची । उतशब्दोऽपिशब्दस्यार्थे । स च भिन्नक्रमः । तथाच । शब्दोऽपि खलु शब्दस्वरूपमुपलभमानो याथार्थ्यापरिज्ञानान्न पश्यति । अपि खलु एकः शृण्वन् न शृणोति सरस्वतीहृदयज्ञत्वाभावात् । एनां वाचमित्यर्थः । अनभिमतार्थज्ञमाहार्धम् । अपि एकस्मै जायेव पत्य इति दृष्टान्तानुरोधेन स्वप्रियाय स्वपतये श्रीवल्लभाचार्याय 'वाक्पतिर्विबुधेश्वर' इति वाक्यात् । 'वागीशाने भगवति व्यासे व्यभ्रनभःप्रभे । गते मतिमतां श्रेष्ठे समाश्वास्य युधिष्ठिर'मिति द्रोणपर्वणि व्यासवाक्याद्वाक्पतित्वं 'तव स्तन्यं मन्ये' इतिशंकराचार्यवत् स्वस्वरूपं द्योतयितुम्, 'अर्थं तस्य निर्वचितुं नहि[1] विभुर्वैश्वानराद्वाक्पतेरन्यस्तत्र विधाय मानुषतनुं मां व्यासवच्छ्रीपति' रित्यात्मानुभवकथनाच्च । 'वाक्पतिर्वल्लभः कृष्णमुखं प्रादुर्भविष्यती'ति भविष्यवाक्याच्च 'अग्निर्मुख'मिति श्रुतेः श्रीमत्पुरुषोत्तममुखस्वरूपतया 'वाचां वह्नेर्मुखं क्षेत्र'मिति श्रीभागवतवाक्याच्च वाक्पतित्वं स्पष्टमेव । 'हुताशनावतारस्तु वल्लभो लक्ष्मणात्मज' इति संमोहनतन्त्रवाक्यात् । तन्वं विसस्रे स्वात्मानं विवृणुते स्वात्मानं प्रकाशयति । अत्र दृष्टान्तः 'जायेव पत्ये कामयमाना सुवासा ऋतुकाले शोभनवासाः स्वात्मानं विवृणुते' स्वात्मानं प्रकाशयतीत्यर्थः । एतच्छ्रुत्यर्थमादायैव 'न ह्यन्यो वागधीशाच्छ्रुतिगणवचसां भावमाज्ञातुमीष्टे यस्मात्साध्वी स्वभावं प्रकटयति वधूरग्रतः पत्युरेव । तस्माच्छ्रीवल्लभाख्य त्वदुदितवचनादन्यथा रूपयन्ति भ्रान्ता ये ते निसर्गत्रिदशरिपुतया केवलान्धन्तमोगा' इति श्रीमत्प्रभुचरणैरुक्तम् ॥ ६ ॥

अथ श्रीमदाचार्याणां साक्षात्पूर्णपुरुषोत्तमत्वेनाष्टविधैश्वर्यविशिष्टवेदोदितरूपनिरूपणं प्रतिजानते । अथेत्यादि । रूपाष्टकं तु षडैश्वर्यरूपधर्मसंयोगवियोगद्विविधधर्मिरूपतया चाष्टविधम् । रामानुजानां मते तु हेयप्रत्यनीकाशेषकल्याण्यां षड्गुणैश्चाष्टविधं रूपमिति । अथेत्यादिना श्रीमदा-

---

१ 'नहि वरो वैश्वानराद्' इति पाठः ।

निगमोदिततद्रूपं वर्णयामि यथामति ॥ ७ ॥

ननु श्रीमदाचार्याणां निगमप्रतिपाद्यत्वेनाश्रवणात् कथं निगमोदिततद्रूपत्वमुच्यत इतिचेत् । न । अन्तर्मुखानां दैवानां नेयं शङ्का, किन्त्वासुराणां बहिर्मुखानाम् ।

चार्यो विषयः । वर्णयामीत्यनेन प्रतिपाद्यप्रतिपादकभावः सम्बन्धः सूचितः । निगमोदितश्रीमदाचार्यस्वरूपज्ञानं च प्रयोजनम्, तज्जिज्ञासुरधिकारीत्यनुबन्धचतुष्टयमत्र सिद्धम् । पूर्णपुरुषोत्तमवच्छ्रीमदाचार्याणामपि निगमप्रतिपाद्यत्वमिति ज्ञानेन तच्छरणमवश्यं गन्तव्यम् । 'आचार्यवान् पुरुषो वेद' 'आचार्यवान्नरो भक्त्या जीवन्मुक्तित्वमश्नुते' इति श्रुतिपञ्चरात्रवचनाभ्यामाचार्यवत एव साफल्यं जन्मनः । आचार्यपदनिरुक्तिस्तु निरुक्तायुदिता । 'कस्मादाचार्य, आचारं ग्राहयति, आचिनोत्यर्थान्, आचिनोति बुद्धिमिति वे'ति । तत्र नारदपञ्चरात्राद्युक्तमाचारं ग्राहयति, याथार्थ्यवेदार्थमाचिनोति, एतेन वेदार्थकृत्त्वं बोधितम् । 'मन्त्रव्याख्याकृदाचार्य' इत्यमरः । बुद्धिचयनं तु विवादादिसमये प्रतिपक्षिभूतवादिबुद्धिहरणरूपमित्यर्थः ॥ ७ ॥

अन्तर्मुखानामिति । अन्तरङ्गभक्तानामित्यर्थः । तेषां तु श्रीमदाचार्यैः स्वस्वरूपप्रदर्शनेन निगमोदितस्वरूपज्ञानाच्छङ्काभाव इत्यर्थः । 'विप्रं विप्रासोऽवसे देवं मर्तास ऊतये । अग्निं गीर्भिर्हवामहे' इति श्रुतेः । 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' इति श्रुतेश्च । अर्थं तत्राग्रेऽनयोर्निरूपयिष्यामः । अन्तरङ्गभक्तास्तु श्रीमदाचार्यरूपमन्येभ्योऽपि प्रकाशयन्तीति तेषां तु किमु वाच्यमित्यर्थः । तथा च श्रुतिः 'तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पद'मिति । अर्थस्तु श्रीमत्प्रभुचरणैर्निगदितो विद्वन्मण्डने श्रीगोकुलपरत्वेन । अत्र तु श्रीमदाचार्यपरत्वेनार्थः प्रदर्श्यते । 'सत्यसङ्कल्पितो विष्णुर्नान्यथा तु करिष्यती'त्यन्तःकरणप्रबोधविवृतौ श्रीगोकुलनाथचरणैर्विष्णुपदेन पूर्णपुरुषोत्तमो गृहीतः । एवं च विष्णोः पूर्णपुरुषोत्तमस्य यत्परमं पदं अत्युत्कृष्टमतिप्रियं वस्तु श्रीवल्लभाचार्याख्यम् । 'पदं व्यवसितत्राणस्थानलक्ष्म्याङ्घ्रिवस्तुष्वि'त्यमरः । 'वदति वल्लभः श्रीहरे'रिति श्रीयमुनाष्टकसमाप्तौ श्रीहरिवल्लभत्वं स्वस्मिन् स्वेनैव प्रतिपादितम् । 'इति श्रीकृष्णदासेन वल्लभेन विनिश्चित'मिति सन्न्यासवरणविवृतौ वल्लभेन श्रीकृष्णवल्लभेनेत्यर्थ उक्तिः श्रीवल्लभचरणैः । 'प्रिया गोपीभर्तुः स्फुरतु सततं वल्लभ इति प्रथा चास्माकं हृदि सुभगमूर्तिः सकरुणे'ति श्रीमत्प्रभुचरणैरुक्तम् । ततश्च श्रीकृष्णवल्लभत्वं श्रीमदाचार्येषु स्पष्टमेव । यद्वा 'नमामि हृदये शेषे लीलाक्षीराब्धिशायिनम् । लक्ष्मीसहस्रलीलाभिः सेव्यमानं कलानिधिमि'ति श्रीगुसाँईनीराज्ञिया श्रीमत्पूर्णपुरुषोत्तमस्य स्थानं श्रीमदाचार्यस्वरूपं तत् विप्रासः मेधाविनः शब्दब्रह्मपरब्रह्मविदः श्रीमदाचार्याणां वेदोदितस्वरूपज्ञाः । ननु स्तोतृणामेव श्रीमदाचार्यस्वरूपज्ञानमत आह विपन्यव इति । विविधस्तोतारः श्रीमदाचार्ययशोगानपराः स्तुत्यादिना स्वस्मिन् दैन्यप्रदर्शकाः 'भक्तानां दैन्यमेवैकं हरितोषणसाधनमि'ति वाक्यात् 'त्वद्यशोगानमकरन्दपादाम्भोजविस्र' इति वाक्यात् श्रीमदाचार्याः स्तोतृन् स्वस्वरूप

कलिकालध्वान्ताच्छादितबुद्धीनां तु वेदैरेव तद्रूपं न प्रकाश्यते, तेषामनधिकारात् । 'मामप्राप्यैवे'ति भगवता तेषामधमगतिरुक्तेः ।

अथ स्वाचार्यप्रादुर्भावप्रतिपादकनिगमः प्रदर्श्यते तैत्तिरीये आनन्दवल्ल्याम् । 'ब्रह्म-

---

प्रदर्शयन्तीति भावः । ननु 'अनन्यभक्तेषु ज्ञापिताशय' इति वाक्यादनन्यत्वमपेक्षितं भक्तेषु तत्राह, जागृवांसः श्रीमदाचार्यस्वरूपदर्शनगुणगानस्मरणानुभवादिषु जागरूकाः । एतेन श्रीमदाचार्यचरणस्मरणाद्यन्यविषये निद्रालुत्वं सूचितम् । यथाऽयं रात्रौ जागर्तीत्युक्त्या दिवा शयनं सूच्यते 'या निशा सर्वभूतानां तस्यां जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुने-रि'ति गीतायाम् । ते समिन्धते प्रकाशयन्तीत्यर्थः ॥

नन्वन्तरङ्गभक्तानां शङ्काभावादासुराणां तु वेदादिनापि स्वरूपज्ञानाभावाद्व्यर्थोऽयं प्रयत्न इति शङ्काव्युदासायाहुः किन्त्वित्यादि । आसुराणामिति । आसुरावेशेन बहिर्मुखतयाऽसुरसदृशानां देवानामित्यर्थः । अतएव 'नाविर्भूयाद्भवांश्चेदधिधरणिनलं भूतनाथोदितासन्मार्गध्वान्तान्धतुल्या निगमपथगतौ देवसर्गोऽपि जाता' इत्युक्तं प्रभुचरणैः । एतद्व्याख्यायामत्रान्धतुल्यत्वोक्त्या देवानां मुक्तियोग्यत्वेन श्रुत्युक्तमुक्तिमार्गज्ञानसंभवेऽप्यसच्छास्त्रध्वान्तप्रवेशेनाज्ञानादन्धतुल्यत्वम् । न तु स्वाभाविकान्धत्वमिति तुल्यपदप्रयोग इति वल्लभचरणाः । एवंचासुरावेशित्वाच्छ्रीमदाचार्यस्वरूपाज्ञानम्, दैविजीवत्वाच्छ्रीमदाचार्यस्वरूपनिद्रामोदय इति तेषां निगमप्रतिपादितश्रीमदाचार्यस्वरूपज्ञानार्थमयं यत्न इति भावः । सर्वथाऽऽसुराणां तु तत्स्वरूपाज्ञानमेवेत्याहुः कलिकालेत्यादि । 'प्राकृतानुकृतिव्याजमोहितासुरमानुष' इति वाक्यात् आसुराणां ज्ञानवत्त्वेऽपि 'ज्ञानिनामपि चेतांसी'ति वाक्यान्मोह एव । तेषां प्रवृत्तिस्त्वन्धपरम्परैव । 'अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः । जङ्घन्यमाना अपियन्ति मूढा अन्धेनैव नीयमाना यथान्धा' इतिश्रुतेः । तेषां फलमाहुः मामित्यादि । 'अन्धं तमः प्रविशन्ति सम्भूतिं य उपासत' इतिश्रुतेः । श्रीमदाचार्यप्रतिपादकनिगमप्रकरणप्रवृत्त्यर्थमवतरणमाहुः अथेति । ब्रह्मविदित्यादि । अक्षरब्रह्मवित् परं प्राप्नोतीत्यर्थः । अत्र परशब्दस्य ब्रह्मपरत्वे तद्वित्येव वदेत् । पूर्वं ब्रह्मोक्त्या यत्परमित्याह तेन श्रेष्ठाधिपरशब्देनोत्कर्षस्य सावधिकत्वान्मात्रिस्यात् । तस्मात्परं पुरुषोत्तमस्वरूपमेवात्राभिप्रेतमिति ज्ञायते । किञ्च, प्रतिवादिना तदाप्तिर्ज्ञानात्मिकैव वाच्या । तथा सति ब्रह्मप्राप्तो ब्रह्मप्राप्नोतीत्यर्थः स्यात्, स चासङ्गतः स्यात् । साध्यसाधनयोरभेदाहतिश्चेति श्रीमदाचार्यचरणैरणुभाष्ये निरूपितमित्यभिप्रेत्याहुः अक्षरब्रह्मज्ञानमित्यादि । क्षरोऽक्षरोऽक्षरातीतश्चेतित्रैविध्यं सिद्धान्ते । तथा च गीतासु 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति । अत्र तु लोके 'क्षरश्चाक्षर एव चे'ति पुरुषौ प्रथितौ, न श्रीमदाचार्यौ,

नाप्यत्रान्यतरोऽपि । स्त्रीप्रकृति केवलजडप्रकृतिश्च पुरुषत्वेनोभयनिर्देशात् । एतेनाव्यक्तपदवाच्याक्षरस्य स्त्रीरूपत्व परोक्तमपास्तम् । अव्यक्तोऽक्षर' इति गीतावाक्यविरोधाच्च । एवं चेत्यनेन स्वरूपत क्षरोऽक्षर एव चेति सूच्यते । क्षरत्व च भगवदिच्छया प्रकृतिससर्गोपाधिकृतमेव । अतो 'जायते म्रियत' इति प्रवाहो न वस्तुत । तदेतत् स्वय व्याचष्टे क्षरः सर्वाणि भूतानीत्यादि । ब्रह्मादिस्तम्बपर्यन्तानि व्यष्टिभूतानि जीवशब्दाभिलपनीयानि भगवत्सचिदशभूतानि चराचरत्वेन व्यपदिश्यमानानि । क्षर पुरुप । 'आब्रह्मभुवना'दितिवाक्यात् । अत्रैकत्वनिर्देशो व्यष्टीना समष्ट्यैक्याशयेन । अचित्ससर्गोपाधिना वेति केचित् । कूटस्थो मूलभूतसच्चिदानन्दात्मा भगवद्धामादिपदवाच्योऽपि स महदादि सृष्ट्वा कूटे भूतसमुदाये तिष्ठतीति वा, मूर्धन्यमणिरिव । 'अविनाशी वारेऽयमात्मा' 'आत्मा वारे द्रष्टव्य श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यौपनिषदज्ञाने साक्षात्कृतो योऽक्षर स पुरुष उच्यते । भगवद्धर्माणा श्रुतावुपदेशादधिदैवादिष्वन्तर्यामी भगवानेवेत्यर्थकात् । 'अन्तर्याम्यधिदैवादिषु तद्धर्माभिलापा'दित्यनेन साख्यमत निराकृत्योक्तन्यायेन जीवान्तर्यामीति प्राप्ते 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयत' इतिसूत्रमुक्तवान्सूत्रकार । एतदर्थस्तु । नेत्यनुवर्तते । शारीरश्च जीवो नान्तर्यामी, हि यत, उभयेऽपि काण्वा माध्यन्दिनाश्च एन 'विज्ञाने तिष्ठन्नि'त्यादिना प्रकारेणान्तर्यामिणो भेदेनैव जीवमधीयते । नि सदेहार्थमुभयग्रहणम् । 'यो विज्ञाने तिष्ठ'न्निति काण्वा । 'य आत्मनि तिष्ठ'न्निति माध्यन्दिना । विज्ञानात्मशब्दयो शरीरपरत्वेन तयोर्भेदस्य स्पष्टत्वादिति भाव । एतेन शारीरो जीव 'अन्तर्याम्यक्षर इति सिद्धम् । तथाचाक्षरस्याक्षरात्परत्वेन पुरुषोत्तमस्य च प्रतिपादिका श्रुति । 'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षु श्रोत्र तदपाणिपाद नित्य विभु सर्वगत सुसूक्ष्म तदव्यय परिपश्यन्ति धीरा' इत्युक्त्वा 'यथोर्णनाभि सृजते गृह्णते च यथा पृथिव्यामोषधय सभवन्ति । यथा सत पुरुषात्केशलोमानि तथाक्षरात्सभवन्तीह विश्व' मित्यक्षरस्वरूप निरूप्य 'अक्षरात्परत पर' इत्युक्तम् । क्षरात् परतोऽक्षरात् पर पुरुषोत्तम इत्यर्थ । अनेन परत्वोपपादनेन स्पष्ट पुरुषोत्तमस्वरूपमुदितम् । तेनाक्षरस्य ब्रह्मत्व तस्मात्परब्रह्मत्व पुरुषोत्तमस्येति । कि'ञ्चैतद्वै तदक्षर ब्राह्मणा अभिवदन्त्यस्थूलमनण्वमहस्व'मित्यादिना क्षरस्य ब्रह्मत्व श्रुतौ निरूपितम् । एतेन क्षराक्षरनिरूपणेन मतान्तर निरस्तम् । तदुक्तमाश्रयभूत मुख्यस्वरूप माह 'उत्तम पुरुषस्त्वन्य' इति । तुशब्द पूर्वतो भेद दर्शयति । एताभ्यामन्यो विलक्षणोऽमितमचिदानन्दात्मा पुरुषोत्तम निरस्तसमस्तविकृतिनिरव्यय ईश्वरोऽश्रुतैश्वर्या विभिन्नधर्माश्रय इति यावत् । स लोकत्रय गुणात्मकमाविश्यान्तर्यामिरूपो भूत्वा बिभर्ति, तत परमात्मेत्युदाहृत सर्वे । यद्वा । नन्वक्षरपरमपुरुषोत्तमयोरपि भगवत्त्वात्को विशेषस्तत्राह परमात्मेति । परमश्चासावात्मेति । गद्वाध्यात्माधिदैवतयो स्वरूपमिति भाव । तथा च क्षराणि प्रकृतिकार्याणि तत्सम्बन्धी क्षर । तदुत्कृष्टोऽक्षर तदुत्तम पुरुषोत्तम इत्यर्थ । एतदेवाष्टमाध्याये 'अव्यक्तात्

विदाप्नोति पर'मित्यत्राक्षरब्रह्मज्ञानं साधनं परब्रह्मज्ञानं फलं च निरूप्य, 'तदेषाभ्युक्ते'-त्यारभ्य तस्यैव व्याख्यानं कोशादिजगदुत्पत्तिपर्यन्तं निरूप्य, रसात्मकपुरुषोत्तमप्राप्ति-प्रस्तावे तत्साधनीभूतमाचार्यस्वरूपं निरूपयति । तत्र पूर्वमाचार्यप्रादुर्भावो न जातः अधुनैव जातस्तद्धेतुमपि । तथाहि । असद्वा इदमग्र आसीत् ततो वै सदजायत । तदा-त्मानꣳस्वयमकुरुत । तस्मात्तत्सुकृतमुच्यत इति । यद्वैतत्सुकृतम् । रसो वै सः, रसꣳ ह्येवायं लब्ध्वानन्दीभवति । अस्यार्थः । 'असद्वा इदमग्र आसी'दित्यत्र असत्पदं जगद्वा-चकं न सम्भवति । 'सदेव सौम्येदमग्र आसी' दिति श्रुतिविरोधात् । जगतः सत्त्वेनैव विधानात् । तस्मात् सत्पदवाच्यः नित्यलीलास्थदैविजीवः । अग्रेपि सर्वत्र जातित्वादे-कवचनं बोध्यम् । नास्ति सन्नित्यलीलास्थदैविजीवो यस्मिन् तदसत् एतादृशम्,

---

व्यक्तय' सर्वा.' इत्यादिना क्षरस्वरूपं निरूप्य 'परस्तस्मात्तु भावोऽन्य' इत्यादिना अक्षरब्रह्म-स्वरूपमुक्त्वा 'पुरुष' स पर पार्थ' इत्यादिना पुरुषोत्तमस्वरूप निरूपितम् । सर्वमिदमभिप्रेत्यो-क्तमक्षरब्रह्मज्ञानं साधनं परं ब्रह्म फलमिति श्रीमदाराध्यचरणै । अतएव आनन्दमयाधिक-रणे अक्षरब्रह्मज्ञानेनाविद्यानिवृत्त्या प्राकृतधर्मराहित्येन शुद्धत्वसम्पादनेन पुरुषोत्तमप्राप्तौ स्वरू-पयोग्यता सम्पद्यते, तादृशजीवे स्वीयत्वेन वरणे भक्तिभावात्सहकारियोग्यतासम्पत्त्या पुरुषोत्त-मप्राप्तिर्भवतीति श्रीमदाचार्यचरणैरणुभाष्ये । आनन्दात्मके सत्यपि तस्य परिच्छिन्नत्वान्न परम-फलत्वमत आनन्देऽपरिच्छिन्नत्वमेव परमफलतावच्छेदकमिति च तत्रैवोक्तं तैरित्यलम् । तदेषा-भ्युक्तेति । तदित्यव्ययम् । तत्पूर्वोक्त ब्रह्मविद परप्राप्तिलक्षणमर्थं विशदतया प्रतिपाद्यत्वेनाभि-मुखीकृत्योपगृह्य ऋगेषा 'सत्यं ज्ञानमनन्त ब्रह्म' 'यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते' त्येषा ऋक् । 'यो मामेवमसंमूढो जानाति पुरु-षोत्तममि'ति गीतोक्तविदितपरब्रह्मैवरुक्ता । पूर्ववाक्योक्तार्थवैशद्यमनया क्रियत इत्यर्थ । तत्सा-धनीभूतमिति । पुरुषोत्तमप्राप्तिसाधनीभूतमित्यर्थ । 'आचार्यवान् पुरुषो वेदे'ति श्रुते । रसात्मकपुरुषोत्तमसाधनीभूतत्वेन श्रीमदाचार्याणामपि रसात्मकत्व ध्वनितम् । तद्धेतुमपीति । एतत्कालिकप्रादुर्भावकारणमपीत्यर्थ । श्रुतिं निरूप्य तदर्थमाहु अस्यार्थ इत्यादि । जगद्वाचकं न सम्भवतीति असत्त्वेन जगतो बोधकं न सम्भवतीत्यर्थ । असत्त्वेनाज्ञान त्वासुराणामेव । 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वर'मिति गीतायाम् । ते आसुरा जगत् असत्यमप्रतिष्ठितमनीश्व-रमाहुरित्यर्थ । 'असत्यमाहुर्जगदेतदज्ञा शक्तिं हरेर्नैव विदु परा हि याम् । सत्यस्वरूपं जगदेतदीदृक् सृष्ट्वा त्वभूत्सत्यकर्मा महात्मे' तिश्रुते । सत्यकार्यं सत्ये ब्रह्मणि प्रतिष्ठितमिति । 'सन्मूला सौम्येमा प्रजा सदायतना सत्प्रतिष्ठाना' इति श्रुतेश्च । तस्माज्जगत सत्यत्वमेवेति निरूपित बहुशोऽस्मत्परिवृढैर्विद्वन्मण्डनादिषु । तर्हि सत्पदस्य कीदृशोऽर्थस्तत्राहु नित्यलीला-स्थदैविजीव इति । नित्यविशेषणेनानित्यत्वं तासा निरस्त वेदितव्यम् । नित्यत्वस्यापनं तु

वै इति निश्चयेन । इदं दृश्यमानं जगत् अग्रे पूर्वं आसीत् । ततः बहुकालानन्तरं नित्य लीलास्थजीवः परस्परं शापवशाद्भगवदिच्छावशाद्वा जगति समागत इति, वै इति निश्चयेन सत् । नित्यलीलास्थदैवीजीवयुक्तं जगद्जायत । तदा तस्मिन् काले पूर्वोक्तजीवाना·

सदित्येतत्प्रयुज्यते । प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यत' इति श्रीगीतावाक्यात् । 'सतामयं सारभृता निसर्गं' इति 'सन्त आत्माहमेव चे'ति श्रीभागवतवाक्याभ्यां सच्छब्देन भक्ता ग्राह्या इति भाव. । दृश्यमानमिति । इदशब्दस्य प्रत्यक्षवाचित्वादिति भाव । 'इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम् । अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्' इत्यभियुक्तोक्ते । शापवशादिति । यथा श्रीराधाश्रीदाम्नो. शापादिकं ब्रह्मवैवर्तादिषु प्रसिद्धम् । शापादिष्वपि भगवत एव निमित्तता । 'आसक्तौ भगवानेव शापं दापयति क्वचि'दिति पुष्टिप्रवाह मर्यादायाम् । नन्वेवं सच्छब्दस्य दैविजीववाचकत्वे इदं सदिति सामानाधिकरण्यं न सम्भवतीति सच्छब्द सद्विशिष्टजगति लाक्षणिक इत्यभिप्रेत्याहु नित्यलीलेत्यादि । यथा 'गवि च युक्त' इत्यात्वविधायकवार्तिकोदाहरणेऽष्टाना गवा समाहारोऽष्टगवं तद्युक्तत्वाच्छकटमप्यष्टागवम् । यथा च 'शालीनकौपीने अधृष्टाकार्ययो'रिति सूत्रोदाहरणे कूपपतनमर्हति कौपीनं पाप तत्साधनत्वात्तद्द्रोप्यत्वात्पुरुषलिङ्गमपि कौपीन तत्सम्बन्धात्तदाच्छादनमपि कौपीनम् । यथा वा 'नते नासिकायाः सञ्ज्ञाया टीटञ्नाटज्भ्रटच'इत्यस्मिन्सूत्रोदाहरणे नासिकाया नतं नमनमवटीटम् अवनाटम् अवभ्रटम् तद्योगान्नासिका अवटीटा पुरुषोऽप्यवटीट इति । यथा वा 'चक्रयुत सहगदो हरिरस्तु पश्चात्त्वत्पार्श्वयोर्धनुरसी मधुहाऽजनश्च । कोणेषु शङ्ख उरगाय उपर्युपेन्द्रस्तार्क्ष्ये सितौ हलधर पुरुष समन्तादि'ति भागवतपद्ये धनुर्धरो मधुहाऽसिधरोऽजनश्च शङ्खधर उरुगायश्चेति व्याख्यात श्रीधरस्वामिना एवमत्रापि बोध्यम् । पूर्वोक्तजीवानामिति । नित्यलीलास्थदैवानामित्यर्थ । तत्प्रतिपादकं मन्त्रद्वयम् । 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमान सचन्ते यत्र पूर्वे साध्या सन्ति देवा' इत्येक । 'अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्या सप्तधामभिरि'ति द्वितीय । अनयोरर्थ । यज्ञेन यज्ञमयजन्त देवा , 'अग्निना अग्निमयजन्त देवा'इति निरुक्तम् । तदर्थस्तु 'आचार्यवान् पुरुषो वेद' इति श्रुते । 'आचार्यो भगवानग्नि'रितिशास्त्रात् । 'हुताशनावतारश्च शेषरूप सुदर्शन' । 'हुताशनावतारस्तु वल्लभो लक्ष्मणात्मज' इति सम्मोहनतन्त्रवाक्यात् 'वैश्वानरो यज्ञभोक्ता सूत्रभाष्यप्रदर्शक । वाक्पतिर्वल्लभ कृष्णमुखं प्रादुर्भविष्यती'ति भविष्याच्छ्रीवल्लभाचार्याऽग्निपदवाच्य । तेन मद् अग्नि श्रीमत्पुरुषोत्तममित्यर्थ । 'अग्निष्मानर्चित कुम्भ' इति 'अनन्तो हुतभुग् भोक्ते'पि विष्णुसहस्रनामवाक्याभ्याम् । विष्णुसहस्रनाम्नोऽपि शक्तिग्राहकत्वात् । एतेषा नाम्ना योगरूढत्वादिन्यग्रे वक्ष्याम । देवा देवमर्गोत्पन्ना भक्ता इत्यर्थ । ते अयजन्त महता प्रबन्धेन विद्वन्मण्डनादिषु कृतं श्रीमत्प्रभुभिरिति तनोऽवधेयम् । 'सद्भावे साधुभावे च

सेवनमकुर्वन्त । श्रीमदाचार्यसाहित्योक्त्या देवाना शिक्षणार्थं तत्साहित्येन सेवनमिति व्यज्यते । 'जनशिक्षाकृते कृष्णभक्तिकृन्निखिलेष्टद' इति श्रीप्रभुचरणैरगादि । यद्वा यज्ञ विष्णुम्, 'यज्ञो वै विष्णुरि'ति श्रुते । यज्ञेन मानसमङ्कल्पेन मानसोपस्करेणायजन्त । 'मानसी सा परा मते'ति वचनान्मानससेवनस्य श्रैष्ठ्य 'यज्ञेन मानसेन सङ्कल्पेने'ति विद्यारण्येनोदितम् । सिद्धान्ते मानसोपस्कार आत्मप्राणेन्द्रियरूप, तेषा भगवदेकपरत्वम् । 'ता नाविदन्' 'मन्मनस्का' इत्यादि श्रीभागवतवचनै श्रीव्रजसुन्दरीषु प्रसिद्धा । भगवत्सेवनस्य श्रैष्ठ्यमाह तानीत्यादि । तस्मात्तानि भगवत्सेवारूपाणि धर्माणि प्रथमानि मुख्यान्यासन् । तेषा परब्रह्मावाप्तिलक्षण फलमाह ते इत्यादि । ते देवजीवा । ह इति स्फुटम् । नाक न अक दु ख यस्मिन् तस्मिन् परमानन्दरूपे साक्षात्पुष्टिपुरुषोत्तमसेवनरूप फले । 'नभ्राण्नपान्नवेदा नासत्या नमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्ये'ति सूत्रेण निपातितो नाकशब्द । महिमान महिता श्रेष्ठा । सचन्ते 'षच समवाये' । परमानन्दनिर्भरा भवन्ति । परमानन्दका भवन्तीति विद्यारण्यो जगादेत्यर्थ । भगवत्सेवनमन्तरङ्गभक्ता कुर्वन्तीति सदाचारमभिप्रेत्याह यत्रेत्यादि । यत्र परमानन्दे श्रीपुरुषोत्तमे साध्या साधका सेवका सन्तीत्यर्थ । यद्वा । ये यज्ञेन यज्ञमयजन्त ते देवा भवन्ति । आसुरभावनिवृत्तिपूर्वकलीलानुभवयोग्या भवन्तीत्यर्थ । अत्र यजन सेवैव । पूजा तु पुष्टिमार्गातिरिक्तमार्गे पूजाया विभूतिरूपो भगवान् सेव्य । सेवाया तु साक्षात्पुष्टिपुरुषोत्तम सेव्य इति महान् भेद इत्यन्यत्र विस्तर । यद्यत्र यजधातो पूजार्थकत्वैव, तर्हि ते ह नाक महिमान सचन्त इति विरोधापत्ति तत्र परमानन्दानुभवफलाभावात् । तानि धर्माणीत्यादिक पूर्ववत् । तेषा फलमाह त इत्यादि । ह इति स्फुटौ । नाक नाके 'यन्न दु खेन सम्भिन्न न च ग्रस्तमनन्तरमि'ति लक्षणप्रतिपाद्ये व्यापिवैकुण्ठे । महिता श्रेष्ठा सन्त सचन्ते श्रीपुरुषोत्तमानन्दानुभविनो भवन्तीत्यर्थ । आसुरभावनिरसनेन साक्षात्पुरुषोत्तमलीलानुभविनो भवन्तीति भाव । एवं देवाना भगवत्सेवनफल निरूप्यान्तरङ्गभक्ता अपि भगवत्सेवनमेव कुर्वन्तीत्याह । यत्र व्यापिवैकुण्ठे साध्या भगवत्सेवाकारका सन्तीति वर्तमानप्रयोगेण तेषा नित्यत्वमुक्तम् । विराड्रूपसाधका देवास्तदुपासका महात्मान इति विद्यारण्येनेरितम् । अस्मिन्मन्त्रे साक्षात्पुष्टिपुरुषोत्तमलीलानुभवित्व सर्वदा विद्यमानत्व सर्वत श्रैष्ठ्य नित्यलीलास्थदेवजीवाना निरूपितम् । द्वितीयमन्त्रे तु परस्पर शापवशाद्भगवदिच्छया वा भूतले समागतास्तेषामुद्धारार्थं श्रीमदाचार्या श्रीविट्ठलनाथा वा प्रादुर्बभूवुरिति प्रतिपाद्यते अत इत्यादिना । अत कारणाद्देवा अन्तरङ्गभक्ता न अस्मान् अवन्तु रक्षन्तु । अवधातुनिरूपितमस्मच्छब्दे कर्मत्वम् । रक्षण चात्र भगवत्सेवानुभवप्रतिबन्धनिवारणपूर्वकभगवद्रसानुभवदानम् । यद्वा अवन्तु प्रीणन्त प्रसन्ना भवन्त्वित्यर्थ । तेषा प्रसन्नतयाऽस्माकमखिलेष्टसिद्धिरिति भाव । भगवदिच्छया शापवशाद्वाऽवनितले प्रकटास्तेषामुद्धारार्थं श्रीवल्लभाचार्या श्रीविट्ठलनाथा वा प्रादुर्भूता इत्याह यतो विष्णुर्विचक्रमे इत्यादि ।

'वस्तुत कृष्ण एवे'ति वाक्यात् 'शास्त्रयाथार्थ्यकथने यस्यास्य स स्मय पुमान् । वस्तुत कृष्ण एवास्ति स्वमाहात्म्यनिरूपक' इति वाक्याच्च 'नमो विष्णवे बृहते करोमी'ति श्रुतश्च । 'विप्रोऽह वल्लभो नाम्ना भविष्यामि कलौ युगे' इति नारदपञ्चरात्रे भगवद्वाक्याच्च । विष्णुपदेन श्रीवल्लभाचार्या ग्राह्या । यतो येषामुद्धारार्थं पृथिव्या पृथिव्यामवतीर्य विचक्रमे इत्यर्थ । 'ल्यब्लोपे कर्मण्यधिकरणे चे'ति सूत्रेण पञ्चमी । आसनात्प्रेक्षत इतिवत् । सप्तधामभि सप्तपौत्रै वक्ष्यमाण नामकै सह विष्णु श्रीवल्लभाचार्य विचक्रमे पृथिवीपरिक्रमण कृतवान् । 'वारत्रयविधिकलित भूवलयपरिक्रमे'तिभक्तवचसा पृथ्वीपरिक्रमश्रवणात् । अत्र विष्णुपदे तन्त्राश्रयणेन श्रीविट्ठलेशोऽपि ग्राह्य । 'तदाह वल्लभकुले द्विजाचाररतेऽमले । अवतीर्य पर रूप दर्शयिष्ये मनोहरम् ॥ पृथिव्या भारते क्षेत्रे माथुरे मम वल्लभे । गोकुल मत्पद नित्य यत्रास्ते वै मुदावहम् ॥ कालिन्दी सरिता श्रेष्ठा यत्र गोवर्धनो गिरि । आदिमध्यावसाने वै वासो मे तत्र निश्चितम् ॥ वर्तते विश्रुत पूर्व त्वया चास्ति परन्तप । अपि चान्तर्हित रूप सर्वलोचनगोचरम् ॥ करिष्ये विमल सौम्य व्रजभक्तसुखावहम् । विठ्ठलेशेति विख्याति गमिष्ये जगतीतले ॥ आदावह चैकरूपो बहुरूपधरस्तत' इत्यादि ब्रह्माण्डपुराणान्तर्गतैर्ब्रह्माण प्रति भगवद्वाक्यै विष्णुपदेन श्रीविट्ठलेशोऽप्यत्र ज्ञातव्य । तन्त्र तु द्विविधम् । शब्दतन्त्रमर्थतन्त्र च । तदुभयोर्लक्षण तु अर्थभेदाच्छब्दभेद इति नये सकृत्तात्वोष्ठपुटव्यापाराच्छब्दोच्चारणे श्रोतुर्यत्र विनिगमनाविरहाच्छब्दद्वयज्ञान तत्राद्य, अर्थभेदेऽपि शब्दैक्यमिति नये तादृशव्यापारात् प्रकाशितैकशब्देन विनिगमनाविरहादनेकार्थबोधे द्वितीयम् । यथा 'विद्वन्मानसहसैरेरिकमले'त्यादौ मानसमत्र मानसमिति श्लिष्टरूपकालङ्कार इति । एव च श्रीविट्ठलेश सप्तधामभि सप्तपुत्रै । 'स जयति गिरिधरदेवो गोविन्दो बालकृष्णश्च । श्रीवल्लभरघुनाथौ श्रीयदुनाथो घनश्याम' इति नामकै सह । सहार्थे तृतीया । विनापि तद्योगे 'वृद्धो यूने'ति निर्देशात् । पृथिव्या पृथिव्यामवतीर्य देवोद्धारार्थं विचक्रमे पृथिवीपरिक्रमण कृतवान् । 'देशान्तर प्रवक्ष्यामि मद्भक्तानुग्रहाय वै' इति ब्रह्माण्डवचनात् । धामत्वेनोपादान शरणापन्नाना सकलाज्ञानान्धकारनिवृत्तिसकलदोषपदाहकसामर्थ्यवत्तया । श्रीमदाचार्याणा श्रीमत्प्रभूणा तत्पुत्राणा तद्वशोद्भवाना चावतारस्य भविष्यत्त्वाच्छ्रुतिषु भूतत्वेनोपादान भविष्यदवतारस्य श्रीमद्रामचन्द्रस्य श्रीवाल्मीकिरामायणे चरित्रवर्णनवत् । किञ्च श्रुतीना ज्ञान सार्वकालिकमिति श्रीमदाचार्यज्ञानस्य नित्यमानत्वेन भूतनिर्देश । किञ्च यथा श्रीमत्पुरुषोत्तमस्य तल्लीलाना च सदा विद्यमानत्व तथा श्रीमदाचार्याणा तल्लीलाना च नित्यत्वम् । यथा 'निश्वसितमस्य वेदा' इति श्रुत्या 'वचो नारायण साक्षात्स्वयभूरिति शुश्रुम' इति वाक्याच्च वेदानामनादित्व श्रीवामनावतारस्य भविष्यत्स्य तत्कर्मणश्च 'त्रिर्देव पृथिवीमेष एता' 'विचक्रम पृथिवीमेष एता' 'यतो विष्णुर्विचक्रमे' 'इद विष्णुर्विचक्रम' इत्यादि श्रुतिभिरुक्तत्वात् नित्यत्वे सत्येव सङ्गच्छते । एव सर्वलीलाना विद्यमानत्वेन श्रुतीनामनुभवजन्यत्वान्नित्यतीलानामपि भूतत्वेन निर्देश

सुद्धारार्थं स्वय रसात्मकपुरुषोत्तम आत्मान स्वस्वरूपं श्रीवल्लभाचार्यमकुरुत प्रादुर्भूतं

इति दिक् । आवरणभङ्गेऽप्युक्तम् । 'भूतार्थवादस्य स्वार्थे प्रामाण्यप्रतिपादन वेदस्य सर्वज्ञेश्वरवाक्यत्वेन पुराणेषु सूतोक्तिकथनवत् भाविनोऽप्यर्थस्य तथा कथनोपगमेऽप्यदोषात् । वस्तुतस्तु वेदाना भगवल्लीलावेदकत्वेन तासा च नित्यत्वेन 'पुरुष एवेद सर्वं यद्भूत यच्च भव्य' मित्यादिश्रुतिभिस्तादृशव्यवहारकालेऽपि सर्वस्य पुरुषरूपतया नित्यत्वेन चादोष' इति । एव च दैवोद्धारार्थं प्रादुर्भाव इति श्रुत्या सिद्धम् । तदेवाहु उद्धारार्थमिति । 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मान सृजाम्यहम्' इति गीतोपनिषदि । धर्मस्य पुष्टिमार्गस्य ग्लानिर्मान्द्यम् । अधर्मस्य भूतनाथोदितमायावादिमार्गस्य । तदा तस्मिन्काले । आत्मान श्रीवल्लभाचार्यादिक सृजामि प्रादुर्भावयामीत्यर्थ । 'त्वमग्ने वृषभ पुष्टिवर्धन' इति श्रुतौ आधिदैविकधर्मरूपत्वेन धर्मप्रतिबन्धकाधर्मनिरासायावतरण युक्तमेव । विस्तरार्थस्तु मूले एव स्फुटीभविष्यति । नाविर्भूयादितिपद्येन श्रीमत्प्रभुचरणै श्रीमदाचार्यावतरणमन्तरा तेषामुद्धारो न स्यादिति प्रतिपादितम् । आत्मानमित्यादि । 'आत्मान वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु स सर्वेष्वात्मस्वन्नमत्ती'ति छान्दोग्यश्रुते । 'वैश्वानर साधारणशब्दविशेषादि'ति सूत्राद्वैश्वानरस्य परमात्मत्वम् । आत्मान वैश्वानरमिति सामानाधिकरण्येनात्मशब्देन श्रीवल्लभाचार्या ज्ञातव्या । 'स्मर्यमाणमनुमान स्यादि'ति सूत्रे 'अह वैश्वानरो भूत्वा प्राणिना देहमाश्रित' इति स्मर्यमाणमत्रापि स एव वाच्य इति मध्वभाष्ये गीतावाक्य प्रमाणमुक्तम् । यद्यप्यस्मिन्वाक्ये विभूतिरूपत्व भगवतस्तथाप्युदाहृतश्रुतिसूत्राभ्या परब्रह्मत्वमेव वैश्वानरस्य । किञ्च, 'गीतावाक्येऽपि सन्देहे व्याससूत्रेण निर्णय' इति 'वेदा श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि । समाधिभाषा व्यासस्य प्रमाण तच्चतुष्टयम् ॥ उत्तर पूर्वसन्देहवारक परिकीर्तितम्' इति शास्त्रार्थनिबन्धे श्रीमदाचार्यचरणोक्ते । एव सति 'वैश्वानरो वल्लभाख्य' इति वाक्यात् 'हुताशनावतारश्च शेषरूप सुदर्शन ।' 'हुताशनावतारस्तु वल्लभो लक्ष्मणात्मज । रामानुज शेषरूपो निम्बार्कोऽथ सुदर्शन' इति सम्मोहनतन्त्रात् 'आचार्यो भगवानग्नि'रितिवचनात् 'वैश्वानरो यज्ञभोक्ता सूत्रभाष्यप्रदर्शक । वाक्पतिर्वल्लभ कृष्णमुख प्रादुर्भविष्यती'तिभविष्यवाक्यात् 'कृष्णवर्मा वल्लभाख्यो वेदवेदान्ततत्त्ववित् । कृष्णात्मा भक्तरक्षार्थं प्रादुर्भूतो भविष्यती'ति सनत्कुमारसंहितावचनाच्चेत्याद्यनेकवाक्याच्छ्रीमदाचार्याणा पूर्णपुरुषोत्तममुखारविन्दाधिष्ठानलौकिकवैश्वानरत्वनात्मत्वमप्यबाधितम् । किञ्च व्याससूत्रमाध्वभाष्यटीकायाम् 'आत्मशब्द परे विष्णौ नान्यत्र क्वचिदिष्यत' इति पुराणवाक्येन पूर्णपुरुषोत्तमस्य मुख्यया वृत्त्याऽऽत्मशब्दस्य वाचकत्वेन श्रीमदाचार्याणा'मात्मान वैश्वानरमुपास्ते' इति श्रुत्या 'वैश्वानर साधारणशब्दविशेषादि'ति सूत्रा'द्वस्तुत कृष्ण एव'ति वाक्याच्च पूर्णपुरुषोत्तमत्वेनात्मशब्दस्य वाचकत्वमित्यभिप्रेत्यात्मशब्दस्यार्थमाहु स्वस्वरूप श्रीवल्लभाचार्यमिति । ननु आत्मशब्दो लोकवद्गौणोऽस्तु ।

३

कृतवान् । वस्तुतस्त्वन्याचार्येषु रसात्मकपुरुषोत्तमप्रतिपादकत्वाभावात् श्रीवल्लभाचार्या एव ग्राह्या नान्ये । तस्मात् दैवोद्धारार्थप्रादुर्भावात् तत्सुकृत तदुद्धारक सुष्टु कृत

यज्ञदत्तो ममायमात्मेतिवदिति चेन्न। इमा शङ्कामपहर्तु सूत्रकार सूत्रमसूत्रयत् 'तन्निष्ठस्य मोक्षोपदेशा'दिति। अर्थस्तु भाष्ये श्रीमदाचार्यचरणैर्निगदित इति ततोऽवधेय ।अत्र श्रीमदाचार्यत्वाचकात्मशब्दोपादानेन 'सत्य ज्ञानमनन्त ब्रह्म' 'आनन्दमात्रकरपादमुखोदरादि' 'आनन्दमयोऽभ्यासा'दिति श्रुतिसूत्रै 'सत्यादिगुणसाहस्रैर्युक्तमौत्पत्तिकै सदे'ति श्रीमदाचार्योदितवाक्येन चान न्दमयत्वमनेकानन्दमयगुणार्णवत्वमप्राकृतसौन्दर्यसौकुमार्यलावण्ययौवनाद्यनन्तकल्याणगुणनिधित्व स्वाभाविकज्ञानबलैश्वर्यशक्तितेज सौशील्यवात्सल्यमार्दवार्जवसौहार्दसाम्यकारुण्यमाधुर्यौदार्यचातुर्यस्थैर्यपराक्रमसत्यसङ्कल्पकृतित्वकृतज्ञताद्यसङ्ख्येयगुणार्णवत्व सूचितम् । प्रादुर्भूत कृतवान् प्रादुर्भावितवानित्यर्थ । 'तस्यैवात्मानुभावप्रकटनहृदयस्याज्ञया प्रादुरासी'दित्युक्त श्रीमत्प्रभुचरणै । नन्वात्मपदेनान्याचार्याणा ग्रहणमस्तु, किमिति श्रीवल्लभाचार्याणामेव ग्रहणमिति चेत्तत्राहु वस्तुतस्त्वित्यादिना । रसात्मकेति । रसात्मकप्रतिपादन वस्तुतस्त्वन्याचार्यैर्न कृतमिति भाव । यद्वा रसात्मकपुरुषोत्तमस्य प्रतिपादन यस्मिञ्छास्त्रे तद्रसात्मकपुरुषोत्तमप्रतिपादक शास्त्र तस्य भावस्तत्त्व, तस्य शास्त्रविषयस्याभावात् रसात्मकपुरुषोत्तमप्रतिपादकशास्त्रमन्याचार्यप्रतिपादक न भवतीत्यतोऽत्रात्मशब्देनान्ये न ग्राह्या इत्यर्थ । अत्र प्रकरणे पुरुषोत्तमस्य 'रसो वै स' इतिश्रुत्या रसत्वेन निरूपणाज्जीवस्य रसस्यैव लाभो 'रस ह्येवाय लब्ध्वा' त्यनया निरूपणात् पुरुषोत्तमप्राप्तिसाधनीभूतश्रीमदाचार्याणामपि रसरूपत्व, प्रकरणार्थस्य नियामकत्वात् । तथाच काव्यप्रकाशादौ 'सयोगो विप्रयोगश्च साहचर्य विरोधिता । अर्थ प्रकरण लिङ्ग शब्दस्यान्यस्य सन्निधि ॥ सामर्थ्यमौचिती देश कालो व्यक्ति स्वरादय । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव' इति । श्रीमदाचार्याणा रसरूपत्व तु यथा रसेषु शृङ्गारस्य प्राधान्येन तत्सयोगविप्रयोगोभयात्मकत्वेन श्रीमदाचार्येषु 'तत्सारभूतरासस्त्रीभावपूरितविग्रह' इतिवाक्यात् तदुभयात्मकत्वम् । किञ्च 'कृष्णाधरामृतास्वादसिद्धिरत्र न सशय' इति सर्वोत्तमस्तोत्रपाठमात्रेण जीवानामपि रसाप्ति, किन्तु तत्र 'विरहानुभवैकार्थसर्वत्यागोपदेशक' इतिवाक्यात् 'स्वामिन् श्रीवल्लभाग्रे क्षणमपि भवत सन्निधाने कृपात प्राणप्रेष्ठव्रजाधीश्वरवदनदिदृक्षार्तितापो जनेषु । यत्प्रादुर्भावमाप्नोत्युचितनरमिद यत्तु पश्चादपीत्थ दृष्टेऽप्यस्मिन्मुखेन्दौ प्रचुरतरमुदेत्येव तच्चित्रमेत'दिति वाक्याच्च वियोगरसानुभावकत्वम् । किञ्च 'यन्ङ्ग दाशुषे त्व'मिति श्रुत्या 'अग्निर्मुख यस्य तु जातवेदा जात' इति श्रीभागवतवाक्याच्च । 'अग्निर्वै मुख'मिति श्रवश्च 'श्रीकृष्णास्य कृपानिधि'रिति वाक्याच्च श्रीमदाचार्याणा रसरूपपुरुषोत्तमास्यत्वेन पुरुषोत्तमावयवस्य पुरुषोत्तमरूपत्वेन रसरूपत्व स्पष्टमेवेत्यलम् । अन्याचार्येषु सुदर्शनशेषहनुमदादिकृताद्यवतारेषु शृङ्गाररसस्याभावश्च स्पष्ट एव । तदुद्धारकमिति । तेषामुद्धारो यस्मिन्

भगवत्सेवादिकृतिरूपं जीवान् प्रति, उच्यते उपदेशः क्रियते । तदन्योपदेशनिषेधमाह 'यद्वै तत्सुकृतं तस्मात्' इति । वै निश्चयेन यद्वल्लभाचार्योक्तं तदेव सुकृतं नान्यत् । तदुपदेशफलमाह 'रसो वै सः । रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवती'ति । रसः रसात्मकफलरूपः श्रीकृष्णः । वै इति निश्चयेन सः यो 'ब्रह्मविदाप्नोति पर' मित्यत्र परशब्देन रसात्मकफलरूपः पुरुषोत्तमः प्रतिपादितः ।

ननु 'ब्रह्मविदाप्नोति पर'मित्यत्रोक्तफलात्मकपुरुषोत्तमस्य कथं रसरूपत्वं यस्य स इति तच्छब्देन परामर्शः क्रियते इत्याशङ्कानिरासायानन्दमयाधिकरणे 'ब्रह्मणा विपश्चिते'त्यस्य व्याख्याने श्रीमदाचार्यचरणैर्व्याख्यातं 'विपश्चिता विविधं पश्यच्चित्तम् । पृषोदरादित्वात्पश्यच्छब्दावयवस्य यच्छब्दस्य लोपं कृत्वा व्युत्पादितो विपश्चिच्छब्दस्तेन विविधभोगचतुरेण सह सर्वान्कामानश्नुत इत्यर्थः ।' 'रसꣳ ह्येवायं लब्ध्वानन्दी भवती'ति रसं नित्यलीलास्थरसात्मकपुरुषोत्तमं अयं जीवः हीति निश्चयेन श्रीमदाचा-

---

तत्कर्म नामोपदेशब्रह्ममन्त्वन्वादिरूपमित्यर्थ । सुष्टुकृतमिति 'अपदु सुपु स्य कु'रिति सूत्रेण सूपपठात् स्यावातो कृमत्यये पत्वे ष्टुत्वे सुष्टु इति रूपम् । भगवत्सेवादीति । ब्रह्मसम्बन्धादिना सर्वदोषनिवृत्तौ भगवत्सेवायामधिकारो भवतीति भाव । उच्यते । श्रीमदाचार्यैरिति शेष । उक्तम् श्रुत्यर्थादिकम् । नान्यदिति अन्योक्तमित्यर्थ । 'न ह्यन्यो वागधीशा'दित्यादिनान्यव्याख्यातश्रुत्यर्थस्य भ्रान्तिग्रस्तत्वादिति भाव । श्रीभागवतार्थस्याप्यन्यप्रोक्तस्य याथार्थ्याभावात् । 'अर्थं तस्य विवेचितुं न हि विभुर्वैश्वानराद्वाक्पतेरन्यस्तत्र विधाय मानुषतनुं मा व्यासवच्छ्रीपतिरि'ति सुबोधिन्यारम्भे श्रीमदाचार्यैः स्वयमेवोक्तत्वादिति भाव । रसात्मकफलरूप इति रसस्यैव लाभोक्त्या फलत्वमिति भाव । 'त्वयि सर्वरसे' 'मल्लानामशनि'रित्यादिश्रीभागवतवाक्याभ्यां सर्वरसरूपत्वम् । तच्छब्दस्य पूर्वपरामर्शकत्वादाह य इत्यादि ।

नन्वित्यादि । ब्रह्मविदित्यत्रोक्तफलात्मकपुरुषोत्तमस्य स इति तच्छब्देन यस्य परामर्शं क्रियते, तस्य कथं रसरूपत्वमित्याशङ्कानिरासायेत्यन्वय । इत्यर्थ इति । एतत्पर्यन्तं श्रीमदाचार्यचरणोदितं व्याख्यानम्, 'एतदग्रे एतेन परप्राप्तिपदार्थ उक्तो भवति, शुद्धिपुष्टिमार्गीयादस्य भक्तस्य स्वातन्त्र्य भोग उच्यते, सहभावोक्त्या ब्रह्मणो गौणत्वम्, अत एव भक्ताधीनत्वं भगवत स्मृतिष्वप्युच्यते । 'अहं भक्तपराधीन' 'वशे कुर्वन्ति मां भक्त्ये'त्यादिवाक्यै'रिति तत्रैव निरूपितं तै । एतेन विविधभोगचातुर्यविशिष्टतानिरूपणेन रसरूपत्वं स्पष्टमेव । भक्तस्य मुख्यत्वप्रतिपादनेनात्र रसरूपत्वं स्फुटम् । शृङ्गारे नायिकाया प्राधान्यात्तच्च व्रजसुन्दरीष्वेवेति भाव । इदंशब्दस्य पुरोवर्तिपदार्थवाचकत्वेन श्रीमदाचार्यास्तद्रूपाविशिष्ट इत्याहु श्रीमदाचार्योक्ते-

योक्तसुकृतविशिष्ट एव जीवो नान्यः लब्ध्वा प्राप्य आनन्दी भवति सेवाफलोक्तफल यथाधिकारं अलौकिकसामर्थ्यं सायुज्य सेवोपयोगिदेहो वैकुण्ठादिष्विति फल लब्ध्वा आनन्दमयविग्रहो भवतीत्यर्थः । अग्रे 'को ह्येवान्या'दित्यादिभिस्तु पुरुषोत्तमवर्णनम् ।

किञ्च 'वेदैश्च सर्वैरहमेव वेद्य' इति भगवद्वाक्यात् पुरुषोत्तमपरत्वं वेदमात्रस्य

त्यादि । जीव इति । शुद्धपुष्टिमार्गीय इत्यर्थ । नान्य इति । अन्यो मर्यादाप्रवाहस्थ इत्यर्थ । प्राप्येति रसपदेनान्वय । आनन्दी भवतीति । च्विप्रत्ययोऽत्र । एव च यदा भगवानानन्द ददाति, तदाऽऽनन्दी भवति । आनन्ददान चाविद्यानिवृत्तिपूर्वकालौकिकभगवत्सेवोपयोगिदेहसम्पत्तौ पश्चाद्विरहभावेऽतितीव्रत्वेन सर्वोपमर्दिना शरीरप्राणेन्द्रियान्त करणानि नष्टानि स्युर्यदि तत्तद्रूप ब्रह्म तेषु तेषु न प्रविष्ट स्यात्, जीवे स्वानन्दमय प्रविशतीति रसात्मकत्वात्तान्तात्मकमेव विरहभावमनुभूय पश्चात्प्रादुर्भूत प्रभुस्वरूप प्राप्य प्रभुरानन्ददान करोति तदानन्दी भवतीत्यभिप्रेत्याहु सेवाफलोक्तमित्यादि । फलप्रकरणे 'एव कार्ये योगमायाया' इति प्रतीकमुपादाय टिप्पण्या 'रसं ह्येवाय'मित्यस्यार्थ उदित । सर्वात्मलक्षण स्थायिभावो रसस्तमेव लब्ध्वाऽऽनन्दवान् भवति, तादृशे प्रभु स्वरूपानन्द ददाति । तथा लाभकथनेन भगवद्दत्त एव प्राप्यते, नान्यथेति सूच्यते । एवकार सर्वत्रानुषज्यते । तथाहि । रसमेव लब्ध्वा यथा त लब्ध्वा तथा भवत्येव तथा भूत्वाऽऽनन्द्येव भवति, न तु लौकिकवदल्पमपीति चेत्युक्त श्रीमत्प्रभुचरणै । सेवोपयोगिदेह इत्यादि । तथा चाणुभाष्ये आनन्दमयाधिकरणे'ऽस्माल्लोकात्प्रेत्ये'ति वाक्ये इक्षशब्दप्रयोगात् प्राकृतगुणमय प्रपञ्चमतिक्रम्य गुणातीत प्रपञ्च साक्षात्सेवोपयोगिन प्राप्नोतीत्यवगम्यते इत्युक्त श्रीमदाचार्यचरणै । यद्यपि सायुज्यपदेन पुरुषोत्तमस्य स्वरूपे लीनत्व जीवस्य, तथापि सह युनक्तीति सयुक् सयुजो भाव सायुज्यमिति व्युत्पत्त्या सायुज्यशब्देन पुरुषोत्तमलीलानुभवत्वम्, अन्यथा 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति' श्रुतिप्रतिपादितभोगानुपपत्ते । अत एव श्रीमदाचार्यचरणै'र्जीवस्य ब्रह्मण्येव लयेन लीलारसानुभवेन नाश एव स' इत्यानन्दमयाधिकरणेऽणुभाष्ये । इदमेव मोक्षस्वरूपम् । श्रीवैष्णवाना मते तु चरमशरीरजनकादृष्टजन्यभोगानन्तर भगवच्छेषत्वप्रमितिपूर्वकातुलनानाविधकैङ्कर्ययोग्यत्वे सति नित्यज्ञानानन्दाविर्भावो मोक्ष इति । अस्यार्थ । चरम यच्छरीर तज्जनक यददृष्ट तज्जन्यो यो भोग सुखान्यतरसाक्षात्कार इति यावत् तदनन्तर या भगवच्छेषत्वप्रमिति । शेषत्व मत्तोऽयमुत्कृष्टोऽहमस्मादपकृष्ट इति यावत् । तद्योगे सति नित्यौ यौ ज्ञानानन्दौ तयोराविर्भावो व्यक्ति मोक्ष इति । अत्रापकृष्टताग्रन्थवाहुल्यभयान्नेह प्रतन्यते । श्रीमदाराध्यचरणैरलौकिकेत्याद्युक्त इद लक्षणमस्मन्मतान्नातिरिच्यते ।

'सर्वे वेदा यत्पदमामनन्ती'ति श्रुत्या सर्वेषा वेदाना वेदान्ताना च श्रीमत्पुरुषोत्तमपरत्वेन श्रीमदाचार्याणा पुरुषोत्तमाभिन्नत्वेन श्रीमदाचार्यपरत्व तेषामित्याहु किञ्चेत्यादि न कोऽपि शङ्कालेश इत्यन्तम् ।

स्पष्टम् । आचार्याणां पुरुषोत्तमत्वं भगवतोक्तम् 'आचार्यं मां विजानीयान्नावमन्येत कर्हिचि' दित्यत्र मामिति स्वाभेदेन निर्देशात्तद्रूपेण व्याख्याने न किञ्चिद्बाधकमिति भावः । किञ्च श्वेताश्वतरोपनिषदि 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन' इति मन्त्रेण देवगुरुभक्त्योः साम्यं श्रावितम्, तेन गुरुत्वाच्छ्रीमदाचार्यपरत्वेन श्रुतिप्रतिपादने न कोपि शङ्कालेशः ।

किञ्च तत्स्वरूपप्रतिपादकनिगमः प्रदृश्यते । तथाहि 'नमो ब्रह्मणे नमोऽस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ।' अस्यार्थः । नमो ब्रह्मण इति । ब्राह्मणरूपधारिणे श्रीवल्लभाचार्याय नमः ॥

श्रीमदाचार्यपरत्वेनान्यच्छ्रुतिव्याख्यानं चिकीर्षवस्तदवतारयन्ति किञ्चेत्यादि । श्रुतिमनूद्य तदर्थमाहुः नमो ब्रह्मण इतीत्यादि । 'ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रः प्रजापति'रित्यमराद्ब्रह्मशब्दार्थमाहुः ब्राह्मणरूपधारिण इति । 'पृथिवी वैश्वानरः संवत्सरो वैश्वानरः ब्राह्मणो वैश्वानर' इति निरुक्ते वैश्वानरस्य ब्राह्मणत्वम् । तच्चास्मिन्नवतार इत्याहुः श्रीवल्लभाचार्याय नम इति । अत एवात्रानन्तर्ये एवाग्निपदं सामानाधिकरण्येनोपात्तम् । श्रुतिरपि 'विप्रं विप्रासोऽवसे देवं मर्तास ऊतये । अग्निं गीर्भिर्हवामहे' । अर्थस्तु विप्रं विप्ररूपधारिणम् । विप्रपदेन श्रोत्रियत्वं सूचितम् । तस्य च 'स एको मानुष आनन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं मानुषा आनन्दाः । स एको मनुष्यगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगन्धर्वाणामानन्दाः । स एको देवगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणामानन्दाः । स एकः पितॄणां चिरलोकलोकानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितॄणां चिरलोकलोकानामानन्दाः । स एक आजानजानां देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजानां देवानामानन्दाः । स एकः कर्मदेवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं कर्मदेवानामानन्दाः । स एक इन्द्रस्यानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतमिन्द्रस्यानन्दाः । स एको बृहस्पतेरानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं बृहस्पतेरानन्दाः । स एकः प्रजापतेरानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्ये' त्युपनिषत्सु मानुषानन्दमारभ्य ब्रह्मानन्दानुभवस्य निरूपणात् परमानन्दकत्वं परं किमित्युक्ते 'यः सर्वान्तर आनन्द' इति श्रीमदाचार्यैरणुभाष्ये उक्तत्वाच्छ्रोत्रियानन्दस्य सर्वान्तरे विद्यमानत्वेन परब्रह्मत्वं 'पूर्णानन्दः पूर्णकाम' इतिवाक्येन अकामहतत्वं श्रीमदाचार्येषु निरूपितमित्येतादृशं श्रोत्रियत्वमत्रैवेति । न चात्र गणितानन्दस्य श्रोत्रियानन्दानुभवत्वेनाक्षरब्रह्मत्वम्, न तु परं ब्रह्मत्वमिति वाच्यम् । 'आनन्दः परमानन्दः' 'पूर्णानन्दः पूर्णकाम' इति 'वस्तुतः कृष्ण एवे'ति वाक्यैश्च पूर्णानन्दत्वं पूर्णपुरुषोत्तमत्वमिति दिक् । अग्नि श्रीवल्लभा-

चार्यम् । 'हुताशनावतारस्तु वल्लभो लक्ष्मणात्मज' इति सम्मोहनतन्त्रात् 'वैश्वानरो वल्लभाख्य' इतिवाक्याच्च । विप्रास विप्रा । 'आज्जसेरसुगि' तिसूत्रेणासुगागम । 'वेदाभ्यासाद्भवेद्विप्र' इति वचनाच्छब्दब्रह्मपरब्रह्मविद मेधाविनो भक्ता दैविजीवा वर्से विदु । 'वस आच्छादने' इति धातोर्लिटि इटि एत्वे रूपसिद्धि, आच्छादनार्थकस्या'नेकार्था धातवो भवन्ती'तिमहाभाष्यात 'सेघतेर्गता' वित्यस्मिन् सूत्रे गतावितिग्रहणसामर्थ्यात् 'कुर्दखुर्दगुर्दगुद क्रीडायामेवे'ति भीमसेन निर्दिष्टार्थे एवकारग्रहणाच्च धातूनामनेकार्थत्वाज्ज्ञानार्थकत्वम् । अत एव निरुक्तकारै 'वसेर्विदु' रित्युक्तम् । छान्दसत्वेन पुरुषवचनव्यत्यय । श्रीमदाचार्यसेवका श्रीमदाचार्यस्वरूप शास्त्रोग्नि जानन्तीति भाव । 'प्रतिक्षणनिकुञ्जस्थलीलारससुपूरित ।' 'रासलीलैकतात्पर्य ।' 'गोवर्धनस्थि त्युत्साहस्तल्लीलाप्रेमपूरित' इत्यादिवाक्याच्छ्रीपुरुषोत्तमलीलानुभविनमित्यभिप्रेत्याह देवमिति । क्रीडार्थक दिवुधातो पचाद्यच । श्रीमदाचार्याणामवतारो भूतले दैविजीवोद्धारार्थमित्यभिप्रेत्याह मर्तास । यद्वा दैवा मर्त्यलोके प्रादुर्भूतास्तदुद्धारार्थमवनितले श्रीमदाचार्याणा प्राकट्यमिति भाव । यद्वा मर्तास अविद्यासम्बन्धेन मरणादिधर्मविशिष्टा दैविजीवास्तेषा मरणादिदोषनिवृत्तये प्राकट्य स्तुतिश्च क्रियते भक्तैरिति भाव । 'सात्त्विका भगवद्भक्ता ये मुक्तावधिकारिण । भवान्तसम्भवा दैवात्तेषामर्थे निरूप्यन' इति श्रीमदाचार्यचरणोक्ते तेषा यथान्तमस्त्व सिद्ध्यति तथा निरूप्यत' इति तद्विवृतौ निगदितम् । स्तुतिप्रयोजनमाह ऊतये इति । 'ऊतियूतिजूति सातिहेतिकीर्तयश्चे'तिसूत्रेणावतेरूतिशब्दो निपातनात् । रूढश्चाय लीलाया 'पुष्टिदोषनिवृत्त्यर्थ मूतीर्लीला निरूप्यत' इति श्रीभागवतनिबन्धे श्रीमदाचार्यचरणोक्ते 'ऊतीर्लीला द्विधा प्रोक्ते'ति श्रीधरस्वामिनाप्युक्तम् । एवञ्च लीला अनुभवितुम् । 'तुमर्थाच्च' इतिसूत्रेण चतुर्थी । यद्वा ऊति शब्देन कामना गृह्यन्ते । अवते कान्तिरप्यर्थ । कान्ति कामना । भक्ताना कामनास्तु भगवल्लीलानुभवरूपा एव । अन्यपदार्थस्य जातमात्रस्य तस्या 'यस्तु आशिष आशास्ते न स भृत्य स वै वणिगि'ति श्रीभागवतवाक्याद्दासत्वभङ्गापत्ति । अग्नि श्रीवल्लभाचार्य । गीर्भि निग मरूपाभि हवामहे प्रीणीमहे तर्पयाम इत्यर्थ । यद्यपि 'हु दानादनयो'रिति पठित तथापि सोऽर्थो ऽननुगुणो भवतीति प्रीणनार्थो गृह्यते । तथाच महाभाष्ये प्रीणनमप्यस्यार्थो भवतीति । रूप सिद्धिस्तु जुहोते कर्तरि लट् तस्योत्तमपुरुषबहुवचने 'व्यत्ययो बहुल'मित्यनुशासनात् आत्म नेपदे 'कर्तरि शबि'ति शपि गुणे दीर्घे 'टित आत्मनेपदाना टेरे' इति सूत्रेण टेरेत्वे बोध्या । तेन चात्र 'शपो लुक्' 'बहुल छन्दसी' त्यनुशासनात्तदभाव इति प्रीणनार्थकधातुना स्तुत्यादिना गुणश्रवणेन श्रीमदाचार्याणा प्रसन्नतति ध्वन्यते । 'स्वयशोगानसहृष्टहृदयाम्भोजविष्टर' इति वाक्यात् । एवञ्च सेवकै स्तुतिरव कर्तु शक्येति ध्वनितम् । अत एव श्रीप्रभुचरणैरन्यभक्तैश्च श्रीमदाचार्यस्तुत्यादिप्रकरन क्रियते । एवञ्च अग्नि विप्रमिति सामानाधिकरण्येन ब्रह्मणे ब्राह्मणरूपधारिण इति व्याख्यान युक्तमेवेति दिक् ।

ननु श्रुतौ श्रीवल्लभाचार्येतिनामोच्चारणं न कृतं कथं तत्परत्वेन प्रतिपाद्यत इति चेन्न । श्रीवल्लभाचार्यनिष्ठाः सर्वे धर्माः श्रुतौ स्पष्टतया प्रतिपादिता इति धर्मैर्धर्मिणं श्रीवल्लभाचार्यस्वरूपं निश्चीयते । यथा चत्वारिशृङ्गेतिश्रुतिर्महाभाष्यकारैर्धर्मसादृश्येन व्याकरणशास्त्रपरत्वेन व्याख्याता, तथात्र श्रीमदाचार्यपरत्वेन प्रतिपाद्यते । ननु ब्राह्मणरूपधारणं श्रीवामनादीनामवतारेष्वपि वर्तते तेनेयं श्रुतिर्वामनरूपप्रतिपादिका स्यात्तद्व्यावृत्त्यर्थमाह नमोऽस्त्वग्नय इति ।

सर्वे धर्मा इति । अप्राकृता इत्यर्थः । दृष्टान्तद्वारा तासां प्रमाणमाहुः यथेत्यादि । श्रीवामनादीनामिति । आदिशब्देन श्रीव्यासश्रीपरशुरामश्रीकपिलादीनां संग्रहः । नमोऽस्त्वग्नय इति । ननु 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति' । 'न तद्भासयते सूर्यो न शशाङ्को न पावकः । यद्गत्वा न निवर्तन्ते तद्धाम परमं ममे'ति श्रुतिस्मृतिभ्यां श्रीमत्पूर्णपुरुषोत्तमस्याविषयत्वं सूर्यादीनामग्नेश्च प्रतिपादितमिति कथमग्नेः पुरुषोत्तमाननाधिष्ठातृत्वं संमोहनतन्त्रादिषु श्रीमदाचार्याणामग्निरूपत्वं वर्णितमिति तेषां पूर्णपुरुषोत्तमत्वं कथम्? 'अग्निर्मुखं यस्य तु जातवेदा'इत्यादि तु विभूतिलबोधकमिति चेन्न, पूर्वोदाहृतश्रुतिसूत्रादिभिर्वक्ष्यमाणैश्च ब्रह्मत्वमेव । अलौकिकाखिलब्रह्मनिष्ठजगदुदयस्थितिलयादिलोकोत्तरविलक्षणासाधारणकार्यकर्तृत्वेन श्रुत्यादिषु प्रतिपादना'दग्निर्वै मुखमि'ति श्रुत्येकवाक्यतया ब्रह्मणोऽवयवस्य ब्रह्मत्वाच्छ्रीमत्पुरुषोत्तमाऽऽननाधिष्ठातृश्रीमद्वैश्वानरश्रीमदाचार्याणां ब्रह्मत्वम् । अत एव 'श्रीकृष्णास्यं कृपानिधि'रिति श्रीमत्प्रभुचरणैरगादि । अत्र निषेधे कुतोऽयमग्निरितीदंशब्दप्रयोगात्तस्य च लौकिकाग्निविषयत्वात् । अन्यथा 'त्वमग्ने द्युभिरि'ति 'अग्निमीळे पुरोहित'मित्यादिश्रुतयो भारतवचनान्यपि विरुध्येरन् । तदेवोपपाद्यते 'त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः' ॥ अस्यार्थः—हे अग्ने, त्वं द्युभिः 'सुरलोको द्योदिवौ द्वे' इत्यमराद्दिवशब्दस्य स्वर्लोकवाचकत्वात् तेन चात्र तत्स्था लक्ष्यन्ते । स्वर्लोकस्य सुखिरूपत्वेन 'यन्न दुःखेन संभिन्न'मिति श्रुतिनिरूपितस्वर्लोकस्थितदैविजीवैः सह जायसे, श्रीवल्लभाचार्यनाम्ना प्रकटोऽसि । 'हुताशनावतारस्तु वल्लभो लक्ष्मणात्मज'इति वाक्यात् । श्रीमदाचार्याणां भक्तदुःखनिरासकत्वमाह । त्वं नृणां दैविजीवानां भक्तानां आशुशुक्षणिः आशु शीघ्रं शुचं शोकं क्षणोतीति व्युत्पत्त्या शोकनाशकोऽसि 'क्षणु हिंसाया'मिति धातोः 'सर्वधातुभ्य इन्नि'त्यौणादिकसूत्रेणेन्प्रत्यये, रूपं नित्यसापेक्षत्वादत्र वृत्तिः । यद्यपि 'रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिरि'त्यमरात् रूढोयम्, तथापि'त्वमग्ने द्युभिस्त्वमाशुशुक्षणि'रित्यत्राग्ने इति सम्बोधनमुक्त्वा त्वमाशुशुक्षणिरित्युक्तम् । तेन योगरूढोऽयं पङ्कजवत् । तेनालौकिकश्रीकृष्णाननरूपाग्नावेवास्य वृत्तिः । शोकनाशकत्वसामर्थ्यवत्त्वं तस्यैव । कोशादिषु

यल्लौकिकाग्निवाचकत्वं तत्रांशांशिनोरभेदेन तत्त्वं बोध्यम् । शोकदूरीकरणेन महाकारुणिकत्वं श्रीमदाचार्येषु । अत एव ' महाकारुणिको विभु' 'रतिरूकगस्तं प्रपद्ये' हुताश'मित्युक्तमस्मत्परिवृढैः । ननु ' शृङ्गारहास्यकरुणारौद्रवीरभयानकाः । बीभत्साद्भुतसंज्ञौ च नाट्ये चाष्टौ रसा स्मृताः' इति रसानां यथाक्रमं ' रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा । जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिता' इति करुणायाः शोकस्थायित्वेन तस्य चेष्टवस्तुविश्लेषजनितो रत्यनालिङ्गितोऽपरिमितो मनोविकारः शोक इतिलक्षणात् । यथा खुकाव्येऽजस्य प्रलापे करुण एव रसस्तत्र तत्र बाधनिश्चयादिष्टवस्तुसमीहाया अभावात् । एवं च करुणरसस्यामङ्गलप्रायत्वात्तद्विशिष्टता प्रभौ नोचितेति । यदीष्टवस्तुप्राप्तितया रत्यालिङ्गितशोकस्तत्र रतिस्थायितया विप्रलम्भ एव रस इति चेत्सत्यम् । ' आश्रितार्त्यग्निना हेम्नो रक्षितुर्हृदयद्रवः । अत्यन्तमृदुचित्तत्वमश्रुपातादिकृद्भवात् । कथं कुर्यां कदा कुर्यामाश्रितार्तिनिवारणम् । इतीच्छादुःखदुःखित्वमार्तानां रक्षणत्वरा । परदुःखानुसन्धानाद्विह्वलीभवनं विभोः । कारुण्यात्मगुणस्त्वेष आर्तानां भीतिवारक' इति भगवद्गुणदर्पणे मधुराचार्योक्तेरिष्टवस्तुविश्लेषजनितरत्यालिङ्गितोऽपरिमितो मनोविकार' शोक इति । रतिविशिष्टस्थायितयात्र करुणरसः तद्विशिष्टता प्रभुषु । यत्तु मृत एव करुणरस इति । तदसाधु । विकृतदुग्धवत्तस्याप्रयोजकत्वात् । अत एव 'भवभूतेः संबन्धाद्भूधरभूरेव भारती भाति । एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा' इति गोवर्धनोक्ति' संगच्छते । तथा च । 'करुणादावपि रसे जायते यत्परं सुखम् । सुचेतसामनुभवः प्रमाणं तत्र केवलम् ॥ सर्वत्र करुणाख्यस्य रसस्यैवोपपादनात् । भवेद्रामायणादीनामन्यथा दुःखहेतुता ॥ तथात्वे रामपादाब्जप्रेमकल्लोलवारिधिः । प्रीत्या रामायणादीनां शृणुयाद्धनुमान् कथमि'ति गौडमतानुवर्तिभिर्भक्तिरसामृतसिन्ध्वादुक्तम् । नच रतिविशिष्टतया विप्रलम्भ एवेति वाच्यम् । विप्रलम्भे उभयनिष्ठरतित्वेनात्र तु स्वाश्रितार्तिदूरीकरणत्वेन रतेरेकनिष्ठत्वान्महान् भेद । उभयनिष्ठत्वे तु सहेतुकत्वे कारुण्याभावात शृङ्गारे तु एकनिष्ठरतौ रसाभास एव स्यादित्यलम् । प्रकृतमनुसरामः । सर्वतः श्रैष्ठ्यमाह—त्वमित्यादि । त्वमद्भ्य' श्रेष्ठोसि कारणं त्वमेवासि । अबादिग्रहणं सर्वस्य जगत उपलक्षणार्थम् । 'भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शित' इति श्रीभागवतवाक्यात् भारतस्य वेदार्थरूपत्वात्तदत्र मानम् । तथा हि । खाण्डवदाहप्रसङ्गे मन्दपालस्तुतौ सर्वमुखरूपत्वं सर्वान्तर्यामित्वं पूर्वमुपपाद्य सृष्टिकर्तृत्वं स्वव्यतिरेकेण जगतोऽभावत्वमाह पद्येनैकेन । 'त्वया सृष्टमिदं विश्वं वदन्ति परमर्षयः । त्वदृते हि जगत्कृत्स्नं सद्यो नश्येद्धुताशने'ति ब्रह्मत्वमुपपाद्यान्तरङ्गभक्ता' समर्पितदेहागारादयः 'कर्माण्येकं तस्य देवस्य सेवे'ति पुरुषोत्तमवाक्यात् तनुवित्तजामानसीसेवाकर्तारो नमनमात्रेण लीलाप्रवेशाख्यां गतिं प्राप्नुवन्तीत्याह । 'तुभ्यं कृत्वा नमो विप्राः स्वकर्मविजितां गतिम् । गच्छन्ति सह पत्नीभिः सुतैरपि च शाश्वतीं'मिति । अत्र स्वकर्मणा भगवत्सेवारूपेण विजितां गतिं लीलाप्रवेशाख्यां दारादिभिः सह गच्छन्तीत्यर्थः । तथा च श्रीमदाचार्यचरण-

नमनफलमुदितं श्रीमत्प्रभुचरणैः । 'पितृपदसरसिजनततितिविनिहतविश्वाशुभै'रिति टिप्पणीप्रारम्भप्रतिज्ञावाक्ये । पालनं संहारश्च तवैव कर्मणी इत्याह । 'त्वामग्ने ज्वलनादाहुः खे विपक्वाः सविशुतः । दहन्ति सर्वभूतानि त्वत्तो निष्क्रम्य हेतय' इति । हेतयो ज्वालाः । जगत्सृष्टिस्त्वत्त एवेत्याह । 'जातवेदस्त्वयैवेदं विश्वं सृष्टं महाद्युते । तवैव कर्म विहितं भूतं सर्वं चराचरम् ।' सर्वस्वरूपात्मकत्वं सर्वाश्रयत्वमाह द्वाभ्याम् । 'त्वय्यापो विहिताः पूर्वं त्वयि सर्वमिदं जगत् । त्वयि हव्यं च कव्यं च यथावत्संप्रतिष्ठितम् । त्वमेव दहनो देव त्वं धाता त्वं बृहस्पतिः । त्वमश्विनौ यमो मित्रः सोमस्त्वमसि चानिल' इति । आप इति भूतान्तरोपलक्षणम् । 'त्वमेव दहन' इत्यनेन लौकिकोऽग्निस्तव विभूतिरित्युक्तम् । एवं च सर्वान्तर्यामित्वं सर्वकर्तृत्वं सर्वभोक्तृत्वं सर्वरूपत्वं सृष्ट्याद्यलौकिककार्यकर्तृत्वं प्राकृताग्नेर्न सम्भवतीत्यलौकिकोऽग्निर्ब्रह्मरूपः पुरुषोत्तमाननाधिष्ठाताऽस्मानमित्यादि वैश्वानर इति श्रुतिसूत्रप्रतिपादितः स इति बोध्यम् । न च मुनिना स्वपुत्ररक्षणार्थमेव स्तुतिः कृता तत्र स्वकार्यगौरवादसंभवन्तोऽपि धर्मास्तस्मिन् प्रतिपादिता इति वाच्यम् । 'धर्मज्ञानां मुख्यतमस्तपस्वी शंसितव्रतः । आसीन्महर्षिः श्रुतवान्मन्दपाल इति श्रुतः । स मार्गमाश्रितो राजन्नृषीणामूर्ध्वरेतसाम् । स्वाध्यायवान् धर्मरतस्तपस्वी विजितेन्द्रिय' इति तत्र पूर्वमेवोदितत्वात् तस्याप्तत्वात्स्वकार्येऽप्यन्यथा भाषणं न संभवति । 'अनुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन निश्चयवान् रागादिवशादपि नान्यथावादी यः स स ' इति चरके पतञ्जलिः । एवं सर्वश्रेष्ठत्वमुपपाद्य त्वमेव दैविजीवानां पालक इत्याह नृपते इति । नृशब्देन भगवद्भक्तास्तेषां पतिः स्वामी तेषां रक्षक इत्यर्थः । त्वं शुचिः सदा पवित्रोऽसि ' तदाऽहं वल्लभकुले द्विजाचाररतेऽमले'इति ब्रह्माण्डवचनम् । अनेन भवत्स्मरणेन अन्येषामपवित्र्यं नश्यतीति सूचितम् । यद्वा शुचिः शृङ्गाररसरूपोऽपि । ' शृङ्गारः शुचिरुज्ज्वल'इत्यमरः । एतेन रसरूपत्वं श्रीमदाचार्येषु बोधितं तदुपपादितमेव पूर्वम् । किञ्च अग्निमीड इत्यादिमन्त्राणामर्थ उच्यते । अग्निर्वै मुखमि'ति श्रुतेः ' अग्निर्मुखं यस्य तु जातवेदा' इति श्रीभागवतवाक्यात् वैश्वानरस्य पूर्णपुरुषोत्तममुखारविन्दाधिष्ठातृत्वनिश्चया'दग्निर्वै देवानामवमो विष्णुः परम ' इति ब्राह्मणे उक्तत्वात् तस्य प्राधानिकत्वनिश्चयेन ' हुताशनावतारस्त्वि'त्यादिवाक्याच्छ्रीमदाचार्याणां तद्रूपत्वात् ' प्रधानेषु कृतो यत्नः फलवान् भवती'ति महाभाष्यकारैरुक्तत्वादृग्वेदप्रारम्भेऽलौकिकाखिलगुणसागररूपश्रीमद्भगवन्मुखाधिष्ठातृहुताशनरूपश्रीमदाचार्यप्रतिपादकसूक्तमारभ्यम् । तत्र केचिन्मन्त्रा मया व्याख्यायन्ते । तत्राद्यो मन्त्रः । ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ १ ॥ एतन्मन्त्रावतरणे—अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोऽग्निः कस्मादग्रणीर्भवत्यग्रं यज्ञेषु प्रणीयतेऽङ्गं नयती'ति निरुक्तकारैर्गदितम् । तत्र पृथिवीस्थान उक्तवक्ष्यमाणश्रुत्यादिरीत्या पृथिव्यामवतीर्णः श्रीवल्लभाचार्योऽग्निः अग्रणीः सर्वतः श्रेष्ठ इत्यर्थः । यद्वा अग्रं मुख्यं प्रकृष्टं पदं ' यत्र दुःखेने'ति लक्षितं व्यापिवैकुण्ठाख्यं नयतीत्यग्रणीः 'सत्सूद्विषे'त्यादिना क्विप् ' अग्रग्रा-

माम्या नयतेर्णो वाच्य ' इत्यनेन णत्वम् । अग्रं प्रकृष्टं पुष्टिभक्त्याख्यं फलं यज्ञेषु प्रणीयते प्रापयति । अनेन यज्ञादिकरणेन भक्तिप्रतिबन्धनाशकत्वेन यज्ञादीनां भक्तिमार्गसाधकत्वं सूचितम् । ' यागादौ भक्तिमार्गैकसाधनत्वोपदेशक ' इति वाक्यात् । अग्रं नयतीति ' अग्रं गात्रान्तिकोपायप्रतीकेषु प्रधानके ' इति विश्वकोशादग्रं प्रधानं मुखं नयति भक्तेषु प्रापयतीत्यर्थो बोध्यः । मन्त्रार्थस्तु 'ॐमिति ब्रह्म ॐमितीदं सर्वं ॐकार एवेदं सर्वं' 'प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः । अपूर्वोऽनन्तरो बाह्योऽनपरः प्रणवोऽव्ययः । सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च । एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् । प्रणवं हीश्वरं विद्यात् सर्वस्य हृदयस्थितम् । सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचती'ति माण्डूक्योपनिषदि 'ॐतद् ब्रह्म ॐतद्वायुः । ॐतदात्मा ॐतत्सत्यम् ॐपुरोर्नम'इत्यादिश्रुतिषु ' ॐमित्येकाक्षरं ब्रह्म ' ' प्रणवः सर्ववेदेषु गिरामस्म्येकमक्षरम् ' ' आद्यं तु अक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता । वाङ्मयं प्रणवः सर्वं तस्मात्प्रणवमभ्यसेदि'त्यादिस्मृतिषु प्रणवस्य ब्रह्मत्वनिश्चयादत्रोङ्काराग्निशब्दयोर्वाच्यवाचकयोरत्यन्तभेदाभावात् सामानाधिकरण्येनान्वयः । ॐविश्वं विष्णुरित्यादिवत् । किञ्च ' ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा बहिर्यातौ तस्मान्माङ्गलिकावुभावि'ति पुराणान्तरवाक्यान्मङ्गलवाचकत्वेनाग्निशब्देऽन्वयादग्नावपि मङ्गलमयत्वं ज्ञेयम् । किञ्च मङ्गलरूपप्रणवस्य प्रारम्भे मङ्गलकर्तव्यता वेदसूचितेत्यन्यदेतत् ' ॐमभ्यादाने ' इति सूत्रादत्र प्लुतः । एवं च अग्निं परब्रह्म श्रीवल्लभाचार्याख्यं ' आचार्यो भगवानग्नि'रिति वाक्यात् । ' हुताशनावतारश्च गोपरूपः सुदर्शनः ।' ' हुताशनावतारस्तु वल्लभो लक्ष्मणात्मज ' इति संमोहनतन्त्रादग्निपदमत्र श्रीमदाचार्यवाचकम् । ईडे अहं स्तौमि । कर्तात्र मन्त्रद्रष्टा । स्तुत्यर्थकधातोः प्रयोगेण श्रीमदाचार्येषु परमैश्वर्यं ध्वनितम् । स्तुतिप्रयोजकीभूतगुणानामीश्वर एव सत्त्वात् प्रथममेव श्रीमदाचार्याग्निस्तवकरणेन सर्वत्र प्राधान्यमस्यैवेति ध्वनितम् । नन्वत्राग्निपदेन आचार्याणां ग्रहणं कथमिति शङ्कानिरासायाचार्यवाचकपदमाह । पुरोहितमिति । 'गर्गः पुरोहितो राजन् ' 'यदूनामहमाचार्य ' इति श्रीभागवतवाक्याभ्यां पुरोहिताचार्ययोः पर्यायत्वमतः पुरोहितं श्रीवल्लभाचार्यमित्यर्थः । अत एवा'चार्यो भगवानग्नि'रित्युक्तं श्रीप्रभुचरणैः । ननु यज्ञादिनैव सकलसिद्धिः श्रुत्यादिषु निरूपितेति किं श्रीमदाचार्यस्तुत्यादिनेत्यत आह यज्ञस्य देवमिति । यज्ञशब्दातारं यज्ञभोक्तारमित्यर्थः । ' यज्ञभोक्ते'ति वाक्यात् । अथवा यज्ञस्य देवं प्रकाशकमित्यर्थः । ' कर्ममार्गप्रवर्तक ' इति वाक्यात् यज्ञपतित्वेनास्य शरणेन यज्ञोदितफलप्राप्तिः सुलभेति भावः । याजकत्वमप्याह ऋत्विजमिति । याजकमित्यर्थः । ' ऋत्विजो याजकाश्च ये ' इत्यमरसिंहेनोक्तम् । एवं यज्ञकारयितृत्वमुपपाद्य यज्ञकर्तृत्वमाह । होतारं यज्ञकर्तारमित्यर्थः । यज्ञकर्तेति वाक्यात् । एवं च यज्ञकर्तृत्वं याजकत्वं यज्ञदेवत्वं आचार्यत्वमित्यनेकधर्मविशिष्टत्वं अलौकिकहुताशनस्यैव संभवति न तु लौकिकाग्नौ । अनेकविधधर्मवैशिष्ट्यमेव ब्रह्मत्वमिति । ननु

सर्वभजनसमर्थन्वेऽपि श्रीमदाचार्यस्तुतौ किं फलमित्याह रत्नधातममिति । रत्नानि दधातीति रत्नधाः 'क्विप् चे'ति क्विप् तेषु अतिशयितं 'अतिशायने तमबिष्ठना'विति तमप् । भगवद्भजनैकरत्नमित्यभियुक्तोक्तत्वात् भगवद्भजनरत्नपोषकेषु श्रेष्ठतममित्यर्थः । निरुक्तौ तु रमणीयधनानां दातृतममित्युक्तं तत्र लौकिकधनानां क्षयिष्णुत्वेन रमणीयत्वाभावात् भगवत्सेवौपयिकधनदातारमित्यर्थः । यद्वा 'भकरत्नपरीक्षक' इति वाक्यात् अन्तरङ्गभक्ता रत्नानि तेषु साक्षादनुभवैकगम्यानन्ददातृषु श्रेष्ठतममित्यर्थः । धाधातोर्दानार्थत्वं निरुक्तकारैरुक्तं तत्र धातूनामनेकार्थत्वात्तत्त्वं बोध्यम् । एतेन श्रीमदाचार्योपसत्तिरेव कर्तव्येति तदैव चानन्दानुभवो दासानामिति सूचितम् ॥ ननु भवद्भिरेव स्तूयते किमन्यैः स्तुतः । तत्र प्राचीनैर्महर्षिभिः स्तुतो नूतनैश्च स्तोतव्य इत्याह द्वितीयमन्त्रेण 'अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स देवाँ एह वक्षति ॥' शिष्टाचारप्रमाणं दर्शयति पूर्वेभिरिति । पूर्वैः प्राचीनैर्वृद्धैर्महर्षिभिरन्तरङ्गभक्तैरीडित इति शेषः । पूर्वशब्दाद्भिस् 'अतो भिस ऐस्' इति शास्त्रेण प्राप्ते सोर्निवृत्तिः 'बहुलं छन्दसी' तिसूत्रेण । 'ऋषयः सत्यवचसः' इत्यमरात् सत्यवचोभिः परमाप्तैः परावरज्ञैर्मन्त्रदर्शिभिरीडितः । एवञ्च स्तुतिप्रयोजकीभूतगुणाख्यना श्रीपूर्णपुरुषोत्तमपरब्रह्मण्येवेति तद्रूपमेव श्रीमदाचार्याणामिति निश्चितम् । अन्यथा परमाप्तैस्तैः स्तुतिविषयीकृतोऽग्निर्न स्यात् । आप्तलक्षणं तूक्तमेव । यदि स्तुतिः स्तुतिप्रयोजकीभूतगुणारोपेण कृता स्यात्तर्हि मिथ्याभाषणत्वेन ऋषित्वं भज्येत् । 'मूर्खो यः सोऽनृतं वक्ती'ति वक्ष्यमाणवाक्यान्मूर्खत्वापत्तिः । एवञ्च ऋषिभिः प्राचीनैः स्तुतिः कृता ।

यथा भारते मन्दपालेन कृता । तत्पुत्रैश्च परमर्षिभिः । तत्र मन्दपालस्तुतिस्तु पूर्वमेवोपनिबद्धा । तत्पुत्रनिरूपितस्तुतिश्लोकाः कतिचिदुपन्यस्यन्ते । तत्र स्तुतिकर्तारो मन्दपालेन जरितानाम्न्यां स्वपत्न्यां जरितारि-सारिसृक्व-स्तम्बमित्र-द्रोणेतिनामानश्चत्वारः शार्ङ्गिण उत्पादितास्तेषां ब्रह्मवादित्वमुदितम् । तत्र 'तस्यां पुत्राननजयच्चतुरो ब्रह्मवादिन' इति । एवञ्च ब्रह्मवादिभिः स्तुतेर्निरूपितत्वात् कृष्णवर्त्मनः परब्रह्मत्वमुररीकार्यम् । अत एव स्तुतिसमाप्तौ श्रीमदग्निनाप्युक्तम् 'ऋषिर्द्रोणस्त्वमसि ब्रह्मैतद्व्याहृतं त्वया । ईप्सितं ते करिष्यामि न च ते विद्यते भय'मिति । एवञ्च परब्रह्मत्वं सिद्धमेव श्रीमद्वैश्वानरस्य । अस्यैव स्तुतिर्निगदिता तैः । तथाहि जरितारिणा 'ऊर्ध्वं चावधः सर्वत्र पृष्ठतः पार्श्वतस्तथा । अर्चिषस्ते महावीर्य रश्मयः सवितुर्यथे' त्यनेन सर्वव्यापकत्वम् । सारिसृक्वस्तुतौ 'माता प्रणष्टा पितरं न विद्मः पक्षा जाता नैव नो धूमकेतो । न नस्त्राता विद्यते वै त्वदन्यस्तस्मादस्मान्पाहि बालांस्त्वमग्ने' इति । अस्य प्रकटार्थस्तु स्पष्ट एव । अन्ततस्तु श्रीभागवते 'पिता न स स्याज्जननी न सा स्याद्गुरुर्न स स्यात्स्वजनो न स स्यात् । बन्धुर्न स स्यात्सुहृदो न स स्यान्न मोचयेद्यः समुपेतमृत्यु' मिति वाक्यात् । अत्र माता प्रणष्टा अस्मदुद्धरणेऽसमर्था । पितरं पालकं भगवद्धर्मरक्षकं न विद्मः न जानीमः ।

पक्षा जाता नैवेति स्वस्यासामर्थ्यमुक्तम् । पक्षा स्वस्य हितकारिणो नैव जाता । धूमकेतो हे श्रीवैश्वानर । अत्र धूमकेतुपददानेन स्वसेवकशत्रुनाशकत्व ध्वनितम् ' रोपदृक्पातसम्प्लुष्टभक्त द्विड्भक्तसेवित' इति सर्वोत्तमस्तोत्रे । न नत्राता त्वदते त्वदन्य न नत्राता अस्माकमुद्धारक न कोपि वै निश्चयेन नास्ति । तस्मादस्मान् बालान् सर्वथा असमर्थान् त्राहि रक्ष स्वदर्शन- दानेनासुरमतान्ध्यनिवृत्त्या जीवयेति भाव । हे अग्ने, लौकिकाग्निषु एतादृशोद्धारकत्वाभावा दग्निशब्देनालौकिकाग्निपरब्रह्म श्रीमद्वल्लभाचार्या एव गृह्यन्त इति भाव । न नत्राता विद्यते वै त्वदन्य इत्यनेन पुष्टिमार्गीयाणामन्याचार्येण नार्थसिद्धिरिति सूचितम् ।

पुनर्लौकिकविलक्षणस्वरूपनिरूपणपूर्वक श्रीमदाचार्यशरण प्रार्थयन्ति । 'यदग्ने ते शिव रूप ये च ते सप्त हेतय । तेन न परिपाहि त्वमार्तान शरणेपिण '। अस्यार्थ । हे अग्ने, यत् ते तव शिव कल्याणकारक भगवदाननाधिष्ठातृश्रीवल्लभाचार्याख्य रूपम् । एतेन जगदमङ्ग लनाशकत्व ध्वनितम् (ध्वन्यते) । ये च ते सप्त सप्तसंख्याका श्रीमद्गिरिधरादय पौत्रा हेतय ज्वाला प्रदीप्यमाना तेन रूपेण तैश्चेति वचनविपरिणामेनान्वय । ' असति विशेषा नुशासने विशेषणविशेष्ययो समानविषयत्व तन्त्र ' मित्यनुशासनात् । अस्मान् जीवान् पाहि उद्धरेत्यर्थ ॥ स्नन्त्रमित्रस्तुतौ ' सर्वमग्ने त्वमेवैकमन्त्वयि सर्वमिदं जगत् । त्व धारयसि भूतानि भुवन त्व बिभर्षिच । त्वमग्ने हव्यवाहस्त्व त्वमेव परम हवि । मनीषिणस्त्वं जानन्ति बहुधा नैकधापि च । सप्तोलाकाँस्त्रीनिमान् हव्यवाह काले प्राप्ते पचसि पुन समिद्ध । त्व सर्वस्य भुवनस्य प्रसूतिस्त्वमेवाग्ने भवसि प्रतिष्ठे'ति सर्वरूपत्व सर्वजगदाधारत्वं भूतधारकत्व सकल्पोपर- त्वमग्निरूपत्व हव्यवाहत्व विद्वज्जनवेत्तृत्वमनेकैकरूपत्व सकललोकोत्पादकत्व पालकत्व सहारकत्व निरूपितमिति नानाविधत्व सर्वभवनसमर्थपरब्रह्मान्तरा न सङ्गच्छते ॥ द्रोणस्तुतौ ' सूर्यो भूत्वा रश्मिभिर्जातवेदो भूमेरम्भो भूमिजाता-रसाश्च । विश्वानादाय पुनरुत्सृज्य काले [त्वमेव] वृष्ट्या भावयसीह शुक्र । इद वै सद्म तिग्माशो वरुणस्य परायणम् । शिवत्राता भवास्माकमस्मानद्य विमोचये ' त्यलौकिकधर्मविशिष्टपरब्रह्मतया ऋषिभिरीडितो यथा तथा श्रीमदाचार्यावतारानन्तर नूतने ऋषिभिर्भक्तैरीड्य स्तोतु योग्य । स्तुत्यादिना श्रीमदाचार्या प्रसन्ना भवन्तीति भाव । ' स्वयशोगानमहृष्टहृदयाम्भोजविष्टर ' इति सर्वोत्तमस्तोत्रे निगदित श्रीप्रभुभि । ' किमलभ्य भगवति प्रसन्ने श्रीनिकेतने' इति भागवतवाक्येन श्रीमदाचार्यप्रसादे सर्वेष्टसिद्धिरिति भाव ।

एव स्तुतिकर्तव्यतामुपपाद्य श्रीवल्लभाचार्या अवतीर्य देवान् नाममन्त्राद्युपदिशन्तीत्याह स इति । य सर्वभवनसमर्थपरब्रह्मत्वेनोपात्तोऽलौकिकोऽग्नि श्रीवल्लभाचार्य स एह इहेत्यर्थ । अवतीर्येति शेष । अस्मिन् भूलोकेऽवतीर्य देवान् दैवजीवान् वक्षति शरणमन्त्राद्युपदेश करि ष्यतीत्यर्थ । अत्र व्यञ्जनलोप वक्ष्यतीत्यपेक्षिते । यथोक्त बृहद्देवतायाम् ' वर्णस्य वर्णयोर्लोपो बहूना व्यञ्जनस्य वे'ति । ' अत्राण्यस्मै पड्भि सम्भरन्ती'त्यत्र वर्णस्य लोप अनत्राणीत्यपे-

क्षिते । 'प्रिया तष्टानि मे कपि'रित्यत्र वर्णयोर्लोपः वृषाकपिरित्यपेक्षिते । 'अयं नाभा वदति वल्गुवो गृहे' । 'दनो विश इन्द्र मृध्रवाच' इत्यादौ बहूनां लोपः अयं नाभानेदिष्ठ इत्यपेक्षिते । 'तत्वा यामी ' त्यत्रैकवर्णलोपः यानामीत्यपेक्षिते । ' अघासु हन्यन्ते गाव ' इत्यत्र व्यञ्जनलोपः मघास्वित्यपेक्षिते इति तदुदाहरणं बोध्यमित्यर्थः ॥ २ ॥

अतःपरमन्यमन्त्रेण सर्वतःश्रैष्ठ्याद्यनेकधर्माधारत्वनिरूपणपूर्वकं श्रीमदाचार्याणामन्तरङ्गभक्तसाहित्येन प्रादुर्भावमाहुः । 'अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः । देवो देवेभिरागमत्' ॥ ३ ॥ अर्थस्तु । अग्निः श्रीवल्लभाचार्यः । होता तृप्तिकारकः सर्वेषां पालक इत्यर्थः । 'प्रीणनमप्यस्यार्थो भवती'ति महाभाष्यात् । यद्वा श्रीमत्पुरुषोत्तमतृप्तिकारकः । ' व्रजाधिपतिरिन्दिराप्रभृतिमृग्यपादाम्बुजः क्षणेन परितोषितस्त्वदनुगत्वमेवास्तु मे ' इति श्रीमत्प्रभुचरणोक्तेः । अग्निमीड इत्याद्यमन्त्रे होतारमितिपदेन हवनकर्तृत्वमुपपादितमतोऽत्र तृप्तिरूपोऽर्थ एव ज्यायान् । कविः ' संख्यावान् पण्डितः कवि ' रित्यमरात् कविः पण्डित इत्यर्थः । ' श्रीभागवतगूढार्थप्रकाशनपरायणः । साकारब्रह्मवादैकस्थापको वेदपारगः । मायावादनिराकर्ता सर्ववादिनिरासकृ'दित्यादिवाक्योक्तं सूचितमेतेन । यद्वा कविः धीमानित्यर्थः । ' धीमान् सूरिः कृती कृष्टि ' रित्यमरः । एतेन ' मेधावी छिन्नसंशय'इत्यागमोक्तलक्षणवैशिष्ट्यं ज्ञेयम् । यद्वा लोकोत्तरवर्णनकरणशालीत्यर्थः । क्रतुः क्रतुरूप इत्यर्थः । ' क्रतुर्धर्मश्च यन्मय ' इति श्रीभागवत उक्तम् । सत्य इति सत्यात्मक इत्यर्थः । ' यदा यदे ' तिवाक्यात् सत्यवचनोऽस्मि । यतः श्रीवल्लभाचार्यनाम्नावतीर्णोऽस्मीति भावः । ' सत्यात्मकं त्वां शरणं प्रपन्ना ' इति श्रीभागवते सत्यात्मकत्वं यथा श्रीकृष्णे तथा श्रीमदाचार्याणां तत्त्वमिति भावः । सत्यविशिष्टत्वमनुक्त्वा यत्सत्यपदमुक्तं तेन यज्ञानन्दयोरुपलक्षकं तत् । ' सत्यं विज्ञानमानन्दं ब्रह्मे'ति श्रुत्युक्तं श्रीमदाचार्येषु प्रसिद्धमिति भावः । ' सत्यादिगुणसाहस्रैर्युक्त ' मित्यादिवाक्यादन्यगुणानामप्युपलक्षणम् । सत्यविशेषणेन सत्यादयो रूपादभिन्ना एवेति सूचितम् । श्रीमदाचार्याणां गुणगानं कर्तव्यमित्यभिप्रेत्य विशेषणमाह चित्रश्रवस्तममिति । चित्राणि विविधलीलाकर्मानुरूपाणि श्रवांसि श्रवणीयानि नामान्यस्येति चित्रश्रवाः अतिशयेन चित्रश्रवा इति चित्रश्रवस्तम इत्यर्थः । ' अतिशायने तमबिष्ठना ' विति तमप् । अतिशयित्वं च विविधावतारापेक्षया बोध्यम् । एतेन श्रीमदाचार्यगुणलीलानुरूपनामश्रवणादि कर्तव्यमवश्यमिति सूचितम् । यद्वा चित्रं श्रयो यशो यस्यासौ चित्रश्रवाः अतिशयेन स इति चित्रश्रवस्तमस्तमित्यर्थः । एवं श्रीमदाचार्याणां सकलाप्यायकत्वं पण्डितत्वं यज्ञमयत्वं सत्याद्यनेकगुणार्णवत्वं परब्रह्मत्वं श्रवणीयलीलागुणनामत्वं निरूप्य शुद्धपुष्टिमार्गीयभक्तिप्रथनाय श्रीमदाचार्याणां नित्यलीलास्यान्तरङ्गभक्तसाहित्येन प्रादुर्भावमाह देवेत्यादि । दिवुधातोः क्रीडार्थकत्वाद्भगवल्लीलाम्बुधिभिराक्रान्तरूप इत्यर्थः । तथाच श्रीमत्प्रभुचरणैः ' स्फूर्जद्रासादिलीलामृतजलधिभराक्रान्तसर्वोऽपि शश्व ' दित्युक्तम् । देवैः भगवल्लीलामध्यपातिभिरन्तरङ्गभक्तैः सह

आगमत् । भूतले इति शेष । आगमनत्वोक्तौ श्रीमदाचार्याणा व्यापिवैकुण्ठादौ स्थिति सूचिता, नित्यत्व च ध्वनितम् ॥ ३ ॥

एव श्रीमदाचार्याणा सान्तरङ्गभक्ताना प्रादुर्भावमुक्त्वा श्रीकृष्णास्यरूपत्व निरूपयन् प्रार्थयति । यदङ्ग दाशुषे त्वमग्ने भद्र करिष्यसि । तवेत्तत्सत्यमङ्गिर ॥ ४ ॥ अर्थस्तु । हे यदङ्ग यस्य श्रीभगवतोऽङ्ग मुख हे श्रीवल्लभाचार्य, 'अग्निर्वै मुख' मिति श्रुते । 'श्रीकृष्णास्य कृपानिधि'रितिवाक्यात् । 'अग्निर्मुख यस्य तु जातवेदा जात क्रियाकाण्डनिमित्तजन्मा। अन्त समुद्रे विदधत् स्वधातून् प्रसीदता न स महाविभूति'रिति श्रीभागवतवाक्याच्च । एतदर्थस्तु । यस्य श्रीभगवतो मुख जातवेदा अग्नि श्रीवल्लभाचार्य जात भूतले इति शेष । धरण्या प्रादुर्भूत इत्यर्थ । 'जातवेदसे सुनवा'मेति श्रुतौ, जातमिद चराचर स्थित्युत्पत्तिप्रलय'मिति निरुक्तकारैरुक्तम् । तेन ब्रह्मत्वमुक्तम् । जात वेदो धन यस्मादिति व्युत्पत्तौ भगवद्भजनरूपप्रादुर्भावकर्तृत्वेन भक्ताना सकलदारिद्र्याभावतया कल्याणकारकत्व श्रीमदाचार्येषु । यद्वा जात वेदो यस्मात्स जातवेदा । 'नि श्वसितमस्य वेदा ', 'नि श्वसितमेतद्यदृग्वेद ' इति श्रुते, 'दैवोद्धारप्रयत्नात्मे'ति वाक्यात् प्रादुर्भावस्य दैवोद्धारहेतुकत्वात् दैवोद्धारश्च भगवद्भजनरूपकर्मप्रादुर्भावेनेति तदर्थ प्रादुर्भाव इत्याह क्रियाकाण्डनिमित्तजन्मेति । 'कर्माण्येक तस्य देवस्य सेव'ति पुरुषोत्तमवाक्यात् क्रियाशब्देन भगवत्सेवन तस्या काण्ड तत्प्रतिपादक वेदादिशास्त्रप्रकरण तन्मोहकमतप्रचारतया लुप्त तदुद्धारार्थमेव जन्म प्रादुर्भावो यस्य स । यद्वा कर्ममार्गप्रवर्तनार्थमेव प्रादुर्भाव इत्यर्थ । 'कर्ममार्गप्रवर्तक ' इति वाक्यात् । श्रीभागवतार्थस्य दुरवगाहतया 'अर्थ तस्य विवेचितु न हि वरो वैश्वानराद्वाक्पते ' रितिवचनात् श्रीमदाचार्याणामेव याथार्थ्यप्रकाशकत्वम्, अतस्तत्पदयाथार्थ्य प्रकटयन् जात इत्याह अन्त समुद्र इत्यादि । अत्र समुद्रशब्दस्तत्सदृशे लाक्षणिक । सादृश्य च गाम्भीर्यवत्त्वेन 'श्रीभागवतपीयूषसमुद्रमथनक्षम' इति वाक्यात् समुद्रशब्देन श्रीभागवताख्यसमुद्रो बोध्य । तस्मिन् स्वीयान् स्वाभिमतान् धातून् शब्दान् प्रपचन् याथार्थ्य प्रकटयन् 'सर्व धातुजमाहे ' त्यभियुक्तोक्तत्वाद्धातूनित्युक्तम् । गोप्यत्वेन वर्णन च 'परोक्षप्रिया इव वै देवा' इति श्रुतेर्वोध्यम् । यद्वा अन्त समुद्रे जगति स्वीयाना भक्ताना धातून् शारीरान् प्रपचन् शुद्धीकुर्वन् । 'धातुर्देहरसादिक ' इत्यनेकार्थ । सर्वस्वनिवेदनेन तेषामपक्क निरस्यन्निति भाव । स महाविभूति श्रीमत्पुरुषोत्तमो नोऽस्मासु परि प्रसीदतामित्यर्थ । एवञ्चात्राङ्गपदेनाननस्य ग्रहणम् । एव श्रीमदाचार्याणा श्रीकृष्णास्यस्वरूप मुक्त्वा श्रीकृष्णानन्ददातृत्वमभिप्रेत्याह दाशुषे । 'दाश्वान्साह्वानि'ति सूत्रेण निपातितोयम् । भगवदानन्ददात्रे तुभ्यं श्रीवल्लभाचार्याय नम । 'अदेयदानदक्षश्चे'तिवाक्यात् । यन्नामावर्तन कुर्वता 'कृष्णाधरामृतास्वादसिद्धिरत्र न सशय ' इत्युक्त श्रीमत्प्रभुभि । 'नम स्वस्ती'ति सूत्रेण नम शब्दयोगे चतुर्थीविधानात्तन्त्राशिष्यते । हे अग्ने श्रीवल्लभाचार्य, भद्र करि-

नन्वग्निरूपत्वं सूर्यादिलोकस्थदेवाना सम्भवति तद्व्यावृत्त्यर्थमाह नमः पृथिव्यै । पार्थिवरूपधारणेनास्मिँल्लोके प्रादुर्भावः सूचितः । किमर्थं प्रादुर्भाव इत्याशङ्कानिरासायाह नम ओषधीभ्यः । दैवीजीवाना भवरोगनिवारणार्थमोषधीरूपम् । वस्तुतस्तूद्धारार्थमिति यावत् । ननु हिरण्यकशिपुमारणेन श्रीनृसिंहस्यापि महादोद्धारकत्व तादृशरीतिव्यावृत्त्यर्थमाह नमो वाचे। अस्मिन्नवतारे उद्धारस्तु वाण्या वचनद्वारा भक्तिमार्गोपदेशेन वाण्योद्धारे

ष्यसि ब्रह्मसम्बन्धादिना सर्वदोषनिवर्तनेन साक्षात्पुष्टिपुरुषोत्तमसेवौपयिक कल्याण जीवे करिष्यसीत्यर्थ । करिष्यसीत्यनेन तेषामसामर्थ्य ध्वनितम् । 'यमेवैष वृणुते तेन लभ्य' इति श्रुते । यद्वा मायामतनिरसनेन भक्त ब्रह्मवादस्थापनरूप कल्याण करिष्यसीत्यर्थ । ननु दुर्घटत्वात्पुरुषोत्तमप्राप्ते साधनमन्तरा कथ तत्प्राप्तिस्तत्राप्तिश्चेति तत्राह तवेत्यादि । तव तत् 'सकृदेव प्रपन्नाये' त्यादि 'यदा यदा हि धर्मस्ये' त्यादि वाक्यम् । सत्यम् त्रैकालिकाबाध्यम् । तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात् अस्तीत्य याहार । सत्यप्रतिज्ञ इत्युक्त सर्वोत्तमे । सत्यलक्षण तु 'प्रधान धर्मबीज यद्धित पूत प्रिय नृणाम् । गम्भीर मधुर वाक्य सत्य तच्चोत्तम विदु । लुब्धोऽर्थार्थी छली धूर्तोऽप्यसमर्थो श्रामिक प्रिय । मूर्खो य सोऽनृत वक्ति तद्दोषविरही तनु' रिति । कीदृशम् ? सत्यम् इत् श्रीमत्पुरुषोत्तमप्रापक 'इण् गतौ' णिजन्तात् क्विप् । 'ह्रस्वस्ये'ति तुक् । यद्यपि 'सकृदेवे'ति 'यदा यदे'ति च वाक्य पुरुषोत्तमस्य तथापि श्रीमदाचार्याणा भगवन्मुखरूपत्वात्तवेत्युक्तम् । श्रीमदाचार्याणा भवता लाभे प्रपन्नत्व भक्ताना सिद्ध्यति, ते तु समारासक्ततया क्षणमपि गृहादि त्यक्तुमसमर्था इति तेषामुद्धारार्थं तन्निकट गमनशीलोऽसीत्यभिप्रेत्य सम्बोधयति हे अङ्गिर हे गमनशालिन्, पृथ्वीपावनार्थं भक्तानामुद्धारार्थमित्यर्थ । यद्वा 'प्रतिक्षण निकुञ्जस्थलीलारसपूरिते' इति वाक्यात् कुञ्जात्कुञ्जान्तरगमनशील । यद्वा 'तत्सारभूतरासस्त्रीभावपूरितविग्रह' इति वाक्यात् रासनृत्यशालिन्, अङ्गेर्गत्यर्थादङ्गिरा इत्यौणादिकसूत्रेणासिप्रत्ययो रुडागमश्च निपातित । यद्यप्यय ऋषौ रूढस्तथापि तदनुपयोगाद्यौगिक एवेत्यर्थ । एवञ्च श्रीमदाचार्याणा श्रुतिभारतादिवचनै पूर्णपुरुषोत्तमत्वम् । निषधादिक तु लौकिकाग्नेरिति । एतेना'ग्ने शिवस्य माहात्म्य तामसेषु प्रकीर्तित' मित्यपि व्याख्यातमिति दिक् ।

प्रकृतमनुसराम —'पृथिवी वैश्वानर' इति निरुक्तकारोक्ते श्रीमदाचार्याणा पृथिवीत्वेन, 'वस्तुत कृष्ण एव' त्यादिवाक्यात् पुरुषोत्तमत्वेन च, 'यस्य पृथिवी शरीर'मितिश्रुत्या तेषा पृथिवीशरीरत्वेन 'आनन्दमात्रकरपादमुखोदरादि' । 'आनन्दमयोऽभ्यासात्' । 'अरूपवदेव हि तत्प्रधानत्वात्' इत्यादिश्रुतिसूत्रसन्दर्भै शरीरशरीरिणोरभिन्नत्वेन पृथिव्या इत्युक्तमित्यभिप्रेत्याहु पार्थिवरूपधारणेनेत्यादि । प्रादुर्भावात्पूर्वं श्रीकृष्णाननरूपत्वमिति भाव । बहुवचन तु विविधरोगोपशामकत्वनानेकौषधीत्वविवक्षयेति भाव । उद्धारार्थमिति । तथा च श्रीमदाचार्याणा 'दैवोद्धारप्रयत्नात्मे'ति नाम । वाग्रूपधारणमुद्धारार्थमित्यभिप्रेत्याहु अस्मिन्नवतार इत्यादि । 'दयया

कथं सामर्थ्यमित्याकाङ्क्षायामाह नमो वाचस्पतये । स्वस्वरूपं स्वयमेव प्रकाशितं 'अथं तस्य विवेचितु'मिति श्लोके पुरुषोत्तममुखारविन्दाधिष्ठातृरूपम् । ननु मुखारविन्दाधिष्ठातृरूपकथनेनांशावतारत्वं स्यादित्याशङ्कानिरासायाह नमो विष्णवे । गुणावतारविष्णुरूपव्यावृत्त्यर्थमाह बृहते करोमि । व्यापकाय पूर्णपुरुषोत्तमरूपाय । ऋग्वेदे तु 'महते करोमी'ति पाठोस्ति, तस्मिन्नपि पाठे विष्णवे महते महाविष्णवे पुरुषोत्तमस्वरूपायेत्यर्थः । एतादृशविशेषणविशिष्टाय श्रीवल्लभाचार्याय नमः करोमि । नमः पृथिव्यायिति विशेषणेन प्राकृतदेहशङ्का प्राप्ता सापि परिहृता । एतादृशविशेषणविशिष्टाः श्रीमदाचार्या एव नान्ये।

ननु 'नमो ब्रह्मण' इति श्रुतेरर्थान्तरस्यापि प्रतीयमानत्वाच्छ्रीमदाचार्यपरत्वेनैव कथं प्रतिपाद्यते, पूर्वं केनापि न प्रतिपादितमितिचेन्न । 'यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाये'ति वाक्येन यथा भगवतो भक्तानां भावनानुरूपस्वरूपधारकत्वं तथा देवस्यापि शब्दब्रह्मात्मकभगवद्रूपत्वाद्भक्तानां भावनानुसारेण स्वार्थप्रदर्शकत्वम् । अन्यथा निरुक्तौ 'चत्वारिशृङ्गे'ति श्रुतिर्यज्ञपरत्वेन व्याख्याता । सैव महाभाष्यकारैर्व्याकरणशास्त्रपरत्वेन व्याख्याता । उभावपि प्रामाणिकावपी । (१)कतरस्याप्यर्थस्याप्रामाण्यं वक्तुं न शक्यते । तस्मात् यस्मिन् शास्त्रे श्रुत्यर्थो येन रूपेण प्रतिपादितस्तस्मि

निजमाहात्म्य करिष्यन् प्रकट हरि । वाण्या यत्र तदा स्वास्य प्रादुर्भूत चकार हे' तिवाक्याद्भगवता वचनद्वारैव स्वमाहात्म्यख्यापनार्थमेव श्रीमदाचार्याणा प्रादुर्भाव कारितो भगवन्माहात्म्यप्राचुर्यवर्णनत्वेन वाग्रूपत्वमितिभाव । वाचस्पतय इति । 'षष्ठ्या पतिपुत्रपृष्ठपारपदपयस्पोषध्वि'तिसूत्रेण षष्ठीविसर्गस्य सत्वम् । अस्मादेव ज्ञापकात् षष्ठ्या अलुक् । 'पातौ च बहुल'मिति सूत्राद्बहुलमित्यनुवर्तते । तेन वाक्पतिरिति वाग्रूपत्व वाक्पतित्वमुभयं सम्भवति, ब्रह्मणि सर्वभवनसमर्थत्वात् । स्वस्य रूपमिति वाक्पतित्वमित्यर्थ । 'वाक्पतिर्विबुधेश्वर' इति वाक्यात् । मुखारविन्दाधिष्ठातृरूपमिति 'निश्वसितमस्य वेदा' इति श्रुतेर्वेदप्रादुर्भावकत्वेन तत्त्व सुवचमितिभाव । अंशावतारत्वमिति । अवयव-वात्तदधिष्ठातर्यप्यंशत्वमितिभाव । गुणावतारेति । 'सत्त्व रजस्तम इति प्रकृतेर्गुणा स्यु'रिति श्रीभागवतवचोक्तगुणावतारव्यावृत्त्यर्थमितिभाव । व्यापकायेति । पूर्वोदाहृतवचनान्यत्र प्रमाणानि । महत इति । अस्य बृहच्छब्दस्यार्थ एक एव । महद्बृहतोश्च श्रेष्ठवाचित्वात् । तदेवाहु पुरुषोत्तमस्वरूपायेति । 'वस्तुत कृष्ण एवे'ति वाक्यात् । नम इति । 'नमो ब्रह्मण' इत्यादिषु पुन पुनर्नम पदोच्चारणेन नमनातिरिक्तमन्यत्कर्तुं न शक्यत इति ध्वन्यते । नान्य इति । अन्याचार्येष्वेतादृशधर्माभावादितिभाव । 'शब्दब्रह्मभवन्त्वय'मिति वाक्यात् 'वेदो नारायण साक्षात्स्वयम्भूरिति शुश्रुम' इत्यादिवचनाच्च शब्दब्रह्मभगवतो भक्तेच्छानुसारार्थप्रकाशकत्वमित्यभिप्रेत्याहु शब्दब्रह्मात्मके त्यादि । तदेवोपपादयन्ति अन्यथेत्यादिना । अन्यथा व्याख्यानुसारार्थप्रदर्शकत्वाभावे ।

च्छाद्वे स एवार्थ इत्यर्थः । अत एव विद्यारण्येन 'चत्वारिशृङ्गे'ति श्रुतिः साक्षादृषिप्रोक्तं वेदाङ्गार्थमपि दूरीकृत्य मणवपरत्वेन व्याख्याता। तथा हि । 'चत्वारि शृङ्गाः त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश' । निरुक्तकारास्त्वेवमर्थमाहुः चत्वारिशृङ्गा इति । वेदा वा ये त उक्तास्त्रयोऽस्य पादा इति सवनानि त्रीणि । द्वे शीर्षे प्रायणीयोदयनीये। सप्त हस्तासः सप्त छन्दांसि। त्रिधा बद्धस्त्रेधा बद्धो मन्त्रब्राह्मणकल्पैः । वृषभो रोरवीति । रोरवणमस्य सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिः । 'यदेनमृग्भिः शंसन्ति यजुर्भिर्यजन्ति सामभिः स्तुवन्ति । महो देव इत्येष हि महान्देवो यद्यज्ञो मर्त्यां आविवेशेत्येष हि मनुष्यानाविशति यजनाय तस्योत्तरा भूयसे निर्वचनाय' ।

महाभाष्यकारास्त्वेवमर्थमाहुः। चत्वारि शृङ्गाः शृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः त्रयः काला भूतभविष्यद्वर्तमानाः। द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च । सप्त हस्तासो अस्य सप्त विभक्तयः । त्रिधा बद्धः त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसीति । वृषभो वर्षणात् । रोरवीति शब्दं करोति। कुत एतत् ।

द्वितीयव्याख्यानेतिरस्त्याख्यानन्तरमित्युभयोर्व्याख्यानमसङ्गतं स्यादिति शेषो बोध्यः । अत एवेति । भक्तेच्छानुसारिवेदार्थप्रादुर्भावादेवेत्यर्थः । ऋषिप्रोक्तमिति । शाकटायनयनञ्जस्युक्तमित्यर्थः । वेदाङ्गार्थमिति । निरुक्तव्याकरणयोर्वेदाङ्गत्वात्तदुक्तमित्यर्थः । तदेव वेदार्थस्य भक्तेच्छानुसारिव्याख्यानवत्त्वेनेतिबोधनार्थं निरुक्तकारादीनामर्थमनुवदन्ति तथाहीत्यादिना । तत्र पूर्वं निरुक्तकाराणां व्याख्यानमनुवदन्ति निरुक्तकारास्त्वित्यादिना । सवनानि त्रीणीति । नीचमध्योच्चोच्चारणरूपाणीत्यर्थः । प्रायणीय इति । इष्टी एते । छन्दांसीति । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यश्छन्दांसि । मन्त्रेत्यादि । अनुष्ठेयार्थप्रकाशनपरो मन्त्रः । मन्त्रब्राह्मणभेदस्तु—त्रैस्वर्येण पाठो मन्त्रः । ऐकस्वर्येण पाठो ब्राह्मणम् । श्रौतस्मार्तप्रतिपादनपरः कल्पः ।

एवं निरुक्तकाराणामर्थमनूद्य महाभाष्यकाराणामनुवदन्ति महाभाष्यकारास्त्वित्यादिना । तत्र शब्दशास्त्रप्रतिपाद्यस्य वृषभत्वेन निरूपणं कुर्वन्ति महाभाष्यकाराः चत्वारीत्यादिना । पदजातानीति । परा-पश्यन्ती-मध्यमा-वैखरीरूपाणि । अत एवाग्रे 'निपाताश्चे'ति चकारः सङ्गच्छते । नामाख्यातेति । नामशब्देन सुबन्तम् । नमन्त्याख्यातार्थं प्रति विशेषणीभवन्तीति व्युत्पत्तेः । आख्यातं तिङन्तम् । उपसर्गनिपातयोः पृथगुपादानं गोबलीवर्दन्यायेन । त्रयः काला इति । लडादिविषयाः वर्तमानभूतभविष्यद्रूपाः । नित्यः कार्यश्चेति व्यङ्ग्यव्यञ्जकभेदेन । तत्र व्यङ्ग्य आन्तरङ्गः । व्यञ्जको वैखरीरूपः । सप्त विभक्तय इति । सुप इत्यर्थः । केचित्तु तिङामपरिग्रहप्रसङ्गात्पष्ठ्यर्थेन सह सप्त कारकाणि विभक्तिपदाभिधेयानीति व्याचक्षते । उरसीति । 'हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम् । औरस्यं तं विजानीया'दिति शिक्षायाम् । कण्ठे इति । आकारादयः । शिरसीति । 'स्युर्मूर्धन्या ऋटुरषा' इति शिक्षायां मूर्धन्या इत्यर्थः ।

रौतिः शब्दकर्मा । महो देवो मर्त्यां आविवेशेति महान् देवः शब्दः मर्त्या मरणधर्माणो मनुष्यास्तानाविवेश । महता देवेन नः साम्यं स्यादित्यध्येयं व्याकरणम् ।

रामानुजाचार्यानुयायिनस्त्वेवमर्थमाहुः चत्वारीति । यस्य परमात्मनश्चत्वारो वेदाः शृङ्गाणि। नित्यबद्धमुक्तरूपास्त्रयोपि पादाः । शुद्धसत्त्वं त्रिगुणसत्त्वं च द्वे शिरसी। महदादयः प्रकृतिविकृतयः सप्त हस्ताः। वृषभः श्रेष्ठो वासुदेवः त्रिधा संकर्षण-अनिरुद्ध-प्रद्युम्नतया त्रिधा बद्धः भूतः सन् सर्वं वस्तु रोरवीति । 'रु शब्दे' इति धातुः। व्यवहरति नामरूपवत्करोतीत्यर्थः । तादृशो महोदेवो मर्त्यान् चेतनाचेतनपदार्थान् अन्तरात्मतया प्रविवेशेत्यर्थः ।

विद्यारण्यस्त्वेवमर्थमाह । शृङ्गाः प्रणवस्य यान्यकारादीनि तानि चत्वारि अस्य प्रणवस्य प्रतिपाद्यन्ते । प्रणवरूपस्य ब्रह्मणस्त्रय पादाः पद्यते गम्यते ब्रह्मतत्त्वमेभिरिति पादाः। अध्यात्मं विश्वतैजसप्राज्ञाः । अधिदैवं विराड्हिरण्यगर्भाव्याकृतानि । द्वे शीर्षे उत्तमाङ्गस्थाने

शिरः कण्ठ इत्यनेन मुखान्तर्गतकण्ठादिस्थानमुपलक्ष्यते । वर्षणादिति । वर्षतीति वृषभः। कामानां ज्ञानपूर्वकानुष्ठानफलत्वात् । महान्देव इत्यादि । महान् परब्रह्मस्वरूपो देवोऽन्तर्यामी। रूपशब्दो मर्त्येष्वाविष्ट इत्यर्थः । तदादेशफलमाह महतेति । परेण ब्रह्मणेत्यर्थः । साम्यं-सायुज्यम् । तदुक्तं भर्तृहरिणा 'अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् । प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते' इति ।

रामानुजाचार्यानुयायिरचितमर्थमनुवदन्ति रामानुजेत्यादि । नित्यबद्धमुक्तरूपा इति । त्रिविधा जीवा इत्यर्थः । एतेषां लक्षणानि एतद्भेदाश्चैतेषां ग्रन्थे स्पष्टानि ग्रन्थबाहुल्यभयादप्रकृतत्वाच्च न लिख्यन्ते । शुद्धसत्त्वमिति । रजस्तमःशून्यद्रव्यवर्तिसत्त्वं शुद्धसत्त्वम् । त्रिगुणसत्त्वमिति । मिश्रितसत्त्वमित्यर्थः । तन्नित्यविभूतावुपचारात्तत्प्रवर्तकेश्वरे च रजस्तमःसहवर्तिसत्त्वं मिश्रसत्त्वम् । महदादय इति । प्रकृतयश्च ता विकृतयश्चेति प्रकृतिविकृतयः सप्त । तथाहि महत्तत्त्वमहंकारस्य विकृतिश्च प्रकृतेः । एवमहंकारतत्त्वं तन्मात्राणामिन्द्रियाणां प्रकृतिर्विकृतिश्च महतः। एवञ्च पञ्चतन्मात्राणि भूतानामाकाशादीनां प्रकृतयो विकृतयश्चाहङ्कारस्येति भावः। श्रेष्ठ इति। 'वृषभो वृष' इति विष्णुसहस्रनामवाक्याद्वृषभपदेन श्रेष्ठो वासुदेवो गृह्यत इति भावः। तत्र षड्गुणपूर्णो वासुदेवः । सङ्कर्षणेत्यादि । ज्ञानबलाभ्यां संकर्षणः । ऐश्वर्यवीर्याभ्यां प्रद्युम्नः। शक्तितेजोभ्यामनिरुद्ध इति गुणविभागेन भेद इति भावः । चेतनाचेतनपदार्थ इत्यादि । तेन कार्यकल्पना बोध्या । एवञ्च सूक्ष्मचिदचिद्विशिष्टं ब्रह्म कारणम् । स्थूलचिदचिद्विशिष्टं ब्रह्म कार्यमिति कारणादनन्यत्कार्यमिति विशिष्टाद्वैतमेतेषां संप्रदाय इति सूचितम् ॥

विद्यारण्योदितव्याख्यानमनुवदन्ति विद्यारण्यस्त्वित्यादि । अकारादीनीति । अकारोकारमकारा नादश्चेत्यर्थः । अध्यात्ममित्यादि । आत्मनि अधीत्यध्यात्मम् । विभक्त्यर्थेऽव्ययीभावः।

चिदचिद्रूपे द्वे शक्ती । तथैवास्य ब्रह्मणो भूरादयः सप्त लोकाः हस्तासः हस्ताः हस्तस्थानीयाः । त्रिधाबद्धः अकारोकारमकारेषु विश्वतैजसप्राज्ञैः विराड्हिरण्यगर्भव्याकृतैश्च त्रिप्रकारेण सम्बद्धः वृषभः प्रणवो महस्तेजोरूपं ब्रह्मतत्त्वम् । रोरवीति अतिशयेन प्रतिपादयति । तदेव प्रतिपाद्यत्वं स्तुतिः क्रियते । महोदेवः परमेश्वरो मर्त्यान् मनुष्यदेहान् । आविवेश सर्वतः प्रविष्टः ' स्पष्ट इह प्रविष्ट आनखाग्रेभ्य ' इति श्रुत्यन्तरात् ।

रामानुजाचार्यमतस्थैस्तु वासुदेवपरत्वेन व्याख्यातम् । तस्य च व्यूहान्तर्गतत्वात्तदपेक्षया पुरुषोत्तमपरत्वेन प्रतिपादनं सुवचम् । विद्यारण्यप्रतिपादितार्थे प्रणवपरत्वात् प्रणवस्य शब्दब्रह्मत्वेन पुरुषोत्तमप्रतिपादकत्वं पुरुषोत्तमस्य प्रतिपाद्यत्वं प्रतिपादकापेक्षया प्रतिपाद्यस्योत्कृष्टत्वात् । ' सर्वे वेदा यत्पदमामनन्ति', 'वेदैश्च सर्वैरहमेव वेद्य', इत्यनुशासनात् ' क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत' इति वाक्याच्च । वस्तुतस्तु पुष्टिलीलाविशिष्टपुरुषोत्तमपरत्वेनैव व्याख्यानमुचिततरम् ।

तथाहि चत्वारिशृङ्गा इति । 'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥' अस्य लीला-

---

अन्नमयकोशव्यष्ट्युपहितं चैतन्यं विश्वः । विज्ञानमयादिकोशत्रयव्यष्ट्युपहितं चैतन्यं तैजसो भवति । कोशादीनां व्यष्टिनिकृष्टोपाधितया मलिनसत्त्वप्रधाना । एतदुपहितं चैतन्यमल्पत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते । एकज्ञानावभासकत्वादस्य प्राज्ञत्वम् । चतुर्विधशरीरसमष्ट्युपहितं चैतन्यं वैश्वानरो विराडित्युच्यते । कोशत्रयसमष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः । चिदचिद्रूपे इति । जीवप्रकृतिरूपे इत्यर्थ ।

एवंविधभक्तानेकविधेच्छानुसारेण वेदार्थस्य स्फूर्त्या नमो ब्रह्मण इति श्रुतिरस्माभि. श्रीमदाचार्यपरत्वेन व्याख्यायते । तत्र रामानुजानुयायिविद्यारण्यव्याख्यानापेक्षयाऽस्मद्व्याख्यानस्य ज्यायस्त्वमवयवापेक्षयाऽवयविनः पटीयस्त्वात् प्रतिपादकापेक्षया प्रतिपाद्यस्य चेत्याहुः रामानुजाचार्यमतस्थैस्त्वित्यादि । पुरुषोत्तमस्योत्कृष्टत्वे प्रमाणमाहुः सर्वे वेदा इत्यादि । एतच्छ्रुत्यर्थभूतं श्रीगीतावाक्यं प्रमाणत्वेनोपन्यस्यन्ति वेदैश्चेत्यादिना । अहमेवेत्यनेनान्यव्यवच्छेदकैवकारेण मुख्यत्व्यावृत्त्यान्यपरत्वं नास्तीति सूचितम् । एतेन पुरुषोत्तमपरव्याख्यानस्य युक्तिमत्त्वं बोधितम् । तत्र पुरुषोत्तमस्वरूपं निर्दिशन्ति क्षरः सर्वाणीत्यादिना ।

योऽस्यार्थस्तमवोचाम पुरुषोत्तमवर्णनपूर्वकं पुरुषोत्तमप्राप्ति' श्रीमदाचार्यशरणेनैवेत्याशयेन श्रुतिं व्याकुर्वन्ति तथाहीत्यादिना । श्रुतिं निरूप्य अस्येति । इयं श्रुति साक्षात्पुष्टिपुरुषोत्तमलीलामध्यपातिन्यत प्रत्यक्षतो भगवन्तं निर्दिशतीति भाव । चत्वारीति । शृङ्गा इत्यत्र ' सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजाल'इतिशास्त्रेण डाप्रत्यय । चत्वारि शृङ्गाणि कस्या व्यक्तेरित्याकाङ्क्षायां यासां तानि ता व्यापिवैकुण्ठस्था गाव इत्याक्षिप्यते इत्यभिप्रेत्याहुः चत्वारि शृङ्गा

स्थभगवतः पुरुषोत्तमस्य चत्वारि शृङ्गाः चत्वारि शृङ्गाणि यासां ताश्चत्वारिशृङ्गाः चतुःशृङ्गविशिष्टा गावः व्यापिवैकुण्ठाख्यगोलोकस्था इत्यर्थः। गवां चतुःशृङ्गत्वं 'गावो यत्र भूरिशृङ्गा' इति श्रुतिव्याख्याने वक्ष्यामि । अथवा चत्वारि यूथानि शृङ्गाः प्रधानानि नित्यसिद्धायूथम्, श्रुतिरूपायूथम्, ऋषिरूपायूथम्, तुर्यप्रियायूथम्' च प्रधानाः। 'यूथं तिर्यक्समूहेपि वृन्दमात्रेपि भाषित'मिति विश्वः। 'शृङ्गः प्रधानमिच्छन्ती'त्यनेकार्थः। लीलास्थपुरुषोत्तमस्य प्राप्तिप्रकारमाह । त्रयः पादाः पद्यते लीला याभिरिति पादाः साधनरूपाः तनुजावित्तजामानसीसेवाः ।भक्तिं विना सेवा न सम्भवतीति तदर्थं सेवासाधिके मुख्यभक्ती आह । द्वे शीर्षे सख्यात्मनिवेदने भगवत्कृतिसाध्यत्वेन शीर्षपदोपादानम्। अत एवाभ्यर्हितत्वाच्छ्रवणादिसप्तभ्यः पूर्वप्रतिपादनम्।

यासामित्यादि।गवां चतुःशृङ्गत्वाप्रसिद्धेरितिसन्देहनिरासायाहुः नित्यसिद्धायूथमित्यादि । बृहद्वामनीयपुराणे श्रुतिभिर्विज्ञापितः पूर्णपुरुषोत्तमः स्वं रूपं दर्शयामास । तत्र 'नानारासरसोन्मत्तं यत्र गोपीकदम्बकम्। ततः कदम्बमध्यस्थः किशोराकृतिरच्युत'इति वाक्योक्तयूथम् । पद्मपुराणेपि श्रीकृष्णं प्रति व्यासवचनम् 'त्वामहं द्रष्टुमिच्छामि चक्षुर्भ्यां मधुसूदने'त्यारभ्य प्रार्थितः श्रीकृष्ण उवाच । 'व्यास त्वां दर्शयिष्यामि स्वरूपं वेदगोपितम्। गोपकन्यावृतं गोपैर्हसन्तं गोपबालकै'रित्यादिवाक्यैर्नित्यसिद्धायूथम् । बृहद्वामनीये भगवद्रूपदर्शनानन्तरं श्रुतय ऊचुः 'कन्दर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः । कामिनीभावमासाद्य स्मरक्षुब्धान्यसंशयम्। यथा त्वल्लोकवासिन्यः कामतत्वेन गोपिकाः।भजन्ति रमणं मत्वा चिकीर्षाजनि नस्तथा। श्रीभगवानुवाच । आगामिनि विरिञ्चौ तु जाते सृष्ट्यर्थमुद्यते । कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथे'तिवचोभिः प्रतिपादितं श्रुतिरूपायूथम् । अत्र 'यथा त्वल्लोकवासिन्यः कामतत्वेन गोपिकाः । भजन्ती'त्यनेनापि नित्यसिद्धा निरूपिताः । ऋषिरूपायूथस्तु पाद्मे उत्तरखण्डे 'पुरा महर्षयः सर्वे दण्डकारण्यवासिनः । दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् सुविग्रहम्। ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले । हरिं संप्राप्य कामेन ततो मुक्ता भवार्णवा'दिति निरूपितम् । तुर्यप्रियायूथस्तु तुर्यश्चतुर्थो यः प्रियाया यूथः । 'जनिष्यते तत्प्रियार्थं सम्भवन्तु सुरस्त्रिय' इति श्रीभागवतपद्येन तस्य भगवतः प्रिया श्रीराधा तत्सेवार्थं सुरस्त्रियः सम्भवन्त्वित्यर्थः केनचिन्निरूपितः । तथोक्तं पाद्मे 'गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः। देवकन्याश्च राजेन्द्र न मानुष्यः कथञ्चने'ति चतुर्विधत्वमुक्तम् तत्र श्रुतयः श्रुत्यवतारभूताः गोपकन्यकापदेन नित्यसिद्धा ज्ञेयाः मानुष्यत्वनिषेधात् । इदं चान्यरीत्योदितम् । वस्तुतस्तु 'नमत कृष्णतुर्यप्रिया'मिति श्रीयमुनाष्टके श्रीमदाचार्यचरणैरुक्ततया तुर्यप्रिया श्रीयमुना। तस्या यूथ इत्यर्थः । पद्यत इति 'पद गतौ'वित्यस्येदम् । पादा इति कर्मणि घञ्। मानसीसेवायाः फलरूपत्वम् । उक्तसेवासाधने इतरे । तथोक्तम् 'कृष्णसेवा सदा कार्या मानसी सा परा मते'ति श्रीमदाचार्यचरणैः । एतद्विवृतौ मानसी परा फलरूपेत्यर्थ इति श्रीप्रभुचरणाः । भक्तिमित्यादि ।

ननु सख्यस्योभयनिष्ठत्वाज्जीवानां कथं तत्सम्भवतीत्याशङ्कानिरासायाह । सप्तहस्तासः श्रवणादयः सप्त । ते जीवकृतिसाध्याः तत्करणेन भगवतो दासोपरि स्नेहसम्पा-

'स्नेहो भक्तिरिति प्रोक्त' इति पञ्चरात्रात् 'सा परानुरक्तिरीश्वरे' इति शाण्डिल्यसूत्रात् 'केवलेन हि भावेने'त्यादिवाक्याच्च भक्तिशब्दप्रवृत्तिः स्नेह एव । श्रवणादिषु भक्तिशब्दो लाक्षणिकः । तथा च भक्तिहंसे 'भक्तिपदशक्तिः स्नेह एव श्रवणादिषु तद्धेतुत्वेन भाक्त' इत्युक्तं श्रीप्रभुचरणैः । 'मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् । अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिये'ति लक्षणं लक्षणायाः । विस्तरस्तु बाहुल्यभयान्नेह तन्यते ।

श्रवणादय इति । 'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदन' मिति श्रीभागवतोक्ता दास्यन्ता इत्यर्थः । श्रवणादीनां निगमनिरूपितत्वाभावसन्देहकान्दिशीकाः केचन सन्ति तेषां संशयनिरासाय श्रवणादिनवविधप्रतिपादनश्रुतयः प्रदर्श्यन्ते । तत्र प्रायशः श्रीमदाचार्यपरत्वेनापि व्याख्यायन्ते । तथाहि 'प्रतत्ते अद्य शिपिविष्टनामार्यः शंसामि वयुनानि विद्वान् । तं त्वा गृणामि तवसमतव्यान् क्षयन्तमस्य रजसः पराके' ॥ १ ॥ अस्यार्थः । हे शिपिविष्ट शरीरान्तर्यामिन् ! तत् ते तव नाम अथेदानीं प्रशंसामि कीर्तयामि । आर्यः श्रेष्ठस्त्वं सत्याद्यनन्तगुणार्णवत्वात् 'सत्यादिगुणसाहस्रैर्युक्त'मिति तत्त्वप्रदीपे श्रीमदाचार्यचरणाः । वयुनानि ज्ञातव्यानि । विद्वानिति नामोच्चारणे । शान्त्यादिगुणसम्पन्नस्य ज्ञातव्यं नावशिष्यते । तं त्वा गृणामीति गुणसंकीर्तनं करोमि । तवसं महान्तम् अतव्यान् अल्पोऽहं अस्य रजसः पराके परपाके क्षयन्तं निवसन्तम् । इयं श्रुतिः श्रीमदाचार्यगुणगानं कर्तव्यमित्यपि बोधयतीति द्वितीयार्थः प्रदर्श्यते । यथा 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत' इति वाक्यात्तच्छब्देन पुरुषोत्तम उच्यते । यथा 'यो बुद्धेः परतस्तु स' इति गीतावाक्ये स इति तच्छब्देन पुरुषोत्तम इति व्याख्यातमभियुक्तैः । यद्यपि तत्र कामप्रकरणं 'ततो बुद्धेरात्मा ततो महान् । महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परा गति'रिति श्रुतौ बुद्धेः परत्वेन परपुरुषस्यैवोपपादनात् । एवञ्च हे तत् पुरुषोत्तम । यद्वा प्रकर्षेण तनोति स्वमाहात्म्यं श्रीमदाचार्यद्वारा विस्तारयतीति तत् ते तव शिपिविष्टनामार्यः 'शिपिविष्टः प्रकाशन' इति विष्णुसहस्रनामवाक्याच्छिपिविष्टपदेन भगवानुच्यते । शिपिविष्टस्य पुरुषोत्तमस्य श्रीवल्लभ इति नाम यस्य स श्रीवल्लभाख्यः आर्यः । पूर्वोक्तरीत्या वर्णलोपः । तेन आचार्यः तस्य वयुनानि ज्ञानानि शंसामि कीर्तयामि । ज्ञानानीत्यस्य सुबोधिन्यादिग्रन्थरूपाणीत्यर्थः । तेषां कीर्तनेनैवास्मत्सिद्धिरिति भावः । श्रीमदाचार्याणां ग्रन्थप्रकटने सामर्थ्यमाह विद्वानिति । पण्डित इत्यर्थः । एतेनासत्वमुदितम् । 'मूर्खो यः सोऽनृतं वक्ती'ति वाक्यात् । यद्वा विपश्चित्पर्यायोऽत्र विच्छब्दः । 'विद्वान् विपश्चिद्दोषज्ञ' इत्यमरकोशात् । तेन विविधभोगचातुर्यवत्त्वं लीलारसान्तःपातित्वमुदितम् । तेन श्रीमदाचार्याणां रसरूपत्वं ध्वनितम् । तं त्वेति । तं श्रीमद्वल्लभाचार्यं त्वां श्रीमत्पूर्णपुरुषोत्तमं च । 'विनापि चं

समुच्चयो भवती'ति महाभाष्यम्। गृणामि गुणगानरूपं कीर्तनं श्रीमदाचार्यगुणगानपूर्वकमेवेश्वर-भजनं कर्तव्यमिति सूचितम्। तवसमतव्यानिति पूर्ववत्। श्रीमदाचार्याणां महत्त्वेन स्वस्याल्पत्वेन च तेषु स्वामित्वं ध्वनितम्। अल्पत्वनिरूपणेन दैन्यं सेवकधर्म इति ध्वनितम्। अथवा शिपिविष्टस्य विष्णोः 'ततो निवृत्त आयातोऽपश्यत् भीमरथीतटे। द्विभुजं विठ्ठलं विष्णुं भुक्तिमुक्तिप्रदायक'मिति पद्मपुराणस्थगीतामाहात्म्योक्तं विठ्ठल इति नाम यस्य सः श्रीविठ्ठलेशः 'तदाहं वल्लभकुल' इत्यादिवाक्यनिरूपितः आर्यः श्रेष्ठः। शेषं पूर्ववत्॥ १॥

अथ श्रीमत्पुरुषोत्तमसम्प्रदाय(नक)दानेऽर्चने परिचरणे च श्रुतिः। 'नू मर्तो दयते स निष्यन् यो विष्णव उरुगायाय दाशत्। प्र यः सत्राचा मनसा यजात एतावन्तं नर्यमाविवासात्' ॥ २॥ अस्यार्थः। यो मर्तः मर्त्यः गुरुगायाय बहुभिः कीर्त्यमानाय विष्णवे पुरुषोत्तमाय दाशत् दद्यात् सर्वं समर्पयेत्। यः सत्राचा समीचीनेन मनसा भगवति निश्छलेन प्रयजते भगवन्तं सेवयतीत्यर्थः। यजधातोः पूजार्थकत्वेपि प्रकृष्टार्थप्रोपसर्गविशिष्टत्वेन सेवारूप एवात्र यजतेरर्थः। सनिष्यन् फलमिच्छन् नु क्षिप्रं दयते प्राप्नोति अविशेषात्सर्वं फलं प्राप्नोतीत्यर्थः। ततः एतावन्तं महान्तं नर्यं नरेषु हितं विष्णुं आविवासात् परिचरेदित्यर्थः। श्रीमदाचार्यपक्षे तु नमो ब्रह्मण इत्यस्यां विष्णुत्वेनोपादानात् 'वस्तुतः कृष्ण एवे'ति वाक्याच्च विष्णुशब्देन श्रीवल्लभाचार्याणामपि ग्रहणम्। एवञ्च यो मर्त्यः मर्त्यलोके प्रादुर्भूतो दैवीजीवः उरुगायाय भक्तैर्गीयमानाय विष्णवे श्रीवल्लभाचार्याय दाशत् सर्वं समर्पयेत्। यः सत्राचा मनसा समीचीनेन मनसा अच्छलेन प्रयजते श्रीमदाचार्यं सेवयति सनिष्यन् श्रीमद्भगवत्सेवौपयिकालौकिकदेहादिकमिच्छन् नु क्षिप्रं दयते प्राप्नोति। श्रीमदाचार्याः सर्वदानसमर्थाः 'अलौकिकैकदानकृत्' 'अदेयदानदक्षश्चे'ति प्रभुचरणोक्तत्वात्। तत एतावन्तं महान्तं सर्वतः श्रेष्ठमित्यर्थः। दैवोद्धारकर्तृत्वमाह। नर्यं नरेषु दैवीजीवेषु हितम्। आसुरावेशनिवर्तनपूर्वकदैवाविर्भावकारकम् एतादृशं श्रीमदाचार्यम् आविवासात् परिचरेदित्यर्थः। अनेन श्रवणकीर्तनादीनामुक्तानां संग्रहः। श्रीविठ्ठलानां ब्रह्माण्डादिषु श्रीकृष्णरूपत्वेन प्रतिपादनाद्विष्णुशब्देन तेषामपि ग्रहणमिति तत्परापीयमिति बोध्यम्॥२॥

श्रीपुरुषोत्तमदास्ये श्रुतिः। 'त्रिर्देवः पृथिवीमेष एतां विचक्रमे शतर्चसं महित्वा। प्रविष्णुरस्तु तवसस्तवीयान् त्वेषं ह्यस्य स्थविरस्य नाम' ॥ ३॥ अस्यार्थः। एष देवः श्रीपुरुषोत्तमः शतर्चसं शतमर्चीषि यस्य एतां पृथिवीं त्रींल्लोकानित्यर्थः। महित्वा महत्त्वेन त्रिः विचक्रमे विक्रान्तवान्। सोऽयं विष्णुः प्रास्तु प्रभुरस्तु स्वामी भवत्वस्माकम्। 'एको दधार भुवनानि विश्वे'ति वचनात् स्वामिन एव स्वामित्वस्याप्रार्थनीयत्वात् तद्दास्यं वयं भजामह इति तात्पर्यं लभ्यते। तवसस्तवीयान् महतो महानित्यर्थः। किमिति तस्यैतद्दास्यं प्रार्थ्यतेऽत आह। हि यतोऽस्य स्थविरस्य पुराणपुरुषस्य त्वेषं दीप्तं महत् नामास्ति। महतो हि दास्यमाशास्यं लोकानाम्। अनेन हेतुवन्निगदेन श्रीपुरुषोत्तमस्य दास्यमेव प्रार्थ्यते। स्वामी अस्त्वित्यनेन

दासत्वं स्थितम् । दासनिरूपितमेव स्वामित्वम् । श्रीमदाचार्यपक्षे तु एष देवः 'देव वैश्वानरैषे'ति वाक्ये 'विप्रं विप्रासोऽवसे देव'मिति श्रुतौ च देवशब्दस्य विशेषेणोपपादनवदत्रापि देवशब्दस्य तत्ता । एवञ्च देवः भगवल्लीलामध्यवर्तीत्यर्थः । ननु देवशब्देनात्रान्यदेवग्रहणं कुतो नेत्यत आह शतर्चसं शतमर्चीपि यस्य सः।'हुताशनावतारस्तु वल्लभो लक्ष्मणात्मज' इति वाक्यात् 'अग्निर्मुखं' इत्यादिश्रुतेः श्रीवल्लभाचार्योऽग्निर्भगवन्मुखाधिष्ठाता । लौकिकाग्नेः सप्तार्चिष्ट्वमत्र शतार्चिष्ट्वेनालौकिकत्वं स्पष्टमेव । एतां पृथिवीं महित्वा महत्त्वेन श्रेष्ठत्वेन । तत्त्वं च जीवोद्धारकर्तृत्वम् । त्रिः त्रिवारं विचक्रमे परिक्रमितवान् वारत्रयविधिकल्पितभूवलयपरिक्रमेत्यभियुक्तैरप्युक्तम् । ननु पूर्वोक्तधर्माः सूर्येपि सन्तीत्यत आह । विष्णुः पुरुषोत्तम इत्यर्थः । 'वस्तुतः कृष्ण एवे'ति वाक्यात् सः प्रास्तु प्रभुरस्तु । 'व्यवहिताश्चे'ति सूत्रेण व्यवहितोपसर्गप्रयोगः । गुणावतारविष्णुव्यावृत्त्यर्थमाह । तवसस्तवीयान् महतोमहानित्यर्थः । सर्वतःश्रेष्ठत्वेन पुरुषोत्तम इत्यर्थः । स्थविरस्य वृद्धस्य पूज्यस्य श्रेष्ठस्य नाम त्वेषं दीप्तिमदस्ति । त्वेषमित्यनेन चिद्रूपत्वमुक्तम् । तच्च सदानन्दयोरुपलक्षकम् । तेन सच्चिदानन्दात्मकं नामास्तीति भावः । एतेनालौकिकत्वमुदितं नाम्नः । त्वेषमितिविशेषणेन नामावर्तनकर्तृगामज्ञानान्धकारविनाशः सूचितः । एतेन जीवैः श्रीमदाचार्यनामावर्तनमवश्यं कर्तव्यमिति ध्वनितम् ॥ ३ ॥

अथ श्रीमत्पुरुषोत्तमस्मरणकीर्तने च श्रुतिः । 'विचक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार' ॥ ४ ॥ इयं श्रुतिः श्रीमत्प्रभुचरणैरपि विद्वन्मण्डने लीलानित्यत्वप्रतिपादनप्रसङ्गे व्याख्याता । मयापि व्याख्यानं तदुपचीयते । एष विष्णुः श्रीपुरुषोत्तमः एतां पृथिवीं लोकत्रयं मनुषे स्वस्मरणशीलाय भक्ताय देवगणाय क्षेत्राय निवासाय दशस्यन् असुरेभ्योऽपहृत्य दास्यन् विचक्रमे विक्रान्तवान् । अनेन भगवतो माहात्म्यमुक्तम् । तत्र भगवन्माहात्म्यं किमु वक्तव्यं येषां भक्ता अपि माहात्म्यविशिष्टा इत्यभिप्रेत्याह ध्रुवास इति । अस्य भगवतः कीरयः कर्तनशीलाः जनासो भक्ताः ध्रुवासः नित्याः । तत्त्वं तु ध्वंसाप्रतियोगित्वम् । उरुक्षितिं महान्तं निवासं सुजनिमा सुजन्मा श्रीकृष्णाद्यवतारैश्चकार । श्रीमदाचार्यपक्षे तु एष विष्णुः श्रीवल्लभाख्यः तन्त्रेण विष्णुपदेन श्रीविठ्ठलोऽपि गृह्यते । मनुषे स्तुवते दैविगणाय एतां पृथिवीं क्षेत्राय निवासाय दशस्यन् दास्यन् विचक्रमे परिक्रमितवान् । असुरमतप्रवृत्तनयाऽवनौ स्थातुमशक्ता दैविजीवास्तेषां स्थित्यर्थं मायामतनिर्दलनपूर्वकं भगवद्भक्तिप्रथनेन स्वास्थ्यतया भगवत्सेवनसिद्धौ तेषामवनौ निवासः सिद्ध इति भावः । तेषां नित्यत्वमाह । अस्य श्रीवल्लभाख्यस्य कीर्तनपरा भक्ताः नित्याः । कीर्तनशीलत्वेन तदुद्धारार्थमेवावतारः । किञ्चावतारेण धरण्या अपि महद्भाग्यमित्यभिप्रेत्याह उरुक्षितिमित्यादि । सुजनिमा सुजन्मा सोपसर्गतयाऽलौकिकः प्रादुर्भावोऽस्येति सूचितम् । उरु श्रेष्ठां महद्भाग्यवतीं क्षितिं चकार । अहो भूमिभाग्यं यत्र श्रीमदाचार्याः प्रादुर्भूताः सन्ति चेति भावः । 'भूमिभाग्यं महत्सुन्दर' इति सर्वोत्तमे श्रीप्रभुचरणाः । श्रीविठ्ठलेशपक्षे तु 'देशान्तरे

गमिष्यामि मद्भक्तानां हिताय वै ' इति ब्रह्माण्डपुराणवाक्यात् पृथिवीं विचक्रमे । शेषं समानम् । अत्र श्रीमदाचार्याणां तदात्मजानां चावनिपरिक्रमणादिकं दैवोद्धारार्थमेव । 'दैवोद्धारप्रयत्नात्मे'तिवाक्यात् । एतेन वात्सल्यवत्त्वं ध्वनितम् । तल्लक्षणं तु आश्रितदोषभोक्तृत्वमिति केचन । ' आश्रितागस्तिरस्कारबुद्धिर्वात्सल्यमित्यपि । सुस्निग्धहृदयत्वं यद्दोषसौक्ष्म्यातिगं निजे । जने स्यात्तद्धि वात्सल्यं भक्तप्राणस्य वै हरेः । ममतामोहसंपर्कद्रढीयांस्तनुजादिषु । यत्पिच्छिलमनस्कत्वं विदुर्वात्सल्यमुत्तमा ' इति । अत्र दोषभोक्तृत्वं चासुरावेशनिवर्तनरूपम् । श्रीमदाचार्यविस्मरणरूपमेवागोऽपराधस्तस्य तिरस्कार इत्यर्थः ॥ ४ ॥

अथ श्रीमत्पुरुषोत्तमचरणोदकग्रहणे श्रुतिः । ' तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः' ॥ ५ ॥ अस्यार्थः । विष्णोः पुरुषोत्तमस्य परमे पदे चरणे अभि अभिषिक्तम् । उपसर्गाणां क्रियया असन्निधाने कर्तृकर्मादिसाधनसहितक्रियावाचकत्वात् मध्व मधुरस्य उत्सः निष्यन्दो वर्तते तत् अस्य पुरुषोत्तमस्य प्रियं पाथो जलं अहं अश्यां पिबेयम् । यत्र पादोदकपाने देवयवः देवं विष्णुं प्राप्तुमिच्छन्तो नरः नराः मदन्ति हृष्यन्ति स हि पुरुषः इत्था इत्थंप्रकारेण उरुक्रमस्य श्रीकृष्णस्य बन्धुः सुहृत् प्रियो भवतीत्यर्थः । यद्वा सः अहं इत्था इत्थं उरुक्रमस्य भगवतः सखा भवेयमिति भावः । तदनेन सख्यं निर्दिश्यते ॥ माध्वमतानुवर्तिनस्तु इत्थं व्याचख्युरिमाम् । उरुक्रमस्य विष्णोः परमे उत्तमे शालिग्रामचक्राङ्किितादिरूपे पदे स्थाने अभिषिक्तं भागीरथीगोदावर्यादिप्रस्रवणरूपं पाथः अश्यां पिबेयम् । यत्र पाने देवयवः देवत्वमिच्छन्तो नरः पुरुषाः मदन्ति सः तीर्थपानकर्ता अस्य विष्णोः बन्धुः प्रेमास्पदः हि श्रुत्यादिप्रसिद्धः मध्वः मुख्यप्राणावतारः श्रीमध्वाचार्यः इत्था इत्थं तीर्थपानं कृत्वा विष्णोः बन्धुः सुहृज्जात इत्यर्थः ॥ श्रीमदाचार्यपक्षे तु विष्णोः श्रीमन्नन्दकुमारस्य परमे सर्वतः श्रेष्ठे । ' ते ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयास ' इत्यादिश्रुतिप्रतिपादिते पदे श्रीगोकुलादिस्थाने मध्वः मधुररूपस्य श्रीयमुनावारिप्रवाहरूपं तत् भगवत्प्रियकर्तृत्वेन प्रसिद्धं ' प्रियो भवति सेवनात्तव हरेर्यथा गोपिका ' इति श्रीयमुनाष्टकवाक्यात् अस्य श्रीमद्वासुदेवस्य श्रीमन्नन्दकुमारस्य प्रियं ' मुररिपौ मुकुन्दप्रिये ', ' नमत कृष्णतुर्यप्रिया'मिति वाक्ये श्रीयमुनायाः प्रियत्वोपपादनेन तज्जलस्यापि तत्त्वम् । अभि अभिषिक्तम् । कैः कस्योपरीत्याकाङ्क्षायां श्रीगोपकुमारिकाभिः श्रीमद्यशोदानन्दनोपरि । तथाच ' सोऽम्भस्यलं युवतिभिः परिषिच्यमान ' इति श्रीभागवते । पाथः श्रीयमुनाजलम् । ' कबन्धमुदकं पाथः ' इत्यमरः । अहं अश्यां पिबेयम् । ' अश भोजन ' इति धातोः आशीर्लिङि उत्तमपुरुषैकवचने यासुडागमे मिपः अमादेशे अश्यामिति रूपम् । मन्त्रद्रष्टात्र वक्ता । यमुनाजलपानफलं तु ' नमोऽस्तु यमुने सदा तव चरित्रमत्यद्भुतं न जातु यमयातना भवति ते पयःपानतः । यमोऽपि भगिनीसुतान्कथमु हन्ति दुष्टानपि प्रियो भवति सेवनात्तव हरेर्यथा गोपिकाः ' इत्युक्तं श्रीमदाचार्यचरणैः । यत्र श्रीयमुनाजलपाने नरः सन्मनुष्याकृतिः

उरुक्रमस्य श्रीकृष्णस्य सः प्रसिद्धः । हिशब्दोऽतिशयं द्योतयति । अतिशयेन बन्धुः प्रियः श्रीवल्लभाचार्याख्यः 'वदति वल्लभः श्रीहरेरि'ति श्रीमदाचार्योक्तेः, 'प्रिया गोपीभर्तुः स्फुरतु सततं वल्लभ इति प्रथावत्यस्माकं हृदि सुभगमूर्तिः सकरुणे'ति श्रीमत्प्रभुचरणैरप्युक्तम् । देवयवो धार्मिकाः । 'मृगय्वादयश्चे'त्युणादिसूत्रेण निपातितो देवयुशब्दः । ' देवयुर्वाच्यलिङ्गः स्याद्धार्मिके लोकयात्रिके ' इति मेदिनीकोशाद्धार्मिकवाचकत्वम् । देवत्वमिच्छत्र इत्यर्थे देवशब्दात्क्यजन्तात् ' क्याच्छन्दसी'त्युप्रत्ययः । धर्मशब्दो मुख्यया वृत्त्या भगवत्सेवापरः । तादृशा दैविजीवाः लीलामध्यपातिनश्च । विनापि चं समुच्चयो भवतीति महाभाष्यम् । इत्था इत्थं श्रीयमुनाजलपानेन मदन्ति हृष्यन्ति । ' मदी हर्षे ' इत्यस्येदं रूपम् । एतेन श्रीयमुनाजलपानमवश्यं कर्तव्यमिति सूचितम् ॥ ५ ॥

अथ पादसेवने श्रुतिः—' यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति । य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा' ॥ ६ ॥ अस्यार्थः । यस्य पुरुषोत्तमस्य त्री त्रीणि मधुना पूर्णा पूर्णानि । जसः 'सुपां सुलु'गिति सूत्रेण डादेशः । एवमग्रेऽपि । त्रित्वं पादप्रक्षेपत्रित्वात् । अक्षीयमाणा पादप्रक्षपणे अक्षीणानि पदानि स्वधया अनेनोपलक्षणमेतत् । सर्वफलेनापि मदन्ति मादयन्ति तदाश्रितजनानिति भाष्यकारेण व्याख्यातम् । य उ त्रिधातु त्रिप्रकारं पृथिवीं उत द्याम् । किं बहूक्त्या । विश्वा विश्वानि सर्वाणि भुवनानि एकः दाधार दधारेत्यर्थः । श्रीमदाचार्यपक्षे तु यस्य पूर्णपुरुषोत्तमस्य त्री त्रीणि श्रीवल्लभाचार्य-श्रीगोपीनाथ-श्रीविठ्ठलाख्याभिधानानि रूपाणीत्यर्थः । श्रीमदाचार्याणां वक्ष्यमाणैः पूर्वोदाहृतवचोभिश्च पुरुषोत्तमत्वम् । श्रीविठ्ठलेशानां पूर्णपुरुषोत्तमत्वं ब्रह्माण्डपुराणवचनैः स्फुटमेव । तथाच श्रीदेवकीनन्दनचरणैर्गदितं श्रीवल्लभाचार्यगृहे श्रीमहालक्ष्मीदेव्यां श्रीगोपीनाथेन श्रीबलभद्रेणान्वितः स्वयं भगवान् श्रीमत्पूर्णपुरुषोत्तमः प्रादुर्बभूवेति चरित्रचिन्तामणौ, तैरेवाग्रे ' दैवेष्वप्यासुरं भावं संकर्षणवदत्र यः । दृष्ट्वा हलं कल्पयते स गोपीशः प्रसीदतु ' इति । ब्रह्माण्डपुराणवचनानि तु ' तदाहं वल्लभकुले द्विजाचाररतेऽमले । अवतीर्य परं रूपं दर्शयिष्ये मनोहरम् । पृथिव्यां भारते क्षेत्रे माथुरे मम मण्डले । गोकुलं मत्पदं नित्यं यत्रास्ते वै मुदावहम् । कालिन्दी सरितां श्रेष्ठा यत्र गोवर्धनो गिरिः । आदिमध्यावसाने वै वासो मे तत्र निश्चितम् । वर्तते विश्रुतं पूर्वं तत्र चास्ति परंतप । अति चान्तर्हितं रूपं सर्वलोचनगोचरम् । करिष्ये विमलं सौम्यं व्रजभक्तसुखावहम् । विठ्ठलेशेति विख्यातिं गमिष्ये जगतीतले । आदावहं चैकरूपो बहुरूपधरस्ततः ' इत्यादीनि । एतेषु श्रीमथुरागोकुलादिनिरूपणेन व्रजभक्तसुखावहमित्युक्त्या च येष्वेषु स्थानेषु श्रीकृष्णचन्द्रेण व्रजभक्तसुखावहा लीला कृता तथा श्रीविठ्ठलावतारेऽपि मया क्रियते । एवञ्च बलदेवावतारोऽप्यस्मिन्नवतारे सूचितः । कीदृशानि । मधुना आनन्देन पूर्णा पूर्णानि । मधोरानन्दसाधकत्वेनानन्दवाचित्वम् । यथा श्रीमदाचार्यचरणैः ' अन्तस्तद्धर्मोपदेशा'दिति सूत्रेऽणुभाष्ये हिरण्यशब्द आनन्दवाची लोके तस्यानन्दसाधकत्वादित्युक्तम् । 'आनन्दः परमानन्द' इति वाक्यात् 'परमानन्दविठ्ठल'

इति ब्रह्माण्डपुराणवाक्यात् श्रीबलदेवस्याक्षरब्रह्मत्वाद्ब्रह्मणश्चानन्दरूपत्वात् 'सत्यं विज्ञानमानन्दं ब्रह्मे'ति श्रुतेस्त्रयाणामानन्दरूपत्वम् । किमर्थमत्र प्राकट्यं भगवल्लीलायां दैविजीवप्रापकत्वेनोद्धारार्थमित्यभिप्रेत्याह । पदानि पद्यन्ते गम्यन्ते लीलायां दैविजिवा एभिरिति तानि भगवल्लीलाप्रापकाणीत्यर्थः । 'आचार्यवान् पुरुषो वेदे'ति श्रुतेः । ननु पुरुषोत्तमावेशेन पुरुषोत्तमानन्दप्रादुर्भावत्वे नानन्दरूपत्वमेतेषामिति चेत्तत्राह । अक्षीयमाणानि केनाप्यंशेन न क्षीणत्वम् । भवतारासाधारणफलमाह । स्वधया मदन्ति स्वाद्यते या सा स्वधा 'ष्वद आस्वादने' अस्मादौणादिक आप्रत्ययः दकारस्य धकारो ह्रस्वत्वं च पृषोदरादित्वात् । स्वाद्यते श्रीमद्व्रजसुन्दरीभिर्या श्रीकृष्णाधरसुधा सेत्यर्थः । तया मदन्ति हर्षयन्ति स्वानिति शेषः । 'कृष्णाधरामृतास्वादसिद्धिरत्र न संशयः' इति नामावर्तनफलश्रुतेः । एतेनासाधारणफलदातृत्वमेतेषु । यः पूर्णपुरुषोत्तमः त्रिधा श्रीवल्लभाचार्य–श्रीविट्ठल–श्रीगोपीनाथरूपेण पृथिवीं उत द्यां दाधार पुपोषेत्यर्थः । श्रीमदाचार्यरूपेण प्रादुर्भावतयाऽसुरमतविनाशनेन भगवत्स्नेहमार्गप्रथनेन च पृथिव्युद्धारमिति भावः । अत एव श्रीमदाचार्याणां नाम भूमिभाग्यमिति । अस्मिल्लोके कर्ममार्गप्रवर्तकत्वेन देवानां सन्तर्पणतया स्वर्लोकपोषणमिति भावः । एकः स्वयं पुरुषोत्तमः सर्वाणि भुवनानि दधारेत्यर्थः ॥ ६ ॥

अथ समर्पणे सङ्कीर्तने श्रवणे च श्रुतिः—'यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति । यो जातमस्य महतो महि ब्रवत्सेदु श्रवोभिर्युज्यं चिदभ्यसत्' ॥७॥ अस्यार्थ । यः पुरुषः पूर्व्याय कारणाय वेधसे कर्त्रे नवीयसे नित्यनूतनाय सुमज्जानये सुमतिः श्रीर्जाया यस्य तस्मै विष्णवे ददाशति ददाति अर्पयति अविशेषात्सर्वं देहेन्द्रियप्राणान्तःकरणादि । जातं जन्म । उपलक्षणमेतत् गुणकर्मणाम् । महतो महि श्रेष्ठम् । अस्य विष्णोः जातं जन्मादि ब्रवत् ब्रूयात् सः । इत् उ निपातौ अवधारणार्थौ । प्राप्नुयादेवेति । युज्यं सायुज्यम् । वर्णलोप उक्तरीत्या । चित् । इदं जन्मनो विशेषणम् । अभ्यसत् प्राप्नुयात् श्रवोभिः कीर्तिभिः । यद्वा श्रवोभिः श्रवणैः सन्निधानाज्जन्मगुणकर्मणां 'द्वा सुपर्णा सयुजा सखाया' इति मन्त्रवर्णात् युज्यं पुरुषोत्तमं चित् सच्चिदानन्दरूपमित्यर्थः । चिदित्युपलक्षणं सदानन्दयोः । तथा च 'तमु स्तोतार' इति श्रुतिविवरणे चिदित्युपलक्षणं सदानन्दयोरिति श्रीमत्प्रभुचरणैरुक्तं सिद्धान्तमुक्तावलीविवृतौ । अभि आभिमुख्येन अनुरागेण अभ्यसत् प्राप्नुयात् । श्रीमदाचार्यपक्षे तु पूर्व्याय ब्रह्मसम्बन्धादिप्रकाशनकारणाय विशेषेण दधाति भगवल्लीलामसौ वेधास्तस्मै वेधसे । भक्तेषु भगवल्लीलास्थापकायेत्यर्थः । नवीयसे अतिशयेन नूतनायेत्यर्थः । दर्शनीयतमत्वं प्राकृतगन्धशून्यत्वं च ध्वनितम् । सुमज्जानये श्रीमहालक्ष्मीवल्लभाय विष्णवे 'वस्तुतः कृष्ण एवे'ति वचनात् श्रीकृष्णरूपाय यो देहादि ददाशति अर्पयति स पुरुषः अस्य महतः पूर्णपुरुषोत्तमस्य जातं जन्मादि ब्रवत् ब्रूयात् । समर्पणवतो भगवद्गुणगानाद्यधिकारो भवत्यन्यथा तु न तथा प्रकाश इति भावः । 'आचार्यवान्पुरुषो वेदे'ति श्रुतेः । युज्यं सायुज्यं । उपलक्षणमेतत् । तेना-

लौकिकसामर्थ्यं सायुज्यं भगवत्सेवौपयिकदेहो वैकुण्ठादिष्विति, फलम् । अभ्यसन् प्राप्नुयात् ॥ श्रीविठ्ठलेशपक्षेप्यस्यार्थः । पूर्व्याय सर्वानन्दावधिभूतपरमानन्दाय । 'परमानन्दविठ्ठल' इति ब्रह्माण्डपुराणवचनात् । ब्रह्मानन्दस्यापि कारणीभूतानन्दरूपत्वं श्रीमत्प्रभुषु विशेषेण दधाति पुष्टिभक्तिमसौ वेधास्तस्मै श्रीमत्प्रभूणामवतारः पुष्टिभक्तिप्रथनायैवेति प्रागेवोक्तम् । 'मम भक्तिवितानाय विनाशाय च मायिना'मिति ब्रह्माण्डपुराणे उक्तम् । यद्वा वेधसे कर्त्रे नयवीसे नित्यनूतनाय । एतेन दर्शनीयतमत्वं 'दर्शनीयतमो वाग्मी'तिवचनात् । सुमतिः श्रीरुक्मिणी जाया यस्य 'राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि' इति विष्णुपुराणवचनात् रुक्मिणीरमणायेत्यर्थः । तथा च 'रुक्मिणीरमणः श्रीश' इति नामरत्न उदितम् । विष्णवे 'तदाहं वल्लभकुले द्विजाचाररतेऽमले' इत्यादि ब्रह्माण्डपुराणान्तर्गतभगवद्वचनेभ्यः श्रीविठ्ठलाय ददाशति सर्वं देहाद्यर्पयति । शेषं पूर्ववत् ॥ ७ ॥

अथ श्रवणकीर्तनादिसामान्यसेवने श्रुतिः—'प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे । य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः ॥८॥' अस्यार्थः । प्रकर्षेण शूषं बलं एतु आयातु । मन्म महत् । किमर्थं । विष्णवे विष्णुं सेवितुं । 'तुमर्थाच्चे'ति सूत्रेण चतुर्थी । गिरिक्षिते वाचि तिष्ठते । विष्णुपदादेव सर्वत्रावस्थानप्रतीतेः पुनरुक्तिरिति चेन्न । अर्थविशेषद्योतनार्थत्वात् । तथाहि कस्यां वाचि तिष्ठते इत्यपेक्षिते उरुगायायेति सन्निधानात् यत्रैनं गायति तस्यां वाचि विशेषेण तिष्ठते इति लभ्यते । ततश्च 'मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारदे'तिस्मृतिमूलमेतत् । 'शङ्खचक्राद्यङ्कनं च नृत्यगीतादिकं तथा । एकनातेरयं धर्मो न जातु स्याद्विजन्मन' इति स्मृतिः लौकिकं गानं निषेधति 'ग्राम्यं गीतं न शृणुया'दिति वाक्यात् । विस्तरशस्तु इन्दिराया इति श्रुतिव्याख्याने निरूपयिष्यामः । अतश्चावश्यं सेवनीय इति भावः । वृष्णे कामवर्षिणे । अतोऽपि सेवनीय इति । य इदं दीर्घं प्रयतं नियतं सधस्थं स्थानं लोकत्रयं त्रिभिः एक इत् एव विममे विक्रान्तवानिति । इयं श्रुतिः श्रीगोवर्धनधारणसमयमपि वक्ति । तथा हि । गिरिः क्षित् तिष्ठति यस्मिन् स तस्मै श्रीमद्गिरिधराय प्रविष्णवे पुरुषोत्तमाय मन्म महत् शूषं बलं एतु आयातु इति श्रीमद्यशोदादीनां वचनं स्नेहर्द्धिमत् । आशिषि लोट् । योऽस्मै मम बालकः सप्तहायनः पर्वतं बिभर्ति ततस्तद्धारणयोग्यं बलं भवत्वस्मा इति भावः । विष्णुत्वेनोपादानं तु 'नारायणसमो गुणै'रिति गर्गवाक्यश्रवणात् गर्गोक्तं स्मृत्वा तदर्थानुवादमाहुः । उरुगायाय बहुभिर्गीयमानाय । अतोऽयं महानिति भावः । 'अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथे'ति वचनार्थमाहुः । वृष्णे सकलकामवर्षकाय । इदं माहात्म्यज्ञानमुक्तम् । नन्वेतादृशोऽयं तर्हि किमाशीर्भिर्युज्यते तत्र स्नेहं व्यञ्जयन्त आहुः । यः सप्तवार्षिकः इदं गोवर्धनधारणरूपं दीर्घं महत् प्रयतं प्रयत्नं कृत्वेति शेषः । सधस्थं स्थानं श्रीगोवर्धनं विममे दधार । बालके महत्कर्म दुर्घटमिति स्नेहवृद्ध्याऽऽशिषो दानम् । पुनर्माहात्म्यमाहुः । त्रिभिः पदेभिः स्थानैर्लोकैः इत् ज्ञातः । ये गत्यर्थास्ते ज्ञानार्था इति न्यायेन गत्यर्थ-

द्वनद्वारा सख्यात्मनिवेदनसाधकत्वाद्धस्तस्थानीयाः । नवधाभक्तिसहितसेवाकर्तुराह । सः सेवौपयिकपूर्वोक्तप्रकारकनवधाभक्तियुक्तो जीवः जातित्वादेकवचनम् । अस्य पुरुषोत्तमस्य लीलाया त्रिधा बद्धः । सेवाफलोक्तं यथाधिकार अलौकिकसामर्थ्यं सायुज्यं सेवोपयोगिदेहो वैकुण्ठादिष्विति फलत्रयेण सम्बद्धः । पूर्वोक्तसेवात्रयविशिष्टनवधाभक्तिर्जीवाना मतिदुर्लभेतितत्सिद्ध्यर्थं गुरूपसत्तिः कर्तव्येति गुरुस्वरूपमाह । वृषभः वर्षतीति वृषभः

कम्य ज्ञानार्थकत्वम् । एव च माहात्म्यज्ञानेऽपि स्नेहाधिक्यमिदमेव पुष्टिस्वरूपम् । यदि केवल स्नेहवृद्धिरेव तर्हि श्रीगिरिवरधारण दृष्ट्वा प्राणानत्र त्यजेयु । श्रीमदाचार्यपक्षे तु शूप वर्ल एतु आयातु । मन्म महत् । किमर्थ । विष्णवे 'वस्तुत कृष्ण एवे'ति वचनात्पूर्णपुरुषोत्तमश्रीमदाचार्य सेवितु गिरिक्षिते वाचि तिष्ठते । 'वाक्पतिर्विबुधेश्वर' इति वचनाद्वाक्पतये उरगायायेति पूर्ववत् । कृष्णे सकलभक्तेच्छानुकूलत्वर्पकाय 'भक्तेच्छापूरक सर्वाज्ञातलीलोऽतिमोहन' इति सर्वोत्तमे । भक्तमनोरथपूरणार्थमेव पृथिवीपरिक्रमणमित्याह । य श्रीवल्लभाचार्य इद पृथिवीमण्डल दीर्घ महत् सधस्थ स्थान त्रिभि त्रिवार इत् गमनशील । यद्वा इत् ज्ञानविशिष्ट । मम परिक्रमणेन मायावादिमतान्धकारनाशपूर्वकभक्तोद्धारो भविष्यतीत्यभिज्ञ इति भाव । पप्रे । बहुवचन तु श्रेष्ठत्वापेक्षितमिति सूचनाय । विममे परिक्रमण कृतवानित्यर्थ ॥ ८ ॥

अथ श्रीमत्पुरुषोत्तमशरणतयावस्थाने श्रुति —'यो ब्रह्माण विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । त ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमह प्रपद्ये' ॥ ९ ॥ अस्यार्थ । अह शरण प्रपद्ये 'निर्गुणा मुक्तिरस्माद्धि सगुणा सान्यसेवये'ति तत्त्वदीपे श्रीमदाचार्यचरणोक्ते निर्गुणमुक्तिमिच्छुर्मुमुक्षु । शरणमात्रेणैवाज्ञानान्धकारनिवृत्तिरित्याह । आत्मबुद्धिप्रकाशमिति । आत्मना जीवाना बुद्धिप्रकाशकमित्यर्थ । यद्वा आत्मन स्वस्वरूपस्य बुद्धेश्च प्रकाशकमित्यर्थ । ननु शरणगमनेऽज्ञानान्धकारनिवृत्तिरेव फलमिति चेन्न । भगवल्लीलानुभवमपि फलमित्यभिप्रेत्याह । देव लीलास्थपुरुषोत्तममित्यर्थ । एतादृशस्य शरणगमनेऽस्य लीलानुभवो भविष्यतीति भाव । विष्ण्वादिपदमनुक्त्वा यद्देवपदोपादान तेनागमर्थ सिद्ध । 'यो ब्रह्माणमि'त्यादि श्रीमद्भगवदतिशयप्रतिपादकमाहात्म्यज्ञानार्थमित्यर्थ । एवन नवविधभक्ते श्रुतिनिरूपितत्व सिद्धम् । अन्या अपि सन्त्येतदर्थप्रतिपादिका श्रुतयो बाहुल्यभयान्न निरूपिता ॥ प्रकृतमनुसराम । गुरूपसत्तिः कर्तव्येति । 'समित्पाणि श्रोत्रिय ब्रह्मनिष्ठ' 'स गुरुमेवाभिगच्छेत्' 'नैषा तर्केण मतिरापनेये'त्यादिश्रुति श्रुतिसिद्धेरित्यर्थ । वृषभ इति । 'वृषु सेचन' इति धातो 'रिगुपधज्ञाप्रीकिर क' इति सूत्रेण कप्रत्यये रूपसिद्धि । पात्रापात्रेति । 'स्त्रीशूद्राद्युद्धतिक्षम' इति वाक्यात् । पात्रत्व चागमोक्तशिष्यलक्षणविशिष्टत्वम् तदभाववत्त्वमपात्रत्व तयोर्विवेकमन्त विनेत्यर्थ । सर्वकरणसमर्थत्वादिति भाव । 'अदेयदानदक्षश्चे'ति वाक्याद्यत्केनापि दातुं न शक्यत तत्कृष्णाधरामृत वर्पनीत्यप्यर्थ । एतेन परमकृपालुत्व परमसामर्थ्यवत्त्वं सूचितम् । कृपालक्षणं तु 'रक्षणे सर्वभूतानामहमेव परो विभु । इति सामर्थ्यसन्धान कृपा सा पारमेश्वरी ॥'

'वर्षति मेघ उदकमिव । पूर्वोक्तसेवाद्युपदेशपात्रापात्रविवेकं विना भक्तेभ्योऽलौकिकसामर्थ्यं सायुज्यं सेवोपयोगिदेहो वैकुण्ठादिष्विति फलं वर्षति ददातीत्यर्थः । भातीति भः स्वतेजसा भक्तानां सकलदोषदूरीकरणद्वारा सर्वेपूज्यत्वेन भाति । वृषश्चासौ भश्चेति वृषभः । एतादृशगुरुस्तु श्रीवल्लभाचार्य एव ।

श्रीवल्लभपदार्थस्तु भानं भाः सम्पदादित्वाद्भावे क्विप् । भा विद्यते यस्यासौ भः अर्शआद्यच् । वदन्तीति वदः 'क्विप्चे'ति क्विप् । तान् वदो भक्तान् लाति गृह्णातीति वल्लः वल्लश्चासौ भश्चेति वल्लभः । यद्वा लभ्यत इति लाभः । पुंसि संज्ञायां घः । वदन्ति स्वाचार्यगुणगानं कुर्वन्ति ते वदो भक्तास्तेषां लभः प्राप्यो वल्लभः । यद्वा 'वनु याचने' इत्यस्मात् क्विप् । वन्वते याचन्त इतिवतः भगवत्प्राप्तिविषयकयाच्ञाकर्तारो भक्तास्ताँल्लातीति पूर्ववत् । नामैकदेशे नामग्रहणमितिन्यायादत्र भशब्देन वल्लभो ग्राह्यः । अथ परोक्षमियार्थं भश-

---

अथवा 'स्वसामर्थ्यानुसन्धानाधीनः कालुष्यमानसः । हार्दो भावविशेषो यः कृपा सा जागदीश्वरी ॥' 'कृप् सामर्थ्ये' इति धातोर्निष्पन्नः कृपाशब्द इति । भातीति भ इति । 'भा दीप्ता'विति धातोः 'अन्येष्वपि दृश्यत' इति डः प्रत्ययः । 'नक्षत्रमृक्षं भं तारे'त्यादिवत् । स्वतेजसेत्यादि । सकलदोषाः देहजीवनिष्ठाः 'अज्ञानाद्यन्धकारप्रशमनपटुताख्यापनाय त्रिलोक्यामग्नित्वं वर्णितं ते कविभिरपि सदे'ति श्रीप्रभुचरणैरगादि । वृषभ इति । वृषभशब्दार्थकत्वं श्रीवल्लभशब्दस्य बोध्यम् । तेन पर्यायतापि । तत्त्वं च भिन्नानुपूर्वीकत्वे सति एकार्थबोधकत्वम् । तथा हि । 'वल्ल संवरण' इति धातोर्वल्लते संवरणं करोति दासत्वेन वृणोति जीवानसौ स वल्लः पचाद्यच् । 'यमेवैष वृणुते तेन लभ्य' इति श्रुते' । स चासौ भश्चेति वल्लभः । वृषभशब्दस्यार्थे पात्रादिविवेकं विना फलं वर्षतीत्युक्तौ वर्षणमत्र स्वदासत्वेनाङ्गीकारे सत्येवेत्येवं पर्यायतेत्यर्थः । 'त्वमग्ने वृषभः पुष्टिवर्धन' इति श्रुतौ वृषभत्वं श्रीमदाचार्याणामुक्तमित्यभिप्रेत्याहुः एतादृशगुरुस्त्विति । एवेति । श्रुतिनिरूपितवृषभत्वं वृषभपदार्थकत्वं चान्येषु नास्तीत्येवकारेणान्यस्य व्यवच्छेदः ।

श्रीवल्लभपदस्यार्थमाहुः श्रीवल्लभेत्यादिना । सम्पदादित्वादिति । दीप्त्यर्थकभाधातोः सकाशात्संपदादेराकृतिगणत्वादिति भावः । भ इति । 'यस्येति चे'त्यलोपः । दीप्तिविशिष्टत्वेनातितेजस्त्वातिशयौज्ज्वल्यादयो गुणा बोध्याः । वदन्तीति । 'वद व्यक्तायां वाचि' । अनुगृह्णातीत्यनेन श्रीमदाचार्यानुग्रहेणैव भगवत्प्राप्तिस्तद्विनान्यस्य साधनाभावो ध्वनित' । पुंसि संज्ञायां घ इति । समुदाये वृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति न्यायेन श्रीवल्लभपदैकदेशो लभ् इत्यत्र संज्ञात्वमस्तीति भावः । स्वाचार्यगुणगानमिति । 'स्वयशोगानसंहृष्टहृदयाम्भोजविष्टर' इति वचनाच्छ्रीमदाचार्यगुणगानस्यावश्यकत्वम् । तेषामिति । गुणगानकर्तॄणामित्यर्थः । 'क्विबि'ति अनुनासिकलोपविधायके 'गमः क्वा'विति सूत्रे 'गमादीनामिति वक्तव्य'मिति वार्तिकेनात्र नकारलोपे 'ह्रस्वस्ये'ति तुकि वदिति रूपम् । न्यायादिति ।

न्दोपादानं 'परोक्षप्रिया ह वै देवा' इति श्रुतेः । वाण्योपदेशद्वारा भक्तेभ्यः फलप्रदान-

'विनापि प्रत्ययं पूर्वोत्तरपदलोपश्चे'ति वार्तिकसिद्धादिति भावः । 'दयया निजमाहात्म्यं करिष्यन् प्रकटं हरिः । वाण्या यदा तदा स्वास्यं प्रादुर्भूतं चकार हे'तिवाक्याद्वाण्या स्वमाहात्म्यख्यापनार्थमेव श्रीमत्पुरुषोत्तमैः श्रीमदाचार्याः प्रादुर्भाविता इत्यभिप्रेत्याहुः वाण्योपदेशेत्यादि । अत एवास्मिन्नवतारे 'उद्धारस्तु वाण्ये'ति श्रीमदाराध्यचरणैः प्रागप्युक्तम्। वाक्यादिति । 'सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणादि'ति श्रीभागवतवाक्याच्चेति भावः ।

यथा श्रीमदाराध्यचरणैरत्रेयं श्रुतिः पूर्णपुरुषोत्तमवर्णनपूर्वकं पूर्णपुरुषोत्तमप्राप्त्यर्थं गुरूपसत्तिः कार्येत्युक्त्वा श्रीवल्लभाचार्यगुरुस्वरूपनिरूपणं कृतम् । तथा श्रीमत्प्रभुचरणै'र्ज्ञानाधिको भक्तिमार्ग' इति सिद्धान्तमुक्तावलीपद्यविवरणे भक्तेः श्रेष्ठतां निरूपयितुं 'तमु स्तोतार' इति मन्त्रमुपन्यस्य तस्य विवरणे नामस्वरूपज्ञानार्थं गुरूपास्तिः कार्येत्युक्त्वा गुरुस्वरूपनिरूपणं कृतम् । तन्निरूपणेन श्रीवल्लभाचार्यो गुरुरेव फलति, स एव श्रीमत्प्रभूणां ग्रन्थस्तदर्थश्च मया व्युत्पाद्यते । तथा हि —'तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन। आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामह' इति ॥ हे स्तोतारो मदुत्कर्षवर्णनपराः, पूर्व्यं सर्वकारणकारणरूपं तं लोकवेदप्रसिद्धं श्रीमत्पुरुषोत्तमं यथावद्विदन्ति तत्स्वरूपमिति तथाभूताः ऋतस्य सूनृतवाणीरूपस्य वेदस्य गर्भं रूपं स्वोदरस्थं वेदं विश्वहितार्थं ब्रह्मणे उपदिष्टवान् इति । तथा जनुषा जन्मनैव संपूर्णं न तु क्षणयाममात्रेण पिपर्तन पूर्तियुक्तं सन्तुष्टं कुरुत । अत्र यथाविच्चोक्त्या पूर्णज्ञानानां देहेन्द्रियप्राणान्तःकरणजीवाँस्तदर्थमेव तद्भजनार्थमेवोपयुक्तान् कुरुतेति भक्तिमार्ग एव विनियोग उपदिश्यते । तेन स्फुटमेव ज्ञानमार्गाद्भक्तिमार्गस्याधिक्यमवगम्यते । भक्तिं विना न कोऽपि पुरुषार्थः सिध्यतीति हृद्येनाह आस्य जानन्त इति । अग्रे देहादिविनियोगासक्तौ आसमन्ताज्जानन्तोऽखण्डशब्दब्रह्मरूपं न तु लौकिकशब्दस्वरूपमिति नामस्वरूपं जानन्तस्तदेव विवक्तन । विशेषणं चेदं अधिकमाहात्म्याद्यज्ञाने नाममात्रमुत्कीर्तयितुम् । एतेनैव भगवत्स्वरूपतन्माहात्म्यादिकं ज्ञातं भविष्यतीत्याशयेनाह नाम स्वरूप चिदिति । चिदित्युपलक्षणं सच्चिदानन्दमित्यर्थः । नामस्वरूपाज्ञाने तदुपदेष्टृगुरूपसत्ति कार्येत्याशयेनाह महस्त इत्यादि । ते त्वत्संबन्धिनं सुमतिं निर्दोषपूर्णगुणत्वेन भवन्तं जानन्तं भगवद्भक्तं भजामहे । स च स्वतेजसा पराज्ञाननिरासक इत्याह मह इति । तेजोरूपमित्यर्थः । स्वहृदि सर्वदा श्रीकृष्णप्राकट्येनोत्सवात्मकमिति वा । एतेन ज्ञानिनां भक्तिमार्ग एवोपदिष्टो भवतीति श्रीमत्प्रभूणां ग्रन्थः ।

अत्र गुरूपसत्तिः कार्येत्युक्तया 'श्रीकृष्णज्ञानदो गुरु'रिति वाक्याच्छ्रीवल्लभाचार्य एव तेनोरूपमित्यनेनान्येषां तत्त्वामाद्भगवन्मुखारविन्दाविर्भावादिर्दैविकवैश्वानरस्तेनोरूप उदितः ।

प्रकारमाह । रोरवीति भक्तान् प्रति वचनद्वारा पूर्वोक्तं सर्वं पुनः पुनः अतिशयेन रौति नाममन्त्रब्रह्मसम्बन्धमन्त्रग्रन्थाद्युपदिशति । उपदेशमात्रेणैव भक्तानामवान्तरफलमाह । महो

सुमतिमित्यनेन शब्दब्रह्मवेत्तारम् । यद्वा सुमतिमित्यत्र सुष्ठु मतिर्महालक्ष्मीर्भार्या यस्य तं सुमज्ञानय इति वत् । एतेन पूर्णपुरुषोत्तमरूपतोक्ता । निर्दोषपूर्णगुणत्वेन भगवन्तं जानन्तमित्युक्तया सर्वज्ञत्वं श्रीकृष्णज्ञानदातृत्वं च सूचितं साकारब्रह्मवादस्थापकत्वं वेदपारगत्वं च । 'श्रीकृष्णज्ञानदो गुरुः । साकारब्रह्मवादैकस्थापको वेदपारग' इति सर्वोत्तमे । उत्सवात्मकमिति । 'स्फूर्जद्रासादिलीलामृतजलधिभराक्रान्तसर्वोऽपि शश्वदि'ति प्रभुचरणाः । भजामहे सेवामह इत्यर्थः । सेवा च कायवाङ्मनोभिस्तदेकपरत्वेन तनुजावित्तजामानसीरूपा । एवंच श्रीमदाचार्यसेवकानामेव रसास्वाद इति दिक् ।

अथ चत्वारिशृङ्गेत्यस्य श्रीमदाचार्यपरत्वेनार्थः प्रदर्श्यते । तथा हि । 'वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि । समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयमि' ति तत्त्वदीपोक्तानि चत्वारि प्रमाणानि शृङ्गाः प्रधानानि । प्राधान्यं चैतदविरोधेनान्यप्रमाणप्रामाण्यवत्त्वम् । 'एतद्विरुद्धं यत्त्वस्य न तन्मानं कथंचने'ति तत्रैवोक्तत्वात् । 'अविरुद्धं तु यत्त्वस्य प्रमाणं तच्च नान्यथे'त्यपि तत्रैव । त्रयः पादाः विवेकधैर्याश्रयरूपाः । द्वे शीर्षे । शीर्षशब्दो मुख्यवाचकस्तेन श्रीगोपीनाथश्रीविठ्ठलनाथौ पुत्रौ आचार्यरत्नमिति वाक्याद्वयोः श्रीबलदेवश्रीकृष्णरूपत्वाच्छीर्षत्वेनोपादानम् 'भुवि भक्तिप्रचारैककृते स्वान्वयकृत् पिते'ति वाक्याज्जीवोद्धारार्थमेव स्ववंशप्राकट्यकरणाच्छ्रीमदाचार्यसप्तपौत्राणां करस्थानीयत्वमाह । सप्तहस्तासः श्रीगिरिधरश्रीगोविन्दश्रीबालकृष्णश्रीवल्लभश्रीरघुनाथश्रीयदुनाथश्रीघनश्यामाख्याः सप्त पौत्राः हस्तस्थानीयाः । यथा हस्तैः पदार्थग्रहणमेवमेतैर्जीवानामङ्गीकार इति भावः । अस्य श्रीवल्लभाचार्यस्य । वारद्वयमिदंशब्दोपादानेनान्तरङ्गभक्तानां श्रीमदाचार्यैनैकट्यं ध्वनितम् । त्रिधा त्रिप्रकारेण भक्तिवर्द्धिन्युक्तैः स्नेहासक्तिव्यसनैर्बद्धः सकलकामपूरक इत्याह । वृषभः वृषभशब्देन धर्म उच्यते । तेन धर्मस्वरूपः धर्मरक्षणार्थमेवावतार इति सूचयितुं वृषभपदोपादानम् । 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहमि'ति गीतोक्तं सूचितम् । यद्वा 'ऋषिवृषिभ्यां भ' इति सूत्रेण 'वृषु सेचने' अस्माद्भप्रत्यये वर्षति भक्तमनोरथानिति वृषभः । वर्षणार्थकधातुघटितप्रयोगेण यथा मेघादिवर्षणेन ताप उपशाम्यति तथा श्रीमदाचार्याणां कृपारसवर्षणेन सकलतापोपशामकतेति सूचितम् । किंच यथा मेघः स्वेच्छयैव वर्षति तथा श्रीमदाचार्या अपीति वल्लभपदस्यार्थ उररीकृतः । तत्र संवरणार्थकवल्लधातोरभप्रत्यये वल्ल इत्यस्य निष्पत्तिः । स्वीकारश्च स्वेच्छयैवेत्यनुपदमेवोक्तम् । यमेवेति श्रुतेः । स चासौ भश्चेति पर्यायतया नामनिरुक्तिरुक्ता । श्रीमदाचार्या अवतीर्य भगवन्नाम्नैव जीवोद्धार इति सूचयितुं नामोपदेशादि कुर्वन्तीत्याह रोरवीति । नाममन्त्रब्रह्मसम्बन्धमन्त्रादि कथयति । ननु जीवानां दुष्टत्वा'ज्जीवाः स्वभावतो दुष्टा' इतिवाक्यात्तेषां दोषनिरसनमन्तरा नोद्धार इति ।

देवो मर्त्याँ आविवेश भक्तानामविद्याया भस्मसात्करणार्थं महस्तेजः एतादृशो देवो रासक्रीडास्थपुरुषोत्तमः मर्त्यान् पुष्टिमार्गीयजीवान् आविवेश देहेन्द्रियान्तःकरणेषु प्रविष्टः। 'प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुह'मिति वाक्यात् । पूर्वं व्याख्यातम्।

चतुःशृङ्गविशिष्टा गावो व्यापिवैकुण्ठगोलोकस्थास्तत्र प्रमाणभूता श्रुतिः। प्रथमाष्टके तृतीयप्रपाठके षष्ठानुवाकेऽयं मन्त्रः–'ते ते धामान्युश्मसि गमध्ये गावो यत्र भूरिशृङ्गा अयासः। अत्राह तदुरुगायस्य विष्णोः परमं पदमवभाति भूरेः', 'विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा', 'तद्विष्णोः परमं पदꣳसदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्'। अस्यार्थः–ते तानि प्रसिद्धानि ते तव धामानि स्थानानि ते ते तव तव धामानि वा गोवर्धनाद्रिभूमापुरुषश्वेतद्वीपरमावैकुण्ठव्यापिवैकुण्ठादीनि वेदाः वयं गमध्ये गन्तुं उश्मसि कामयामहे। अथवा गमध्ये गच्छन्ति जीवा येषु तानि गानि गतिस्थानानि गानां मध्यस्तस्मिन् गतिस्थानेषु मध्ये यत्र यस्मिन् स्थाने भूरिशृङ्गा गावः महच्छृङ्गाः चतुःशृङ्गा वा। यथा ऐरावतस्य चत्वारो दन्तास्तथा अलौकिकाश्चतुःशृङ्गा

तत्राह मह इति। तेजोरूपस्तेन सकलदोषदाहकत्वमज्ञानाद्यन्धकारनाशकत्वं श्रीमत्पुरुषोत्तमाननाधिष्ठातृतेजोरूपवैश्वानरत्वं निरूपितम् 'महस्ते विष्णो सुमतिं भजामहे' इत्युदाहृतश्रुतेः। ननु श्रीमदाचार्यशरणेन भगवल्लीलाप्राप्तिर्भविष्यतीत्यत्र किं मानमिति चेत्तत्राह। देवः श्रीमत्पूर्णपुरुषोत्तमलीलाविष्टः। तेन श्रीमदाचार्यशरणानां भगवल्लीलानुभवः सिद्ध एवेति भावः। जीवदेहदोषदाहकत्वं कया रीत्येत्यत आह मर्त्यान् मरणधर्माणो मनुष्या जीवास्तान्। एतेन देहगतदोषा निरूपितास्तेषां दोषनाशार्थमाविवेश मन्त्राद्युपदेशकाले आविवेश देहेन्द्रियान्तःकरणेषु। एतेन श्रीमदाचार्याः श्रीमद्भगवल्लीलाविष्टाः प्रविशन्ति भक्तानां हृदय इति ध्वनितं यथा श्रीदामोदरदासश्रीसूरदासादीनामिति दिक्। एतेन 'नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे। सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः' इति श्रीभागवतश्लोकोऽपि व्याख्यातः।

श्रुत्यन्तरमवतारयन्ति पूर्वमित्यादि। अयं मन्त्र इति। तैत्तिरीये इति शेषः। अत्र मन्त्रद्वयम्। एकवचनं तु गवां चतुःशृङ्गप्रतिपादने प्रथमो मन्त्र इत्यभिप्रायेण। एवं श्रुतिपदेऽपि द्वितीयव्याख्यानं तु तत्प्रसङ्गतः ऋग्वेदेऽपि 'ता वां वास्तून्युश्मसि गमध्ये यत्र गावो भूरिशृङ्गा अयासः। अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरी'ति॥ व्याख्यानं तु प्रभुभिः कृतमेव विद्वन्मण्डने प्रसिद्धानीति तच्छब्दस्य प्रक्रान्तप्रसिद्धानुभूतरूपार्थत्वादिति भावः। तव तवेति आदरे द्विरुक्तिः। रमावैकुण्ठेति। 'वैकुण्ठः कल्पितो येन लोको लोकनमस्कृत' इति श्रीभागवतप्रसिद्धः। गच्छन्तीत्यादि। 'अन्येष्वपि दृश्यन्त' इति डप्रत्ययः टिलोपः। अयास इति। यान्त्यनेन भगवत्सुखमिति याः अलौकिकदेहादयः तान् अस्यति क्षिपन्तीति याः स्वरूपहानिः न याः स्वरूपहानिर्येषां ते अयासः अलौकि-

गावो वर्तन्ते तत्र अयासः अनपायाः अपायः स्वरूपहानिः जले निमग्नस्य जलपानवत् । तद्रहिता भगवद्दर्शनाद्युपयुक्तनित्यालौकिकशरीरेन्द्रियादिवन्तस्तत्रत्याः सर्वेपि पदार्थाः नित्याः नित्यलीलास्थाने स्थितत्वादिति यावत् । यद्वा अयः शुभावहो विधिरिति भगवता सह क्रीडादिरूपो विधिस्तेन आसते स्वामिन्यः । 'तस्मात् एकाकी न रमते स द्वितीयमैच्छदेतावानासे' तिश्रुतेः तादृशस्थानस्योत्कर्षं वेदः स्वयमेवाह अत्राहेति । अत्रास्मिन् व्यापिवैकुण्ठे विष्णोर्बहुरूपमाहेत्यर्थः । तदुरुगायस्य तस्मिन् गोलोके उरुभिर्भक्तैः रासक्रीडायां गीयमानस्य भूरेः बहुरूपिणो महतो वा रसात्मकपुरुषोत्तमस्य रासं विना बहुरूपधारणं न सम्भवतीत्यर्थापत्त्या रासक्रीडा ज्ञायते । यथा रासक्रीडायां 'तासां मध्ये द्वयोर्द्वयो'रिति । 'कृत्वा तावन्तमात्मान' मित्यादीनि च ।

अत्रापि नित्यलीलास्थानस्थत्वाद्रासादीनां सार्वदिकत्वं विष्णोः पुरुषोत्तमस्य परमं पदमवभाति स्वत एव प्रकाशकत्वम् । तदुक्तं गीतायाम् 'न तद्भासयते सूर्यो न शशाङ्को न पावकः । यद्गत्वा न निवर्तन्ते तद्धाम परमं मम' ति सर्वापेक्षया परत्वं नित्यलीलास्थितिस्थानस्यैवेत्यर्थः । अवगलितार्थस्तु—हे यूपाभिमानिन् विष्णो, तव स्थानानि वयं तदेशं गन्तुं कामयामहे इत्यनेनात्युत्कर्षो दुर्लभत्वं च स्थानानां द्योतितम् । जीवानां गतिस्थानानां मध्ये यत्र बृहच्छृङ्गा बहुशृङ्गा वा गावो वर्तन्ते तत्स्थानस्थितपदार्था नित्याः गोलोकस्थितभक्तैर्गीयमानस्य रासार्थं भगवतो बहुरूपधारिणो विष्णोस्तत् परमं पदमवभाति तादृशमाप्यधिकारसिद्धत्वहेतवे निष्कामकर्मणे यूपोऽस्मिन्नवटे तिष्ठतु । विधत्ते वैष्णवर्चा कल्पयति 'वैष्णवो वै देवतया यूपः स्वयैवैनं देवतया कल्पयती'ति ब्राह्मणवाक्यं प्रमाणमित्यनेन संहितासङ्गतावपि न विरोधः ।

विष्णोः कर्माणि पश्यतेति । हे भगवदीयाः ! विष्णोः गोलोकस्थितपुरुषोत्तमस्य

देहादिवन्त इत्यभिप्रेत्याहुः अनपाया इत्यादि । क्लिष्टकल्पनात्वादर्थान्तरमाहुः यद्वेति । स्वामिन्य इति । सन्तीति शेषः ।

सार्वदिकत्वमिति । 'व्रजपुरवनितानां वर्धयन् कामदेवमि'ति पद्ये वर्तमानप्रयोगात् । गीतायामिति । 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाती'ति श्रुतावप्युक्तम् । अत्राग्निनिषेधो लौकिकाग्निविषय इत्यवोचाम । संहितासंगतिविरोधं परिहरन्तः श्रुत्यर्थं व्याकुर्वन्ति 'हे यूपाभिमानिन् विष्णो,' इत्यारभ्य न विरोध इत्यन्तेन । वेदा इति बृहद्वामनीये वेदैः प्रार्थितो भगवान् स्वलोकं दर्शयामासेत्युक्तम् । कर्माणीति । सर्वेषां कर्मणां नित्यत्वेन सामान्यतः सर्वकर्मदर्शनमुक्तम् । सर्वेषां कर्मणां नित्यत्वं 'बहूनि सन्ति नामानि रूपाणि च सुतस्य ते । गुणकर्मानुरूपाणि तान्यहं वेद नो जना' इति श्रीभागवतवाक्ये सन्तीति वर्तमान प्रयोगाज्ज्ञेयम् । इदं यथा तथा श्रुतिस्मृतिप्रामाण्येन विद्वन्मण्डने निरूपितं प्रभुचरणैः ।

कर्माणि पश्यत । भूरिशृङ्गा गाव इति कथनानुरोधाद्गोचारणादीनि कर्माणि, इन्द्रस्येति दिवीव चेति वक्ष्यमाणानुरोधाद्रासक्रीडादीनि कर्माणि, बहुवचनानुरोधान्नित्यलीलास्थानि कर्माणि सर्वाण्येव सम्भवन्तीत्यर्थः । पश्यतेति कथनेन तादृशभगवदीयानां दर्शनाधिकारः कथितः । तेन सेवाफलोक्तसेवोपयोगिदेहो वैकुण्ठादिष्विति फलं द्योतितम् ।

ननु यज्ञेनैव तत्फलप्राप्तिर्न साधनान्तरेणेत्याशङ्कानिरासायाह यतो व्रतानीति । देहलीदीपकन्यायेन व्रतादिसाधनस्य फलत्रयेऽपि सम्बन्धो बोध्यः । अतः फलप्राप्तिप्रकारमाह यतो व्रतानि पस्पश इति । यतः तादृशफलप्राप्तिहेतोः व्रतानि भगवदीयव्रतानि कात्यायनीव्रतादीनि ' सकृदेव प्रपन्नाये ' त्यादीनि च, तनुजावित्तजामानस्यादीनि वा पस्पशे सृष्टवान् श्रीमदाचार्यरूपेण प्रादुर्भूय निर्मितवान्वा । इन्द्रस्येति । परमैश्वर्यस्य विष्णोः । अथवाऽत्र विष्णुपदमनुक्त्वा यदिन्द्रपदोपादानं तेन यथा स्वर्गे इन्द्रस्य सदा रसाविष्टत्वं तथात्रत्यपुरुषोत्तमस्यापि रसाविष्टत्वम् । ' रसो वै सः । रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती 'तिश्रुतेः । युज्यः सायुज्यं प्राप्तः सखा अलौकिकसामर्थ्यवान् । अत्र फलकथनात् नवधा भक्त्यन्तर्गतसख्यत्वं न सम्भवति, तस्य साधनत्वात् । तद्विष्णोः परमं पदं रसात्मकपुरुषोत्तमस्य नित्यलीलास्थानं सूरयः माहात्म्यज्ञानयुक्ताः स्नेहविशिष्टा भक्ता भगवदीयाः सदा दिवीव चक्षुराततं यथा भवति तथा पश्यन्ति । सदा नित्यली-

---

भगवदीयानामिति । ' त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजमि'ति श्रीभागवतवाक्येन । एवेत्यनेन भगवद्भक्तातिरिक्तानां नाधिकारः सूचितः ।

निर्मितवानिति प्रकटितवानित्यर्थः । ' बृंहणाद्ब्रह्मनामासावैश्वर्यादिन्द्र उच्यते ' इति ब्रह्माण्डपुराणवाक्यादिन्द्रशब्दस्य परमैश्वर्यविशिष्टश्रीपुरुषोत्तमरूपार्थत्वादत आहुः परमैश्वर्यस्येति । ' इदि परमैश्वर्ये ' इति धातुपाठादिति भावः । यद्वा गावो भूरिशृङ्गा इत्युक्तत्वात् गवामिन्द्र इत्यर्थः । ' त्वं नः परमकं दैवं त्वं न इन्द्रो जगत्पते । भवाय भव गोविप्रदेवानां ये च साधव ' इति श्रीभागवतवाक्यात् । अलौकिकेत्यादि । भवतीति शेषः । यतो हेतोर्व्रतानि पस्पशेऽस्तस्तेषु स्थितः सखा भवतीत्यन्वयः । यद्वा यतो हेतोर्व्रतानि भगवत्सेवौपयिकानि श्रीमदाचार्यरूपेण पस्पशे सृष्टवान् । अतः श्रीमदाचार्यैकशरणा भगवत्सेवादि कुर्वन्तस्तत् श्रीमत्पूर्णपुरुषोत्तमस्य परमं स्थानं सूरयः सदा पश्यन्तीत्यन्वयः । श्रीमदाचार्यान् विशिनष्टि । इन्द्रस्य श्रीमद्गोविन्दस्य युज्यः योग्यः अनुकूलस्तदीयहार्दप्रकटनकारकः अत एव 'तस्यैवात्मानुभावप्रकटनहृदयस्याज्ञया प्रादुरासी'दित्युक्तं प्रभुचरणैः । सखा प्रियः श्रीवल्लभाख्य इत्यर्थः । सूरय इति । शब्दपरब्रह्मवित्त्वं तत्त्वं शब्दब्रह्मणि भगवन्माहात्म्यप्रतिपादनात् परब्रह्मज्ञानं च ' भक्त्या मामभिजानाति '' 'भक्त्याहमेकया ग्राह्य' इत्यादिवाक्यात् । भक्तिश्च स्नेहरूपैवेत्यभि-

लायां गतेऽस्मिल्लोके स्थितेपि दिवीव यथा स्वर्गे लोके अप्राकृतचक्षुषा आततं अवलोकनविषयीभूतं भवति तथा गोलोकेऽलौकिकविग्रहविशिष्टा भगवन्तं पश्यन्ति । दिवीवेति स्वर्गदृष्टान्तकथनेन तत्र यथा रासादिक्रीडा । सा त्वनित्या । अत्र तादृशी नित्या रासादिक्रीडा । अत्र चक्षुःपदमेकादशेन्द्रियाणामुपलक्षणम् । तेन सर्वेन्द्रियैर्भगवत्स्वरूपमाततं व्याप्तं विषयीकृतमित्यर्थः ।

पूर्वोक्तार्थ एव श्रुत्यभिप्रायः । अन्यथा व्यासचरणैः श्रीकृष्णजन्मखण्डे गोलोकनिरूपणे भगवल्लीला न प्रतिपादिता स्यात्, तत्प्रतिपादकमूलभूतश्रुत्यन्तरादर्शनात् 'श्रुतेरिवार्थं स्मृतिरन्वगच्छ दि'ति पूर्वोक्तविष्णोरनुग्रहाद्वैष्णवस्य यूपस्याग्निष्टोमाग्निमाहवनीयेन संमितं स्थापयामीत्यर्थः । एतस्यैव धाम्नो भूतले गोकुलरूपेण प्रादुर्भावात् । अत एव प्रभुचरणैर्विद्वन्मण्डने तत्परत्वेन व्याख्यातायामपि न विरोधः ।

ननु 'नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमी'ति श्रुतौ एकस्मिन्विशेषणे नम इति कथनेन सर्वत्र सम्बन्धः स्यादेवेति पुनः प्रतिविशेषणे नम इति कथनेनैश्वर्यादिषड्धर्मिद्वयरूपाष्टकं ज्ञायते । न च सप्तसु विशेषणेषु नमःपदोपादानात्सप्तरूपमेवेति वाच्यम् । बृहत इति विशेषणे चतुर्थीकथनेन पृथग्रूपत्वं ज्ञायते । धर्मित्वेन रूपेण धर्मिण एकत्वेपि संयोगविप्रयोगद्योतनार्थं विशेषणद्वयं नमो विष्णवे बृहत इति । अथवा विप्रयोगात्मकधर्मिरूपस्य भक्ताधीनत्वाद्रसशास्त्रे नायिकाप्राधान्याच्च नमनप्रयोजनाभावः सूचितः । अतः परं सर्वत्र नमःपदकथनानुरोधेनाष्टस्वरूपात्मकषड्गुणधर्मिद्वयसहितं श्रीमदाचार्यस्वरूपं

प्रेत्याहुः माहात्म्येत्यादि । एकादशेन्द्रियाणामिति । सेवौपयिकानामित्यर्थः । विद्वन्मण्डन इति । विस्तरार्थावलोकनार्थिभिस्ततोऽवलोकनीयमिति बोधितम् ।

'निजाचार्यपदाम्भोजरेणवः कृपयन्तु मे ।
ये धृता मूर्ध्नि कुर्वन्ति श्रीमद्गोविन्दवल्लभम् ॥

प्रासङ्गिकमुपपाद्य प्रस्तुतमनुवदन्ति नन्विति । संबन्धः स्यादेवेति नमस्कार्यनमस्कारकभावरूपः । सप्तरूपमेवेति । बृहत इदं विष्णव इत्यस्य विशेषणमिति भावः । विशेषण इति । श्रीमदाचार्यवाचकाग्निशब्दस्य । तस्मिन् यद्यप्येकस्यैवैतानि विशेषणानि, तथापि प्रत्यङ्नमस्कारकथनेन पृथग्रूपत्वं बोध्यम् । पृथग्रूपत्वमिति । बृहत इत्यत्र नमःशब्दयोगमन्तरा चतुर्थ्यनुपपत्त्या तत्सिद्ध्यर्थं तदाक्षेपात्पृथक्त्वं सुवचमिति भावः । भक्ताधीनत्वादिति । 'अहं भक्तपराधीन' इत्यादिश्रीभागवतवचनात् मुख्यभक्तत्वं श्रीव्रजसुन्दरीष्वेवेत्यभिप्रेत्याहुः नायिकाप्राधान्याच्चेति । अन्यथा रसपुष्टता न स्यात् । अष्टस्वरूपात्मकेत्यादि । अष्टस्वरूपात्मको हि पुरुषोत्तमः । अत एव श्रीभागवते पूर्णपुरुषोत्तमप्रादुर्भावप्रतिपादकान्यष्ट सर्वेत्या-

प्रदृश्यते । तथाहि 'नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि' । नम इति श्रीमदाचार्याणां पुरुषोत्तमरूपत्वाज्जीवैर्नमनमेव कर्तव्यमिति सिद्धान्तान्नमनमेवोक्तम् ।

ननु कुत्रोक्तमाचार्याणां ब्रह्मत्वमिताकयाङ्क्षायां छान्दोग्ये पठ्यते 'आत्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ती'ति। अतति व्याप्नोति सर्वमित्यात्मा । आत्मानं पुरुषोत्तं वैश्वानरं श्रीवल्लभरूपधारिणम्। 'वैश्वानरो वल्लभाख्य' इति वाक्यात् । ननु श्रीमदाचार्याणां श्रीवल्लभ इति नामप्रसिद्धिस्तां विहाय कथं श्रुतौ वैश्वानर इति नामकथनमिति चेन्न । परोक्षवादार्थमिदम् । तत्र 'परोक्षप्रिया इ वै देवा'

दीनि सार्धवसुपरिमितानि श्लोकानि । तथा सिद्धान्तरहस्यसार्धाष्टश्लोकान्यपि पूर्णपुरुषोत्तमबोधकानि संगतानि । अत एव यमुनाष्टकविवृतौ 'भगवताष्टविधमैश्वर्यं कालिन्द्यै दत्तमिति ज्ञापनायाष्टभिः श्लोकैः स्तुवन्ती'त्युक्तं श्रीप्रभुचरणैः । एवं च यथाष्टविधमैश्वर्यरूपत्वं श्रीमन्नन्दकुमाराणां तथा श्रीमदाचार्याणामिति भावः । सिद्धान्तादिति । शास्त्रार्थनिबन्धे श्रीमदाचार्यकृतसिद्धान्तादिति भावः ।

श्रीमदाचार्येषु पुरुषोत्तमत्वं प्रतिपादयन्तः पूर्वमाशङ्कामुद्‌घाट्यन्तस्तां परिहरन्ति नन्वित्यादि । छान्दोग्ये पठ्यन्त इति । अग्नेरपि व्यापकत्वं सर्वस्वरूपत्वं पूर्वोदाहृतभारतादिवचनेषु श्रुतिष्वपि निरूपितम् । अधुना सर्वस्वरूपप्रतिपादिका श्रुतिरुदाह्रियते 'इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥' अस्यार्थो निरुक्तकारैरुक्तः । इममेवाग्निं महान्तमात्मानमेकमात्मानं बहुधा मेधाविनो वदन्तीन्द्रं मित्रं वरुणमग्निं दिव्यं च गरुत्मन्तं दिव्यं दिविजो गरुत्मान् गरणवान् गुर्वात्मा महात्मेति वा । 'यस्तु सूक्तं भजते यस्मै हविर्निरूप्यते यमेव सोऽग्निर्निपातमेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजत' इति । एतेनैकस्यानेकरूपकथनं परब्रह्मणि न घटते ।

वैश्वानर इति । वैश्वानरपदनिरुक्तिर्निरुक्तकारैरुक्ता वैश्वानरस्येति श्रुत्यवतरणे । इयं श्रुतिः श्रीमदाचार्यवर्यैर्यदा विद्यानगराधिपतिकृष्णदेवाभिधराजमंदिरे गिरिजाजानिप्रवर्तितमायावादविवादचातुरीधुरीणैः पण्डितैः पराजितेषु वैष्णवेषु साकारब्रह्मवादस्थापनपूर्वकं वैष्णवमतस्थापने मति सकलसंप्रदायिविप्रवर्यैराचार्यैर्निगदितं राजानं प्रति—एतेऽस्माकं स्वामिन एव आचार्या भवन्त्विति विज्ञापयामासुरिति वृत्तं वदति, तदेवं सर्वमुपपाद्यते । तथा हि । 'वैश्वानरः कस्माद्विश्वान्नरान्नयति विश्व एनं नरा नयन्तीति वा विश्वानर एव स्यात्प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरस्तस्यैषा भवति' । 'वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः । इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण' । तत्र नरशब्देन दैविजीवास्ताञ्नयति नाममन्त्रब्रह्मसंबन्धादिना सकलदोषहरणपूर्वकं व्यापिवैकुण्ठादिषु प्रापयति । दैविजीवा

यदाऽस्मिँल्लोके समायान्ति तदा तदुद्धारार्थं श्रीमदाचार्याः प्रादुर्भवन्तीत्यभिप्रेत्योदितं विश्वे एनं नरा नयन्तीति निरुक्तार्थः । यद्वा विश्वे नरा दैवीजीवाः श्रीदामोदरदासादयः सेवका अस्य श्रीवल्लभाचार्यस्य ।। 'नरे संज्ञाया'मिति विश्वशब्दस्य दीर्घः । विश्वानर एव वैश्वानरः । स्वार्थिकः प्रज्ञाद्यण् । यत्तु विश्वानरस्यापत्यमिति व्युत्पाद्य बिदादित्वादञित्युक्तं रामाश्रमैस्तत्तु लौकिकाग्निपरशब्दव्युत्पत्तिपरम् । श्रुत्यर्थस्तु वैश्वानरस्य श्रीवल्लभाचार्यस्य सुमतौ सुष्ठु मतिर्ज्ञानं यस्यां तस्यामाज्ञायां वयं स्याम आज्ञाकारिणो वयं भवेमेति कृष्णदेवाख्यराजानं प्रत्युक्तिर्वैष्णवानां सर्वेषां ब्राह्मणानाम् । यद्वा सुमतौ कल्याण्यां मतौ स्यामेति निरुक्तकाराः । या श्रीमदाचार्याणां बुद्धिस्तस्यां स्याम तदनुसारिणो वयं भवेमेति तदर्थः । हि यतः कं सुखं भवतीति अतोऽस्माकं सर्वेषामयं राजा आचार्यः यथा भवान् स्वराज्यस्य तथास्माकमयमित्यर्थः । नन्वेतादृशश्चेत्तर्हि किं कर्तव्यमित्यभिप्रेत्याहुः **भुवनानामभिश्रीरिति** । सर्वेषां भूतानामभिश्रयणीय इति निरुक्तकाराः । सर्वेषामाश्रयणीयत्वेन सेवनीयोऽयमिति भावः । अभिश्रीः श्रयितुं सेवितुं योग्य इत्यर्थः । नन्वन्येऽप्याचार्याः सन्तीति किमयं सेवनीय इति तत्राहुः **इतो जातो विश्वमिति** । इतोऽस्माच्छ्रीवल्लभाख्याद्विश्वं जगज्जातं प्रादुर्भूतः । जात इत्युपलक्षणं स्थितिलययोः, पूर्वोक्तभारतवचनेषु निरूपितं जन्मस्थितिलयादि, तेनास्य ब्रह्मत्वमतोऽयमेव शरणयोग्यः । नन्वस्तु ब्रह्मत्वमस्माकं किमायातमिति चेदस्मद्वैष्णवमार्गस्थापनमनेनैव कृतमित्यभिप्रेत्याहुः **इदं विचष्ट इति** । इदं साकारब्रह्मवादस्थापनपूर्वकभगवत्सेवनं विचष्टे, मायावादखण्डनपूर्वकमुक्तवान् । किञ्चास्य चलने श्रीपुरुषोत्तमा अपि सह चलन्तीति सदा पुरुषोत्तमा न त्यजन्तीत्यवश्यं सेवनीय इत्यभिप्रेत्याहुः **वैश्वानरो यतत इत्यादि** । वैश्वानरः श्रीवल्लभाख्यः । **सूर्येण** । सरतीति सूर्यः पुरुषोत्तमः । यद्वा सूर्यशब्देन सूर्यान्तर्वर्ती पुरुषोत्तमो लक्ष्यते । तेन सह यतते मायावादनिरासार्थं दैवोद्धारार्थं च यतते प्रयत्नवान् भवतीत्यर्थः । एतेन परमकृपालुत्वं ध्वनितम् ।

किञ्च प्रसङ्गादन्यापि श्रुतिरेतदर्थप्रतिपादिकोदाह्रियते । श्रीमदाचार्यान् प्रति सर्वे ब्राह्मणा राजा सामात्यश्च विज्ञापयामासुः—गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ अस्यार्थः । ब्रह्मणां ब्रह्मणस्पते, त्वा त्वां वयं हवामहे अतस्त्वं ऊतिभिः शृण्वन् सदनं सीदेत्यन्वयः । हे ब्रह्मणस्पते अक्षरस्वामिन्, उद्देश्यत्वा'त्संबोधने चे'ति सूत्रेण सम्बोधनविभक्तिः । सम्बोधनत्वं चाभिमुखीकृत्याज्ञातार्थविषयकज्ञानानुकूलव्यापारवत्त्वम् । ब्रह्मणां ब्राह्मणानामित्यर्थः । 'ब्रह्मा विप्रः प्रजापति'रित्यमरात् । त्वा त्वामित्यर्थः । 'त्वामौ द्वितीयाया' इति सूत्रेण त्वादेशः । त्वां श्रीवल्लभाख्यं वयं सर्वे हवामहे जुहुमः प्रीणीमहे । कनकाभिषेकेण श्रौतेन विधिना तर्पयाम इत्यर्थः । प्रीणनमप्यस्यार्थो भवतीति महाभाष्यात् । रूपसिद्धिस्तूदिता पूर्वम् । नः अस्माकं सर्वेषामूतिभिः । द्वितीयार्थे तृतीया । ऊतीः । अवतेः 'स्त्रियां क्तिनि'ति क्तिन्प्रत्यये

'ऊतियूतिजूतिसाती'ति निपातितोऽयं शब्दः । तत्प्रयोजनं त्वन्तोदात्तार्थम् । नच प्रत्ययस्वरेण सिद्धिः । क्तिनो नित्यत्वेन 'ञ्नित्यादिर्नित्यमि'त्यनुशासनादाद्युदात्तत्वात् । 'ज्वरत्वरे'ति सूत्रेणोपधाया ऊठि कृते रूपं बोध्यम् । अवतेः कान्तिरप्यर्थः । कान्तिः कामना गृह्यते । तथा च कर्मीभूताः कामना इत्यर्थः । अत्र ऊतिशब्दार्थं प्रति श्रुधात्वनिरूपितं कर्मत्वं तच्च प्रकृतधात्वर्थव्यापारजन्यफलशालित्वम् । शृण्वन् सादरं श्रुतिविषयीकुर्वन् सदनम् । संहिताया सदनमेव सादनम् । सीदन्त्यस्मिन्नित्यधिकरणे ल्युट् प्रज्ञादित्वादण् । पदानां व्याख्यानरूपत्वात् सदनमिति दीर्घरहितः पाठः । सदनशब्दो गृहवाची । अस्माकं गृहं प्रति सीद आगच्छ । अयं भावः । मायावादिभिर्जितेषु वैष्णववर्येष्वस्मासु अस्मदीयानां मतं कथं स्यास्यतीति व्याकुलहृदयानां स्वमतस्थितिर्भवत्विति कामनाः शृण्वन् यथा वैष्णवमतस्थापनार्थमागतोऽसि तथा सर्वदैवागन्तव्यमिति । सीदेति पद्लृधातोर्गत्यर्थकात्प्रार्थनायां लोट् । श्रीमतामागमनेन सकलविमतान्धकारपटलविघटना समजनि । अतो भवन्तः श्रीमत्पुरुषोत्तमसदृक्सकलवेदादिविशिष्टा इत्यभिप्रेत्याहुः । उपमश्रवस्तम उपमीयते इत्युपमं, उपमितमुपमेयमित्यर्थः । मूलविभुजादित्वात्क 'आतो लोप इटि चे'त्यालोपः । उपमानविषय इति यावत् । श्रूयतेऽस्मिन् धर्मादिकमिति श्रवो वेदः । उपमः श्रवो यस्य स उपमश्रवाः अतिशयेनोपमश्रवा इति उपमश्रवस्तमस्तमित्यर्थः । 'अनेकमन्यपदार्थे' इति बहुव्रीहिः । 'अतिशायने तमबिष्ठनावि'ति तमप् । अत्रोपमशब्दस्योपमावाचित्वात्तस्य चोपमानाकाङ्क्षायां पुरुषोत्तमनिष्ठवेदस्योपमानत्वनिर्णयेन पुरुषोत्तमसदृशः श्रवो वेदो यस्य स इत्यर्थः पर्यवसन्नः । एवं च वेदार्थवित्त्वं यथा भगवति 'वेदविदेव चाहमि'ति गीतावचनात्, तथा वेदयाथार्थ्यवित्त्वं श्रीमदाचार्येष्विति भावः । एतदेव 'न ह्यन्यो वागधीशादि'ति पद्येनोदितं श्रीमत्प्रभुचरणैः । 'उत त्वः पश्यन्नि'ति श्रुत्या श्रीमदाचार्यान्यस्य सरस्वतीहार्दभावज्ञानाभावत्वं बोधितमिति प्रागेव निरूपितम् । एव चैत एवाश्रयणीया इति भावः । किंभूतं त्वां श्रीवल्लभम् । गणानां दैविगणानां सर्वेषां गणपतिं । संबन्धे षष्ठी । स च स्वस्वामिभावरूपः । स्वामी सर्वेषामाचार्यः । एको 'गणशब्दो दैविगणपरः । द्वितीयस्तु समुदायवाची । तेन दैविजीवानां गणः समुदायस्तस्य स्वामी उद्धर्तेति यावत् । अतो दैवैः सेवनीय एवेति भावः । पुनः किंभूतं त्वां श्रीवल्लभम् । कवीनां कविं । कवयो ज्ञानिनस्तेषां मध्ये कविः ज्ञानीत्युक्ते विजातीयज्ञानशालीत्यर्थो गम्यते । यथा शूराणां मध्ये शूर इत्युक्ते विजातीयशूर इत्यर्थस्तद्वदिहापि 'संख्यावान् पण्डितः कवि'रिति कोशेन कविशब्दस्य ज्ञानिनि शक्तिबोधनात् कोशस्यापि शक्तिग्राहकत्वात् । तथा चाभियुक्ता 'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ।' इति । एतेनालौकिकज्ञानवत्त्वेन पुरुषोत्तमत्वं सूचितम् । यद्वा लोकोत्तरवर्णनशीलाः कवयस्तेषां मध्ये श्रेष्ठमित्यर्थः । पुनः किंभूतं त्वाम् ज्येष्ठराजं अतिशयेन प्रशस्यः स्तुत्य इत्यर्थे 'प्रशस्यस्य श्र' इत्यनन्तरं 'ज्य च'त्यनेन ज्यादेशः 'अतिशायने

इति श्रुतेः 'परोक्षवादो वेदोऽयं परोक्षं मम च प्रिय'मिति भगवद्वाक्याच्च । अत एव श्रीभागवते श्रीराधानामोच्चारणं स्पष्टतया न कृतं परोक्षेण कृतम् । उपास्ते पुष्टिमार्गीयैर्भक्तैः सेवा क्रियते । सर्वेषु लोकेषु वैकुण्ठादिषु सर्वेषु भगवल्लोकेषु श्रीमदाचार्याणां भगवदास्यरूपत्वात्तत्रोपासनं युक्तम् । सर्वेषु भूतेषु ब्राह्मणक्षत्रियवैश्यशूद्रेषु तत्तत्पत्नीषु च 'स्त्रीशूद्राद्युद्धृतिक्षम' इति वाक्यात् आत्मसु गोस्वामिषु 'स्ववंशे स्थापिताशेषस्वमाहात्म्य' इति वाक्यात् सर्वे पुष्टिमार्गीयाः वैश्वानरं श्रीवल्लभमुपासत इत्यर्थः । अन्नमत्ति भोजनं करोति । तत्र श्रीमदाचार्याणां पुरुषोत्तमत्वेन प्रादुर्भावे गीताप्रामाण्यम् । 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्' । हे भारत, यदा यदा यस्मिन् यस्मिन् काले धर्मस्य भगवद्भक्त्यादिरूपस्य ग्लानिः संकोचो भवति । अधर्मस्य ज्ञानभक्त्यादिनाशकस्य अभ्युत्थानमुत्पत्तिर्भवति । हीति निश्चयेन । तदा आत्मानं स्वस्वरूपमहं सृजामि अर्थाच्छ्रीमदाचार्यादिरूपेणेत्यर्थः ।

ननु श्रीमदाचार्याणां ब्रह्मत्वादात्मानं वैश्वानरमिति श्रुतौ वैश्वानरशब्दोऽग्न्यादिवाचक इतिचेन्न । वैश्वानरशब्दो ब्रह्मवाचक एव । तत्र सूत्रं प्रमाणम् 'वैश्वानरः साधारणशब्दविशेषात्' । तत्र को नाम आत्मा किं ब्रह्मेत्युपक्रम्य 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा' इत्याद्याम्नायते । तत्र वैश्वानरशब्दात् 'संवत्सरो वा अग्निर्वैश्वानर' इति 'संवत्सरो वै प्रजापति'रिति च श्रुतेर्हिरण्यगर्भोपासनपरमिदं वाक्यम् ।

तमभिष्ठनावि'तीष्ठनि श्रुतिस्मृतिस्तुतिविषय इत्यर्थः । एतेन भवान् सर्वथा स्तव्य इति ध्वनितम् । ज्येष्ठश्चासौ राजा चेति कर्मधारयः समासान्तष्टच्प्रत्ययः । 'राजृ दीप्तावि'ति धातोः कनिन् । यद्वा वृद्धप्रकृतिको ज्येष्ठशब्दः 'वृद्धस्य चे'ति सूत्राज्ज्यादेशः । सर्वेभ्योऽपि वृद्धः पूर्णपुरुषोत्तम इत्यर्थः । अथवा ज्येष्ठानामत्यन्तवृद्धानां सर्वेषां राजा स्वामी आचार्य इत्यर्थः । त्वामेव शरणं शरणं गताः स्म इति भावः । यद्यप्यस्यां श्रीमदाचार्यवाचकपदाभावस्तथापि श्रीमदाचार्यनिष्ठधर्मोपलम्भात्पूर्वश्रुत्येकवाक्यतया चाचार्यपरत्वेन व्याख्यातेति दिक् ।

प्रकृतमनुसरामः । परोक्षेण कृतमिति । यद्यपि 'अनयाऽऽराधितो नूनं भगवान् हरिरीश्वर' इति श्रीभागवते राधया इतो राधितः शकन्ध्वादित्वात्पररूपमिति श्रीराधानाम श्रूयते तथापि संहितायामप्रतीतौ शकन्ध्वादिषु पाठकल्पने मानाभावात्तथार्थाभासनाच्च परोक्षरूपमित्यर्थः । ब्राह्मणेत्यादि । कैरिति जिज्ञासायां तैरित्यर्थः । आत्मसु गोस्वामिषु इति । 'अङ्गादङ्गादि'ति श्रुत्या स्ववंशे स्वस्वरूपत्वमेवेत्यर्थः । श्रीमदाचार्यरूपेणेति । आत्मानं वैश्वानरमित्यादिषु सामानाधिकरण्यादात्मपदेन श्रीवल्लभाचार्याणां ग्रहणमिति भावः॥ इत्यादीति ।

'एतस्य वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोन्वाहार्यपचन

किञ्चोपक्रमे ब्रह्मात्मपदश्रवणात्तदेकवाक्यत्वेन ब्रह्मपरमिदमिति संशये। हिरण्यगर्भस्य समष्ट्यभिमानित्वेन लोकावयवत्वोपपत्तेस्तदुपासकस्यान्नभोजनात्मकफलस्यापि सम्भवाद्धि-रण्यगर्भत्वेनाग्नित्रयात्मकत्वस्यापि युक्तत्वाद्धिरण्यगर्भोपासनपरमिदमिति प्राप्ते उच्यते। "वैश्वानरः साधारणशब्दविशेषात्" वैश्वानरपदवाच्यः परमात्मैव। कुतः। येऽस्मिन्वाक्ये हिरण्यगर्भसाधारण्यशब्दाः श्रुतास्तेभ्योपि प्रादेशमात्रस्यैव द्युमूर्धत्वादिरूपे विशेषाम्ना-नात्। विरुद्धसर्वधर्माश्रयत्वसर्वभवनसमर्थत्वं परमात्मन एव नान्यस्य सम्भवति। अतो वैश्वानरशब्दो ब्रह्मपरः।

श्रीमदाचार्याणां पुरुषोत्तमत्वे श्रीभागवतस्य समाधिभाषाप्रमाणं भगवद्वाक्यम् 'आचार्यं मां विजानीयान्नावमन्येत कर्हिचित्। न मर्त्यबुद्ध्याऽसूयेत सर्वदेवमयो गुरुः'। आचार्यं मामिति मामेवाचार्यं विजानीयात् नत्वण्वपि मन्यूनम्। अत एवोक्तम् 'अग्नित्वं वर्णितं ते कविभिरपि सदा वस्तुतः कृष्ण एवे'ति। 'नावमन्येत कर्हिचि'दिति श्रीमदा-चार्या भगवद्रूपा न सन्तीति नावमन्येत अवज्ञां न कुर्यात्। कर्हिचित् कदाचिदपि। 'न मर्त्यबुद्ध्याऽसूयेते'ति जीववत्प्राकृतरूपधारणेपि न असूयेत गुणेषु दोषारोपणं न कर्तव्यं 'सन्मनुष्याकृति'रितिवाक्यात्। जीवानामुद्धारार्थं मनुष्यनाट्यस्वीकारात्। 'समा-नशीलव्यसनेषु सख्य'मिति तथा दैवजीवानां सख्यं सिद्ध्यति। ननु श्रीमदाचार्याणा-मवच्छेदकावच्छेदेन मनोरथपूरणे कथं सामर्थ्यं भवतीति तदर्थमाश्रयान्तरमपि कर्तव्यमि-त्याशङ्क्याहुः सर्वदेवमय इति। अत्र प्राचुर्यार्थकमयट्प्रत्ययस्तेन यथा भगवद्देहे तत्तदङ्गेषु आधिदैविकदेवानां स्थितिस्तद्वच्छ्रीमदाचार्याणां श्रीमदङ्गेषु स्थितिस्तेनावच्छेदकावच्छेदेन सकलमनोरथपूरणकर्तृत्वसामर्थ्यस्य विद्यमानत्वात्कदाचिदपि दुःसङ्गेन वा जडबुद्ध्या वान्याश्रयो न कर्तव्यः स्वधर्महान्यनन्यत्वभङ्गप्रसङ्गात्। यदि श्रीमदाचार्याणां यत्फल-दानेच्छा नास्ति, तत्फलदाने केषांचिदपि देवादीनां सामर्थ्यं नास्ति।

आधिदैविकस्य श्रीमदाचार्येषु विद्यमानत्वात् तदर्थनान्याश्रयः कर्तव्यः। ननु यः कश्चिद्वेदशास्त्रसम्पन्नश्चेत्तस्यैव गुरुकरणं युक्तं, किमिति श्रीमदाचार्याणां तद्वंश्यानां च गुरु-

---

आस्यमाहवनीय' इत्याद्याम्नायते। ब्रह्मपर इति। तेन श्रीमदाचार्याणां ब्रह्मत्वं निराबाधम्। अत्र सूत्रे विशेषस्तु भाष्यादिषु स्फुट एव।

मामेवाचार्यमिति। श्रीवल्लभाचार्यमित्यर्थः। 'आचार्यो भगवानग्नि'रिति वाक्यात्। उत्सवनिर्णये श्रीमदाचार्योत्सवनिर्णयप्रसङ्गे। वल्लभाचार्यरूपेणावतिष्ठत इति शंकराचार्यकृत-भारतीयमट्टनामटीकायां व्यासोक्तेश्चेति। श्रीपुरुषोत्तमचरणैरुक्तं न कुर्यादिति गुरोरवज्ञायां महदनिष्टप्रसक्तिरिति बहुतन्त्रपुराणादिषु निरूपितं विस्तरभयान्नानूद्यते। नान्याश्रयः कर्तव्य इति। 'यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः। प्राणोपहाराच्च यथेन्द्रियाणां

करणमिति चेन्न । गुरुत्वं तेषामेव सम्भवतीत्याहुः गुरुरिति । 'श्रीकृष्णज्ञानदो गुरु'रिति वाक्यात् तदुपदेष्टा गुरुः । तस्य लक्षणमाह 'कृष्णसेवापरं वीक्ष्य दम्भादिरहितं नरम् । श्रीभागवततत्त्वज्ञं भजेज्जिज्ञासुरादरात् ।' एतादृशगुरुलक्षणं श्रीमदाचार्येषु श्रीवल्लभाचार्येषु श्रीविठ्ठलनाथेषु वा । एषां कुले 'अस्मत्कुलं निष्कलङ्क'मिति वाक्यात् अन्यगुरोः

तथैव सर्वार्हणमच्युतेज्ये'ति श्रीभागवतवाक्ये वृक्षमूलसेचकवत्पुरुषोत्तमभजनतः सर्वदेवतर्पणमुदितम् । युक्तं चैतत् । न हि पादपस्य स्कन्धादिसेकेन तर्पणं प्रत्युत शुष्कतैव । तत्त्वं तु मूलसेकेनैवेवं सर्वमयाश्रयत्वेन सर्वाराधनफलसिद्ध्याऽन्याश्रयो न कार्य इति भावः । अन्याश्रयकरणे न किंचित्फलम् । तथा च भरद्वाजसंहितायामाचार्यप्रकरणे ' जानतस्त्वनुपेतस्य ब्रह्मचर्यममीप्सतः । वृथैवात्मसमुत्क्षेपो जायते कृष्णवर्त्मनि ' । अस्यार्थः । अन्यगुरोः समाश्रयेण श्रीमद्वल्लभाचार्यसमाश्रयणमन्तरेणात्मसमर्पणमनुतिष्ठतो न किञ्चित्फलमित्याह जानत इति । अन्याचार्यसमाश्रयेण ज्ञानवतः पुरुषस्य कृष्णवर्त्मनि श्रीमदाचार्ये श्रीवल्लभाचार्ये अनुपेतस्योपसत्तिमकुर्वतो ब्रह्मचर्यं परं ब्रह्मानुभवपूर्वकं तत्कैङ्कर्यं अभीप्सतः प्राप्तुमिच्छतः आत्मसमुत्क्षेप आत्मसमर्पणं वृथैवेत्यर्थः । यतो यत्केनापि न दातुं शक्यं तद्दानसामर्थ्यवत्त्वमत्रैव ' अदेयदानदक्षश्च लौकिकैहिकदानकृ'दिति वचनादन्याश्रयो न कार्य इति भावः । दम्भादिरहितमिति । आदिपदेन क्रोधादयो लक्ष्यन्ते । पूर्वोक्तवैष्णवतन्त्रोदाहृताष्टादशदोषरहितत्वं ज्ञेयम् । तच्च श्रीवल्लभ एव पुरुषोत्तमत्वात् । श्रीभागवततत्त्वज्ञमिति । ' श्रीभागवतपीयूषसमुद्रमथनक्षम ' इति वाक्यात्, ' श्रीभागवतगूढार्थप्रकाशनपरायण ' इति वाक्याच्च, ' अर्थं तस्य विवेचितुं नहि विभुर्वैश्वानराद्वाक्पतेरन्यस्तत्र विधाय मानुषतनुमि'ति वाक्याच्च तज्ज्ञत्वमत्रैवेति भावः । यद्वा भगवत इदं भागवतं भगवत्सेवादिरूपमित्यर्थः । यद्वा भगवदात्मानुभावप्रकटनरूपं तत्त्वमित्यर्थः । ' तस्यैवात्मानुभावप्रकटनहृदयस्याज्ञया प्रादुरासी'दिति श्रीप्रभुचरणाः ।

श्रीविठ्ठलनाथेष्विति । पूर्णपुरुषोत्तमरूपत्वात्तेषामेव गुरुकरणं नान्येषामित्यर्थः । किञ्च यत्र फलमेव साधनं तत्रान्यसाधनं नापेक्षितमिति भावः । श्रीमत्प्रभुचरणप्रतिपादकश्रुतयो निरूपिता निरूपयिष्यन्ते च । एषां कुल इति । ' सप्तपूरुषविज्ञेये समर्पणसुनिर्मले । कुले जातो गुणैर्युक्तो विप्रः श्रेष्ठतमो गुरुरि'ति पञ्चरात्रोक्तेः । सप्तपूरुषा विज्ञेया यस्मिन् तस्मिन् सुनिर्मले सर्वकलङ्करहिते कुले जातः गुणैरागमोक्तैर्युक्तो विप्रः श्रेष्ठतमः सर्वतः श्रेष्ठः गुरुरिति तदर्थः । एतल्लक्षणलक्षिता एते एतत्कुलं वा । निष्कलङ्कमिति । अयं श्लोकस्त्रिमङ्गललितग्रन्थारम्भे श्रीप्रभुचरणैः । समुदितं तत्त्वं चागमोक्तगुरुलक्षणविशिष्टत्वे सति जीवोद्धारकर्तृत्वम् । किञ्च गुरुलक्षणमागमेष्युक्तं ' शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेषवान् । शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् ॥ आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः । निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ॥' इति । एतादृशलक्षणं श्रीमदाचार्येष्वेव श्रीप्रभूणामेव च । तद्वंशे

सकाशात् पूर्णपुरुषोत्तमप्राप्तिर्न । 'मन्त्रोपदेशमात्रेण नरा मुक्ताश्च भारत । पूर्वैश्च कोटि-पुरुषैः परैः सार्धं हरेरहो । कोटिजन्मार्जितात्पापान्मन्त्रग्रहणमात्रतः । मुक्ताः शुध्यन्ति यत्पूर्वकर्म निर्मूलयन्ति च' ।

सर्वेषां गुरुद्वारैव सद्गतिमाह 'पुत्रान्दारांश्च शिष्यांश्च सेवकान्बान्धवांस्तथा । यो दर्शयति सन्मार्गं सद्गतिस्तद्भवेद्ध्रुवम्' ॥ स्त्रीपुंसोरेकगुरोरुपदेशश्चेद्भ्रातृभगिनीतिसम्बन्धं

तु 'स्ववशे स्थापिताशेषस्वमाहात्म्य' इति वचनात् निग्रहानुग्रहशक्तिश्च श्रीमदाचार्येष्विवै तत्कुले संभवति । गुरुकरणमेतेषामेव मन्त्रोपदेशेनैव पुरुषोत्तमप्राप्ति । किञ्च तद्वंश्याना सर्वेषा-मेव पुरुषोत्तमत्वात्तत्प्राप्तिस्तेभ्यः सुतरामेव नान्येभ्य इत्याहु **प्राप्तिर्नेति** । श्रुतिरपि श्रीवल्लभ-वंशोद्भवाना प्रतिपादिका श्रीमदाचार्यवंशगुरुकरणमावश्यकमित्यभिप्रेत्य तेषा स्वरूपमाह । 'अस्थुरुचित्रा उषस पुरस्तान्मिता इव स्वरवोऽध्वरेषु । व्यूव्रजस्य तमसो द्वारोच्छन्तीरव्रञ्छु-चय पावका' । अस्यार्थ । पावकाः पावकस्य श्रीवल्लभाचार्यस्य वंशोद्भवा पुरस्तात्प्रथम मिता इव श्रीगोपीनाथश्रीविठ्ठलनाथौ पुत्रौ श्रीमद्गिरिधरादय सप्त पौत्राश्चेति मिता उच्यन्ते । वस्तु तस्तु तेषु ब्रह्मत्वनिश्चयादपरिमिता इति द्योतनार्थमिवेत्यस्य ग्रहणम् । अस्थु स्थितवन्त । यद्वा पुरस्तान्मिता इवेत्यनेन तत्पुत्रपौत्रसमूहत्वेनान्येऽमिता इत्यर्थ । कथभूता । उ इत्या श्चर्ये । चित्रा चित्रमनेकधर्मविशिष्ट ब्रह्म येषा ते चित्रा । अर्शआदित्वादच् । अनेकधर्म-विशिष्टब्रह्मबोधका इत्यर्थ । यद्वा चित्रा विविधरसविशिष्टा लीलारसाविष्टा वा । निर्मलत्व-माह । उषस उष काल इव निर्मला इत्यर्थ । तेन दम्भादिराहित्यं सूच्यते । तथा चास्म-त्कुल निष्कलङ्कमिति वचनम् । सकलवेदोक्तयज्ञादिकर्तृत्वमाह । अध्वरेषु यज्ञेषु स्वरवः स्वरन्ति वेदोच्चारणरूपं शब्दं कुर्वन्तीति ते स्वरव । 'स्वृ शब्दोपतापयोरस्मात् शृस्वृस्निही'त्यु । भक्ताना क्रोधादिनिर्मूलकत्वमाह । व्रजस्य भक्तसमूहस्य तमसो द्वारं 'नरकस्तमउच्यते' इति वाक्यात् तमसो नरकस्य द्वारं कामक्रोधलोभरूपम् । तथा च गीतासु 'त्रिविधं नरकस्येद द्वार नाशनमात्मन । काम क्रोधस्तथा लोभस्तस्मादेतत्त्रय त्यजेत्' इति । व्युच्छन्तीः नाशयन्ती अव्रन् वरणं कुर्वन्त स्वदासत्वेनाङ्गीकुर्वन्त शुचयः शुद्धा इत्यर्थं । 'शुद्धाचार शुचिर्दक्ष सुबुद्धिमा'निति वाक्यात् । एवं च श्रीमदाचार्यवंशस्य श्रुतिप्रतिपादितत्वादन्यस्य मुख्यया वृत्त्या तदभावेन पुरुषोत्तमरूपत्वेनान्यत· प्राप्तिर्नेत्यर्थ । किञ्चान्यत समर्पणमपि न सम्भव-तीति भारद्वाजसंहितावचनमुपपादितं पूर्वम् । अन्येऽपि मन्त्रा एतत्कुलप्रतिपादका वक्ष्यन्ते । गुरुशरणमहिमानमनुस्मारयन्ति मन्त्रोपदेशेत्यादि । मन्त्रोपदेशमात्रेण पापमोचकत्वसामर्थ्य-मत्रैवेत्यभिप्रेत्योक्त श्रुतिस्मृतितन्त्रसूत्रादिभि पुरुषोत्तमत्वेन स्ववंशे स्थापिताशेषस्वमा-हात्म्यत्वात् ।

केचिल्लौकिकस्त्रीपुंसोरेकगुरुकरणे भ्रातृभगिनीत्वापातकान्दिशीका एकगुरुकरण नेच्छ-न्तीति तन्निरासार्थमाहु· स्त्रीपुंसोरिति । अत्र प्रमाणं पाद्मोक्तमनुवदन्ति आचार इत्यादि ।

लोके प्रसिद्धं निषेधति स्मृतिः 'आचारो धर्ममार्गश्च गुरुर्मन्त्रश्च देवताः । दम्पत्यपत्यभूत्याद्यैरेकीकृत्य महत्फलम्' । किञ्च 'विष्णुतत्त्वं परिज्ञाय ह्येकं वानेकभेदवत् । दीक्षयेन्मेदिनीं सर्वां किं पुनश्चोपसन्नतान् ।

गुरोरुत्कर्षमाह 'हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन । तस्मात्सर्वप्रयत्नेन गुरुमेव प्रसादयेत् । गुरौ वसति यस्त्वन्यमाश्रयेत्पूजयेत्कुधीः । स दुर्गतिमवाप्नोति दत्तमस्य च निष्फलम् । प्रयत्नेन गुरौ पूर्वं पश्चादन्यत्र दापयेत् । अविद्यो वा सविद्यो वा गुरुरेव जनार्दनः' । स्वस्त्युच्चारणं विना गुरौ दत्तस्य महत्फलमाह 'गुरौ पितरि चाध्यक्षे ह्यध्यात्मप्रतिकेषु च । श्रद्धया दीयते तस्मै स्वस्त्यक्षरविवर्जितम् । विद्यते सागरस्यान्तो नान्तो दानस्य विद्यते' । पादाग्रे द्रव्यधारणे लक्ष्म्यवज्ञारूपदोषमाशङ्क्य परिहरति 'नृणां पदे स्थिता लक्ष्मीर्निलयं सम्प्रयच्छती'ति मार्कण्डेयात् ।

गुरुसेवनभगवत्सेवनयोः समत्वमाह श्रीभागवते 'यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ । भक्तिर्न स्यात्कृतं तस्य मन्ये कुञ्जरशौचवत्' । पाद्मे 'गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः । गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः । यो मन्त्रः स गुरुः साक्षाद्यो

देहजसम्बन्ध एव भ्रातृत्वादिसिद्धो लौकिकः । अयमेकगुरुरूपः सम्बन्धोऽलौकिको न लौकिकः । अलौकिकसम्बन्धस्य लौकिकपदार्थदोषजनकत्वं नास्त्येव । अतो नैकगुरुत्वे दम्पत्योर्भ्रातृभगिनीत्वापातः । 'अन्नदाता भयत्राता पत्नीतातस्तथैव च । विद्यादाता जन्मदाता पञ्चैते पितरो नृणामि'ति ब्रह्मवैवर्तीयब्रह्मखण्डे दशमाध्यायोदितवाक्यात् पितृवत्पूज्यत्वमात्रमभिप्रेतम् । अन्यथाऽन्नदात्रादीनां पितृत्वे दम्पत्योरेकपोष्यत्वे एककर्तृकभयत्राणे च यदि भ्रातृभगिनीभावापत्तिस्तर्हि विवाहवैयर्थ्यापातः । किञ्चास्मिन्वाक्ये पत्नीतातस्य पितृवदतिदेशात् भ्रातृभगिनीभावापत्तौ व्यभिचार आपद्येत । एवं च गुरौ च पितृवत्पूज्यत्वमभिप्रेतम् । नत्वेकगुरुत्वे भ्रातृभगिनीत्वम् । तस्माद्दम्पतीभ्यां गुर्वैक्यकरणं न दोषायेति दिक् । यो मन्त्र इति । 'मन्त्रोऽप्येकस्तस्य नामानि यानी'ति श्रीमत्पुरुषोत्तमवाक्याद्भगवन्नामरूपो मन्त्र इत्यर्थः । साक्षादित्यनेन विभूतिरूपत्वादिकं निरस्तं बोध्यम् । यद्यपि 'सर्वेषु वर्णेषु तथाश्रमेषु नारीषु नानाह्वयजन्मभेषु । दाता फलानामभिवाञ्छितानां द्रागेव गोपालकमन्त्र एष ॥' इति वाक्यात्, 'विशेषतो दशार्णोऽयं जपमात्रेण सिद्धिद' इति वाक्याच्च, 'गोपालेषु न बोद्धव्यः स्वप्रकाश इति स्मृत' इति तन्त्रवचनेन सिद्धसाध्यसुसिद्धारिऋणधनशोधनादिविचाराकरणप्रतिपादनाच्चास्यापि तत्त्वं तथापि 'यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित् । धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिहे'ति श्रीभागवतवचनेन कदाचिदपि भगवद्धर्मस्थितौ प्रमादाभावस्योपपादनेनात्र 'ध्यायन् स्वं कंसमथनं स्वेन मत्वाद्यधः क्रमम् । वैरिणं कंसरूपं च कर्षन्तं प्राणिवर्जितम् ॥ अयुतं प्रजपेन्मन्त्रं हुनेद्वा तत्समं बुधः । समिद्भिर्जन्मनक्षत्रतरूणां तस्य मन्त्रवित् । शत्रुर्नि-

गुरुः स हरिः स्मृतः । गुरुर्यस्य भवेत्तुष्टस्तस्य तुष्टो हरिः स्वयम्' । अवैष्णवगुरोरुपदेशग्रहणं सर्वथैव न कर्तव्यमित्याह 'महाकुलप्रसूतोपि सर्वयज्ञेषु दीक्षितः । सहस्रशाखाध्यायी च न गुरुः स्यादवैष्णवः । अवैष्णवोपदिष्टेन मन्त्रेण नरकं व्रजेत् । पुनश्च विधिना सम्यग्वैष्णवाद्ग्राहयेद्गुरोः' । इत्यादिपूर्वोक्तश्रुतिस्मृतिश्रीभागवताद्यनेकप्रमाणसिद्धत्वाच्छ्रीमदाचार्याणां पुरुषोत्तमत्वं सिद्धम् । तेन नमनमेव कर्तव्यम् ।

धनमाप्नोति सुधाभक्षोऽपि नान्यथा । वाससि बल्लवस्त्रीणां मनोभिः सह केशवम् । समादाय कदम्बं तु समारूढं तु चिन्तयेत् । जप्यात्सहस्रमानं यो रात्रौ स दशभिर्नरैः । शचीमप्यानयेन्मन्त्री शीघ्रमेव न संशयः । किं बहूक्तेन मन्त्राभ्यामेताभ्यां सदृशोऽपरः । नास्ति वश्ये तथाकृष्टौ देवदानवयोषितामि'ति शिवार्चनचन्द्रिकायां श्रीसारसंग्रहवचोभिः संमोहनगौतमीतन्त्रक्रमदीपिकादिषु च निरूपितैश्च मारणवशीकरणादि श्रूयते । श्रीपुरुषोत्तमभक्तेस्तु नैतत्फलं अनर्थरूपत्वात् । 'अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे । तस्मान्निराशिषो भक्तिनिरपेक्षस्य मे भवेत्' इत्यादिश्रीभागवतवाक्यानुरोधात् न भगवद्रूपत्वं किन्तु विभूतिरूपत्वम् । तथा च श्रीमत्प्रभुचरणैस्तत्पुरुषोत्तमस्य विभूतिरूपं भिन्नमेवेति मन्तव्यमिति प्रतिपादितं महता प्रबन्धेन भक्तिहंस इति दिक् ।

श्रीमदाचार्याणामिति । एतैर्वाक्यैर्गुर्वनुकूलादिनिरूपणैर्गुरुपदस्य शक्तिः 'श्रीकृष्णज्ञानदो गुरु'रिति वचनाच्छ्रीमदाचार्येष्वेव 'मन्त्रादुद्धिरणेनैव गुरुरित्युच्यते बुधैरि'ति ब्रह्मवैवर्ते मन्त्रोच्चारणेनैव शिष्यमुद्धरेदिति स गुरुरिति तदर्थः । 'मन्त्रोपदेशमात्रेणे'त्यादिकमप्यत्रानुसंधेयम् । एतादृशी शक्तिस्तु श्रीमदाचार्येष्वेवेश्वरपरत्वात् । किञ्च मन्त्रशास्त्रे श्रीविद्यामन्त्रप्रकरणे श्रीगुरुपादुकामन्त्रे श्रीमदाचार्या एव प्रतिपाद्यन्ते । तथा च श्रीपरपावकसर्वाराध्यसर्वमूर्धपुरनाथ सर्वगुरुस्वयंगुरु श्रीगुरुनाथेत्यादिकमुक्तं तस्मिन्मन्त्रे । तेन मुख्यगुरुत्वं श्रीमदाचार्येष्वेव । अलौकिकोऽग्निः श्रीपुरुषोत्तमाननाधिष्ठातोपपादितः । सर्वाराध्यत्वेन पुरुषोत्तमवदाराध्योऽयम् । सर्वमूर्धत्वेन सर्वत श्रेष्ठत्वमुदितम् । यद्वा सर्वमूर्ध- सर्वतः श्रेष्ठस्य श्रीव्यापिवैकुण्ठस्य स्वामीत्यर्थ- । सर्वगुरुत्वेनान्यत्र गुरुत्वमारोपादिनेति व्यज्यते । यद्यप्ययं मन्त्रो मन्त्रशास्त्रे निरूपितस्तेन 'मन्त्रोपासनवैदिकतान्त्रिकदीक्षार्चनादिविधिभिर्यः । अस्पृष्टो रमते निजभक्तेषु स मेऽस्तु सर्वस्वमि'ति श्रीप्रभुचरणोक्तत्वान्मन्त्राद्यविषयत्वं, तथापि सर्वत्र गुरुप्रतिपादनेन श्रीमदाचार्य एव गुरुः फलनीति प्रतिपादनायोपन्यस्तोऽयमतः श्रीमदाचार्यविभूतिरूपत्वमस्य । एवं च मुख्यया वृत्त्या गुरुशब्दस्य प्रवृत्तिरत्रैव 'यो गुरुः स हरिः स्मृत' इति वचनेन पूर्वोदितवाक्यैश्च पुरुषोत्तमत्वमिति भावः । अत एवान्यगुरुकरणानन्तरं भक्त्युत्पत्तौ श्रीमदाचार्यकुललाभे तेषां समाश्रयणमवश्यं कार्यमेव । अन्यगुरुकृपया पुरुषोत्तमप्राप्तिर्न. श्रीमदाचार्याणां पुरुषोत्तमत्वे 'आत्मा वै पुत्रनामासी'ति श्रुत्या वक्ष्यमाणाभिश्च

तत्सन्तानप्रबन्धस्य पुरुषोत्तमत्वात्, 'स्वानुरूपसुतप्रसूरि'ति वाक्याच्च,आचार्यस्यापिनमाहात्म्यत्वेन सर्वोद्धारकर्तृत्वाच्च । न च शिष्टाचारः । पूर्वतः श्रेष्ठलाभे सति द्वितीयगुरुकरणं दृश्यते महत्सु । यथा पराशरादिद्विजोपनयनादिसकलवेदग्रहणपर्यन्तसंस्कारवतः श्रीनारदाश्रयः श्रूयते । 'जिज्ञासितमधीतं च ब्रह्म यत्तत्सनातनमि'त्यनेन जिज्ञासितं विचारितं अधीतं प्राप्तं चेति श्रीनारदवचनस्यामिथ्यात्वाद्ब्रह्मप्राप्तिस्त्वाचार्यं विना न घटते 'आचार्यवान् पुरुषो वेदे'ति श्रुतेः । ततश्च कृतगुरुसमाश्रयस्यापि पुनर्नारदाश्रयणमवगम्यते । तथा परीक्षितोऽपि तथाविधस्य श्रीशुकाश्रयः । 'वैय्यासके जहौ शिष्यो गङ्गायां स्वकलेवरमि'त्यादेश्च । 'स वै भागवतो राजा पाण्डवेयो महारथः । बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे । सारथ्यपार्षदे'त्यादि । 'भक्तिं करोति नृपतिश्चरणारविन्दे' 'स वै महाभागवतः परीक्षिद्येनापवर्गाख्य'मित्यादि । तथा 'धर्मपालो नरपतिः स तु सम्राड् बृहच्छ्रवाः । साक्षान्महाभागवतो राजर्षिर्हयमेधयाट्' । अपापेषु स्वभृत्येषु 'तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि । नास्य तत्प्रतिकुर्वन्ति तद्भक्ताः प्रभवोऽपि ही'त्यादिविरोधात् । न ह्यामरणकालं तेनाभक्ततयैव स्थितम् । 'स वै भागवतो नामे'त्यादिवचनविरोधात् । तथा प्रह्लादस्यापि श्रीनारदशिष्यस्य 'आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवानि'त्युक्तेः । श्रीदत्तात्रेय इति । तथा रुद्रोपदिष्टप्रचेतसां पुनर्नारदाश्रयः श्रूयते । तथा नारदस्यापि ब्रह्मशिष्यस्य पुनः श्रीनारायणोपदेशः । तथा हंसोपदिष्टसनकादीनां श्रीरुद्रशेषादिभिरुपदेशः । तथा विदुरस्यापि पुनर्मैत्रेयाश्रयणं उद्धवस्य सांख्यायनबृहस्पतिशिष्यस्यापि पुनः श्रीकृष्णोपदेश इति । तथाश्रितगुर्वन्तराणामपि पृथुरहूगणादीनां पुनः सनकादिभरतप्रभृतिभिरुपदेशः श्रूयते । अतः पूर्वगुर्वपेक्षयाऽन्यगुरोरुत्कृष्टस्य लाभे सति समाश्रयः कार्य एव । एवं स्थिते सति दीक्षितोऽपि श्रीवल्लभकुलस्य पुरुषोत्तमरूपत्वात्सर्वतः श्रेष्ठत्वाच्च तच्छरणमवश्यं गच्छेत् । 'सान्निध्यमात्रदत्तश्रीकृष्णप्रेमा विमुक्तिद' इति वाक्यात् । अत एव श्रीमदाचार्यान् दृष्ट्वा स दीक्षितोऽपि क्षत्रियः कृष्णदासाख्यः श्रीमदाचार्यशरणं जग्मिवान् नाममन्त्रादिग्रहणं कृतवान् । तत्कृतासाधारणसेवया प्रसन्नैः श्रीमदाचार्यैर्वारत्रयमभिमतं दत्तम् । स एकदा स्वगुरुगृहे गत्वा तं नमस्कृत्योपविष्टवान् । तदा तं गुरुः पृष्टवान् मामत्यन्याश्रयः कृतस्त्वया कथम् ? तत्रोत्तरं जगाद 'मद्गुरवस्तु भगवन्त'इति । भवत्कृपया पूर्णपुरुषोत्तमलाभः समभवदिति भवत्प्रसादस्य पुरुषोत्तमप्रापकत्वात् । तदा गुरुणोक्तं तेषां पूर्णपुरुषोत्तमत्वे किंमानमित्युक्तः स कृष्णदासो ज्वलदनलमञ्जलिभ्यां गृहीत्वेदमुक्तवान् । यदि श्रीवल्लभाचार्याः पूर्णपुरुषोत्तमास्तदा मामग्निर्न ज्वालयिष्यति नोचेज्ज्वालयिष्यतीत्युक्त्वा मुहूर्तमात्रं तथैव स्थितवान् । तदा गुरुस्तदुक्तेर्थे सत्यत्वं ज्ञात्वा तद्गृहीतमग्निं भीतः सन् स्थानस्थितिकारितवानित्याख्यायिका संगच्छते । अतः श्रीवल्लभकुलं सर्वथैव समाश्रयणीयमिति । 'गन्धलुब्धो यथा भृङ्गः पुष्पात्पुष्पान्तरं व्रजेत् । न गोरस्मादृशोज्ञानं सुस्थिरं स्यात्सुपुष्कलम् ।

वीर्यं निरूपयति नमोऽस्त्वग्नय इति। अग्निरूपधारिणे श्रीवल्लभाय नमः । ‘अग्नित्वं वर्णितं कविभि’रिति वाक्यात् । नन्वग्निरूपत्वेनातितेजस्त्वान्नमनं न सम्भवतीत्याशङ्कानिरासायाह अस्त्विति । नमनमस्तु । श्रीमदाचार्याणामग्निरूपत्वं भक्तदोषदहनार्थं न तु भक्तानां तापार्थमिति यावत् ।

ननु श्रीमदाचार्याणां पुरुषोत्तमत्वादग्नित्वं कथमुपपद्यत इत्याशङ्कानिरासायाह ‘अग्निर्वै मुख’मिति श्रुतेः अग्नित्वं पुरुषोत्तमत्वं च । किमिति अग्निरूपधारणं दैवजीवानामुपदेशमात्रेण सकलदोषदाहकत्वादग्नित्वं महद्वीर्यमपि । किञ्च वीर्यं देवेषु । तत्रापि

वादिन संजगदुः । युष्माकमस्माकं भाषणे माध्यस्थ्यमपेक्षित, अतो वय कलशे भगवती सरस्वतीमावाह्य मध्यवर्तिनी कुर्मः । सा यस्य मतं सत्य वदिष्यति तस्यैव मतं सम्यक् । तदा श्रीमद्वल्लभा सरस्वतीवल्लभा ऊचु समीचीनमिति । तदाऽज्ञातमहिमभि स्वसिद्धान्तसिद्धिविदग्धद्भिर्मायावादविवादमदकलुषकषायितबुद्धिभि पृथगीशमानिभि सरस्वत्यावाह्य विज्ञापिता। सा च देवी मायावादकक्षहुताश सर्वश्रुतिस्मृतिसूत्रादिप्रतिपादितसाकारब्रह्मवादस्थापकं सकलविश्वमण्डिस्थेमल्यासाधारणकारणमसाधारणनिजस्वामिनं साक्षात्पूर्णपुरुषोत्तमं समवलोक्य लज्जावती किमपि नोवाच । तदा निरुत्तरा बभूवुस्ते । तदा सर्वान्तर्यामिणो विदितवेदशास्त्रतत्त्वा परममहिममहर्षिविदिततत्त्वा सरस्वतीविज्ञाततत्त्वा. श्रीमदाचार्यवर्या ऊचु पाखण्डिन एते इति । तदा राजा सर्वे वैष्णवाचार्या समासदश्च प्रसन्ना बभूवु । श्रीमदाचार्यान् पूजयामासु । तदा निवृत्ताया सभाया भूतनाथमतमतावलम्बिनो भगवन्मायामोहिता निसर्गासुरसर्गसमुद्भूता देव्युपरि मर्तुमवस्थिता ऊचुः । अस्माकं मानापनोद कारितो महत्या भगवत्या भवत्याऽतो वयं मर्तुमवस्थिता । तदा सा महामाया भगवती विदिततत्त्वा कारुण्यसुधासागरोवाच । भगवन्तस्तु मूर्खनरा स्थ । यतो मोहकमतमदमत्ता । एते हि परमेश्वरा निजचरणनखचन्द्रचन्द्रिकानिवारितनिखिलविश्वतमसो मायावादमततूलदहना साकारब्रह्मवादस्थापनार्थमवनितलेऽवतीर्णा नो सामान्यपण्डिता मम स्वामिन । मत्सदृश्यो निजस्वामिवर्याज्ञानि श्वासकारिण्योऽनन्ता दासभूता सन्ति । सर्वसामर्थ्यवतामेतेषामग्रे वक्तुमसमर्थाहम् । एते हीश्वरा मायाप्रेरका न तु प्रेर्या इति सेव्या एव एते इत्युक्त मायया तया । ततो निरुत्तरा बभूवुस्ते । तदनन्तरमेतद्वृत्तं राज्ञा श्रुतमीश्वरा एव श्रीमदाचार्या अस्मदुद्धारार्थमेवागता इति निश्चित्य सपरिकरः सेवको बभूवेति मायाप्रेरकत्व प्रसिद्धम्

अग्निरूपधारिण इति । श्रीमत्कृष्णाननाधिष्ठानलौकिकाग्निरूपधारिण इत्यर्थ । भक्तदोषदहनार्थमिति । अज्ञानादिदोषनाशनार्थमित्यर्थ. । ‘अज्ञानाद्यन्धकारप्रशमनपटुताख्यापनाय त्रिलोक्यामि’ति वाक्यात् । श्रुतेरिति । श्रुतौ भगवन्मुखरूपत्वमुक्त तेन भगवदवयवानां भगवद्रूपत्वान्मुखभूताग्नेरपि पुरुषोत्तमत्वमिति भाव. । तथाच सूत्रम् ‘अरूपवदेव हि तत्प्रधा

स्त्रीषु तत्रापि कामतः । सान्निध्ये पुरुषाणां च मूर्च्छा तेन ततो महत्'। श्रीमदाचार्यचरणैरेव स्वस्वरूपं भगवदास्यत्वेन प्रतिपादितम् 'अथ तस्य विवेचितु'मिति सुबोधिन्यारम्भे, तेन भगवदास्यरूपत्वात् वेणुवादनं तेनैव सम्भवतीति देवादीनां मोहकरणेन महद्वीर्यम्। किञ्च 'वीर्यं देवेषु प्रतिष्ठित'मितिश्रुतेः देवेषु शङ्करादिषु । 'त्वं च रुद्र महाबाहो मोहशास्त्राणि कारये'ति भगवदाज्ञया प्रवृत्तेषु शून्यवादिविशिष्टमायिकमतप्रकाशकेषु शङ्करादिदेवपदवाच्येषु 'शङ्करः शङ्करः साक्षा'दिति वाक्यात् तत्र देवेषु प्रतिष्ठितम्, श्रीमदाचार्याणां साकारब्रह्मवादस्थापकत्वेनाग्निरूपत्वेन च मायावादादितूलवद्दाहकत्वाद्वीर्यं प्रतिष्ठितम् ।

नत्वात्' । अस्यार्थः। रूप्यतेऽनेनेति करचरणाद्युच्यते । तथा च लोके करादिभिन्नस्तदभिमानी भिन्नस्तथा ब्रह्मणः श्रुतिषु करादिभिन्नतदभिमानित्वं निरूप्यते । किन्तु करादेरपि ब्रह्मत्वाद्भेदाभावाद्रूपमेव निरूप्यते न तु रूपवदित्यर्थः ।

कुतः । तत्प्रधानत्वात् सर्वेषां वेदान्तानां ब्रह्मैव प्राधान्येन प्रतिपाद्यं यतः । अयं भावः । करादीनामब्रह्मत्वे तन्निरूपकाणां वेदान्तानामब्रह्मपरतया ब्रह्मपरत्वनियमव्याहतिः । अतः करादिनिरूपकाः साक्षाद्ब्रह्मप्रतिपादका एवेति सर्वत्र प्रसिद्धोपदेशात् । 'आमनन्ति हि चैनमस्मिन्नि'त्याद्यधिकरणरूपोपपत्तिर्हिशब्देनोच्यते । 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वारे अयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेति' 'सत्यं विज्ञानमानन्दं ब्रह्म' 'आनन्दमात्रकरपादमुखोदरादिः' 'आनन्दमयोऽभ्यासादि'त्यादिश्रुतिस्मृतिन्यायैकवाक्यतया ब्रह्मत्वमवयवानामवधारणीयमित्यादि श्रीप्रभुचरणैर्विद्वन्मण्डने प्रपञ्चितम् ।

वीर्याधिकरणान्याहुः वीर्यमित्यादि । विवेचितुमिति यङ्लुगन्ताद्विच् । धातोस्तुमुनि'रिति पाशपानुवन्धेन निर्दिष्टं यद्ग्रहणेन च । यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकी'ति परिभाषया 'एकाचउपदेशेऽनुदात्तादि'तीडागमनिषेधाभावे रूपम्। न च 'गुणो यङ्लुको'रित्यनुशासनेनाभ्यासस्य गुणापत्तिरिति वाच्यम् । 'संज्ञापूर्वको विधिरनित्य' इति परिभाषया तदभावात् । अत्र ज्ञापकं तु 'ओरोदि'तिवक्तव्ये 'ओर्गुण' इति सूत्रे गुणोक्तिः । पूर्वा तु इडागमनिषेधसूत्रे एकाज्ग्रहणेनैकदेशानुमत्या ज्ञाप्यते । अन्यथोपदेशे एकाचामुदात्तत्वस्यैव सत्त्वेन तद्वैयर्थ्यं स्पष्टमेवेति । मायिकमतप्रकाशकेष्विति । पाद्मोत्तरखण्डे गुणत्रयविवरणाध्याये श्रीशिवेन 'शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम्'इत्युपक्रम्य तामसशास्त्रगणनायां 'मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते । मयैव कथितं देवि कलौ ब्राह्मणरूपिणा । अपार्थं श्रुतिवाक्यानां दर्शयँल्लोकगर्हितम्। कर्मस्वरूपत्याज्यत्वमत्रैव प्रतिपाद्यते। सर्वकर्मपरिभ्रष्टं वैकर्म्यत्वं तदुच्यते । परेशजीवयोरैक्यं मयात्र प्रतिपाद्यते ॥ ब्रह्मणस्तु परं रूपं निर्गुणं वक्ष्यते मया । सर्वस्य जगतोऽप्यत्र मोहनार्थं कलौ युगे ॥ वेदार्थवन्महाशास्त्रं मायावादमवैदिकम् । मयैव कथितं देवि जगतां

नाशकारणा'दित्यादिप्रकारकप्रकाशकेष्वित्यर्थः । दाहकत्वादिति 'मायावादाख्यतूलाग्निर्ब्रह्मवादनिरूपक' इत्युक्तं श्रीमत्प्रभुचरणैः । वीर्यं प्रतिष्ठितमिति । एतादृशमतनिरसनेन वीर्यं प्रतिष्ठितमित्यर्थः । तथा च श्रीभागवते तृतीयस्कन्धे 'स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मा । परावरेशो महदंशयुक्तो ह्यजोऽपि जातो भगवान् यथाग्निः ॥' अत्र श्रीकृष्णावतारप्रादुर्भावोऽग्निप्रादुर्भाववद्दृष्टान्ततयोपपादितः । एवं च दृष्टान्तदार्ष्टान्तिकयोरैक्यमपेक्षितमन्यथा दृष्टान्तहानिः । एवं च यथाग्निः प्रादुर्भविष्यति तथा भगवान् जातः । 'हुताशनावतारश्च शेषरूपः सुदर्शनः' । 'हुताशनावतारस्तु वल्लभो लक्ष्मणात्मजः ॥ रामानुजः शेषरूपो निम्बार्कोऽस्य सुदर्शन' इति संमोहनतन्त्रात् । अग्निपदेन श्रीवल्लभाचार्यनामा गृह्यते । स यथा प्रादुर्भविष्यति तथा भगवान् श्रीकृष्णो जातः । यद्यत्र काष्ठात्प्रादुर्भावपरत्वेन व्याख्यायते तदा स्वशान्तेत्यादिविशेषणाननुगुणतया दृष्टान्तभङ्गः, भगवान् यथाग्निरिति सामानाधिकरण्यभङ्गश्च । भगवान् यथाग्निरिति सामानाधिकरण्येन षडैश्वर्यवत्त्वं पूर्णपुरुषोत्तमवच्छ्रीमदाचार्येषु निरूपितम् । अत पूर्णपुरुषोत्तमत्वं सूचितमाचार्याणाम् । समुदितार्थस्तु—स्वीयाः शान्तरूपा ये भक्तास्तेषु इतरैरशान्तरूपैरसुरैरभ्यर्द्यमानेषु अनुकम्पितात्मा अनुकम्पित आत्मा यस्य स । परावरेशः महदंशयुक्त महान्तोंऽशाः वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाख्यास्तैर्युक्तः । अजोऽपि भक्तरक्षणार्थं जात. प्रादुर्भूतः । श्रीमदाचार्यपक्षे तु स्वीयाः शान्तरूपाः शान्त्यादिगुणयुक्ता भक्ता दैविजीवास्तेषु इतरैः स्वरूपैर्मायावादविवादाभिनिवेशतयाऽशान्तरूपैरभ्यर्द्यमानेषु पीडितेषु सत्सु अनुकम्पित अनुकम्पाविशिष्टः आत्मान्त करणं यस्य सः । अनुकम्पालक्षणं च 'रक्षिताश्रितभक्तानामनुरागसुखेच्छया । भूयोऽभीष्टप्रदानाय यच्च ताननु धावति । अनुकम्पागुणो ह्येष प्रपन्नप्रियगोचर' इति । तथाह श्रीमद्यदुकुलजलधिरत्नं 'तेषामेवानुकम्पार्थमहमज्ञानजं तम' । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वते'ति । परावरेशः परा दैविजीवाः अवरा मर्यादाप्रवाहस्थास्तयोरीशः प्रेरक दैवादीन् भगवद्भजनादिषु प्रवर्तयति असुरान्मोहयति । 'प्राकृतानुकृतिव्याजमोहितासुरमानुष' इत्यादिवाक्यात् 'तमेव साधु कर्म कारयति यमूर्ध्वमुन्निनीषति । तमेवासाधु कर्म कारयति यमधो निनीषती'ति श्रुतेः । न च वैषम्यनैर्घृण्यापत्तिरितिवाच्यम् । 'वैषम्यनैर्घृण्ये न सापेक्षत्वादि'ति सूत्रेण तत्परिहारात् । विस्तरस्तु भाष्यविद्वन्मण्डनादिषु निरूपितोऽस्मत्परिवृढैः । महदंशयुक्तः । महद्ब्रह्मतोः पर्यायत्वेन महच्छब्देनाक्षरब्रह्मोच्यते तदंशं यस्य पूर्णपुरुषोत्तमस्य 'तदाहं वल्लभकुले' इति ब्रह्माण्डपुराणवाक्यात् श्रीविट्ठलः पूर्णपुरुषोत्तमस्तेन युक्तः । यद्वा महान्तो दैविजीवाः नित्यलीलास्थास्ते च ते अंशाः सेवकास्तेषां महत्त्वं भगवत्सेवकत्वेन सर्वभगवत्सामर्थ्यवत्त्वेन तादृशा नित्यलीलास्थान्तरङ्गभक्तास्तै सह युक्तः । श्रीमदाचार्या नित्यान्तरङ्गभूतश्रीदामोदरदासादिभिः सह प्रादुर्भूता इति भावः । आप्तकामत्वाद्भूतलेऽवतारप्रयोजनाभावेऽपि स्वभक्तदुःखनिवारणार्थमवतार इत्याह अजोपीति । एतेन वात्सल्यगुणः सूचित ।

ननु 'त्वं च रुद्रे'तिवाक्यानि कल्पितानि स्युरितिचेन्न। वराहपुराणे पद्मपुराणे च कण्ठरवेणोक्तत्वात्तत्पुस्तकेषु दृश्यमानत्वाच्च। तानि वाक्यानि 'त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय। अतथ्यानि वितथ्यानि दर्शयस्व महाभुज। प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु। मां च गोपाय येन स्यात्सृष्टिरेषोत्तरोत्तरा' इति वाराहपुराण उक्तम्। पद्मपुराणे च 'त्वं च रुद्र महाबाहो मोहनार्थं सुरद्विषाम्। पाषण्डाचरणं धर्मं कुरुष्व सुरसत्तम। तामसानि पुराणानि कथयस्व च तान्प्रति। मोहनानि च शास्त्राणि कुरुष्व च महामते। मद्यभक्ताश्च ये विप्रा भविष्यन्ति महर्षयः। त्वच्छक्त्या तान्समाविश्य कथयस्व च तामसान्। काणादं गौतमं शाक्तमुपमन्युं च जैमिनिम्। दुर्वाससं च कपिलं मृकण्डं च बृहस्पतिम्। भार्गवं जमदग्निं च दशैतांस्तामसानृषीन्। तत्र शक्तिः समाविश्य कुरुते जगतोऽहितम्। त्वच्छक्त्याभिनिविष्टास्ते तमसोद्रिक्तया भृशम्। तामसास्ते भविष्यन्ति क्षणादेव न संशयः। कथयिष्यन्ति ते विप्रास्तामसानि जगत्त्रये। त्वमेव लोके तांल्लोकान्मोहयस्व जगत्त्रये। तथा पाशुपतं शास्त्रं त्वमेव कुरुसत्तम। कङ्कालशैवपाखण्डमहाशैवादिभेदतः। अवलम्ब्य मतं सम्यग्वेदबाह्या द्विजाधमाः। भस्माक्षधारिणः सर्वे भविष्यन्ति न संशयः। त्वां परत्वेन वक्ष्यन्ति सर्वशास्त्रेषु तामसाः। तेषां मतमधिष्ठाय सर्वे दैत्या महाबलाः। भविष्यन्ति मद्विमुखाः क्षणादेव न संशयः। अहमप्यवतारेषु त्वां च रुद्र महाबल। तमोवतां विमोहाय पूजयामि युगे युगे। मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कान्दं तथैव च। आग्नेयं च षडेतानि तामसानि निबोध मे। वैष्णवं नारदीयं च तथा भागवतं शुभम्। गारुडं च तथा पाद्मं वाराहं शुभदर्शनम्। सात्त्विकानि पुराणानि विशेषेण शुभानि वै। ब्रह्माण्डं ब्रह्मवैवर्तं मार्कण्डेयं तथैव च। भविष्यं वामनं ब्राह्मं राजसानि निबोध मे। सात्त्विका मोक्षदाः प्रोक्ता राजसाः स्वर्गदाः शुभाः। तथैव तामसा देवि निरयप्राप्तिहेतवः। तथैव स्मृतयः प्रोक्ता ऋषिभिस्त्रिगुणात्मिकाः' इति पद्मपुराणे एवं शिवंमत्याज्ञा जाता तदवतारान्गृहीत्वा मोहशास्त्राणि प्रकाशितानि॥

अग्रय इति विशेषणेन वीर्यं निरूप्य यशो निरूपयति नमः पृथिव्या इति। ननु श्रीमद्गोकुलादिस्थानेषु यत्र श्रीमदाचार्याणामुपवेशनस्थानं तत्र श्रीमदाचार्यरूपेणैव भक्ति-

---

' विचक्रमे पृथिवीमेष एतामि'ति श्रुतिव्याख्याने वात्सल्यगुणलक्षणं निरूपितम्। यद्यपि यथा भगवाञ्जानस्तथाऽग्निः प्रादुर्भविष्यतीत्यन्वयोऽपि सम्यक्, तथापि प्रकरणविरोधाद्व्याख्यातमेव न्यायः। एवं चासुरमतनिरसनार्थमेव प्रादुर्भाव इति महद्वीर्यम्। दृश्यमानत्वाच्चेति। चकाराद्भियुक्तैः प्राचीनैर्लिखितत्वात्।

उपवेशनस्थानमिति। यथा श्रीमत्कृष्णचन्द्रविहारादिस्थानेषु श्रीकृष्णत्वेन सेवा संभवति तत्र श्रीमत्कृष्णचन्द्रस्य विद्यमानत्वात्, एवं श्रीमदाचार्योपवेशनस्थाने श्रीमदाचार्य-

मार्गे समानयनं किमिति क्रियते इत्यत आह नमः पृथिव्या इति । पृथिवीरूपाय श्रीवल्लभाय नमः ।

ननु श्रीमदाचार्याणां पुरुषोत्तमरूपत्वात्कथं पृथिवीरूपत्वमित्याशङ्क्याह 'यस्य पृथिवी शरीरमि'त्यादि श्रुतिः । यथा श्रीमदाचार्याणामानन्दमात्रकरपादमुखोदरादिधर्मिरूपेण प्रादुर्भावसमये दैविजीवानां सेवादियोग्यता उद्धारश्च तथाऽधुनापि श्रीमदाचार्याणामुपवेशनस्थाने दैविजीवानां सेवादिनोद्धारणान्महद्यशः । अथवा ननु श्रीमदाचार्याणामुपवेशनस्थानस्य स्थानविशेषे विद्यमानत्वात्कथमनवच्छेदकावच्छेदेन दैविजीवानां तत्र गमनं सम्भवति दूरस्थत्वात्सामर्थ्यविशेषाभावाच । तथा च वंशरूपेणाविर्भावः पृथिवीरूपः देहस्य पार्थिवरूपेण प्रतीयमानत्वात्पृथिवीरूपः । वस्तुतस्तु आनन्दात्मकमेव स्वरूपं 'प्राकृतानुकृतिव्याजमोहितासुरमानुष' इत्यासुराणामेव मानुषत्वप्रतीतिर्न

सेवा संभवतीति भावः । 'पृथिवी वैश्वानरः संवत्सरो वैश्वानर' इति यास्कोक्तेः पृथिवीरूपत्वं श्रीमदाचार्याणामस्तीति उपवेशनस्थानस्य सेवादिकमार्यैः क्रियत इति भावः । वंशरूपेणाविर्भाव इति । तथा च श्रुतिः 'पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदामो अश्नुते श्रितास इद्वहन्तस्तत्समाशत' इति । इयं श्रुतिः शङ्खचक्रधारणवादे पुरुषोत्तमचरणै रासलीलापरत्वेन अस्मिन्नेव ग्रन्थे वियोगशृङ्गारप्रतिपादनेन श्रीमदाराध्यतमचरणैर्व्याख्याता । अस्माभिस्तु श्रीमदाचार्यपरत्वेन व्याख्यायते । तथाहि—हे ब्रह्मणस्पते ब्राह्मणानां स्वामिन्, ['ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रः प्रजापति'रित्यमरात् 'षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु' इति सूत्रेण षष्ठीसम्बन्धिविसर्गस्य सत्वम् । अस्मादेव ज्ञापकात्षष्ठ्या अलुक् ।] हे दीक्षितवर्य , ते विततं विस्तारः सन्तानप्रबन्धो वंशस्तस्य विस्तारः 'आत्मा वै पुत्रनामासी'ति श्रुतेः पवित्रं भक्तानामुपदेशमात्रेण सकलदेहजीवगतदोषनिवर्तकम् । 'स्ववंशे स्थापिताशेषस्वमाहात्म्य' इति वाक्यात् ते वंशरूपो विस्तारः सर्वोद्धारे समर्थ इति भावः । कुतः , तत्र हेतुः प्रभुः समर्थो भवान् स्ववंशोद्भवोपदेशमात्रेण भक्तानां गात्राणि शरीराणि विश्वतः पर्येषि अन्तर्बहिर्व्याप्नोषि । यस्मादेवं तस्मात्ते वह्न्ययोगोलकन्यायेन व्याप्ता भगवन्निष्ठा भवन्तीति तदा विरहजनिततापादिस्फूर्तिः । भगवद्विरहतापादिस्फूर्तौ भगवत्प्रादुर्भावो भवति नान्यथा । विरहजनिततापास्फूर्तौ भगवत्प्राप्तिर्नेत्याह अतप्ततनूरिति । भगवद्वियोगजनिततापरहितः तत् 'ॐतत्सदितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति गीतोक्तेः पूर्णपुरुषोत्तमस्य स्वरूपं न अश्नुते नानुभवति । यतो भगवतो विरहतापमन्तरा आमाः अपक्वाः पूर्णकाष्ठारहिताः श्रीमदाचार्यभगवत्कृपया तापाविर्भावे श्रितासः पक्वाः वहन्तः विरहानुभवधारणं कुर्वन्तः । इदित्यवधारणे । निश्चयेन तत्समाशत इति तत्पुरुषोत्तममनुभवन्तीत्यर्थः । वस्तुत इति । यथा श्रीमदाचार्याणां मानुषाकृतित्वेन प्रतीतावपि आनन्दात्मकत्वं, तथा श्रीमदाचार्यकुलोद्भवानामप्यानन्दात्मकमेव स्वरूपं, तेन श्रीमदाचार्यवंशोद्भवानां पूर्णपुरुषोत्तमत्वमङ्गीकार्यम् । आसुराणामेवेति । 'अवजा-

तु दैवानाम् । तेन 'स्ववंशे स्थापिताशेषस्वमाहात्म्य' इति वाक्यादाधुनिकानां दैविजीवानामुद्धारकत्वान्महद्यशः ।

किञ्च 'यशो यदि विमूढानां मत्यक्षासक्तिवारणात् । स्वधर्मं योजयेत्तेषु तदा भवति नान्यथा' । *यश इति । विमूढानां स्त्रीशूद्राणां मत्यक्षासक्तिवारणात्* लौकिकसांसारिकासक्तेः ब्रह्मसम्बन्धेन वारणात् दूरीकरणादित्यर्थः । तेषु दैविजीवेषु स्वधर्मं योजयेत् सेवादिरूपं धर्मं योजयेत्तदा यशो भवत्यन्यथा नेत्यर्थः । पृथिवीविशेषणेन यशो निरूपितम् ।

अतःपरं श्रियं निरूपयति नम ओषधीभ्य इति । श्रीमद्गोकुले श्रीमदाचार्योपवेशनस्थानोपरि शमीवृक्षरूपौषधिस्वरूपधारिणे श्रीवल्लभाय नमः । यथा विष्णोः शापवशादश्वत्थरूपधारणं तथा न, किंतु जीवानामुपकाराय कृष्णाधरामृतादिस्वादसिद्धि-

---

नन्ति मां मूढा मानुषीं तनुमाश्रितमि'ति गीतोक्तेः श्रीमदाचार्याणां पुरुषोत्तमत्वाद्वंशोद्भवानामपि 'अङ्गादङ्गात्संभवसी'ति श्रुत्या तद्रूपत्वेनासुराणामेव मानुषत्वप्रतीतिरिति भावः । दैवानां तु 'स्वानुरूपसुतप्रसूरि'ति नामरत्नोक्तत्वात्पुरुषोत्तमत्वेन प्रतीतिरिति भावः ।

उद्धारकत्वादिति । उपदेशमात्रेण भक्त्यादिनाविर्भावादिनोद्धारकत्वम् । 'भुवि भक्तिप्रचारैककृते स्वान्वयकृत्पिते'ति वाक्यात् । चरित्रचिन्तामणावपि 'ये चान्ये मानवो भान्ति तदीयाः सर्व एव हि । कृष्णसेवासुधावृष्टिमुचोऽपि सुरुचो भुवी'ति श्रीमदाचार्यकुलोद्भवानां पृथिवीपरिक्रमणद्वारोद्धारकत्वम् । तथा च श्रुतिः 'विरूपास इदृषयस्त इद्गम्भीरवेपसः । ते अङ्गिरसःसूनवस्ते अग्नेः परिजज्ञिरे' । अस्यार्थः—विरूपासः बहुरूपा इति निरुक्तकाराः अनेके इत्यर्थः । यद्वा विशेषेण विविधं बहुप्रकारं वा स्वमार्गतत्त्वं प्रकाशयन्तीति विरूपाः । इदिति निपातः साकल्ये । सर्व इत्यर्थः । ऋषयः सर्वज्ञाः वेदतत्त्वार्थविदः । तच्छन्दस्य बुद्धिपरामर्शकत्वात्ते साक्षाद्भगवत्प्रकाशकाः । श्रीमत्पुरुषोत्तमानन्ददानं भगवत्तत्त्वनिरूपणं चाल्पानां न संभवति किन्तु ते बहुप्रज्ञा इत्याह गम्भीरवेपस इति । 'गम्भीरकर्माणः गम्भीरप्रज्ञा' इति निरुक्तकाराः । भगवद्विषयकर्मकारकाः 'कर्माण्येकं तस्य देवस्य सेवे'ति वाक्यात्तनुजावित्तजामानसीसेवात्मककर्मकारकाः । यद्वा नित्यं नैमित्तिकं कर्म भगवद्विषयरूपत्वेनैव करणमिति कर्मणां गम्भीरत्वम् । यद्वा लौकिकालौकिकं यत्कर्म तत्सर्वं भगवत्सुखबोधनेनैवेति तेषां गम्भीरप्रज्ञत्वं च मुखोक्त्यादिभिस्सर्वश्रीमदाचार्याविर्भावितग्रन्थार्थप्रकाशकत्वम् । गम्भीरप्रज्ञत्वेनाल्पबुद्धिनिरासः । तेन महद्बुद्धितया पुरुषोत्तमत्वं सूचितम् । ननु एतादृशानामपि कथं लाभो दैवानां तु स्वरूपविस्मरणतया गृहासक्तया चाचार्यकुलावरणगमनाशक्तानां कथं तेषामुद्धार इत्याह अङ्गिरसः । अङ्गपर्यायाङ्गिरा इत्युगादिसूत्रेणाभिप्रत्ययो ज्ञातव्यः । पृथ्वीपरिक्रमणशीलाः दैवानामुद्धारार्थं पृथ्वीपरिक्रमणं तेषामिति भावः । यद्वा अङ्गिरस इति श्रीमदाचार्यवानस्याभिप्रायस्य

दानाय वृक्षरूपेणाविर्भावः । 'अहो अमी देववरे' त्यादिना भगवता वृक्षाः स्तुताः वृक्षान्तरं विहाय शमीरूपधारणेन शम्या अग्निरूपत्वात् तेन दर्शनमात्रेण सकलप्रतिबन्धादिदहनपूर्वकं पूर्वोक्तफलदातृत्वं सिद्धम् । तेन परमा श्रीर्निरूपिता ।

किंच ननु श्रीमदाचार्यपादुकानां चरणरूपत्वाद्भक्तिमार्गे भोगसामग्र्यादिसेवाया दृश्यमानत्वात्कथं भोजनं पादुकायाः सम्भवति पुष्टिभक्तिमार्गे साक्षाद्भोजनस्य प्रतिपाद्यत्वात् 'किमपि कथमपि काप्युपाहर्तुमिच्छत्यद्धा तद्गोपिकेशः स्ववदनकमले चारुहासं करोती'तिवाक्याद्वेत्याशङ्कानिरासायाह नम ओषधीभ्य इति । ओषधिरूपधारिणे

विशेषणं, तेन 'प्रतिक्षणनिकुञ्जस्थलीलारससुपूरित' इति वाक्यात्कुञ्जात्कुञ्जान्तरगमनशालिनः श्रीमदाचार्यस्याग्नेस्ते सूनवः तव वंशोद्भवाः । सूनुशब्दोऽपत्यपर्याय इति भावः । अग्नेः श्रीवल्लभाचार्योद्भवनः परिजज्ञिरे उत्पन्ना बभूवुः प्रकटाः बभूवुः । अनेन तेषामपि नित्यत्वं सूचितम् । एतेन श्रीमदाचार्यवत्तत्कुलोद्भवानां सर्वोद्धारकत्वान्महद्यश इति भावः ।

शम्या अग्निरूपत्वादिति पुरूरवस आख्यानेऽग्निस्थालीसकाशाच्छमीगर्भमश्वत्थजातमिति पुराणप्रसिद्धत्वादग्निरूपत्वं शमीवृक्षस्य । अत एव 'शमीगर्भादग्निं मन्थती'ति श्रुतिः संगच्छते । श्रीमदाचार्याग्निरूपशमीवृक्षादिदर्शनेन सकलालौकिकफलसिद्धिः अखिलाज्ञानध्वान्तनाशोऽपि । यद्यपि 'ओषध्यः फलपाकान्ता' इत्यमरात्फलपाकान्तरूपाणामेवोषधीत्वं तथापि भवरोगनाशकत्वादाचार्यरूपशमीवृक्षस्य तेनौषधीरूपत्वमिति भावः । भोजनस्य प्रतिपाद्यत्वादिति । श्रुतावपि भक्ताः श्रीमदाचार्यान्प्रार्थयन्ति । तथाहि 'स्वदस्व हव्या समिषो दिदीह्यस्मद्र्यक् संमिमीहि श्रवांसि । विश्वाँ अग्ने पृत्सु तान् जेषि शत्रूनहा विश्वा सुमना दीदिहि नः' । अस्यार्थः—हे अग्ने श्रीवल्लभाचार्य, 'हुताशनावतारस्तु वल्लभो लक्ष्मणात्मज' इति संमोहनतन्त्रात् । हव्या शुचीनि भक्तजनोपहृतानि उपनीतानि समर्पितानि स्वदस्व आस्वादय भक्तजनोपरि कृपां कृत्वाऽङ्गीकुरु । भवत्सेवादिकमिच्छन्ति ते इषो भक्तास्तत्सम्बन्धीनि । जातावेकवचनम् । संदीदिहि सम्यक् दीपय वर्धयेत्यर्थः । कथंभूत, हे अस्मद्र्यक्, अस्माभिः सह अञ्चति गच्छतीत्यस्मद्र्यक् अस्मत्पक्षीय इत्यर्थः । अस्माकमर्थे सर्वसाधनं करोषीति भावः । भक्तमनोरथपूरकेति यावत् । श्रवांसि मायावादादिमतकषायितबुद्धीनां मायावादिनां यशांसि समीहि परमापय स्वीययशोभिरतिक्रमस्वेत्यर्थः । पृत्सु मायावाद्यादिभिः सह वादरूपेषु संग्रामेषु । बहुवचनं तु मायावादिभिः सह बहुषु स्थलेषु विवादस्य जायमानत्वात् । विश्वान् सर्वान् शत्रून् तान् प्रसिद्धान् भगवदाज्ञलोमापरिवृढप्रवर्तिनमार्गस्थान् जेषि जयसि । नोऽस्माकं अहा क्रतून् संकल्पान् विश्वा सर्वान् दीदिहि प्रकाशय । कथंभूतस्त्वम् । सुमनाः सदा प्रसन्नः । एवं च दैविभ्यः प्रार्थितो भवान् श्रीमदाचार्यो भोजनादिकं करोतीति भावः । श्रीमदाचार्याः सर्वैरर्पितं पदार्थादिकं भुञ्जते इत्येतच्छ्रुत्यादप्यवगन्तव्यम् । वाक्याच्चेति । यद्यप्यनेन वाक्येन प्रति-

श्रीवल्लभाय नमः । श्रीपादुकाया दारुत्वप्रतीयमानत्वादोषधीत्वम् । वस्तुतस्त्वानन्दरूपैव संसारादुद्धारकत्वादोषधीत्वमपि । यथा श्रीमद्भागवतश्रवणस्यौषधीत्वं 'भवौषधाच्छ्रोत्रमनोभिरामादि' तिवाक्यात् । तेन यत्र पादुकाया विद्यमानत्वं तत्रानन्दमात्रकरपादमुखोदरादि श्रीवल्लभमोषधिरूपं श्रीपादुकायां विद्यमानम् । तस्माद्भोगसामग्र्यादीनां भोजनतिलकादिसर्वसेवायाः साक्षात्स्वीकारः सम्भवति । किञ्च 'वैष्णवा वै वनस्पतयो वैष्णवैस्तदुपाधत्त' इति श्रुतेः श्रीमदाचार्यधर्मिरूपस्य श्रीपादुकायाः मार्गस्थातपशर्करादिजन्यश्रमनिवारकत्वात्सेवकत्वम् । 'श्रियो हि परमा काष्ठा सेवकास्तादृशा यदि' । तेन श्रीमदाचार्यवदुद्धारकत्वाच्छ्रीरूपत्वं श्रीपादुकायाः सेवकत्वेनोद्धारकत्वात् तेन श्रीमदाचार्याणां श्रियः परमकाष्ठापन्नत्वमागतम् । श्रीमदाचार्याणां विष्णुरूपत्वस्याग्रे वक्ष्यमाणत्वात्तत्सम्बन्धे श्रीपादुकाया वैष्णवत्वम् । वैष्णवैरेव तदुपाधत्ते । श्रीपादुकायाः सेवा वैष्णवैरेव धारणं स्वीकारः क्रियते ।

अथवा ननु श्रीमदाचार्यपादुकाया दुर्लभत्वाद्वैष्णवत्वावच्छिन्नानां कथं सेवा सम्भवतीत्याशङ्कानिरासायाह 'वैष्णवा वै वनस्पतयो वैष्णवैरेव तदुपाधत्त' इति श्रुतिः । तुलसीमालाया अपि श्रीमदाचार्याणामोषधिरूपं यथान्तर्यामिणो देहत्वावच्छिन्ना जीवसमीपे स्थितिस्तथा पुष्टिमार्गीयवैष्णवदेहत्वावच्छिन्ने श्रीमदाचार्योपधिरूपमालायाः स्थितिः । तेन सर्वेषां वैष्णवानां श्रीमदाचार्यसेवा सम्भवति । भवनिवारकत्वादोषधीत्वम् । वैष्णवत्वाच्छ्रीसम्पादकत्वमपि ।

पादनात् शङ्केतिवाक्येन तु साक्षाद्भोजनादिप्रतिपादनात् पादुकायास्तत्त्वाभावात्कथं पादुकायास्तदिति शङ्कार्थ । ओषधीत्वमिति । 'ओषध्य फलपाकान्ता' इत्यमरो यद्यपि तथाप्योषधीवदुपकारकत्वाच्छ्रीपादुकाया ओषधीत्वम् । आनन्दरूपैवेति । यथा श्रीमत्पुरुषोत्तमस्य सर्वपदार्थजातस्यावयवाना चानन्दरूपत्वं श्रुतिषु, तथा श्रीमदाचार्याणामानन्दरूपत्वेन पादुकानामानन्दरूपत्वमिति भाव । यथा ब्रह्मणोऽवयवाना ब्रह्मत्वमेव श्रीमदाचार्यपादुकानामपि श्रीमदाचार्यत्वमित्यभिप्रेत्याह तत्रेत्यादि । धारणमिति । 'पादुका च गुरोर्नित्य वस्त्रं वा श्रीगुरोर्यजेदि'ति नारदपञ्चरात्रवचनात्सेवकै पादुकासेवाऽवश्यमेव विधेया । अन्यदपि तत्रैव 'विना श्रीपादुकामन्त्रं न तिष्ठेत् कदाचने'ति वाक्याद्वैष्णवै स्वीकार सेवा क्रियते । विधीयत इत्यर्थ ।

'वैष्णवा वै वनस्पतय' इति श्रुतिं तुलसीमालापरत्वेन व्याकुर्वन्ति तुलसीमालाया इत्यादि । श्रीमदाचार्यै सर्वोद्धारार्थं मालारूपत्वमप्यङ्गीकृत तेन सुलभगुणवत्त्वं सूचितम् । तल्लक्षण तु 'स्वलीनान् मूर्च्छितान् जीवान् शून्यान् स्वाभीष्टसाधनै । दृष्ट्वा सौलभ्यता प्राप्तस्तेनासौ गुणवारिधिरि'ति । अन्तर्यामिण इति । 'ईश्वर सर्वभूताना हृद्देशेऽर्जुन तिष्ठती'ति स्मृते ।

किञ्च 'आचार्यवान् पुरुषो वेदे'ति श्रुतेः आचार्यवान् मालाया आचार्यरूपत्वात्तद्वान् पुरुषः पुष्टिमार्गीयजीवः वेद भगवत्स्वरूपज्ञानं तस्य भवति । तेन मालारूपश्रीमदाचार्यविशिष्टस्यैव जीवस्य पुरुषोत्तमस्वरूपज्ञानात् सेवाधिकारः । आचार्यरूपमालारहितस्य तदभावात्स्पष्ट एवानधिकारः । नन्वन्तर्यामिदृष्टान्तेन तुलसीकाष्ठमालाया धारणं प्राप्तं तत्र प्रमाणजिज्ञासायां भगवद्वाक्यानि प्रमाणानि सन्ति । तथाहि विष्णुधर्मे श्रीभगवानाह 'तुलसीकाष्ठमालां च कण्ठस्थां वहते तु यः । अप्यशौचोऽप्यनाचारो मामेवैति न संशयः' । स्कान्दे च 'धात्रीफलकृता माला तुलसीकाष्ठसम्भवा । दृश्यते यस्य देहे तु स वै भागवतोत्तमः । सन्निवेद्यैव हरये तुलसीकाष्ठसम्भवाम् । मालां पश्चात्समाधत्ते स वै भागवतोत्तमः । तुलसीकाष्ठसम्भूतां मालां यो वहते नरः । तारितं च कुलं तेन यावद्रामकथा क्षितौ' । गारुडे मार्कण्डेयवचनम् 'निवेद्य केशवे मालां तुलसीकाष्ठसम्भवाम् । वहन्ति ये नरा भक्त्या तेषां वै नास्ति पातकम् । सदा प्रीतमनास्तस्मिन् कृष्णो देवकीनन्दनः। तुलसीकाष्ठसम्भूतां मालां यो वहते नरः । प्रायश्चित्तं न तस्यास्ति नाशौचं तस्य विग्रहे । तुलसीकाष्ठसम्भूतं शिरोबाहुविभूषणम् । धारयेत्कण्ठदेशे तु तस्य वै नास्ति पातकम् । तुलसीकाष्ठमालां तु प्रेतराजस्य दूतकाः । दृष्ट्वा नश्यन्ति दूरेण वातोद्धूतं यथा रजः । तुलसीकाष्ठसम्भूते माले कृष्णजनप्रिये । बिभर्मि त्वामहं कण्ठे कुरु मा कृष्णवल्लभम्' इति ।

गारुडे पाद्मे च–'धारयन्ति न ये मालां हैतुकाः पापबुद्धयः । नरकान्न निवर्तन्ते

आचार्यरूपत्वादिति । यथा श्रीमदाचार्याणां 'वदति वल्लभ श्रीहरेरि'ति वाक्यात् 'प्रिया गोपीभर्तुः स्फुरतु सततं वल्लभ इति प्रथावत्यस्माकं हृदि सुभगमूर्तिः सकरुणे'ति वाक्याच्च वल्लभत्वमतस्तन्नामवत्त्वम् । एवं श्रीकृष्णप्रियात्वं तुलस्या अपि । तथा हि 'कच्चित्तुलसि कल्याणि गोविन्दचरणप्रिये' इति श्रीभागवतवाक्ये श्रीगोविन्दप्रियात्वं तुलस्याः 'तुलसीकाष्ठसंभूते माले कृष्णजनप्रिये । बिभर्मि त्वामहं कण्ठे कुरु मा कृष्णवल्लभमि'ति गारुडवचसि कृष्णजनप्रियात्वमुदितम् । कृष्णवल्लभं मा कुर्वित्युक्त्या यथा श्रीकृष्णवल्लभा त्वमसि तथा मां कुर्वित्यर्थः । किञ्च ब्रह्मवैवर्ते प्रकृतिखण्डे 'वृन्दा वृन्दावनी विश्वपूजिता विश्वपावनी । पुष्पसारा नन्दिनी च तुलसी कृष्णजीवनी'ति नामाष्टके कृष्णजीवनीत्युक्त्याऽतिप्रियात्वं श्रीकृष्णस्य । एवं च मालाया श्रीमद्वल्लभाचार्यरूपत्वमिति भावः । यद्वा 'आचिनोत्यर्थानाचारं ग्राहयतीति वाचार्य' इति निरुक्तकारैरुक्तत्वान्मार्गमत्त्व एव भगवदाचारग्रहणेऽधिकारः । भगवत्सेवार्थादिचयनेऽधिकार इति भावः । पुष्टिमार्गीयजीव इति । 'को वै न सेवेत विना नरेतर' 'श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः । न यत्कर्णपथोपेतो जातु नाम गदाग्रजः' इत्यादिश्रीभागवतवचोभिः पुरुषत्वं भगवद्धर्म्यैवेति भावः । अनधिकार इति । वक्ष्यमाणवचोभिर्मालारहितस्य भगवत्सेवानधिकार इत्यर्थः ।

दग्धाः कोपाग्निना हरेः । तुलसीकाष्ठमालोक्य कण्ठे वा मस्तके करे । निन्दां कुर्वन्ति ये मूढा म्लेच्छजास्ते न संशयः । अत्रातिशयमालोक्य तुलसीं द्वेषयन्ति ये । बहुनोक्तेन किं पार्थ सर्वे ते ह्यन्यवीर्यजाः' । स्कान्देऽपि 'यज्ञोपवीतवद्धार्या कण्ठे तुलसिमालिका । नाशौचं धारणे तस्या यतः सा ब्रह्मरूपिणी'ति ।

अत्र केचिद्वक्ष्यमाणवाक्यानुरोधात्सदा न धारयन्ति तेषां वाक्यानां तात्पर्यानवबोधात्, निषेधवाक्यानां विधायकवाक्यानां च परस्परं विरोधात्, निषेधवाक्येषु काष्ठपदाभावात् केवलतुलसीपदस्य विद्यमानत्वात्, निषेधस्य तुलसीपत्रधारणपरत्वं पत्रात्मकमालाधारणपरत्वं बोध्यम् । न तु तुलसीकाष्ठमालाधारणपरत्वम् । विधायकवाक्यानां विद्यमानत्वात् ।

विरोधादिति । भोजनादिकाले हारीतवचनादिभिर्निषेधस्य प्रतीयमानत्वं नारदीयपुराणपञ्चरात्रस्कान्दपाद्मादिषु भोजनादिकालेषु विधायकत्वमतो विरोध इत्यर्थः ।

विरोधं परिहरन्ति निषेधवाक्येष्विति । 'भोजने मैथुने चैवे'त्यादिष्वित्यर्थः । काष्ठपदाभावादिति । यत्तु 'सूतके मृतके चैव विसर्गे मलमूत्रयोः । स्नानभोजनशय्यासु तुलसीदारुसंभवाम् । मालां कण्ठगतां कुर्वन् भगवद्विमुखो भवेदि'ति लोकाचार्यकृतग्रन्थस्यनिषेधवाक्ये काष्ठपदपत्त्वात्सदा न धारणीयेति वदन्ति, तत्तु श्लोकार्थानवबोधान्निषेधवाक्यत्वेन योजयन्ति । 'क्षणार्धं तद्विहीनोऽपि विष्णुद्रोही न संशय' इति पाद्मवचसा क्षणमात्रत्यागेन विष्णुद्रोहित्वापत्त्या 'यज्ञोपवीतवद्धार्ये'त्यतिदेशेन यथा यज्ञोपवीतत्यागेन ब्रह्मकर्मविमुखत्वं तथा तस्याः क्षणमात्रत्यागेन भगवद्विमुखत्वमित्यर्थः । एवञ्चात्र स्नानादिकालेषु सर्वेषु तुलसीकाष्ठमालाधारणस्य महाफलत्वात्त्यागे दोषश्रवणादश्च मालां कण्ठगतामित्यत्र कण्ठाद्गतामन्यत्र प्राप्तां कण्ठाद्भ्रष्टां निःसृतां मालां कुर्वन् भगवद्विमुखो भवेदित्यर्थः । मालाहीनस्यैव भगवद्विमुखत्वमिति राद्धान्तः संपद्यते । यथाश्रुतार्थः स्यात्तर्हि क्षणमात्रत्यागेन विष्णुद्रोहित्वापातात् सुतरां विमुखत्वापत्तौ वृश्चिकभिया पलायितस्याशीविषमुखे निपातः प्रसज्ज्येत । यच्च वाक्यान्तरमुदाहरन्ति 'भोजने शयने याने मलमूत्रविसर्जने । तुलसीमालिकां बिभ्रत्पतत्येव न संशय' इति , तत्त्वत्र काष्ठपदाभावात् पत्रमालापरत्वेन निषेधः पर्यवस्यतीत्यनेनापि न तत्सिद्धिः । तथैव व्यवस्थापयन्ति पत्रात्मकमालाधारणपरत्वं वा बोध्यमिति । ननु प्राप्तौ सत्यां निषेधः । तुलसी पत्रात्मिकमालाधारणविधेरश्रवणादिति चेन्न । निषेधवाक्येषु काष्ठपदाभावात् विधायकेषु काष्ठपदश्रवणादेवं कल्प्यते । यदि च ग्रहिलतया वचन एवाग्रहस्तर्हि स्कान्दपुराणाधिकरणमार्गशीर्षमाहात्म्यस्थं गृहाण । 'तुलसीदलजां मालां ममोत्तीर्णां वहेत्तु यः । पत्रेपत्रेऽश्वमेधस्य दशानां लभते फलमि'ति । एवं च पत्रात्मिकाया एव भोजनादौ निषेध इति निर्विवादो राद्धान्तः । विद्यमानत्वादिति । भोजनादिकालेष्विति शेषः ।

तथाहि । ननु 'भोजने मैथुने चैव मलमूत्रविसर्जने । तुलसी धार्यते येन विष्णुद्रोही न संशयः । तुलसी धार्यते कण्ठे मलमूत्रविसर्जने । नरके पच्यते मूढो यमदण्डेन पीडितः । स्नानकाले यदा कण्ठे तुलसी धार्यते क्वचित् । तद्वारि पतितं पादं स पापिष्ठो नराधमः । तुलसी च यथा लक्ष्मीर्लक्ष्मीश्च तुलसी तथे' त्यादिवचनैर्हारीतेन मुनिना भोजनादिपञ्चस्थानेषु तुलसीधारणस्य निषिद्धत्वात् सदा न धार्येति चेन्न । तद्धारणस्य यज्ञोपवीतवदुक्तत्वात् । न हि यज्ञोपवीतं मलमूत्रादिविसर्जनेपि केनचित्त्यज्यते । तथा तुलस्याः सर्वकाले विशेषतो धारणमुक्तं नारदपञ्चरात्रे 'आशौचे वाप्यनाचारे कालेऽकाले च सर्वदा । तुलसीमालिकां धत्ते स याति परमं पद' मिति । स्कान्दे च—'तुलसीकाष्ठमालां यो धृत्वा स्नानं समाचरेत् । पुष्करे च प्रयागे च स्नातं तेन मुनीश्वर । तुलसीकाष्ठमालां यो धृत्वा भुङ्क्ते द्विजोत्तमः । सिक्थे सिक्थे स लभते वाजिमेधफलं मुने' । पाद्मे पार्वतीं प्रति शिवश्चाह 'स्नानकाले तु यस्याङ्गे दृश्यते तुलसी शुभा । गङ्गादिसर्वतीर्थेषु स्नातं तेन न संशयः । तुलसीमालिकां धृत्वा यो भुङ्क्ते गिरिनन्दिनि । सिक्थे सिक्थे स लभते वाजपेयफलं शुभम् । बहुना किमिहोक्तेन शृणु त्वं वरवर्णिनि । विड्उत्सर्गादिकाले च न त्याज्या कण्ठमालिका । अन्तकालेऽपि यस्याङ्गं तुलसीमालिका स्पृशेत् । तस्य देहोद्भवं पापं तत्क्षणादेव नश्यति । कण्ठे शिरसि बाहुभ्यां कर्णयोः करयोस्तथा । विभूयात्तुलसीं यस्तु स ज्ञेयो विष्णुना समः । यत्कण्ठे तुलसी नास्ति ते नरा मूढमानसाः । अन्नं विष्ठा जलं मूत्रं पीयूषं रुधिरं भवेत् । ततः सर्वेषु कालेषु धार्या तुलसिमालिका । क्षणार्धं तद्विना योपि विष्णुद्रोही न संशयः (भवेन्नरः) ।

'हरिनामाक्षरयुतं भाले गोपीमृदाङ्कितम् । तुलसीमालिकोरस्कं न स्पृशेयुर्यमोद्भटाः । ऊर्ध्वपुण्ड्रस्य मध्ये तु विशाले सुमनोहरे । सान्तराले समासीनो हरिस्तत्र श्रिया सहे' ति वचनेन श्रीधारणमपि न सम्भवति किन्तु श्रीगोपीजनवल्लभायेति मुद्र-

---

एतदेव हृदि कृत्य भोजनादिस्थानेषु तुलसीकाष्ठधारणवचनान्युदाहरन्तः पूर्वोक्तां व्यवस्थां स्थापयन्ति तथा हीत्यादिना । विड्उत्सर्गादीति । आदिना सूतकमरणाशौचानामपि संग्रहः । 'यज्ञोपवीतवद्धार्ये'त्यतिदेशात् 'अशौचे वाप्यनाचारे कालेकाले च सर्वदे'त्यादिवाक्याच्च ।

हरिनामाक्षरयुतमित्यादि । यस्य भाले गोपीमृदा गोपीचन्दनेन हरिनामाक्षरयुतमङ्कितमूर्ध्वपुण्ड्रमिति शेषः । तुलसीमालिकोरस्कमिति । तुलसीमालिका उरसि यस्य तम् । कप्रत्ययः । अत एव स्वसंप्रदाये उरःपर्यन्तं धार्यते । नच 'ये कण्ठलग्नतुलसीनलिनाक्षमाले'ति स्कान्दवचनविरोधः शङ्क्यः । नलिनाक्षमालासाहचर्येण तत्र सकामविषयत्वं द्योतितम् । तादृशधारणस्य प्रसङ्गादूर्ध्वपुण्ड्रे स्वसंप्रदाये हरिद्राचूर्णधारणं न कर्तव्यमित्याहुः ऊर्ध्वपुण्ड्रस्येत्यादिना । ऊर्ध्वपुण्ड्रप्रतिपादनश्रुतिर्मयोपन्यस्यते श्रौतत्वप्रतिपादनार्थम् । तथाहि 'श्रोणामुदकं

गामवाजति मामेकः पिंशति सूनया भृतम् । आनिम्रुचुः शकृदेको अपामरत् किंस्वित्पुत्रेभ्यः पितरा उपावतुरि'ति । चतुर्दशर्चस्य ऋभुदैवत्यस्य दशमीयमृक् । तत्रायमर्थः । हे ऋभवः, भवतां मध्ये एकः पुष्टिमार्गाधिकारं प्राप्तः श्रेष्ठः श्रोणां रक्तां भगवच्चरणकुङ्कुमादिरूपाङ्ग-चन्दनं 'पूर्णाः पुलिन्द उरुगायपदाब्जरागश्रीकुङ्कुमेन दयितास्तनमण्डितेन । तद्दर्शनस्मररुजां स्तृणरूषितेन लिम्पन्त्य आननकुचेषु जहुस्तदाधिमि'ति श्रीभागवतवाक्यात् । यद्वा श्रोणां श्लक्ष्णाम् । श्लक्ष्णता च 'असमर्पितवस्तूनां तस्माद्वर्जनमाचरेदि'तिदिति वाक्यात् ' त्वयोपभुक्त-स्रग्गन्धवासोऽलङ्कारचर्चिता' इति श्रीभागवतवाक्याच्च भगवदुपभुक्तां गां चन्दनादिरूपां मुख्य-कर्मभूतां प्रति । 'ऊर्ध्वपुण्ड्रं तु विप्राणामि'त्यादि स्मृत्या 'विप्राणां नैव धार्यं स्यात्तिर्यक्पु-ण्ड्रादिकं तथा । नारायणाज्जगन्नाथादन्येषामर्चनं न तु' इत्यादिवाक्यैश्चोर्ध्वपुण्ड्रधारणार्थमुदकं जलं गौणं कर्म अवाजति अवगमयति । अन्तर्भाविणिणयर्थोऽयम् । श्रोणां गामुदकेन मिश्रयतीत्यर्थः । एकः सूनया हिंसया तत्कर्त्रा आभृतं आहृतं मांसं गोरोचनाख्यम् । अत्रापि 'त्वयोपभुक्ते'त्या-दिवाक्यैर्भगवदुपभुक्तं पिंशति पर्ययति उदकेन सहेति शेषः । 'व्यवहिताश्चे'ति छन्दसि व्यव-हितेनाप्युपसर्गेण क्रियायाः सम्बन्धः । अत्र वासुदेवोपनिषद्ब्रह्मतन्त्रपुराणानुसारादूर्ध्वपुण्ड्रार्थं श्लक्ष्णां मृदं जलेन मिश्रयेदिति व्याख्येयम् । अत्र गोरोचनग्रहणं चन्दनाद्यष्टगन्धो-पलक्षणार्थम् । यथा श्रीभगवतः प्रीतिस्तथा गन्धादिकं भगवतेऽर्पयित्वोर्ध्वपुण्ड्रार्थमङ्गीकार्यम् । 'यद्यदाचरति श्रेष्ठ' इति स्मृत्या महतां मार्ग एवाश्रयितव्य इत्याह किंस्वित्पुत्रेभ्यः पितरा उपावतुरिति । पुत्रहितार्थे यत्किञ्चिद्व्रतं पितरौ मातापितरौ पितृपितामहौ वा उपेत्य स्वीकृत्य अवतुः व्रतं सम्यक्पालयामासतुस्तदेव तस्य श्रेयस्साधनमित्यर्थः । यद्वा श्लक्ष्णां चिक्कणां गां गोपीचन्दनादिमृत्तिकां चक्रादिधारणार्थमुदकं अवाजति मिश्रयति 'गोपीचन्दनतो नित्यं लाञ्छितं यस्य विग्रहम् । शङ्खचक्रगदापद्मैर्देहे तस्य सदा हरिः । कृष्णायुधाङ्कितं यस्य गोपीचन्दनमृत्स्नया । प्रयागादिषु तीर्थेषु स गत्वा किं करिष्यती'ति पाद्मवचनाभ्यामन्यैश्च वाक्यैः शङ्खादिधारणमवश्यमिति भावः । एकः मांसं गोरोचनाख्यं भगवदुपभुक्तमूर्ध्वपुण्ड्रार्थं पिंशतीत्यन्यत्पूर्ववत् । न संभवतीति । श्रीधारणं श्रियो हि चिह्नं श्रिया सह हरिः समा-सीन' इत्युक्त्या श्रियस्तत्र सुतरां विद्यमानत्वेन निष्प्रयोजनत्वान्न विधेयमिति भावः । ननु ' ऊर्ध्वपुण्ड्रस्य मध्ये तु लक्ष्मीस्थानं प्रकल्पयेत् । हारिद्रेण तु चूर्णेन कुङ्कुमेन सुगन्धिना । पुण्ड्राणामन्तराले तु हारिद्रं धारयेच्छ्रियमि'ति नारदीयवचनात् । अन्येभ्योऽपि स्मृतिपु-राणवचनेभ्यः श्रीधारणस्य विधानाच्छ्रीधारणमावश्यकमिति चेत्सत्यम् । ' तापः पुण्ड्रं तथा नाम मन्त्रो यागश्च पञ्चमः । अमी च पञ्च संस्काराः परमैकान्तहेतव' इति पाद्मवचने ताप-नैकट्ये पुण्ड्रविधानात्तत्रैव श्रीधारणस्योदितत्वात् पुराणादिषु तत्तच्चक्रादिधारणविधिनिकट एव श्रीधारणस्योदितत्वाच्च तत्तच्चक्रादिधारिणामेव श्रीधारणकर्तव्यताबोधका'न्यूर्ध्वपुण्ड्रस्य मध्येत्वि'-

यैव धारणं सम्भवति । निषेधस्य केवलतुलसीपत्रधारणपरत्वम् । यतस्तत्र वचने काष्ठव-चनाभावात् । तेन सर्वदा मालाधारणं प्राप्तमित्यर्थः ।

ननु पूर्वोक्तान्तर्यामिदृष्टान्तेन जीवानामुद्धारार्थं श्रीमदाचार्यचरणैरेतावत्कृतं यदर्थं मालारूपेणापि पुष्टिमार्गीयजीवानां प्रतिशरीरेषु जीवस्थितिः कृता, तत्र जीवैः प्रत्युप-कृतिः कर्तव्योचितेत्याशङ्कानिरासायैकादशस्कन्धे श्रीभगवन्तं प्रति उद्धव आह 'नैवोप-यन्त्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरन्तः । योऽन्तर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ति'। नैवेति । अपचितिं प्रत्युपकारम् । आनृण्य-मिति यावत् । कवयो माहात्म्यज्ञानपूर्वकसुदृढसर्वाधिकस्नेहविशिष्टा अपि नैवोपयन्ति नैव प्राप्नुवन्ति । यतः स्वत्कृतमुपकारं स्मरन्तः ऋद्धमुदः उपचितपरमानन्दाः । उपकारमे-वाह । यो भवान् बहिराचार्यवपुषा श्रीमदाचार्यस्वरूपेण, अन्तश्चैत्यवपुषा अन्तर्यामिरूपेण, तद्वत् अन्नः ओषधीरूपलीलाप्रवेशेन अशुभं प्राकृतविषयवासनां विधुन्वन् निरस्यन् स्वगतिं निजरूपां सायुज्यादिरूपां प्रकटयति । वस्तुतस्तु पुष्टिमार्गीया जीवाः लीला-

---

त्यादीनि वचनानीति नास्माकं बाधः । न चोर्ध्वपुण्ड्रस्य तथात्वापत्तिरिति वाच्यम् । एतत्प्रक-रणे चतुरङ्गुलविस्तीर्णशूर्पाकारोर्ध्वपुण्ड्रविधानात् । मन्मते तु श्रीमदाचार्यचरणैर्निबन्धे 'दण्डाकारं ललाटे स्यादि'त्युक्तं 'दण्डाकारं सुशोभाढ्यं मध्ये छिद्रं प्रकल्पयेदि'त्यादिपुराणवचनाद्दण्डा-कारस्यैव विधानात् स्वमते तप्तचक्रादिधारणं न कार्यम् । गोपीचन्दनादिमृदा कार्यमित्यादिसर्वनि-र्णयनिबन्धे श्रीमदाचार्यचरणैः शङ्खचक्रधारणवादे श्रीपुरुषोत्तमचरणैर्बहुशो निरूपितं ततोऽवधे-यम् । सर्वदा मालाधारणमिति । तुलसीमालाधारणमित्यर्थः । विस्तरस्तु मालाधारणवादेऽ-वलोकनीयः । ननु संप्रदाये सर्वैः श्रीवृन्दावनादिस्थानोद्भवकाष्ठादिमालाधारणं क्रियते । तत्र काष्ठ-मालाधारणस्य निषेधश्रवणादिति चेन्न । 'वैष्णवा वै वनस्पतयो वैष्णवैरेव तदुपधत्त' इति श्रुत्या वैष्णवस्थानोद्भवा वनस्पतयो वैष्णवैस्तस्मात्कारणादुपधत्ते इत्यर्थिकया श्रीवृन्दावनादिस्थानोद्भ-वकाष्ठमालाधारणविधानात् । वस्तुतस्तु श्रीमत्पुरुषोत्तमधाम्नः श्रीवृन्दावनादेः सच्चिदानन्दरूपत्वेन तत्स्थितपदार्थानामप्यानन्दमयत्वेन तदुद्भवानां वनस्पतीनां काष्ठत्वाभावात् काष्ठत्वेन प्रतीतिस्तु भ्रमात्मिका । मलादिदोषदूषितनयनस्य समीचीनस्य पदार्थस्य भ्रमात्मकत्वेन पीतत्वेन प्रतीति-वदत्राप्याद्याविधकेन्द्रियत्वेन । अत एव गिरिकाननयमुनापुलिनानामपि विपर्यासप्रतीतिः । श्रीगो-कुलादिस्थानस्य तत्स्थितपदार्थजातानामपि नित्यत्वं सच्चिदानन्दरूपत्वं निर्गुणत्वं श्रुतिस्मृति-पुराणादिवचनकदम्बैर्विद्वन्मण्डने प्रतिपादितं श्रीमत्प्रभुचरणैरिति नेह तन्यत इति दिक् ।

नैनैतीति । असमर्थतया प्रत्युपकारं कर्तुमसमर्थाः । कवय इति । 'संख्यावान् पण्डितः कविरि'त्यमरात् पण्डिताः । तत्त्वं च शब्दब्रह्मपरब्रह्मविरतम् परब्रह्मज्ञानं च भगवन्माहात्म्यज्ञानपूर्वकं सच्चिदात्मकत्वेन ज्ञानं तेन सर्वतोऽधिकस्नेहवन्त इत्यर्थः । श्रीमदाचार्या-

स्यास्तेषां शापादिना भगवदिच्छया वा भूतले आगमनं तदेव रोगपदवाच्यम् । तन्निवृत्तिरूपौषधं पुष्टिमार्गः तेन लीलायां प्रवेशरूपः स्वस्वरूपमाश्रित्य । तस्माच्छ्रीमदाचार्याणामोषधरूपपुष्टिमार्गस्वरूपत्वं तेन जीवानां निःसाधनोद्धारकर्तृत्वात्परमा श्रीः । नम ओषधीभ्य इति विशेषणेन श्रीर्निरूपिता ।

दिरूपेणेति । 'आचार्यो भगवानग्निरि'तिवाक्यात् श्रीमद्वल्लभाचार्यस्वरूपेणेति भावः । पुष्टिमार्गस्वरूपत्वमिति । पुष्टिमार्गवर्धनार्थमेव श्रीमदाचार्याणां प्राकट्यम् । तथा च श्रुतिः 'त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्' । अयमर्थः—त्रीन्वेदान् अम्बते शब्दायते अर्थादिद्वारा प्रकाशयति । 'अबि शब्दे' कर्मण्यण् स्वार्थे कन् । एतेन वेदपारगत्वं सूचितं । 'वेदपारग'इति सर्वोत्तमे । यद्वा त्रिषु कालेषु त्रिषु लोकेषु वा अम्बः शब्दो वेदलक्षणो यस्य । अनेन श्रीमदाचार्यभाषणं वेदरूपमेवेति बोध्यम् । एतेन श्रीमदाचार्यप्रकाशितमध्ययनं वेदवदवश्यं कार्यम् 'निःश्वसितमस्य वेदा' इति श्रुतेः । श्रीमदाचार्याणां भगवदास्यत्वात् । यद्वा त्रीणि अम्बकानि नयनानि यस्येति व्युत्पत्तावपि वह्नेस्तन्त्रादिषु त्रिनेत्रत्वं स्फुटम् । तथाहि 'करैर्वरस्वस्तिकशक्त्यभीतीर्दधानमम्भोजगतं त्रिनेत्रम् । सिन्दूरवर्णं तपनीयभूषं वन्हिं जटाभूषितमौलिमीडे' इति लौकिकाग्नेरलौकिकाग्न्यंशतयाऽलौकिकाग्नावपि त्रिनेत्रत्वं तानि वेदत्रयरूपाणीत्यर्थः । यद्यपि निरुक्तकारैः 'त्र्यम्बको रुद्रस्तं त्रियम्बकं यजामह' इत्युक्तं तथापि 'रुजं द्रावयते यस्माद्रुद्रस्तेन जनार्दन' इति ब्रह्माण्डपुराणवचनाद्रुद्रशब्दप्रवृत्तिर्विष्णावेव, श्रीमदाचार्याणां विष्णुरूपत्वं श्रुत्यादिभिः स्फुटमेव 'आचार्यं मां विजानीयादि'ति वचनेन 'सर्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्वैरहमेव वेद्य' इति श्रुतिस्मृतिपुराणवचनैः श्रीमदाचार्यपरत्वेन व्याख्यानं न दुर्घटम् । किञ्च 'त्वमग्ने वृषभः पुष्टिवर्धन' इति मन्त्रे पुष्टिवर्धनत्वोक्त्याऽस्मिन्नपि तद्वर्धनत्वोक्त्या परस्परमेकवाक्यतया श्रीमदाचार्यपरत्वेन व्याख्यानं युक्तिमत् । एतेनास्मिन्मन्त्रे श्रीमदाचार्यवाचकपदाभावात्तत्परत्वेन व्याख्यानं न संभवतीत्यपास्तम् । तस्मात् त्र्यम्बकं श्रीवल्लभाचार्यं यजामहे सेवामहे । किंभूतम् । सुगन्धिं सुष्ठु गन्धोऽस्येति 'गन्धस्येदुत्पूतिसुसुरभिभ्य' इत्यनुशासनादिदादेशः समासान्तः । एतेन श्रीमदाचार्ये सौरभ्यगुणं निरूपितम् । तल्लक्षणं तु 'श्रीवल्लभस्य सौरभ्यं स्तौमि व्यक्तं द्विजन्मनः । यस्य प्राशस्त्यवासेन वासिता भुवनत्रयी ॥ छागगन्धी नरो मेषगन्धी कश्चिन्नरोऽपरः । गजमाहिषगन्धी च मीनेरेतोद्भगन्धकः ॥ छुछुन्दर्याः समो गन्धो नरो नारी च तादृशी । दौर्गन्ध्यदूषिता मर्त्यास्तेषां तु गणना न हि ॥ अयोग्या देवपूजादौ भूतशुद्धिं विना ततः । ततो मुक्ता महाशुद्धाः स्वतः सौगन्ध्यभूषिताः ॥ सेव्यार्हाः सर्वथा विष्णोः सर्वदाः सर्वदा हरेः ।' तदुक्तं मोक्षधर्मे 'अनिन्द्रिया अनाहारा अनिष्पन्दाः सुगन्धिनः । ये च मुक्ता भवन्तीह नरा भरतसत्तम ॥ तेषां लक्षणमेतद्धि श्वेतद्वीपनिवासिनामि'ति । अत्र भक्तानामपि सौरभ्यगुणत्वम्, श्रीमत्पूर्णपुरुषोत्तमस्य श्रीमदाचार्यस्य किमु वक्त-

व्यम् । लौकिकप्रतीतिस्त्वासुराणां 'प्राकृतानुकृतिव्याजमोहितासुरमानुष' इति प्रभुभिरुक्तम्। 'अयोग्या देवपूजादाव'स्मिन् पद्ये भूतशुद्धिं विनेत्यस्यागमोदितभूतशुद्धिं विना अयोग्या इत्यर्थः। सिद्धान्ते तु 'मन्त्रोपासनवैदिकतान्त्रिकदीक्षार्चनादिविधिभिर्यः । अस्पृष्टो रमते निगमचेषु स मेऽस्तु सर्वस्वमि'ति भक्तिहंसे प्रभुचरणैरुक्तत्वादत्र ब्रह्मसंबन्धादिना देहजीवनिष्ठसर्वदोषनिवृत्तिरूपभूतशुद्धिं विना पूजादौ भगवत्सेवायामयोग्या इत्यर्थः। अनेन गुणेनेतरगुरुकरणनिवृत्तिः। सर्वतः श्रैष्ठ्येन सर्वथैवाश्रयणीयत्वं श्रीमदाचार्याणामिति फलितम् । ननु किमर्थं श्रीमदाचार्याणां प्राकट्यमिति शङ्कानिरासायाह पुष्टिवर्धनमिति । अत एव चरित्रचिन्तामणौ श्रीमदाचार्यावतरणप्रसङ्गे सर्वैर्देवैः प्रार्थितो भगवान् । तथा हि 'सेव्यसेवकभावो हि न पुष्टिं याति भूतले। मर्यादा वा प्रवाहो वा वर्तते पुष्टिरेव न ॥ सहजः सेवको जीवः सेव्यः श्रीपुरुषोत्तमः । इति भावो यथा सिद्ध्येत्पुष्ट्या तत्साधय प्रभो' इत्युक्तम् । एवं च सेव्यसेवकभावपुष्ट्यर्थमेव श्रीमदाचार्याणां प्राकट्यमिति । 'पुष्टिर्नाम भगवदनुग्रह' इति पुष्टिप्रवाहमर्यादाविवृतौ कल्याणरायचरणैरुक्तत्वात् 'देवानां गुणलिङ्गानामानुश्रविककर्मणाम् । सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु ये'ति तृतीयस्कन्धवाक्यात् 'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः । स्नेहो भक्तिरिति प्रोक्तस्तया भक्तिर्न चान्यथे'ति नारदपञ्चरात्रवचनाच्च 'सा परानुरक्तिरीश्वरे' इति शाण्डिल्यसूत्राच्च । 'क्षणं युगशतमिव यासां येन विनाऽभवदि'ति श्रीभागवतवाक्याच्च सर्वतः परर्द्धिस्नेहत्वे सति भगवन्तमन्तरा क्षणाऽसहिष्णुत्वं पुष्टिमार्गः तस्य वर्धनमित्यर्थः। हे श्रीवल्लभाचार्य, मृत्योर्मुक्षीय मृत्योः सकाशान्मा मां मुञ्च । तथा तत्त्वदीपे 'सात्त्विका भगवद्भक्ता ये मुक्तावधिकारिणः । भवान्तसंभवा दैवात्तेषामर्थे निरूप्यते' इत्युक्तम् । तेन श्रीमदाचार्यैः स्वशरणापन्नानामधिकारिणां जन्ममरणात्यन्ताभावो निरूपितो यथा ऋषिभिः प्रार्थितम् । ननु मृत्योः स्वरूपं कीदृशमित्याह । मृतात् प्राणत्यागरूपात् । यद्वा मां हे ऋतात् ऋतं सत्यमततीति ऋतात् हे सत्यप्रतिज्ञ, किमिव । 'बन्धनादुर्वारुकमिव फलं बन्धनादारोधनादि'ति नैरुक्ता इत्यर्थः । 'पुष्टिपथप्रथनैकधीरनिगमाशयभासके'त्युक्तमभियुक्तैः ।

त्वमग्ने वृषभ इति श्रुतिस्तु 'त्वमग्ने वृषभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः । य आहुतिं परिवेदा वषट्कृतिमेकायुरग्रे विश आ विवासति । ' अर्थस्तु–हे अग्ने, श्रीवल्लभाचार्य, त्वं वृषभः भक्तानां मनोरथपूरकः । विशेषार्थस्तु चत्वारिशृङ्गेति श्रुतौ निरूपितः । यद्वा वृषभः धर्मरूपः । धर्मश्च भगवत्सेवनरूपः । 'धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः । नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् । स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे । अहैतुक्यप्रतिहता ययात्मा संप्रसीदती'ति भगवद्वाक्याभ्याम्। तथा च सुबोधिन्यां श्रीमदाचार्यचरणैः 'गौणपितुराज्ञोल्लङ्घनेऽपि मुख्यपितुर्भगवतः सेवनं मुख्यो धर्म' इत्युक्तम् । ननु भगवत्सेवनमन्येऽपि कुर्वन्ति किमत्र वैशिष्ट्यमित्याशङ्कायामाह । पुष्टिर्नाम भगवदनुग्रहः पुष्टिर्नान्येष्विति वैशि-

अतःपरं ज्ञानं निरूपयति नमो वाच इति । सूत्रभाष्यनिबन्धसुबोधिन्यादिवाग्रूपधारिणे श्रीवल्लभाय नमः । ननु जीवानामुद्धारस्तु श्रीमदाचार्याणां पूर्वोक्तरूपधारणेनैव सिद्ध इति किं वाग्रूपधारणेनेतिचेन्न । 'ज्ञानी चेद्भजते कृष्णं तस्मान्नास्त्यधिकः पर' इति वाक्यात् 'ज्ञानादेव तु कैवल्य' मितिश्रुतेश्च श्रीमदाचार्याणां धर्मिरूपेण प्रादुर्भावसमये स्वमुखारविन्देन दैविजीवानां पुष्टिमार्गीयसिद्धान्तज्ञानसम्पत्तिः संसिद्धा । आधुनिकानां तदीयानां संप्रति पुष्टिमार्गीयाज्ञानादकृतार्थतैव स्यात्तदर्थं भाष्यादिरूपज्ञानात्मकश्रीमदाचार्यप्रादुर्भावः । तेनाधुनिकानां पुष्टिमार्गीयाणां जीवानां पुष्टिमार्गीयज्ञानसम्पत्तिः संसिद्धा ।

किञ्च 'ज्ञानोत्कर्षस्तदैव स्यात् स्वभावविजयो यदि' । ग्रन्थश्रवणेन जीवेन्द्रियाणां

ष्ट्यमिति भावः । 'कर्मणैव हि संसिद्धिमास्थिता जनकादय' इति, 'यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः' । 'सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजा' इति भगवद्वाक्यात् । 'कर्ममार्गप्रवर्तक' इति वाक्याच्च । कर्ममार्गप्रवर्तनार्थं प्रादुर्भावमाह उद्यतस्रुच इत्यादि । उद्यताः स्रुचो यस्मिन् तस्मै यज्ञाय यज्ञं कर्तुं भवसि प्रादुर्भवसि यज्ञकर्तेति वाक्यात् । कथंभूतः । श्रवाय्यः श्रवणीयगुणकर्मलीलः । ननु यज्ञकर्तृत्वमन्येष्वपि किमत्र वैशिष्ट्यमित्यभिप्रेत्याह । यः भवान् आहुतिं परिवेद जानाति इन्द्राद्युद्देशेन त्यक्ताहुतिरिन्द्रादीनां भगवदङ्गभूततया भगवत्त्वेन भगवदर्पणे पर्यवस्यतीति परिपूर्वकविदेरर्थः । कथंभूताम् । वषट्कृतिम् यज्ञे देवाह्वानमन्त्रो वषट् तस्य कृतिरुच्चारणं यस्यां ताम् । पुनः किंभूत । विशः एकायुः विशन्ति ते विशः दैविजीवानामेकायुर्जीवनमित्यर्थः । विश इति जातावेकवचनं तन्त्राश्रयणेन विश इति प्रथमाया बहुवचनमपि । तथायमर्थः—अग्रे प्रथमं विशः दैविजीवाः आविवासति परिचरन्ति त्वामिति शेषः । तथाच दैविजीवोद्धारार्थमेवावतारोऽन्यदुपसर्जनीभूतमित्यर्थः । वाग्रूपधारिण इति । यथा श्रीमद्भगवतो रूपं शब्दब्रह्मवेदात्मकं तथा श्रीमदाचार्याणामपि शब्दात्मकं रूपं सुबोधिन्यादिकमित्यर्थः । श्रीमदाचार्याणां मुखादाविर्भूतानां ग्रन्थानां वेदस्वरूपत्वादित्युक्तमेवात्र नैकट्ये भगवदास्यस्वरूपत्वादाचार्यवर्याणाम् । ज्ञानादेव त्विति । 'ऋते ज्ञानान्न मुक्तिरि'ति श्रुत्यन्तरात् 'तमेव विदित्वातिमृत्युमेती'ति ऋगन्तराच्च भगवद्विषयकज्ञानमवश्यमपेक्षितम् । माहात्म्यज्ञानादेवापराधनिवृत्तिः । माहात्म्यज्ञानपूर्वस्त्वित्यत्र 'सुदृढः सर्वतोऽधिकः स्नेहो भक्तिरि'ति लक्षणम् । माहात्म्यज्ञानं त्वपराधनिवृत्त्यर्थं न तु भक्तिलक्षणे निविष्टम् । अत एव 'सा परानुरक्तिरीश्वरे' इति सूत्रेऽनुरक्तेः परभक्तित्वमुक्तम् ।

ननु ज्ञानसंपत्तिः कथं सेत्स्यतीत्याशङ्कानिरासायाहुः किञ्चेत्यादि । ग्रन्थश्रवणेनेति । यथा यमुनाष्टकपाठफलस्तुतौ 'स्वभावविजयो भवेद्वदति वल्लभः श्रीहरेरि'त्युक्तं श्रीमदाचार्यवर्यैः । श्रवणादिना भगवद्विषयकनिष्ठया भगवति व्यसने कृतार्थता संपद्यते यथा श्रीभागवतश्रवणेन

र्यदी'ति । तथा च 'दृष्ट्वाऽऽतपे व्रजपशूनि'ति श्लोके मेघस्य स्वसर्वस्वजलवर्षणेन स्वच्छायाविधानेन च सेवाकरणाद्वैराग्यं सिद्धम् । एवं सेवकादिषु वैराग्यसिद्धौ श्रीमदाचार्येषु किं वक्तव्यमिति भावः ॥

नन्विमाः कारिकाः 'ईश्वरः पूज्यते लोके मूढैरपि यदा तदे'त्यादयः श्रीमदाचार्यचरणैर्वेणुगीते हरिण्यादिषु प्रतिपादिताः कथमत्र प्रतिपादनं क्रियत इति चेन्न । 'नैकमुदाहरणं योगारम्भं प्रयोजयती'ति भाष्यादुदाहरणभिन्नेऽपि न काप्यनुपपत्तिः । अतएव 'अनन्तगुणभूषित' इतिश्लोकव्याख्याटिप्पण्यामिमाः कारिकाः श्रीहरिरायैरपि श्रीयमुनापरत्वेन व्याख्याताः । किञ्च ननु श्रीमदाचार्याणां वाचस्पतिरूपेण यदा स्थितिस्तदा श्रीमुखादुक्तसुबोधिन्यादिग्रन्थाववोधस्तु सर्वेषां दैवानां भवत्येव, तथाप्याधुनिकानां जीवानां तदभावादनुद्धार एव स्यादित्याशङ्कानिरासायाहुः नमो वाचस्पतय इति। वाचस्पतिशब्देनाधुना विद्यमानाः श्रीमदाचार्यकुलोत्पन्नाः येषां भाष्यनिबन्धसुबोधिन्यादिसकलग्रन्थानामुपदेशकरणे सामर्थ्यं ते ग्राह्याः । तेषां श्रीमदाचार्याणां वाचस्पतिस्वरूपत्वात् तेषां मुखात्सिद्धान्तज्ञानं जीवाना पुष्टिमार्गीयाणां भवत्येव । तेन माहात्म्यज्ञानपूर्वकसुदृढस्नेहसम्पादनेन सर्वेषां दैविजीवानामुद्धारो भवत्येवेति न संशयः।

सम्बन्धेनेति । साक्षाद्भक्तित्वेनोच्छिष्टं यदन्नं तच्छुद्धान्नपदेनोच्यते । मुक्तिशिष्टान्नान्मुखारविन्दमध्यस्थ चर्वित ताम्बूलमिव मुख्यमुच्छिष्ट भवति न ततोऽन्यत्फलरूपं शोधकं वास्तीति तत्सम्बन्धेन तथात्वायेत्यर्थ. । अन्यत्वं साधारणभगवत्सम्बन्धो वात्र शुद्धिपदार्थ इति न वक्तुं शक्यम् । भगवदन्त स्थिताना पूर्णपुरुषार्थत्वेन तथाविधेन कृतार्थत्वोक्तेरनुचितत्वात् । यत्तु 'एते बालका' इत्यारभ्य 'मिथ्या मिथ्याभिशस्तिन' इत्यन्तं वाक्य तन्मर्यादापर ज्ञेयम् । 'वशे कुर्वन्ति मा भक्त्ये'ति वाक्याद्यथैव तत्तोपस्तथैव भगवत कर्तव्यं भवतीति मर्यादामतिक्रम्य भक्तेच्छानियम्यत्वाङ्गीकारात्पुष्टिमार्गीयभक्तिमार्गे भक्षणादिकं सर्वमुपपद्यत इत्युक्तम् । पूतनामोक्षाध्याये टिप्पण्या चेत्यारभ्योपपादितमित्यन्तं श्रीव्रजसीमन्तिनीविहितश्रीमत्कृष्णचन्द्ररसाप्रकरणे महता प्रबन्धेनोपपादितम् । श्लोक इति । सम्पूर्णस्तु 'दृष्ट्वाऽऽतपे व्रजपशून् सह रामगोपैः सचारयन्तमनु वेणुमुदीरयन्तम् । प्रेमप्रवृद्ध उदित कुसुमावलीभि सख्युर्व्यधात्स्ववपुषाऽम्बुद आतपत्रमि'ति । अत्र प्रेमप्रवृद्ध उदित इति विशेषणेनाधिकस्नेहवत्तया भगवत्सेवाकरणादलौकिकत्वमम्बुदस्य न काप्यनुपपत्तिरिति श्रीमदाचार्योदितवचसा वेदरूपत्वेन यथा वेदस्य यद्यद्विग्ध्यात उरुगायेनि पूर्वोदितदिशा भक्तमनोरथानुकूलार्थबोधकत्वं तथात्र बोध्यमित्यभिप्राय. ।

अधुनिकानामिति । पूर्वं श्रुत्यादिभिर्महाप्रज्ञत्वेनोपपादिता पुरुषोत्तमरूपत्वेन वाचस्पतिरूपा तेषा श्रीमदाचार्याणामिति सामानाधिकरण्यमाचार्यकुलोत्पन्नानामाचार्यत्वेन । ननु सर्वेषामेव कुतो न प्रवृत्तिरित्याशङ्कायामधिकारिणो दुर्लभा इत्यभिप्रेत्य तत्त्वदीपवाक्यमाहु

'सात्त्विका भगवद्भक्ता ये मुक्तावधिकारिणः । भवान्तसम्भवा दैवात्तेषामर्थे निरूप्यते' इति वाक्यात् ॥

नमो वाचस्पतय इति विशेषणेन वैराग्यं निरूप्यातः परं संयोगात्मकधर्मिस्वरूपं निरूपयति नमो विष्णव इति । विष्णुरूपधारिणे श्रीवल्लभाय नमः करोमीति सम्बन्धः । ननु नमो विष्णव इति विशेषणस्य कथं धर्मिरूपत्वं सम्भवतीत्याशङ्कानिरासाय फलात्मककृष्णपदं विहाय विष्णुपदप्रयोगः । तेन व्यापकत्वेन पूर्वोक्तैश्वर्यादिषड्धर्मेषु विद्यमानेपि धर्मी स्वस्वरूपे षड्धर्मयुक्त इत्यर्थः । ननु विष्णोर्गुणावतारेणापि कथनात्कथं धर्मिवाचकत्वमिति चेन्न । पुरुषोत्तमवाचकमेवात्र विष्णुपदम् । यथा 'देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः । आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः' । एतद्व्याख्यायां सुबोधिन्यां देवरूपिण्यामिति पाठान्तरे व्याख्याने देवो विष्णुर्व्यापकः पुरुषोत्तमो यो वेदान्ते ब्रह्मशब्देनोच्यते तस्य सर्वत्रैव विद्यमानत्वादिति व्याख्यानात् । अतएवान्तःकरणप्रबोधे 'सत्यसङ्कल्पतो विष्णुर्नान्यथा तु करिष्यती' त्यत्र विष्णुपदव्याख्याने श्रीगोकुलनाथैरपि 'बाह्याभ्यन्तरभेदेन स व्याप्तः पुरुषोत्तम' इति व्याख्यातम् ।

किञ्च पाण्डुपरायिते धर्मिरूपश्रीवल्लभप्रतिपादिका श्रुतिः । तथाहि 'इन्दिराया नलिनीमन्दिराया वल्लभो वासुदेवो देवगीतो दिविजानन्ददायी । देवदेवोऽयतनो वैभवेन सा लक्ष्मीरभिता नो बभूव सन्ततं भूरिभोग'मिति । अस्यार्थः । इन्दिरायाः 'इदि परमैश्वर्ये' इति परमैश्वर्य प्राप्ताया मुख्यस्वामिन्या नलिनीमन्दिराया वल्लभः । अतएव वल्लभ इति नाम । अवतारदशायां स्वामिनीभावेन सेवाकरणात् उभय मध्यत्वेन वल्लभत्वम् । स एव वासुदेवः । अथवा 'वस्तुतः कृष्ण एवे'तिवाक्यात् फलरूपत्वेन सर्वेषां भक्तानां वल्लभः । अतएव तादृशवेष्टित इति नाम सर्वोत्तमे वरीवर्ति ।

सात्त्विका इत्यादि । अस्यार्थस्तु श्रीमदाचार्यैर्निबन्ध एवोपपादित । विष्णुरूपधारिण इति । 'त्रिर्देव पृथिवीमेष एता'मिति श्रुतौ श्रीमदाचार्याणा विष्णुरूपत्वमुदितम् । तदर्थस्तूपपादित एव । 'वस्तुत कृष्ण एवे'ति वाक्याच्च । व्यापकत्वेनेति । एतेन ब्रह्मशब्दपदार्थे उदित 'सर्वत्र पूर्णगुणकोऽपि बहूपमोऽभूदि'ति श्लोकव्याख्यायामैश्वर्यादिगुणा सर्वेषु पूर्णा इति श्रीमदाचार्यचरणैर्व्याख्यातमतो ब्रह्मण ऐश्वर्यादिधर्मा इति भाव । 'अन्यतमो मुकुन्दात्को नाम लोके भगवत्पदार्थं' इति श्रीभागवतवाक्याद्भगवद्भिन्ने तदभावात् 'सर्वप्रसिद्धोपदेशा'दित्यस्मिन् सूत्रे 'वासुदेवात्पर को नु ब्रह्मशब्दोदितो भवेत् । स हि सर्वगुणै पूर्णस्तदन्ये तूपचारत' इति माध्वभाष्ये । पुरुषोत्तमवाचकमेवेत्यादि । 'अनन्योऽप्यन्यशब्देन तथैको बहुरूपवान् । प्रोच्यते भगवान्विष्णुरैश्वर्यात्पुरुषोत्तम' इति ब्रह्माण्डे । संयोगात्मकधर्मिस्वरूपोपपादने श्रुत्यन्तरमाहु किञ्चेत्यादिना । उभयमध्यत्वेनेति । अनवतारसमये इन्दिराया वल्लभत्वम् अवतारदशायामिन्दिराया वल्लभत्वेऽपि 'तत्सारभूतरामस्त्रीभावपूरितविग्रह' इति वचनात्स्वामिनीभावतया श्रीकृष्ण-

ननु वासुदेवशब्दस्य पुरुषोत्तमवाचकत्वे किं प्रमाणम् । तस्य च वासुदेवशब्दस्य व्यूहपरत्वेनापि सत्त्वादितिचेन्न । 'द्रोणो वसूनां प्रवर' इतिवचनात् वसुषु दीव्यतीति वसुदेवो नन्दस्तस्यापत्यं वासुदेवो नन्दनन्दनः । किञ्च 'वासुदेवार्जुनाभ्या'मिति सूत्रे वासुदेवग्रहणाज्ज्ञापकात्पुरुषोत्तमवाचकत्वम् । ननु कथं ज्ञापकत्वमुच्यते वसुदेवस्यापत्यमित्यर्थे 'ऋष्यन्धके' त्यणि वासुदेवशब्दो निष्पन्नः । तथा च 'गोत्रक्षत्रियाख्येभ्य' इत्युत्तरसूत्रेण वुञेवास्तु किमनेन वुना । नह्यत्र वृद्धौ विशेषः प्रागेव वृद्धत्वात् । नच 'वृद्धिनिमित्तस्ये'ति पुंवद्भावनिषेधे दोषः स्यादिति वाच्यम् । वुन्यपि'न कोपधाया'इति निषेत्स्येप्यमाणत्वात् । न वा स्वरे विशेषः । 'ञ्नित्यादिर्नित्य'मिति तुल्यस्वरत्वात् । नापि 'अभ्यर्हितं पूर्व'मिति ज्ञापनमेव फलमितिवाच्यम् । ज्ञापकार्थत्वे हि पूर्वनिपातप्रकरणेऽभ्यर्हितमित्येव कुर्यादितिचेदत्र भाष्यम् । संज्ञैषा भगवतः । तयाच 'ऋष्यन्धके' त्यणूप्रत्ययस्याप्राप्तिः । 'गोत्रक्षत्रियाख्येभ्य'इति वुञ्प्रत्ययोपि न । वासुदेव इति भगवतः पुरुषोत्तमस्य संज्ञा । अयं भावः । 'सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः । ततोऽसौ वासुदेवेति विद्वद्भिः परिगीयत' इति स्मृतेः परमात्मेह वासुदेवः । भूतेषु वसतीति वासुः । भूतानि वासयतीति वा वासुः सचासौ देवश्चेति । सर्वत्रासौ वसति सर्वमत्र वसतीति वा व्युत्पत्त्या वासुः वाहुलकत्वादण् । वासुश्चासौ देवश्चेति विग्रहः । तथाच नायं गोत्राख्या नापि क्षत्रियाख्येति युक्त एव वुन्विधिः । अभ्यर्हितं पूर्वमिति तु प्रसङ्गाज्ज्ञापितं तदप्यनित्यम् 'श्वयुवमघोनामतद्धित' इत्यादिलिङ्गादित्यवधेयम् । पुनः कथंभूतो वल्लभः । देवगीतः देवैर्गीतो देवगीतः देवैर्ब्रह्मादिभिः पुरुषोत्तमगानेन तदास्यत्वादाचार्याणामपि गानम् ॥ ननु प्रयोजनमनुद्दिश्य कथं गाने प्रवृत्तिरित्यत आहुः दिविज्ञानन्ददायी ।

वल्लभत्वमिति भाव । वासुदेवशब्दस्य व्यूहपरत्वमत्र निरसन्तस्तत्राशङ्कामुद्भावयन्ति नन्वित्यादि । व्यूहपरत्वेनेति । चतुर्व्यूहे वासुदेवस्य श्रूयमाणत्वात् समाविमाविष्कुर्वन्ति द्रोणो वसूनामित्यादि । व्याकरणेनापि वासुदेवशब्दस्य पुरुषोत्तमपरत्वं साधयन्ति किञ्चेत्यादि । पुंवद्भावनिषेध इति । वासुदेविका भार्या यस्य स वासुदेविकाभार्य इत्यत्र वुञि तद्धितस्य वृद्धिनिमित्तत्वादिति भावः । इष्यमाणत्वादिति । एतेनोभयपक्षे वासुदेविकाभार्य इत्येव रूपम् । विग्रह इति तेन वासुदेवशब्दस्य योगरूढत्वम् । तत्त्वं च योगार्थतावच्छेदकसमानाधिकरणरूढ्यर्थतावच्छेदकावच्छिन्ननिरूपितबोधकत्वम् । अस्ति चेदं पङ्कजपदे पङ्कजनिकर्तृत्वसमानाधिकरणपद्मत्वावच्छिन्नबोधकत्वात् । वासुदेवादिसंज्ञाशब्देऽपि सर्वाधिकरणकवासरूपसर्ववासाधिकरणरूपयोगार्थतावच्छेदकसमानाधिकरणरूढ्यर्थतावच्छेदकावच्छिन्नबोधकत्वाल्लक्षणसमन्वयः । अवधेयमिति । वासुदेवशब्दस्य संज्ञात्वमित्यर्थः ।

गानमिति । कृतमिति शेषः । 'उरुगायाय वृष्णे' 'उरुगायाय दाशत' देवगीतः 'एतमेव तु वीणायां गायन्ति गायन्ति त्वे'ति श्रुतिलिङ्गमूलानि श्रीमत्कृष्णचन्द्रगुणगानकर्तव्यताप्रतिपा-

दिविजानामानन्दं सुखं ददातीत्यर्थः। अथवा कथंभूतो वल्लभः । देवगीतः देवैः देवस्वरूपैरु-त्पन्नैः पुष्टिमार्गस्थितैर्गीतः तत्तद्गुणवैशिष्ट्येन । तैः कथं गीतः । यतो दिविजानन्ददायी दिविजानां क्रीडास्थितानां पुष्टिमार्गस्थानां दैवीजीवानामानन्दं साक्षात्पुरुषोत्तमसम्ब-न्धिलीलासुखं यथाधिकारेण सेवाफलोक्तं ददाति तच्छीलः आनन्ददायी । ननु तादृश-फलदाने कथं सामर्थ्यम् । यतो देवदेवः देवानामपि देवः पूज्य इत्यर्थः । पुरुषोत्तमत्वात् ।

दुक्तानि पुराणवाक्यानि गायतेः पङ्कजशब्दस्य तामरस इव गीतरूढत्वात्। अत एव लिङ्गपुराणे उत्तरार्धे ऋषय ऊचुः 'कृष्णस्तुष्यति केनेह सर्वदेवेश्वरेश्वरः । वक्तुमर्हसि तत्सूत सर्वशास्त्रा-र्थविद्भवान् ॥ सूत उवाच । पुरा पृष्टो महातेजा मार्कण्डेयो महामुनिः । अम्बरीषेण विप्रेन्द्रा-स्तद्वदामि यथामति' इति अम्बरीषमार्कण्डेयसंवादमुपक्रम्य 'पुरा त्रेतायुगे कश्चित्कौशिको नाम वै द्विजः । वासुदेवपरो नित्यं सामगानरतः सदा ॥ भोजनासनशय्यासु सदा तद्गतमानसः । उदारं चरितं विष्णोर्गायमानः पुनः पुनः ॥ विष्णुस्थलं समासाद्य हरेः क्षेत्रमनुत्तमम् । अगायत हरिं तत्र लयतालसमन्वितम्' इत्यादिना श्रीमत्कृष्णगुणगायकस्य कौशिकस्य तदन्न-दातुश्च पद्माक्षस्य नित्यं तद्गानं शृण्वतस्तच्छिष्याणां च राजन्यवैश्यविप्राणां गानविद्याधिकानां श्रीवासुदेवपरायणानां गालवनामकस्य वैश्यस्य च विष्णुपरायणस्य सभार्यस्य तद्गानं शृण्वतः । अन्येषां च ब्राह्मणानां शृण्वतां स्वगुणगानार्थं कलिङ्गराजेन कृतेऽपि निग्रहे श्रीमद्गोविन्दगुण-व्यतिरिक्तगाननिवृत्तानामेतेषां सर्वेषां कालगतिं गतानां 'वेष्टित' स्वगणैः राजन् ब्रह्मा प्राह च तान् सुरान् । कौशिकादीन् द्विजानश्च वासुदेवपरायणान् ॥ गानयोगेन ये नित्यं पूजयन्ति जनार्दनम् । तानानयत भद्रं वो यदि देवत्वमिच्छथे"त्यादिना भगवदनुग्रहश्च श्रूयते 'ततोऽव-लोक्य भगवान् हरिर्नारायणः प्रभुः । कौशिकेत्याह संप्रीत्या तांश्च सर्वान्यथाक्रमम् ॥ जयघोषो महानासीन्महाश्चर्ये समागते । ब्रह्माणमाह विश्वात्मा शृणु ब्रह्मन्यथोचितम् ॥ कौशिकस्य तु ये विप्राः साध्यसाधनतत्पराः । हिताय संप्रवृत्ता ये कुशस्थलनिवासिनः ॥ मत्कीर्तिश्रवणे युक्ता गानतत्त्वार्थकोविदाः । अनन्यदेवतासक्ताः साध्या देवा भवन्ति ते ॥ मत्समीपे तथाऽन्यत्र प्रवेशं देहि सर्वदा । एवमुक्त्वा पुनर्देवः कौशिकं प्राह माधवः ॥ स्वशिष्यैस्त्वं महाप्राज्ञ संयुक्तो मम वै सदा । गाणाधिपत्यमापन्नो यथाहं त्वं समास्व वै ॥ गालवं गालवीं चैव प्राह दामोदरो हरिः । मम लोके यथाकामं भार्यया सह गालव ॥ दिव्यरूपधरः श्रीमाञ्छृण्वन् गायन् महा-र्षिभिः । आस्व लोकं यथाकामं यावल्लोका भवन्ति वै ॥ पद्माक्षमाह भगवान् धनदो भव मानद । धनानामीश्वरो भूत्वा यथाकालं हि मां पुनः ॥ आगम्य दृष्ट्वा नत्वा च कुरुष्व च यथासुख'मित्यादि । अम्बरीषं प्रति 'तस्मात्त्वया महाराज विष्णुक्षेत्रे विशेषतः । अर्चाद्यं गाननृत्यादि वाद्योत्सवसमन्वितम् ॥ कर्तव्यं विष्णुभक्तैर्हि पुरुषैरनिशं नृप । श्रोतव्यं च त्वया नित्यं स्तोत-व्योऽसौ हरिस्त्वये'ति। 'विष्णुक्षेत्रे ततो विद्वान्कारयेद्भक्तिसंयुतः । गाननृत्यादिकं चैव विष्ण्वा-

ख्यानकथां तथा ॥ जातिं स्मृतिं च मेधां च तथैव परमोन्नतिम् । प्राप्नोति विष्णुसालोक्यं सत्यमेतन्नराधिपे'ति ।

ततोऽप्यग्रिमाध्याये कौशिकादीनां गानयोगेन भगवदनुग्रहमवलोक्यानु ततो नारदस्त-पस्तप्त्वा आकाशवाचा नियुक्तो गानबन्धुमुलूकेन्द्रं प्रति गतः 'उलूकेन्द्र महाप्राज्ञ शृणु सर्वं यथातथ' मित्युपक्रम्य 'यद्दत्तं यद्धुतं चैव यद्वाचा श्रुतमेव च । यदधीतं मया सर्वं कलां नार्हन्ति षोडशीम् ॥ विष्णोर्माहात्म्ययुक्तस्य गानयोगस्य वै तदे'त्यादिना गानयोगविषये तं प्रार्थित-वान् । गानबन्धुरपि भुवनेशं नाम राजानं प्रकृत्य 'तस्य राज्ञः पुराभ्याशे हरिमित्र इति स्मृतः । ब्राह्मणो विष्णुभक्तश्च सर्वद्वन्द्वविवर्जितः ॥ नदीपुलिनमासाद्य प्रतिमां स हरेः शुभाम् अभ्यर्च्य च यथाशास्त्रं घृतदध्युत्तरं बहु ॥ मिष्टान्नपायसं दत्त्वा हरेरावेद्यपूर्वकम् । प्रणिपत्य यथान्यायं तत्र विन्यस्तमानसः ॥ अगायत हरिं साक्षात्तालवर्णसमन्वित'मित्यादिना श्रीहरि गुणगायकं हरिमित्रं प्रशस्य तत्प्रतिबन्धकर्तुश्च राज्ञो यमयातनां निरूपितवान् । नचैतद्ब्राह्मण-विषयमिति वाच्यम् । 'गायन्ति त्वा गायत्रिण' इति श्रुतौ 'ब्राह्मणो वासुदेवाख्यं गायमा-नोऽनिशं नृप । हरेः सालोक्यमाप्नोति रुद्रगीतसमो भवेत् । अन्यथा नरकं गच्छेद्गायमा-नोऽन्यदेव ही' त्यत्र च ब्राह्मणकर्तव्यताप्रतिपादनात् । किञ्च 'विष्णोर्गीतं च नृत्यं च वादनं च विशेषतः । ब्रह्मन् ब्राह्मणजातीनां कर्तव्यं नित्यकर्मव' दिति नारदीयवाक्यात् 'गीतनृत्यादि कुर्वीत द्विजदेवाग्नितुष्टये । न जीवनाय युञ्जीत विप्रः पापभिया क्वचि'दिति स्मृतेः । 'ब्राह्मणो वासुदेवार्थे गायमानोऽनिशं परम् । नववर्षसहस्राणि कुबेरभवनं वसे' दिति वाराहाच्च सिद्धं ब्राह्मणेनापि विष्णोर्गुणगानं कर्तव्यमिति । निवारणोपहासयोर्दोषश्रवणात् । तथाच नृसिंहपरि-चर्यायां पाद्मे ' निवारयति यो गीतं नृत्यं जागरणं हरेः । षष्टिर्युगसहस्राणि पच्यते रौरवादिषु ॥ नृत्यमानस्य विप्रस्य उपहासं करोति यः । जागरे याति निरयं यावदिन्द्राश्चतुर्दशे'ति 'श्रोतव्यं च त' दिति तच्छ्रोतॄणां पद्मासप्रभृतीनामुत्तमगतिश्रवणात् भगवति चित्तानुरागहेतुत्वाच्च भगव-द्गुणगानस्य कर्तव्यता श्रोतव्यता च विज्ञायते । 'तस्मात्केनाप्युपायेन मनः कृष्णे निवेशये' दिति 'शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णश' इति श्रीभागवतवचनाच्च । अतश्चैतन्निरस्तम् ।

यदुदितं 'भाषागीतं न श्रोतव्यं नच कर्तव्य' मिति तत्तु भगवद्व्यतिरिक्तस्य तथात्वेऽपि श्रीमद्गोकुलेशनामकीर्तनसम्बन्धिनो भाषागीतस्य पुनः पुनः क्रियमाणस्य, भगवति चित्तानुराग-हेतुत्वेनानुभवसिद्धत्वात् । नच 'न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्द' इति निषिद्धत्वाद्भाषया गुणानुवादो न (व्य) कर्तव्य इति वाच्यम् । तस्य विहितत्वेन निषेधाप्रवृत्तेः । न च भगवद्गुणगानकर्तव्यताविधेरुक्तनिषेधानुरोधेन संकोचो युक्तः । साधुशब्देनैव भगवद्गुणकी-र्तनं कर्तव्यमिति वाच्यम् । निषेधस्य रागप्राप्तविषयत्वेनानुपपत्तेः । न चैवं साक्षाच्छ्रूयते साधु-शब्देनैव भगवद्गुणनामकीर्तनं कर्तव्यमिति । किञ्च भगवति द्वेषादिकर्तॄणामपि चैद्यादीनां सद्गतिः

ननु सन्मनुष्यत्वेन प्रतीयमानत्वात् कथं पुरुषोत्तमत्वमितिचेन्न । अयतनः आय भगवदर्थं यत्नमं व्यापारो यस्य सः अयतनः । 'अकारो वासुदेवः स्या'दिति कोशाद्भगवदाज्ञया जीवोद्धारार्थं स्वस्य पुष्टिमार्गसाधने प्रवृत्तिराचार्यरूपेण स्वस्य प्राकट्य च । अत एव सर्वोत्तमे मत्स्वामिनो नाम विराजते । स्वदासार्थकृताशेषसाधनः स वल्लभो नः अस्माकं वैभवे सेवासम्पत्त्यर्थं । वैभवे इति निमित्तसप्तमी । सा लक्ष्मीरमिता नो बभूव । सा स्वपरिग्रहरूपा अमिता निरवधिकानन्दरूपा नः अस्माकं देवाना सुखार्थं यथार्थे-

---

सायुज्यादिरूपा मुक्तिश्च श्रूयते । सा च न द्वेषादे फलम् । तस्य निपिद्धत्वात् । किन्तु द्वेषादिजन्यानुपङ्किकगोविन्दानुस्मरणफलम् । ततश्च द्वेषादिनापि श्रीकृष्णस्मरणे सद्गतिश्चेत् भाषयापि भक्त्या गुणानुवादस्मरणे च सद्गतिर्भवतीति किमु वक्तव्यम् । वचन एवाग्रहश्चेत् 'तस्मात्केनाप्युपायेन मन कृष्णे निवेशये'दिति, 'स्तवैरुच्चावचै स्तोत्रै पौराणै प्राकृतैरपि' । 'यस्मिन् प्रतिश्लोकमबद्धवत्यपि' । श्रीमद्व्रजसीमन्तिनीप्रसङ्गे 'यासा हरिकथोद्गीत पुनाति भुवनत्रय'मिति भाषायामपि गुणानुवाद कर्तव्य इति ज्ञायते । किञ्च भाषया लौकिकविषयवार्तासु तदभिनिवेशपूर्विकासु न दोष । श्रीमद्भगवद्गुणानुवादे परमेश्वरस्मारके प्रापके भाषाकृते दोष इति वदता मायाजनितो मोह एव । 'ज्ञानिनामपि चेतासि देवी भगवती हि सा । बलादाकृष्य मोहाय महामाया प्रयच्छती'ति मार्कण्डेयपुराणात् यदेव किञ्चिद्भगवद्विषयक तदनुरागभूत च तत्सर्वमवश्य कार्यम् । 'तस्मात्केनाप्युपायेन मन कृष्णे निवेशये'दिति प्रतिप्रसवात् 'ग्राम्यगीत न शृणुया'दिति तु न परमेश्वरविषयकनिबन्धक श्रवण ग्राम्यपदोपादानात् ईश्वरस्याप्राकृतविषयत्वादित्यार्याणामस्माकमाचार्याणा निर्दुष्ट एव पन्था इति दिक् ।

गायन्ति त्वेति श्रुतिस्तु 'गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किण । ब्रह्माणस्त्वा शतक्रत उद्वशमिव येमिरे ॥' अर्थस्तु हे श्रीकृष्ण, गायत्र्या सामगातार त्वा त्वा गायन्ति । अर्क अर्कमण्डलान्तस्थ त्वा अर्किण भवत्सेवकास्त्वामर्चन्ति । हे शतक्रतो, अस्माकमिन्द्र, त्वा त्वा ब्रह्माण ब्राह्मणा दैविजीवा उद्वशमिव मुरलीकाण्डमिव तदेव वादयितु उद्येमिरे उद्यम कारितवन्त इत्यर्थ । एवच श्रीकृष्णगीतमिव श्रीमदाचार्याणा गुणगान कर्तव्य पुष्टिमार्गस्थैरिति भगवदनुग्रहविशिष्टै कृष्णदासश्रीसूरदासादिभिर्यथा । आनन्ददायीति 'अलौकिकैहिकदानक्ष'दिति वचनात्, देवाना देव इति ' आनन्द परमानन्द ' इति वचनात् श्रीमदाचार्याणा पूर्णानन्दत्वेन पुरुषोत्तमत्व, ' प्राकृता सकला देवाऽगणितानन्दक बृहत् । पूर्णानन्दो हरिस्तस्मात्कृष्ण एव गतिर्मम'ति श्रीमदाचार्यचरणैर्विना पूर्णानन्दत्वाभावात् पुरुषोत्तमसेवकत्वमिति भाव । आय इति अशब्दस्य चतुर्थ्येकवचने रूपमिदम् । भगवदर्थमिति भगवदाज्ञार्थमित्यर्थ । ' तस्यैवात्मानुभावप्रकटनहृदयस्याज्ञया प्रादुरासी'दितिवाक्यात् । स्वदासेत्यादि । त तु कर्तुमसमर्थास्तेषा स्वयमेव साधन कुर्वन्तीत्यर्थ ।

वेदोक्तकर्मकरणे सहायभूता प्रकटा बभूव रमणार्थं च । उभयोः साम्ये सत्येव रमणं भवति 'रसो वै स' इति श्रुत्या रसात्मा । स्वस्य रसात्मकत्वेन द्विदलात्मकत्वाद्रसस्य । साम्यं विना रसो न भवति । समत्वं च पुष्टिप्रवाहमर्यादायामुक्तं स्वस्य पुरुषोत्तमत्वात् । तथाहि 'स्वरूपेणावतारेण लिङ्गेन च गुणेन च । तारतम्यं न स्वरूपे देहे वा तत्क्रियासु चे' त्युक्तलक्षणात् ।

किञ्च सन्ततं निरन्तरं भूरिभोगं यथास्यात्तथा त्वं वल्लभरूपेण प्रकटो बभूव । भोगो भगवतोऽस्माकं च । भगवतो भोगः प्रकटितो वल्लभाष्टके 'यस्मादस्मिँस्थितो यत्किमपि कथमपि क्वाप्युपाहर्तुमिच्छत्यद्धा तद्गोपिकेशः स्ववदनकमले चारुहासे करोती'ति । अस्माकं च भोगो नानाप्रकारव्यञ्जनादिसहितो भगवद्भोगानन्तरमुच्छिष्टतया । तदुक्तमुद्धवेन 'त्वयोपभुक्तस्रगन्धवासोलङ्कारचर्चिताः । उच्छिष्टभोजिनो दासास्तव

प्रकटा बभूवेति । महालक्ष्मीरूपेणेत्यर्थः । एतत्प्रतिपादनपरां श्रुतिमग्रे दर्शयिष्ये । रमणार्थं चेति । 'एकाकी न रमते स द्वितीयमैच्छदि'ति श्रुतेः । एवेति न्यूनाधिकभावेन रमणं भवतीति सूचितम् । स्वरूपेणेत्यादि । लीलासृष्टेर्भगवद्रूपत्वात्स्वरूपसाम्यम् । यथा भगवतोऽवतारः प्रादुर्भावो न जीववज्जन्म तथा लीलासृष्टिपातिनामपीत्यवतारसाम्यम् । अलौकिकत्वज्ञापकस्य भगवता समं नृत्यादिसामर्थ्यस्य विद्यमानत्वाच्चिह्नसाम्यम् । गुणाः सौन्दर्यादयस्तत्साम्यं स्पष्टमेव । तेन तेषां क्रियासु स्वरूपे देहे वा न तारतम्यमित्यर्थः । यस्मादस्मिन्नित्यादि । अस्मिन्मार्गे स्थितिश्च कायवाङ्मनसां तदेकपरत्वम् । 'तदहं भक्त्युपहृतमश्नामि प्रयतात्मन' इति स्मृतावपि उच्छिष्टतयेति भुक्तशिष्टान्नान्मुखारविन्दमध्यस्थताम्बूलं मुख्यमुच्छिष्टं भवतीत्युक्तं श्रीमत्प्रभुचरणैष्टिप्पण्याम्, तादृशोच्छिष्टतयेत्यर्थ । श्रीविष्णुतत्त्वेऽन्तिमे पटले 'शेषभुक्तिं प्रशंसन्ति मुनयस्तत्त्वदर्शिनः । युवानः खलु वाञ्छन्ति ताम्बूलं तरुणीमुखा'दित्यस्मिन् दृष्टान्ते नैतादृशमेवोच्छिष्टं प्रतीयत इति । गीतासु 'यज्ञशिष्टाशिनः सर्वे मुच्यन्ते सर्वकिल्बिषैः । भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणा'दिति । 'यज्ञो वै विष्णु'रिति श्रुतेः यज्ञशिष्टाशिनो विष्णूच्छिष्टभोजिन इत्यर्थः ।

तत्रैव श्रीभागवतवचनमुदाहरन्ति त्वयोपभुक्तेत्यादि । नन्वत्र विधिश्रवणाभावाद्भगवन्निवेदितद्रव्यजातस्य स्वत्वनिवेदितस्य स्वसत्तापरित्यागपरसत्तासम्पादनरूपदानरूपत्वाद्देवद्रव्यापहारकत्वात्कथं भगवन्निवेदितं भोक्तव्यमिति चेन्न । अष्टमस्कन्धे षोडशाध्याये 'निवेदितं तद्भक्ताय दद्याद्भुञ्जीत वा स्वय' मिति कश्यपेनादितिं प्रति भगवद्व्रतपूजाविधिकथने उक्तम् । नच तत्र विकल्पोक्तत्वाद्भोक्तव्यमेवेति नियम एवेति वाच्यम् । अनियमेपि पक्षे निवेदितभोजनविधानात्त्वदुक्तमतसिद्धिः । किञ्च षष्ठेपि ऊनविंशाध्याये पूजाविधिकथनान्ते 'उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः । अद्यादात्मविशुद्ध्यर्थं सर्वकामसमृद्धय' इति विकल्पाभावेन 'दद्याद्भुञ्जीत

वा स्वय' मित्यत्रापि यदा एकादश्यादिनियमस्तदा एकादशीव्रतस्य नित्यत्वात्परित्यागासम्भवाद्रोगादिग्रस्तत्वाद्वा तन्निवेदितं भक्तेभ्यो दद्यात्स्वयं चोपोष्य तिष्ठेत्।

ननु रोगादिग्रस्तोऽन्नमर्हितं भवतीति न भुङ्क्ते, एकादशीव्रती तु रागतः प्राप्तमन्नभोजननिषेधवचनादेकादशीव्रतकरणफलश्रवणाच्च न भुङ्क्ते। वैष्णवस्तु 'सिक्थे सिक्थेऽश्वमेधस्य फलं प्राप्नोति मानव' इति ज्ञातप्रसादमाहात्म्यः कथमेकादशीदिने भगवन्निवेदितमन्नं परित्यजेदितिचेन्न। एकादशीव्रतकरणे भगवत्प्रसादत्यागे प्रत्यवायाभावात्। यद्यपि प्रसादस्यान्नत्वाभावात् 'यानि कानि च पापानि ब्रह्महत्यासमानि च। अन्नमाश्रित्य तिष्ठन्ति सम्प्राप्ते हरिवासरे' इति वचनात् प्रसादभक्षणेपि न दोषः तथापि 'सिक्थे सिक्थेऽश्वमेधस्य फलं प्राप्नोति मानवः' इति प्रसादमाहात्म्यश्लोके सिक्थत्वोपपादनादन्नत्वमपि। नच सिक्थपदोपादानात् 'भक्तमन्धोऽन्नमोदनोऽस्त्री' त्यमराचौदनवृत्तिरेवान्नपदमिति वाच्यम्। भुक्तिमात्रस्य निषेधात्। 'न करोति हि यो मूढ एकादश्यामुपोषणम्। स नरो नरकं याति रौरवं तमसावृत' मिति सनत्कुमारवचनात्। 'एकादशीमुपवसेन्न कदाचिदतिक्रमे'दिति काण्ववचनेन सर्वाहारनिवर्तकमुपोषणं विहितम्। एकादश्यां न भुञ्जीत कदाचिदपि मानव' इति सर्वविधभोजनं निषेधत्येव विष्णुस्मृतिः। 'परमापदमापन्ने हर्षे वा समुपस्थिते। सूतके मृतके वापि न त्याज्यं द्वादशीव्रत'मिति श्रवणात्कथञ्चिदपि न त्याज्यम्। स्कन्दपुराणेपि 'मातृहा पितृहा चैव भ्रातृहा गुरुहा तथा। एकादश्यां तु यो भुङ्क्ते पक्षयोरुभयोरपि'। तथा 'वरं स्वमातृगमनं वरं गोमांसभक्षणम्। वरं हत्या सुरापानं नैकादश्यां तु भोजन' मित्याद्यकरणप्रत्यवायविधायकवाक्यैरेकादश्या नित्यत्वप्रतिपादनान्न तद्व्रतपरित्यागः। यत्तु 'सिक्थे सिक्थेऽश्वमेधस्ये'ति वचनेन प्रमादभक्षणे फलश्रवणाद्वैष्णवेतरेणैकादशीव्रतं कार्यमिति, तन्मन्दम्। वैष्णवावैष्णवभेदेनारुणोदयसूर्योदयवेधनिषेधस्वाश्रयमत्वाद्वैष्णवैरवश्यं कार्यमेकादशीव्रतम् 'दशमीशेषसंयुक्तो यदि स्यादरुणोदयः। वैष्णवैर्नतु कर्तव्यं तद्दिनैकादशीव्रत'मिति। तथा 'परमापदमापन्नो हर्षे वा समुपस्थिते। नैकादशी त्यजेद्विद्वान्यस्य दीक्षास्ति वैष्णवी'इति। नचोभाभ्यां भगवन्निवेदितान्नपरित्यागपूर्वं भगवद्व्रतमुपोषणीयम्। ननु 'अनर्चयित्वा गोविन्द' मित्यनेनानर्चने प्रत्यवायश्रवणात् निवेदितभक्षणस्य तदङ्गत्वात्साङ्गस्य वैदिककर्मणः फलावश्यंभावनियमान्निवेदनस्यावश्यंभावित्वात्तद्भक्षणे कृतावज्ञस्य न मोक्षादिरिति चेन्न। 'यजतिषु ये यजामहे नानुयाजे'ष्वित्यत्र पर्युदासविधिनानुयाजव्यतिरिक्तयागेष्विवात्राप्येकादशीव्यतिरिक्तान्यदिनेषु भगवन्निवेदितान्नभक्षणविधिः प्रतिसिक्थाश्वमेधफलदस्तदतिरेकफलदश्च भवति।

असमर्थस्य का गतिरितिचेच्छृणु। 'नक्तं हविष्यान्नमनोदनं वा फलं तिलाः क्षीरमथाम्बु चाज्यम्। यत्पञ्चगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं त्वि'त्यनेनापि प्रकारेणैकादशीव्रतापरित्याग उक्तः। वैष्णवस्य तु विशेषः यद्द्रव्यस्यार्थमुपकल्पितं तन्निवेदितमेवाद्यात्। 'अनि-

वेद्य न भुञ्जीत यदाहाराय कल्पित' मिति वचनात् । न च भगवन्निवेदितस्य परस्वत्वात् स्वम त्ताभावाच्च कथमन्येभ्योपि दद्यात् स्वय वा भुञ्जीतेति वाच्यम् । भक्ताय दद्यादित्यत्र प्रतिप त्तिरेव न दानम् । तथाच भक्तत्वाविशेषात्स्वयमपि ग्राह्यम् । यथा यागाद्युद्देशे त्यक्तपुरोडाश स्यापि 'उत्तरार्धात्स्विष्टकृतमवद्यति यजमानपञ्चमा पुरोडाश भक्षयन्ती'ति प्रतिपत्तिस्तथात्रापि वचनादेव तद्भक्तेभ्यस्तत्प्रतिपत्ति स्वयमपि भुञ्जीत अन्यथा भक्तेभ्योपि न प्रतिपादयेत् । दाने तु नैवम् , तस्य स्वस्वत्वध्वसेन परस्वत्वापादनरूपत्वात् , एव पादोदकेऽपि । किञ्च गीतासु 'इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविता । तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव स' इत्यत्र क्त्वाप्रत्ययस्य समानकर्तृकत्वेन क्त्वासमभिव्याहृतनञ सामानाधिकरण्येनान्वयाद्बाधक विना देवेभ्योपि दत्तमपि भोक्तव्यम् । श्रीविष्णुतत्त्वेऽन्तिमे पटले 'शेषभुक्तिं प्रशसन्ति मुनयस्तत्त्वदर्शिन । युवान खलु वाञ्छन्ति ताम्बूल तरणीमुखादि'ति तैर्दत्तानित्यत्र स्वय निवेदितस्य स्वभोग्यत्वनिषेधस्तु न श्रूयते प्रत्युतानिवेदितभोजने निन्दा । ब्रह्माण्डपुराणेपि 'पत्र पुष्प फल तोयमन्नपानाद्यमौषधम् । अनिवेद्य न भुञ्जीत यदाहाराय कल्पितम् । अनिवेद्य प्रभुञ्जान प्रायश्चित्ती भवेन्नर' इति । यत्स्वाहारार्थ सम्पादित तत्स्वयमनिवेद्य भुक्त चेद्दोषमाप्नोति । कृतनिवेदितभोजनस्तु फलमाप्नोति 'सिक्थे सिक्थेऽश्वमेधस्य फल प्राप्नोति मानव' इति वचनात् । 'अम्बरीष नव वस्त्र फलमन्नरसादिकम् । कृत्वा कृष्णोपभोग्य हि सदा सेव्य हि वैष्णवै' रिति ब्रह्माण्डवचनात् सर्व समर्प्यैव ग्राह्यम् । 'असमर्पितवस्तूना तस्माद्वर्जनमाचरे' दिति श्रीमदा चार्यचरणैरुक्तम् । किञ्च वैष्णवस्य भगवद्दासत्वात् तस्य च भगवत्सवैव धर्मस्तमकृत्वा यो भुङ्क्ते तस्य श्वानविष्ठासमभोजनप्रतिपादनात् । तदुक्तम् ' अनर्चयित्वा गोविन्द यैर्भुक्त धर्म वर्जितै । श्वानविष्ठासम चान्न नीर च सुरया सम ' मिति कौर्मे विधानात् सर्वथा हरिसेवन मकृत्वा न भोक्तव्यम् । यो हि सति सामर्थ्ये भृत्यादिद्वारा निर्वाह्य स्वयमकृत्वा कारयित्वा वैष्णवानसम्पूज्य प्रसादादिभिरसन्तोष्य केवल जिह्वालोलुप सन् भुङ्क्ते चेत्तदा दोषेण महापातकीभूत्वा पतत्येव । ननु 'त्वयोपभुक्तस्रग्गन्धे' त्यनेनेन्द्रियलाल्येनापि भगवन्मायाजय उक्तस्तत्कथमिति चेन्न । महदधिकारिणो महापुरुषस्य वचने दासपददानात् । तच्च दास्य विना न घटते । जिह्वालोलुपस्य दासत्वाभावात् ।

यत्तु सेवनमकृत्वा भोजने दोषश्रवणात्सेवन विधायासमर्पितभोजने न दोष इति । तदु- च्छम् । ' असमर्पित तथा विष्णो श्वमाससदृश भवेत् । अन्न विष्ठासम ज्ञेय नीर च सुरया सम'मिति निषिद्धमसमर्पितभोजनम् । ' निवेदित तु भक्ताय दद्याद् भुञ्जीत वा स्वय'मित्यष्टमस्क न्धवाक्यात् दानभोजनविधानात् । ' उद्वास्य देव स्वे धाम्नि तन्निवेदितमग्रत । अद्यादात्मविशु द्ध्यर्थ मि'तिषष्ठस्कन्धवचनेन स्वात्मविशुद्धिसम्पादकभोजनविधानात् । ' ततस्तु भगवद्भक्तान् दीक्षितान् पञ्चरात्रिण । समभ्यर्च्य विधानेन गन्धपुष्पादिभि क्रमात् । तेभ्यो दद्याच्च नैवेद्य

मायां जयेमही'ति परस्मिन्भूरिभोगः सेवाफलोक्तः यथाधिकारमित्यर्थः । गूढाभिमन्धिना पक्षान्तरमुच्यते । अथवा 'इन्दिराया नलिनीमन्दिराया वल्लभो वासुदेवो देवगीतो दिविजानन्ददायी देवदेवो यतनो वैभवेन । सा लक्ष्मीरमिता नो बभूव सन्ततं भूरिभोग'-मितिश्रुतेरयमभिप्रायः । देवगीतः देवदेवः नलिनीमन्दिराया इन्दिरायाः सम्बन्धी वासुदेवः वैभवेन यतनः सन्ततं भूरिभोगं नः दिविजानन्ददायी वल्लभः सा लक्ष्मीरमिता यया स्यात्तया बभूवेति सम्बन्धः। नलिनीनामेव मन्दिरं यस्याः सा नलिनीमन्दिरा तस्या नलिनीमन्दिरायाः । नलिनीति स्त्रीलिङ्गप्रयोगेण पुरुषान्तरसंचाराभावः सूचितः । इन्दिराया लक्ष्म्याः । किञ्च नलिन्यः पद्मिनीजातीयाः स्त्रियो मन्दिरे यस्याः सा नलि-

---

मधुपर्कपुरःसर'मित्यादिक्रमुक्त्वा प्रायश्चित्तप्रकरणे ह्युक्तम् ' दत्तं भागवतैः श्रेष्ठैर्विष्णवे प्रभविष्णवे । तत्पवित्रं पवित्राणां पावनानां च पावनम् । दातव्यं च द्विजातीनां भक्तानां पावनाय च ' । तथा ' ब्राह्मणैः क्षत्रियैर्वैश्यैर्वैष्णवैर्भक्तिसंयुतैः । भोज्यं निवेदित'मित्यादि नारदीयसमासमाराधनाध्यायवचनाच्च सभक्तिकैर्भगवमर्त्ववर्णकर्तृकनिवेदितभोजनस्य तद्भक्तदानस्य चोक्तत्वात् । तथा तत्रैव ' स्वयं वापि तदश्नीयात्सर्वपापविशुद्धये । तस्य संस्पर्शनात्पानाद्भक्षणाद्धारणात्सदा । शुचिर्भवति विप्रेन्द्र सर्वकर्मसु सम्मत ' इति वचनात् ' विष्णोर्निवेदितं शुद्धं पावनानां च पावनम् । प्रायणं दुर्लभं भोज्यं न त्याज्यं स्यात्कदाचन । भुञ्जानानां समेवन्ते त्यजतां परिहीयत ' इति पाद्मे भगवत्परिचर्यापादकद्वादशाध्यायोक्तविधिकरणनिषेधाकरणप्राविनष्टसुखदुःखप्रनिपादकत्वश्रवणात् भगवन्सेवोत्तरं निवेदितान्नमेव भोक्तव्यं । तथा विधिश्रवणात्, 'अनिवेद्य न भुञ्जीत यदाहाराय कल्पित'मिति ब्रह्माण्डवचनात्, 'अनिवेद्य प्रभुञ्जानः प्रायश्चित्ती भवेत् द्विज' इति वचनाच्च देवतान्तरनिवेदितानि परित्यज्य भगवन्निवेदितमेव सर्वदा भोक्तव्यमिति सर्वं रमणीयम् ।

अस्मन्मते तु ' दत्तापहारवचनं तथाच सकलं हरेः । न ग्राह्यमिति वाक्यं हि भिन्नमार्गपरं मत'मित्युक्तं श्रीमदाचार्यचरणैः । अत्र ' क्रीडाभाण्डमिदं विश्वं ', ' क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियः पर ईश कुर्यु'रिति श्रीभागवतवचोभ्यां सर्वस्मिन्पदार्थमात्रे देहादौ वा भगवत्सत्ताया विद्यमानत्वात् स्वसत्ताया अभावात् । अत एव परस्वत्वोत्पादनमपि न सम्भवति । स्वसत्ताध्वंसपूर्वकं परस्वत्वोत्पादनस्य दानलक्षणत्वात् भगवत एव पदार्थस्य भगवते समर्पणमिति नात्र दानमिति दत्तापहारदोषो नास्त्येवेति । एतदेव नवरत्नप्रकाशे श्रीमत्प्रभुचरणैरवादि ' दाने हि स्वत्वविनियोगो न तु निवेदन' इति । एवं च दत्तापहारवचनं भिन्नमार्गपरमित्यर्थः । इदं च सिद्धान्तरहस्यटीकायां निरूपितं बालकृष्णभट्टैरित्यलम् ।

सूचित इति । अत एव श्रीमत्प्रभुचरणैः स्त्रीभावपूर्वकं श्रीमत्स्वामिन्यनुचरीत्वं प्रार्थितं स्वामिनीस्तोत्रे । अत एव च 'तत्सारभूतरामत्रीभावपूरितविग्रह' इति श्रीमदाचार्याणां नाम । एतादृशो भावः कार्य इत्यपि सूचितम् । पद्मिनीजातीया इति । पद्मिन्या लक्षणं तु 'सम्पूर्ण-

नीमन्दिरा तस्या नलिनीमन्दिराया इन्दिरायाः परमैश्वर्यं प्राप्ताया राधायाः । नामैकदेशे नामग्रहणमिति न्यायादत्र नामैकदेशे नामग्रहणं सत्या भामेत्यादिवत् । 'विनापि प्रत्ययं पूर्वोत्तरपदलोप' इत्यनुशासनात् । तेनेन्दिराशब्देन परमैश्वर्ययुक्ता राधा ग्राह्या । इन्दिरायाः सम्बन्धी वासुदेवः । यथा किरातार्जुनीये 'तवाभिधानाद्व्यथते नताननः' इत्यस्य व्याख्यायां तशब्देन तक्षकपरत्वं वशब्देन वासुकिपरत्वं च व्याख्यातम् , तथेन्दिरेत्यत्र राशब्दोपि राधावाचको ज्ञेयः ।

न्दुमुखी कुरङ्गनयना पीनस्तनी दक्षिणा मृद्वङ्गी विकचारविन्दसुरभिः श्यामाथ गौरद्युतिः । अल्पाहाररता विलासचतुरा हंसस्वना गायिनी लज्जालुर्गुरुदेवपूजनरता स्यान्नायिका पद्मिनी'ति पञ्चसायके । परमैश्वर्यं प्राप्ताया इति । यद्यपि परमैश्वर्यं सिद्धमेव तस्यास्तथापि मानादिदशायां लीलास्यपुरुषोत्तमकृष्णपादपतनेन महदैश्वर्यं प्राप्तमित्यभिप्रायः । राधाया इति । 'देवी कृष्णमयी प्रोक्ता राधिका परदेवता । सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनी परे'ति बृहद्गौतमीये । 'राधया माधवो देवो माधवस्य च राधिका । विभ्राजेते जनेष्वि'ति ऋक्परिशिष्टे । 'रुक्मिणी द्वारवत्यां तु राधा वृन्दावने वने' इति मात्स्ये । 'स एकाकी न रमते स द्वितीयमैच्छ'दिति श्रुतौ एकाकिनः पूर्णपुरुषोत्तमस्य रमणासम्भवात्तया रिरंसया स्ववामांगाच्छ्रीराधां प्रादुर्भावितवान् । तथा च ब्रह्मवैवर्ते प्रकृतिखण्डे षट्चत्वारिंशदध्याये 'पुरा वृन्दावने रम्ये गोलोके रासमण्डले । शतशृङ्गैकदेशे च मल्लिकामालतीवने । रत्नसिंहासने रम्ये तस्थौ तत्र जगत्पतिः । स्वेच्छया चैव भगवान् बभूव रमणोत्सुकः । एतस्मिन्नन्तरे दुर्गे द्विधारूपो बभूव सः । दक्षिणाङ्गश्च श्रीकृष्णो वामाङ्गश्चैव राधिका । बभूव रमणी रम्या रासे सा रमणोत्सुका । अमूल्यरत्नाभरणा रत्नसिंहासनस्थिते'त्यादिना स्वरूपं निरूप्याग्रे 'दृष्ट्वा कान्तां जगत्कान्तो बभूव रमणोत्सुकः । दृष्ट्वा सा रसिकं कान्तं सा दधार हरेः पुरः । तेन राधा समाख्याता पुराविद्भिर्महेश्वरि । राधा भजति श्रीकृष्णं स च तां च परस्परम् । उभयोः सर्वसाम्यं च सदा सन्तो वदन्ति चे' ति । 'देवश्चैकः क्रीडनार्थं द्विधाभू'दिति श्रीराधातापिन्यां च । मृत्युंजयतन्त्रे 'ध्यायेत्तत्र महादेवीं स्वयमेव तथाविधः । रक्तपद्मनिभां बालां बालार्ककिरणोज्ज्वलाम् । पीतवस्त्रपरीधानां वंशयुक्तकराम्बुजाम् । कौस्तुभोद्दीप्तहृदयां वनमालाविभूषिताम् । श्रीमत्कृष्णाङ्कपर्यङ्कनिलयां परमेश्वरीम् । सर्वलक्ष्मीमयीं देवीं परमानन्दनन्दिताम् । रासोत्सवप्रियां राधां कृष्णानन्दस्वरूपिणीम् । भजेच्चिद्घनाकारां पूर्णानन्दमहोदधि'मिति । अत्र स्वयमेव तथाविधः सखीभाववान् । एतेनान्यभावनो ध्यानादिर्नविकार इति ध्वन्यते । श्रीमत्स्वामिनीप्रतिपादकानि वाक्यानि तन्त्रपुराणस्थानि विस्तरभयान्नोद्ध्रियन्ते । अत्र राशब्देन राधाग्रहणम् । इन्दिराशब्दस्य परमैश्वर्यं प्राप्ताया इत्यर्थः । 'इदि परमैश्वर्ये' इति धातोः 'सर्वधातुभ्य इन्नि'त्युणादिसूत्रेणेन्प्रत्ययः । न्यायादिति । राधेतिनाम्न एकदेशो राशब्द इन्दिराशब्देस्ति तत्र राधेतिनामग्रहणमिति भावः । विनापीति । समुदायशक्तिमद्भाकेऽवयवानामपि शक्तिग्रहादवयवनोपि तद्बोध इति भावः । राशब्दोऽपीति । राति

नच वासुदेवपदं व्यूहपरमिति वाच्यम् । 'वासुदेवकलानन्त' इत्यस्य व्याख्याने सुबोधिन्यां 'सात्विकेषु तु कल्पेषु यः शेते सलिले हरिः । वासुदेवः स विज्ञेयो यस्यांशोऽनन्त उच्यते' । किञ्च 'निशीथे तम उद्भूत' इत्यस्य व्याख्यायां सुबोधिन्यां देवक्यां प्रद्युम्नो नन्दगृहे वासुदेव इति वाक्यपर्यालोचनेन वासुदेवपदं पुरुषोत्तमपरम् । पुरुषोत्तमपदं विहाय वासुदेवपदकथनस्यायमाशयः । यथा क्षीराब्धिशायी वासुदेवश्चतुर्मुखोत्पादकः सृष्टिकर्ता, तथात्र वासुदेवपदेन पुरुषोत्तमस्तस्यैव रूपान्तरं वल्लभः पुष्टिमार्गोत्पादकः पुष्टिसृष्टिकर्ता नन्दगृहे वासुदेव इति कथनेनान्तर्व्यूहो बहिः पुरुषोत्तमः । अन्तर्वासुदेवव्यूहकथनेन सर्वेषां देवानां मोक्षदानार्थमित्यर्थः । इन्दिराया इति भक्तिसाहित्येन च रसात्मकपुष्टिसृष्ट्युत्पादकानन्दमात्रकरपादमुखोदरादिर्नन्दनन्दनः श्रीकृष्णोऽत्र वासुदेवपदेनोच्यते । एतादृशो यो वासुदेवः वै इति निश्चयेन भवे संसारे । अथवा भवति साधनमस्मिन्निति भव इति व्युत्पत्त्या भवे भूलोके स वल्लभो बभूव श्रीवल्लभस्वरूपेण प्रादुर्बभूव । कथंभूतो वासुदेवः । देवगीतः देवैर्गीतः । 'ब्रह्मा तदुपधार्याथ सह देवैस्तया सह । जगाम सत्रि-

ददाति भगवत्सुखं भक्तेभ्य इति रा । 'क्विप् चे'ति क्विप् । दधाति भक्तेषु श्रीकृष्णरसमिति धा सा चासाविति कर्मधारयः । 'रा राज्यदानवचनो धा च निर्वाणवाचकः । यतो मुक्तिं च मुक्तिं च सा राधा परिकीर्तिते'ति ब्रह्मवैवर्तप्रकृतिखण्डपञ्चत्वारिंशदध्यायवाक्यात् भगवत्सेवोपयोग्यलौकिकदेहादिराज्यदात्री दधाति निर्वाणं निर्गुणमुक्तिम् 'निर्गुणा मुक्तिरस्माद्धी'ति वाक्यात् । एवंचेन्दिरापदे राशब्देनेन्दिराशब्देन च कर्मधारयः । एवं च राशब्देन राधा ग्राह्येति भावः ।

नन्दगृहे वासुदेव इति । 'नन्दपत्न्यां यशोदायां मिथुनं समजायत । गोविन्दाख्यः पुमान् कन्या त्वम्बिका मथुरां गता । वसुदेवसमानीतो वासुदेवोऽखिलात्मनि । लीनो नन्दसुते रामन् तडित्सौदामिनी यथे'तिवाक्यात् । यथेति दृष्टान्तदार्ष्टान्तिकयोः समत्वमपेक्षितं, अतः श्रीवल्लभाचार्याणामपि भगवल्लीलारूपक्षीराब्धिशायित्वम् । पुष्टिमार्गोत्पादक इति । अत्र पुष्टिमार्गस्य चतुर्मुखसाम्यम् । नन्दनन्दन इति । 'नन्दस्त्वात्मज उत्पन्ने जाताह्लादो महामना' इति वचने श्रीशुकदेवचरणैरपि आत्मजपदमुपात्तमितिमानः । अन्यथा 'नन्दस्तमात्मजं मत्वे'ति वदेत् । गीत इति । स्तुत इत्यर्थः । श्रुतिरपि स्तोतारः श्रीमदाचार्यान् प्रार्थयन्तीति बोधयति । तथाहि 'नवानो अग्न आभर स्तोतृभ्यः सुक्षितीरिषः । ते स्याम य आनृचुस्त्वा दूतासो दमेदम इयं स्तोतृभ्य आभरे'ति । अर्थस्तु–हे अग्ने श्रीवल्लभाचार्य, अस्मभ्यं स्तोतृभ्यः नवा अभिनवा भगवल्लीलागुणकथाः 'यदनूतनयमीशस्य शृण्वन्नपि कथां मुहुः', 'स्वादु स्वादु पदे पदे' इति श्रीभागवतात् नूतनाः कथाः आभर आहर प्रकाशयेत्यर्थः । 'हृग्रहोर्भश्छन्दसी'ति हस्य भः । किंभूताः । इषः इच्छाविषयीभूताः । यद्वा इच्छाविशिष्टस्य सुक्षितीः कल्याणभूमीः कल्याण-

नयनस्तीरं क्षीरपयोनिधेः । तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् । पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः' । अत एव देवदेवः देवानां शिवब्रह्मादीनामपि देवः । कथंभूतो वल्लभः। नो यतनः नः अस्माकं संबन्धी दैविजीवानामुद्धारार्थं यतनः प्रयत्नयुक्तः । 'यती प्रयत्ने' नन्द्यादेराकृतिगणत्वाल्ल्युरनादेशः । पुनः कथंभूतो वल्लभः । सन्ततं भूरिभोग दिविमानन्ददायी सन्ततं निरन्तरं भूरिभोगोऽस्येति भूरिभोगः । मत्वर्थीयोऽच् । तं भूरिभोगं जीवं सन्ततं निरन्तरं भूरिभोगं सुखदुःखयुक्तं जीवमित्यर्थः । 'यथा सुदीप्तात्पावकात्' इति मुण्डकश्रुतेः । 'पराभिध्यानात्तिरोहितं ततो ह्यस्य विपर्ययौ' इति व्याससूत्रादपि यदारभ्य भगवतः सकाशाद्भिन्ना जाता जीवास्तदारभ्य निरन्तरं भूरिभोगो बहुजन्ममरणादिप्रवाहरूपसुखदुःखादिरूपो यस्य तादृशमानन्दरहितं जीवं 'आनन्दांशतिरो·

निदानभूता । याभि श्रुताभि सर्वोपद्रिपद्रूपनिवृत्तिपूर्वक भगवत्स्नेहादि जायते । यथान्तरङ्गभक्तास्तथा वयमपि भगवत्सेवका भवेम इति भावेनाहु । ये देवास्त्वा पुरा आनृचु स्तुतवन्त त एव वय स्याम । अन्तरङ्गभक्ता वयमपि भवेम भगवत्कृपयेति भाव । दमे दमे गृहे त्वा दूतास त्वदाज्ञाकारिण इव स्तोतृभ्य आभरेति पुनर्वचनमादरार्थमित्यर्थ । 'अग्नि पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुते'तिश्रुते सदा स्तुत । चरित्रचिन्तामणौ श्रीमदाचार्यप्रादुर्भावार्थ श्रीमत्पूर्ण पुरुषोत्तमं स्तुवन्त इत्युक्त तदेव श्रीभागवतपद्येनाहु. ब्रह्मेत्यादि । अत्र पुरुषसूक्तपददानेन भगवत श्रीमदाचार्यस्य वा स्तुतिर्वेदेन कर्तव्येति सूचितम् । सूक्तेनैव स्तोत्रकरणमुचितमित्यत्रैव सुबोधिन्यामुक्त श्रीमदाचार्यै ।

सर्वेषा देवाना कार्यसाधकत्वादाज्ञाकारकत्वाच्च सर्वेषा देव इत्याहु अत एवेति । देव इति। यद्वा। दैवै श्रीमद्व्रजभक्तै सह दीव्यति क्रीडतीति देव । प्रयत्नयुक्त इति । 'दैवोद्धारप्रयत्नात्मे'ति श्रीमदाचार्याणा नामेति भाव । व्याससूत्रादिति । अस्य जीवस्यैश्वर्यादि तिरोहित तत्र हेतु पराभिध्यानात् परस्य भगवतोऽभिध्यान स्वस्य जीवस्य च सर्वतो भोगेच्छा तस्माद्धेतोरैश्वर्यादिसद्भावे वैचित्र्याभावाद्भोगो न भविष्यतीति जीवे तिरोभाव कृतवान् । स्वधर्माणा तत एव तिरोभावाद्बन्धो भगवद्धर्मविपरीतधर्मत्व चेत्यर्थ । ऐश्वर्यतिरोभावाद्दीनत्व पराधीनत्व च। वीर्यतिरोभावात्सर्वदु खसहनम् । यशस्तिरोभावात्सर्वहीनत्वम्। श्रीतिरोभावाज्जन्मादिसर्वापद्विषयत्वम् । ज्ञानतिरोभावाद्देहाद्यहबुद्धि । सर्वविपरीतज्ञानमपस्मारसहितस्यैव । वैराग्यतिरोभावाद्विषयासक्ति । आनन्दाशस्तु पूर्वमेव तिरोहितो येन जीवभाव इति विद्वन्मण्डने श्रीप्रभुचरणैरुक्तम् । एवचानन्दाशतिरोभावपूर्वकत्वे सति ऐश्वर्यादिषट्कतिरोहितत्व जीवत्वमिति लक्षण फलितम् । एतदर्थसाधक तत्त्वदीपस्यवाक्यमुपन्यस्यन्ति आनन्दाशतिरोभावादिति । एतत्तिरोधानात्त जीवत्व भासते तेनानन्दांशेनाविर्भूतेन युक्त सद्ब्रह्मवदवभासत इत्यर्थ । अंशद्वयस्य विद्यमानत्वात्। सदशस्फूर्तौ प्रतिबिम्बत्व त्रितयस्फूर्तौ ब्रह्मत्वमिति निर्णय इति श्रीमदाचार्यचरणैरु·

भावात्तद्रूपेण च भासत' इति वाक्यात् आनन्दरहितं भगवद्वियोगजतापक्लेशरहितं जीवं भजनानन्ददानार्थमिदं विशेषणं दिविजानन्ददायीति । न च दिव्शब्द इन्द्रस्थितस्वर्गलोकवाचक इति वाच्यम् । तस्य क्षयिष्णुफलत्वादानन्दत्वाभावान्मात्सर्याद्यनेकदोषग्रस्तत्वाच्च । अत्रानन्ददानकथनेन स्वर्गशब्देन व्यापिवैकुण्ठो ग्राह्यः । 'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च तत्सुखं स्वःपदास्पद' मितिश्रुतेः । तेन दिविजं नित्यलीलास्थमानन्दम् । 'अलौकिकसामर्थ्यं सायुज्यं सेवोपयोगिदेहो वैकुण्ठादिषु चे' त्यादिरूपमानन्दं तद्ददातीत्यानन्ददायी । एतद्विशेषणविशिष्टः श्रीवल्लभः सा लक्ष्मीरमिता यथा स्यात्तथा प्रादुर्बभूव । सा इति वासुदेवस्वरूपे या क्षीराब्धौ लक्ष्मीः स्थिता सा वल्लभरूपे महालक्ष्मीतिनाम्ना प्रादुर्भूता तया सह रमितो यथा स्यात्तथा । अस्मिन्नाम्नि पूर्वस्वरूपबोधनार्थं सहापदम् । 'तस्मादेकाकी न रमते स द्वितीयमैच्छ' दितिश्रुत्या रमणार्थमेव रूपद्वयेन प्रादुर्भूतस्तेनानवतारदशायामपि स्वकुलोत्पादनद्वारा दैविजीवानामुद्धारार्थमित्यर्थः ।

कोऽर्थः । तापक्लेशरहितमिति । यदवधि क्षणं युगशतमिवेत्यादिवद्भगवद्विरहजनितताथायस्फूर्तिस्तदवधि भगवत्प्राप्तिर्नेति तत्वम् ।

प्रादुर्भूतेति । अस्याः प्रतिपादकं मन्त्रद्वयमुदाह्रियते । तथाहि 'हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवहे'त्येकः । अस्यार्थः । यदा श्रीमदाचार्याः पाण्डुरङ्गपुरे श्रीविठ्ठलदर्शनार्थं गतास्तदा तान् प्रति श्रीविठ्ठलप्रभुभिराज्ञप्तं गार्हस्थ्यं स्वीकुरुत । भवतां गृहेऽहं भविनेति श्रीपाण्डुरङ्गविठ्ठलप्रतिपादके पाद्मपुराणस्थगीतामाहात्म्ये षष्ठाध्यायमाहात्म्यप्रतिपादने तीर्थयात्राप्रसङ्गे 'ततो निवृत्य आयातोऽपश्यद्भीमरथीतटे । द्विभुजं विठ्ठलं विष्णुं भुक्तिमुक्तिप्रदायक' मितिवाक्यं श्रीमदाचार्यान् प्रत्याज्ञारूपं वृत्तं वदतीयं श्रुतिः । हे जातवेदः हे अग्ने, श्रीवल्लभाचार्य, हिरण्यवर्णां हिरण्यस्य सुवर्णस्य वर्ण इव वर्णो यस्याः सा हिरण्यवर्णा ताम् । पुनः किंभूताम् । हरिणीं मनोहारिणीमित्यर्थः । यद्वा हरिं नयति प्रापयति केलिगृहमिति हरिणी ताम् । गौरादित्वान् ङीप् । हरिणीमित्यस्य हरितवर्णपरत्वेन व्याख्यानं न सम्भवति । हिरण्यवर्णां हरिणीमिति विशेषणविरोधात् । अलङ्कारादिकमाहुः सुवर्णरजतस्रजां सुवर्णरजतस्य पुष्पाणि तेषां स्रक् माला यस्याः सा ताम् । स्रक्पदोपादानेन पुष्पाणीत्यवगम्यते 'आपं चे' त्यापू । सुवर्णपदोपादानं सुवर्णबाहुल्यात् । यद्वा सुवर्णरजतमिव पुष्पाणि तेषां स्रक् यस्याः सा ताम् । चन्द्रां चन्द्रवत्प्रकाशां हिरण्मयीम् । यकारलोपश्छान्दसः । हिरण्यभूषणबाहुल्याद्धिरण्मयीमित्यर्थः । यथा 'छुरन्मरीगन्धदनालिप्तशाकम्भनिभनिभ्यानन्मपटुसाकुम्' मित्यत्र मरीचबाहुल्यात्मरीचोपादानम् । यद्वा हिरण्मयीं आनन्दरूपाम् । 'अन्तस्तद्धर्मोपदेशादि'ति सूत्रे हिरण्यशब्द आनन्दवाची । लोकेपि तस्य आनन्दमा-

एवं संयोगात्मकधर्मिस्वरूपं निरूप्यातः परं विप्रयोगात्मकं धर्मिस्वरूपं निरूपयति बृहते करोमीति । व्यापकरूपधारिणे श्रीवल्लभाय नमः करोमि । ननु धर्मिस्वरूपस्य द्वैविध्यप्रतिपादने किं प्रमाणमितिचेन्न । प्रमाणस्य सद्भावात् । तथाहि 'रसो वै सः । रसंश्चेवायं लब्ध्वाऽऽनन्दीभवति' इति श्रुत्या रसरूपेण पुरुषोत्तमप्रादुर्भावात् श्रीमदाचार्याणां रसात्मकपुरुषोत्तमास्यस्वरूपत्वाच्च रसस्य संयोगविप्रयोगात्मकत्वाद्धर्मिणो द्वैविध्यमित्यर्थः । तत्र विप्रयोगात्मकधर्मिस्वरूपं यथा पुरुषोत्तमस्य भक्तानां हृदये 'तन्मनस्का-

धकत्वादित्युक्तं श्रीमदाचार्यचरणैर्भाष्ये । तेन परब्रह्मरूपत्वमिति फलितम् । पुनः किंभूताम् । लक्ष्मीं लक्षणवतीम् । सामुद्रशास्त्रोक्तलक्षणवतीमित्यर्थः । 'लक्ष्मीर्लाभाल्लक्षणाद्वे'ति निरुक्तात् लक्ष्मीपदे वर्णयोर्लोपः । तेन महालक्ष्मीनाम्नीं मे मह्यं मदाज्ञापरिपालनार्थम् आवह अङ्गीकुरु पत्नीत्वेन वृणु । अहं तव पुत्ररूपेण प्रादुर्भवेयम् । अतो मम जन्म न लौकिकीषु योग्योऽलौकिकत्वात् । यद्वा मे मयाऽऽज्ञप्तोसीति शेषः । स्पष्टं कुतो नोक्तम् । रहस्यत्वात् । 'परोक्षप्रिया इव हि देवा' इति श्रुतेः ।

तथाच चरित्रचिन्तामणौ 'श्रीपाण्डुरपुरे द्रष्टुं विट्ठलं विष्णुमादरात् । तेनाज्ञप्तं परिणयं त्वत्पत्न्यां भवितास्म्यहम् । काश्यपममुकगोत्रस्य कन्या विप्रस्य वर्तते । मयेरितः सोपि तुभ्यं पृष्टगोत्रः प्रदास्यति । महालक्ष्मीतिनाम्नीं त्वां कन्यां सपदि वाडवः । इतीरिताश्च तस्याज्ञाद्वयभङ्गानुतापिताः । शीघ्रमेवागतास्तत्र तथैव तदकुर्वते'त्येकः । यथा श्रीमदाचार्यशरणेन श्रीमत्पुरुषोत्तमप्राप्तिस्तथा श्रीमहालक्ष्मीशरणेनेत्यन्यमन्त्रेण तच्छरणं गन्तव्यमिति प्रतिपाद्यते—'चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि' । अस्यार्थः । अत्राहंशब्दप्रक्षेपः प्रामादिक इति विद्यारण्यैर्भाष्ये उक्तम् । चन्द्रां चन्द्रवत्प्रकाशमानां प्रभासां प्रकृष्टा भाः कान्तिर्यस्याः सा ताम् । आपं चेत्याप् । यशसा कीर्त्या ज्वलन्तीं । यस्या उदरे साक्षात्पुष्टिपुरुषोत्तमाः श्रीविट्ठलप्रभवः प्रादुर्भूतुः । यस्याः सन्ततिपरम्परा अद्यापि जगदुद्धारार्थं विराजत इति कीर्त्या ज्वलन्तीं प्रकाशमानाम् । लोके भूलोके पूर्ववद्वर्णलोके । तेन भूलोके प्रादुर्भूतामिति शेषः । 'एकाकी न रमते स द्वितीयमैच्छ'दितिश्रुत्या रमणार्थमेकस्य द्विदलात्मकत्वेन प्रादुर्भाव इत्याह देवजुष्टामिति । देवः श्रीवल्लभः देव वैश्वानरैवेतिवाक्यात् 'विप्रं विप्रासोऽवसे देव'मिति श्रुतेश्च । जुष्टां सेविताम् । देवपदोपादानेन रसात्मकत्वं द्योतितम् । यद्वा देवः जुष्टो ययेति । उदारां भक्तेच्छादानसमर्थाम् । तेन स्वभक्तानां न किंचिदुर्लभमिति भावः । तां प्रसिद्धाम् । श्रीपूर्णपुरुषोत्तमलोके या महालक्ष्मीः तत्परामर्शार्थं तच्छन्दोपादानम् । पद्मिनीं कामशास्त्रोक्तपद्मिनीलक्षणलक्षिताम् । ईमिति निपातोऽनर्थकः निश्चयार्थो वा । एतादृशीं महालक्ष्मीं शरणं प्रपद्ये प्रपन्नोऽस्मि । अतः अलक्ष्मीर्जन्ममरणादिरूपा भगवद्विमुखत्वरूपा वा नश्यतां नाशं प्राप्नोतु । एतादृशीं त्वां स्वामिनीत्वेन वृणोमीत्यर्थः । तन्मनस्का इत्यादि । अत्र तदात्मिकेतिपदे स आत्मा यासाम् । सर्वदा कृष्णभावनैव

स्तदालापास्तद्विचेष्टास्तदात्मिकाः । तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः' । ननु विप्रयोगात्मकधर्मिस्वरूपममूर्तत्वमिव प्रतिभातीति चेन्न । आनन्दात्मककेवलविप्रयोगजन्यबहिःप्राकट्यस्यैव कार्यक्षमत्वात् । अमूर्तस्याप्रकटस्य च कार्यक्षमत्वाभावात् । तथाहि 'यावद्बहिः स्थितो वह्निः प्रकटो वा विशेन्न हि । तावदन्तः स्थितोप्येष न दारुदहनक्षमः । एवं सर्वगतो विष्णुः प्रकटश्चेन्न तद्विशेत् । तावन्न लीयते सर्वमिति कृष्णसमुद्यमः' । तत्र विप्रयोगात्मकस्य बहिः प्राकट्यं बोध्यमित्यर्थः ।

'अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यताम् । कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशाम्' । तत्र व्रजसीमन्तिनीनां क्षणमात्रमपि वियोगासहिष्णुत्वात् श्रीभगवतो मथुरागमने एतासां जीवनं कथं स्यादेतासां जीवनान्यथानुपपत्त्या विप्रयोगे प्रादुर्भावः कल्प्यते । तदेव विप्रयोगात्मकधर्मिस्वरूपं तापपूर्वकभक्त्युद्रेकदशायां भक्तान्तःकरणात् पृथक्प्रादुर्भूय भक्तानां यथायोग्यं लीलानुभवं कारयति । किञ्च, उत्तरार्धे 'पीतशेषं गदाभृत' इत्यत्र पीतशेषत्वं कथं सम्भवति । भगवतः प्रादुर्भावानन्तरं श्रीवासुदेवेन झटिति व्रजे नयनात् न स्तनपानं सम्भवति । तत्र श्रीभागवते पीतशेषत्वकथने पीतशेषत्वान्यथानुपपत्त्या देवक्याः स्तनपानं कल्प्यते । तत्र तापयुक्तस्नेहोद्रेकदशायां देवक्यामन्तःकरणाद्बहिः प्रादुर्भूय स्तनपानं करोति । एतदेव विप्रयोगात्मकं धर्मिस्वरूपमित्यर्थः ।

किञ्च । तत्र विप्रयोगात्मकधर्मिस्वरूपप्रतिपादिका श्रुतिरस्ति । तथाहि 'पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदामो अश्नुते श्रितास इद्वहन्तस्तत्समासत' । अस्या अयमर्थः । हे ब्रह्मणस्पते अक्षरस्वामिन् पुरुषोत्तम, 'प्रभुत्वेन हरेः स्फूर्तौ लोकत्वेन तदुद्भव' इति निबन्धे ते तव विततं विस्तारः । अग्रेऽतप्ततनूरिति निषेधकथनानुरोधेन ज्ञायते श्रीभगवतो मथुरागमनानन्तरं विप्रयोगेषु तादृशानुगृहीतासु गोपीषु तावद्रूपेण प्रादुर्भावो विस्तारः पवित्रं पवितो विरहवत्त्रात्रायत इति कापादिशल्य-

---

नित्ते आत्मत्वेन भगवानेव स्फुरतीति न देहादिस्मरणमित्युक्तं श्रीमदाचार्यचरणैः । अत एवास्य फलरूपत्वम् । एतदुपपादानं तु पूर्वमेव कृतम् । विस्तारस्तु टिप्पण्यादिषु प्रपञ्चितोऽस्मत्परिवृढैः । यावदित्यादि दशमस्कन्धसुबोधिनीप्रथमाध्यायवाक्यम् ।

अन्यथानुपपत्त्येति । पीनो देवदत्तो दिवा न भुङ्क्ते । अत्र पीनत्वान्यथानुपपत्त्या रात्रिभोजनकल्पनवत् ।

पवित्रमिति । श्रीमदाचार्यपरत्वेन श्रुत्यर्थस्तु पूर्वमेवोपपादितः । अक्षरस्वामिन्निति । अक्षरब्रह्मण इत्यर्थः । ब्रह्मणोऽक्षरत्वं जीवस्य क्षरत्वं तदुत्कृष्टत्वं पुरुषोत्तमत्वमिति प्रागेवोपपादितम् । तावद्रूपेणेति । यथा 'कृत्वा तावन्तमात्मानं यावतीर्गोपयोषित' इति । स्त्रीविप्रयोगात्मस्वरूपेणेति ।

निवर्तकं वा। तत्र हेतुः प्रभुः समर्थो भवान् गात्राणि भक्तानां शरीराणि विश्वतः पर्येपि अन्तर्बहिर्व्याप्नोषि । यस्मादेवं तस्मात्ता अपि वह्न्ययोगोलकन्यायेन व्याप्ताः भगवन्निष्ठा भवन्तीति तथा । एवं तत्स्तुत्वा तस्य दुर्लभत्वमाह अतप्ततनूः विरहतापरहितः । तनूरिति स्त्रीलिङ्गेनाधिदैविकस्त्रीविग्रहप्राप्तस्यैव तदधिकार इति ज्ञाप्यते । तत् विप्रयोगात्मकधर्मिस्वरूपं नाश्नुते न विशेषेण प्राप्नोति नोपभुङ्क्ते इति यावत् । ननु रासलीलास्थस्यान्तर्धाने विप्रयोगात्मकधर्मिप्रादुर्भावः कुतो नेत्यत आह । आमः अपक्वः । रासानन्तरं पक्वता 'शारीरी पञ्चमी वाच्या ततो रूपं प्रतिष्ठित' मिति हेतोः । श्रितासः अन्तःपुरुषोत्तमविशिष्टाः पक्वाः शाखाभेदेन । श्रुतास इति पाठे श्रीभागवतं श्रुतवन्तः । अथवा दुर्लभत्वबोधनाय श्रुतास इति कथनम् । वहन्तः सम्प्रापयन्तः विप्रयोगे तद्विप्रयोगात्मकधर्मिस्वरूपं समासत सम्यगुपविष्टाः । शाखाभेदेन समाशतेतिपाठे सम्यग्भुक्तवन्त इत्यर्थः ।

ननु केनचित् पवित्रं ते विततमित्यारभ्य अतप्ततनूर्न तदामो अश्नुत इति श्रुतिस्तप्तमुद्राधारणपरत्वेन व्याख्यायते । तन्न । अत्र विध्यभावात् । 'ऐन्द्र्या गार्हपत्यमुपतिष्ठत' इतिवत् विनियोजकश्रुत्यन्तराभावाच्च । तस्मात् 'सर्वे वेदा यत्पदमामनन्ती'ति श्रुतिपाठाय भगवत्परत्वेन व्याख्याने तु न काप्यनुपपत्तिः । यथा श्रीपुरुषोत्तमस्य विप्रयोगात्मकं धर्मिस्वरूपं तथा श्रीमदाचार्याणामपि विप्रयोगात्मकं धर्मिस्वरूपं श्रीमदाचार्याणां सेवकेषु श्रीदामोदरदासप्रभृतिषु संयोगात्मकधर्म्यनवतारदशायां तापयुक्तभक्त्युद्रेकसमये तेषामन्तःकरणाद्बहिः प्रादुर्भूय दर्शनं ददाति तदेव विप्रयोगात्मकं धर्मिस्वरूपम् । किञ्चाधुनिकानां तदीयानामस्मदादीनां तापयुक्तत्वं चेत्तर्हि दर्शनं ददातीत्यनुभवैकवेद्यमित्यर्थः ।

किञ्च । श्रीमदाचार्याणां निगमप्रतिपाद्यपुरुषोत्तमत्वात्तदात्मजस्यापि पुरुषोत्तमत्वम् ।

अतएव पद्मपुराणस्थपातालखण्डाधिकरणकश्रीवृन्दावनमाहात्म्ये श्रीमच्छुकनारदादिबहूनां परमर्षीणां भगवदुपासनया स्त्रीविग्रहप्राप्त्या भगवद्रमानुभव इति कथानकं श्रुतिमूलतया संगच्छते । एतादृशभावोऽवश्यं कार्यः । तथाच मृत्युञ्जयतन्त्रे श्रीमद्राधिकाध्याने 'ध्यायेत्तत्र महादेवीं स्वयमेव तथाविधः । श्रीमत्स्वामिन्यनुचरीभाववान् शारीरी'ति । अस्यार्थस्तु टिप्पण्यां निरूपितः श्रीप्रभुचरणैर्नेह तन्यते । तन्नेति । अत्र विचारादिकं न क्रियते । शङ्खचक्रधारणवादे पुरुषोत्तमचरणैःश्रीमदाचार्यचरणैर्निबन्धे चोक्तत्वाद्विस्तरभयाच्च । अनुभवैकवेद्यमिति । एतादृशानुभवस्तु श्रीमदाचार्यकृपयैव, नान्यथेति तत्त्वम् ।

एवं श्रीमदाचार्याणां निगमोदितपूर्णपुरुषोत्तमत्वमुपपाद्य तदात्मजानां श्रीविठ्ठलेशप्रभूणामपि श्रुतिप्रतिपादितपुरुषोत्तमत्वमाहुः किञ्चेत्यादि । पुरुषोत्तमत्वमिति । ब्रह्माण्डपुराणे मध्यखण्डे भगवद्ब्रह्मसंवादे युगावतारप्रसङ्गे श्रीविठ्ठलावतारस्योदितत्वात् तदेव मयोपन्यस्यते ।

'तथाहि ब्रह्मोवाच । त्वया परमकल्याण देवदेव जगत्पते । युगत्रयावताराणां कारणानि मम प्रभो । कथितानि सविस्तारं चरितानि च सर्वशः । कलौ कत्यवताराणि कथ्यतां विगलाशय । श्रोतुमिच्छामि त्वत्तोऽहं कारणानि च सर्वशः । चरितानि च सर्वत्र भूतभावन पूर्वज । श्रीभगवानुवाच । साधु पृष्टं महाप्राज्ञ श्रूयतां कथयामि ते । चत्वारो ह्यवतारा मे भविष्यन्ति कलावपि । कृष्णो बुद्धो विठ्ठलेशः कल्किर्म्लेच्छनिकृन्तनः । पूर्णः कृष्णो बुद्धश्चांशः परमानन्दविठ्ठलः । मम चांशधरः कल्की शृणु पुत्र विशेषतः ।' इति चतुरोऽवतारान्प्रतिज्ञायोद्देशक्रमेणावतारकथां जगाद श्रीभगवान् । तत्र प्रथमं 'भुवो भारावतारार्थं तत्रादौ पूर्णरूपधृक् । वसुदेवगृहे नूनं देवकीजठरोदित' इत्युक्त्वा प्रभासीयकथापर्यन्तं वर्णयित्वा 'अन्तर्धानं ततोऽहं वै सर्वलोकस्य पश्यतः । गमिष्ये लोकपालेशः स्वस्वरूपधरः स्वय' मितिपर्यन्तं श्रीकृष्णावतारं निरूप्य श्रीविठ्ठलावतारमाह 'शृणु वत्स प्रवक्ष्यामि गुह्याद्गुह्यतरं मम । घोरे कलियुगे प्राप्ते सर्वधर्मविवर्जिते । पापपुञ्जरते पुण्ये म्लेच्छधर्मरते जने । तदाहं वल्लभकुले द्विजाचाररतेऽमले । अवतीर्य परं रूपं दर्शयिष्ये मनोहरम् । पृथिव्यां भारते क्षेत्रे माथुरे मम वल्लभे । गोकुलं मत्पदं नित्यं यत्रास्ते वै मुदावहम् । कालिंदी सरितां श्रेष्ठा यत्र गोवर्धनो गिरिः । आदिमध्यावसाने वै वासो मे तत्र निश्चितम् । वर्तते विश्रुतं पूर्वं त्वया चास्ति परंतप । अपिचान्तर्हितं रूपं सर्वलोचनगोचरम् । करिष्ये विमलं सौम्य व्रजभक्तसुखावहम् । विठ्ठलेशेति विख्यातिं गमिष्ये जगतीतले । आदावहं चैकरूपो बहुरूपधरस्ततः । देशान्तरे प्रवेक्ष्यामि मद्भक्तानुग्रहाय वै । मम भक्तिविनाशाय विनाशाय च मायिनाम् । मद्भक्तसुखदानाय दुःखाय च दुरात्मनाम् । भक्तानां गुरुरूपेण यास्येऽहं सेव्यतां परम् । दारैर्गृहैः सुतैः प्राणैः प्राणादप्यधिकैर्धनैः । मत्सेवनं करिष्यन्ति सर्वभावनिवेदिनः । तेषामेवानुकम्पार्थं करिष्ये रूपमुत्तमम् । उद्धरिष्याम्यहं तत्र बहुरूपधरः प्रभुः । ते वै भागवताः सर्वे भक्तिसिद्धाः कलौ युगे । भविष्यन्ति महाभागा मानिनो वै दुरासदाः । मत्कृपासिन्धुतोयेन सेविताः खलु वर्धिताः । पुष्पितास्ते महाभागा मम भक्तिफलान्विताः । दृढप्रेममदोन्मत्ता निर्भयाः सर्वतः सदा । मयि चानन्यभावास्ते भविष्यन्ति तदानघ । त्यक्तसर्वकुलाचाराः कर्ममार्गविनिःसृताः । वेदवादविनिर्मुक्ता भक्तास्तेऽतीव मे प्रियाः । ममैव दर्शनारामा मत्कथाश्रवणे रताः । मद्ध्याननिरता नित्यं ममैव गुणवादिनः । हंसधर्मसमारूढास्ते वै भागवतोत्तमाः । प्रवेक्ष्यन्ति परं धाम कालमायातिगं च यत् । ममैव तनवस्ते तु भविष्यन्ति न संशयः । वक्तारो मम धर्माणां तथैव च प्रवर्तकाः । ये केचित्तु विशेषज्ञा मम साधर्म्यमागताः । मत्कृपालवलेशेन तत्क्षणान्मुच्यते जगत् । मम भक्तेश्च धर्माणां वक्ता कश्चन मद्वते । भक्तितत्त्वोपदेष्टा वै अहमेव तदा युगे । सर्वधर्मोज्झिते शुद्धे पाखण्डनिरते खले । विलुप्ते वेदमार्गे वै पापिष्ठे दुष्टभूमिपे । लोके लुप्तविवेके हि अविवेकपरायणे । तस्मिन्निपतितान्साधून्मम भक्तिपरायणान् । ब्राह्मणान्क्षत्रियान्वैश्यान् सच्छूद्रान् सत्स्त्रियोऽन्त्यजान् । उद्धरिष्याम्यहं ब्रह्मन् ब्रह्मरूपेण भास्वता । कृष्णनाम विशुद्धं यन्मयोक्तं परमं मनम् । कर्णे

च दक्षिणे नूनं श्रुत्वा चैव प्रजायते । नमस्यन्ति जना सर्वे यावद्वै मानवर्जिता । अर्चिष्यन्ति च मां नित्यं तावदेव न संशय । निवसिष्याम्यहं नूनं तत्कुले चाग्निभूषिते । अन्तर्धानं गमिष्यामि ततो वै चतुराननेऽति निरूपितम् । तदनन्तरं कलियुगान्तं निरूप्य कल्क्यवतारो निरूपित । तत 'चतुरो मेऽवताराश्च कर्गे साधो निरूपिता । भूयो वदामि ते ब्रह्मन् किमन्यच्छ्रोतुमिच्छसी'ति सर्वाध्यायसंग्रह । अत्र परमानन्दविठ्ठल इत्युक्त्याऽगणितानन्दाक्षरव्यूहव्यावृत्ति । अत एव पुरुषोत्तमत्वम् । एतेनाशावतारादिनिवृत्ति ।

श्रीकृष्णश्रीविठ्ठलयो पूर्णपरमानन्दत्वमन्ययोरशक्यत्वमुदितम् । 'यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तम । अतोऽस्मि लोके वेदे च प्रथित पुरुषोत्तम' इति गीतोक्तेरितिभाव । तथाच श्रुति श्रीविठ्ठलप्रतिपादिका 'सुदेवोसि वरुण यस्य ते सप्त सिन्धव । अनुक्षरन्ति काकुद सूर्म्यं सुषिरामिव'ति । अर्थस्तु श्रीविठ्ठलशब्दस्य वरुणशब्दस्य चैकार्थत्वाद्वरुणशब्देनात्र श्रीविठ्ठलो गृह्यते । यथा श्रीविठ्ठलपदनिरुक्ति 'विद ज्ञाने'भावे क्विप् । विदा ज्ञानेन ठान् शून्यान् सर्वसाधनहीनान् जीवान् लात्यनुगृह्णाति स्वदासत्वेन वृणुत इति विठ्ठल । भगवत्सम्बन्धिज्ञानेन च नाममन्त्रब्रह्मसम्बन्धादिसकलसिद्धान्तोपदेशेन सकलसाधनहीनान् जीवान् स्वदासत्वेनाङ्गीकरोति य स विठ्ठल इति समुदितोऽर्थ । एव वरुणशब्दस्यार्थ सवरणाद्वरुण इति शङ्कराचार्यकृतविष्णुसहस्रनामभाष्ये । एवञ्च व्रियते वृणोतीति वा वरुण 'कृवृदारिभ्य उनन्' इत्युणादिसूत्रेण उनन् प्रत्यय । वृणोतीतिक्रियाया कारकाङ्क्षत्वात्कर्मीभूता सर्वसाधनशून्या जीवा गृह्यन्ते । एवञ्च स्वदासत्वेन वृणोति अङ्गीकरोति जीवानिति वरुण । 'यमेवैष वृणुते तेन लभ्य' इति श्रुते । वरणस्वरूप च भक्तिहसे । 'वरणोक्त्या कन्या स्वाभिमतमेव स्वपतित्वेन वृणुते वरो वा तादृशीं कन्या स्वस्त्रीत्वेन, तथा भगवान् स्वदासत्वेनात्मीयत्वेनाङ्गीकरोतीत्युच्यत' इत्युक्त श्रीप्रभुचरणै । एवञ्च हे वरुण हे श्रीविठ्ठल । न च 'रूढिर्योगमपहरती'ति रथकाराधिकरणन्यायेन रूढेर्बलीयस्त्वात् 'प्रचेता वरुण पाशी'त्यमरात् प्रतीचीदेशे वरुणशब्दस्य रूढि, अत कथ व्युत्पत्त्या श्रीविठ्ठलपर्यायतेतिवाच्यम् । 'वरुणो वारुणो वृक्ष' इति विष्णुसहस्रनाम्नि वरुणशब्दस्य विष्णौ रूढताया शिष्टसम्प्रदायस्यात्राविशिष्टत्वात् । न च रूढेस्तुल्यत्वेऽप्यैवात्र ग्रह मानाभाव इति वाच्यम् । 'सर्वे वेदा यत्पदमामनन्ती'ति, 'वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वे'ति श्रुतिस्मृतिभ्या भगवत्येव सर्वेषा नाम्ना मुख्या शक्ति । एवकारेणान्यत्र तु तयारोपात्सा । अत एव 'वेदे रामायणे चैव पुराणे भारते तथा । आदौ मध्ये तथा चान्ते हरि सर्वत्र गीयत'इति हरिवंशोक्तेर्भगवत्येव सर्वेषा वेदाना वेदान्ताना पुराणानां च समन्वय ।

न च भगवत्परत्वेन व्याख्यायता कथ श्रीविठ्ठलपरत्वेन व्याख्यायत इति वाच्यम् । ब्रह्माण्डपुराणवाक्येभ्य श्रीविठ्ठलस्य पूर्णपुरुषोत्तमत्वस्य निश्चयात् । पुराणानुरोधेन श्रुतिव्याख्यानस्योचितत्वात् । 'इतिहासपुराणाभ्या वेद समुपबृंहयेत् । बिभेत्यल्पश्रुताद्वेदो मामय प्रहरिष्यती'ति वाक्यात् श्रीविठ्ठलपरत्वेन व्याख्यान न बाधोऽस्माकम् । एवञ्च वरुण हे श्रीविठ्ठल,

त्वं सुदेवोसि वासुदेवोसि साक्षात्पूर्णपुरुषोत्तमोसि । अत्राद्याक्षरलोपः । 'वर्णस्य वर्णयोर्लोपो बहूनां व्यञ्जनस्ये'ति बृहद्देवतोक्तत्वात् । यथा 'सुदेवो अद्य प्रपतेदनावृ'दिति श्रुतिव्याख्याने नीलकण्ठेन सुदेव इत्यस्य वासुदेव इत्यर्थ उक्तः । एतेन श्रीविठ्ठलनाथानामेवाश्रयः कर्तव्योऽन्याचार्यापेक्षयेति सूचितम् । यद्वा निरुक्तकारैः सुदेवस्त्वं कल्याणदेवः कमनीयदेवो भवसीत्युक्तम्, तत्र 'मङ्गलानां च मङ्गल'मिति भारते 'मङ्गलं भगवान्विष्णु'रिति स्मृतौ च सर्वमङ्गलमयत्वम् । एवं च सकलमङ्गलमयोसि । सकलमङ्गलाश्रयणेन सर्वममाङ्गल्यं निरस्यत इति ध्वनितम् । कमनीयदेव इत्यनेनातिसुन्दरत्वं ध्वनितम् । तच्च 'अथाङ्गसन्निविष्टानामङ्गानां रुचिरत्विषाम् । शोभोत्कर्षैकसन्दर्भः सौन्दर्यं सुरसंमतम् । अन्योन्यापेक्षया तेषामुत्कर्षोत्कर्षदर्शनं । आश्चर्यं भवदङ्गानां सौन्दर्यं सुदृशां मतम् । अङ्गेन येन येनैव दृष्टमात्रेण पश्यताम् । सुखमुत्पद्यते सद्यः सौन्दर्यं तत्र तत्र च । अन्यस्य दर्शनेऽन्यस्य दिदृक्षा न तु जायते । अङ्गानां तादृशां पुंसां सौन्दर्यं संहतिः परम् । अन्यूनाधिकसत्त्वं च सङ्क्षमत्वानवयवा । सौन्दर्यं परमं तत्तत्पश्यतो स सुरद्रुम' इति लक्षणमिति । तथात्र 'दर्शनीयतमो वाग्मी'ति नामसरन उदितम् । महाभाष्यकारैस्तु सुदेवोसि सत्यदेवोसीति व्याख्यातं, तस्य तु 'यदा हि धर्मस्ये'ति स्मृत्युदितवचनपालकोसि । 'सत्यात्मकं त्वां शरणं प्रपन्ना' इति श्रीभागवतवचनात्सत्यवचनोसीत्यर्थः । सत्यलक्षणं तूदितमेव ।

ननु अवतारानन्तरं कथं देवानामुद्धारो वंशेन तन्मन्त्रादित्यभिप्रेत्याह । 'यस्य ते सप्त सिन्धवः सप्त पुत्राः । 'स जयति गिरिवरदेवो गोविन्दो बालकृष्णश्च । श्रीवल्लभरघुनाथौ श्रीयदुनाथो घनश्याम' इति चरित्रचिन्तामण्युक्तनामानः भविष्यन्ति सन्ति वा । सिन्धुत्वेनोपादानं तु सकलगुणरत्नाकरत्वेन गम्भीरप्रज्ञत्वेन 'स्वानुरूपसुतप्रसू'रितिवास्यात् पुरुषोत्तमवत्सर्वोद्धारकर्तृत्वम् । 'आदावहं चैकरूपो बहुरूपधरस्ततः' इति, 'उद्धरिष्याम्यहं तत्र बहुरूपधरः प्रभु'रिति ब्रह्माण्डपुराणवचनाभ्यां सर्वो वंशः श्रीविठ्ठलनाथरूप एवेति । श्लोकार्थस्तु आदौ प्रथमं अहमेकरूपः श्रीविठ्ठलः तदनन्तरं बहुरूपधरः स्ववंशरूपेण बहुरूपधरः । तत्र श्रीवल्लभकुले बहुरूपधरः वंशरूपेणोद्धरिष्यामीत्यर्थः । एवं च सकलवंशः श्रीविठ्ठलरूप एव । तेन देवानामुद्धारे सत्यदेवत्वं न व्यभिचरतीति भावः । ननु ते कया रीत्योद्धरिष्यन्तीत्याह अनुक्षरन्ति काकुदं, 'काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वने' इत्यमराच्छोकभयजनितध्वनिविकारः काकुः, तान् ददातीति काकुदः संसारः तं स्वसेवकानां नाममन्त्राद्युपदेशमात्रेण अनुक्षरन्ति दहन्ति । उपसर्गवशाद्दहनरूपोर्थः । मन्त्रोपदेशेनैव सकलसंसारदाहकत्वे वह्न्ययोगोलकन्यायेन जीवान् भगवद्भिरहमनुभावयन्तीत्यभिप्रेत्य दृष्टान्तमाहुः सूर्म्यं सुषिरामिव । अत्र महाभाष्यकारैर्व्याख्यातम् । तद्यथा । शोभनामूर्मि सुषिरामभिरन्तः प्रविश्य दहतीति । अत्र'मिपूर्वं' इत्यनेन सूर्मिमिति प्राप्ते 'व उन्दमी' त्यनुवृत्त्या यणादेशः । अयं भावः । यथा बहुच्छिद्रां प्रतिकृतिमग्निरन्तः प्रविश्य मलादार्थं दहति, तदनन्तरं स्वस्वरूपमेव तां कुरुते, तद्वदत्रापि जीवस्य संसारादि नाशयित्वा भगवद्द्वारा

'अङ्गादङ्गात्सम्भवसि हृदयादधि जायसे । आत्मा वै पुत्रनामासि स जीव शरदः शत मिति श्रुतेः श्रीविठ्ठलनाथाना पुरुषोत्तमत्वात्पुरुषोत्तमस्वरूपं पुरुषोत्तमस्यैव गम्यम् । 'न हि ते भगवन् व्यक्ति विदुर्देवा न दानवाः। स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे'ति । तस्मात् प्रभुचरणैरुक्तम् 'कश्चित्पाण्डित्यं चेन्न निगममतिः सापि यदि न क्रिया सा सापि स्याद्यदि न हरिमार्गे परिचय. । यदि स्यात्सोपि श्रीव्रजपतिरतिर्नेति निखिलै· र्गुणैरन्यः को वा विलसति विना वल्लभवरम्' । बुद्धावतारे पाण्डित्यमस्ति, परं वेदमार्ग गतिर्न, 'श्रुतिजात निन्दसी' तिवाक्यात् । ऋषभावतारे तद्द्वयमस्ति, परं वैदिकी क्रिया न । मूत्रपुरीषादिकं भवेत्, तथापि मक्षालनं न करोति । कपिलावतारे तत्त्रितयमस्ति, परं हरिमार्गे परिचयो न, साङ्ख्याचार्यत्वान्मातुर्देवहूतेः साङ्ख्योपदेशः कृतः । न च तत्र भक्त्युपदेशोऽस्तीति वाच्यम् । तदङ्गत्वेन तस्या गौणत्वात् । व्यासावतारे तच्चतुष्टयमस्ति, परं श्रीकृष्णचन्द्रे स्नेहो न । ज्ञानावतारत्वात् । 'न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवे· दिहे'ति वचनात् । श्रीमद्वल्लभाचार्यावतारे तत्पञ्चकमस्ति । अत एव मत्प्रभूणा नाम

रूपमेव कुर्वन्तीति । यद्वा । निरुक्तकारै सूर्मि कल्याणोर्मि स्रोत इति व्याख्यात, तत्रायमर्थ । ककुदोस्यास्तीति काकुदो वृष तत्सदृशो जीव काकुदशब्देनोच्यते । सादृश्य च ज्ञानादिशून्य त्वाज्जाड्यादिधर्मेण तादृश भगवद्भजनहीन पशुतुल्य जीव अनुक्षरन्ति, भगवन्नाममन्त्रादिकमु· पदिशन्ति । दृष्टान्त । यथा सूर्म्यं कल्याणोर्मि स्रोत सुषिरा बहुच्छिद्रा यया प्रविशतीति । अत्र बहुच्छिद्रधारिण्या उपमानता । तन्निरूपिता जीवस्योपमेयता । कल्याणोर्म्युपमानतानि रूपितोपमेयता नाममन्त्रादिषु चेति स्वस्वरूपण स्ववशेन च जगदुद्धारकर्तृत्व, अत सत्यदे· वोसि वासुदेवोसीत्यर्थ । किञ्च अन्या अपि श्रुतय श्रीविठ्ठलप्रतिपादिका पूर्वमेवोदिता । किञ्च सर्वो वेद श्रीकृष्णप्रतिपादकोऽत श्रीविठ्ठलप्रतिपादक एवेति विस्तरो न निरूप्यत इति दिक् । 'श्रीविठ्ठले कृष्णचन्द्रे विभिन्नमतयो हि ये । तेषा सङ्गो न मे भूयाद्द्विपतोऽपि मुहु· सह । एतदेव हृदिकृत्य श्रुतिमाहु अङ्गादङ्गादिति । गम्यमिति । 'वक्ता कश्चन मद्व' इति ब्रह्माण्डवाक्यात् । तत्र गीता प्रमाणयति नहि ते इत्यादि । एवञ्च श्रीमदाचार्याणामपि पूर्वोदाहृतश्रुतिस्मृतिपुराणवचनै पुरुषोत्तमत्वेऽवधारिते श्रीविठ्ठलेशस्यापि तत्त्वे श्रीमदाचार्यस्व रूपज्ञान तेषामेवेत्यभिप्रेत्याहु तस्मादित्यादि । वैदिकी क्रिया नेति । 'आचारहीन न पुनन्ति वेदा' इति स्मृते । अत्र हेतुमाहु साङ्ख्याचार्यत्वादिति । गौणत्वादिति । 'कृष्णसेवापर वीक्ष्ये'त्यादि भगवत्प्राधान्येन भगवन्मार्गवर्तित्वमपेक्षितमिति भाव । व्यासावतारेति । 'को ह्यन्य पुण्डरीकाक्षान्महाभारतकृद्भवे' दितिवाक्याद्भगवदवतारत्वम् । पञ्चकमस्तीति । 'अनवद्यवर्ण्यपाण्डित्यप्रवरचण्डपाखण्डवादिखण्डनप्रचण्डिमा धरणिमण्डलाखण्डल' इति वाक्य पाण्डित्यप्रति पादक, वेदपारग इति निगमगतिनिरूपक, कर्ममार्गप्रवर्तक इति वैदिकक्रियावैशिष्ट्यबोधक,

'व्रजप्रियः प्रियव्रजस्थिति'रिति । अतोऽवतारान्तराश्रयं त्यक्त्वा निजाचार्याश्रय एव कर्तव्य इति तात्पर्यार्थः सिद्धः ।

यद्यप्ययोग्य एवाहं तत्स्वरूपनिरूपणे ।
तदीयत्वेन कृपया सर्वं सम्पादितं मयि ॥ १ ॥
यथामति विलासेन प्रेमोल्लासेन वर्णितम् ।
श्रीमदाचार्यचरणाः प्रसीदन्तु स्वतः सदा ॥ २ ॥
इति श्रीवल्लभाचार्यचरणाब्जप्रसादतः ।
निगमोदिततद्रूपं वर्णितं हि यथामति ॥ ३ ॥
यद्यप्यज्ञानदोषेण ह्यन्यथा वर्णितं भवेत् ।
क्षमन्तां श्रीमदाचार्याः स्वीयेषु करुणाकराः ॥ ४ ॥

इति श्रीमत्प्रभुचरणात्मजमहाराजश्रीयदुनाथकुलोद्भव-
गोस्वामिश्रीगोपालसुतश्रीगिरिधरविरचितं
श्रुतिरहस्यं समाप्तम् ॥

भक्तिमार्गाब्जमार्तण्ड इति यागादौ भक्तिमार्गैकसाधनत्वोपदेशक इति च हरिमार्गज्ञातृत्वज्ञापकं, 'स्फुरत्कृष्णप्रेमामृतरसभरेणातिभरिता विहारान् कुर्वाणा व्रजपतिविहाराब्धिषु सदे'ति वाक्यं स्नेहबोधकमिति भावः । निजाचार्याश्रय एवेति । पूर्वोदाहृतश्रुतिकदम्बैः श्रीमदाचार्याश्रयितुरेव भगवान् श्रीमल्लीलापुरुषोत्तमानुभवः । अन्याश्रयेण न तथेत्येवकारार्थः । तथा च भारद्वाजसंहितायां 'नानतस्त्वनुपेतस्य ब्रह्मचर्यमभीप्सतः । वृथैवात्मसमुत्क्षेपो जायते कृष्णवर्त्मनी'ति । एतदर्थस्तु निरूपित एव । तात्पर्यार्थ इति । सम्पूर्णग्रन्थस्य पूर्वोदितश्रुतिस्मृतिवाक्यानामिति शेषः ।

एवं निरूप्य 'भक्तानां दैन्यमेवैकं हरितोषणसाधन'मिति वाक्येन दैन्यस्यावश्यकत्वेन स्वस्मिन् तद्द्योतयितुं ग्रन्थान्ते च मङ्गलमाचरणीयमिति शिष्टसम्प्रदायाच्छ्रीमदाचार्यान्प्रार्थयन्ते यद्यपीत्यादि । ईश्वरस्याखिलस्वामिनो निरूपणमल्पप्रज्ञेन कर्तव्यमित्ययोग्यमिति भावः । तर्हि कथं निरूपितमित्याहुः तदीयत्वेनेति । श्रीमदाचार्यैः स्वीयत्वेन स्वस्वरूपं कृपया बोधितं ध्रुव-न्यायेन । अतो मया तथैव निरूपितमित्याहुः यथामतीति । श्रीमदाचार्या अस्माकं हृदि प्रविष्टास्तदा यथामतिविलासेन परमानन्दस्य निरूपणे परमानन्द एव भवतीति प्रेमोल्लासेन वर्णितं मया । 'कवचेन हि भावेन' त्यादिवाक्यैः प्रेम्णैव प्रसीदन्ति श्रीमदाचार्यचरणा इति भावः । प्रसीदन्त्विति । श्रीमदाचार्यचरणप्रसादेनैवास्माकं निखिलप्रत्यूहव्यूहनिरसनपूर्वकं सर्व-सिद्धिरिति भावः । स्वत इत्यनेनास्मासु साधनरहितेषु कृपया प्रसीदन्त्विति भावः । पुनः श्रीमदाचार्यचरणप्रसादं प्रार्थयन्तः समाप्तिं प्रतिजानते इतीत्यादि । चरणाब्जप्रसादेनैव वेदोदित-रूपज्ञानमिति भावः । यद्यपीत्यादि । स्वस्मिन्नज्ञानादिनिरूपणेनातिदैन्यद्योतनेन प्रमोरनिरूह-

णोत्पत्तिर्भवतीति भावः। यद्यपि श्रीमदाचार्यकुलोद्भवानां पूर्णपुरुषोत्तमत्वेन श्रीमदाराध्यचरणानामपि साक्षात्पुष्टिपुरुषोत्तमरूपत्वादज्ञानादि न सम्भवति, तथापि शिष्यपरम्परायै निरूपिनमिति भावः ॥ ४ ॥

श्रीमदाचार्यपादाब्जकृपया यन्निरूपितम् ।
साधवः कृपया पूर्णाः सम्यक्पश्यन्तु मत्कृतिम् ॥ १ ॥
श्रीमदाचार्यरूपार्थबोधिकाः श्रुतयोपि याः ।
निरूपितास्तथा स्थालीसिक्थन्यायोऽवधार्यताम् ॥ २ ॥
मम तु प्रतीभात्येवं सर्वे वेदा महाप्रभोः ।
श्रीवल्लभार्यरूपं हि बोधयन्त्येव निश्चितम् ॥ ३ ॥
श्रीमदाचार्यवर्याणां स्वरूपं श्रुतिदुर्गमम् ।
काल्पीयसी तत्र बुद्धिर्मम रूपनिरूपणे ॥ ४ ॥
तथापि श्रीमदाराध्यचरणैर्यन्निरूपितम् ।
तद्बलं सम्यगाश्रित्य यथामति निरूपितम् ॥ ५ ॥
श्रीमदाराध्यपादानां ग्रन्थाशयनिरूपणे ।
त एव शरणं सन्ति नान्यथा मतिरीदृशी ॥ ६ ॥
वन्देऽहं श्रीमदाराध्यचरणेन्दुनखप्रभाः ।
याभिर्लोकत्रये पूर्णं तिमिरं मम नाशितम् ॥ ७ ॥
यथा श्रीश्रीमदाचार्यचरणैः प्रेरितोस्म्यहम् ।
तथैव लिखितं सर्वं स्वबुद्ध्या नैव किञ्चन ॥ ८ ॥
गृह्यतां श्रीमदाचार्यभृत्योक्तत्वादहो बुधाः ।
श्रीमदाराध्यचरणे वाक्यपुष्पं समर्पितम् ॥ ९ ॥
यदत्र सदसद्वापि व्याख्यातं स्वल्पबुद्धिना ।
क्षमन्तां श्रीमदाचार्यचरणाः सर्वदा मयि ॥ १० ॥

इति श्रीमन्निजचरणनखचन्द्रप्रभाच्छटानिरस्तसमस्तजीवान्धकार-
श्रीवल्लभाचार्यावतारकुलकमलविकासकनिजशरणसन्तापह-
रणश्रीमद्गोस्वामिश्रीमद्गिरिधरचरणकोकनदमधुपाय-
मानमानसतैलङ्गजातीयगोकुलग्रामस्थनेतोपना-
मकरामकृष्णभट्टप्रकाशितश्रुतिरहस्यप्रकाशः
सम्पूर्णतामगाजीत् ॥

नित्यलीलास्थश्रीमद्गोस्वामिश्रीदेवकीनन्दनाचार्यस्मरणार्थम् ।

श्रीकृष्णाय नमः ।

रासपञ्चाध्यायीप्रकाशः ।

दशमतामसफलप्रकरणश्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

श्रीमत्पीताम्बरप्रणीतः ।

स च

'भगवद्धर्मपरायण हरखलाल हरिदास भगत' इत्यस्य द्रव्यसाहाय्येन 'भृगुपुरस्थ मूलचन्द्र तुलसीदास तेलीवाला, बी. ए., एल्.एल्. बी., वकील हाय कोर्ट, सुरतिस्थ धैर्यलाल व्रजदास सांकलीया, बी. ए., एल्.एल्. बी., वकील हाय कोर्ट' इत्येताभ्यां संशोध्य मुम्बापुर्यां 'निर्णयसागर' मुद्रणालये मुद्रयित्वा प्रकटीकृतः ।

श्रीवल्लभाब्दाः ४४४. संवत् १९७८.

मूल्यमेकमुद्रिका ।

श्रीकृष्णाय नमः ।

श्रीमद्‌ભાગવતના દશમસ્કધના તામસ ફલપ્રકરણના શ્રીસુબોધિનીજી તથા શ્રીટિપ્પણીજીનો
પ્રકાશ મુદ્રિત કરી, પ્રસિદ્ધ કરી, ભગવદીયોની સેવામા નિવેદન કરતાં અમને બહુજ આનન્દ
થાય છે આ ગ્રન્થના પ્રયોજક દશદિગન્તવિજયી શ્રીમત્પુરુષોત્તમજી જ છે અને આપશ્રીએ
આ ગ્રન્થના કર્તા તરીકે પ્રસિદ્ધિ નિજ પિતૃચરણ શ્રીપીતાબરજીની ઇચ્છી છે એમ મગલા-
ચરણના શ્લોકથી સુસ્પષ્ટ છે તદનુસાર આ ગ્રન્થ અમે પણ શ્રીપીતાબરજીના નામથી જ
પ્રસિદ્ધ કરવાનુ ઉચિત ધાર્યુ છે હાલના સમયમા જેમ અર્પણપત્રિકાઓથી માન્યોને ગ્રન્થો
નિવેદન થાય છે, તેમ શ્રીપુરુષોત્તમજીએ સ્વપિતૃચરણનુ કર્તા તરીકે નામ યોજીને જ આ ગ્રન્થ
નિજ પિતૃચરણ શ્રીપીતાબરજીને નિવેદન કર્યો છે શ્રીપુરુષોત્તમજીએ આ પ્રકારે માત્ર
નિજ પિતૃચરણના નામથી ગ્રન્થ યોજ્યા છે, એટલુ જ નહિ, પરન્તુ નિજ સર્વ માન્યોના નામથી
ગ્રન્થો યોજીને તે તે ગ્રન્થો તેઓને નિવેદન કર્યા છે નિજ ગુરુચરણ શ્રીમદ્‌ગોસ્વામિશ્રીકૃષ્ણ-
ચન્દ્રજીને ભાવપ્રકાશિકા બ્રહ્મસૂત્રવૃત્તિ તન્નામથી યોજીને નિવેદન કરી છે પૂર્વમીમાસાભાવાર્થ
પાદભાષ્યટીકા નિજ પિતામહ શ્રીયદુપતિજીના નામથી યોજીને તેઓશ્રીને નિવેદન કરી છે
નિજ પિતૃવ્યચરણ શ્રીવ્રજરાજજીકૃત ગીતામૃતતરગિણીટીકાનો આરભક ઉપોદ્‌ઘાત તે જ પ્રકારે
યોજ્યો છે, અને શાસ્ત્રાર્થ નિબન્ધનો આવરણભગ, પુષ્ટિપ્રવાહમર્યાદાટીકા, તથા દશમશ્રીસુબો-
ધિનીજીનો પ્રકાશ નિજ પિતૃચરણ શ્રીપીતાબરજીના નામથી યોજ્યા છે શ્રીપુરુષોત્તમજીએ આ
ગ્રન્થો પોતાના માન્યોના નામથી યોજ્યા છે છતા તે તે કૃતિ પોતાની જ છે તે ગુપ્ત રાખ્યુ નથી,
તેથી એઓશ્રીનો પણ આશય માત્ર નિવેદન પૂરતો જ છે એમ લાગે છે વસ્તુત આ ગ્રન્થોના
કર્તા તો શ્રીપુરુષોત્તમજી પોતે જ છે એમા તો સ્વલ્પ પણ સદેહ નથી અત્ર મુદ્રિત થતો
રાસપચાધ્યાયી પ્રકાશ શ્રીપુરુષોત્તમજીના નિજ શ્રીહસ્તાક્ષરનો લખેલો પ્રભુકૃપાથી અમને બે-
એક વર્ષ ઉપર પ્રાપ્ત થયો, તે ઉપરથી સહજ જણાઈ આવે છે કે આપશ્રી જ એના મૂલ
લેખક છે શ્રીપીતાબરજીકૃત એમ પ્રસિદ્ધિ આપશ્રીને ઇષ્ટ છે આ મૂલ ગ્રન્થ ઉપરથી મુદ્રણ
કરતા અમને ઘણો જ આનન્દ થયો અમારુ સૌભાગ્ય અમને સ્ફુરે છે કે પ્રાચીન ગ્રન્થોના
મુદ્રણમા અમને ઘણી વાર મૂલ ગ્રન્થો ગ્રન્થકારના શ્રીહસ્તાક્ષરમા જ લખેલા મળે છે
શ્રીટિપ્પણીજી, તથા ષોડશ ગ્રન્થોની ટીકાઓમા આમ ઘણીવાર થયુ હતુ આમા જેટલો પરિશ્રમ
માનુષ સ્વભાવને સુલભ હતો તેટલો અમે કર્યો છે, છતા આમા દોષ નહિ જ હોય એમ
અમારાથી કહી શકાય નહિ, કારણ કે તેમ કહેવામા અમારુ જીવત્વ જ દૂર થઇ જાય છે, અને
ભક્તિમાર્ગમા તો તે મહા અનર્થરૂપ થઇ પડે, પરન્તુ એટલુ કથન આવશ્યક છે કે આ ગ્રન્થના
મુદ્રણમા પ્રમાદ ન થાય એમ ખાસ પ્રયત્ન કર્યો છે બીજી ખેદની વાત એ કે આ મૂલ પ્રતિ
પણ રાસપચાધ્યાયીપર્યન્તની છે શખચૂડવધ અને યુગલગીત એ બે અધ્યાયનો પ્રકાશ અમને
દૃષ્ટિગોચર ક્યાહિ પણ થયો નથી એટલે ફલ પ્રકરણના પ્રકાશમા આ બે અધ્યાય ન્યૂન છે શ્રી-
હસ્તાક્ષરની પ્રતિનુ અન્તિમ પત્ર અર્ધ લખેલુ છે, અને તેમા ઇતિશ્રીપણ નથી, એટલે કદાચિત્
શ્રીપુરુષોત્તમજીને તેટલો ભાગ પૂર્ણ કરવાનુ અવશિષ્ટ પણ રહ્યુ હોય એમ સભવિત છે ગુજ-
રાતી પત્રના ભૂતપૂર્વ અધિપતિ ઇચ્છારામના પુત્ર રા નટવરલાલ દેસાઇએ અમને તે પ્રેસના
સગ્રહમાથી આ ગ્રન્થની એક પ્રતિ આપી છે આ પ્રતિના મૂલ માલિક કાશીસ્થ શ્રીગિરિધરજી

મહારાજના આશ્રિત શાસ્ત્રી રામકૃષ્ણભટ્ટજી છે તે પ્રતિમા પણ મૂલ પ્રતિમા વિદ્યમાન જ ભાગ છે છેલ્લા બે અધ્યાયનો પ્રકાશ નથી ફલ પ્રકરણના અર્થગાભીર્ય અવગાહન કરવાને શ્રીટિપ્પણીજી, અને શ્રીસુબોધિની તથા શ્રીટિપ્પણીજીના સમગ્ર અર્થની ભાવના કરવાને પ્રકાશ અત્યન્ત ઉપયોગી છે એમા અમને લેશ પણ સશય નથી

આ ગ્રન્થમા ક્વચિત્ મુદ્રિત કરેલા ટિપ્પણ રામકૃષ્ણભટ્ટજીની પ્રતિમાથી ઉદ્ધૃત કરેલા છે, પરન્તુ તે પ્રતિના પાઠો ઘણે સ્થળે મૂલ પ્રતિની સાથે સરખાવતા અશુદ્ધ માલૂમ પડ્યા હતા અર્થાત્ એ ટિપ્પણ ક્વચિત્ અશુદ્ધ પાઠના આધારે યોજાયલા હોવાથી સર્વથા વિશ્વસનીય ગણી નજ શકાય માટે વાચકોએ ઉક્ત ટિપ્પણના આધારે મૂલપ્રકાશ યોજવામા વિવેક વાપરવો ખાસ કરીને ૨૯ અધ્યાયના ભજનવિષયક પ્રશ્નોત્તર શ્લોકોના પ્રકાશમા રામકૃષ્ણભટ્ટજીની પ્રતિમા ઘણી ત્રુટિ તથા અશુદ્ધિઓ હતી અને તેથી ટિપ્પણ પણ અવિશ્વસનીય થયુ

આ ગ્રન્થનો મુદ્રણ ખર્ચ અમને ભગવદ્ધર્મપરાયણ રા રા હરખલાલ હરિદાસ ભગત તરફથી મળ્યો છે તેઓની ઇચ્છાથી પચમ પીઠાધીશ્વર નિત્યલીલાસ્થ શ્રીમદ્ગોસ્વામિશ્રીદેવકીનન્દનજીના સ્મરણાર્થ આ ગ્રન્થનુ પ્રાકટ્ય છે આ ગ્રન્થના વેચાણમાથી જે દ્રવ્ય પ્રાપ્ત થશે તેનો અન્ય આવા ગ્રન્થોના મુદ્રણમા અને શ્રીમદ્દેવકીનન્દનસ્મારક માલામા વિનિયોગ થશે

શ્રીસુબોધિનીજી અને શ્રીટિપ્પણીજીના વરેણ્ય આશયો સ્ફુરાવવામા આ ગ્રન્થ કોઈ પણ આચાર્યચરણૈકનિષ્ઠ મહાનુભાવી ભગવદીયને સહાયક થશે એ વિચારથી જ અમારા પરિશ્રમની કૃતકૃત્યતા માનીએ છીએ, અને તે આશયો અમને પણ સ્ફુરો એમ દીન પ્રાર્થના સાથે આ ગ્રન્થ શ્રીમત્પ્રભુચરણકમલમા સમર્પીએ છીએ

આશ્વિન શુક્લ, રાસોત્સવ
સવત્ ૧૯૭૭, મુબઈ

મૂલચન્દ્ર તેલીવાલા.
ધીરજલાલ સાંકલીયા.

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

रासपञ्चाध्यायीप्रकाशः ।

श्रीमद्भागवतदशमतामसफलप्रकरणश्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

श्रीमत्पीताम्बरप्रकटितः ।

व्रजजनचरणसरोरुहपरागरागेण पीतवसनस्य ।
श्रीगोपीपतिपदयोर्दास्यविलासा भवन्त्वनिशम् ॥ १ ॥

षड्विंशाध्यायं विवरिषवः पूर्वाध्यायप्रकरणयोः सङ्गतिं वदिष्यन्तः प्रथमं प्रकरणयोः साधनफलभावरूपां वदन्तीत्याशयेन टिप्पण्यामाहुः **ननु सर्वसमर्थेत्यादि**। अत्राभासव्याख्यानयोरयमाशयः। तथा हि। अस्य फलप्रकरणत्वादत्र सर्वेषां फलं वक्तव्यम्। तत्रापि रसात्मकस्य फलस्य प्रमेयप्रकरणेपि दर्शितत्वादस्य फलप्रकरणत्वायात्र ततः कश्चिद्विशेषोपि वक्तव्यः। स च क्रमस्वारस्याद्ब्रह्मानन्दादाधिक्यज्ञापनरूप एव सेत्स्यति। अन्यथा पूर्वप्रकरणसमाप्तौ शुको वैकुण्ठनयनं तत उद्धरणं च न वदेत्। फलप्रकरणोत्तरं तत्र नयनमात्रमेव च वदेत्। अत उक्त एव विशेषो निश्चेयः। सोपि फलयोर्व्यधिकरणत्वे मुख्यावान्तरभावाभावादसिध्यन् सामानाधिकरण्यमाक्षिप्यैतासु पूर्वं ब्रह्मानन्दं गोपेषु पश्चाद्भजनानन्दं च व्यवस्थापयतीत्याशयेनैव 'तद्द्वारा पुरुषाणां च भविष्यती'ति वक्ष्यन्ति। तेन तत्सामान्यादेतासु ब्रह्मानन्दोपि निराबाध एव। न चैतासां तदाकांक्षाभावात् स कथं वक्तुं शक्य इति वाच्यम्। भक्तिस्वभावादेव तत्सिद्धेः। 'हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो गतिमण्वीं प्रयुङ्क्ते'इति वाक्यात्। 'स्वर्गकामो यजेते'त्यादौ यजमानमात्रस्य तत्कामनायामपि 'सगृहः सपशुः सुवर्गं लोकमेती'ति श्रुत्या परिकरस्यापि तत्फलश्रावणेनात्रापि तथा वक्तुं शक्यत्वाच्च। किञ्च। भगवत्कार्यस्वरूपविचारेपि तेषु भजनानन्दस्येवैतासु ब्रह्मानन्दस्यापि सुवचत्वम्। भगवताप्याकांक्षितमेव दीयते इति नियमाभावात्। विप्रयोगज्ञानोपदेशादीनां तथा निश्चयात्। एवञ्च 'एकं भगवतः कार्य'मिति न्यायाद्गोपानां सूक्ष्मगत्याकांक्षोदयरूपं भगवत्कार्यमेतासु ब्रह्मानन्दानुभवं साधयतीत्यपि ज्ञेयम्। वस्तुतस्त्वेतेन

१ ग्रन्थकर्तृपीताम्बरस्य। २ अहर्निशम्। ३ वेणुगीते। ४ ब्रह्मानन्दानन्तर भजनानन्दकथनम्। ५ साधन–। ६ वैकुण्ठे। ७ गोपीगोपनिष्ठफलयो.। ८ फलस्य। ९ ब्रह्मानन्दस्य। १० उद्धवद्वारा ज्ञानोपदेशस्तु भक्ताना नाकाक्षितम्।

ग्रन्थेन परप्राप्तिबोधकयुक्तप्रकारकः अत्यापत्तिप्रकारो बोध्यत इति वैयधिकरण्येप्यदोषः । वक्ष्यन्ति च पञ्चमाध्याये 'यथार्भक' इत्यस्याभासे 'ब्रह्मभावाभावा'दिति । नच भ्रमरगीतादिकथाविरोधः । इदानीन्तनफलस्य निरोधशेषत्वात् । अत्यापत्तौ तु निरोधस्य फलशेषत्वमिति सर्वं समञ्जसमिति दिक् । **लौकिकस्त्रीष्वित्यत्र टिप्पण्यां पूर्वं स्यादिति** । इह मूलेके पूर्वं स्यादित्यर्थः । **स्वपदस्येत्यादि** । स्वासामानन्दानुभव इत्येवं समास इत्याशयः । ब्रह्मभावोक्तेरेतल्लीलाधिक्यमात्रज्ञापनार्थत्वेन योग्यतायां तात्पर्याभावान्नैतदर्थसङ्गतिरित्यरुच्या पक्षान्तरमाहुः **यद्वा बलदेवेत्यादि** । अत्र योग्यतोक्तावपि योग्यताबीजस्याकथनात्तद्बोधनाय पक्षान्तरमाहुः **यद्वा हेमन्तेत्यादि** । तेनानुग्रहैकलभ्यत्वं योग्यताया दृढीकृतम् । **सुबोधिन्यां ततो हीति** । स्त्रीष्वेव संसिद्धत्वात् स्त्रीणामेव योग्यत्वाचेत्यर्थः । **टिप्पण्यां** योग्यतादृढीकारेण सिद्धमग्रिमाभासमुखेनाहुः **एवं सतीत्यादि । अनुग्रहद्वारेति** । अयमर्थः 'स्मयमानमुखाम्बुज' इत्यस्य टिप्पण्यामग्रे सेत्स्यतीति बोध्यम् । तथा चास्य फलस्य तामसप्रकरणीयत्वात्तत्प्रकरणपठिताधिकारिमात्रस्येदं वक्तव्यमित्यतो द्वारमाचार्यैरुक्तम् । तथा चकारेण हीनाधिकारिणो गवादयश्च 'केवलेन हि भावेने'त्यत्रोक्ताः संगृहीताः । तेन साधनप्रकरणोक्ता योग्यता एतद्विषयिणीत्याशयः । सापि योग्यता स्वरूपयोग्यतासापेक्षतयैव फलसाधिकेत्याशयेन वदन्तीत्याहुः **यत्रापीत्यादि** । ननु ब्रह्मानन्दस्य नित्यत्वं 'न स पुनरावर्तते' 'अनावृत्तिः शब्दा'दिति श्रुतिन्यायसिद्धम् । तदपेक्षयात्राधिक्येऽस्य नित्यत्वमवश्यं वक्तव्यम् । तच्च लीलानां तदनुभवितॄणां च नानात्वाद्भिन्नभिन्नकालिकत्वाच्च बाधितमित्याशंक्य लीलानां स्वरूपतः प्रवाहतश्च नित्यत्वमधिकारिनिरूपणमुखेन वदन्तीत्याशयेनाहुः **यत** इत्यादि । तथा च रमणरूपेण लीलानां स्वरूपनित्यता, बाह्याभ्यन्तररूपेण च प्रवाहनित्यतेत्यर्थः । अयमर्थः । रसात्मा भगवान् बाह्यरमणे धर्मसहितः, आन्तरे तु नाट्य इव केवल इति तस्य तथात्वसंपादिकास्ता नित्याः परिच्छिन्नाश्चेति तदाविर्भावस्य कालचक्रवद्गमागमरूपतया प्रवाहरूपतायामपि स्वरूपनित्यत्वं निराबाधत्वान्न बाधितमित्यर्थः । नन्वान्तरस्यापेक्षावैशिष्ट्यादपूर्णत्वाद्भगवद्रूपत्वाभावे कथं परमफलत्वमित्याकांक्षायां तस्य तथात्वं विवृण्वन्ति **आन्तरं त्विति** । **सखीवृन्देत्यादि** । तथाचापेक्षापूर्त्या उक्तविशेषैस्तथेत्यर्थः । अत्र गमकं वदन्तीत्याशयेनाहुः **नामरूपेत्यादि** । तथा च दोषाभाव एव परत्वगमक इत्यर्थः । कारिकास्थस्येत्यस्य पदस्य तात्पर्यमाहुः **पूर्वस्या** इत्यादि । सापीत्यपिशब्देनैतत्साम्यात्पञ्चाध्यायीस्थलीलाग्रहणम् । तेन यथात्र शङ्खचूडवधाद्दोषनिवृत्तिः, तथा पञ्चाध्याय्यां 'नाहं तु सख्य' इत्यादिवाक्यैर्भक्तान्तःकरणस्थदोषनिवृत्तिरिति द्विविधापि निर्दुष्टा । एतावान् परं विशेषो यत्पूर्वेषां भगवत्प्रयत्नेन दोषराहित्यम्, उत्तरेषां तु स्वत इति । अत एव च परत्वम् । ब्रह्मानन्दाधिक्यं तूभयोरनुग्रहविशेषनियतत्वादिति फलप्रकरणतात्पर्यम् । एतदेव 'लीला या

युज्यते सम्य'गिति सम्यक्पदेन पूर्वं ज्ञापितं बोध्यम् । एवं प्रकरणार्थमुक्त्वा तदवान्तरयोः पूर्वस्मिन्नध्यायान् विभजन्त इत्याशयेनाहुः यतो रूपमित्यादि । सुबोधिनीकारिकास्थरूपप्रपञ्चपदस्य रूपविस्तारोर्थो बोध्यः । ननु भगवति सजातीयविजातीयस्वगतद्वैताभावादात्मनेत्यादिसार्धकारिका कथं संगच्छत इत्यत आहुः यथेत्यादि । 'चक्षुषश्चक्षुः, श्रोत्रस्य श्रोत्रं, मनसो मन' इति 'प्राणन्नेव प्राणो भवती'त्यादिश्रुत्या यथा तत्तत्कार्यकर्तृत्वेनेन्द्रियादिरूपत्वं वैदिकैर्मन्यते, तथा 'यस्यात्मा शरीरं, य आत्मानमन्तरो यमयती'तिश्रुतिवाक्यादात्मादिभोक्तृत्वेनात्मत्वादिस्वरूपमपि मन्तव्यम् । तथा च तत्तत्कार्यकरणात्तत्तद्रूपः स्वयमेवेति न कथमपि द्वैतापत्तिरित्यर्थः । एवमनुपपत्ति परिहृत्यात्मरूपं निश्चिन्वन्ति यथेत्यादि । ननु भावस्य मनोविकारात्मकत्वात् कथं ब्रह्मरूपत्वमित्याकांक्षायामाहुः प्रभुरित्यादि । तथा च रसस्य स्थायिभावात्मकत्वेन 'स मानसीन आत्मा जनाना'मिति श्रुत्या तत्र प्रकटस्य भावरूपतया विकारात्मकत्वाभावाद्ब्रह्मरूपत्वं निर्बाधमिति वेणुगीत एव व्युत्पादितमित्यर्थः । नन्वस्त्वात्मादिरूपत्वम्, तथापि लीला तु प्रकटरूपेणैव क्रियत इति तेन कथं लीलेत्याकांक्षायामाहुः आत्माधीनमित्यादि । इदं च 'आत्मारामोप्यरीरम'दित्यत्र स्फुटीभविष्यति । एवं चात्मादीनां कर्तृत्वमेव, न करणत्वमित्याशयेनाहुः अन्येत्यादि । एतन्निरूपणप्रयोजनमाहुः मन इत्यादि । तथा चान्तरफलसिद्ध्यर्थमेवं कृतवानित्यर्थः । अत्र लीलाक्रमे बीजं तु प्रथम 'आत्मना लीले'ति आत्मा चाधारभूतं लिङ्गमुपजीवतीति । द्वितीये मनसा, ततः प्राणचन्वनत्वेन मनसः प्राणाधीनतया तदुपजीव्यत्वाद्वाचश्च प्राणविकारतया तदन्तर्गतत्वेन तृतीये वाक्प्राणैः, तत इन्द्रियाणां प्राणव्रतत्वेन प्राणोपजीवकत्वाच्चतुर्थे तैः । ततः शरीरस्य तत्सर्वोपजीवकत्वात्तेनेति श्रौतवासनारूपं बोध्यम् । एतेन सङ्गतिरप्युक्तप्रायैवेति न पृथक्तदुक्तिः । अस्मिन् पक्षे भक्तस्वरूपन्यग्भावेन रसात्मकस्य भगवतो लीलेति भवति, न तु रसवतः । भगवांस्तु रसवानपीति तत्त्वेनापि सा वाच्यैव, अन्यथा मूलस्य वाक्यासङ्गतेरित्यभिसंधाय आत्मादीनां करणत्वस्याप्यविरुद्धत्वात्तद्घटितं पक्षान्तरमाहुः यद्वेत्यादि । प्रतिभाप्यमाणमिति । भाप्यमाणपदेनैव चारितार्थ्येपि प्रतिशब्दोपादानात् स्वप्रवेशप्रतिकूलतया भाप्यमाणमित्यर्थः । सुबोधिन्यां वाक्प्राणैरित्यैकपद्याद्ग्रिमाध्यायलीलासु वाक्प्राणैक्येनैव लीलाया विवरिष्यमाणत्वाच्चात्र भेदेन तल्लीलाकथनं युज्यत इत्याशयेनाहुः बलं हीत्यादि । तृतीयाध्यायलीलाविमर्शे । इति तथेति । इति हेतोः स्वरूपाभिव्यक्तिः शारीरी लीलेत्यर्थः । ऐश्वर्येत्यादि । अणिमादिभेदेन तस्याष्टविधत्वात्तत्तुल्यसंख्यैरित्यर्थः ।[1] एवमध्यायपञ्चके आलम्बनरूपीय-

---

१ इदं शोधपत्रे एवमित्यारभ्य हरिप्रियेत्यादीत्यन्तं मूलश्रीहस्ताक्षरपुस्तके नास्तीत्यतो रामकृष्णभट्टपुस्तकतो निवेशितम् ।

पञ्चलीलाविवरणेन तल्लीलायामपि क्रमः समर्थितः । तत्र सकृदपि पञ्चलीलाकरणेन रूपप्रतिष्ठाभिरध्यायान्तरलीलावैयर्थ्यं क्वचित्क्रमभङ्गो यदुक्तस्तत्राप्यालम्बनीयतारूपेण बीजाभावश्चेत्याशङ्कां हृदि कृत्वा पक्षान्तरमाहुः **अथवेत्यादि । शास्त्राणामिति ।** इदं श्लोकरूपं वात्स्यायनसूत्रम् । तथा च रसशास्त्रमर्यादायास्तथात्वान्न क्रमस्य विवक्षितत्वमित्यर्थः । अत्रेदं बोध्यम् । भगवतो रसरूपत्वस्य तदालम्बनस्य च स्वाभाविकत्वाद्भक्तानां सर्वात्मभावस्य तद्रसात्मकतया तथात्वात् क्रमस्याविवक्षितत्वेपि 'अन्यो ह्यन्यस्मिन्प्रतिष्ठित' इति तत्प्रकरणीयश्रुतेर्भेदस्य सत्त्वात्सकृल्लीलाकृतौ तदनिवृत्त्या लयासम्भवात्तदर्थमसकृत्तत्करणं विवक्षितम् । सधर्मत्वस्य स्वाभाविकत्वाच्चेति नेतराध्यायलीलावैयर्थ्यम् । तथा सति प्रथमपञ्चविधया आत्मनि, ततस्तादृश्या मनसीत्येवं पञ्चसु पञ्चविधधर्मसहितस्वालम्बनस्य प्रतिष्ठायां भक्तस्वरूपस्य सम्यक्तया लय इति न सुबोधिनीविरोधगन्धः । शास्त्रीयहेतोरुक्तत्वाच्च न पूर्वत्र क्रमत्यागदोषश्चेति । तदेतद्धृदि कृत्वा रूपं प्रतिष्ठितमिति विवृण्वन्ति **हरिप्रियेत्यादि ।** एवं प्रथमप्रकरणीयाध्यायविभागमुक्त्वा निर्वाहकत्वं कार्यकारणभावो वावान्तरयोः संगतिरिति बोधयित्वा पञ्चविंशपड्विंशयोरपि साधनफलरूपैव सङ्गतिः परं विशेषरूपेणेति बोधयितुमध्यायार्थं वदन्तीत्याशयेनाहुः **आद्य इत्यादि । उक्तरूपात्मनेति ।** स्वामिनीभावरूपात्मना । **आत्मन्येवेति** जीवात्मलिङ्गरूपे मनसि भावरूपेण प्राकट्याल्लिङ्गान्तःस्थस्य जीवस्यैव नैकट्यात्तत्रेत्यर्थः । आनन्दपूरणे गमकमाहुः **अत एवेत्यादि । अत एवेति ।** एतस्य भावस्यात्मरूपत्वादेवेत्यर्थः । एतस्य निरपेक्षा इत्यादिना सम्बन्धः । एतस्य प्रयोजनमाहुः **यत इत्यादि ।** तस्यापि प्रयोजनमाहुः **द्वितीयेत्यादि ।** एवं प्रकारकमत्रत्यं सर्वं भगवतो गजजलपानन्यायेन स्वस्वरूपानुभवार्थमित्यात्मारामत्वस्यैव निर्वाहकमित्यतिगूढाशयं प्रकटयितुं वदन्तीत्याशयेनाहुः **यमेवेत्यादि ।** सर्वात्मभावस्य निष्कृष्टं स्वरूपं वदन्तीत्याशयेनाहुः **सोपीत्यादि । सोपीति ।** सर्वात्मभावोपीत्यर्थः । एतेन भगवदनुग्रहविशेषैकलभ्यः 'स एवाधस्ता'दित्यादिश्रुत्युक्तभावासाधारणकारणभूतो यः स्थायी भावः सः सर्वात्मभाव इति तत्स्वरूपादिलक्षणं बोध्यम् । यथा जीवानां चिदात्मकत्वम्, तथा स्थायित्वं लौकिकेपीति तद्वारणाय लभ्य इत्यन्तम् । शेषं कार्यलक्षणं फलोपधानाय श्रौतत्वाय चेति लिङ्गभूयस्त्वाधिकरणादवगन्तव्यम् । भगवद्विषयरत्याख्यस्थायित्वमपि न तल्लक्षणमिति ज्ञापनायाहुः **अन्तरित्यादि ।** एतस्य भावस्य लौकिकालौकिकविलक्षणत्वज्ञापनाय वदन्तीत्याशयेनाहुः **मानेत्यादि । सेति ।** सर्वात्मभावसम्बन्धिनी । एवमेकेन प्रकारेण वैलक्षण्यव्याख्यानाद्दुर्लभत्वमस्य फलस्य प्रदर्शितम् । एवमपि कुर्वन्नानुगृहीतांस्त्यजतीति बोधनाय प्रकारान्तरेणोत्तरार्धं व्याकुर्वन्ति **अथवान्तःकरणेत्यादि ।** अन्तःप्रपत्यभावे सर्वभावप्रपत्तिजननार्थं तत्र स्थितः सन् बाह्यतस्तिरोधत्ते, नत्यन्तस्त इति द्वितीया

मर्यादेति भावः । तृतीयामाहुः **यद्वा मानस्येत्यादि** । एतां व्यवस्थापयितुं प्रकारान्तरेण व्याकुर्वन्ति **यद्वा कायिकेत्यादि** । सर्वमेतत् श्रीमदाचार्य'स्तासां त'दिति श्लोके विवेचनीयमतो न क्वापि कोपि विरोधलेशः ।

भगवानपीत्यत्र । **इति तथेति** । अनेन हेतुना दूषणोद्धार इत्यर्थः । नन्वयमेव मूलेर्थो विवक्षित इत्यत्र किं गमकमत आहुः **नायकेत्यादि** । तथा च मूले
१०-२६-१ रन्तुं मनःकृतिकथनेन नायकभावो बोध्यते । ततश्च व्युपसर्गेण तद्भावपूर्वकेक्षणमेवायातीति स एव विशेषः । स च भगवदीयत्वान्न निरर्थक इति स्वकार्यं सम्पादयितुं रतिविषयेष्वपि स्वोपयुक्तां सामग्रीं दर्शनगोचरां कारयतीत्येतावत्पर्यन्त एवावसीयते । तेन विपदमेव गमकमित्यर्थः । नन्वेवमपि वीक्षणस्येदानीन्तनत्वेन नित्यत्वं तु न सिध्यतीति न दूषणोद्धार इत्यत आहुः **वस्तुत इत्यादि** । तथा च लीलानां नित्यपरिच्छिन्नत्वेन क्षणानां वा तथात्वेन चक्रवद्भ्रमागमान्न काचिदनुपपत्तिरिति भावः । इदं चात्र दिङ्मात्रमुक्तम्, विशेषस्य निबन्धविद्वन्मण्डनादौ सत्कार्यवादस्थापने प्रपञ्चनादिति । **सुबोधिन्यां सामग्रीं विधायेति** । सामग्रीविधाने रोदस्योरपि विद्वन्मण्डनोक्तदिशा दहराकाशभगवन्मनःस्थाधिदैविकभूरूपत्वमवगन्तव्यम् । 'यामैरयन् चन्द्रमसी'तिवत् । **तत्रेति** । सामग्रीसम्पादने । **तत्रेति** । तासु संकल्पोद्बोधने । अत्र मनसः करणत्वेन नादस्य व्यापारत्वाद्वेणोः सहकारितया सहायत्वं बोध्यम् । ननु मायाकार्यं स्थितस्यावरणम्, अन्यत्र स्थितस्यान्यत्र प्रत्यायनरूपो विक्षेपश्चेति द्वितीयस्कन्धे 'ऋतेर्थं य'दित्यत्र सिद्धम् । इयं चान्तरङ्गेति तद्विलक्षणमत्र किं करिष्यतीत्याकांक्षायां तत्कार्यं यदाचार्यैरुक्तं तद्विवृण्वन्ति **वेदेत्यादि** । तथा च यथा बहिरङ्गा मनोवृत्तीरन्यत्र नयति, तथेयमन्तरङ्गैतत्करोति, तदपि करोति । तच्च 'मन्यमाना'नित्यनेन वक्ष्यते । एवं चात्र यथास्थितनयनमेव ततो वैलक्षण्यमिति भावः । 'मन्मायामोहितधियः पुरुषाः पुरुषर्षभ । श्रेयो वदन्त्यनैकान्त्याद्यथाधर्मं यथारुची'त्यत्र प्रमाणस्यान्यत्रयोजनं तत्कार्यं दृष्टम्, नत्वानन्दस्येत्याशयेन कश्चिदाशङ्कते, तदाहुः **अत्रेत्यादि** । **समादधते स इत्यादि** । **तस्येति** । भगवतः । **अत एवेति** । विरुद्धधर्माश्रयत्वादेव । तथा च धर्मरूपताया गतिरूपताया विरुद्धधर्माश्रयत्वस्य च प्रामाणिकत्वेन आनन्दस्यामूर्तत्वाभावेन च धर्मधर्मिविचारेन्यत्रगतिः सुघटा, सामर्थ्यस्यापि धर्मरूपत्वान्न तदाश्रयणेपि दोष इत्यर्थः । नन्वत्र पुष्टिलीला भगवत उच्यते, अतो मर्यादया समाधिर्न युक्त इत्यरुच्या तद्रीत्या समादधते **वस्तुत इत्यादि** । तथा चामूर्तत्वेपि गत्युपपत्तिरित्यर्थः । अत्र स्वरूपमर्यादातिक्रमे मानमाहुः **अत एव रसमित्यादि** । **अनुपज्यत इति** । संयोगपृथक्त्वेनानुपज्यते । मार्गयोर्विततत्वं व्याकुर्वन्तो व्युत्पादयन्ति **यतोन्यत्रेत्यादिना** । **फलरूपेणेति** । भजनस्य विशेषणम् । **प्रतिपादितमिति** । मार्गत्वमितिशेषः । मार्गद्वयवितानप्रयोजनमाहुः **एवं सतीत्यादि** । नन्वन्वेषणादिलक्षणमार्गस्य सौभाग्यमदादिदोषप्रयुक्तत्वमे-

तद्वस्तु तदारोपयतीति शङ्कायां समादधते **स्वामिनीना**मित्यादि । तथा च प्रपतिमदमानानि वदतो मूलादेव समाधिर्बोध्य इति भावः । **प्राकट्यं स्या**दिति । यथा साधारणेपि काले सूर्यचन्द्रमःसम्बन्धे सर्वत्रालोकाह्लादादि, तथा साधारणीषु रात्रिषु लीलासम्बन्धे तथा स्यादित्यर्थः ।

१०-२६-२ **तदोडुराज इत्यस्य टिप्पण्याम्** । भगवन्मनस आधिदैविकत्वात्तत्र देवतानपेक्षणादाभासे देवता नास्तीत्यादिकथनं कथमुपपद्यत इत्याशङ्क्य तत्तात्पर्यमाहुः **अत्रेदं प्रतिभातीत्यादिना** । नन्वेवंप्रणाड्या रसोद्बोधकथने रसस्य जन्यत्वापत्त्या भगवद्रूपता हीयेतेत्याशङ्कायां प्रणाडीतात्पर्यमाहुः **वस्तुत** इत्यादि । तथा च श्रुत्या रसस्य भगवद्रूपत्वे निश्चिते, यथा यज्ञात्मकस्यासद्वेद्यव्यंग्यत्वम्, एवं रसात्मक एतत्प्रणाड्या लोके व्यज्यत इति न तद्धानिरिति भावः । **सुबोधिन्याम्** । नन्वेकदा दृष्टासु बह्वीषु रात्रिष्वेकचन्द्रस्थितिः कथं युज्यत इत्यत आहुः **यद्यपीत्यादि** ।

१०-२६-३ **रमाननाभमित्यस्य टिप्पण्याम्** । एतन्मन्वन्तरे चन्द्रस्यात्रिपुत्रत्वेन लक्ष्मीभ्रातृत्वाभावात्पूर्वमन्वन्तरीयस्य तथात्वेपि तस्य पुराणान्तरे खण्डरूपेण शिवमौलिमण्डनत्वोक्तेरत्र चाखण्डमण्डलतया रमाननामत्वकथनात्पूर्वं नूतनतया व्यवस्थापनाच्च लक्ष्मीभ्रातृत्वं नोपपद्यत इत्यतस्तदाशयमाहुः **भगवानित्यादि** । तथा चानेन भावेनात्र भ्रातृत्वकथनं न लोकसिद्धाभिप्रायेणेत्यतो नानुपपत्तिरिति, नवा लक्षणा, तथा तद्विवाहलीलापीति नात्र लौकिकलेशोपीति हृदयम् ।

१०-२६-४ **निशम्येत्यत्र । सुबोधिन्याम्** । **अङ्गं तु नाशयतीति** । स्वरूपविस्मारकतया कामाङ्गभूतं धैर्यादिकं नाशयतीत्यर्थः । ननु देशान्तरीयो व्यवहारो न देशान्तरीयोत्तमव्यवहारे सति सम्भवतीति कथमेतासां तथात्वमित्यत आहुः **पूर्वमित्यादि** । सति चातुर्ये अनागरीत्वमव्यवहारप्रयोजकमिति पक्षान्तरमाहुः **ताटङ्केत्यादि** । 'कुण्डलं कर्णभूषण'मिति कोशेन तस्य पदस्य सामान्ये शक्तत्वादित्यर्थः ।

दुहन्त्य इत्यत्र । सुबोधिन्याम् । सम्यगुत्सुका इति । विवेकविलम्बासहिष्णुश्चित्तोल्लास औत्सुक्यं तस्य सम्यक्त्वमत्युत्कटत्वं बोध्यम् ।
१०-२६-५

१०-२६-६ **अश्नन्त्य इत्यत्र । क्रम** इति । उत्पत्तिस्थितिप्रलयक्रमः । प्रमार्जनस्य मालिन्यप्रलायकत्वात् प्रलयकर्तृत्वम् ।

१०-२६-७ एतासां तामसीत्वादौ हेतुमाहुः **शरीरेत्यादि** । शरीरसेवादिरेव चात्र लोकधर्मो बोध्यः । यद्यप्यत्र य एवोक्तास्तथापि तत्तदादीनां धर्माणां प्रायपाठात् तादृशत्वं बोध्यम् ।

१०-२६-८ **काश्चित्कृष्णान्तिकमित्यत्र । शब्दपरा** इति । निवारकवाक्यपरा इत्यर्थः ।

तमेव परमात्मानमित्यत्र । ननु भगवति प्रविष्टत्वेपि स्वाप्ययवदज्ञानादिवास-
नायुक्तानामेव प्रवेशात्कथं न मुक्तिप्रतिबन्ध इत्यत आहुः **तदा अज्ञा-**
१०-२६-११ **नेत्यादि** । ज्ञानस्य चिरस्थायित्वपक्षेपि प्राग्जन्मीनार्थास्मरणेन, 'प्राक्कल्प-
विषयामेतां स्मृतिं ते सुरसत्तम । न ह्येष व्यवधात्काल एष सर्वनिराकृति'रिति प्रथमस्कन्धे कालस्य स्मृतिनाशकत्वबोधनेन च कालस्य तथात्वात्तदा तासां प्रतिबन्धके काले यदज्ञानं भगवत्स्वरूपविषयकं, यच्च जाररूपतया अन्यथाज्ञानं, तन्निक्षणावस्थायि विनश्यदवस्थमिति न तयोः स्वरूपतस्तथात्वमित्यर्थः । ननु तथापि वासनान्तरसत्त्वे कथं न तत्स्थितिरित्यत आहुः **वियोजकेत्यादि** । सांसारिक्या विरुद्धवासनायाः कर्मणश्च क्षीणत्वेन तत्स्थापकाभावाच्च न तथात्वमित्यर्थः ।

उक्तं पुरस्तादित्यत्र । भगवानित्यादिना द्वितीयस्यार्थ उच्यते । तेन मुक्ति-
दानार्थमवतीर्णस्यैव साधनता, न तूदासीनस्येति बोध्यते । अत
१०-२६-१३ इत्यादिना तृतीयस्योच्यते । तेन तादृशस्यापि सम्बन्धस्यैव साधनत्वम्,
नत्वसम्बद्धस्य । सम्बन्धश्चाविच्छिद्यमान एव व्यापारः, न तु विच्छिद्यमान इति निर्णीयते । **ज्ञानभक्त्योरस्त्वित्यादिना** तुरीयस्योच्यते । तेन राजोक्तो विरोधः कालभेदेन श्रुतेः सावकाशतया परिह्रियते । तत्रोपपत्तिश्चेश्वरेच्छारूपा बोध्यते । तया फलबलादयं निर्णयो न व्यभिचारशङ्कयापनेतुं शक्य इति च बोध्यत इति ज्ञेयम् ।

नृणां निःश्रेयसार्थायेत्यत्र । **अन्यथापीति** । 'यदा यदा ही'ति वाक्या-
दंशावतारेणापीत्यर्थः । अन्यार्थमागमनं कुतो न सङ्गच्छत इत्यतस्तदु-
१०-२६-१४ पपादयन्ति । **अन्येषामित्यादि** । एतत्प्राकट्यस्य 'योगक्षेमं वहाम्यहम्'-
त्यादिभगवदुक्तसाधनवतां फलदानार्थत्वं वक्तव्यम् । तन्न युक्तम् । तत्र स्वोक्तत्वनिर्बन्धेन प्राकट्यात्, प्रकृते तदभावात् । भूभारहरणादेरंशद्वारापि संभवादतोधुना यत्प्राकट्यं तत्केवलं साधनरहितानां निःश्रेयसायैव । तदेव 'नायमात्मे'ति श्रुत्या साधनान्त(र)निषेधपूर्वकं वरणै-कलभ्यत्वस्यात्मविवरकत्वे श्रावयन्त्योक्तम् । एवं सति इदानीं यत्प्रकटस्तत्प्राकट्यं न ज्ञानकृत्योः साध्यमित्यर्थः । अथ भक्त्यैवेति श्रुत्या साम्प्रतं भक्तिसाध्यता शङ्क्येत, तदपि नेत्याहुः **देहादीत्यादिना** । एवं च सेवकानुपयोगे तत्कृतसेवादिना प्रसादोपि दूरापेत इति साधनप्रकारेण साध्यत्वाभावादन्यस्य न भगवदुपयोग इति न तदर्थमपीदं प्राकट्यमित्यर्थः । तेन सिद्धमाहुः **अतः स्वेत्यादि** । अतो निःसाधनानां फलायैवेति निश्चय इत्यर्थः ।

---

१ प्रत्यपान(?) कूपजलोत्रवत् । २ जारबुद्ध्यापि सङ्गताः । ३ स्मृतिनाशकत्वात् । ४ न मुक्ति-प्रतिबन्धकत्वम् ।

नन्वेवं सति कुतो न सर्वे तदैव मुच्यन्त इत्याकाङ्क्षायां तत्र पूर्वोक्तादतिरिक्तं व्यापारद्वयं सम्बन्धनैरन्तर्यरूपमपेक्षितमिति वदतीत्याशयेन कामं
१०-२९-१५ क्रोधमित्याभासमाहुः एवं सतीत्यादि । सौहृदपदेनाविहितभक्तिरुच्यत इत्याशयेनाहुः सख्यमित्यादि । नन्वस्त्वेवम्, तथाप्यवतारदशायां मर्यादामार्गीयाणामपि सत्त्वात्तेषां कथं सिद्धिरित्यपेक्षायां निर्णयं वक्तुं टिप्पण्यामाहुः नन्वित्यादि । पूर्वोक्ता मर्यादामार्गीयाः । 'यस्य पर्णमयी'त्यादि ।

अत्र केचित् । नेदं संयोगपृथक्त्वन्यायोदाहरणं सम्भवति, फलश्रुतेरर्थवादवाक्यनिष्ठत्वेनार्थवादस्य च प्राशस्त्यपरतया विधेयस्तावकत्वेन फलविध्यन्तराभावात् विहितस्य च फलान्तराभावात् स्तुतेरसत्समारोपणरूपत्वाच्च । किन्तु 'खादिरे बध्नाति, खादिरं वीर्यकामस्य यूपं कुर्यात्, दध्ना जुहोति, दध्नेन्द्रियकामस्य जुहुया'दित्याद्युदाहर्तव्यमिति वदन्ति । तत्र तेषां वेदविरोध एव सम्पद्यते । तथा हि । परमाप्तः परमाप्तवाक्यं वा वेदः । स चेदतथाभूतं वस्तु तथात्वेन स्तुत्यर्थं वदेत्, तदा मिथ्यावादित्वेन सर्वोप्यनाप्त एव स्यात् । न ह्येकत्र ज्ञातमिथ्याभाषित्वस्यान्यत्र विश्वासो भवतीति विधिवाक्योक्तफलेपि तथा कल्पनायाः कर्तुं शक्यत्वात् । अतो विधिवाक्यप्रामाण्यरक्षणायैवार्थवादादिकमपि फलं विध्यभिप्रेततया स्वीकर्तव्यम् । यथा, 'अक्ताः शर्करा उपदधाति' 'तेजो वै घृत'मित्यत्र घृतस्य विध्यनभिप्रेतत्वे अर्थवादो न तत्स्तुतिं कुर्यादिति स्वीक्रियते, तथान्यत्रापि फलस्यानभिप्रेतत्वेपि न सो ब्रूयादित्यपि स्वीकार्यम्, एकवाक्यत्वानुपपत्तेरुभयत्रापि तुल्यत्वात् । न च प्राशस्त्यपरतयैवैकवाक्यत्वमभिप्रेतम्, न तु फलसमर्पकत्वेनापीति वाच्यम् । वाक्योक्तफलसमर्पकत्वातिरिक्तस्य प्राशस्त्यस्यात्रादर्शनेनान्यस्य कल्पयितुमशक्यत्वात् । यथाकथञ्चित्कल्पने तु रात्रिसत्राधिकरणन्यायेन क्लृप्तेन कल्प्यमानबाधस्य वक्तुं शक्यत्वात् । न चात्र कामशब्दाभावान्न विधेरपीदं फलमभिप्रेतमिति वाच्यम् । रात्रिसत्राधिकरणे प्रतिष्ठाया अपि तथात्वापातात् । 'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ती'त्यत्रापि कामशब्दाभावात् । न च तत्रागत्या तथा स्वीक्रियते, अत्र तु होमनिष्पादकत्वेनापि फलवत्त्वसम्भवान्नार्थवादिकफलग्रहणे किञ्चिद्बीजमिति वाच्यम् । यया कयापि तया होमनिष्पत्तेः सम्भवेन पर्णमयीत्वस्य तथापि फलं न किञ्चित्पश्यामः । अतो विधिवाक्याभिप्रेतमेव फलमर्थवादो वक्तीति स्तुतिलक्षणं चोत्कर्षाधायकगुणवर्णनमिति सर्वसामञ्जस्यमभ्युपेयम्, अतो नानुपपन्नं किञ्चित् ।

प्रकृतमनुसरामः । एवं यद्यप्येकेन प्राकट्येन द्विविधयोरपि फलं न्यायसिद्धम्, तथापि नेदमत्र श्रीमदाचार्याभिप्रेतम्, पूर्वसिद्धेति फक्किकया तत्र स्वतन्त्राविर्भावनियमोपन्यासात् । न्यायोदाहरणं तु स्वतन्त्रेच्छत्वेन कदाचित्तथात्वस्यापि संभवज्ञापनाय । अत

एव मूलेपि तथानभिप्रेतम् । तदेतद्धृदि कृत्वाहुः **अत्रेदमित्यादि । सुबोधिन्याम् । स्वतन्त्रे वैपरीत्यशङ्कायाम् । सा चातिदूर** इत्यादिना अन्यासामनिवृत्तौ हेतुकथनस्याप्यसङ्गतत्वं बोध्यम् । तदानीं प्रतिबद्धदेहत्यागज्ञाने हेतोरशक्यनिरूपणत्वात्, 'काश्चित् कृष्णान्तिकं ययु'रित्यत्र काश्चित्पदाद्वचनेन निवृत्तेरपि सूचनाच्च । 'एवं तद्भावनायुक्ता' इत्यत्र तच्छब्दस्य पूर्वपरामर्शित्वमपि तथा । यतोत्र तच्छब्दस्य विषयतया पूर्वपरामर्शितायाः प्रकृतानुपयोगित्वेन वक्तुमशक्यतया सम्बन्धित्वेन साङ्गीकृता । तत्र च सम्बन्धापेक्षया गौरवेण पूर्वानुभूतार्थविषयताया एव प्रत्यासन्नतया लाघवेनौचित्यात् । अतो भावे भेदात्र पूर्वोक्तास्वेतन्निष्ठाशेषधर्मसिद्धिरित्यप्यरुचिबीजं बोध्यम् ।

ता दृष्ट्वेत्यत्र टिप्पण्याम् । अन्तर्गृहेत्यादि । ननु 'निशम्य गीत'मित्यत्र मुख्यमाकारणं वरदत्तरात्रिकाणामेवेति तदनिवारणस्यैव सुबोधिन्यां प्राज्ञलप्रतीतेरन्तर्गृहगतानां कः प्रसङ्ग इति चेत्? उच्यते। मूले 'ता'इत्यस्य
१०-२६-१७
गीताकर्णयितृसाधारण्येपि 'दुहन्त्य' इत्यादिना अन्यपूर्वाणामेव प्रस्तुतत्वात्तास्वेव कासाञ्चित्प्रतिबन्धकथनोत्तरं मुक्त्या शङ्कामात्रनिवारणेपि प्रतिबन्धहेतुप्रश्नाभावेन तदुत्तराभावादेतदनाकारितत्वशङ्कासत्त्वे तादृशनादश्रवणवैयर्थ्यापहारेण लीलायां दोषप्रसक्तेः 'ता' इत्यस्य वृत्तिसङ्कोचेन तत्परिहार एवेति बुध्यस्व । तर्हि प्रतिबन्धलीलायाः किं प्रयोजनमत आहुः **दोषेत्यादि ।** एतासां च स्वरूपं तृतीये सुबोधिन्यां निरूपितं 'ब्रह्मणा कामेन शप्ता वाक् गोपिका' इति । तथा च शुक्रेण भयात् शप्तानां कंसादीनां यथा भयादेव प्राप्तिः, तथात्र कामादिति तं दोषं निवारयितुं तथेत्यतो न कोपि शङ्कालेशः । **तदनङ्गीकारेणेति । इदं तद्भावो ज्ञाप्यत** इत्यनेन सम्बध्यते ।

स्वागतमित्यादिसङ्ख्यातात्पर्यं टिप्पण्याम् । एतासां कुतो न निवारकाणीत्याशङ्कायां गुणप्रसक्त्यभावो न निवारणयोग्यत्वादित्याशयेनाहुः **एतासामित्यादि ।** क्वेति । यदि तादृश्यः स्युः, गच्छेयुः, अतो न, तथा सति
१०-२६-१८।१९
स्थापनार्थो निषेधः, तदा पिष्टपेषः, यदि गमनार्थः, तदा रसरूपत्वहानिर्वाक्यवैयर्थ्यं चेति न काप्युपयोग इति प्रश्नबीजम् । **उपचारेणेति ।** सारूप्यनिबन्धनया गौण्या । तथा च यथा भगवान् 'अप्राणो ह्यमनाः' इति श्रुत्या प्राणादिरहितोपि 'आनीदवातं स्वधया तदेकम्''प्राणन्नेव प्राणो भवति, वदन्वा'गित्यादिश्रुत्या तत्कारी श्राव्यते, तथा 'रसो वै स'इति रसतया श्रावितो मानसीनो भावान् स्वात्मकानेवैवं तत्र तत्र विभजन् स्वं रूपं स्वदासेष्वाविष्करोतीति भावः । एवं यद्यपि श्रौतप्रक्रियया सर्वसिद्धिः, तथापि श्रीभागवतस्य पुराणत्वेनात्र तत्प्रक्रियैव ज्यायसीत्याशयेनाहुः **वस्तुत इत्यादि ।** जन्मप्रकरणे 'तमद्भुत'मित्यत्र 'आत्मा कार्यं च भूतानी'ति कारिकायां ये गुणा भगवदात्मका उक्ताः, त एत एतत्कार्यका इत्याशयः । एवं विवरणेनान्तपदवैयर्थ्यं परिहृतम् । तामससात्त्विकीत्यादिविभागश्चोपपादितः । एवञ्च

भेदस्मृतिप्रतिपन्ना मायिकाः सदंशा वा, अभेदश्रुतिप्रतिपन्नाः सदंशाश्चिदंशा वा, एते त्वानन्दांशा इति बोध्यम् ।

सुबोधिन्याम् । **मातर** इत्यत्र । **सर्वा नागता इति** नागन्तव्यमित्यनेन 'काश्चित्कृष्णान्तिक'मित्यत्र यथा शब्दपराणामदृढो भावः, तथा युष्माक-
१०-२६-२०　मपीत्यापादितं बोध्यम् ।

दृष्टं वनमित्यत्र । **परितो विलोकयन्ती**रित्यनेन भावादार्ढ्यनिर्णायकमापादितं बोध्यम् । अग्निमेत्यादिना शिष्टभेदस्य राजससात्त्विकत्वं बोधितम् ।
१०-२६-२१　**वनं तामस**मित्यादिना राजसराजसेष्ववान्तरभेदः सूचितः, तेन तुरीयपादे यमुनासम्बन्धाद्गुणातीतत्वमपि बोध्यम् । यद्यपि 'वनं तु सात्त्विको वास' इत्येकादशे भगवता सात्त्विकत्वमुक्तम्, तथापि तन्मर्यादायां विषयसम्बन्धाभावेन वैराग्यपोषकत्वात्, पुष्टौ तु रतिस्थानतया मोहकत्वाद्वनं तामसमित्युक्तम् । अत एव यत्र न रतिस्थानत्वम्, तत्र न प्रविष्टं भक्तैरिति स्फुटमग्रिमाध्याये । **पर्वादिवुद्धाविति** । ननु मर्यादामार्गेपि 'नामावास्यायां च पौर्णमास्यां च स्त्रियमुपेयात्, यदुपेयान्निरिन्द्रियः स्या'दिति श्रुतेः 'पर्वाण्याद्याश्चतस्रश्च वर्जये'दित्यादिस्मृतेश्च पुरुषमधिकृत्यैव प्रवृत्तिदर्शनात्पुंस एव दोष इति ताः प्रत्येवं कथनमसम्भवीति चेत् । न । शास्त्रस्य पुरुषाधिकारकत्वेपि ज्योतिष्टोमादिफलं यथोभयोः कर्मणि सहभावात् 'सहोभौ चरतां धर्म'मित्यादिस्मृतेश्च तथा प्रायश्चित्तादिस्मृत्यनुरोधान्निषिद्धफलस्यापि समानत्वादिति बुध्यस्व । **वर्णनायामिति** । एतन्निरूपणस्य वर्णनाङ्गत्वात्तथेतिभावः । रसोद्बोधक इति भावप्रधानः । प्रमदादाविति वा, श्रमादिनिवारकत्वादिति ।

तद्यात मेत्यत्र । 'भवन्तश्च पुरुषा' इत्यनेन एतासां श्रुतिरूपाभ्योपि भेदो बोधित
१०-२६-२२　इति प्रतिभाति ।

अथचेत्यत्र । ननु सिद्धान्तस्य दूषणानर्हत्वात्कथं पूर्वपक्षार्थमनुवाद इत्यत आहुः **निरुक्त** इत्यादि । स्नेहात्सर्वत्यागपूर्वकागमनरूपः भावः भगवत्त्वेन
१०-२६-२३　कामपूरकतां गाहमानो गुणात्मकः जारत्वसङ्कीर्णतया तां गाहमानो दोषात्मक इति फलं भगवदात्मकं न प्रयच्छति, तत्र हेतुर्लौकिको भवति । अतस्तदुभयरूपतां तत्रापाद्य पूर्वपक्षीक्रियत इत्यतोनुवाद इत्यर्थः । **तर्हीति** । यद्येवं भावेनागमनं युक्तम्, तर्हि 'ये यथा मा'मिति प्रतिज्ञा पालनीयेत्यर्थः । नन्वेवं सति प्रतिज्ञायाः कथं सिद्धिरित्यत आहुः **स्नेह एवे**त्यादि । ये मां निरुपधिस्नेहेन भजन्ते, तेष्वहं तथैव स्निह्यामीत्येतावतैव प्रतिज्ञासिद्धिः, कृतिस्त्वशक्या, नमनादीनां जीवधर्मत्वादित्यर्थः । **साधारणमिति** । सर्वत्रैवम्, न तु भवतीष्वेवेत्यर्थः । स्थितिपक्ष उपपन्नत्वं व्युत्पादयन्ति **न** हीत्यादि । फलितमर्थमुपदेशार्थमाहुः **निःकपटे**त्यादि । **उभयत्रेति** । पक्षद्वयेपीत्यर्थः ।

१०-२६-२५, **दुःशील** इत्यत्र । अघनोपीत्यादिना मूलस्थोऽपिशब्दो व्याख्यातो ज्ञेयः ।

श्रवणादित्यत्र । **भक्तिर्ही**त्यादि । तथा चैवं दशविधायामपि न सम्बन्धापेक्षे-त्यर्थः । **सुतरामिति** । तत्रैव फलत्वस्य परिसमाप्तेस्तथेत्यर्थः । तदेव
१०-२६-२७ स्पष्टयन्ति स्नेह इत्यादिना । **तदर्थस्यानुभव** इति । मानसः परोक्षानुभवः निदिध्यासनं वा । एतयोर्दर्शनशब्दानभिधेयत्वात्पक्षान्तरमाहुः **कृपये**त्यादि । स्थितिपक्षं स्पष्टयन्ति तथेत्यादिना । तथा च स प्रकारान्तरापन्नः, अयं तु तद्विलक्षण इत्यर्थः । तर्हि तौल्ये कतरस्य ज्यायस्त्वमित्यत आहुः **गृहे**त्यादि । तथा च तेषां विहितं भवति, नतु स्वतन्त्रमित्ययमेव ज्यायानित्यर्थः ।

१०-२६-२९ **इतीत्यस्याभासे** । **तत्रापीति** । शरीरपरित्यागेपीत्यर्थः ।

प्रेष्ठमित्यत्र । **टिप्पण्याम्** । **न स्यादेवेति** । वक्ष्यमाणं कार्यं न स्यादेवेत्यर्थः ! **सुबोधिन्याम्** । **कर्तुं शक्य** इति । नीतौ वाग्वादस्यातिप्रिये एव
१०-२६-३० निषिद्धत्वेनोदासीने दोषाभावात्तथेति पूर्वपक्षीकरणे हेतुरुक्तः । नन्वत्र रूपान्तरस्यादर्शनात् रूपान्तरेण वदतीत्यनिश्चयेन कथं पूर्वपक्षीकरणमित्याकांक्षायामाहुः **नही**त्यादि । तथा च 'प्रियं किं करवाणि व' इत्यनेनोपक्रमे स्वस्य साधनत्वकथनाच्छेषैः प्रतिबन्धकरणाच्च रूपान्तरावगमः, पूर्वोक्तहासाच्च फलरूपस्यैवं तूष्णींकृत्त्वावगम इति कार्यबलेन रूपान्तरावगतौ युक्तं पूर्वपक्षीकरणमित्यर्थः । **स** इति । फलात्मा । **तदाहेति** । तस्मात्फलात्मकत्वं शुक आहेत्यर्थः । **सर्व** इति । मुक्तिपर्यन्ताः । नन्वेवं सत्ययं कुतो न त्यज्यते तत्राहुः **काममय** इत्यादि । 'काममय एवायं पुरुष' इति श्रुत्यर्थोयम् । श्रुतिस्तु शारीरब्राह्मणस्था बृहदारण्यके । तेन स्वरूपधर्ममपि त्यक्त्वा भगवान् गृहीत इत्युक्तम् । **यदीति** । भगवता स्वानङ्गीकारे । **तस्मादिति** । सर्वकामानां भगवदर्थं त्यागात् । संरम्भ-प्रयोजनमाहुः **सर्वोपी**त्यादि । तथा च वाम्यतात्पर्यं निर्णीय ततो यत्सेत्स्यति तद्विभासाम इत्येतदर्थं संरम्भ इत्यर्थः ।

मैवमित्यत्र । **नन्वशक्य** इत्यादि । भगवानेको, भक्ताश्चानेका इत्यशक्ये स्थापने तदर्था स्तुतिः कथं कर्तव्येत्यर्थः । **दयायामि**त्यादि । तथा च यः
१०-२६-३१ पूर्वं विषजलाशयादिभ्योऽत्रनेन स्वसामर्थ्यं प्रकटितवांस्तस्य 'भगवत एवं कथनं नासामर्थ्यसूचकम्, अपि तु दयाभावस्येत्यर्थः । **अनुचितपदमिति निरूपि-तमित्यनेनान्वेति** । **जारत्वेनेति** । जारत्वमनुसन्धायेत्यर्थः । एतेन 'प्रियं किं'मित्यत्र सूचितं कामस्य प्रियमपि निराकृतम् । भजनाग्रहस्य दुष्टत्वमुद्घाटयन्ति ये **यथे**त्यादि । तथा च प्रतिज्ञाभञ्जकत्वाद्दुष्ट इत्यर्थः । ननु प्रतिज्ञायां यथातथेतिपदाभ्यां प्रकारसाम्य-मुक्तमिति 'यथा भवत्य आगताः, तथा मयाप्यागन्तव्य'मिति तत्पूरणार्थमेव साम्प्रतमभजन-

१ सख्यादिषु वन्दनादिषु एतादृशसम्बन्धापेक्षाऽथवा श्रवणादिशक्तिसङ्कोचः ।

मिति चेत्तत्राहुः **यदीत्यादि** । नन्वस्त्वेवम्, तथापि भजनप्रार्थना किमर्थेत्यत आहुः **एतच्चेत्यादि** । विवक्षितं भजनं विवेचयितुमुपपादयन्ति **देवो हीत्यादि** । भजनमत्र फलदानाद्बोध्यम् । देवताविग्रहवादस्य व्यासाभिप्रेतत्वेन कर्मण्यपि देवताया एव द्वारत्वात् । शास्त्रं त्यागमन्त्रलिङ्गादिरूपम् । अस्त्वेवमन्येषाम्, तावता भगवतः कथं तथात्वमित्यत आहुः **तत्रापीत्यादि** । 'यो देवानां नामधा एक एव', 'एकं सद्विप्रा बहुधा वदन्ती'-त्यादिश्रुतेस्तत्रापि तेषु देवेष्वपि स एवेति तस्यैव तथात्वमित्यर्थः । तदेवाहुः **पूर्वेत्यादि** । भजनं भगवत्कर्तृकम् । ज्ञानभक्त्योरपि फलदानात्सुतरामिति । नन्विदं सोपधौ, तच्च 'प्रियं किं करवाणी'त्यनेनोरीकृतमेवेति प्रकृते को विशेष इत्यपेक्षायां निरुपधिप्रपत्तिव्यवस्थामाहुः **आदीत्यादि** । 'अकामः सर्वकामो वे'त्यादिस्मृतिभिर्भजनविधानात्तस्य परमपुरुषत्वेन निष्कामसेव्यत्वमुक्तम् । तथा 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणे'त्यादिश्रुतौ रन्तृत्वबोधनाद् देवत्वमुक्तम् । तावता निरुपधिप्रपत्तावपि भजनं सेवाकारणरूपं सिद्धमेवेत्यर्थः । तथा च प्रतिज्ञावाक्ये यथा प्रकारवाचके पदे स्तः, तथा प्रपत्तिभजनवाचके अपि स्तः, तेन यत्प्रकारिका प्रपत्तिः, तत्प्रकारकं भजनमित्यर्थो भवति । तथा सति निरुपधिप्रपत्तौ सेवाकारणरूपं सोपधौ तत्फलदानरूपं भजनं करोमीति फलति, तस्मात्प्रार्थ्यत इति भावः । तेन लोकन्यायोऽपि न विरुध्यत इत्याहुः **नहीत्यादि** । नहीति पदद्वयं पुरुषान्तरेत्यादावपि सम्बध्यते । नहीत्यादिना यत्सिद्धं तदाहुः **अनङ्गीकार इत्यादि** । इदं लोकन्यायाविरोधादिचिन्तनं प्रकृतानुपयोगीत्याशङ्कायां **टिप्पण्यां** तत्तात्पर्यमाहुः **अनेनेत्यादि** । **सुबोधिन्याम्** । **एतेनेति** । 'देवो यथादिपुरुषो भजत' इति दृष्टान्तदानेनेत्यर्थः । विवक्षितविज्ञापनस्यैतावतैव सिद्धेर्मुमुक्षुपदमनतिप्रयोजनमित्याशङ्क्य तत्तात्पर्यं विवृण्वन्ति **किञ्चेत्यादि** । अत्र स्फुरतीत्यन्तं 'यमेवैष वृणुत' इति श्रुत्यर्थः, शेषस्तु लिखितायाः । ननु भजधातुः सेवावचन इत्यात्मीयत्वेन परिग्रहादेः कथं भजनत्वम् । 'एष ह्येवे'ति श्रुतेश्च 'को ह्येवान्यात्कः प्राण्यात्, यदेष आकाश आनन्दो न स्या'दिति जीवनरूपं कार्यं प्रक्रम्य पाठात्कथं मुमुक्षुविषयत्वमित्याशङ्क्य न्यायेन तां निवारयितुमाहुः **स्वाप्ययेत्यादि** । अयं न्यायश्चतुर्थस्य चतुर्थपादेऽस्ति । तत्र हि 'न तदश्नोति कश्चन, न तदश्नोति कश्चने'ति 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिते'ति विकरणव्यत्ययेन भोजनवचनाशधातुघटिततया भोगनिषेधकतद्बोधकयोर्माध्यन्दिनतैत्तिरीयश्रुत्योरितरेतरविरोधे तत्सामञ्जस्याय मुक्तौ निर्गुणसगुणविभाग आदरणीय इति प्राप्ते स्वाप्ययसूत्रं पठित्वा 'तद्यथापि हिरण्यनिधिं निहितमक्षेत्रा उपर्युपरि सञ्चरन्तो न विन्देयुः, एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्यः, एतं ब्रह्मलोकं न विन्दन्ती'ति छान्दोग्यश्रुत्या सुषुप्तौ ब्रह्मज्ञानाभावेनाप्राप्तिश्रावणात् 'ब्रह्मविदाप्नोति पर'मितिश्रुत्या मुक्तौ ज्ञानेन परप्राप्तिश्रावणादाविष्कृतं भोगनिषेधकतद्बोधकश्रुत्युक्तं स्वाप्ययसम्पत्त्योरन्यतरापेक्षम्, 'सम-

पीतो भवती'ति श्रुतेः स्वाप्ययः सुषुप्तिः, सम्पत्तिः ब्रह्मसम्पत्तिः पुष्टिमार्गीयो मोक्षः, तयोरन्यतरापेक्षम् । तथा च निषेधिका स्वाप्ययविषया, बोधिका तु मुक्तिविषया । युक्तं चैतत् । 'लोकवत्तु लीलाकैवल्य'मितिसूत्रेण पूर्वं लीलाया मुक्तित्वेन व्यवस्थापनादिति हिशब्दार्थ इति व्याख्यातम् । तच्च प्रकृतानुपयोगीत्यस्य न्यायस्योपन्यासो न युक्त इत्याशङ्क्य **टिप्पण्यां** तस्यार्थमाहुः स्वाप्ययेत्यादि । अत्रेदं प्रतिभाति । तृतीयस्य द्वितीये 'तदभावो नाडीषु तच्छ्रुतेरात्मनि चे'त्यत्र सुषुप्तेर्द्वैविध्यमङ्गीकृतम् । तत्र नाडीषु सुषुप्तावानन्दाभावः । आत्मनि सुषुप्तौ तु स्वपितिनाम । 'सता सोम्य तदा सम्पन्नो भवती'तिच्छन्दोगश्रुतौ सुषुप्तिसाक्षिसान्निध्यस्य कथनात् । अथ 'यत्र सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति, तद्वास्यैतदात्मकाममाप्तकाममकामं रूपम्, तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं वेद, नान्तरम्, एवमेवायं शारीर आत्मा प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं वेद, नान्तर'मिति ज्योतिर्ब्राह्मणे संपरिष्वङ्गकथनाच्च, तत्रापि सामग्रीसान्निध्ये सिद्धे भोगस्य निराबाधत्वान्निषेधिकायाः श्रुतेः सुषुप्तिविषयत्वमसङ्गतमिति शङ्का स्यादिति तां वारयितुं तत्र प्राज्ञरूपस्यैव सान्निध्यं परिष्वङ्गश्च, न तु परब्रह्मणः । तथा 'नाहं खल्वयं भगव एवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति, नो एवेमानि भूतानि विनाशमेवापीतो भवति, नाहमत्र भोग्यं पश्यामी'ति छन्दोगश्रुतौ भोग्यकथनाद्भोगसुखादिसाक्षात्कारात्मनः अभावान्निर्विषयज्ञानस्य सत्त्वेपि तस्य भोगरूपत्वाभावात्तत्र न भोगोपीति निषेधिकाया श्रुतेः सुषुप्तिविषयत्वं युक्तमेव । एवं च सति प्रकृते 'देवो यथा भजत' इत्युक्तौ सुषुप्तिसमभजनप्राप्तिः, 'आदिपुरुषो यथे'त्युक्तौ 'तदनुप्रविश्य सच्च त्यच्चाभव'दिति श्रुतिबोधितरीत्या प्रविष्टस्यैव जीवान्तर्यामिभावेन तद्रीतिकभजनप्राप्तिः, 'देवो यथादिपुरुष' इति पदद्वयोक्त्या पर्यङ्कविद्योक्तरीत्या मुक्त्यनन्तरं भजनप्राप्तिः, नत्विदानीमिति तत्त्रयमपि व्यावर्तयितुमत्र मुमुक्षुपदम्, तेन तैत्तिरीयोक्तरीतिकं भजनं विवक्षितम्, एतदेव विशेषतो वक्तुमशक्ता इत्यनेन बोधितम् । एवं भजनं तदर्थप्राकट्येन भवति, नेतरथेति तद्बोधनाय न्यायोपन्यासोऽत्यन्तं युक्ततर इति ।

ननु मतान्तरेत्र भिन्न एवार्थः । तथा हि । 'तत्केन कं विजानीया'दित्यादौ विशेषविज्ञानवारणश्रवणं सुषुप्तिसम्पत्तिसापेक्षम्, सम्पत्तिः ब्रह्मसम्पत्तिः, परममुक्तिः, न तु सगुणविद्याविपाकभूतसगुणमुक्तिपरमिति मायावादिनः । 'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यती'ति विशेषविज्ञानवारणश्रवणं सुषुप्तिमरणसापेक्षम्, सम्पत्तिर्मरणम् । 'तस्य तस्य प्रयतो वाङ्मनसि संपद्यत' इति श्रुतेः । न तु परममुक्तिपरम्, यत 'एतेभ्यो भूतेभ्यः समुत्थाये'ति शरीरे प्रियविषयनिबन्धनं विज्ञानं 'न प्रेत्ये'ति प्रतिषिध्यते, न तु मुक्तस्य । तदवस्थाया अत्रानुक्तेः । तथा 'सर्वं पश्यः पश्यति, सर्वमाप्नोति सर्वशः' इति श्रुतेश्चेति भट्टभास्कररामानुजाचार्यमते । 'तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवती'ति तीर्ण-

शोकत्वश्रुतिः सुषुप्तिमुक्तिपरेति मध्यभाष्ये । तत्कथमत्र विवक्षितार्थनिश्चय इत्याकांक्षायामेकहेलया तेषामविरोधं वक्तुं मायावादिमतमुपक्षिपन्ति केचित्त्विति । अविरोधं व्युत्पादयन्ति एवमित्यादि । सुषुप्तिब्रह्मसम्पत्त्योर्ब्रह्माविर्भावस्य सर्वमतसाधारण्यान्मरणेपि मोहदशायां 'मुग्धेऽर्धसम्पत्तिः परिशेषादि'ति सूत्रेणार्धाविर्भावाङ्गीकाराच्च सर्वमतेपि ब्रह्माविर्भावस्यैव ज्ञानाभावेपि हेतुत्वमिति पूर्वोक्तव्याख्यानं सर्वाविरुद्धम् । अतः सुखेन निश्चय इत्यर्थः ।

प्रकृतमनुसरामि । एवञ्च 'को ह्येवान्या'दितिश्रुतिर्मुमुक्षुविषयेति प्रकरणादेवावसीयत इति तज्जीवनपरैवेति न कोपि शङ्कालेश इति दिक् । एतत्सर्वं हृदि कृत्वाहुः **यथेत्यादि** । **एतेनेति** । मुमुक्षुपददानेनेत्यर्थः । विज्ञापनविरुद्धमग्रिममिति शङ्कानिरासायाहुः **अग्र इत्यादि** ।

यत्पत्यपत्येत्यत्र । धर्मवित्पदतात्पर्यमाहुः **बहिरित्यादि, त्वयोक्तमित्यन्तम्** ।

१०-२९-३२ नारदादिभिर्भगवद्धर्मस्य याज्ञवल्क्यादिभिरात्मधर्मस्यापि स्वस्वशास्त्रे कथनात् ज्ञायते, यदा तैर्देहविशिष्टस्य कर्तृत्वमनुसन्धीयते, तदैव शारीरधर्मस्य स्वधर्मत्वमुच्यते, नत्वन्यदा । अन्यथा 'अयं हि परमो धर्मो यद्योगेनात्मदर्शन'मित्यादौ तस्य परमं न वदेयुः । तथा च शारीरधर्मबोधनं तत्र यथा जघन्याधिकारविषयम्, तथात्रापीत्यर्थः । अथाध्ययनविधिवदिदं प्रथमाधिकारमनुसृत्योक्तम्, नतु बाहिर्मुख्येनेति चेद्विभाव्यते, तत्राहुः **तस्यापीत्यादि** । अदूषणं व्याकुर्वन्ति **स्त्रीभिरित्यादि** । विषयनिर्धारमुपपादयन्ति **नहीत्यादि** । **सेति** । स्त्रीधर्मत्वेनोपदिश्यमाना । ननु नाहं गुरुः, किन्तु भवतीभिः क्रियमाणमनुवदामीत्यत आहुः **न चेत्यादि**। तथा च पूर्वकालीना तत्कृतिर्लोकानुसृता, न शास्त्रानुसृता, विध्यज्ञानात्, अत इदं प्रमाणवाक्यं नानुवादकमित्यर्थः। ननु इदानीं ज्ञात इति गन्तव्यमित्यत्राहुः **नापीत्यादि** । यदि सकृच्छ्रवणमात्रेण धर्मः स्फुरेत्, गुरुसेवाविधायकं शास्त्रं व्यर्थं स्यात्, अतोवश्यकर्तव्यत्वेन स्फूर्त्यर्थं तथेत्यर्थः । एवं स्वस्य प्रथमाधिकारमङ्गीकृत्य धर्मावस्थाविचारेण विषयनिर्धार उक्तः । अतःपरं वाक्यतात्पर्यविचारेण तमाहुः **किञ्चेत्यादि, अतो वाक्येति** । अनुभवप्रामाण्येन तथा निश्चयात्। तथा च यथा वेदे परोक्षवादेन कर्ममोक्षाय कर्मविधानम्, एवमत्रापि तद्विधानम्। तद् यथा त्वत्सेवायां पर्यवस्यति, तथेदमपीति विवितात्पर्यविचारेण विषयनिर्धार उक्तः । अतःपरं विध्यर्थानुष्ठानाधिकारविचारेणापि विषयं निर्धारयन्ति **किञ्च, धर्मेत्यादि** । धर्म्यत्र देही । **अनाप्त इति** । विधिरिति शेषः । संमतिं चात्राहुः **अत एवेति** । धर्म्यविरोधेन कर्तव्यत्वादेवेत्यर्थः । ननु सर्वस्याराद्धानिष्टेपि प्रवर्तनस्य दर्शनान्नायं नियम इत्यत आहुः **द्रव्येत्यादि** । तत्र मरणस्यैवेष्टत्वेन फलवत्त्वेन देहप्रतिपत्त्यन्तराभावेन च तथात्वेपि यत्र तस्य नेष्टत्वं, देहस्य प्रतिपत्त्यन्तरं फलान्तरं वा, तत्र तथात्वं न शक्यवचनम्, न्याय-

वैयर्थ्यप्रसङ्गात्, इतोऽन्यत्र तु नियम एवेत्यर्थः ।।यद्येवं तर्हि देहोनुरोद्धव्यः, किमिति मदर्थं क्रियत इत्यत्राहुः तदित्यादि । सर्वरूपत्वे गमकमाहुः यत इत्यादि । अतिशायने इष्ठन् । स क इत्यपेक्षायामात्मपदोक्तं देहादित्रयं बन्धुश्च । तथा च शास्त्रे देहानुरोधो न स्वदेहत्वोपाधिकः, अपि तु प्रियत्वोपाधिको, भवांश्च सर्वैः प्रकारैः प्रिय इति भवानेवानुरोद्धव्यो, न तु देह इत्यनुष्ठानाधिकारविचारेणापि भवानेव सेव्य इत्यर्थः । नन्वस्त्वेवं सेव्यत्वम्, तथापि देहस्य सेव्यमात्रसाधारणत्वात्तस्य मदेकविनियोगाय किमित्याग्रह इत्यत आहुः किञ्चेत्यादि । 'भवाय नाशाये'तिवाक्यं तु पञ्चमस्कन्धप्रथमेऽध्याये प्रियव्रतं प्रति ब्रह्मणोक्तम् । 'भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदाऽभयाय, सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनताङ्ग धत्त' इति । अत इति । अस्मिन्वाक्ये अव्यक्तदिष्टपदेन भगवद्दत्तत्वं बोध्यम् । चेतन इत्यादि । तथा च प्रियव्रतदेहस्य राज्याद्यर्थत्वाज्ञाने यथा ब्रह्मणा स बोधितः, एवमज्ञानेनान्यस्मै दाने ततो निवार्य स्वसेवार्थं प्रेरणीयाः, नतु विपरीत इति बोधितम् । नन्वस्त्वेवम्, तथापि मयेदानीं तथा प्रेर्यत इति तथा प्रियव्रतवत्कर्तव्यमित्यत आहुः अत इत्यादि, वस्त्वित्यन्तम् । तथा च स हि देहे निरभिमान इति तथा कृतवान् । तदुक्तं तत्रैव 'अनवबुध्यमान इव महामना बुभुजे' इति । हृदि तत्त्वं बुद्ध्वा बहिरनवबुध्यमान इव देहाभिमानी वेत्यर्थात् । अस्माकं तु देहः प्रियः, भवांस्तु प्रियतम इति तथेत्यर्थः । ईदृशेऽधिकारे एतदेव कर्तव्यमित्यत्र प्रमाणमाहुः अत्रेत्यादि । प्रेष्ठत्वं विवेक्तुं पदान्तरं व्याकुर्वन्ति किञ्चेत्यादि । येनेति । हेतुनेत्यर्थः ।

कुर्वन्तीत्यत्र । इदमिति । निषिध्यमानं बन्धुसाध्वसम् । तत्रापीति । साध्यसाकर्तृष्वपि । अत्रापि भगवदुक्तधर्माधिकारिनिर्धारद्वारा विषयनिर्धार
१०-२६-३३ एव फलिष्यतीति बोध्यम् । ननु भगवदनुवृत्तेरात्महितत्वसाधनाय भगवत्सेवा आत्महिता, अविगीतमहदाचारविषयत्वात्, शीलादिवदिति वक्तव्यम् । अत्र रतेस्तथात्वसाधने नार्थान्तरमित्यत आहुः स्नेहेनेत्यादि । अर्थस्तु टिप्पण्यां प्रभुचरणैरेव विवृतः । तथा च रतेस्तथात्वसाधनेनैव सेवायास्तथात्वसिद्धिरित्येवं साधनं न दोषायेत्यर्थः । नन्वत्रात्महितार्थिनस्त्वयि रतिं कुर्वन्तीति कथनेन 'न वा अरे देवानां कामाय देवाः प्रिया भवन्ति, आत्मनस्तु कामाय देवाः प्रिया भवन्ती'तिश्रुत्युक्तन्यायेनौपाधिकप्रीतिप्राप्तौ सर्वात्मभाववत्त्वभङ्गप्रसङ्ग इत्यतष्टिप्पण्यामाहुः अत्रोपधीत्यादि । ननु मास्तु पुत्रादौ प्रीतिः, तथापि धर्मत्वेन नित्यकर्मवदिदमपि कर्तव्यमित्यतः सुबोधिन्यामाहुः यदीत्यादि । भगवति रतिकरणेन कथमात्मकुशलत्वमित्यपेक्षायां तदुपपादयन्ति तेषामित्यादि, अन्यगामीति । इन्द्रियमिति शेषः । अत्र प्रमाणमाहुः यत इत्यादि । इदं वाक्यमेकादशस्थम् । 'यतो यतो निवर्तेत विमुच्येत ततस्ततः । एष धर्मो

नृणां क्षेमः शोकमोहभयापह' इति । अत्र हि 'यतो यतो निवर्तते'ति कथनान्निवर्तनसामर्थ्याभावेऽन्यगामिकर्तव्यतायाः प्राप्तिः, निवृत्तौ विमुक्तिकथनान्निरुद्धानात्मगामिताप्राप्तिर्बोध्या । निवृत्तेरुत्तमत्वेपि न तन्मात्रकृतावेव कौशलपर्यवसानम्, अपि तु साधनविशेषेण तथा कृतावित्याशयेनाहुः **तत्रापीत्यादि** । इदं च द्वितीयस्कन्धे 'यदङ्घ्र्यनुध्याने'त्यादौ स्फुटं भवति । **पूर्ववदि**ति । पूर्वश्लोक इवेत्यर्थः । एवमिदं वादमुद्रया औपाधिकप्रीतिपक्षमङ्गीकृत्य हीनाधिकारविचारेपि तेषां कौशलनिरूपणेन विषयो निर्धारितः । अकुशलैरेव बन्धुसाध्वसं न कार्यम् । मात्राद्यनुवृत्तिश्च कार्येति । अतःपरं सिद्धान्तरीत्या कौशलं तदर्थं निश्चिन्वते **किञ्च, भवानित्यादि** । तथा च 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते, स उत्तमः पुरुष' इत्यादिश्रुतिभिः 'स एव सर्वं परमार्थभूत'इत्यादिस्मृतिभिश्च तथात्वात्त्वद्रतिकर्तृत्व एव ज्ञानकौशलम्, नान्यथेति । एतदज्ञातॄणामेव तदकरणादिकमित्यर्थः । अतःपरं सेव्यविचारेणापि कौशलं समर्थयन्ति **किञ्च, प्रियस्येत्यादि** । तथा च 'नाल्पे सुखमस्ति, भूमैव सुख'मित्यादिश्रुतिभिस्तथेत्यर्थः । ननु भूमप्राप्तेः पूर्वमनिषिद्धे सुखसाधनेऽपि प्रवृत्तिदर्शनात्कुतोयं नित्यप्रियसेवानिर्बन्ध इत्यत आहुः **अन्यथेत्यादि** । तथा च यद्ययं निर्बन्धो न शास्त्राभिप्रेतः स्यात्, तर्हि तथा स्यात्, यदि तथा स्यात्, तदा तदभ्यनुज्ञापि स्यादित्यर्थः । तदेतट्टिप्पण्यामुद्भाव्य साधयन्ति **नन्वित्यादिना, एतत्समानयोगक्षेमत्वादि**ति । नित्ये परिच्छिन्ने समागमस्यैव जन्मत्वात्स यथा जन्मान्तरे तथा प्रत्यहमपि, सुषुप्तौ भगवति लीनस्यैव जीवस्य प्रत्यहं पुनरागमनस्य 'सर्व एवात्मानो व्युच्चरन्ती'त्यादिश्रुतिसिद्धत्वान्नित्यप्रलयसिद्ध्या देहस्याप्यवस्थाभेदेन भेदाल्लिङ्गशरीरस्य चामुक्त्यैकत्वेनाप्रयोजकत्वात्तथेति भावः । यद्येवं तर्हि स्मृतिः कथं लौकिकपतिभजनं विधत्त इत्यत आहुः **प्रभोरित्यादि** । तथा च पत्यौ विष्णुबुद्ध्या सेवनस्य विधानदर्शनाद्गौणपक्षमाश्रित्य व्रीह्यभावे नीवारवत्तदंशसत्तया तत्र तथा विधानमित्यर्थः । अत्र गमकमन्यदाहुः **अत एवेत्यादि** । यतो गुणाधिक्य एव पतित्वमत एवेत्यर्थः । तथा च जारे विधिबोधितगुणाभावेन दोषाधिक्येन च न गौणमपि तदिति न तत्सेवायां गौणधर्मत्वमपीति भावः । एवमत्र धर्मविचारकाणां ज्ञातॄणां आनन्दविचारकाणां च चरित्रस्य निर्णायकत्वकथनेन भगवदुक्तवाक्यतात्पर्यं निर्धारितम् । अतःपरं तद्दार्ढ्यार्थं पुरस्स्फूर्तिकेऽर्थे दोषं दर्शयन्ति **किञ्च, पतीत्यादि** । **अन्यथे**ति । धर्महेतुत्वे । 'धर्मस्य ह्यापवर्ग्यस्य नार्थोर्थायोपकल्पत' इत्यत्र तथा निर्णयादित्यर्थः ।

चित्तं सुखेनेत्यत्र । मनस इव करयोरपहरणं न संभवतीति तत्प्रकारमाहुः **कामेने**ति । भगवदभिलापेणेत्यर्थः । **अनेने**ति । क्रियाशक्त्यभावकथ-

१०-२९-३४ नेनेत्यर्थः । ननु ते स्वत एव यास्यन्तीत्यत आहुः **आशेत्यादि** ।

सिञ्चाङ्गेत्यत्र । ननु यथा पित्तादिना हृदये तापो वहिश्चन्दनादिपूरेण शाम्यते, तथायमपि वाह्यैः शमनीय इत्यत आहुः **अलौकिक** इत्यादि । कथ-
१०-२६-२५. मस्यालौकिकत्वमित्याकांक्षायां तथात्वं व्युत्पादयन्ति **कन्दर्पे**त्यादि । नन्वेवं सति मोक्षोऽस्य देय इत्यत आहुः **सृष्टी**त्यादि । एतत्सृष्टिकारणत्वादस्य मोक्षे द्वयं सृष्टिरेवान्यथा स्यादित्याशयेन फलितमाहुः **कामे**त्यादि । ननु देहाभावे मत्पद-पर्यन्तमपि कथं गन्तव्यमित्यत आहुः **देहे**त्यादि । 'तं विद्याकर्मणी समन्वारभेते पूर्व-प्रज्ञा चे'ति श्रुत्युक्तस्य देहबीजस्य अन्तर्गृहगतानामिव ध्यानेन दग्धत्वाद्देहान्तरानु-त्पत्तौ अन्तर्यामी खगत्वादुड्डीय त्वत्पादयोरेवायास्यति । अक्षरस्य तद्धामत्वात्तदा तच्छा-यारूपा वयमपि तेन सहभूतास्तत्रैवैवं समायास्याम इति भावः । ननु दाहानन्तरं परी-क्षितीव भवतीषु जीवनं सम्पादयिष्यामीति चेत्तत्राहुः **हरेणे**त्यादि, **विशिष्टो विरह** इत्यन्तेन । तत्तात्पर्यमाहुष्टिप्पण्यां **वियोगे**त्यादिना, **अस्तीति** । नतु भस्मीभूय नष्ट इत्यर्थः । अस्मिन्नग्नौ पूर्वोक्ताग्निविपरीतधर्मवत्ताज्ञानप्रकारमाहुः **उक्तरूपे**त्यादि । तथा च यदि तव जीवनसम्पादनेच्छा स्यात्, तदा नानेन दाहं सम्पादयेः । अतो 'भ्रमति भवानबलाकबलाये'ति गीतगोविन्दोक्त एव न्यायोत्र तवाभिप्रेत इति भावः । एतं न्यायं प्रतिरुन्धाना आहुः **लोके**त्यादि । तथा चावस्थाभेदेन स्वरूपस्यैव तथात्वाद-त्राप्रतीकार एव तथा न्यायो, न तु प्रतीकार इत्यर्थः । **आर्द्रेन्धनत्वस्येति** । अत्र विशेषणाभावप्रयुक्तो विशिष्टाभावो बोध्यः ।

यर्ह्यम्बुजाक्षेत्यत्र । **टिप्पण्यां** 'भगवा'नित्यादिना 'विचारात्मकतया ज्ञानमयं तप आधिदैविकाध्यात्मिकदोषा'वित्यादिना च 'यद्वांछया श्रीर्ललनाचर-
१०-२६-३६. त्तपो विहाय कामान् सुचिरं धृतव्रते'त्यत्र ललनापदोक्तः स्त्रीस्वभाव आधिदैविकः, त्यक्तत्वेनोक्ताः मनोभिलाषरूपाः कामा आध्यात्मिकस्तौ विवृतौ । एतौ च सुबोधिन्यां चाञ्चल्यपदेनैव संगृहीतौ ज्ञेयौ । श्रीश्चात्र सात्त्विकी शक्तिः, न तु ब्रह्मानन्दरूपा शक्तिरिति तत्रैव विवृतम् । **तेनापीति** । हेतुनेत्यर्थः । नन्वरण्यजनानां प्रियत्वे को हेतुरि-त्यपेक्षायामाहुः **अरण्यं ही**त्यादि । भगवत्प्रापकं भगवदीयं चेत्यतस्तथेत्यर्थः ।

श्रीर्यत्पदेत्यत्र । ननु पत्यैक्येन तुलस्याः सापत्न्यस्य सार्वदिकत्वात् 'सापत्न्यम-ङ्गीकृत्ये'त्यादि कथमुच्यत इत्यत आहुः **चरणे**त्यादि । यद्यप्यैकपत्यं
१०-२६-३७. सार्वदिकम्, तथापि 'श्रीविष्णुपद्या मनुजस्तुलस्या' इत्यादौ विष्णुपदसम्ब-न्धित्वेनैव तुलस्याः प्रसिद्धत्वात्तद्रजोपि संबन्धैकत्र्यात्तुलस्या भवति, लक्ष्मीश्च भक्तिरूपस्य चरणभक्तेति प्रथमस्कन्धे 'या वै लसच्छ्रीतुलसीविमिश्रपादाब्जरेण्वभ्यधिकाम्बुनेत्री'त्यत्र श्रियो नित्यमगवत्पूजायां चरणयोस्तुलसीसमर्पणविवरणेन प्रतिपादितम्, तथा च पूर्वं

१ करस्पर्शादिभिः ।
२ रा० पं०

सपत्नीत्वेपि विषयभेदान्न सापत्न्योद्गमः, चरणरजःकामनायां तु तदुद्गम इति तथोच्यत इत्यर्थः। **तत्रेति**। पदाम्बुजे । **महिष्य** इति । एतेन अष्टावक्रप्रसादशापयोर्गोचरा व्यावर्तिताः ।

१०-२९-३९. **वीक्ष्येत्यत्र । भगवत्प्रमाणावलम्बिनीति** । भगवतः प्रमाणं श्रोत्रं तदवलम्बिनीत्यर्थः । एवं च भगवत्प्रमाणं वेदोपि भवतीति वेदाविरुद्धसांख्य(योग)योस्तदवलम्बित्वं फलति, तयोश्च मुखनिरीक्षकत्वेन भक्त्यभिलाष एव तन्निष्ठानाम्, न तु तत्प्राप्तिरपीति सूच्यते । मूले श्रियेतीयङ् छान्दसः। तथा च श्रियाः एकं मुख्यं रमणं यत्रेति विवक्षितं तदाहुः **श्रीरपीत्यनेन । धर्मस्यापीति** । 'धर्मः स्तन' इति वाक्यात्तस्यापि तत्स्थानमिति लोके श्रीसाधनभूतः सोपि तत्रैव रमत इत्यर्थः। **विधिप्रयुक्तेत्यादि**। वीक्षणस्येति शेषः । तथा च विध्यप्रयुक्तवीक्षणस्य दास्यहेतुत्वेन तदसाधकविध्यनङ्गीकारोऽस्माकं युक्त इति भावः । **पड्भिर्गुणैरिति । अलकावृतेत्यादि**विशेषणोक्तैः क्रमेणैश्वर्ययशोवैराग्यज्ञानवीर्यश्रीभिरित्यर्थः ।

१०-२९-४०. **का स्त्रीत्यत्र । अयमिति**। सन्मार्गरक्षणरूपः । ननु बह्व्य एतादृश्यो या नाभिसरणं कुर्वन्ति, भवत्योपि तादृश्य एवेति कथमेवमुच्यते इत्यत आहुः **एवमित्यादि** । सतीनामपीत्यर्थः । ननु धर्मस्थापकस्य कथं नाशकत्वम्, तत्राहुः **अद्भुतेति** । यथा 'चस्कम्भ यः स्वमहसाऽस्खलता त्रिपृष्ठ'मित्यत्र पातुकाया एव क्रियायाः स्थापकत्वम्, यथा च 'वादैर्विमोहयति यज्ञकृतोऽतदर्हानि'त्यत्र वेदवाक्यबोधकस्य वेदस्थापकत्वम्, तथात्र विपरीतमित्यर्थः । नन्वेवं सत्येतत्कृतेरधर्मरूपत्वमिव स्यादित्यतः पक्षान्तरमाहुः **वस्तुत** इत्यादि । **तैरिति** । स्वरूपधर्मैः । तथा च प्रतियोगिभेदेन व्यवस्थयात्रापि धर्मस्थापकत्वमेवेति न दोषलेश इति भावः । नन्वविद्यापर्वभिरेव मोहसम्भवे किमिति कलादीनां मोहकत्वमुच्यत इत्यत आहुः **भगवदित्यादि** । गीतस्य देहमोहकत्वे किं मानमत आहुः **गायन्तमित्यादि**। ननु कामनाया मनोधर्मत्वेन मनोमोहकत्वं युक्तम्, न तु देहमोहकत्वमित्यत आहुः **स्त्री तु देह** इति । स्त्रीत्वस्य जीवेन्द्रियप्राणान्तःकरणेषु वक्तुमशक्यत्वात्तस्यैव च कामनायां प्रयोजकत्वात्तथेत्यर्थः। **इन्द्रियाणामित्यादि** । इन्द्रियाणां रूपादिग्राहकत्वेन वेणुद्वारा वामपरावर्तादिरूपेण वेणुविशिष्टस्य रसात्मकस्य स्वरूपस्य विषयत्वे वेणुरपि नाट्य इव रसात्मकतयैव भासत इति अमृतस्य द्रवत्वेनापोमयप्राणपोषकतया, पदानां सूक्ष्मरूपस्य मनोमयतया, एतस्य अव्यक्तताया आनन्दीयत्वेनात्मनि चानन्दस्याव्यक्ततया साजात्येन प्राणान्तःकरणात्ममोहकत्वमिति प्रतिभाति । अत्रैवं बोध्यम्। द्वितीयस्कन्धे सत्त्वरजस्तमसां क्रमेण सच्चिदानन्दमलत्वं प्रतिपादितम् । तत्राविद्या तामसी मलिनसत्त्वरजोयुक्ता तमसा स्वस्वरूपाज्ञानं विधाय रजःसत्त्वाभ्यां देहादिषु विषयेषु च व्यामोहमुत्पादयति । भगवत्सम्बन्धात्तस्या अबाध-

कत्वे लीलायां मोहः स्वरूपविषयक उक्तैरेव स्वरूपधर्मैरुक्तरीत्या सम्पद्यत इति । **टिप्पण्याम्** । **अयं मार्ग** इति । प्रवृत्तिरूपः प्रमाणमार्गः । वस्तुविचारासहत्वमुद्घाटयितुमाहुः **न चे**त्यादि । तथा च 'शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु' इत्यारभ्य 'गुणदोषौ विधीयेते नियमार्थं हि कर्मणा'मित्यन्तस्य भगवद्वाक्यस्योपबृंहणतया श्रुत्यर्थनिश्चायकत्वेन वस्तुतः सर्वसाम्ये सिद्धे विधिनिषेधयोः कर्मार्थतया न वस्तूत्तमत्वादिनियामकतेति भावः । **एतद्विरोधापरिहारा**दिति । प्रमाणमार्गविरोधापरिहारात् । एतस्योत्तरमग्र इत्यादिग्रन्थं व्याकर्तुमाहुः **नन्वि**त्यादि । **सुबोधिन्याम्** । **तस्मादत्रे**ति । मार्गान्तरविरोधस्यात्रादुष्टत्वात् प्रमेयमार्ग इत्यर्थः । कलपदेत्यादिनोक्तमोहकस्य शब्दरूपत्वेन वेदतुल्यतया मार्गद्वयस्य समबलत्वे प्राप्ते 'श्रवणाद्दर्शनादि'ति भगवद्वाक्यस्य प्रमाणमार्गोपोद्बलकतया तस्य बलिष्ठतायां तद्विरोधस्य प्रतिबन्धकत्वमाशङ्क्याहुः **किञ्चे**त्यादि । **नान्ने**ति । शब्देन । त्रैलोक्यमेवेत्येवकारोऽग्रिमपदेन योज्यः । दृष्टान्तानुगुण्यात् । तथा च गीतरूपशब्दमात्रेण प्राप्तौ मार्गद्वयस्य तुल्यत्वं शंक्येतापि, न त्वत्र तथेति न तस्य प्रतिबन्धकत्वमिति भावः । अतःपरं प्रमाणविचारस्य फल्गुत्वमभिसन्धाय स्वरूपस्यैव चालकत्वं कैमुतिकेन वदन्तीत्यभिप्रायेणाहुः **अस्त्वि**त्यादि । **नेदमाश्चर्यम्** । बलवत्प्रमाणप्रमेयाभ्यां प्रमाणान्तरबाधस्य औदुम्बर्यधिकरणे 'औदुम्बरीं स्पृष्ट्वोद्गायेत्, सर्वा सा वेष्टयितव्ये'त्यत्र दृष्टत्वादियं प्रस्तुता प्रमाणवार्ता प्रमाणबलाबलचर्चा अस्तु, विरमताम् । तत्र हेतुः **दुर्बले**ति । स्वरूपधर्मविचारापेक्षया दुर्बलत्वात् । तर्हि स्वरूपेण कथं चालनमित्यत्राहुः **प्रकारान्तरेणे**त्यादि, **नाश्चर्यं किञ्चिदत्रे**त्यन्तम् । तथा च स्वरूपं गानं च येषां प्रमेयमर्यादां नाशयति तेषां चलनं, येषां न नाशयति तेषां प्रमेयमर्यादया स्थितिरिति व्यवस्थायां सिद्धायां, येषां प्रमेयमर्यादापि चलनानुगुणा, तत्र'अधिकं तत्रानुप्रविष्टम्, न तु तद्धानि'रिति न्यायान्नाश्चर्यमित्यर्थः । एतेन सगुणैव चलति, न तु निर्गुणेति मूले .केतिपदमनतिप्रयोजनमित्यपि निरस्तम् । 'आत्मारामाश्च मुनय' इत्यादिवाक्यानि समर्थितानि ।

१०-२६-४१. **व्यक्तमित्यत्र** । नन्वत्र किं भगवद्वाक्यार्थनिर्धारकरणेन प्रसन्नं भगवन्तं ज्ञात्वा कृपा प्रार्थ्यते, उत सन्देहेपि स्वदैन्येन, उत हेत्वन्तरेण । आद्ये स्वत एव तत्सिद्धेः प्रार्थनाप्रयोजनाभावः । द्वितीयेपि वाक्योक्तिभिरेव तदनङ्गीकारसूचनान्न तदौचित्यम् । तृतीयं तु न स्पष्टमित्याशंकायां द्वितीयं सूचयन्त्यस्तृतीयं व्यक्तीकुर्वन्तीत्याशयेनाहुः **नापी**त्यादि । अत्र यद्यपि वासुदेवकार्यं नोक्तमिति प्रकृतं वासुदेवकार्यमिति भवति, तथापि पूर्वं मुक्तेस्तत्कार्यत्वेन सिद्धत्वाल्लोकवेदातीतपुरुषोत्तमकार्यस्य प्रस्तावादवतारान्तरकार्यपदेन पुरुषोत्तमकार्यमेव तदिति । वासुदेवव्यूहानुक्तिस्तु तस्य व्रजे स्वन्यार्थमाविर्भावेन भगवदैक्येन स्थित्येति प्रतिभाति । **देवो भूत्वे**ति । क्रीडापरो भूत्वा । **तथे**ति । क्रीडार्थमवतीर्ण इत्यर्थः ।

इति विक्रीडितमित्यत्र । ननु परार्थेपि रमणे योगेश्वरेश्वरत्वकथनाद्योगिवद्रमण-मायाति । ते च संकल्पादेव तथा तथा विदधतीति 'सङ्कल्पादेव च
१०-२९-४२. तच्छ्रुते'रित्यत्र सिद्धं मतान्तरे, स च कामजनक इति कामस्यापि सिद्धौ कथमात्मारामत्वं युज्यत इत्याकांक्षायां तदुपपादयितुमाहुः **क्रिया सर्वेत्यादि** । अत्र **कारिकाव्याख्यानं टिप्पणीपुस्तकेषु दृश्यते, तत्पाण्डुलिखने**[1] **नास्तीति श्रीगोकुलनाथानां तत् प्रतिभाति, लेखरीत्यापि तथेति च** । **क्रिया** रमणो-पयोगिनी, **सर्वा** रसोद्बोधिका पोषिका पूरिका च । अपिशब्दात्तदवान्तरभेदभिन्ना च । **सैव** 'रसो वै स'इति श्रुत्या भगवतो रसात्मकत्वेन रसशास्त्रसिद्धैवात्र रमणे, **परं** किन्तु कामो न विद्यते, कामो नास्ति । तथा च न योगिवद्रमणम्, किन्तु यथा योगेऽणिमादिस-र्वस्फूर्तिः, तथात्र तदीश्वरत्वेन रमणोपयोगि सर्वमभिध्यागोचरीकृत्य स्वस्वरूपमेवेन्द्रिया(दि)-भावेन प्रकटीकृतवानिति । यथा पुरुषविधब्राह्मणे 'स वै नैव रेमे'इत्यादिना रमणादि-कथनोत्तरं 'सोनुवीक्ष्य नान्यदात्मनोऽपश्य'दित्युपसंहारात्तत्र कामाभावः, इच्छाया अपि स्वरूपानतिरेकात्, एवमत्रापि, तेन तत्र यथा तत्क्रियासत्त्वेप्यात्मारामत्वम्, एवमत्रापीत्यर्थः । ननु श्रुत्युक्ता लीला स्वाभाविकी स्वार्था च, प्रकृता तु परार्था आगन्तुकी, सा च यदर्था तदनुरूपैव भवित्री, सर्वत्र तथा दर्शनात् । एवं सति यदर्थेयं लीला तास्तु 'त्वत्सुन्दर-स्मितनिरीक्षणतीव्रकामतप्तात्मना'मित्यादिवाक्योक्त्या सकामत्वेन निर्णीयन्त इति तत्सम्बन्धाल्लीलायास्तत्कामपूरकतया कामोपाधिकत्वे सिद्धे भगवत आत्मारामत्वं कथं सिध्यतीत्याशंकायामाहुः **तासामित्यादि** । लीला हि भगवद्धर्मरूपा, भगवांस्तु निष्काम-त्वेन सर्वश्रुतिसिद्ध इति तदीयलीलया तत्कामपूर्त्या ता अपि निष्कामाः । श्रुता 'यथा-कामयमान'इति प्रतिज्ञाय 'योऽकामो निष्काम आत्मकाम'इति कथनेनात्मकामस्य निष्का-मकोटिनिवेशात् । प्रकृते च 'सन्त्यज्य सर्वविषया'नित्यत्रात्मकामतया तथात्वस्य स्फुटत्वात् भगवता कामपूर्तेः 'सोश्नुते सर्वान् कामा'निति श्रुत्युक्तरीतिकनया तत्कृतावपि भगवतो निष्कामत्वेन तत्सम्बन्धात्ता अपि तथेत्यर्थः । नन्वस्त्वेवम्, तथापि तासां वाक्येषु 'संत्य-ज्ये'त्यत्रात्मकामत्वस्येव 'त्वत्सुन्दरे'त्यत्र तदतिरिक्तकामवत्त्वस्यापि स्फुटत्वान्न सर्वथा निष्का-मत्वविनिगमनेत्याकांक्षायां तदुक्तमभ्युपगम्य कामवत्त्वेपि निष्कामत्वं परिचाययितुमाहुः **कामेनेत्यादि** । यथा द्वारकालीलायां मद्दिष्यादिकामः प्रद्युम्नरूपेणामोघरेतसा भगवता कामेन पूरितः, पुत्रादिरूपं संसारं जनयन् प्रकटोऽभूत्, एवमत्र मूलरूपीयकामेन पूरित-श्चेत्स्यात्, अत्रापि तं जनयन् स्फुटः स्यात्, यतो नैवम्, अतो नायं कामेन पूरितः । यतः पूरितः, अतः कामाभावेनैव पूर्णः, अतो निष्कामः, यद्वयाविष्टदारुवत् कामस्वरूपादेव

---

१. इदं पाण्डुलिखनं पुरश्चिपुरे श्रीमद्वालकृष्णप्रभुमन्दिरे ऽपरायां विराजते । अनेन संशोध्य श्रीमती टिप्पणी मुद्रितास्ति ।

निवृत्त इत्यर्थः । ननु महावन्ध्यात्वभावकभेषजभक्षणतद्भावादिनापि संसाराजननस्य दृष्टत्वात्तर्कितो हेतुः साधारण इति शङ्कायां साधारण्यबाधकमत्र मानं स्मारयन्ति **न संशय** इति । 'न मय्यावेशितधियां कामः कामाय कल्पते । भर्जिताः क्वथिता धाना भूयो बीजाय नेशत' इति भगवता भाविरमणबोधनसमय एवोक्तत्वात् । तथा च दग्ध-पटे पटत्वं यथाकारमात्रेण प्रतीयते, तथात्र क्रियासाम्येनोभयत्र तत्प्रतीतिः, न तु भगवति भक्तेषु वा काम इत्यर्थः । क्वापीत्यनेन रसशास्त्रीया ब्रह्मधर्मीया संगृहीता ज्ञेया । तत्र ब्रह्मधर्मीयाया अभङ्गस्तु साधित एव, रसशास्त्रीयायास्तु स्वधर्मादिप्रवेशेन साम्यसम्पादने 'निरञ्जनः परमं साम्यमुपैती'ति श्रुत्यावधारणीय इति निगूढाशयो बोध्यः । शेषं टिप्पण्यां स्फुटमिति दिक् ।

ताभिः समेताभिरित्यत्र । चेष्टिते रसविषयकसौदार्यस्योक्तत्वेन महारसाविर्भावस्य तत एव सिद्धौ ह्रासौदार्ये किंप्रयोजनकमित्यपेक्षायामाहुः
१०-२९-४३. **तासामि**त्यादि । अतिशयिते निकटसम्बन्धे स्वरूपधर्मज्ञानावश्यंभावान्माहात्म्यस्फूर्त्या भयोत्पत्तौ रसो भज्येतेति तदभावाय मोहस्यावश्यकत्वादुदारेण तेन स्नेहः संवर्धितः । तथा च मोहेन स्नेहसंवर्धनाय तदित्यर्थः । नन्वेवमौपाधिकस्नेहवर्धने निरुपधेस्तस्य न्यग्भावापत्त्या महानेवानय इति शङ्कायां **टिप्पण्यां** तदाशयमाहुः **अत्रायं भाव** इत्यादिना ।

नद्या इत्यत्र । **रेमे** इति । अरीरमदिति पूर्वमुक्तत्वात् तदर्थं एतेन परामृष्टः । **जुष्टमि**त्यस्य वायुनान्वयः । **तत्तरलानन्दी**त्यत्र तरङ्गसम्बन्ध-
१०-२९-४५. सार्वदिकत्वादानन्दे विशेषाभावेनापुष्टार्थत्वमाशंक्य तदर्थमाहुः **ताभि**-**रि**ति । तथा च तस्मात्तरला यत्रेति तत्तरलं तादृशं च तदानन्दि च तरङ्गाणां पूर्वमपि सत्त्वेनार्थात्ताभिरानन्दीत्यर्थः ।

तासामित्यत्र । **पूर्णते**ति । भगवद्धर्मरूपा आप्तकामता । 'सोन्तःकरणसम्बन्धी'ति कारिकायां पूर्वं सूचितं तिरोभावहेतुं स्मारयन्ति **कायिकतिरोभावे**-
१०-२९-४८. त्यादि । अयं कायिकतिरोभावः 'कस्य रूपमभूद्द्वेधा तत्कायमभिचक्षते' इति कायपदनिरुक्त्या द्वैधीभावहेतुकाभिध्यानकृतं देहे कायत्वमिति प्रकृते स्वरूपद्वैधीभावं विधाय बाह्यं कायं ताभ्यस्तिरोधापितवान् । तत्र हेतुः । प्रथमाधिकारित्वात्सर्वात्मभावारम्भकक्षात्मकाधिकारवत्त्वादिति । तथा च सर्वात्मभावारम्भदशायामेवैवं भावो, न तु पूर्णदशायाम् । तदा चैवं बहिस्तिरोभावेन रसात्मनान्तःस्थितिरिति मर्यादानेन बोधितेत्यर्थः ।

इति पड्विंशाध्यायसुबोधिनीटिप्पण्योः प्रकाशः ।

सप्तविंशाध्यायं विवरिषवः प्रसङ्गरूपां सङ्गतिं बोधयितुं पूर्वाध्यायार्थं सार्धेनानुवदन्ति **स्वानन्देत्यादि** । **स** इति, आनन्दात्मा रसः । प्रसङ्गतावीजं टिप्पण्यां स्फुटम् । **किमुतेति**, सर्वात्मभावाधिकारेऽतः परं किमवशिष्टम्, अपि तु निरोधात्मनः प्रलयस्य जातत्वेन सर्वात्मभावस्य पूर्णोधिकारः सम्पन्न इत्यर्थः। तत्र गमकमाहुः **अत एवेत्यादि** । **सुबोधिन्याम्** । **चत्वारोत्रेति** । अत्रेत्यनेन रसपोषिका विप्रयोगावस्था परामृश्यते, न त्वध्यायः । यद्यपि 'गायन्त्य उच्चै'रित्यत्र गानमप्युद्दिष्टम्, तथापि लक्षणफलयोरनुक्त्या तत्रादावित्यादिपदेन च गानस्य पाश्चात्यत्वं बोध्यते, तेन न विरोधः । यद्वा । उद्देशविचारेण 'तद्गुणानेव गायन्त्य' इति समाप्तौ कथनेन चाध्याय एव चत्वारोर्थाः, लक्षणादिविचारेणादौ त्रयः । चतुर्थस्तु न लक्षितः, तथाप्युपक्रमोपसंहारयोस्तद्दर्शनादर्थत्रयेनुस्यूतः समनन्तराध्यायोक्ततत्प्रकारादेव बोध्यश्चेत्याशयाद्वा न विरोध इति बोध्यम् । **उद्देशत** इति, उद्देशोत्र न नाममात्रेण कीर्तनम्, किन्तु संक्षेपेण कथनम्, एकदेशेन कथनं वा। 'एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मये'त्यत्र तथा दर्शनाद्व्याख्यानाच्चेति न टिप्पण्यामनुपपत्तिः । अन्वेषणस्य वह्निज्वालावदविनाभूतधर्मत्वात्पददर्शनस्य तत्फलत्वेपि रसासक्तिफलत्वं न विरुध्यत इति बोध्यम् । आद्ये नायकदर्शनाभावजतापरूपेण रसासक्तेः कथनात् । द्वितीये 'तास्ता' इति संक्षेपेण 'रमापतेर्विचेष्टा'इत्येकदेशेन च लीलाकथनात् । तृतीये च 'तदात्मिका'इति भगवदात्मकत्वकथनेनैकदेशतो गर्वाभावस्य कथनात् । एवमर्थत्रयनिरूपणे प्रतिपाद्याननुगमादध्यायार्थमाहुः **सप्तविंश इत्यादि** । तथा च त्रिभिरप्यत्र रसान्तर्गतिकरणमेव प्रतिपाद्यते इति त्रितयनिरूपणेपि नाननुगम इत्यर्थः ।

अन्तर्हित इत्यस्याभासे । **तत** इति । विस्तृत इत्यर्थः । **गत्यानुरागेत्यत्र** ।
१०-२७-१-२. **अन्यथैवं सतीत्यादि** । स्मिताभावपूर्वकमीक्षणे सति ईक्षणस्य ज्ञानात्मकत्वात्तथा स्यादित्यर्थः। **तद्धर्मेषु चेत्यत्र चोवधारणे**, तेन धर्मेष्वेव समागता इत्यर्थः । स्मितस्य मोहकत्वात्तैनैकस्वनिष्ठतात्याजनसम्भवे तद्विलासस्य नात्यन्तमुपयोग इत्याकांक्षायां तत्तात्पर्यमाहुः **अनुरागेत्यादि** । तथा च कटाक्षेपु तस्योपयोगात्तदुक्तिरित्यर्थः ।

गतिस्मितेत्यत्र । तदात्मकत्वे **असावि**ति प्रयोगो न युज्यत इत्याशङ्क्य पक्षान्तर-
१०-२७-३. माहुः **अथवेति** ।

गायन्त्य इत्यत्र । **एवमित्यादि** । अनेन प्रकारेण तापाद्युद्देशाद्रसासक्त्यादिसम्बन्धमुक्त्वेत्यर्थः । **टिप्पण्याम्** । **एतावत्कालपर्यन्तमिति** ।
१० २७-४. सृष्टिमारभ्य कृष्णावतारकालपर्यन्तमित्यर्थः। **अधुनेत्यनेना**'प्यथ सर्वगुणोपेत' इत्युक्त एव कालः परामृश्यत इति ज्ञेयम् । **तज्जनितत्त्वेनेति**। बहिःसंवेदनजनितत्वेन।

१ एककर्यैरयं तु पथस्त्वनुस्मृतमिति तदधिकाम् ।

उक्तज्ञानेत्यादि। 'कैवल्यं सात्त्विकं ज्ञान'मिति वाक्यादखण्डाद्वैतभानं जीवधर्मः, जीवश्च चित्प्रधानः। प्रकृतं तु ज्ञानं वरणैकलभ्यम्, स्वामिन्यश्च भगवत्पराः, विषयश्च पूर्वोक्त इति तथेत्यर्थः। एकादशे भगवद्वाक्येषु व्रजरत्नानामेव सर्वोत्कृष्टत्वेन निरूपणात् 'मत्स्वरूपाविदोऽबला'इति च कथनादत्र च 'शुको ही'त्यादिग्रन्थे भक्तापेक्षया शुकस्योत्कर्षप्रतीतेर्मूलविरोधः, पुष्टिप्रवाहमर्यादाग्रन्थे 'शुद्धाः प्रेम्णातिदुर्लभा'इत्युक्तेः 'एतादृशस्तु पुरुषः कोटिष्वपि सुदुर्लभः। यो दारागारपुत्राप्तप्राणान् वित्तमिमं परम्। हित्वा कृष्णे परं भावं गतः प्रेमप्लुतः सदे'ति निबन्धस्य च विरोधः प्रतीयत इति तत्परिहाराय 'शुको ही'त्यादिग्रन्थतात्पर्यमाहुः **अत्रायं भाव** इत्यादिना, **सूच्यत** इति। तथा च यत एतादृशः ज्ञानमिश्रभक्तः, न तु शुद्धप्रेमभक्तः, अत एवं वदतीत्याशयेन कैमुतिकन्यायः 'शुको ही'त्यादिग्रन्थेन सूच्यत इत्यर्थः। अत्र भक्तिपरमकाष्ठाज्ञापनाय कैमुतिकान्तरमाहुः **किञ्चेत्यादि, अनेनेत्यन्तम्।** तथा च न विरोधलेशोपीति भावः। ननु 'परिनिष्ठितोपि नैर्गुण्य' इत्यत्र शुकेन स्वस्य भगवल्लीलागृहीतचित्ततायाः प्रतिपादितत्वेन तस्मिन्नपि भक्तेरेवोद्रेकात्तस्यापि ज्ञानाभाव एवोचितो, नत्वेवं कथनमित्याकांक्षायां तदधिकारस्वरूपपरिचायनायायं ग्रन्थ इत्याहुः **शुकस्येत्यादि।** तथा च यदि तस्य न्यग्भूतज्ञानाच्छुद्धभक्तिरेव स्यात्, तदैवंभावेन श्रीभागवतं न प्रचरेदेव। अतस्तदर्थं शुकस्यैतादृक्स्वरूपं शाब्दमेव, न तु भक्तानामिवानुभव इत्येष तदधिकार इति ज्ञानभक्त्युद्रेक इत्यर्थः। इदमेव 'गुणगाने सुखावाप्तिर्गोविन्दस्य प्रजायते। यथा तथा शुकादीनां नैवात्मनी'त्यत्रापि बोध्यम्। पूर्वोक्तमिदं च द्रढयितुं भूतपदतात्पर्यमाहुः **अपरञ्च, सर्वेष्वित्यादि, भवतीत्यन्तम्।** तथा च न काल्पनिकमस्मदुक्तम्, अपि तु भूतपदप्रयोगादर्थसिद्धम्, अतो न शङ्कालेश इत्यर्थः। ननु भक्तानां रसज्ञत्वे सर्वदैव कुतो नैवंभाव इत्याकांक्षायां पूर्वोक्तं स्मारयन्ति **एतावानित्यादि।** ननु भगवतः पुरुषत्वात्स्त्रीत्वावच्छिन्नानामेव रसाभिज्ञानमुचितम्, नत्वेतासामेव, अतो न भूतपदार्थिकमत्र सम्भवदुक्तिकम्, अत आहुः **कात्यायनीत्यादि।** तथा च यत्र प्रसादशक्त्यादिसम्बन्धः, तत्रैव तदभिज्ञानम्, नान्यत्रेत्यतः शङ्कानिवृत्तेरार्थिकं न प्रतिषेद्धुं शक्यमित्यर्थः। एवमाभासव्युत्पादनेनाधिकारतारतम्यं विविच्य व्याख्यानव्युत्पादनेन तद्दृढीकर्तुमाहुः **अपरञ्च, भगवतीत्यादि।** **अभावादिति।** ज्ञानाभावात्। बहिरनुसन्धानं वारयन्ति **परन्त्वित्यादि।** तथा च 'स एवावस्था'दित्यादिना आन्तिमावस्य बहिरन्तर्ज्ञानाभावरूपव्यभिचारिभाव एतास्वेव स्फुटो, न शुक इति प्रथमनिक्षेपणादेवावसीयते। तत्र हि 'भूतानां छिद्रदातृत्वं बहिरन्तरमेव चे'ति कापिलेय आकाशलक्षणे आकाशे तथात्वस्य निरूपणाच्छुकेन तद्दृष्टान्तपूर्वकं व्यापकत्वकथनात्स्वस्य तदनुसन्धानं ज्ञाप्यत इति स्फुट एवाधिकारभेद इत्यार्थिकार्थानादरेपि नाधिकारतारतम्यं व्याहन्यत इत्यर्थः। एवं व्याख्यानोक्तं व्युत्पाद्य स्वतन्त्रतया प्रकारान्तरेण पूर्वोक्ताधिकारता-

रतम्यं व्युत्पादयन्ति यद्वेत्यादि । उचितमिति । अन्तर्ज्ञानेप्युचितम् । तथा चैवमौपसदन्यायेन भगवद्विचारितादधिकारतारतम्याच्छुकस्य भक्तत्वेपि नैतदधिकार इति तस्य स्वास्थ्यादिकम्, नैतासाम्, अन्तर्ज्ञानं तूभयोस्तुल्यम्, परमेतासामधिकारस्वभावात्प्रतिहन्यते, तस्य तु नेति सर्वमौपसदन्यायादेव समञ्जसम्, न कोपि विरोध इत्यर्थः । प्रकारान्तरेण व्याख्यानं तु 'उपेयप्रतिपत्त्यर्थमुपाया अव्यवस्थिता' इति न्यायात्, नतु पूर्वोक्ते अस्वरसादिति न दोषलेशः ।

दृष्ट इत्यत्र । वनस्पतिमात्रे वैष्णवत्वस्य तुल्यत्वेपि प्रथममश्वत्थादिषु प्रश्ने हेतुमाहुः
तत्रापीत्यादि । अत्र प्रश्नोत्तरं नामोक्तेस्तत्सूचितमर्थमाहुः **तथापी**-
१०-२७-५. त्यादि । एवमग्रेपि ज्ञेयम् । नन्वेते महत्त्वात्पृच्छ्यन्ते चेत्, अनुत्तरणेपि
दूषणमेतेषु न वक्तव्यम्, अपि तु स्वस्मिन्नेवारोप्यमित्याशङ्कायामाहुः (**अयं ही**ति । पावित्र्यं स्नानं तस्य स्मरणात् ।) **अग्रे** इत्यादि । तथा च तान्विहाय भगवतोग्रे गमने इदं हेतुत्वेन सम्भाव्य वदन्तीत्यर्थः । **नामाग्रहणं वे**ति पक्षान्तरे भवतीभिः स्वमनोरक्षणं कुतो न कृतमित्याभासो ज्ञेय इत्यभिप्रायेणाहुः **अत एवे**त्यादि ।

कच्चित्कुरबकेत्यत्र । **भर्तृनामे**त्यादि । एतेन कुमारीवाक्यत्वं बोधितम् । श्लोकद्व-
योक्तेषु दूषणान्तरमाहुः **पूर्वोक्ते**त्यादि । 'यत्राकृतिस्तत्र गुणा वसन्ती'ति-
१०-२७-६. वत्पुष्पाणां शोभाधायकत्वात्तदभावेन गुणाभावः पूर्वोक्तेषु । एतेषु
फलाभावात्प्रश्नस्याप्यफलत्वमिति भावः ।

१०-२७-७. **कच्चित्तुलसी**त्यत्र । **नानाविधे**ति । एतेनान्यसम्बन्धस्तेपूक्तः ।

अप्येणपत्नीत्यत्र । **भीरुत्वादी**त्यादिपदेन स्वासामिव तासामपि भगवद्दर्शनैर्निर्वृतिः,
१०-२७ ११. भगवता तथा करणं संगृह्यते । **अन्यथे**ति । उक्तप्रकारकदर्शनाभावे ।

बाहुं प्रियांसेत्यत्र । **टिप्पण्याम्** । **अग्रे गमनाभावश्चे**ति । देशान्तरे भगवद्गम-
नाभावः, चोप्यर्थे, ज्ञानविषयतया सम्भवतीति शेषः । एतासामेव वा ।
१०-२७-१२. **तत्रापी**ति । भगवद्भावानुभावेन लीलास्फूर्तावपि । इदं अनवहिता
इत्यनेन योज्यम् । ननु तीक्ष्णभावशान्त्यर्थमेव चेत्प्रदर्शनं किमित्यग्रे तत्प्रदर्शनमित्यत आहुः **अग्रे त्वि**त्यादि । **एवमुक्त**मिति । अत्र ज्ञापकान्तरमुक्तम् । **तेने**त्यादि । यत्नेन सामस्त्येन तदपीडया चालिनिवारणसंभवादित्यर्थः । **मर्यादामार्गीयभक्तिरसे**ति । कामरहितभक्तिरसेत्यर्थः ।

इतीत्यस्याभासे । **एतदुपमर्दिके**ति । तापोपमर्दिका । **प्रथमस्यापगम** इति ।
ज्वालापगमेन वह्नेरिव प्रश्नान्वेषणरूपयत्नतिरोधानेन, रसासक्तेस्तनु-
१०-२७-१४. याग्न्यां तिरोधान इत्यर्थः । **उक्ताः कृताश्चे**ति । प्रमाणादिप्रकरणीयाः

१. ३-३-३३-ब्रह्मसूत्रोक्तन्यायेन । २. मूले नास्ति ।

फलप्रकरणीयाश्चेत्यर्थः । **आविष्टा** इत्यादि । ननु 'लेभे गतिं धात्र्युचिता'मित्यादिवाक्यैः पूतनादीनां मुक्तिकथनाच्छकटाद्यावेशकथनमत्र कथं सङ्गच्छत इत्याशङ्का तु टिप्पण्यां **सा च भगवत्कृतितत्सम्बन्ध्यात्मिका विशिष्टेति** लीलास्वरूपकथनादपनेया । भगवल्लीलानां नित्यत्वेन तासु भगवद्वीर्यरूपाणामाधिदैविकासुराणां सम्बन्धितया प्रवेशेन मुक्तिवाक्यस्य च तदाविष्टजीवविषयत्वे वा भिन्नविषयत्वेनाविरोधात् ।

कृष्णरामायित इत्यत्र । ननु वत्सपाललीलायां बालका एव सङ्गे सन्तीति बालायन्त्य इति वक्तव्ये गोपायन्त्य इति कथमुक्तमित्याकांक्षायामाहुः
१०-२७-१७. **गोपा** इत्यादि । तत्रोपपतिर्जातीत्यादि ।

बद्धान्येत्यत्र । ननु पूर्वं भगवता पूतनासुपयःपानम्, ततः शकटभङ्गादिश्च कृत इति तेन क्रमेण पूर्वा लीला उक्त्वा अत्र गोवर्धनोद्धरणादिलीलासु
१०-२७-२३. किमिति स क्रमो नोक्त इत्याकांक्षायामाहुः **अत्र क्रम** इत्यादि, **चिरतिरित्यन्तम्** । तथा च अनुक्रियमाणलीलाक्रमे चित्तजानां गुणानामेव प्रयोजकत्वात्तदधिकारानुसारिभावनया तत्तल्लीलाप्रादुर्भावात्तासां च भगवद्वशीकरणमेव फलम्, यतो वशीकृत एव पदानि दर्शितवानिति वक्तुमत्रैवं कथनम्, भगवदिच्छयैवारब्धक्रमत्यागश्चेत्यर्थः ।

एवं कृष्णमित्यस्याभासे । **वचनमेवे**त्यादि । एतेनात्रत्यः 'पृच्छमाना' इत्यनेनोक्तः कायिकाभिनयः कृतो बोधितः । तेनात्यार्तिर्बोधिता । तादृश्या-
१०-२७-२४. मार्तौ यज्जातं तद्व्याख्यान आहुः **तदा पुनरि**त्यादिना । ननु भगवदावेशो मूले वाचनिको नेति स्वयं कथमुच्यत इत्यत आहुः **भगवदि**त्यादि । तथा च सर्वज्ञतालक्षणकार्यानुमेयमित्यर्थः । सर्वज्ञतायाः किं ज्ञापकमत आहुः **तेषां चे**त्यादि । सर्वज्ञानामित्यर्थः ।

तैस्तैरित्यत्र । **अबला जाता** इति । देहमनुसन्दधाना जाता इत्यर्थः । **एता**
१०-२७-२६. **इति** । पदद्रष्ट्र्य इत्यर्थः ।

पदानीत्यस्याभासे । **अनयेत्यत्र** । **तामसतामसी**ति । 'विप्रावमन्ता विशतां तमोन्धं यथा गज' इति वाक्याद्गजस्तामस इति तद्दृष्टान्तीकरणात्तद्भर्त्री
१०-२७-२८. स्वामिनी तामसतामसीत्यर्थः । 'नूनं नाराधित' इत्यनेन स्वयमप्याराधितः, परं किञ्चिद्द्वारेति लक्ष्यते । नन्वेवं सद्वारकाराधने तत्क्रतुन्यायेन फलमपि सद्वारकं स्यात्, न तु साक्षात्सम्बन्ध इत्यत आहुः **भगवदि**त्यादि । ब्रह्मपुराणसमाप्तौ मायानुकीर्तनाध्यायारम्भे भास्करप्रसादात् शंभोः पूजारुचिमुक्त्वा 'तुष्टे त्रिलोचने तस्य भक्तिर्भवति केशव' इति कथनात्, एकादशे भगवतापि मयबाणयोः शैवत्वेन प्रसिद्धयोरपि 'वृषपर्वा बलिर्बाणो मयश्चाथ विभीषण' इत्यादिना स्वपदप्राप्तिकथनाच्च भगवदनाराधकैः साधनैरपि

तयोक्तत्वान्न साक्षात्सम्बन्धानुपपत्तिरित्यर्थः । एतेनानन्यपूर्वाभिरपि[1] स्वस्य कात्यायनीद्वारकमेवाराधनं स्मृतमिति प्रतिभाति । ननु यद्येवं तर्ह्याराधिते को विशेषो येन तत्र निश्चय उच्यत इत्याकांक्षायामाहुः **आराधित** इत्यादि । ननु यद्येवं तर्हि भगवानाबाल्यादेतद्वश एव 'गोपीभिः स्तोभितोऽनृत्य'दित्यादिनोक्तः, इदानीमप्येतद्वाक्यांगीकाराच्चैतद्वशत्वमेव प्रकटीकृतमिति कथं 'नूनं नाराधित' इत्युच्यत इत्यत आहुः **तत्रापीत्यादि** । साक्षादाराधनेपीत्यर्थः । अन्यथा कथं विहाय गत इति भावः ।

रेम इत्यत्र । टिप्पण्यां 'यथा प्राकृत' इत्यारभ्य 'ज्ञेय'मित्यन्तेन तथा च सह रेमे इत्येतदेव व्याख्यातं ज्ञेयम् । एवं सति 'आत्मरत आत्मक्रीड आत्ममिथुन'
१०-२७-२४-२५. इति श्रुत्युक्तं भज्येतेति तत्संग्रहाय सुबोधिन्यां चकारं व्याकुर्वते **चकारादित्यादि** । तथा च लक्ष्मीस्ताश्च न स्वतो भिन्ना इति न श्रुत्युक्तस्य भङ्ग इत्यर्थः । ननु तथापि पूर्वोक्तरमणं तु तद्भञ्जकमेवेत्यत आहुः **निष्काम** इत्यादि । ननु पारार्थ्येऽपि तद्भङ्गो नापैतीत्यत आहुः **अस्यामपीत्यादि** । अर्थस्तु टिप्पण्यां प्रकारान्तरेत्यारभ्य सतीत्यन्तेन विवृतः । सुबोधिन्यां रमणं क्रीडेति आरामपदस्यार्थो ज्ञेयः । केशप्रसाधनमित्यारभ्य सात्विकीनां वाक्यानि तन्मध्य इदं सात्विकसात्विक्या इति बोधयितुं टिप्पण्यां प्रकारान्तरं संगृह्याहुः **यद्वेत्यादि** । **सुबोधिन्यामसमीचीनस्यान** इति । 'तृणाङ्कुरैः सिद्यत्सुजातांघ्रितलामि'त्यनेन सूचित इति ज्ञेयम् । कामुकानुकरणकरणकस्तन्निरोधप्रकारो न स्फुट इति, एतद्वाक्यवक्रीष्वपि रसभावजमानस्य भगवद्धर्मत्वेन खेदबीजं न स्फुटमिति तदुभयं व्यक्तीकुर्वन्ति टिप्पण्यामन्नायमर्थ इत्यादिना, किञ्चेत्यादिना च । तथा चोक्तप्रकारकज्ञानेन कामिनिरोधः । स्वस्मिन्नमुख्यतमो रस इति खेदबीजमिति भावः । **यां गोपीमित्यस्य** टिप्पण्याम् । **अधिकारिणो ये** इति यच्छब्दे स्वभावगुणा बोध्याः ।

ततो गत्वेत्यस्य टिप्पण्यां पूर्वं भक्तानां भावस्य भगवद्भावात्मकत्वेन स्थापितत्वात्, अत्र च 'ननु धर्मान्तरेणे'त्युक्तौ तदापत्त्या पूर्वस्माद्विरोध इति तन्निवारणाय तता-
१०-२७-३७. त्पर्यमाहुः **दसात्वेत्यादि, भ्रम** इत्यन्तम् । ननु भ्रमस्य सर्वत्र दोषजन्यत्वदर्शनात्कथमेतद्भ्रमजनकभावस्यादोषत्वमित्याकांक्षायां तदुपपादयन्ति यथेत्यादिना । स **एवेति** । प्रियो मद्वश इत्याकारकः । तथा च यथा लोके रमणस्य दोषत्वेऽपि भगवदीयस्य तस्य न तथात्वम्, तथैतस्यापि तत्सम्बन्धित्वेन भगवदीयत्वादेव न तथात्वमित्यर्थः । अग्रिमस्य भावतयात्वमुपपादयन्ति **एवं सतीत्यादि, अर्हतीत्यन्तम्** । मध्यमस्य साधयन्ति **दसत्वमित्यादि** । इति तद्भावेत्यत्र । इतिर्हेतौ । तथा च रसमर्यादाविरुद्धेन्त्यायाः हेतोरित्यर्थः । उक्त इति । मूले सुबोधिन्यां चोक्त इत्यर्थः । **अत्रापीति** । स्वामिन्यामपि संयोगजनकभावदूरीकरणाय तद्भावजननं दसापदोक्तभावजन-

१ निष्कामत्वभञ्जकम् ।

नमित्यर्थः । तथा च सुबोधिन्यां यत्तादृशकृपानधिकारित्वं जाताजीर्णत्वं च यदुक्तं तत्पूर्वापेक्षया सर्वात्मभावाधिक्यज्ञापनार्थम् । तेन यादृश्यन्यासु कृपा तदनधिकारिणी, किन्तु तद्विलक्षणकृपाधिकारिणी प्रसादप्राप्त्या अत्यन्तमुच्छलद्रसेति हृदयं बोध्यम् ।

एवमुक्त इत्यत्र । सुबोधिन्यां **नटवटुरिति** । वट वेष्टने । कर्तरि उप्रत्ययः । तथा च नटेषु वटुर्वेष्टकः स्वांगवेष्टनचतुर इत्यर्थः । **एषा हि नृत्य-**
१०-२७-३८. **मित्यादिग्रन्थस्य** तात्पर्यमाहुः **प्रिया त्वित्यादिना** । **उभयोरिति**[1]। संयोगविप्रयोगावस्थयोः । **स्वतन्त्रे स्वतस्तिरोधानं तथेति** । भगवतः सकाशात्तत्तिरोधानं स्वस्कन्धारोहणतुल्यमित्यर्थः ।

इति सप्तविंशाध्यायसुबोधिनीटिप्पण्योः प्रकाशः ।

अष्टाविंशाध्यायं विवरिषवः पूर्वाध्यायसमाप्तावेव कथासङ्गतेरुक्तत्वादर्थमेवाहुः **अष्टाविंश** इत्यादि ।

जयतीत्यत्र । **अनन्यत्वेनैकत्वादिति** । नित्यः शब्दः शब्दत्वादितिवद्व्रजः
१०-२८-१. सर्वोत्कृष्टः भगवज्जन्मन इत्यस्याप्यसाधारणहेत्वाभासत्वादित्यर्थः ।

शरदुदेत्यत्र । **अपकीर्त्यभावायेति** । प्रसह्य मारयित्वा हरणेपकीर्तिरिति
१०-२८-२. तदभावायेत्यर्थः ।

न खल्वित्यत्र । नन्वयं को वा नियमो यद्गोकुलस्वामिपुत्रत्वाभावेऽधीनो न भवतीति, यतस्तदभावेपि स्नेहवशादधीनत्वदर्शनादित्यत आहुः **तुल्य-**
१०-२८४. **तायामित्यादि** । हि यतो हेतोर्वशीकरणहेतुरितिशेषः अर्थाज्ज्ञेयः । तथा च 'ययोरात्मसमं वित्त'मित्यत्र भगवता यत्र यत्र तुल्यता, तत्र तत्रैव विद्यायोनिसम्बन्धस्य वशीकरणहेतुतायाः प्रतिपादितत्वाल्लोके तथा दर्शनाच्च तदैव तथा, यत्रेदानीं तथा, तेन ज्ञायते नियत तत्तिरोहितमिवेत्यर्थः । अस्मिन्वाक्ये मूलस्थं भवानितिपदमुद्देश्यसमर्पकमपि भातीति भवानित्यर्थतो विधेयसमर्पकं भवतीति ज्ञेयम् । अग्रे वैकुण्ठाधिपतिः पुरुषोत्तम इति तदर्थविवरणात् । तथा सति तुल्यताया अभावादुपालम्भो न युक्त एवेति भावः । एतावदुक्तौ भगवति सेवकदुःखानवधातृत्वारोपः पर्यवस्यतीति तदभावाय पूर्वं यशोदाधीनत्वसम्पादनेन गोकुलस्वामिपुत्रत्वे सन्देहाभावादिदानीमधीनत्वाभावे स्वस्मिन् तादृशविद्याद्यभाव एव विचार्यताम्, न तूपालभ्यतामित्याशयेन वाक्यान्तरं वदन्तीत्याशयेनाहुः **किञ्चेत्यादि** । अनुपालभ्यत्वादेव भगवति दोषाभावं विशेषाकारेण समर्थयन्तीत्याशयेनाहुः **आगतश्चेत्यादि** ।

विरचिताभयमित्यत्र । ननु भवतीनां संसारभयं क्वास्ति येन संसृतेर्भयादित्युच्यत इत्याकांक्षायां तत्तात्पर्यमाहुः **न हीत्यादि** । **अनेनेति** । संसारनिवर्तकत्व-
१०-२८५. कथनेनेत्यर्थः । तथा चानया प्रार्थनया दुःखनिवृत्तिरेव प्रार्थितेतिभावः ।

[1] तुल्यतायां वशीकरणहेतुः ।

व्रजजनेत्यत्र । कृष्णो भगवानित्यनेन योषितां वीरेतिपदसमुदायार्थः
१०-२८-६. संक्षेपेणोक्तः । सम्बोधने फलितमर्थमाहुः **वीरैरित्यादिना** ।

प्रणतेत्यत्र । न इति बहुवचनेन कुचेषु बहुत्वमायातीत्यरुच्या पक्षान्तरमाहुः
विरहेणेत्यादि । संयोगे हि भगवदुपयोगित्वात्तेषु स्वीयत्वेन भानम्,
१०-२८-७. विरहे तु न तथेति भिन्नान्मन्यन्त इत्यर्थः । तथा चास्मासु चेन्न स्थाप-
यसि तदास्मद्भिन्नेषु तेषु त्वत्परेषु स्थापयेति भावः । अत एव 'गणये कुचयो'रिति तद्भावः प्रभुभिरुपवर्णित इति श्रीहरिरायाः । सर्वत्र मनोरथतौल्यादर्शनादयमपि पक्षो न बहुत्वसाधक इत्यरुच्या पक्षान्तरमाहुः **स्त्रीणामित्यादि** । ननु कालियनृत्येनैतच्चरणप्राकट्यमिति वेणुगीते प्रतिपादनादत्र फणिफणार्पितमिति विशेषणं कथं सङ्गच्छत इति चेत् । 'इत्युन्मत्तवचो गोप्य' इति पूर्वाध्याये कथनादत्रापि तदनुस्यूतमित्यतः सङ्गतिरिति केचित् । तत्रोन्मत्तवचनोपसंहारपक्षस्यापि सुबोधिन्यामङ्गीकारात्तत्पक्षेऽसङ्गतितादवस्थ्ये तु 'चेरुर्गोप्यो विचेतस' इति पूर्वाध्यायोपान्त्ये कथनादत्र च तदनुसीवनादिति भाति । वस्तुतस्तु ज्ञानपूर्वकमेवैवं कथनम्, न च पूर्वविरोधः । तत्र यथेत्यादिसुबोधिन्यामेव दोषदूरीकरणार्थतां तस्योक्त्वाग्रेऽम्बुजपदव्याख्यानेन मूले क्रमेणोभयविधचरणस्थापनस्य व्यक्तीकरणान्न तदर्थं प्रयासान्तरं कर्तव्यमिति भाति ।

मधुरयेत्यत्र । **इममेवेति** । वाञ्छितोपकाररूपमित्यर्थः । गिरेत्यस्य आप्या-
१०-२८-८. ययस्वेत्यनेन सम्बन्धः । **पाययतेति** । मिषत्कम इति शेषः ।

तव कथेत्यत्र । इत्यप्यसङ्गतमित्यत्रापि 'विधिकरीरिमा' इति संगृह्यते । **परिहर-
तीति** । अभक्ताः विरहेपि जीवनादिति । जीवनानुमितमभक्तत्वं हेतोरु-
१०-२८-९. पहितत्वव्यञ्जनेन परिहरतीत्यर्थः । तथा च यथा यागीया हिंसा अधर्मः,
हिंसात्वादित्यत्र निषिद्धत्वमुपाधिः, तथा प्रकृते स्वकृतिसाध्यत्वमुपाधिरिति भावः । तदेतत्प्रदर्शयन्ति **नेदमित्यादिना** । **उच्यत इति** । 'अमृतत्वस्य तु नाशास्ति वित्तेने'त्यादिश्रुतिरुच्यत इत्यर्थः । **सर्वतापनिवर्तकमिति** । अत्र तप्तजीवनमित्यस्य तप्ते अयःपिण्डतैलादौ यथा जीवनं जलं किञ्चित्पतितं सदधिकमेव तापं जनयति, एवं तव कथामृतमपि विप्रयुक्तेऽधिकतापमेव करोतीत्यर्थ इत्याह वैष्णवतोषिणीकारः । तदविचाररमणीयम् । तप्तायःपिण्डे पतितस्य स्वल्पस्यापि जलस्य विद्यमानत्वे स्वानुरूपौष्ण्यनाशकत्वस्य प्रत्यक्षसिद्धत्वात्, अन्यथाभ्यन्तरसंयोगस्येव बहुजलसंयोगस्यापि तापाधिक्यहेतुत्वं स्यात् । तप्ततैलादौ तु तस्योत्तेजकत्वेपि तीव्रवह्निना तन्नाशेनात्र च कथाया विद्यमानतया तद्वैधर्म्यात् । तत्रोत्तेजनस्यापि वह्नेर्वह्निक्षेपणेनेतरतापकत्वमेव, न तु जलसंयुक्ततापकत्वमित्यस्यापि तत्र दृष्टत्वाच्च प्रकृतेपि परतापकत्वस्वतापशामकत्वयोरेव सिद्धेश्च । ननु कथायाः सर्वतापनाशकत्वे भगवत्संयोगस्यावश्यकता नायास्यतीति चेत् । न । भगव-

दपेक्षया कथायाः स्वल्पत्वेन सांसारिकसकलतापनिवर्तनमात्रसमर्थतया विरहमहाताप-निवारणे तदसामर्थ्यात्सुखेन भगवत्संयोगावश्यकतोपपत्तेः । अत एव मूले जीवनसम्पादकत्वमेवोक्तम्, न तु विरहतापनिवर्तकत्वमपि । किन्तु तदुक्तार्थाङ्गीकारेऽमृतपदविरोधः । तस्यातापकत्वात् । तथा भूरिदपदविरोधश्च । महातापजनकवाक्यवक्तृत्वस्तुतेस्तादृश-तत्तापतत्कर्तृकत्वायोगात् । तत्र काकुविपरीतलक्षणाद्यङ्गीकारस्तु साहसमेव । तस्मात्तापनाशकत्वमेवात्रार्थ इति दिक् । **यत्संस्कारेत्यादि** । अत्र प्रथमोदाहरणं अप्रजत्वादितस्सम्, 'तद्धैक आहुः ऋषयः कावषेयाः, किं प्रजया करिष्यामो, येषां नो एवायमात्मा, नायं लोक' इत्यादिश्रुतेस्तादृशज्ञानादेव तन्नाशात् । द्वितीयोदाहरणं तु जुङ्गितोपगतादितस्सं बोध्यम् । स्मृतौ 'चतस्रस्तु परित्याज्या' इत्यनेन त्यागबोधनात् । इत्यपीत्यपिना सूचितं पाठान्तरं तु 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरिति' इत्येवमाग्नेयादौ दृश्यते । अत्र ईरीत इत्यस्य वाचक ईरित इत्यर्थो ज्ञेयः । पूर्वोक्तधर्मोऽलौकिकसाधकत्वम् ।

प्रहसितमित्यत्र । मोहकगुणसद्भावे किं प्रमाणमत आहुः **तदर्थमित्यादि** । **तदर्थमिति** । मोहनार्थम् । तथा च तदर्थकतादृशलीलैव मानमित्यर्थः । नन्वे-

१०-२८-११. वमारोपोऽनुचित इत्यत आहुः **स्वस्वभावेत्यादि** । **त** इत्यस्य सर्वत्र सम्बन्धे प्रथमत एव तदुक्तिरुचितेत्यत आहुः **अन्यदित्यादि** । **अत एवमेत इति** । एवं एत इति पदच्छेदो बोध्यः ।

चलसीत्यत्र । नलिनपदसूचितमर्थमाहुः **जल एवेत्यादि** । सरस्यादिरूप उत्पत्तिस्थान एवेति यावत् । तेन चालनायोग्यता सूचिता । तेन व्रज एव

१०-२८-११. स्थापनीयमित्याशयः । यदि चेचालनं क्रियेत, तदापि नीरसे स्थापनं नोचितमित्याहुः **जलपूर्णे वेति** । शाद्वलेष्वित्यर्थः । अर्थान्तरमाहुः **नलिनादपीत्यादि** ।

इत्यष्टाविंशाध्यायसुबोधिनीटिप्पण्योः प्रकाशः ।

अथैकोनत्रिंशाध्यायं विवरिषवः कार्यत्वमत्र कथासङ्गतिरिति बोधयन्तोऽध्यायार्थमाहुः **एकोनत्रिंशक इत्यादि** ।

तं विलोक्येत्यत्र । निर्णयज्ञानस्यापि प्रसादकार्यतया पर इति वक्तुमिति । एवं प्रकारकमाश्चर्यं वक्तुम्, अन्यथा दृष्टान्तमेतं न वदेत्, प्रयोजनाभावादि-

१० २९-३. त्यर्थः । **प्राणे तु सर्वाणि सम्भूयेति** । बृहदारण्यके 'यो ह वै ज्येष्ठं च श्रेष्ठं चे'ति ब्राह्मणे सर्वेन्द्रियाणां शरीरस्थितेश्च मुख्यप्राणाधीनत्वं प्रतिपादितं, प्रत्यक्षमपि तथेति तथेत्यर्थः । **पञ्चानां भाव्यमिति** । यद्यपि देहस्यैव प्रतीयते, तथापि व्युत्पाद्यमानरीत्या तथेत्यर्थः । तत्र जीवस्य व्युत्पादयन्ति **तत्रेत्यादि** । तथा च 'चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा । विराट् तदैव पुरुषः सलिलादुदतिष्ठते'ति तृतीये

तदागमनेनैव पुरुषोत्थानस्योक्तत्वादन्यत्रापि तथेत्यर्थः । ननु पूर्वं जीवाभावे पूर्वाध्याये यद्वयोक्तकार्यं कथं निरपद्यतेत्यत आहुः **स त्वित्यादि** । तथा च पूर्वं भगवानन्तःप्रविष्ट इति सुषुप्ताविव सोपि भगवति प्रविष्टः । अत एव 'जगृहुस्तदात्मिका' इत्यारम्भ एवोक्तम् । एवं च सुषुप्तौ प्राज्ञस्य सम्परिष्वङ्गमात्रं, नान्या क्रियेति सुखमात्रं, जीवस्य तमोभिभवादज्ञानं च । प्रकृते तु भगवतो ब्रह्मविष्णुरुद्रभावेन लीला चिकीर्षितेति तमोभिभवाभावात्सर्वं कार्यं निरपद्यतेति न काचिदनुपपत्तिरिति भावः । शेषं स्फुटम् ।

काचित्कराम्बुजमित्यत्र । नन्वत्रानुभूतस्यैव तत्र स्फूर्तिनियमात्तत्रैतत्सत्त्वे चन्दनसुगन्धमिति वदेदित्यत आहुः **अत एवेत्यादि** । यतस्तत्रेयमेवातो भगवद्बाहुसम्बन्धी स्वाभाविको धर्मश्चन्दनान्तःस्थस्तथा करिष्यतीति बोधयितुं चन्दनस्यागन्तुकत्वाय तथोक्तमित्यर्थः । अतएव दह्यमानपूतनादेहस्य भगवत्सम्बन्धादपहतपाप्मत्वेन धूमस्यागरुसौरभत्वमुक्तम्, दह्यमानस्य देहस्य धूमश्चागरुसौरभ इत्यतो न कोपि विरोध इति दिक् ।

१०-२९-४.

एका भ्रुकुटीत्यस्य टिप्पण्याम् । **अस्य तस्मिन्निति** । हृदयस्य भगवतीत्यर्थः । **तस्यातथात्व इति** । भावस्य सदोषत्वे ।

१०-२९-६

अपरेत्यत्र । ननु विषयसौन्दर्ये सत्यपि प्रतिबन्धके विद्यमाने पानं न सम्भवतीत्यत आहुः **न त्वित्यादि** । असमासेऽप्ययोर्व्याकरणान्तरसिद्धत्वेन पक्षान्तरमाहुः **अलुक् समास** इति । 'हृद्द्युभ्यां चे'ति सूत्रेण तथेत्यर्थः ।

१०-२९-७.

तं काचिदित्यस्य टिप्पण्याम् । **रसात्मकत्वेन भावात्मकत्वादिति** । इदं यथा तथा विचारितं 'चूतप्रवाले'त्यत्र । **भेदो वाच्य इति** । तथा सति दृष्टिभेदो न दोषायेति भावः । **न काप्यनुपपत्तिरिति** । विषयविषयिणोरभेदानुपपत्तिर्दृष्टिभेदकृतापराधानुपपत्तिश्च नेत्यर्थः । प्रकारान्तरीयानुपपत्तिं हृदिकृत्याहुः **एतेषामित्यादि** ।

१०-२९-८.

सर्वास्ता इत्यत्र । **स्वाप्यय इत्यादि** । स्वाप्ययः सुषुप्तिः, 'स्वमपीतो भवती'ति श्रुतेः । **तत्र भगवदाविर्भावः** । 'एवमेवायमात्मा प्राज्ञेनात्मना सम्परिष्वक्त' इति श्रुतौ सम्परिष्वङ्गकथनेन बोधित इत्यर्थः । **अधिकारिण इति** । संसाराधिकारिणः । एतस्यैव व्याख्यानं **यत इत्यादि** । नन्वेवं तत्तौल्ये 'तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुः, एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्तीति, सति सम्पद्य न विदुः, सति सम्पद्यामह' इत्यादिश्रुत्या तत्राज्ञानकथनादत्रापि तथा स्यादित्यत आहुः **स्वसम्बन्धेत्यादि** । तथा च तादृशावस्थायामपि यत् ज्ञानं तत्परोक्षभजनदशायामपीदानीमिवाहं स्थितः, परं भवतीभिर्न ज्ञात इति तदानीन्तनस्वसम्बन्धख्यापनार्थमिदानीं प्रकट इति

१०-२९-९.

ज्ञानमित्यर्थः । एतेन दृष्टान्तवैलक्षण्यमपि बोधितम् । तदेव टिप्पण्यां विवृतम् । एतास्तु
नेत्यादिना । अतो मुक्ताधिकारवैलक्षण्यमात्र एव दृष्टान्त इति भावः ।

ताभिर्विधूतेत्यत्र । ननु भगवतः सर्वदैव रोचमानत्वेन परापेक्षाभावादत्र ताभी
रुच्याधिक्यं किमित्युच्यत इत्याकांक्षायामाहुः **तासामित्यादि** । तथा च
१०-२९-१०. तासां तथात्वे भगवतः प्राकृतवत् क्षीणरसत्वं शंक्येतेति तन्निवृत्त्यर्थं तथो-
च्यत इत्यर्थः । ननु तदनिवृत्तौ को दोष इत्यत आहुः **अन्यथेत्यादि** । **स्वार्थमिति** ।
रमणाभावार्थम् । ननु रसरूपत्वस्य श्रुतिसिद्धत्वात्कथमेतच्छङ्कोदय इत्यत आहुः **स वा**
इत्यादि । तथा च सिद्धे रमणाभावे तदिवेदमपि रमणं कादाचित्कं स्यात्, ततश्च पूर्वा-
शंकापुष्टौ रसरूपत्वमपि तथा स्यात्, 'प्रशमाय प्रसादाये'ति पूर्वोक्तमपि विरुध्येतेति तन्नि-
वृत्त्यभावे दोष इत्यर्थः । तथापि दृष्टान्तस्य किं प्रयोजनमत आहुः **लोकेपीत्यादि** ।

श्रुतयो यथेत्यत्र । **तादृशमिति** । अवाङ्मनसगोचरम् । ननु श्रुतीना-
मवाङ्मनसगोचरप्राप्तिर्न प्रसिद्धेति दृष्टान्तसङ्गतिः कथमित्याशङ्क्य तासां
१०-२९-१३. तामुपपादयन्ति **श्रुतयो हीत्यादि** । **प्रासवत्य इति** । ज्ञातवत्यः ।
एवं प्राप्तिं प्रतिज्ञाय तत्र मानमाहुः **यत इत्यादि** । ननु प्रतिपादनमात्रेण कथं
प्राप्तिनिश्चय इत्याकांक्षायां तदुपपादयन्ति टिप्पण्याम् **अत्रायं भाव इत्यादिना** ।
प्रथमांशं निश्चाययन्ति **तत्र स्वेत्यादिना** । **एवं कथन इति** । वाङ्निवृत्त्युत्तरं विद्वत्त्वकथने ।
स्यादिति । तद्बोधकप्रमाणान्तराभावात्स्यात् । **मन्तव्यमिति** । श्रुतार्थापत्त्या मन्तव्य-
मित्यर्थः । ननु 'यतो वाच' इत्यत्र निषेधमुखेनैव प्रतिपादनमभिप्रेतम्, न विधिमुखेनेति
कथं तत्प्राप्त्यवगम इत्यत आहुः सुबोधिन्याम् **सर्वे चेत्यादि** । तथा चोक्तश्रुतिस्मृ-
तिभ्यां विधिमुखप्रतिपादनं सर्वैरेवाभियुक्तैरङ्गीक्रियते, तेन तथेत्यर्थः । एतदेव
टिप्पण्यां विवृण्वन्ति **अपरश्चेत्यादिना** । श्रुत्युक्तभगवद्धर्मः सर्वभावेन भजनम्, 'यो
मामेवमसंमूढो जानाति पुरुषोत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारते'ति गीता-
स्मृतेः । एव **अपरश्चेत्यादि वाच्यमित्यन्तेन** द्वितीयांशो विवृतः । इदमंशद्वयं
दार्ष्टान्तिके योजयन्ति **एवं सतीत्यादि** भवतीत्यन्तम् । नन्वभियुक्ताङ्गीकारमात्रेण
श्रुत्यर्थो न निर्णेतुं शक्य इत्यतः सुबोधिन्यामाहुः **सर्वे वेदा इत्यादि** । तथा च प्रत्यक्ष-
श्रुत्या व्यासवाक्येन च विधिमुखप्रतिपादनमेव निर्णीयत इत्यभियुक्ताङ्गीकारोपि तदनुसा-
रित्वात्तथेत्यर्थः । ननु विधिमुखप्रतिपादनस्य पदपदार्थसम्बन्धाधीनत्वाद्ब्रह्मणोऽलौकिकत्वेन
तत्र पदानां सम्बन्धासम्भवे तद्बहस्याप्यसम्भवात्कथं तथा प्रतिपादनं, कथं वा तन्निश्चायकत्वे-
षां ताभ्यो बोधोऽङ्गीकर्तुं शक्य इत्यत आहुः **अलौकिक इत्यादि** । परानपेक्षप्रामाण्ये वेदे जैमि-
निनार्थानुपलब्धावप्यव्यतिरेकाच्चोदनांशस्य यथाऽलौकिको धर्मोर्थः स्वीकृतः, तथा 'हिरण्यपर्ण-
प्रदिवस्ते अर्थ'मित्यादिभिः प्रत्यक्षैर्भगवर्ण्यमानत्विजां वेदादेव स्वस्वकार्यावगमप्रत्यक्षाप्रमद-

श्रीनां पञ्चावत्तमित्याद्यनुमानाच्च व्यासपादैर्मन्त्रार्थंशस्याप्यलौकिकः पुरुषावयवरूपोर्थः स्वीकृतः, शब्दाश्च स्वरादिवैशिष्ट्यादिना स्फुटमेवालौकिकाः, अतो न तेषां लोके संकेतः, तथापि जैमिनीयानुसारेणाकृतौ व्यासचरणोक्तपक्षान्तरानुसारेण प्रवाहे वा शब्दसम्बन्धमवधार्य तच्छ्रवणे लोकाः प्रवर्तन्ते, परं वेदशब्दास्तु पूर्वोक्तश्रुत्या निरन्तरं भगवत्कार्यं कथयन्तीति तच्छ्रवणेन तद्बलेन शुद्धान्तःकरणाः सन्तो यथौत्पत्तिकमनीषया हर्यश्वादयो नारदीयवाक्यार्थमवधारितवन्तः, तथा स्वयमेव पूर्वोक्तेऽलौकिके विषये तेषां सामर्थ्यं मन्यन्त इति तद्ग्रहे सति सुखेन विधिमुखप्रतिपादनं, तथा बोधश्चाङ्गीकर्तुं शक्य इत्यर्थः। शुद्धान्तःकरणैरप्यलौकिकार्थविषयकविधिमुखबोधस्य वाग्रूपवेदशब्दजन्यतायाः एवाङ्गीकारात् पुनराशंकान्तरं टिप्पण्यामाहुः **नन्वित्यादि** । **एवं कथनमिति** । निरन्तरं भगवत्कार्यं कथयन्तीति कथनम् । **तथात्वस्येति**। कार्योक्तिद्वारा भगवत्स्वरूपे वाग्विषयत्वस्य । **एवमिति** । भगवत्स्वरूपस्य सर्वथा वाङ्मनसागोचरत्वे । **एवं निरूपणमिति** । दृष्टान्ते मनोरथान्तप्राप्तिनिरूपणम् । **तात्पर्यमिति** । ननु पूर्वं सर्वथा वागविषयस्यानन्तरमिच्छया वाग्विषयत्वे । तथा च प्राप्तिमात्रे दृष्टान्त इति व्याख्याय विरन्तव्यम्, न तु मनोरथान्तप्राप्तिं कथञ्चित्प्रकल्प्य तत्र दृष्टान्त इत्यत्र यतनीयमित्यर्थः । समाधानं व्याकुर्वन्ति **प्रतिपादनमित्यादि** । **बोध इति**। वाक्यार्थबोधः। अयमर्थः। सर्वेषां मते वाक्यार्थबोधे पदजन्यपदार्थोपस्थितेस्तन्त्रत्वात्तस्याश्च पदशक्तिग्रहाधीनत्वात्तस्य च शक्तिग्रहं व्याकरणेतिश्लोकोक्तवाग्विशेषादिरूपकारणाधीनत्वात्तेषां च लोकवर्तिवाचकशब्दसापेक्षत्वादुक्तश्रुत्या वागादिनिवृत्तिकथनेन भगवत्स्वरूपवाचकशब्दाप्रसिद्धौ सिद्धायां तद्विषयकः शक्तिग्रहो न सम्भवतीति तन्मूलकस्तादृशस्वरूपप्रतिपादकवाक्यार्थबोधोपि लौकिकसाधनयुक्त्योरभावान्न सम्भवति । तथापि तस्य यो विधिमुखो बोधः, स केवलं भगवदिच्छयैवेति। ननु स जायत इत्यत्र किं मानमत आहुः **अत एवेत्यादि** । अत्र हि क्षरातीतत्वकथनेन क्षरांशशक्तशब्दरूपाणां वाचां तादृशमनसश्चागोचरत्वं स्वस्य बोधितम्, अक्षरादुत्तमत्वकथनेन 'अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्य'मित्यादिश्रुत्युक्तपरविद्यारूपवाचां तत्पूर्वरूपमनसश्चागोचरत्वं बोधितम्। तत एताभ्यामेव हेतुभ्यां स्वस्य पुरुषोत्तमत्वेन प्रथितत्वमुक्तम्, तच्च तदगोचरत्वेन बाधितं सत् तदतीतत्वतदुत्तमत्वाभ्यां पुरुषोत्तमत्वेन प्रथितत्वस्येच्छयैव लोकवेदगोचरत्वं बोधयतीति श्रुतार्थापत्तिरेव मानमित्यर्थः । तादृशेच्छायां प्रयोजनमाहुः **मुक्तीत्यादि** । 'मोक्षमिच्छेज्जनार्दना'दितिवाक्यान्मोक्षो भगवत एव । स च 'तमेवं विद्वा'नित्यादिश्रुतेर्ज्ञानादेव । यदीच्छा न स्यात्तदा साधनान्तराभावेन ज्ञानाभावे मुक्त्युच्छेद एव स्यादतस्तदभावाय तथेत्यर्थः । ननु 'शब्दोपि बोधकनिषेधतयात्ममूलमर्थोक्तमाह यद्ते न निषेधसिद्धि'रित्येकादशस्कन्धेपि निषेधमुखेनैव वाग्विषयत्वस्याद्दतत्वात्तदुपगमे को दोष इत्याकांक्षायामाहुः **यद्पीत्यादि** । **येन रूपेणेति** । साधनात्मकेन । **निरूपितवतीति** । यथा वीणावादकस्येच्छादिना तत्तदर्थकशब्दाविर्भावो वीणातः, तथा भगवदिच्छानुसारेण निरूपितवती-

'त्यर्थः । **एवं करणे सन्तुष्ट** इत्यादि **दत्तवानित्यन्तम्** । यथा वैणिकेच्छानुरूपशब्दाविर्भावे वीणोपरि सन्तुष्टः स तां विविधविधाभिर्गोपायति, तथा श्रुतिभ्यो रूपं प्रकटीकृत्यानन्दं दत्तवानित्यर्थः । **एतस्मादिति** । फलरूपवस्त्वनुभवात् । शेषं स्फुटम् । तथा च निषेधमुखेन वाग्विषयत्वोपगमे स्वरूपबोधकस्य पदस्य सम्बन्धषष्ठीपक्षे ब्रह्मणः षष्ठ्याश्च विरोध एव दोष इत्यर्थः । न चैकादशीयवाक्यविरोधः । तत्रापि 'यर्ह्यब्जनाभचरणे'त्यग्रिमे 'साक्षाद्यथाऽमलदृशोः सवितृप्रकाश' इतिदृष्टान्तेनात्माविर्भाव एवात्मप्रकाशस्य बोधनादत्रोक्तस्यैव प्रकारस्य सिद्ध्या सर्वथा वागाद्यविषयत्व एव तात्पर्येण निषेधबोधे तात्पर्याभावात् । उत्तरीत्यादरे 'को अद्धा वेदे'ति, 'वेदा अवेदा' इत्यादीनां 'नायमात्मे'त्यादीनां स्वारसिकसङ्गतिसिद्धेश्चेति । तस्मान्मूले मनोरथान्तप्राप्तिपर्यन्तो दृष्टान्तः, न तु प्राप्तिमात्र इति सुबोधिन्युक्तं सर्वं निःसन्देहमेवेत्यर्थः ।

भजत इत्यत्र । **उभयोरित्यादि** । टिप्पण्यां विवृतयोरभजद्भजनकर्तृभजद्भजनकर्त्रोः फलविषयः सन्देहो निवारणीय इत्यर्थः । तेन स्वरूप-
१०-२९-१६. विषयस्तु सर्वेषां वारणीय इति फलति । तदाहुः **य इत्यादि** । **किं कृतघ्ना इति** । भजनानुसारिभजनोत्तरं पूर्वभजनस्यानुपकारत्वादिकं स्वकृतस्य तत आधिक्यं चानुसन्दधानाः पूर्वकृतं निकर्षन्ति न मन्वत इति तादृशा इत्यर्थः । **धूर्ता इति** । पूर्वकृतावुपकारत्वानुसन्धानेपि स्वकृतौ तत्साम्यमनुसन्दधानाः पूर्वकृतं नोत्कर्षन्ति वञ्चयन्तीति तादृशा इत्यर्थः । समीचीनत्वं व्युत्पादयन्ति **केनचिदित्यादि** । किं स्यादित्यस्यैव विवरणं **फलार्थेत्यादि निरपेक्षेत्यादि** । पूर्वेण तथाकरणे उत्तरेण प्रत्युपकारस्य निश्चेतुमशक्यत्वात्संदेह इत्यर्थः । तथा च फलदाने तत्करणे सन्दिह्यमानत्वेन स्वारसिकस्वाङ्गीकारे च समीचीनाः इत्यर्थः । सन्देहबीजं तु लोके त्रिविधानां दर्शनमेव । एवं प्रथमपक्षे स्वरूपसन्देहो विवृतः । द्वितीये फलसन्देहं विवृण्वन्ति **अभजत इत्यादि** । ोपोदाहरणं तार्तीयीकं दित्युपाख्यानम् । उपकारोदाहरणं पाद्मर्मिकमाग्नीध्रोपाख्यानम् । ्रोहोदाहरणं नावमिकमुर्वश्युपाख्यानम् । धर्मोदाहरणं भारतीयं सुदर्शनोपाख्यानम् । पाद्मे ैशाखमाहात्म्ये चित्रोपाख्यानं च । एवं नानाफलस्मरणात् द्वितीयप्रतियोगिफलविषयकः ्न्देहो विवृतः । स्वरूपसन्देहोत्रानुषङ्गिको बोध्यः । अनुयोगिविषयकमाहुः **यो चे-** ्यादि । अर्जुन उर्वशीशापस्य, नारदे जराशापस्य, मार्कण्डेये वरूथिनीप्रत्याचक्षाणे ब्राह्मणे धर्मवृद्धेश्च दर्शनेन सन्देहोत्र बोध्यः । अत्रापि कृतनिन्दनाद्यैः पुनर्भजनापेक्षातदनपेक्षाभ्यां च कृत्वा कृतघ्नत्वधूर्तत्वसमीचीनत्वैः स्वरूपसन्देहो बोध्यः । तृतीये

१ पूर्वकृत । २ स्वकृतिसदृशमेव नत्वधिकम् । ३ निरपेक्षभजनकरणे उत्तरेण पुरुषेण । ४ कोटिज्ञानं सन्देहः । अयं प्रत्युपकारः कर्तव्यो वाऽयं प्रत्युपकार इति सन्देहः । कस्यकस्याधुना कामभावः । ग्रहेण कृतं चेद् दुःखदम् । ५ भजनानुसारेण न भजन्ति ते त्रिविधाः समीचीनान्ताः ज्ञेयाः । ६ ग्रहप्रेरिता. गताः न तु स्वमनीषया । ७ भारते उत्तरो भजति पूर्वोन भजतीत्यर्थ. सुबोधिन्याम् ।

सन्देहमाहुः ये चेत्यादि । तेषामिति । भजदभजदभजनकृतामुदासीनानाम् । उभय-विधानामिति । उक्तोदासीनभजनकर्तृणां तदभजनकर्तृणां चेत्यर्थः । अत्रापि सूर्यस्य किमुदासीनस्य यत् फलं तत्, उत कृतघ्नादेर्यत्तत् । तथोत्तरस्य किं धर्मात्मनां यत् तत्, उत मूर्खाणां यत् तत् । एवं तृतीयस्य किमुदासीनस्य यत्तत्, उत धूर्तस्य यत्तद्वेति । अत्रापि पूर्ववत्स्वरूपसन्देहोपि बोध्यः । साधनविषयकमाहुः कृतस्येत्यादि । कुत्रेति । अपूर्वजनने स्नेहे लौकिकप्रशंसायां चेत्यर्थः ।

मिथ इत्यत्र । स्वार्थैकान्तोद्यमत्वमुपपादयन्ति ते हीत्यादि । मिथःशब्दबोधितायामन्योन्यतायां यौगपद्यस्याशक्यत्वात्पूर्वापरभाव आवश्यकः । तत्रो-
१०-२९-१७. त्तरेण क्रियमाणे भजने पूर्वकृतभजनतुल्यतादर्शनेनोत्तरस्य तदनुरूपं ज्ञानमनुमीयते । तदुत्तरं पूर्वेण पुनस्तथा तदकरणात् पूर्वस्यापि तादृशं ज्ञानमनुमीयते । असकृत्कृतौ तूभयोस्तथा ज्ञानं सुस्पष्टानुमानम् । एवं तरतमभावानुवृत्त्या तयोः स्वार्थपरत्वमपि सुस्पष्टानुमानम्, अन्यथा तथा नानुवर्तयेयुः । अनुवृत्त्या काकतालीयता निवारिता । एवञ्च पौनःपुन्ये कृताधिक्यानुसन्धानबाधात्कृतघ्नता, वञ्चनासम्भवाद्धूर्तता च निवारिता । एवं दोषकोटिव्यावृत्तौ उपकारस्नेहधर्मान्यतमसम्भवेन समीचीनता सम्भवति । तत्रोपकारस्य तुल्यतायामुपक्षीणत्वान्न समीचीनतानिर्वाहकत्वमित्यन्याभ्यां समीचीनत्वं नन्वित्यादिनाशंक्य परिहारं व्युत्पादयन्ति क्षणेनैवेत्यादि । उदाहरणं तु गजेन्द्रमोक्ष अगस्त्यक्रोधः । ननु धर्मत्वे किं बाधकमत आहुः नापीत्यादि । तथा चोक्तवाक्यसूचितमन्योन्यभजनं न धर्मः, अन्योन्यभजनत्वात्, पिशाचभिक्षावदित्यनुमानमेव बाधकमित्यर्थः । ननु यत्र यत्रान्योन्यभजनत्वं न तत्र धर्मत्वमिति व्याप्तिर्गुरुसेवायां व्यभिचरतीत्यसदनुमानत्वान्नास्य बाधकतेत्याशङ्कायां दृष्टार्थायां तस्यामपि न धर्मत्वमित्याहुः गुरुसेवायामित्यादि । दृष्टार्थतेति । वृत्तिप्रतिष्ठाद्यर्थता । तथा च तत्र शास्त्रप्रयुक्त्यभावेन तादृशगुरुसेवायां धर्मत्वस्याशक्यवचनत्वान्मिथो भजनं धर्मो मिथो भजनत्वात्, गुरुसेवावदित्यत्र तादृशी सा न धर्मः दृष्टार्थत्वाद्वाणिज्यवदिति प्रत्यनुमानेन तन्निरासात्स्वार्थार्थैव सेति न सापि धर्म इत्यर्थः । ननु दृष्टार्थतायामपि शिष्यस्य गुरोश्च 'वसन् गुरुकुले दान्तो ब्रह्माधीयीत चाहुतः' 'उपनीय तु यः शिष्य'मित्यादिशास्त्रानुसारित्वे गुरुसेवा धर्मः, विहितत्वाद्यागवदिति शास्त्रसनाथानुमानेन तस्यां धर्मत्वे सिद्धे पूर्वोक्तहेतोः साधारणत्वनिश्चयान्न तस्यानुमानस्य बाधकतेत्यत आहुः शास्त्रेत्यादि । तथा च यदि वृत्त्याद्यभिसन्धानं, तदा तदंशे शास्त्राभावाद्दाम्भिकत्वेन पाषण्डत्वादिकमेव तत्रेति न हेतोः साधारणत्वं, यदि च न तादृगभिसन्धानं, तदा तु शास्त्रस्यैव प्रयोजकत्वेन तस्यां मिथो भजनत्वमेव न, किन्तु विहितत्वमेवेति तेन रूपेण व्याप्तेरबाधान्न बाधकत्वहानिरित्यर्थः । ननु दृष्टार्थत्वेन मिथोभजनरूपाया गुरुसेवाया धर्मत्वाभावसाधनमसङ्गतम्, विद्यारूपस्य दृष्टार्थस्य वैधसेवायामपि सत्त्वादिसाकांक्षायामाहुः विद्येत्यादि । 'तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेयमुत्तम'मित्यादौ जिज्ञा-

स्वादिपदानां 'चित्रया यजेत पशुकाम' इत्यादिषु पशुकामादिपदवत्फलबोधकत्वादिच्छाविषयाया विधाया दृष्टत्वेपि शास्त्र एव प्रवेशेन धर्मत्वाभावसाधकहेतौ वैधभिन्नत्वस्य विशेषणीयत्वान्न दोष इत्यर्थः । ननु धर्मादयः पुरुषार्थनाविषया इति शास्त्रीयत्वेपि स्वार्थत्वस्य तेषु निर्बाधत्वात्स्वार्थार्थत्वेन मिथोभजननिन्दा न युक्ता । तथा 'सहयज्ञाः प्रजाः सृष्ट्वे'ति सन्दर्भे 'देवान्भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथे'ति वाक्येन यज्ञस्य मिथोभजनत्वसिद्धेर्मिथोभजनत्वेन धर्मत्वाभावसाधनमप्ययुक्तमित्यत आहुः **यद्यपीत्यादि** । अत्र हि लौकिकोपयोगि स्वार्थाभिसन्धानपूर्वकं यन्मिथो भजनं तन्निन्द्यते, 'भजतोनुभजन्ती'ति प्रश्नवाक्येन तत्स्वरूपनिश्चयात्, न तु यत्किञ्चित्स्वार्थाभिसन्धानम्, अतो धर्मादीनां स्वार्थत्वेप्यदोषः । न च तेषामन्योन्यभजने सिद्धिः । तथा सति हविर्ग्रहणायात्रागत्य फलं ददतां देवानामपि धर्मापत्तेः । न च तेन तेषां कोपि धर्मः । 'भजन्ति ये यथा देवान्देवा अपि तथैव तान् । छायेव कर्मसचिवाः साधवो दीनवत्सलाः । देवाः स्वार्थानसाधव' इत्यादिनिन्दादर्शनात् । एवं सत्युक्तसन्दर्भस्थं परस्परभावनमपि स्वार्थसाधनत्वेनैव फलति, न तु धर्मसाधकत्वेन, 'श्रेयः परमवाप्स्यथे'ति फलकथनेन अकरणे दोषबोधनेन च तथा निश्चयात् । तदेतदुक्तं **न ते सिध्यन्तीति** । अन्योन्यभजनेनेति तृतीयान्तपक्षेपि तेन ते सिध्यन्ति, न तु तद्रूपा इत्यर्थो बोध्यः । अनुपपत्तेरुक्तत्वात् । एवं 'ये यथा मां प्रपद्यन्त' इत्यत्रापि द्रष्टव्यम् । 'एवं मदर्थे'त्यस्य टिप्पण्यां तस्य भजनस्य प्रावाहिकरूपताया वक्ष्यमाणत्वात् । एवं मिथो भजने धर्माभावं साधयित्वा क्वचित्तदकरणे क्रोधाभावे सौहार्दं तु स्यादेवेति तन्निषेधो नोपपद्यत इत्याकांक्षायां तदभावमप्युपपादयन्ति **तथेत्यादि** । **हिशब्द इत्यन्तम्** । **दुःखनिवृत्तिरिति** । सेवाकर्तुर्दुःखनिवृत्तिः । शेषं स्पष्टम् । अत्र च 'यस्त आशिष आशास्ते न स भृत्यः स वै वणि'गिति फलितं बोध्यम् ।

भजन्त्यभजत इत्यत्र । **पूर्वं इति** । भजनकर्ता । **कर्तव्य इति** । अभजता उत्तरेण कर्तव्य इत्यर्थः । **विधेयमिति** । भजनीयेन विधेयम् । तदेव
१०-२९-१८. टिप्पण्यां विवृतं **धर्मार्थमित्यादिना** । पातकादीत्यादिपदेन लौकिकानिष्टम् । तथा च 'श्रोत्रियस्य ब्रह्मचारिणो दीक्षितस्य व्रतिनो लिङ्गिनो वामां दृष्ट्वा चानरागस्य मुमूर्षोर्मित्रवाक्यादानृशंस्याच्च गमनं धर्मोऽधर्मो वेति संशय' इति कामसूत्रोपदर्शितादिस्थले भजनीयस्तदर्थं स्वयं प्रायश्चित्तादिकं कुर्यादित्याशयः । उदाहरणं तु पाद्मवैशाखमाहात्म्यप्रथमाध्यायस्थं चित्रोपाख्यानं बोध्यम् । तत्र हि वैश्यजातीयया वेश्याभूतया विचित्रैः सुरतोपचारैरदुष्टबुद्ध्या संसेवितोऽतिथिस्तीर्थान्यटमानो वसुदेवनामा विप्रो रेवायां वैशाखस्नानोपदेशं विधाय तया सार्धं तत्र स्नानं कुर्वन् कारयन् दयया तदुपभोगेन वमंस्तां स्वात्मानं चोद्धृत्य स्वयं पाण्ड्यदेशाधिपो वीरसेनाख्यो जन्मान्तरे जातः । सा च काशिपतेर्वैष्णवतमस्य दिवोदासस्य सुता दिव्यादेवीनाम्नी जातेत्युक्तम् ।

पुण्येनैव पापनिवृत्तिरित्यादि । 'धर्मेण पापमपनुदती'तिश्रुतौ कत्रैक्यस्य विवक्षितत्वादन्यथातिप्रसङ्गाच्च तथेत्यर्थः । **धर्मेऽपीय** इत्यादि । 'पतिं त्वपतितं भजे'दित्यादिस्मृतावपतित इत्यादिविशेषणात्तथेति तथा । **दिगिति** । जातेष्टिगयाश्राद्धपुण्यदानादिशास्त्रेभ्योपीत्यर्थः । अत्र निर्णीयमानोऽभजद्भजनरूपो धर्मः को वेति निष्कृष्टं वदतीत्याशयेनाहुः **निषेधेत्यादि । धर्मापवादेति** । धर्मे अपवादेति समासो बोध्यः । **कर्तव्यत्वेनेति** । 'कार्यमित्येव यत्कर्मे'ति, 'एतान्यपि तु कर्माणि' इत्यादिवाक्यादित्यर्थः । **न चेत्यादि** । कर्मदेवतागवादिषु जडत्वस्वर्गवासित्वाज्ञत्वैर्धर्मानुत्पत्तेस्तत्स्याविवक्षितत्वं, न तु प्रतियोगिनि भजनशङ्काभावादित्यर्थः । **उक्तेष्वित्यादि** । बहुलाव्याघ्रसंवादादिना इन्द्राद्यश्वमेधकथादिभ्यश्च निमित्तवशात्तत्रापि धर्मोत्पत्त्यवगतेर्न तेन तथा, किन्तूक्तशङ्काभावादेव तथेत्यर्थः । सुबोधिन्यां **यत्र पुनरित्यादि** । अत्र निरपवादधर्मोदाहरणमानुशासनिकपर्वस्थं सुदर्शनोपाख्यानं बोध्यम् । तत्र ह्योघवत्या स्वपत्युर्गृहस्थधर्मं रक्षन्त्या स्वात्मप्रदानेनातिथिर्ब्राह्मणः पूजित उटजान्निर्गत्य स्वस्वरूपं धर्म इति प्रकटीकृत्य, अग्रे 'एषा हि तपसा स्वेन संवृता ब्रह्मचारिणी । पावनार्थं च लोकस्य सरिच्छ्रेष्ठा भविष्यति । अर्द्धेनौघवती नाम त्वामर्द्धेनोपयास्यति । यत्र नावृत्तिमभ्येति शाश्वतांस्तान्सनातनान् । अनेनैव तु देहेन लोकांस्त्वमभिपत्स्यसे' इत्यादि सुदर्शनं प्रत्युवाचेत्याद्युक्त्वा 'धन्यं यशस्यमायुष्यमिदमाख्यानमुत्तम'मित्यादिना भीष्मेण श्रवणकथनफलकथनात् । नन्वेवं सम्भावितापवादमप्यभजद्भजनं चेन्निरपवादधर्मात्मकं तर्हि सर्वः प्रवर्त्स्यत इति मर्यादा भंक्ष्यत इत्यत आहुः **अधिकारीत्यादि । एकत्रेति** । धर्मजनके तस्मिन् । अत्र सौहृदधर्मानुषङ्गिकमर्थस्वभावादेवानुबध्यते । **अपरत्रेति** । सौहृदजनके । **अन्यत्रापि दृश्यत इति** । सांसिद्धिककरुणास्नेहरहितेष्वप्यभजद्भजनं दृश्यत इत्यर्थः । अतिदेशप्रयोजनमाहुः **य इत्यादि** । ननु राजधर्मे 'सहार्थो भजमानश्च सहजः कृत्रिमस्तथा । धर्मात्मा पञ्चमो मित्र'मिति पञ्चविधमित्रेषु सहजभजमानौ निरुपधी उक्ताविति तयोर्भावभेदेन स्नेहपि भेदात्कथमेक एवात्र दृष्टान्त इत्यत आहुः **सम्बन्ध इत्यादि** । तथा च कर्मणां गहनगतित्वेन सम्बन्धादेव तथा भाव इति भावभेदेपि निरुपधित्वेनैक्यादेकविधा एवेत्यर्थः । एतेन स्नेहाद्भजने जन्मान्तरीयसम्बन्ध एव प्रयोजक इति न तत्र धर्मसंभावनेति सूचितम् । **एतदुपकारेणेति** । अभजता कृतेन प्रत्युपकारेणेत्यर्थः । एतेन स्नेहाद्भजने पूर्वसम्बन्धस्याशक्यज्ञानत्वादपवादोपि सम्भवतीति सूचितम् । एवं व्याख्याय धर्मस्थलं निष्कर्षन्ति **अनेनेत्यादि, क्रियमाणमिति** । प्रत्युपकारं मिथोभजनत्वभिया नाङ्गीकुर्वन्तीत्यर्थः । तथा च 'ब्राह्मणस्य कामपरवशस्य प्राणत्राणार्थं गमनं धर्मो निरनुबन्ध' इति कामसूत्राद्युक्तसजातीयादिस्थले धर्मानुबन्धधर्मस्थले च धर्मः । तथा 'तस्यैव लोकविद्विष्टस्य मायाविनो वा

[1] प्रत्युपकारेण तस्य भजनस्य बाधः नामापवादः ।

त्वायमेव विषय इत्यत्र किं गमकमित्यपेक्षायां तदुपपादयन्ति **अत्र यथेत्यादि, भजनं वेत्यन्तम्** । **कथञ्चिदिति** । 'अकरोः सचिवं दूत'मित्यादाविव लीलयेत्यर्थः । **अर्थ इति** । तस्मै दीयमानेऽर्थ इत्यर्थः । एवं प्रत्युपकृतिस्वरूपमेतद्भजनस्वरूपं च निश्चित्य साधारण्यपरिहारायाहुः **यचेत्यादि** । **श्रुत्युक्तरूपाभावादिति** । अनुरूपवस्तु सत्तायां 'न तत्समश्चाभ्यधिकश्च दृश्यत' इति श्रुत्युक्तरूपाभावादित्यर्थः । **न स्यादिति** । स्वस न स्यादित्यर्थः । **तद्भिन्नतदपेक्षायामिति** । उपकृतिभिन्नप्रत्युपकृत्यपेक्षायामित्यर्थः । **नो चेदिति** सुबोधिनीस्थं प्रतीकम् । **अयमिति** । अशक्यकृत्यशक्तिरूप इत्यर्थः ।

इत्येकोनत्रिंशाध्यायसुबोधिनीटिप्पण्योः प्रकाशः ।

अथ त्रिंशाध्यायं विवरिषवः पूर्ववदेव कथासङ्गतेर्ज्ञातुं शक्यत्वादध्यायार्थमेवाहुः **त्रिंशत्तम इत्यादि** । अर्थस्तु टिप्पण्यामेव स्फुटः । 'रसात्मकस्तु यः काम' इत्यादिकारिकाद्वयेन यदुक्तं तदाक्षिपन्ति टिप्पण्याम् । **नन्वित्यादिना** । **प्रणयनं हि जीवार्थमिति** । 'तदैतद्ब्रह्मचर्येण परमेण समाधिना । विहितं लोकयात्रार्थं न रागार्थोऽस्य संविधि'रिति शास्त्रसमाप्तौ वात्स्यायनसूत्रादवगम्यते । एवं भरतग्रन्थादपि बोध्यम् । अध्यायानां शतसहस्रेण ब्रह्मणा चतुर्वर्गप्रणयनकथनाच्चेत्यर्थः । तथा च रसाभिव्यञ्जनार्थकप्रनाड्यङ्गीकारे रसस्य भगवद्रूपत्वहानिः, भगवद्रूपतायां च प्रणाडीवैयर्थ्यान्मूलविरोध इत्युभयतःपाशारज्जुरिति पूर्वपक्षतात्पर्यम् । तत्र समादधते **नैवमित्यादि** । **अत्रेति** । मूले कारिकायां चेत्यर्थः । अत्रायमर्थः । श्रुतौ हि 'असद्वा इदमग्र आसीत्, ततो वै सदजायत, तदात्मानं स्वयमकुरुत, तस्मात्तत्सुकृतमुच्यत इति, यद्वैतत्सुकृतम्; रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवती'त्येवं पूर्वसृष्टेरसाधुत्वं, ततः सृष्ट्यन्तरस्य साधुत्वम्, साधुत्वे स्वात्मरूपत्वरूपं हेतुः. तस्य सुकृतत्वं, सुकृतस्य रसत्वं, रसस्यानन्दरूपता च बोधिता । तत्र यद्युद्बोधकादिप्रनाडी न विवक्षिता स्यात्, आत्मकरणं न वदेत्, यदि वा सर्वसामान्या स्यात्, पूर्वसृष्टेरसाधुत्वमनेवंरूपतां च वा न वदेत् । यदि च रसस्य मनोविकारत्वं लौकिकत्वं वा विवक्षितं स्यात्, तदाप्यात्मकरणं आनन्दरूपत्वं च न वदेत् । अत उद्बोधकादिवैशिष्ट्यं श्रुतिसिद्धम् । तदेतदुक्तं **तत्स्वरूपस्यैव तथात्वादित्यन्तेन** । तथा च प्रनाड्यङ्गीकारेपि न भगवद्रूपत्वहानिरित्यर्थः । किञ्च, अनुकृत्यधिकरणे सर्वस्य भगवदनुकारित्वं 'तमेव भान्तमनुभाति विश्व'मिति विषयवाक्येन प्रतिपादितम्, अतः प्रकृतेपि यदि लौकिको रसः प्रतिपाद्यते, तदापि मूलरसानुकारितयैव तत्स्वरूपं सिध्यतीत्येतद्दृष्टान्तेन सोपि रसोनुमीयताम् । अयं लौकिकः परिच्छिन्नो, मात्रोपजीवनश्रुतेः, स त्वपरिच्छिन्नो, भूमत्वात् । तथा च लोकेऽनुकरणमात्रेण तदाभासस्यैव प्राकट्यम्, न तु तस्येति न जीवस्य, तत्करणेपि न तद्रससम्बन्धलेशः । शास्त्रप्रणयनं तु दूरतस्तस्यैव परिचा-

१ मया गौतमेन रसशास्त्रं कथितम् । २ निर्वाहार्थम् । यात्रार्थमिति रसरूपभगवत्प्राप्त्यर्थम् । ३ भगवद्रसानुसारि । ४ लौकिकः । ५ अलौकिकः । ६ परिमितः । ७ व्यापकत्वात् ।

नृणामनित्यचित्तत्वात् । अभजतस्तु प्रायश्चित्तं विधेयं स्वार्थं तदर्थं च । यदि तदर्थं न तत्कुर्यात्तदैतद्धर्मो भजति गच्छेत्ततश्च पापभागी स्यादिति । अभजन्तस्तु यद्यात्मारामा आप्तकामा वा तदा निर्दोषा एव । तत्राद्यप्रतियोगिकं साधनं धर्मे उपयुज्यते । द्वितीयप्रतियोगिकं तु भजतोऽज्ञतां ज्ञापयद्वचर्थमेव । संभावितापवादे तु निर्बन्धेन प्रवृत्तौ दोपमप्युत्पादयति भजतः । यदि चाभजन्तो नैतादृशास्तदापि उपकाराज्ञाने अज्ञताप्रयुक्तदोषभाजः । ज्ञात्वा प्रत्युपकाराकरणे गुरुद्रोहिण इति ।

नाहमित्यत्र । एवं भगवति भजनसामर्थ्यसत्तया भक्तानां धर्मार्थभजनपक्षव्यावृत्तावपि स्नेहाद्भजनस्याव्यावर्तितत्वात्तत्र भक्तानां प्रवेशे शिष्टानां
१०-२९-२०. वाक्यानामसङ्गतिरित्यतस्तमपि व्यावर्तयितुमुद्भावयन्ति **नन्वित्यादि** । **निरूपकत्वेनेति** । स्नेहविषयतया भजनप्रयोजकत्वेन । **एषामिति** । आत्मारामादिचतुर्णाम् । तथा च बालादिवदविचार्य एवेत्यर्थः । ननु सामर्थ्यसत्तायां तेपि विचार्या एवेत्यत आहुः **ईश्वरश्चेत्यादि** । अत्र प्रतिभजनशङ्काया एवाभावात् पञ्चमोऽयमिति तथेत्यर्थः । तथा च भजदभजतोरुभयोरप्यविचार्यत्वादेव प्रश्नोत्तरसिद्धावग्रिमवाक्यानां न सङ्गतिरिति शङ्काग्रन्थाशयः । अत्र समादधानाः सङ्गतिं व्युत्पादयन्ति **मैवमित्यादि** । **उपक्षीणा इति** । तावतैव तादृग्भजनसिद्धेर्न विचारार्हा इत्यर्थः । नन्वीश्वरत्वाद्भगवानविचार्य इत्यत आहुः **ईश्वरोपीत्यादि** । **नोचित इति** । कालान्तरेऽपेक्षया नोचितः । **तृतीयपक्ष इति** । अकृतज्ञतादौ । ईश्वराणामित्यादिना द्वितीयापि कोटिर्वारिता । तेन धर्मवद्धर्मसन्देह एव पर्यवसन्न इति तन्निवृत्त्यर्थानि वाक्यानीति नासङ्गतिरित्यर्थः । **तं पक्षमिति** । पूर्वोक्तकोटिपञ्चकम् । 'ननु जीव' इत्यनेनाकृतज्ञत्वादिव्यावृत्तिः । तथाप्यात्मारामत्वादेर्भगवति श्रौतत्वात्कथं तद्व्यावृत्तिरित्याकांक्षायां तद्व्युत्पादयन्ति **तेनेत्यादि** । तथा च शुकादिभिः स्वप्रतिष्ठत्वेन रामत्वाय तथोच्यते, न तु व्यावर्त्यव्यावृत्त्य इति न स पक्ष इत्यर्थः । एवं 'सोऽकामयते'त्यादावभिध्यैवोपदिश्यते, न तु , काम इति । 'नह्यपुत्रः पण्डितपुत्रो भवती'तिन्यायेन सोपि पक्षो निरस्तो बोध्यः । **तत्रेति** । भजनस्येष्टसाधनत्वपक्षे । **पूर्वमुक्तमिति** । अनुपदमेव 'द्वितीये त्वि'त्यादिनोक्तम् ।

एवं मदर्थेत्यत्र । **मे विचिकीर्षित इति** । विशिष्टः सर्वाधिकश्चिकीर्षितः । 'यदा
१०-२९-२१. पुमांस्त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे' इति वाक्यादित्यर्थः ।

न पारये इत्यस्य टिप्पण्याम् । **उक्तमिति** । जन्तुपददानादुक्तम् । **वृत्त्यर्थमिति** । सिद्ध्यर्थम् । **तथा सतीति** । मर्यादालेशस्यापने सति । **विरो-**
१०-२९-२२. **धापत्तिरिति** । 'ये यथा मां प्रपद्यन्त' इति वाक्यात्तथेत्यर्थः । **तदिति** । भजनानुसारेणाभजनम् । **विमुच्ये इति** । निश्चिन्तो भवामि । गीतावाक्य-

१ अभजतः पुरुषस्य प्रायश्चित्तं भजनकर्त्रा विधेयम् ।

स्वायमेव विषय इत्यत्र किं गमकमित्यपेक्षायां तदुपपादयन्ति **अत्र यथेत्यादि, भजनं वेत्यन्तम्** । **कथञ्चिदिति** । 'अकरोः सचिवं दूत'मित्यादाविव लीलयेत्यर्थः । **अर्थ इति** । तस्मै दीयमानेऽर्थे इत्यर्थः । एवं प्रत्युपकृतिस्वरूपमेतद्भजनस्वरूपं च निश्चित्य साधारण्यपरिहारायाहुः **यद्वेत्यादि** । **श्रुत्युक्तरूपाभावादिति** । अनुरूपवस्तुसत्तायां 'न तत्समश्चाभ्यधिकश्च दृश्यत' इति श्रुत्युक्तरूपाभावादित्यर्थः । **न स्यादिति** । स्वस्य न स्यादित्यर्थः । **तद्भिन्नतदपेक्षायामिति** । उपकृतिभिन्नप्रत्युपकृत्यपेक्षायामित्यर्थः । **नो चेदिति** सुबोधिनीस्थं प्रतीकम् । **अयमिति** । अशक्यकृत्यशक्तिरूप इत्यर्थः ।

इत्येकोनत्रिंशाध्यायसुबोधिनीटिप्पण्योः प्रकाशः ।

अथ त्रिंशाध्यायं विवरिषवः पूर्ववदेव कथासङ्गतेर्ज्ञातुं शक्यत्वादध्यायार्थमेवाहुः **त्रिंशत्तम इत्यादि** । अर्थस्तु टिप्पण्यामेव स्फुटः । 'रसात्मकस्तु यः काम' इत्यादिकारिकाद्वयेन यदुक्तं तदाक्षिपन्ति टिप्पण्याम् । **नन्वित्यादिना** । **प्रणयनं हि जीवार्थमिति** । 'तदेतद्ब्रह्मचर्येण परमेण समाधिना । विहितं लोकयात्रार्थं न रागार्थोऽस्य[1] संविधि'रिति शास्त्रसमासौ वात्स्यायनसूत्रादवगम्यते । एवं भरतग्रन्थादपि बोध्यम् । अध्यायानां शतसहस्रेण ब्रह्मणा चतुर्वर्गप्रणयनकथनाच्चेत्यर्थः । तथा च रसाभिव्यक्त्यर्थकप्रनाडयङ्गीकारे रसस्य भगवद्रूपत्वहानिः, भगवद्रूपतायां च प्रणाडीवैयर्थ्यान्मूलविरोध इत्युभयतःपाशारज्जुरिति पूर्वपक्षतात्पर्यम् । तत्र समादधते **मैवमित्यादि** । **अत्रेति** । मूले कारिकायां चेत्यर्थः । अत्रायमर्थः । श्रुतौ हि 'असद्वा इदमग्र आसीत्, ततो वै सदजायत, तदात्मानं स्वयमकुरुत, तस्मात्तत्सुकृतमुच्यत इति, यद्वैतत्सुकृतम्, रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवती'त्येवं पूर्वसृष्टेरसाधुत्वं, ततः सृष्ट्यन्तरस्य साधुत्वम्, साधुत्वे स्वात्मरूपत्वरूपं हेतुः, तस्य सुकृतत्वं, सुकृतस्य रसत्वं, रसस्यानन्दरूपता च बोधिता । तत्र यद्युद्बोधकादिप्रनाडी न विवक्षिता स्यात्, आत्मकरणं न वदेत्, यदि वा सर्वसामान्या स्यात्, पूर्वसृष्टेरसाधुत्वमनेवंरूपतां च वा न वदेत् । यदि च रसस्य मनोविकारत्वं लौकिकत्वं वा विवक्षितं स्यात्, तदाप्यात्मकरणं आनन्दरूपत्वं च न वदेत् । अत उद्बोधकादिवैशिष्ट्यं श्रुतिसिद्धम् । तदेतदुक्तं **तत्स्वरूपस्यैव तथात्वादित्यन्तेन** । तया च प्रनाडयङ्गीकारेपि न भगवद्रूपत्वहानिरित्यर्थः । किञ्च, अनुकृत्यधिकरणे सर्वस्य भगवदनुकारित्वं 'तमेव भान्तमनुभाति विश्व'मिति विषयवाक्येन प्रतिपादितम्, अतः प्रकृतेपि यदि[2] लौकिको रसः प्रतिपाद्यते, तदापि मूलरसानुकारितयैव[3] तत्स्वरूपं सिध्यतीत्येतदृष्टान्तेन सोपि[4] रसोऽनुमीयताम् । अयं लौकिकः[5] परिच्छिन्नो[6], मात्रोपजीवनश्रुतेः, स त्वपरिच्छिन्नो, भूमत्वात्[7] । तथा च लोकेऽनुकरणमात्रेण तदाभासस्यैव प्राकट्यम्, न तु तस्येति न जीवस्य, तत्करणेपि न तद्रससम्बन्धलेशः । शास्त्रप्रणयनं तु दूरतस्तस्यैव परिचा-

१ मया गौतमेन रसशास्त्रं कथितम् । २ निर्वाहार्थम् । यात्रार्थमिति रसरूपभगवत्प्राप्त्यर्थम् । ३ भगवद्रसानुसारि । ४ लौकिकः । ५ अलौकिकः । ६ परिमितः । ७ व्यापकत्वात् ।

यनायेति तत्रैव स्फुटम् । वस्तुतस्तु पाद्मे पातालखण्डे रामाश्वमेधे शेषवात्स्यायनसंवादाद्पेवैष्णवत्वमवगम्यते । एवं भरतस्यापि, नाट्यशास्त्रज्ञातुर्मोक्षकथनात् । किञ्च, आंजनेयोपि प्रणेता नाट्यशास्त्रस्य । स च परमभक्तो जनकतनयाप्राणनाथस्य । अतस्तादृशां य एतावान् प्रयासः स न त्रिवर्गोपयोगितया जीवार्थः, अपि तूक्तरीत्या मोक्षसाधनतापर्यन्ततया । किञ्च, वात्स्यायनेन सांप्रयोगिकाधिकरणे 'ऋचां दशतयीनां चतुःषष्टिसंज्ञितत्वादिहापि तदर्थसम्बन्धात्पाञ्चालसम्बन्धाच्च बह्वृचैरेषा पूजार्थं संज्ञा प्रवर्तितेत्येक' इति सूत्रयता संप्रयोगाङ्गचुम्बनादीनामृगर्थत्वं प्रदर्शितम् । 'सर्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्वैरहमेव वेद्य' इति श्रुतिस्मृतिभ्यां वेदस्य भगवत्परत्वं सिद्धम् । एवं सत्यस्य शास्त्रस्य तत्सामानाधिकरण्ये वेदवत् परोक्षवादेन लीलासहितभगवत्प्रतिपादकत्वं युक्तमेव । गान्धर्वस्य सामवेदोपवेदतया च । अत एवमर्थाज्ञातॄणां जीवानां भ्रान्तिरित्येतदाद्यभिसन्धायोक्तं तच्चेत्यादि, बुद्ध्यस्वेत्यन्तम् । तस्मान्न कोपि शङ्कालेश इति दिक् ।

सुबोधिन्यां **तासां मध्य** इत्यत्र । **अन्यथेति** । षोडशकृष्णपक्षे चतुःकृष्णपक्षे चेत्यर्थः । तत्राद्यपक्षे हेतुमाहुः **कृष्णेत्यादि** । द्वितीये हेतुर्मूलादेव
१०-३०-३. स्फुटतीत्याशयेनाहुः **इममित्यादि** । **इमं** अष्टकृष्णपक्षरूपम् । तथा च चतुःकृष्णपक्षे अष्टानां सम्बन्धाभावेन मूलं विरुध्येतेत्यष्टकृष्णपक्ष एवादर्तव्य इत्यर्थः । प्रकारान्तरेण रसाभासमाशङ्क्य परिहरन्ति **स्वसंमुखेत्यादि** । ननु भगवदिच्छया दर्शनाभावसमर्थने षोडशपक्षोप्यदुष्ट इत्यत उपपत्त्यन्तरमाहुः **यावतीरित्यादि** । नन्वस्त्वेवं, तथापि भक्तानां प्रत्यक्षस्यापि प्रामाण्याद्विल्वमङ्गलैश्च समसंख्यादर्शनान्नैकान्ततोऽष्टसंख्यानिर्णय इत्यत आहुः **यदित्यादि** । तथा च तद्वाक्ये कालवशेनाधुना पाठभ्रमो वा, तादृशपाठस्य प्रामाणिकत्वे तद्दृष्टं मण्डलमन्यदेव रसपोषोत्तरभावीति निश्चेयमित्यर्थः । ननु मध्ये वेणुनादोक्तिर्नान्यत्वगमिका, रसार्थेपि मण्डले गानस्यापेक्षितत्वादित्यत आहुः **गानार्थमित्यादि** । नन्वत्राप्यग्रे समसंख्यापक्षस्य संभवदुक्तिकत्वान्नैकान्ततः संख्यानिर्णय इत्यत आहुः **मध्ये मणीनामित्यादि** । तथा च यथात्र भगवदिच्छया संमुखस्थितकण्ठालिङ्गितदर्शनाभावः, तथा तत्र देवानां समसंख्यादर्शनं, न तावतात्र तादृक्संख्यासिद्धिरित्यर्थः । अत्र बीजं 'तासां मध्ये द्वयोर्द्वयोः' 'यावती'रितिवाक्यद्वयार्थापत्तिरेव बोध्येत्याशयेनाहुः **नानुपपन्नं किञ्चिदिति** । नन्वौत्सुक्यस्य भगवद्दर्शने प्रयोजकत्वात्तेन कथमात्मापहार इत्यत आहुः **स्वेत्यादि** ।

जगुरित्यत्र । **नटानामिति** । नर्तकीशिक्षकाणामित्यर्थः । **अन्यथाबुद्धि-रिति** । मर्यादामार्गादिरीतिमनुसृत्येत्यर्थः । **सस्त्रीका** इति विशेषणेन
१०-३०-५. स्वस्त्रीणामपि दर्शनं भवतु, एताश्चोपयुज्यन्तामिति भावस्तेषां स्फुटतीति भक्तिमार्गीयत्वान्न तथेतिभावः ।

१ हनुमान् । २ हनुमान् । ३ ऋगर्थत्वम् ।

काचित्सममित्यस्याभासे । उत्पन्नस्य नादस्य अमृतत्वायेति । अत्रेदं प्रतिभाति । आहतानाहतभेदेन नादो द्विविधः । तत्रानाहतः प्राणघोषात्मा,
१०-३०-१०. स न रञ्जकः । आहतस्तु 'आत्मा विवक्षमाणोयं मनः प्रेरयते मनः । देहस्थं वह्निमाहन्ति स प्रेरयति मारुतम् । ब्रह्मग्रन्थिस्थितः सोथ क्रमादूर्ध्वपथे चरन् । नाभिहृत्कण्ठमूर्धास्येष्वाविर्भावयति ध्वनिम् । नादोतिसूक्ष्मः सूक्ष्मश्च पुष्टोऽपुष्टश्च कृत्रिमः । इति पञ्चाभिधा धत्ते पञ्चस्थानस्थितः क्रमात् । व्यवहारे त्वसौ त्रेधा हृदि मन्द्रोभिधीयते । कण्ठे मध्यो मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तरः । तस्य द्वाविंशतिर्भेदाः श्रवणाच्छ्रुतयो मताः' इत्यादिरूपेणोत्पन्नो रञ्जकः । स आसन्यांशो लोकेपि तुल्य इति तस्य नामृतप्राचुर्यम्, स यदा आसन्यात्मा मूलरूपोऽपहतपाप्मा पूर्णो भवति, तदा तथेति । तत्प्रचुरत्वायेत्यर्थः । ननु स्वामिनीगानस्य भगवन्नादेनामृतमयत्वं किमित्याकाङ्क्षायां टिप्पण्यां प्रभवस्तदाशयं स्फुटीकुर्वन्ति **अत्रायं भाव** इत्यादि । कथमेतदवगम्यत इत्याकांक्षायामलौकिकत्वमपूर्वत्वं च कार्यद्वारा परिचाययन्ति **स चे**त्यादि, **तथात्व**मित्यन्तम् । **मूलकारणत्वा**दिति । मूले भगवद्गाने प्रयोजकत्वादित्यर्थः । **इदमिति** । कार्यद्वयजनकत्वम् । **सा चेति** । भगवद्विषयकभावविशेषोत्पत्तिश्चेत्यर्थः । **तथा कृत** इति । मूलासन्यरूपः प्रकटीकृत इत्यर्थः । तथा च कार्यात्तस्य तथात्वमवगन्तव्यम् । यदि सामान्यः स्यात्, भगवता न पोष्येतेति तर्काच्च । नन्वेवं भगवन्नादस्यैवैतत्कार्ये प्राधान्यमायातीति नैवं स्वामिनीगानस्य तथात्वसिद्धिरित्याकांक्षायां तस्य तथात्वं विशदीकर्तुमाहुः **अपरश्चे**त्यादि, **रूपत्वा**दित्यन्तम् । तथा चैवं स्वामिनीनादप्राधान्यात्तस्यैव तत्कार्यमित्यर्थः । तर्हि प्रभुगानस्य किं मुख्यं कार्यमित्याकांक्षायां तदाहुः **एवं सती**त्यादि । **तदर्थ**मिति । सुबोधिनीप्रतीकम् । जगत्पूरणार्थमित्यर्थः । **षड्जादय** इत्यादि । 'स्यातां निषादगान्धारौ द्विश्रुती धैवतर्षभौ । त्रिश्रुती चेदश्रुतयः षड्जमध्यमपञ्चमाः । मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः । गजश्च सप्त षड्जादीन् क्रमादुच्चारयन्त्यमी'त्यादिषु बोधिता इत्यर्थः ।

तदेवेत्यत्र । 'गानक्रिया वर्णसंज्ञया सङ्गीते व्यवह्रियते । गानक्रियोच्यते वर्णः स चतुर्धा निरूपितः । स्थाय्यारोह्यवरोही च संचारीत्यथ लक्षणम् । स्थित्वा
१०-३०-१०. स्थित्वा प्रयोगः स्यादेकैकस्य स्वरस्य यः । स्थायी वर्णः स विज्ञेय' इति तस्य लक्षणान्तरात्प्रकृते को वा स्थायी विवक्षित इति सन्देहानपायात्पक्षान्तरमाहुः **भगवन्नाद एव चे**त्यादि । 'चतुर्विधाः स्वरा वादी संवादथ विवाद्यपि । अनुवादीति वादी तु प्रयोगे बहुलः स्वरः । श्रुतयो द्वादशाष्टौ च ययोरन्तरगोचराः । मिथः संवादिनौ तौ स्तो निगावन्यविवादिनौ । रिधयोरेव वा स्यातां तौ तयोर्वा रिधावपि । शेषाणामनुवादित्वं वादी राजात्र गीयते । संवादी त्वनुसारित्वादस्यामात्योभिधीयत' इति सङ्गीते निरूपणाद्भगवन्नादो वादी । स एव राजत्वात् ध्रुव इति तस्मिन्नेव संवादिनादं स्वामिनी

योजितवतीत्यर्थः । तत्र हेतुमाहुः **भगवता तथैव गीतमिति** । यादृशे नादे स्वामिनीनादयोजनं भवति, तथा गीतमित्यर्थः । **न विचारक्षममिति** । तावतः कार्यस्य सुकरतया तादृक्संमाननप्रयोजकत्वासंभवेन 'तस्यै मानं च बह्वदा'दिति ग्रन्थासङ्गतेस्तथेत्यर्थः ।

काचिद्रासपरिश्रान्तेत्यत्र । ननु श्रान्तत्वे स्थिरे भगवति स्वभारनिक्षेपादि-
कमेव श्रमाभावाय वक्तव्यम्, न तु स्कन्धग्रहणमात्रमित्यत आहुः
१० ३०-११. **अधिकेत्यादि** । नन्वयं रसाधिक्यजन्य एव श्रम इत्यत्र किं गमकमत
आहुः **अन्यथा रसार्थमित्यादि** । परिश्रमस्य देहक्लेशजनितत्वे उपवेशनादिरेव स्यात्, न तु स्कन्धग्रहणमित्यर्थः । ननु स्कन्धग्रहणे हस्तपरित्यागेन मण्डलभङ्गे रासभङ्ग इत्यत आहुः **मण्डलेत्यादि** । **हस्तग्रहणमिति** । स्वामिन्यन्तरस्येत्यर्थः । रसार्थप्रवृत्तौ गमकमाहुः **पार्श्वभागेत्यादि** । एतस्यार्थस्य मूलाभिप्रेतत्वं प्रकटयितुं तुरीयपादं व्याकुर्वन्त आहुः **भगवतेत्यादि** । **आसता च प्रदर्शितेति** । शुकेन स्वस्य यथा दृष्टार्थवादित्वं चैतेन दर्शितमित्यर्थः ।

कस्याश्चिदित्यत्र । **आभासे** । इयं स्वामिनी पूर्वाध्याये 'काचिदञ्जलिने'ति
श्लोकोक्तेति ज्ञापयितुमाहुः **गृहीतमिति** । अन्यथा मूले 'प्रादा'दिति
१०-३०-१२. पदेन विरोधापत्तेः । **इत्याहेति** । इतीदं दानकथनमुखेनाहेत्यर्थः । अत्रैत-
द्बोध्यम् । द्वितीयस्कन्धे निरोधलक्षणे[1] द्वासप्ततिर्नाडीरूपा देहशक्तयः स्वस्य द्वादशश्रियादयः शयनं जाग्रत्स्वप्नसुषुप्तभेदेन त्रिविधमिति स्कन्धस्या[2]ध्यायसंख्याबीजमुक्तम् । तच्च स्थूलतया । 'अत्रैतदेकशतं नाडीनां तासां शतं[3] शतं एकैकस्यां द्वासप्तति प्रतिशाखानाडीसहस्राणी'[4]ति प्रश्नश्रुतेः । अत्रापि[5] वाक्यप्रकरणादिप्रतिपाद्यविचारेणानन्त्यात् । एवं 'परास्य शक्तिर्विविधैवे'ति श्रुतौ स्वशक्तेर्विविधत्वेन श्रावणादत्रापि गुण[6]धर्मादिभेदेन नानात्वात् । सर्वास्त्वन्तरङ्गास्तु धर्मरूपा एव, भगवत्त्व[7]निर्वाहकत्वात् । तत्र प्रकृतलीलास्थास्ता एवेति संख्याबलान्निश्चीयते । तत्रैश्वर्यादिचतूरूपाणां[10] निगमनं तत्तत्कार्यै[11]रेव जायत इति तत्र विशेषो न स्पष्टीकृतः । प्रकृतस्वामिन्यास्तु ज्ञानरूपतागमेकं[12] कार्यमत्राग्रे च न स्फुटमिति योग्यतैव च स्फुटेति योग्यताबलात्तथात्वं[13] स्फुटीकर्तव्यम् । यथा 'अञ्जलिना सक्तून् प्रदाव्ये जुहुया'दित्यत्र सक्तुस्थितियोग्यताबलादञ्जलेर्व्याकोशत्वम् । तत्र भगवद्धर्मा ऐश्वर्यादयो भगवति नित्याः, इतरत्रागन्तुका इति 'युक्तं भगैः स्वैरितरत्र चाध्रुवै'रित्यत्र स्थितम् । अत एव प्रकृते रसस्वरूपान्तःपातितया धर्मरूपतया चैतासां भगवदभेदेप्यवतारेण भेदात्तत्रागन्तुकमेव तदिति कार्यद्वारापि परिचायितम् । तथा सति ज्ञानमपि तथेति[16] तद्दाने संप्रदानस्य साधनतः

१ निरोधोऽस्यानुशयनमित्यादि । २ दशमस्कन्धे । ३ 'शतं चैका च हृदयस्य नाड्य' इति श्रुतेः । ४ अनन्तानि । ५ निरोधस्कन्धेपि । ६ भक्ताना निरोधेपि । ७ भगवत. । ८ भक्तेषु । ९ भगवद्रूपत्वज्ञान । १० अत्रैव पूर्वोक्तानां । ११ काचित्सममित्यादि । १२ प्रमाणकम् । १३ ज्ञानत्वम् । १४ विशालस्वरूपत्वम् । १५ ऐश्वर्यादि । १६ आगन्तुकम् । १७ प्रादात्साम्मूलेपि ।

स्वरूपतश्च योग्यतादानकारणीभूतः प्रसादश्च मूले सूचित इति ताभ्यां देयस्वरूपं स्फुटीकरिष्यन्तो व्याख्यानमुखेन तौ प्रदर्शयन्ति **नाथे** इत्यादि । तत्र भगवत्कुण्डलयोः सांख्ययोगात्मकत्वादत्रापि तदभेदेनैतत्कुण्डलयोरपि तथात्वात्स्वामिन्याश्च वामदक्षिणपार्श्वस्थत्वयोरेकतरनिर्णायकस्यात्राभावात्पक्षद्वयेन वदिष्यन्तः प्रथमं सांख्यपक्षेणाहुः **कुण्डले ज्ञाने**त्यादि । अभ्यास आवृत्तिरिति[2] पूर्वोत्तरतंत्रयोः[3] स्थितम् । तथा च सांख्यपक्षे ज्ञानपूर्वकभगवद्विचारितरीतिककर्मात्मावृत्त्या योग्यतेत्यर्थः । योगपक्षे आहुः **योगे**त्यादि । 'योगः कर्मसु कौशल'मितिवाक्यात् कौशलेन कृतानि शमादीनि विक्षेप इत्यर्थः । तथा च योगपक्षे तादृशसाधनसमुदायेन योग्यतेत्यर्थः । तादृशं च कर्म ज्ञानपर्यवसायि ज्ञानं च प्रकाशकं तदत्राहुः **तस्ये**त्यादि । रूक्षं तु तदक्षरपर्यवसायि । प्रकृते तु भक्त्यङ्गं विवक्षितं सन्धानकथनादिति तदाहुः **तेने**त्यादि । एवमत्र योग्यतायाः काष्ठा निरूपिता । एतादृशी योग्यता प्रसादे कारणमिति तत्फलभूतप्रसादकाष्ठामाहुः **यथे**त्यादि । ईदृश्यपीयं भक्तिर्न फलरूपा, किन्तु 'चेतस्तत्प्रवणं सेवे'त्युक्तसाध्यरूपैवेति वदनैकदेशबोधकगण्डपदेनोभयनिष्ठोच्यत[4] इत्याशयेनाहुः **तत्रापी**त्यादि । **तत्रापी**ति । सम्बन्धेपि । तथा चेदृशत्वेपि ज्ञानोपक्षीणत्वात्साध्यरूपैव, न तु फलकाष्ठारूपेत्यर्थः । एवं मूलव्याख्यानेन योग्यताप्रसादौ स्फुटीकृत्य ताभ्यां देयस्वरूपनिश्चायनप्रकारमाहुः **तामि**त्यादि । भगवत्स्वरूपज्ञत्वं तदुपदेष्टृत्वं कूर्मपुराणादौ लक्ष्म्याः सिद्धम् । अत्र च साधनप्रकरणीयब्रह्मानन्दमज्जनोद्धरणकथयैतासु योग्यताबोधनेन लक्ष्मीत्वं सिद्धम् । 'वृत्तिरूपं ज्ञानं मनोधर्म' इति 'हीर्धीर्भी'रित्यत्र[5] श्रावितं विद्यात्मकं ज्ञानं च तथेति प्रकृते तदभिप्रेतम् । प्रतिर्लक्षणे कर्मप्रवचनीय इति तद्योगे द्वितीया। तथा च तां पूर्वोक्तरीत्या लक्ष्मीं प्रति लक्षीकृत्य मूलपर्यटनं निद्यामूलस्य भगवन्मनसः परित आवृत्तिरिति, मूले धातूपोपणर्थ इत्याभीक्ष्ण्यसिद्ध्या लक्ष्मीवन्तं धर्मिणं लक्षीकृत्य पुनः पुनरावर्तते, सन्धानायोद्युज्यत इति ज्ञानताम्बूलयोः उक्तरीतिकयोग्यतायां देययोस्तुल्यता । तथा च यथा सादृश्येन व्रीहिस्थले नीवारग्रहणं तद्द्रव्यैकदेशभाक्तया, तथात्रापि तयोः सिद्धायां तुल्यतायां तादृशज्ञानांशभाक्तया तद्दानमिति भावः । एतदेवाभिप्रेत्य टिप्पण्यामुक्तं **तथा सर्ववेदान्ते**त्यादि । तथा सरस्वतीताम्बूलचर्वितग्रहणेन ग्रहीतुः कवित्वशक्त्यादिकं[6] लोकेपि प्रसिद्धमित्युपदेष्टृत्वेपि न संदेह इति सर्वमसन्दिग्धमिति दिक् ।

नृत्यतीत्यत्र । टिप्पण्यां वैराग्यात्मकत्व उपपत्तिं स्फुटीकुर्वन्ति **तापनिवर्तकत्वमि**त्यादिना । तथा च तत्सम्बन्धेनोपदेशसाहाय्यरूपभक्तकार्यद्वारा
१०-३०-१४. वैराग्यरूपत्वं श्रीहस्ते निश्चेयमित्यर्थः । किञ्च, शक्तिबाणाद्यग्रभागे फल-

१ क्रियाज्ञानरूपौ । २ एतस्यैव पर्यायः आवृत्तिः । ३ पूर्वमीमांसायां उत्तरमीमांसायां चेत्यर्थः । ४ पुरुषोत्तमगोपीनिष्ठोच्यते । ५ हीर्धीरिति श्रुतिव्याख्याने वृत्तिरूपं ज्ञानं मनोधर्म इति श्रावितम् । ६ श्रीमद्विट्ठलनाथैस्ताम्बूलचर्वितदानेन गोपालदासेषु कवित्वं प्रदर्शितम् ।

व्यवहारो लोके दृश्यते । हस्तश्च क्रियाशक्त्यात्मकस्य बाह्वोरग्रभागः, वैराग्यं च कर्मणां फलम्, अतोपि तथा । अच्छिद्रत्वमप्यग्रभागत्वादेव । प्रान्त एवाच्छिद्रकरणादिति बोध्यम् । ननु वैराग्यलक्षणं तत्काष्ठा च पतञ्जलिना 'दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्, तत्परं पुरुषख्यातेर्गुणवैतृष्ण्य'मिति सूत्राभ्यां दर्शिता। तदर्थश्च भाष्ये व्यासपादैरेवं प्रदर्शितः। 'स्त्र्यन्नपानैश्वर्यादिरूपे दृष्टविषये स्वर्गवैदेह्यप्रकृतिलयत्वप्राप्तिरूप आनुश्रविकविषये वितृष्णस्य तद्दोषदर्शिनः पुरुषस्य दिव्यादिव्यविषयसंप्रयोगेपि चित्तस्य वशीकारसंज्ञा उपेक्षाबुद्धिः कषायेषु रागादिरूपेषु पक्वेषु इन्द्रियाणां विषयेष्वप्रवृत्त्या चित्ते औत्सुक्यरूपेणापि रागावस्थित्या या एकाग्रता सा वैराग्यम् । इतोप्युत्कृष्टं तु गुणवैतृष्ण्यम्, तच्च विविक्तात्मज्ञानवतो भवतीति ज्ञानपरमकाष्ठारूपं कैवल्यमेतदविनाभूत'मिति । एवं सति गुणपर्यन्तेषु यावद्विषयेषूपेक्षापूर्विका चित्तस्यात्मैकतानता वैराग्यमिति फलति । अत्र च भगवति परस्परं च रागस्य मात्सर्यस्य चोक्तत्वेनात्मैकतानत्वाभावान्न मुमुक्षुसाधारणं वैराग्यम् । न च यतमानसंज्ञादिरेवात्रेति शङ्क्यम् । तल्लक्षणस्याप्यत्राभावात् । किन्तु 'सन्त्यज्य सर्वविषयान्' 'यत्पत्यपत्य' 'कुर्वन्ति ही'त्येतेषु यावद्विषयवैतृष्ण्यस्य सिद्धत्वात्तदेव वैराग्यत्वेन वक्तव्यम्। किञ्च, विप्रयोगे आत्मानमप्यनिच्छतीनां भगवदेकतानतेत्येवमात्मैकतानत्वेपि पूर्वोक्तवैराग्याद्विशेषः । तदुभयमत्र सर्वसाधारणमिति किमत्र वैराग्यं विवक्षितमिति चेत् । अत्रैवं प्रतिभाति। नवमस्कन्धे 'नाहमात्मानमाशास' इत्यादिवाक्येषु भगवतो भक्तेषु कृपा, तदतिरिक्ते रागाभाव इत्याकारकं तत्सिद्धम् । तथा वेणुगीते 'उत्कर्षश्चापि वैराग्य' इति कारिकया भक्त्या भगवत्क्लेशहारकसेवारूपो वैराग्योत्कर्ष उक्तः । एवं सति स्वसमानानां भगवद्विप्रयोगसामयिकनवमाद्यवस्थानिवृत्त्यभावे भगवतः क्लेशसंभवात्तादृशक्लेशं स्वयं सोढ्वापि सखीनां तन्निवारणरूपा या सेवा तदात्मको यो वैराग्योत्कर्षः स उक्तरूपभगवद्वैराग्यं विना न सम्भवतीति तदेवात्र विवक्षितम् । भक्तेषु कृपायास्तदितरेषु रागाभावस्य चात्र स्फुटत्वादिति । तदेतत्सर्वं हृदि कृत्वा प्रभुचरणैरुक्तं अत्रायं भाव इत्यारभ्य, सूच्यते इत्यन्तमिति न किञ्चिदनुपपन्नम् । सुबोधिन्याम् । वैराग्याधिकारबोधनाय स्वामिनीविशेषणानां तात्पर्यमाहुः शाब्दमित्यादि । अन्यथा न वदेत्, नृत्यादेः सर्वसाधारणत्वादिति भावः । ननु पूर्वक्रियापरित्यागो वैराग्यबोधकः, स चात्रोक्त एवेति किमवशिष्टं वैराग्य इत्यत आहुः स्वस्या इत्यादि । तथा चान्ततः स्वक्रियात्यागो भगवत्क्रियाशक्त्यैवाग्रे भाव्य इतीदानीमन्तस्तात्सत्त्वैवावशिष्टेत्यर्थः ।

कर्णोत्पललेत्यत्र । टिप्पण्यां अतःपरमित्यादिप्रतीकेन प्रकृतनृत्ये उभयोस्तौल्यमेव विशेष इति बोधितम्। तेन उभयतौल्यविशिष्टं पूर्वनृत्यमेवेदमित्यर्थः ।
१०-३०-१६. ननु फले विशेषाभावे साधननिष्ठविशेषाङ्गीकारो न युक्त इति पुनर्नृत्योक्तिरनुपपन्नेत्यरुच्या पक्षान्तरमाहुः अथवेत्यादि । तथा चोक्तविहारजनकरसाविर्भावः

पूर्वनृत्यफलं, प्रकृतस्य त्वपूर्वरसाविर्भाव इति फलभेदात्प्रकारभेदाच्च नृत्यान्तरत्वबोधनाय पुनस्तदुक्तिरिति नानुपपत्तिरित्यर्थः । सुबोधिन्याम् । ननु यदीदमुभयनिरूपितं, तदा 'गोप्य' इति बहुवचनस्य कथं सङ्गतिरित्यत आहुः **गोष्ठीमात्र**मिति । तथा च टिप्पण्युक्तरीत्या सिद्धे नृत्यान्तरत्वे अत्र प्रत्येकं पर्यायेण नृत्यमित्यन्यासां द्रष्टृतया सभ्यत्वबोधनाय बहुवचनमिति भावः । ननु पूर्वं सामान्यनृत्ये 'किंकिणीनां च योषिता'मित्यनेनोक्तत्वाद्गाढनृत्ये तस्य कथनावश्यकत्वमिति कुतस्तदुक्तिरित्यत आहुः **घोषेत्यादि** । तथा च 'उच्चैर्घुष्टं तु घोषणे'ति कोशाद्घोषशब्दस्योच्चैःशब्दवाचकतया तेनैव तस्यापि संग्रहान्न पृथक्तदुक्तिरित्यर्थः । वाद्यपदमजहत्स्वार्थया वाद्यशब्दबोधकमित्याशयेनाहुः **वाद्यशब्दा** इति । उद्बुद्धरसात्मकस्य नानुभावकापेक्षेत्यरुच्या पक्षान्तरमाहुः **स्वतो** वेत्यादि । टिप्पण्यां **श्रमाभावेत्यादि** । तथा 'चोत्तरस्यादिना पूर्वस्यावसान'मिति न्यायोत्रापि बोध्यते, तेन स्वत इत्यस्यार्थादेवेत्यर्थो बोध्य इत्यर्थः । न्यायस्य पूर्वं सूचितत्वेनापुष्टार्थमिदमित्यरुच्या पक्षान्तरमाहुः **अथवेति** । अस्मिन्पक्षे स्वत इत्यस्य स्वामिनीशक्त्येत्यर्थो बोध्यः ।

एवं परीत्यत्र । मूलस्यातिदेशः प्रयोजनांशे एव, न तु प्रकारांशे इत्याशयेनाहुः **एवमेव रसोद्गमार्थ**मिति । नन्वेवं सर्वभावेन रमणे रसोद्गम उभयोस्तुल्यतायामेव भवति, न तु न्यूनाधिकभावे, प्रकृते च 'न तत्सम' इत्यादिश्रुत्या भगवत्तुल्यस्याभावात्कथं रसोद्गम इत्याशङ्कां हृदिकृत्वाहुः **ननु प्राकृतीभि**रित्यादि । प्राकृतशरीरत्वमन्तर्गृहस्थितास्वेव, न तु रासमण्डलमण्डलायमानास्वपीति 'उक्तं पुरस्ता'दित्यस्य स्वतन्त्रे एतत्कथोपक्षेपार्थापत्त्या प्रभुचरणैः स्थापितम्, न तु मूले पांक्तम्, न वा श्रीमदाचार्यैरुक्तम्, अतो न तथा तत्राशयः । अत्र सिद्धवत्प्राकृतीत्वकथनाच्चेत्याशङ्कायां तदुभयगोचरत्वं बोधयितुं प्राकृतीत्वोक्तितात्पर्यं प्रभवष्टिप्पण्यामाहुः **अत्राप्राकृतीत्यादि** । अप्राकृतीत्वं मूले कुतः सिद्धमित्याकांक्षायां तत्सिद्धिप्रकारं वदन्त आहुः **सिद्धान्त** इत्यादि । तथा चासाधारणस्वभावपरिचायका'द्रेमे रमेश' इति समभिव्याहारादेव सिद्धमित्यर्थः । नन्वयमेव श्रीमदाचार्याशय इति कथं विनिगन्तव्यमित्याकांक्षायामाहुः **किञ्चे**त्यादि, **आज्ञयेतीत्यन्तम्** । तथा चोक्तवाक्येन बोधिते रमानिवेशे भगवदाज्ञाया हेतुत्वकथनाद्विनिगन्तव्यमित्यर्थः । ननु यद्येवं तदा 'अधिष्ठानयोग्या' इत्यनेन रमापेक्षया निकर्ष इव किमिति बोध्यते इति शङ्कायां नात्र निकर्षबोधनमपि तूत्कर्षार्थमेवैतदित्याहुः **अपर**स्येत्यादि । तथा च यदि निकर्षाभिप्रायेणात्र योग्यता बोध्या स्यात्, तदा मूले व्रजपदं न वदेत्, किन्तु किल सुन्दरीभिरित्येव वदेत् । अतो मूले व्रजपदात् श्रीमदाचार्याणामपि तथैवाशय इत्यर्थः । एवं च 'न तत्सम' इत्यादिभिर्यद्यपि साम्यं निषिद्धम्, तथापि 'निरञ्जनः परमं साम्यमुपैती'ति भगवद्वरणेनानञ्जनत्वे तस्यापि श्रावणादत्र तथात्वस्य सिद्धत्वान्न रसोद्गमानुपपत्तिरिति भावः । नन्वेवं रसोद्गमविचारे रमणस्य पारार्थ्यमायाति, तादृशं तु पाङ्क्ति एव, अरीरम'दिति णिजन्तेन बोधितम्, प्रकृते तु 'रेमे' इति कर्तृसमवेतक्रियाफलबोधकात्मने-

पदेन रमणस्य स्वार्थता लभ्यते इत्यात्मारामत्वभङ्गमाशङ्क्य मूले दृष्टान्तेन तन्निरस्यत इत्याशयेन 'नन्वि'त्यादिना दृष्टान्तमवतार्य 'एताभि'रिति पदेन साम्येपि भिन्नाभी रमणमात्मारामत्वभञ्जकमिति 'कथं रेमे' इत्यनेनाशङ्क्य लक्ष्मीवद्धर्मरूपत्वेन तादात्म्याददोष इति समाधाने ब्रह्मानन्दरूपत्वाभावेन तदभावं लक्ष्म्यावेशेन समाधाने ब्रह्मभावाभावेनावेशदौर्घट्यं च दोष बोधयित्वा तेन लक्ष्म्यामेतासु च रमणस्य भिन्नविधत्वसूचनेन पूर्वपक्षं दृढीकृत्य 'ततो बालको ही'त्यादिना व्याख्यानेन सामर्थ्यादिभिरेव रमणान्नात्मारामत्वभङ्ग इति समाहितम् । तथा सति धर्मात्मकव्यतिरिक्तासु न रमणमित्यायातीति श्रीमदाचार्याणां कथं तथाशयोवगन्तुं शक्य इत्याकांक्षायां 'रेमे तया चात्मरत' इत्यत्र 'साधारत्वाय तस्यामात्मानं स्थापितवा'निति यदुक्तं तदनुसन्धाय मूलस्य दृष्टान्तद्वयगर्भत्वस्फुटीकरणाद्द्वितीयदृष्टान्तावतारिकायामात्मारामत्वनिर्वाहकरमणसाधकसिद्धान्ताक्षेपात्तत्र तादृशसिद्धान्तावतारिकाक्षेपस्यार्थतो लाभाच्चावगन्तव्य इत्याशयेन पूर्वदृष्टान्तं द्वितीयावतारिकां च विवरीतुं पूर्वदृष्टान्ताक्षेपं पूर्वं तत्र स्फुटीकुर्वन्ति **नन्वेतद्रसेत्यादि**। **सेति। आज्ञा। तत्सम्पादनमनुचितमिति**। आज्ञया तासु रमानिवेशसम्पादनमनुचितम् । रमणस्य स्वार्थताबोधनात्तादृशरमणविघटकत्वेनानुचितम् । ननु मूलवाक्यात्तदावेशे सिद्धे आज्ञायां को दोष इत्याकांक्षायां तमप्याक्षिपन्ति **किञ्चेत्यादि**। तथा च रसात्मत्वेनैतासु रमणौचित्येपि भगवत आत्मारामत्वेनाप्येवं रमणस्य सर्वविशे उक्तत्वात्तदभङ्गेन कथं रेमे । न च लक्ष्मीवत् । तस्याः ब्रह्मानन्दरूपतया ब्रह्माभिन्नत्वेन तथा रमणौचित्येप्येतासु ब्रह्मानन्दरूपत्वाभावेनाभेदस्य दुर्वचत्वात् । एतल्लक्ष्मीवद्रमणम् । अपिशब्देन रमावेशकृतभेदाभेदात्पूर्वदृष्टान्तप्रतिपादितं रमणं च ब्रह्मभावाभावेनावेशस्याशक्यवचनत्वादनुचितमित्येव पूर्वोक्तावतिरिक्तायास्तत्सिद्धान्तस्य चार्थोऽत्राक्षिप्तो बोध्योऽतोऽत्र न त्वदभिमतोर्थ इत्यर्थः । नन्वेवं पूर्वावतारिकार्थस्तदा स्याद्यदि पूर्वदृष्टान्तव्याख्याने तदनुसारी समाधिर्दृश्येत, तत्र त्वर्भकदृष्टान्तेन समाधानान्न तथार्थ इत्याशङ्कायां तदाशयमाहुः **अत्रे-त्यादि**। **अत्रेति**। उक्ताशङ्कायाम् । **अयमिति**। वक्ष्यमाणः । कथमित्याकांक्षायां तथात्वमुपपादयन्ति **यथेत्यादि**। नन्वेवं सति रमेशपदबोधितरमावेशो व्यर्थः स्यादित्याशङ्कायां तन्निरासायाहुः **रमाया** इत्यादि । तथा च रमार्थं रमावेशोऽतो न व्यर्थ इत्यर्थः । नन्वस्त्वेवम्, तथाप्यावेशे स्वस्मिन् रमात्वानुसन्धानात्पूर्वरसविच्छेद इत्यत आहुः **एतेने-त्यादि**। नन्वस्त्वेतासामज्ञानम्, तथापि प्रभोः सर्वज्ञत्वेन तदनुपपन्नम्, ताम्बूलग्रहणादिना एतासामपि तथेत्याशङ्कायां द्वयोस्तदनुसन्धानेप्यक्षतिरित्याहुः **अपिचेत्यादि, उचिततरे**-त्यन्तम् । तथा चावेशस्योक्तनितयार्थत्वेऽन्यतरार्थत्वे वा क्षत्यभावान्नाज्ञायामनौचित्यग्रास इत्यर्थः । नन्वस्त्वाज्ञाया उचितत्वम्, तथापि रमायाः ब्रह्मानन्दरूपत्वस्य पूर्वं स्थापितत्वात्सर्वत्र तथा प्रसिद्धेश्च तस्याः ब्रह्मानन्दरूपत्वमनिवादम्, अत्र च धर्मात्मकव्यतिरिक्तासु तयात्मारामः स्फुट इति तमादाय या न्यूनता तामनुसन्धायैव श्रीमदाचार्यैरावेशाभावपूर्वपक्षे ब्रह्मभावाभावो हेतुत्वेनोक्त इति तद्विरोधो नापैतीति कथं तथाशय इत्या-

शङ्कायां तमनूद्य विरोधं परिहरन्ति **यच्चेत्यादि, तत्रोच्यत** इत्यादि च। अयमर्थः। एतासु न्यूनत्वमापादयता भवता रमास्वरूपं कीदृक् प्रतिपन्नम्, किं 'ब्रह्मभूतः प्रसन्नात्मे' त्यादिप्रतिपादितब्रह्मभावात्मकसाधनीयफलात्मकब्रह्मानन्दरूपम्, उत पुरुषोत्तमाभिन्नानन्दरूपम्। तत्राद्यस्तु न युक्तो, न हीत्यादिनोक्तदोषात्। अतो द्वितीय एवाङ्गीकार्यः। तथा सति पुरुषोत्तमस्वरूपं पूर्वं विचारणीयम्। तच्च रसरूपमिति पूर्वं निर्णीतम्। अतो रमायास्तदभेदेपि दाम्पत्यस्य प्रसिद्धत्वात्सिद्धे शक्तिशक्तिमद्भावे सोऽभेदस्तादात्म्ये पर्यवसन् रमायास्तदानन्दैकदेशतां व्यवस्थापयतीत्येतादृशं रमास्वरूपं शास्त्रविचारेण सिद्धम्। तथा सति न ब्रह्मानन्दभावहेतुकरमावेशाभावशङ्कायां श्रीमदाचार्याभिप्रायः, किन्तु ब्रह्मानन्दपदेनात्रान्यदुच्यत इति तदादायात्र शङ्केति न त्वदुक्तरीतिकः श्रीमदाचार्योक्तिविरोध इत्याशयेन रमास्वरूपं निर्धारयन्ति **किन्त्वित्यादि**। रमास्वरूपनिर्धारेण यत्सिद्धं तदाहुः **तथा चैतादृश्या इत्यारभ्योच्यत** इत्यन्तम्। अत्र प्रथमपक्षे तस्याः मूर्तरूपेण न स्थापनम्, किन्त्वमूर्तस्वसामर्थ्यात्मना रूपात्मना वा, तेनाननुसन्धानपक्षसंग्रहः। अनुसन्धानसंग्राहके द्वितीयपक्षे च मुख्यरसं तत्पोषकं चाविर्भावयित्वा रेम इत्यर्थो भवति। तथा सति तत्पूर्वपक्षे रमायास्तादृशरसभावाभावात्तदावेश एतास्वनुचित इत्यर्थोऽभिप्रेत इति न विरोधगन्धोपीति पूर्वोक्त एवाशयः। एवं सति 'स भगवः कस्मिन् प्रतिष्ठित' इति प्रश्ने 'स्वे महिम्नी'ति 'अन्यो ह्यन्यस्मिन्प्रतिष्ठित' इतिवच्छ्रावितस्योत्तरस्य विचारे स्वमहिमात्मकशक्तिरूपत्वमेतास्वपि निर्बाधमिति शक्तिशक्तिमद्भावस्य रमायामिवैतास्वपि तौल्यात्स एवात्रापि समाधिरिति रसरूपत्वादिकमात्मारामत्वं चैवमविरुद्धम्, न तु तथेत्यर्थः। एवं पूर्वदृष्टान्तव्याख्यानतात्पर्यं स्फुटीकृत्य द्वितीयं व्याख्यानं स्फुटीकर्तुं तदवतारिकासूचितामरुचिं स्फुटीकुर्वन्तस्तामवतारयन्ति **ननु स्वेत्यादिना**। इदमिति। पूर्वोक्तरीतिकव्याख्यानम्। नन्वावश्यकत्वे क्लिष्टकरणमप्यदुष्टम्, यथा 'महद्भयं वज्रमुद्यत'मित्यादावित्याकांक्षायां तद्वैधर्म्यं बोधयितुं वदन्तीत्याशयेनाहुः **पक्षान्तरेत्यादि**। अत्राभासार्थकथनेन तद्वैलक्षण्यं बोध्यते, तस्य नियमनायावश्यकत्वात्, अत्र तदभावादिति। **इयमिति**। अनावश्यकत्वबोधिका। यथा नियमनार्थं तदावश्यकम्, एवं रमाया अपि भक्तत्वेन तदभिलापपूर्तिरप्यावश्यकीति तथा करणम्। न च क्लेशः मुख्यरसपोषार्थत्वादित्युक्तमित्याशयेन दृष्टान्तार्थं च्युत्पादयन्ति **तथा हीत्यादि**। एवं व्याख्यानयोरनुपपत्तिं परिहृत्य मूलग्रन्थं स्फुटीकुर्वन्ति **तथाचेत्यादि**। **द्वितीये** इति। लौकिकार्भकसम्बन्धी। **एवं सतीति**। उक्तरीत्यापि रमावेशे स्वीकृते सतीत्यर्थः। (सुबोधिन्याम्)। नन्वस्मिन्पक्षे आत्मारामत्वस्य कथं समर्थनमित्याकांक्षायामाहुः **एतेनेत्यादि**। तथा च पूर्वोक्तश्रुत्या रसात्मकत्वरसवत्त्वाभ्यां न स्वरूपभेदः, एवं ताभिरपि न भेदः, तासामपि रसस्वरूपान्तःपातित्वात्, तेजःस्थले किरणप्रवेशेनैव प्रतिबिम्बात्। अतोत्रापि दृष्टान्तेनैव पूर्वोक्तरीत्या तत्समर्थनमित्यर्थः। पूर्वत्र रमास्थापनम्, अत्र तु स्वस्थापनमिति विशेषः, अतो न किञ्चिदनुपपन्नम्।

१०-३०-२१. **प्राम्टजदित्यत्र** । क्लेश एव निवर्तते इति । क्लेशो निवर्तत एवेत्येवं योजना ।

सोम्भसीत्यत्र । पूर्वं **तासामित्यादि** । अत्र श्रीहरिरायाः । अयं भावः
अध्यायचतुष्टयलीलायां यद्यपि भगवत्स्पर्शोस्ति, तथा'प्यात्मारामोप्यरी
१०-३०-२४. रमत्' 'रेमे तया चात्मरत आत्मारामोपि' 'तासामाविरभूत्' 'काचित्क
राम्बुज'मित्यादिवाक्यैस्तासामिच्छयैव भगवता रमणं कृतं, न स्वार्थं स्वयावत्सामर्थ्य
प्रकटनेन । अत एव 'त्रैलोक्यलक्ष्म्येकपद'मिति तत्र न निरूपितं, किन्त्वेतल्लिलोपक्र
एव निरूपितम् । अत एवाचार्यैरेतदध्यायारम्भे 'स्वानन्दार्थमितीर्यत' इत्युक्तम् । तथ
च पूर्वाध्यायेषु रमणसत्त्वेपि श्रमलीला नाविरभूत् । इह तु स्वेच्छया सर्वं कृतमि
लौकिकसजातीयकामभावः सुरतान्तश्च जातः । तथा च लौकिकसरूपभावे जा
यथात्मारामत्वादिमर्यादा भग्ना, तथा देशकालमर्यादापि भग्ना, देशो रसानुभवदेशः, काल
रसावष्टम्भकालः । अत एव तथाभूतः सन् जलक्रीडार्थं जले प्रविष्ट इत्यर्थ इति ।

मम तु प्रतिभाति । गजदृष्टान्तभिन्नसेतुत्वयोरितः पूर्वलीलायामनुक्तत्वात्तत्रात्मारा
त्वभक्तविक्लवयोरनुसन्धानपूर्वकमेव तत्करणम् । अव्यवहितपूर्वायां तु दृष्टान्तविशेषणाभ्
तदभावो बोध्यते । तत एव लोकतौल्यप्राप्त्या राज्ञोपि धर्मसेतुभङ्गसन्देहादत्र प्रश्नः
वस्तुतस्त्वत्र दृष्टान्तेन पूर्वं लीलयेति प्रयोगाच्च ब्रह्मधर्मादिभञ्जनेप्यायासाभावो बोध्य
अक्लिष्टकर्मत्वाय । अत एव भङ्गेप्यभङ्गश्च । ततश्च निरङ्कुशमात्मतन्त्रत्वं समर्थ्यते, अन्यः
स्वधर्माधीनस्वातन्त्र्यं भज्येत । देशकालाभ्यां रसस्यानुभवेऽवष्टम्भे च तदधीनता
ब्रह्मरूपत्वं तस्य भज्येत । अतस्तदुभयनिवृत्त्यर्थं देशकालमर्यादाभङ्गः । तेन मर्य
दान्तरङ्गमाहुः अत इत्यादि ।

एवं शशाङ्केत्यत्र । **सर्वथा रतास्वित्यादि** । अत्र प्रथमाः कुमार्यः । द्विती
नित्यलीलास्थाः श्रुतिसिद्धा अन्तर्गृहगताश्च । तृतीया द्वारकालीलास्थाः
१०-३०-२६. तुरीया गोपगृहसम्बन्धिन्यो बोध्याः । एतासूक्तविशेषणकत्वान्नात्मारामत
भङ्गप्रयोजकता । इतोऽतिरिक्ता यद्यप्यत्र स्फुटं नोक्ताः, तथापि भिन्नसेतुत्वाद्युक्तिबला
बन्धोक्तरीत्या ज्ञातव्याः । एतदेव पूर्वश्लोकेप्युक्तम् । मर्यादामार्गो लौकिकश्चान्यथा
इत्यनेनेति । तदेतदभिसन्धायाहुः **अग्र इत्यारभ्य, प्रापयिष्यत्येवेत्यन्तम्** । ते
वेति । निशादिकथान्तेष्वेव । अर्थान्तरमाहुः **शरदित्यादिना** । तथा च लौकिककाव्येष्व
सरस्वती भगवदीयमेव वदति, लौकिका एव त्वन्यथाभिमन्यन्त इति भावः । अत
लौकिकासु गाथास्वपि जीवनाम दूरीकृत्य भगवन्नाम तत्र निक्षिप्य ताः प्राञ्चो गापयाञ्चक्रु

संस्थापनायेत्यत्र । ननु दैत्यनाशभूभारहरणयोरप्यवतार(कार्य)त्वात्तद्वदिदमप्य
कार्यमित्यत आहुः दैत्यादीति । तथा चास्य तदनुपयोगित्वान्न ताद
०-३०-२७. मिति नावतारगौणकार्यत्वमपीत्यर्थः । तस्य **साधनमिति** । धर्मो

भगशब्दवाच्यान्तर्गत इति तद्रक्षणावश्यकतया रक्षणसाधनं भगवत्त्वमित्यर्थः । **एता-भ्यामिति** । धर्मस्थापनाधर्मनिवृत्तिभ्याम् ।

आप्तकाम इत्यत्र । **उभयोरिति** । धर्माधर्मयोः । ननु 'द्रव्यं तथा ब्रह्मणि कर्म नर्च्छती'ति न्यायादुभयग्रहणे को दोष इत्याकांक्षायामाहुः **प्रयोजनं**
१०-३०-२९. **वक्तव्यमिति** । ननु गोपिकाकामपूर्तिरेव प्रयोजनमिति चेत्तत्राहुः **अन्तर्यामिण ईश्वरस्येति** । तथा च तास्तथैव प्रेरयेत्, उद्वहेद्वेत्यर्थः ।

धर्मव्यतिक्रम इत्यत्र । द्वितीयपक्षं दूषयन्ति **नहीत्यादि** । तत्र हेतुः । **न ह्यन्यार्थमित्यादि** । यथा मृगयार्थं निःसृतो राजा उपवने विहरति,
१०-३०-३०. विहरन्नपि सेवकादीन् शास्ति तथेत्यर्थः । न च तासां बन्धसम्भव त्याहुः **प्रकाशनार्थमित्यादि** । तथा च 'नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृपे'त्यव-तारकार्यं प्रागुक्तम् । तच्चैवमप्युपपन्नमेव । धर्मस्थापनाऽधर्मप्रशमावप्येतदर्थाविति प्रका-रान्तरेण तत्सिद्धौ न तयोरावश्यकत्वम् । अतो नावतारविरुद्धमित्यर्थः । लोकप्रमेय-गोर्विरोधं परिहरन्ति **अत इति** । साधनविरुद्धफलदानादित्यर्थः । इदमेव 'न मय्यावे-शितधिया'मित्यत्र सिद्धम् । तथा च वेदस्यापि नियामकोयम्, न तु तन्नियम्य इति बोधयतीत्याहुः **ईश्वरधर्मोऽयमिति** । **न भवेदिति** । स्वस्य न भवेत् । वेदविरोधं परिहरन्ति **विधीत्यादि** । तथा च नियोज्यत्वाभावान्न वेदविरोधीत्यर्थः ।

ईश्वराणामित्यत्र । **न त्वाचरितमिति** । उक्तं चरित्रं न लोकसंग्रहार्थम्, किन्तु निरङ्कुशैश्वर्यबोधनार्थम्, तेन तत्प्रतीयमानरूपेण न तथ्यमित्यर्थः ।
१०-३०-३२. वचस्तथ्यमित्यत्रोपपत्तिं वदन्ति **ते हीत्यादि** ।

यत्पादेत्यत्र । **मार्गत्रयमिति** । हेतुरिति शेषः । **विस्मारितदृष्टेत्यादि** । एतेनाताद्दशा इदानीं ये मार्गप्रवेशमात्रेण स्वैरमाचरन्ति, ते दुष्टा बोध्याः ।
१०-३०-३५ नापि कर्ममार्गविचारेण कर्मप्राधान्यपक्षे दोषः शङ्कनीय इति यदाभासे उक्तं तदुपपादयन्ति **कर्म हीत्यादिना** । **प्रतिनियतमिति** । नियतं नियतं प्रति लक्षी-कृत्येत्यर्थः । **तत्रेति** । वपुषि । **तेनेति** । वपुषा बन्धो वेति वाशब्दः कर्मणान्वेति । **यथान्नेत्यादि** । अन्नं पृथिवी, 'यत्कृष्ण तदन्नस्ये'त्यादिश्रुत्या तथा सिद्धत्वात् । तथा च लौकिके देहे वृद्धिविपरिणामादिदर्शनेन पार्थिवांशानां समवायव्यवायसन्देहभेदेनापि यथा सन्तत्यैक्यादवच्छेदैक्याद्वैकदेहव्यवहारः, तथान्न पृथिव्यात्मकसहादेशैक्यादवच्छेदैक्याद्वा एकदेहव्यवहार इत्यर्थः । तदेव व्युत्पादयन्ति **भगवत इत्यादि** । ननु भगवतः सर्वतः-पाणिपादान्तत्वेनैतत्समाधानमात्तवपुःपदाद्विरुध्यत इत्यस्वरसात्प्रकारान्तरेण समादधते **स्वामिनीनामित्यादि** । तथा च व्यवस्थापकाभावान्न कर्मणान्न बन्ध इति प्रमाणविचा-

रेण समाधिरुक्तः । **तत्राहेति** । तादृशाशङ्कायां तेषां भ्रान्तत्वमाहेत्यर्थः । **क्रीडनेनेत्या**दिना भ्रान्तौ हेतुर्विशदीकृतः ।

नासूयन्नित्यत्र । अज्ञानादनारोपे तेषामनङ्गीकृतत्वमायातीत्यरुच्या पक्षान्तर
माहुः **सर्वथाङ्गीकृता इति वेति** । अस्मिन्पक्षे मायापदं बुद्धिवा
१०-३०-३८. चकम्, 'स्यात् माया शाम्बरी क्रिया दम्भो बुद्धिश्चे'त्यनेकार्थकोशात्
तथा च तस्य मायया भगवत्सम्बन्धिन्योत्कृष्टत्वबुद्ध्या मोहिताः अतिस्नेहकलायुता सन्तो नासूयन्, खलु प्रसिद्धौ, स्वपार्श्वस्थास्तान्मन्यमानाः संमानितवन्त इत्यर्थो बोध्यः । एतदेव विशदीकुर्वन्ति **बुद्धिरेवेत्यादि** । अत्र पक्षद्वयनिरूपणाद्वे गोपाला रात्रिगानपरा स्तेषां द्वितीयपक्षे निवेशः, अन्येषां च पूर्वस्मिन्निति ज्ञेयम् ।

ब्रह्मरात्र इत्यत्र । पूर्वश्लोके दारपदादत्रान्यपूर्वाणामेव गृहगमनम्, न कुमारिका
१०-३०-३९. णामिति शङ्कानिरासोपि टिप्पण्यां 'दिवा विप्रयोगे'त्यादिनैव कृतो बोध्यः ।

इति श्रीपीताम्बरकृतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः
तामसफलप्रकरणीयः ।

मुद्रितपुस्तकानि ।

१ सेवाफलम् । द्वादशविवरणसमेतम् । रु.

२ निरोधलक्षणम् । षड्विवरणसमेतम् । गुर्जरानुवादसमेतं च । रु.

३ संन्यासनिर्णय. । अष्टविवरणसमेतः । गुर्जरानुवादसमेतश्च । रु.

४ { जलभेदः । चतुर्विवरणसमेतः ।
पञ्चपद्यानि । विवरणद्वयसमेतानि ।
सेवाफलम् । विवरणत्रयम् । } रु.

५ भक्तिवर्धिनी । चतुर्दशटीकासमेता । रु.

६ सिद्धान्तमुक्तावली । अष्टविवृतिसमेता । गुर्जरानुवादसमेता च । रु. १

७ सिद्धान्तरहस्यम् । एकादशविवरणसमेतम् । गुर्जरानुवादसमेतं च । रु. १

८ पुष्टिप्रवाहमर्यादा चतुर्विवरणसमेता । रु. १

९ नवरत्नम्-पञ्चविवृतिसमेतम् । गुर्जरभाषानुवादसमेतं च । रु. १

१० श्रीसुबोधिनी । दशम-पूर्वार्ध-तामस-फलप्रकरणम् । रु.

११ श्रीसुबोधिनी । दशम-उत्तरार्ध-राजस-साधनप्रकरणम् । रु. २

१२ श्रीसुबोधिनी दशमोत्तरार्धराजसफलप्रकरणम् । रु.

१३ श्रीसुबोधिनी-दशमोत्तरार्धसात्त्विकप्रमेयप्रकरणम् रु.

१४ श्रीमती टिप्पणी । श्रीमद्विट्ठलेश्वरप्रणीता । रु.

१५ रासपञ्चाध्यायीप्रकाशः । श्रीपीताम्बरप्रणीतः । रु.

१६ दशमतामसफलयोजना । श्रीलालूभट्टकृता । रु.

१७ वेदान्ताधिकरणमाला । श्रीमत्पुरुषोत्तमप्रणीता । रु. १-०-०

१८ भावप्रकाशिका । ब्रह्मसूत्रवृत्तिः प्रथमाध्यायः । श्रीकृष्णचन्द्रकृता । रु. १-०-०

१९ भावप्रकाशिका । द्वितीयाध्याय । रु. ०-८-०

२० तैत्तिरीयोपनिषद्भाष्यम् । श्रीजयगोपालभट्टकृतम् । गुर्जरानुवादयुतम् । रु. १-०-०

२१ भागवतार्थनिबन्धः । प्रकाशावरणभङ्गसमेत. । आद्यस्कन्धद्वयम् । रु. १-०-०

२२ शृङ्गाररसमण्डनम् । श्रीविट्ठलेश्वरप्रकटितम् । गुर्जरानुवादसमेतम् । रु. २-८-०

२३ श्रीमधुराष्टकम् । षड्विवरणसमेतम् । अमूल्यम् ।

२४ { प्रेमामृतम् । श्रीविट्ठलेश्वरकृतविवृतिसमेतम् ।
पारवृढाष्टकम् । श्रीगोपेश्वरकृतटीकासमेतम् । } रु. ०-८-०

२५ रसाब्धिमहाकाव्यम् । श्रीदेवकीनन्दनकृतम् । रु. १-०-०

२६ मनोदूतम्-हृदयदूतं च । गुर्जरानुवादसमेतम् । रु. ०-८-०

२७ त्रिविधनामावली । टीकासमेता । रु. १-४-०

२८ श्रीपुरुषोत्तमनामसहस्रम् । नामचन्द्रिकायुतम् । रु. ०-१०-०

२९. पत्रावलम्बनम् रु. ०-४-०

३० श्रीमदणुभाष्य-प्रकाश-रश्मि तृतीयाध्यायप्रथमपादः । रु. १-०-०

३१ श्रुतिरहस्यम्-प्रकाशसमेतम्-गुर्जरानुवादयुतम् । रु. १-० ०

32 Discuss how far Sankaracharya truly represents the view of the author of the Brahma-Sutras Rs. 1-0-0

१. पंडित गट्टूलालजीनी पाठशाला, केपिट्रस्ट्रीट भूलेश्वर, मुंबई.

Printed by Manilal Itcharam Desai at the "Gujarati News" Printing Press Nos 20-24 Bake House Lane, Fort, Bombay

Published by Mulchandra Tulsidas Telivala B A, LL. B, Vakil, High Court, Bhakkar Buildings, C P Tank Road, Girgaon, Bombay.

श्रीकृष्णाय नमः ।

दशमतामसफलप्रकरणयोजना ।

वागरोदीश्रीभाणेजभट्टसुतदीक्षितश्रीलालूभट्टकृता ।

श्रीगिरिधारी करोतु कुशलानि ।

फलप्रकरणार्थोक्तौ ब्रह्मानन्दात्समुद्धृत्येत्यादि । ब्रह्मानन्दादित्यादिसार्धपञ्चकारिकाणामर्थष्टिप्पण्यां स्फुटः । एतावता यद्ब्रह्मानन्दानुभवरूपं मर्यादाभक्तौ फलम्, तदत्र पुष्टिभक्तानां भजनानन्दाख्यफलप्राप्तौ साधनमिति मर्यादाभक्तितः पुष्टिभक्तेः परमोत्कर्षः सिद्ध इति बोद्धव्यम् । इह पञ्चाध्यायीसुबोधिन्या अर्थः स्फुटतया विस्तारेण च टिप्पण्यां निरूपित इति मया योजनायां ताः फक्किका न विव्रियन्ते, किन्तु टिप्पण्यां या फक्किका न विवृताः, ता एव योज्यन्त इत्याकलनीयम् । आत्मना प्रथमा लीलेति । अत्र पक्षद्वयं टिप्पण्याम् । तत्र प्रथमपक्षे आत्मना प्रथमाध्याये लीला, मनसा द्वितीये, वाक्प्राणैस्तृतीये, इन्द्रियैः चतुर्थे, शरीरेण पञ्चमे । एवं पञ्चस्वध्यायेषु एकैकेन लीला एकैकस्याध्यायस्यार्थः । द्वितीयपक्षे तु आत्मादिभिः पञ्चापि लीलाः पञ्चस्वध्यायेषु सर्वत्रोच्यन्त इति । तत्र यद्यपि पुरुषोत्तमस्य 'स यथा सैन्धवघन' इतिश्रुतेः सैन्धवघनवदानन्दैकरूपत्वेनैकरसत्वात् करचरणादीनामानन्दमयत्वेन साकारस्य प्रतीयमानस्यैवात्मरूपत्वम्, नतु प्रतीयमाने पुरुषोत्तमदेहे जीववदात्मस्थितिः, तथापि 'पश्यन् चक्षुर्वदन् वाक्' इति श्रुतेस्तत्तदिन्द्रियकार्यं कुर्वन् भगवानेवेन्द्रियरूपः, तथा आत्मकार्यं कुर्वन् आत्मशब्दव्यवहार्यो भवतीति भावः । अतएव श्रीमत्प्रभुचरणैष्टिप्पण्यां 'यथेन्द्रियादिरूपत्वं शुद्धस्य ब्रह्मणस्तथा । आत्मत्वादिस्वरूपत्वं मन्तव्यं श्रुतिवाक्यत' इत्यनेनात्मरूपता ब्रह्मणो निरूपिता । आत्मकार्यं तु पुरञ्जनोपाख्याने स्पष्टम् । तत्र हि केवलस्यात्मनो लिङ्गशरीरसंबन्धकरणं स्थूलदेहवासकरणं च वर्ण्यते । अतः प्रथमतः सर्ववस्तुसम्पादनं आत्मकार्यम् । एवमत्रापि 'रन्तुं मनश्चक्र' इत्यादिषु वाक्येषु नूतनाया मनआदिसर्वसामग्र्याः करणं निरूपितम् । अत आत्मकार्यमस्मिन्नध्याये वर्णितं बोद्धव्यम् । अग्रे कारिकाणामर्थष्टिप्पण्यां स्फुटः ।

१०–२६–१ भगवानपीत्यस्याभासे । स्त्रीषु स्वानन्दः स्थापनीय इतीति । प्राकृते लोके हि भोगादिना आनन्दलेश उत्पाद्यते, सोपि न चिरस्थायी । इह तु स्वरू-

पात्मक आनन्दो रमणेन व्रजसुन्दरीषु स्थाप्यते। स तु स्वरूपात्मकत्वान्न ध्वंसप्रतियोगीत्यप्राकृतत्वमेव स्फुटीभवति। तत्र सर्वासु संकल्प इत्यादि। स्वस्मिन् वर्तमानो यो व्रजस्त्रीरमणसंकल्पः स सर्वास्वपि व्रजस्त्रीषु बोधनीय इत्यर्थः। सर्वासु व्रजस्त्रीषु कथं बोधनीय इत्याकांक्षायां वेणुना बोधनीय इत्याहुः तत्र वेणुरपि सहायतां प्राप्स्यतीति।

१०–२६–२ स चर्षणीनामुदगादित्यत्र। शक्तिसहितानामेव परमानन्दानुभवस्य वक्तव्यत्वादिति। मर्यादाभक्तिमार्गे हि मुक्तितः पूर्वमेव चर्षणीशक्तीनां निवर्तनम्, मुक्तस्य परिभ्रमणाभावेन चर्षणीनामनुपयोगात्। प्रकृते तु चर्षणीशक्तीनां परिभ्रमणहेतुभूतानां रासक्रीडायां नृत्यादौ भ्रमणे उपयोगान्न शक्तीनां निवृत्तिः, किन्तु परिभ्रमणशक्तिसहितानां व्रजवधूनां रासे परमानन्दानुभवो भावीति ज्ञानेन तासां शोकहानिः। तदेतदुक्तं शक्तिसहितानामेव परमानन्दानुभवस्य वक्तव्यत्वादिति।

१०–२६–३ दृष्ट्वा कुमुद्वन्तमित्यत्र। कुमुद्वांश्चन्द्र इति। कुमुद्वत्पदनिरुक्तिमाहुः पृथिव्यां सर्वत्रैव मुदं कृतवानिति। अर्थप्रदर्शनमेतत्। तथा च कौ पृथिव्यां मुत् कुमुत् कुमुद्विद्यते कार्यत्वेन यस्य स कुमुद्वानिति शब्दसिद्धिः। तत्फलितार्थ उक्तः 'पृथिव्यां सर्वत्रैव मुदं कृतवा'निति।

१०–२६–४ निशम्य गीतं तदनंगवर्धनमित्यस्य विवृतौ। अङ्गं तु नाशयत्येवेति। भक्तानां प्रपञ्चाभावो निरोध इति द्वितीयस्कन्धसुबोधिन्यामुक्तत्वात् दशमसुबोधिन्यां 'एवं सर्वगतो विष्णुः प्रकटश्चेन्न तद्विशेत्। तावन्न लीयते सर्वमिति कृष्णसमुद्यम' इत्यत्रापि प्रपञ्चलयस्योक्तत्वात् 'लौकिकेषु तु भावेषु यत्रैव हरिवेशनम् निवर्तते तदेवात्र वह्नेदारुमयं यथे'त्यत्रापि प्रपञ्चलयस्योक्तत्वाद्भक्तानां पूर्वदेहादिप्रपञ्चलयः फलात्मको निरोध इति मया पूर्वं निरोधपदार्थविचारे उपपादितम्। तथा देहादिलयकर्ता वेणुनाद इत्युक्तं 'अङ्गं तु नाशयती'त्यनेन। एवं सत्यलौकिकदेहादिप्रपञ्चसम्पादनं वेणुनादकार्यमिति फलितम्।

१०–२६–५ दुहन्त्योभिययुरित्यत्र। दुग्धस्योत्पत्तीरयारभ्य प्रथममुदीरिता इत्यन्तम्। राजसीत्रिके दुहन्त्यो दुग्धोत्पत्तिं कुर्वन्त्यो राजस्यो राजसराजस इत्यर्थः। पयोधिश्रित्यनेनोक्ताः स्थितिं कुर्वन्त्यः सात्विक्यः सात्विकराजस्य इत्यर्थः संयावमनुद्वास्येति निरूपिताः दुग्धस्य प्रलयकर्त्र्यस्तामस्यः तामसराजस्य इत्यर्थः

१०–२६–६ परिवेषयन्त्य इत्यस्याभासे। सात्त्विकीराहेति। सात्विकीनां त्रिकमाहेत्यर्थः। तत्र परिवेषणकर्त्र्यः सात्विकीषु राजस्यः राजससात्विक्य

इत्यर्थः। तासां राजसीत्वं व्युत्पादयन्ति परिवेषणं च सृष्टिरेव रेतस उत्पादकत्वादिति। परिवेषणं भोजने कारणम्, भोजनेन रेतस उत्पत्तिः, एवं परिवेषणस्योत्पत्तिसाधकत्वात्तत्कर्त्र्यो राजससात्त्विक्यः। 'पाययन्त्यः शिशून्पय' इत्यनेनोक्ताः सात्त्विक्यः सात्त्विकसात्त्विक्य इत्यर्थः। तासां सात्त्विकीत्वमुपपादयन्ति स्तनदानं पालनमिति। 'शुश्रूषन्त्यः पतीं' नित्यत्रोक्तास्तामस्यः तामससात्त्विक्य इत्यर्थः। तासां तामसीत्वमुपपादयन्ति शिष्टमन्यदिति। शिष्टं तामसीत्वं अन्यत्पतिशुश्रूषणं तामसमित्यर्थः। पतिशुश्रूषणस्य भोगप्राधान्येन पारमार्थिकबुद्धिनाशकत्वात्। नाशस्य तमोगुणकार्यत्वात्। एवं राजसतामससात्त्विकत्रिकमुक्त्वा राजसत्वं तामसत्वं सात्त्विकत्वं च कथमित्याकांक्षायामुपपादयन्ति शरीरसेवातः गोसेवा मुख्या, ततः पतिसेवेतीति। एवं सति शरीरसेवा तामसधर्मः 'अश्नन्त्योऽपास्य भोजन'मित्यनेनोक्ते त्रिकेऽस्तीति बोध्यम्। गोसेवा हि शरीरसेवातः उत्तमा। तथा च गोसेवा राजसधर्मः, सा 'दुहन्त्योऽभिययु'रित्यनेनोक्ते त्रिके वर्तते। गोसेवातः पतिसेवा उत्तमा, सा पतिसेवा का? 'परिवेषयन्त्य' इत्युक्ते त्रिकेऽस्ति। सा सात्त्विकीति बोध्यम्।

१०-२६-१० ध्यानप्राप्ताच्युतेत्यस्य विवरणे। ननु समागतोपि जारधियेनेति। यद्यप्येतासां जारबुद्धिमत्त्वेन जारत्वेनैव भगवान् ध्यातः, तथापि ध्याने प्राविर्भूतो भगवान जारत्वेन न समागतः, किन्त्वच्युतत्वेन, ध्यानप्राप्ताच्युताश्लेषेत्यप्राच्युतपदात्। 'समागत' इतिपदेन ध्यानप्राप्तेति प्राप्तपदस्यार्थ उक्तः।

१०-२६-१२ गुणप्रवाहोपरम इत्यस्य विवृतौ। ननु कृष्णं ब्रह्मत्वेन न विदुरेतावता किं बाधकम्, बहवोपि श्रीकृष्णं ब्रह्मत्वेन न जानन्ति, अथापि येषां वेदान्तश्रवणादिना ब्रह्मज्ञानमस्ति, ते मुच्यन्त एव, तथैता अपि मुक्तिं प्राप्स्यन्तीत्याशङ्क्याहुः वैदिकः पक्षस्त्वसंभावित एव। 'ब्रह्म वेद ब्रह्मैव भवती'त्याद्युपनिषन्निरूपितो ब्रह्मभावस्त्वसंभावित एव, वेदान्तश्रवणमननाद्यभावादित्यर्थः।

१०-२६-१४ नृणां निःश्रेयसार्थायेत्यत्र। नृपेति सम्बोधनं कश्चिद्राजा कथञ्चिद्गच्छतीत्यादि। अयमर्थः। राजा ह्यन्यैरेव सर्वं कार्यं कारयति, स्वयं तु कदाचिदेव क्रीडाविशेषार्थं गच्छति, तद्वद्भगवानपि भूभारहरणादिरूपं व्यूहैः कारयति, निःश्रेयसशब्दवाच्यमुद्धाररूपकार्यं स्वयमेव करोतीति भावः।

१०-२६-१५ नित्यं हरौ विदधत इत्यस्य विवृतौ। दृष्टिः कामेनानुरक्तेति किं पुनः स्वात्मेति। कामादिभिः षड्भिरपि यत्र भगवत्प्राप्तिः, तत्र गोपवधूनां दृष्टिः कामेन अनुरक्ता इति हेतोः जगदेव तदा तदात्मकं स्फुरति, किं पुनः स्वस्य,

जीवस्य संघाते यः आत्मा प्रविष्टः सः भगवत्त्वेन स्फुरेदिति । तदात्मका एव भवन्ति, सर्वत्र भगवदावेशादिति । सर्वत्रेत्यस्यार्थे स्वयमेव स्फुरति । जीवेऽन्तःकरणे चैवेत्यादि । पुत्रादिपु हरिर्यत इति । पुत्रादिपु यतो हेतोः हरिः आविष्ट इति शेषः तथा च यतो हरिराविष्टः, अतः सः कामक्रोधादिभिस्तादृशीं भावनां कुर्यादित्युत्तरेण श्लोकेनान्वयः । तादृशीं 'आसीनः संविशंस्तिष्ठन् भुञ्जानः पर्यटन्महीं' मित्यत्रोक्तां कंसकृतभावनासदृशीमित्यर्थः । कामक्रोधादिभिरिति । कामक्रोधादयस्तादृशभावनायां हेतव इत्यर्थः । भावनायां सत्यां किं स्यादित्याकाङ्क्षायामाहुः पूर्वप्रपञ्चेत्यादि । यथा ज्ञाने प्रपञ्चलयः, तथा कामक्रोधादिभिरपि भवेदित्यर्थः । कामं क्रोधमित्यस्य द्वितीये व्याख्याने । सगुणेनापि भावेन भजते भगवान् स्वानुरूपमेवेत्यादि । स्वानुरूपं मुक्तिरूपं फलमित्यर्थः । सगुणभावेन भजतो 'यस्त आशिष आशास्ते न स भृत्यः स वै वणिक्' इतिवाक्येन भक्त्यभावाल्लौकिकं फलमेव तत्र दातुमुचितं यद्यपि, तथापि स्वस्वरूपं विचार्य मुक्तिमेव ददातीत्यर्थः ।

१०–२६–१८ व्रजस्यानामयमित्यत्र । यज्ज्ञापयितुं तेषां समागमनमिति । तेषां भवत्पित्रादीनामित्यर्थः । भगवन्निकटे समागता व्रजसुन्दरीः प्रतीयं भगवत उक्तिः । तथा च व्रजोपद्रवसूचनाय भवत्पित्रादीनां पुरुषाणामागमनं सम्भावितं तत्तेषामनागमनं भवतीनामागमनं महान्तमुपद्रवं सूचयति, स वक्तव्य इति भावः ।

१०–२६–१९ रजन्येपेत्यस्य विवृतौ । एषा रजनी, नतु दिनमिति । अयमर्थः । एतासां रात्रीणामलौकिकत्वाद्दिवापि सत्त्वेन हेमन्ततौ प्रातःसमये 'मयेमा रंस्यथ क्षपा' इत्युक्त्वा रात्रयः प्रदर्शिताः, परन्तु साधनप्रकरणत्वाद्दिवा प्रदर्शनम्, तेन रमणं नाभूत् । यतो लौकिकरात्रावेवालौकिकरात्र्यारोपे रमणं भवति । तदत्र लौकिकरात्रावेवालौकिकरात्रीणां सत्त्वाद्रमणं भविष्यत्यतोऽत्रैव स्थातव्यम्, गृहे न गन्तव्यम्, एवं स्थितिपक्षः पोषितः । तदेतदुक्तं एषा रजनी, नतु दिनमिति । एषाधिकरणरूपा लौकिकी रजनी, एतस्यामलौकिक्या आरोपः । अत एव 'घोरसत्त्वनिषेविते'ति विशेषणम् । वस्त्रहरणप्रसंगे तु अधिकरणभूतं दिनं स्थितमिति अलौकिकरात्रीणां विद्यमानत्वेपि रमणं नाभूत् । साम्प्रतं तु रात्रावेवालौकिकरात्रीणां विद्यमानत्वाद्रमणं भविष्यतीति भगवदाशयः । अयं चन्द्रः, न तु सूर्य इतीति । भवतीनां मत्संगमार्तिवशारसंतापकत्वेन दिवाकरवत्प्रतीयमानोपि चन्द्र एवेति भावः ।

१०–२६–२० मातरः पितरः पुत्रा इत्यस्य विवरणे । न च वक्तव्यं ता अपि तथेति । ताः अस्मन्मातरोपि तया मुरलीनादमोहिताः, आगता अपि चेत्, न

किञ्चिद्बाधकमित्यर्थः । स्त्रीत्वाद्वा नागमिष्यन्तीतीति । मातरस्तु स्त्रीत्वान्नागमिष्यन्त्यतो वा न किञ्चिद्बाधकमित्यर्थः ।

१०-२६-२१ दृष्टं वनं कुसुमितमित्यस्य विवृतौ । इदानीं पुष्पाण्येव जातानीत्यादि । इदानीमुद्दीपनसामग्री जाता मद्दर्शनं जातमिति रमणपूर्वसम्पत्तिः सर्वापि सिद्धेति पुष्पाणि जातानि । फलं तु रमणे सति भविष्यतीति रमणात्मकफलाप्तये अत्रैव स्थेयमिति भावः । वनं तामसमिति । यद्यपि वृन्दावनं गुणातीतम्, 'मुनयश्चापि पक्षिण' इति वेणुगीताध्यायसुबोधिन्यां गुणातीतत्वमुक्तम्, तथापि अधुना भोगकोपयोगितया तामसत्वमेव । एवं सति ये कृतार्थीभवितुमुद्युक्ता भक्तास्तान्प्रति गुणातीतत्वम्, भगवदेकपरतासाधकत्वात्, ये पुनः कृतार्था लीलासृष्टिस्था भगवता सह रन्तुकामास्तान्प्रति ताद्दग्भावजनकत्वेन तामसत्वमेवेति व्यवस्थयोभयमपि ।

१०-२६-२३ अथवा मदभिस्नेहादित्यत्र । निरुक्तो भावो गुणात्मको दोषात्मको वा न फलं प्रयच्छतीति । गुणात्मक इति । दानादिरूपो धर्मः स्वमुखेन कथितश्चेत् फलदानसमर्थो न भवति । अत एव भगवतोद्धवं प्रत्युक्तं 'कृतस्यापरिकीर्तन'मिति । 'धर्मः क्षरति कीर्तना'दितिवाक्यात् फलदत्वं तस्य नश्यति । एवं दुष्कर्मापि कृतं पुनः कथ्यते तदा क्षीणं भवति । पूर्वोक्ताः पक्षा भवतीनामागमने मया कल्पिताः, वस्तुतस्तु मद्दर्शनार्थमेवागतं भवतीभिः, परन्तु क्षरणभयाद्भवतीभिर्न कथ्यत इति भावः ।

१०-२६-२७ श्रवणाद्दर्शनादित्यत्र । भगवत्साक्षात्कारो वा भगवत्कार्यार्थं इति । भगवद्विषयककामोत्पादनार्थं भगवद्दतः साक्षात्कारो दर्शनशब्दवाच्य इत्यर्थः । तत्र दृष्टान्तः । नारदादेरिवेति । नारदस्य भगवता स्वदर्शनं सम्पादितम्, स्वविषयककामोत्पत्त्यर्थम् । 'सकृद्यद्दर्शितं रूपमेतत्कामाय तेनघे'तिवाक्याच्चद्वदित्यर्थः ।

१०-२६-३१ देवो यथादिपुरुष इत्यत्र । पुरुषान्तरभजनेपि प्रथमभर्ता विवाहितः अभजनीयो भवतीति । नहीति पूर्वोक्तेनान्वयः । परपुरुषभजनेपि विवाहितस्य पत्युर्भजनं कर्तव्यमेव । तथाच परपुरुषस्थानीयाः गोपाः, तेषां भजनेपि विवाहितपतिस्थानीयो भगवांस्तस्य भजनं तु कर्तव्यमेवेति फलति । एतच्च मूले आदिपुरुषपदेनोक्तम् । आदिपुरुषः प्रथमभर्तेत्यर्थः । अनंगीकारस्तूचित इति । जारस्त्वङ्गीकृतः सन् पतिसादृश्यं लभते, नतु विधिवशात् । एवं चाङ्गीकारस्य स्वकृतत्वात्तस्य जारस्य अनङ्गीकारोपि स्वकृतो भवेच्चेदुचित एवेत्यर्थः । पतिस्तु विधिवशात्स्वामित्वं प्राप्तः, अतो चेत्कृतत्वान्न दूरीकर्तुं शक्यः । अतस्तस्य कदाचिदप्यभजनं न कर्तव्यम् । तदेतदाहुः

न त्वभजनमिति । विवाहितपतेरभजनं नोचितमित्यर्थः । प्रकृते भगवतो विवाहितपतिस्थानीयत्वम्, सार्वदिकपतित्वादादिपुरुषत्वेन । गोपानां देहसम्बन्धित्वेन नित्यपतित्वाभावात्तेषामनङ्गीकारस्योचितत्वेपि भगवतो नित्यपतेरभजनं न युक्तमितिहार्दम् ।

१०–२६–३३–३४ कुर्वन्ति हीत्यत्र । जन्मवद्दिनस्यापीति । एतदर्थष्टिप्पण्यां स्फुटः । चित्तं सुखेन भवतेत्यत्र । भवता वा आनन्दरूपेणापहृतमिति । अस्मिन् पक्षे सुखेन भवतेत्यत्राभेदेनान्वयः । सुखरूपेण भवतेत्यर्थः । 'यो वै भूमा तत्सुख'मिति श्रुतौ ब्रह्मणः सुखरूपताकथनात् ।

१०–२६–३५ नो चेद्वयं विरहजाग्न्युपभुक्तेत्यस्य विवृतौ । हरेणैव दग्ध इत्यारभ्य विरहत्वमित्यन्तम् । एतस्यार्थष्टिप्पण्यां स्फुटः ।

१०–२६–३९ वीक्ष्यालकावृतमित्यत्र । लोके हि पुरुषार्थत्रयमित्यादि । तत्र चतुर्विधो मोक्ष एकः पुरुषार्थः । इन्द्राद्यैश्वर्यभावेन स्वर्गप्राप्तिर्द्वितीयः पुरुषार्थः । इहलोके परमा लक्ष्मीस्तृतीयः । भगवत्प्रमाणावलम्बिनी इति । 'कर्णौ दिशः श्रोत्रममुष्य शब्द' इतिवाक्याद्भगवच्छ्रोत्रस्य शब्दरूपत्वात् प्रमाणरूपत्वम्, तादृशप्रमाणरूपश्रोत्रावलम्बिनी कुण्डले इत्यर्थः । तथा च भगवत्प्रमाणपङ्क्तिप्रतिपादकं शास्त्रं भागवतभगवद्गीतारूपं तदवलम्बित्वं कुण्डलात्मकयोगसांख्यशास्त्रयोरतो भक्तेरेव सर्वत्र मुख्यत्वमित्यर्थः । कुण्डलश्रीयुक्तं गण्डस्थलमित्यस्मिन्पक्षेपीति । तथा च 'वीक्ष्यालकावृतमुखं तवे'तिश्लोके कुण्डलश्रीगण्डस्थलाधरसुधमित्येकं समस्तं पदम् । सामीप्याद्भक्ताविति । सांख्ययोगशास्त्रात्मककुण्डलसामीप्याद्भक्तिरूपे गण्डस्थले शास्त्रीयो रसोधिको निरूपित इत्यर्थः । 'यज्ञादिना हविरपि प्रयच्छती'त्युक्तम्, तत्प्रयोजनमाहुः यथाग्रे इन्द्रस्याधिकारसमाप्ताविति । इन्द्रस्याधिकारसमाप्तौ यथा इन्द्रो मुक्तो भवेत्, तदर्थं मुक्तिप्राप्तिसाधनीभूतशुद्धिसम्पादकं वैदिकविधिसिद्धं हविरिन्द्राय प्रयच्छतीत्यर्थः । चकाराद्धर्मस्यापीति । 'धर्मस्तनोधर्मपथोस्य पृष्ठ' इतिवाक्याद्धर्मस्य तत्र स्थानात् । अत्र श्लोके सुबोधिन्यामयं गूढाशयः । चतुर्विधपुरुषार्थाभिलाषो व्रजवधूभिर्दूषितः । तत्र यद्यपि सारूप्यमुक्तौ अधिकारिणां मुखदर्शनादिना परमानन्दानुभवो भवति, तादृशो दास्ये नानन्दानुभवः, तथा च किमर्थं मोक्षानङ्गीकार इत्याशङ्का प्राप्नोति, तथापि स्वरूपान्तःपाते सत्यल्पैर्मुखानन्दानुभवः क्रियेत, तथा सति न सकलस्वरूपसुखानुभव इत्येतदर्थं सारूप्यमुक्तेरनङ्गीकारः । एवं सामीप्यादावपि ज्ञेयम् । स्वरूपान्तःपातापेक्षया लीलान्तःपातस्यैवोत्तमत्वात् । चतुर्भुजादिरूपं प्राप्तानां वैकुण्ठस्थानां पार्षदादीनां भगवत्सारूप्यं यादृशं तादृशमिदं न भवति, किन्तु भगवत्स्वरूपे सायुज्यं प्राप्य पुनः श्यामसुन्दरताद्रूपमलक्षानां सारूप्यमिति बोद्धव्यम् ।

१०–२६–४० का स्त्र्यंग त इति श्लोकविवरणे । आर्याः प्रमाणबलविवेकिनः इति । अस्यार्थष्टिप्पण्यां स्फुटः । प्रमाणे ह्रीन्द्रमहेन्द्रयोरपि भेदस्वीकार इति । यद्यपि महांश्चासाविन्द्रश्च महेन्द्र इति निर्वचने इन्द्र एव महेन्द्र पदवाच्यः, तथापि यागविषये प्रमाणबलादिन्द्रमहेन्द्रयोरपि भेदस्वीकारः । तत्रान्यथानुपपत्तिं प्रमाणयन्ति अन्यथा इन्द्रयाजिन इत्यारभ्य, प्रमाणबले विरुध्यत इत्यन्तेन । एवं सति आत्मत्वेनैक्येपि गुणादिकृतं भेदमादाय देवतान्तरत्वं महेन्द्रस्य कल्प्यते । गुणादयस्तु देहधर्मा इति देहस्य प्राधान्यं प्रमाणमार्गे । तथा च सिद्धमेतत् । प्रमाणमार्गे देहनिष्ठं पतित्वमंगीक्रियते इति गोपा एव पतयो गोपीनाम् । वस्तुतस्तु भगवानेव पतिरतो विवाहितपतिभजनं त्यक्त्वा भगवद्भजनं कर्तव्यमित्येव हार्दमुपनिषदाम् । तथा च भजनमेव आर्यमार्ग इति तत्करणे आर्यमार्गात् का स्त्री न चलेदित्युक्तिरेव न संभवति यद्यपि, तथापि इह आर्यशब्देन प्रमाणबलविवेकिनो ग्राह्याः । ते च वस्तुविचारमकुर्वन्तः प्रमाणबलेन देहस्यैव प्राधान्यमंगीकुर्वन्ति । देहप्राधान्ये तु विवाहितपतिभजनं मुख्यम्, तस्यैव पतित्वात्, न तु भगवद्भजनम्, अतो विवाहितपतिभजनत्यागेन वस्तुतो यः पतिर्भगवांस्तस्य भजनमार्यमार्गाचलनमेवेति तयोक्तिर्मूले । वस्तुविचारस्तु प्रमेयबलमाश्रित्येति । प्रमेयस्य भगवतः सर्वात्मत्वात्सर्वरूपत्वाच्च तद्बलमाश्रित्य 'गोपीनां तत्पतीनां चे'त्यादिना भगवति परपुरुषत्वादिखण्डनविचारः इत्यर्थः । तथा च वस्तुतो भगवान्पतिरेवेति तद्भजनमार्यमार्ग एवेत्याशयः । अन्यथा विधिनिषेधविषय इत्यादि । प्रमाणबले वस्तुविचारो नास्ति । अन्यथा यदि वस्तुविचारः स्यात्, तदात्मधर्माणामेव मुख्यता स्यात् । तथा सति देहं पुरस्कृत्य प्रवृत्ता विधिनिषेधाः व्यर्थाः स्युरित्यर्थः । यदुक्तमग्रे वक्ष्यति एकादश इति । वस्तुविचारेणात्मधर्मपुरस्कारात्तत्प्रमेयबलं एकादशस्कन्धे उद्धवं प्रति भगवान् वक्ष्यति, 'तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम् । प्रवृत्तिं निवृत्तिं च श्रोतव्यं श्रुतमेव च । मामेकमेव शरणमात्मानं सर्वदेहिनाम् । याहि सर्वात्मभावेन मया स्या ह्यकुतोभय' इत्यादिनेत्यर्थः ।

स्वरूपभूतान् कृत्वा धर्मिरूपेण तिरोभावलीलया विप्रलम्भात्मकशृंगाररूपेण रेमे, तद्र-मणं 'तत्रैवान्तरधीयत' इत्यनेन निरूप्यत इत्यर्थः। एवं सप्तभिः श्लोकैः सिद्धमर्थमनु-वदन्ति **शृङ्गारो द्विविधोपि निरूपित इति। सामान्यरमणं पूर्वमिति।** 'इति विक्लवितं तासा'मितिश्लोकेन सामान्यरमणं निरूपितमित्यर्थः। **विशेषे मेलनं पुरेति।** विशेषे रमणे विशेषरमणार्थं पुरा पूर्वं मेलनं सङ्गमः। 'स ताभिः समेताभिरुदार-चेष्टित' इत्यनेन श्लोकेन निरूपितः। 'व्यरोचतैणांक इवोडुभिर्वृत' इति वाक्यात्। विशेषरमणं द्विविधमित्याहुः **बाह्येन रमणं पश्चादान्तरं चेति। बाह्येन रमणमिति।** साक्षादंगस्पर्शनादेः सकाशाद्बाह्येन विलासपूर्वकगत्यादिरूपेणेत्यादि। तद्रमण'मुपगीयमान उद्गाय'न्नित्यनेन निरूपितम्। **आन्तरं च ततः परमिति।** साक्षादंगस्पर्शादिरूपं आन्तरं रमणं 'नद्याः पुलिनमाविश्ये'त्यनेन श्लोकेन निरुपितं बन्धादिप्रकारेण। **ततो नानाविलासेन जातकेलिविभेदत इति।** जातकेलिविभेदतः नानाविलासेन रमण-मित्यन्वयः। तन्नानाविलासेन रमणं 'बाहुप्रसारे'तिश्लोकेन निरूपितम्। **विप्रलम्भस्य सिद्ध्यर्थमिति।** 'एवं भगवतः कृष्णा'दिति श्लोकेन 'मानमुदीर्यते' तस्य प्रयोजनमाहुः **विप्रलम्भस्य सिद्ध्यर्थमिति।** 'तासां तत्सौभगमद'मिति श्लोकस्यार्थमाहुः **तिरो-भावस्ततश्चापीत्यादिना। नायं लौकिककामुक इति।** एतस्यार्थष्टिप्पण्यां स्फुटः।

इति विक्लवितमित्यस्य विवरणे। ननु निरिन्द्रियः कथं रेमे इति। भगवतः इन्द्रियाणि न सन्ति। परिदृश्यमाने साकारे ब्रह्मणि गोलकेषु प्रत्यक्षतो दृश्यमानेषु इन्द्रियाण्यंगीकर्तव्यानि स्युः, तथा सति परिदृश्यमानात्साकाराद्ब्रह्मणः सकाशादतिरिक्तं वस्तु ब्रह्मण्यायात्। तथा सति स्वगतद्वैतं स्यात्, तत्तरुपत्रयोरिव। तच्च सिद्धान्ते ब्रह्मणि नास्ति, 'सजातीयविजातीयस्वगतद्वैतवर्जित'मिति वाक्यात्। एवं सति यद्गोलकत्वेन प्रतीयते, तद्ब्रह्मैव, न तत्र पार्थक्येन चक्षुरादीन्द्रियाणामंगीकारः, न वा सूर्यादि-देवानाम्, किन्तु ब्रह्मैव दर्शनरूपं कार्यं कुर्वच्चक्षुरादिशब्दवाच्यं भवति। 'पश्यन् चक्षुर्वदन् वा'गित्यादिश्रुतेः। इत्थमेव तृतीयाध्यायभाष्ये स्फुटमुपपादितम्। अलौकिकान्यपी-न्द्रियाणि नांगीकृतानीति। अत एवात्राप्येवमाहुः **स्वरूपमेवेन्द्रियादिभावेन प्रकटी-कृतवानिति।** इन्द्रियादिभावेन प्रकटीभूतं व्रजसुन्दरीप्रेमफलदानार्थं तादृशभावावि-शिष्टेन्द्रियादिरूपेण स्वरूपं प्रकटितवानित्यर्थः। ननु 'बाहुप्रसारपरिरंभकरालकोरुनी-वीस्तनालभने'त्यादिना लौकिकक्रियासदृशी क्रिया प्रतीयते, सा च कामं विनानुपपन्नेति कामोप्यंगीकर्तव्यः, तथा सति प्राकृतत्वमेवापातीत्याशंकय समाधिमाहुः **क्रिया सर्वापि सैवात्रेत्यादिकारिकाभिः।** 'बाहुप्रसारे'त्यादिना या क्रिया उक्ता, सा सर्वत्र वर्तते,

परन्तु तस्या अलौकिकत्वात्तया न लौकिकः काम आक्षिप्यते । तदाहुः परं कामो न विद्यते । लौकिकः कामो न विद्यत इत्यर्थः । तत्र गमकमाहुः कामेन पुरितः कामः संसारं जनयेत् स्फुटमिति । लौकिककामेन चेत् व्रजसुन्दरीणां कामः पुरितः स्यात्, तदा संसारं पुत्रादिरूपं जनयेदित्यर्थः । एतल्लीलाश्रवणकीर्तनादिफलत्वेन कामाभावस्योक्तत्वादपि नेयं कामलीलेत्याहुः अत एतच्छ्रुतौ लोको निष्कामः सर्वथा भवेदिति । ततः शुकवचः स्फुटमिति । एतल्लीलाश्रवणकीर्तनफलत्वेन लौकिककामनिवृत्तिबोधकं 'कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीर' इति शुकवचः स्फुटमित्यर्थः ।

१०–२६–४३–४४ उदारहासद्विजकुन्ददीधितिरित्यस्य विवृतौ । कुन्दत्वं स्नेहस्येत्यादेरर्थष्टिप्पण्यां स्फुटः । वनिताशतयुथप इत्यस्य विवृतौ । यूथपपदतात्पर्यमाहुः तेषामत्र रक्षणं दूरादेवाश्वासनेन चेति । दूरादाश्वासनं ललितगतिवल्गुवाक्यमन्दस्मितकटाक्षप्रक्षेपादिरूपम् । रक्षणं दूरादपि भवतीति तथोक्तम् ।

१०–२६–४८ – तत्रैवान्तरधीयतेत्यस्य विवृतौ । गोपिकासु यूथमध्ये वेति । गोपिकासु गोपिकाहृदयेषु लीलासहितस्य प्रभोः क्रीडा सा ह्यलौकिकी लीला । यूथमध्ये वेति तु लौकिकप्रकारेण निलीय स्थितिः । एवं पक्षद्वयेपि तत्रैवान्तरधीयतेत्यत्र तत्रपदं प्रमाणमिति बोद्धव्यम् । किञ्च, व्यापिवैकुण्ठे गमनम्, लक्ष्म्या सहैव तावत्समयपर्यन्तं रमणमिति तृतीयः पक्षः । तत्र मानं तु चतुर्थाध्यायसुबोधिनीयोजनायां वक्ष्यते । एवं तिरोधाने त्रयः पक्षाः । तत्रैवान्तरधीयतेत्यत्र केशवशब्दे कश्च ईशश्च केशौ, तयोर्वं मोक्षाख्यं सुखं यस्मात् केशव इति निरुक्तिर्ज्ञेया । मानं च निवार्य मुक्तिं दातुमिति । मुक्तिशब्देनेह विप्रयोगानुभव उच्यते । 'वासुदेवानुमोदिता' इत्यस्य सुबोधिन्यास्तथाशयात् । 'वासुदेवानुमोदिता' इत्यस्य टिप्पण्यां विप्रलम्भशृङ्काररसानुभवस्य मोक्षपदार्थत्वेनोक्तत्वात् । इहापि मुक्तिपदेन तदेव ग्राह्यम् । तथा च एतासां मदं मानं च निवार्य विप्रलम्भशृङ्काररसानुभवं दातुं तथा कृतवान् तिरोधानं कृतवानित्यर्थः । प्रथमाधिकारित्वादिति । तामसत्वादित्यर्थः । तथा च गोपीनां तामसत्वात्स्वरूपमात्रनिष्ठत्वेन वाक्तिरोधाने मानसिकतिरोधाने वा नैतासां दुःखमिति न वियोगानुभवः, किन्तु कायिकतिरोधाने एवामूषां दुःखमिति तदैव विरहानुभवो भवेत्, अतो विरहानुभवकारणार्थं स्वरूपतस्तिरोभूत इत्यर्थः । इति श्रीमद्गोवर्धनधरश्रीवल्लभाचार्यवरश्रीविट्ठलेश्वरचरणानुचरसेवकेन लालूभट्टोपनामदीक्षितबालकृष्णेन कृता दशमस्कन्धषड्विंशाध्यायसुबोधिनीयोजना संपूर्णा ।

१०–२७–० श्रीगिरिधारी जयति । सप्तविंशाध्यायार्थोक्तौ । स्वानन्दस्थापनार्थायेत्यादि । भगवता कामलीला कृता, सा स्वानन्दस्य स्वरूपात्मकानन्दस्य

व्रजवधूटीषु स्थापनार्थम् । स्वानन्दस्थापनार्थरूपो योऽर्थस्तस्मै इति कारिकार्थः । अत्रेदमाकूतम् । लौकिके हि कामजन्यानन्दः समयविशेषावच्छेदेनोत्पद्यते, स्वल्पकालं तिष्ठति, ततो नश्यति च, विकृतत्वात् । प्रकृते तु कामलीलया प्रादुर्भवन्नानन्दोपि स्वरूपात्मक एव । स्वरूपस्याविकृतत्वादविकृत एवोद्भवति । अतएव सर्वदैव तिष्ठति, न तु कदाचिदपि नश्यति । तत्र संयोगावस्थायां बहिःप्राकट्यम्, विप्रलम्भेऽन्तःप्राकट्यम् । एवं प्रकारद्वयेन तिष्ठतीत्याहुः स्वानन्दस्थापनार्थायेत्यादिना । चत्वारोत्र निरूप्यार्था इति । रसासक्तिरेकोर्थः । हरेः क्रिया द्वितीयोर्थः । गर्वाभावश्च तृतीयः । गुणगानं चतुर्थं इति टिप्पण्यां स्वीकृतम् । उद्देशतो लक्षणतः फलतश्चेति । अस्यार्थष्टिप्पण्यां स्फुटः ।

१०–२७–१　सन्ति च सिंहा इति । बहवः सिंहाः सन्ति, अतो गजमक्षाणांः सिंहभयात् करिण्यस्त्रसन्तीत्यर्थः । तथात्र काल इति । अवतारसमाप्तिकाल इत्यर्थ इति श्रीमट्टिप्पणीकाराः ।

१०–२७–२　गत्यानुरागेत्यस्याभासे । यदा पुनस्तापः अन्तः प्रवेष्टुमैच्छदिति । तापस्य भगवद्रूपात्मकत्वेन सच्चिदानन्दरूपत्वात्प्रवेष्टुमैच्छदिति चेतनः धर्मः सम्भवति । तस्य विलासः स्वनिष्ठतात्याजनार्थमिति । स्मितस्य विलासो भक्तानां भगवद्भजननिष्ठतां त्याजयति । स्मितस्य मायारूपत्वात् । भजननिष्ठां त्याजयित्वा केवलं प्रमदाभावसम्पादनेन मानादिकमुत्पादयतीति भावः । न बहिर्गता नान्तः स्थिता इति । बहिरनुसंधाने केवलं विरहज्ञानात् क्लेशमेव प्राप्नुयुः, अन्तःस्थितौ तु लीलासहितस्य भगवतः स्वहृदि प्रवेशज्ञानात्केवलं सुखमेव प्राप्नुयुः । एतास्तु क्षणक्षणविलक्षणभावाः विरहज्ञाने दुःखं पुरुषोत्तमान्तःसम्बन्धेन सुखं च प्राप्नुवन्तीति न सर्वथा बहिः स्फूर्तिः, नवा सर्वथान्तर्निष्ठतेतिज्ञेयम् । भगवति मध्ये स्फुरित इति । बाह्यानुसंधानान्तर्निष्ठयोरुल्लंघितुमुत्सुकयोर्मध्ये हृदये भगवान् स्फुरितस्तद्धर्मान् स्वयं कृतवत्य इत्यर्थः । यथोत्तानके ग्राम्यादय इति । बन्धविशेषे ग्राम्यादयो यथा विलासं प्राप्नुवन्ति, तद्वदित्यर्थः ।

१०–२७–३　गतिस्मितेत्यत्र । स्वधर्मानारोपितवत्य इति । स्वगतौ प्रियभावना जातेत्यादिना टिप्पण्यां स्फुट एतदर्थः । भगवद्धर्मेषु स्वमूर्तिरारोपितेति । भगवद्धर्मस्य रमणस्यानुकरणं कुर्वाणाः भगवानेव रमते इति मन्यमानाः पुनः पुनस्तथैव रमन्त इति भगवद्धर्मे रमणे स्वमूर्तिः स्वदेहस्यारोपणं तदेकपरतेति यावत् । तादृगेव रमणं कुर्वन्त्यः स्थिता इति हार्दम् ।

१०–२७–४　गायन्त्य उच्चैरमुमेव संहता इत्यत्र । प्रथमतो मिश्रभावादिति । शब्दो हि धूमवल्लोक इत्यादयः सार्धास्तिस्रः कारिकाः । एतदर्थष्टिप्पण्यां

स्फुटः । कस्याश्चित् पूतनायन्त्या इत्यादिलीलानुकृतितात्पर्यकथने भक्त्यातिमत्तासद्भावमित्यादिकारिकास्तासामर्थष्टिप्पण्यां स्फुटः ।

१०-२७-१६ रिङ्गयामास काप्यङ्घ्री इत्यस्य विवृतौ । पूर्वश्लोके चतस्र उक्ता लीलाद्वये इति । 'कस्याश्चित्पूतनायन्त्या' इति श्लोके चतस्रो गोपिका उक्ताः । पूतनायन्ती कृष्णायन्ती तोकायन्ती शकटायन्ती चेति । लीलाद्वये इति । पूतनामारणशकटभंजनाख्ये लीलाद्वय इत्यर्थः । अत्र तिस्र एवेति । दैत्यायित्वेतिश्लोके दैत्यायन्ती कृष्णार्भभावना च रिंगणकर्त्री चेति तिस्र एवेत्यर्थः । अथवा युगलास्तिस्रो निरूपिता इति । पूतनायन्ती कृष्णायन्ती चेत्येकं युगलम् । तोकायन्ती शकटायन्ती चेत्येकं युगलम् । दैत्यायन्ती कृष्णार्भभावना चेत्येकं युगलमेवं युगलत्रयं वर्तते यासां तास्तिस्रो युगलाः । युगलशब्दादर्शआद्यच् । तथा च युगलास्तिस्रः सगुणा इत्यर्थः । गुणातीता त्वेकेति। रिंगणकर्त्री गुणातीतेत्यर्थः । पुनः प्रकारान्तरेण बाह्य इत्यारभ्य बहुरूपा जाता इत्यन्तम् । एकभावमापन्ना इति । गोपालकरूशा बह्व्यो जाता इत्यर्थः । प्रधानगुणभावं कृष्णबलदेवभावं गोपिके द्वे प्राप्ते । रजसा अनेकधा विक्षिप्ता बहुरूपा जाता इति । शृङ्गाररससम्बन्धिना रजोगुणाख्येन भावविशेषेण विक्षिप्ता बहुरूपा गोपालकरूपेषु बहुरूपा जाताः श्रीकृष्णरूपबलदेवरूपगोपबालकरूपभेदेन गोपरूपेषु बहुत्वात् ।

१०-२७-१९ कस्यांचित्स्वभुजं न्यस्येत्यस्य व्याख्याने । अत्रापि पूर्ववत् युगलास्तिस्र इति । अत्रापीति । कृष्णरामायित इत्यारभ्य ललितामिति तन्मना इत्यन्तेन वृन्दावनलीलाकथनप्रसंग इत्यर्थः । पूर्ववत् युगलास्तिस्र इति । 'कस्याश्चित्पूतनायन्त्या' इत्यादिना निरूपितयुगलवत् युगलास्तिस्र इत्यर्थः । तत्र कृष्णरामायितेत्यनेन श्रीकृष्णबलदेवौ निरूप्य 'वत्सायतीं घ्नती चान्या तत्रैका तु बकायती'मित्यनेन श्रीकृष्णकृतबकमारणलीलाबलरामकृतवत्समारणलीलोक्ता । अतः श्रीकृष्णरूपा एका, अपरा बकरूपेत्येकं युगलम् । बलरामरूपा एका, अपरा वत्सरूपेत्येकं युगलम् । इत्थं युगलद्वयम् । तदाहुः 'कृष्णरामायिते द्वे युगले' इति । 'आहूय दूरगा यद्व'दिति श्लोके दूरगगवाह्वानवेणुक्वणनक्रीडनकर्त्री कृष्णरूपा एका साध्वाशंसनकर्त्री एकेत्येकं युगलम्, इत्थं तिस्रो युगलाः । युगलं विद्यमानं यासां ता युगला इत्यत्र अर्शआद्यच् । यद्यपि 'आहूय दूरगा' इति श्लोके गोरूपकृष्णरूपगोपरूपेण त्रित्वं वक्तुमुचितम्, तथापि गवाह्वानलीलाकर्तृत्वेन एको भगवान् विवक्षितस्तन्मध्ये गोपरूपाणामभिनिवेशादित्यर्थः । साध्वाशंसनसहिता वेणुवादनपरा च तृतीयेति । वेणुवादनपरा गोपी श्रीकृष्णरूप-

धारिणी साध्वाशंसनकर्त्रीभिर्गोपरूपाभिः सहिता तृतीया । तृतीययुगलसाधिकेत्यर्थः । एषा त्विति । कस्यांचित्स्वभुजमित्यत्रोक्ता कृष्णरूपा गुणातीतेत्यर्थः । बद्धान्यया स्रजेत्यत्र भगवद्वशीकरणान्ता च लीलेति । साधनानां परमकाष्ठा तु तदैव सिध्यति, यदा भगवान् स्ववशे भवतीति पुष्टिभक्तिमार्गव्यवस्था । सा चास्य लीलायां सिद्धेति, नातः परं किञ्चित्कर्तव्यमतो लीलानां तिरोभावः । साधनत्वेनाविर्भूय कृतार्थीभूताः । अतः प्रयोजनाभावात्तिरोभूता इत्यर्थः । एतावता भगवति वशीभूते पुष्टिभक्तिस्वरूपं सिद्धम् । 'कृष्णाधीना तु मर्यादा स्वाधीना पुष्टिरुच्यते' इति निबन्धात् । यथा दामोदरलीलायां सा पुष्टिरिति व्याख्यानाच्च ।

१०–२६–२५ पदानि व्यक्तमेतानीत्यत्र । महान् वा ब्रह्मरूप इति । अस्मिन्पक्षे कर्मधारयो ज्ञेयः । महांश्चासावात्मा चेति विग्रहे महापदस्यार्थमाहुः । ब्रह्मरूप इति ।

१०–२७–३६ सा च मेने तदात्मानमित्यस्याभासे । स्वयं त्वयुक्तकरणादिति कारिका । एतस्यार्थष्टिप्पण्यां स्फुटः ।

१०–२७–३८ स्कन्धमारुह्यतामितीत्यस्य विवरणे । एषा हि नृत्यं कर्तुं वाञ्छति स्वान्तर्गतं रसमभिनेतुमिति । अयमर्थः । भगवता सह रमणे यो रसोनुभूतः सोन्तस्तिष्ठति । तस्याभिनयो नृत्येन कर्तव्यः । अभिनयस्य नृत्यसाध्यत्वात् । अतोभिनयं चिकीर्षुर्नृत्यं कर्तुं वाञ्छतीत्यर्थः । तद्भूमौ पदस्थापने ऊर्द्ध्वभावाभावात् रसः च्युतो भवेदिति । भूमौ पदस्थापने इति । भगवता सह चरणाभ्यां चलने इत्यर्थः । रसश्च्युतो भवेदिति । अभिनीयमानः शृङ्गाररसश्च्युतो भवेत्, बोधविषयो न भवेदित्यर्थः । स एवेत्यारभ्य नरीनर्तीत्यन्तम् । सङ्गीतशास्त्रे नृत्यविशेषे स्वस्कन्धारोहणमुक्तम् । तदतिकठिनम्, अतो यो नर्तकः स्वस्कन्धमारुह्य नरीनर्ति, स अत्यन्तनटश्रेष्ठ इत्यर्थः । नन्वत्र भगवत्स्कन्धारोहणमेव भगवताज्ञप्तमित्येव कुतो नोच्यत इति चेत्, न । 'सत्यं देवानामनृतं मनुष्याणा'मिति श्रुतौ मृषा भाषणस्य मनुष्यासाधारणधर्मत्वान्मनुष्यासाधारणधर्माणां 'मायामनुष्यस्य वदस्व विद्व'न्नित्यादिवाक्यैर्भगवत्यभावात् । तदेतदाहुः भगवांस्तु नान्यथा वदतीति न स्वस्कन्धसम्भावनेति । 'सा वधूरन्वतप्यते'त्यस्य विवरणे अनन्यपूर्वा व्रतमध्यस्था तत्रापि गुणातीतेति । वधूपदस्य अननुभूतशृङ्गाररसाया नवोढाया 'वरवध्वोः शुभमङ्गलं' 'वधूमनेसः खलु मङ्गलमद' इत्यादिवाक्यैः शक्त्यस्य निर्धारात् । इयं अनन्यपूर्वेत्युक्तम्, 'सा वधूरन्वतप्यते'तिवधूपदात् । सेति तच्छब्देन पूर्वोक्तपरामर्शिना व्रतस्था ग्राह्या । पूर्वं व्रतस्थानामेव रासक्रीडायां निरूपित-

स्यात्। अन्वतप्यतेत्यनुतापकथनाद्गुणातीतत्वम्। अन्यथा रोषादिकं कुर्यात्, नत्वनुतापम्। अतो गुणातीतत्वम्।

अन्यायविवृतिसमाप्तौ कारिकाद्वयम्। श्रीकृष्णगोपीकास्तत्रेत्यादि। द्विविधा इति। श्रुतिरूपाग्निकुमारभेदेनेत्यर्थः। नवधेति। सात्विकादित्रिकभेदेनेत्यर्थः। समुदायेन भिन्ना वेति। समुदायेन यूथेन नवधेत्यर्थः। पूर्वस्मिन् पक्षे गोपिकाः प्रत्येकं सात्विक्यः राजस्यस्तामस्यश्चेति। अस्मिन् पक्षे तु समुदायेन तामसत्वं राजसत्वं सात्विकत्वं च। तथा च कश्चिद्यूथः सात्विकीनाम्, कश्चिद्राजसीनाम्, कश्चित्तामसीनाम्। तत्रापि सात्विकीनां त्रिकं राजसीनां त्रिकं तामसीनां त्रिकं चेति नवप्रकारा यूथा इति फलितम्।

इति श्रीमन्निरोधस्कन्धसप्तविंशाध्यायसुबोधिनीयोजना सम्पूर्णा।

१०-२८-०। श्रीगिरिधारी जयति। अष्टाविंशाध्यायार्थोक्तौ। स्वभावाटपराधत इत्यादेरर्थष्टिप्पण्या स्फुटः। ' राजसी तामसी चैव सात्विकी निर्गुणा तथा। एवं चतुर्विधा गोप्यः पतिमत्यो निरूपिता ' इत्यादिकाः। पतिमत्यः श्रुतिरूपाः, गोपाना स्त्रियश्चतुर्षु श्लोकेषु स्तुतिकर्त्र्यो निरूपिता इत्यर्थः। ततश्चत्वारः श्लोकाः अनन्यपूर्वाणामित्याहुः तथैवेत्यारभ्य,राजसी तथेत्यन्तेन। ततः पुनरपि त्रयः श्लोकाः अनन्यपूर्वाणामेवेत्याहुः अनन्यपूर्विका इत्यारभ्य विश्रुता इत्यन्तेन। ततः श्रुतिरूपाणा त्रयः श्लोकाः इत्याहुः सपूर्वा इत्यारभ्य परेत्यन्तेन। पराशब्देन सात्विकी गृह्यते। ततः श्रुतिरूपा एव त्रिपु श्लोकेषु वक्त्र्य इत्याहुः पुनस्ता एवेत्यारभ्य विभेदत इत्यन्तेन। ततः श्लोकद्वयमग्निकुमाररूपाणामित्याहुः अनन्यपूर्वा द्विविधेति। एवमेकोनविंशतिश्लोकाः। पक्षान्तरमाहुः अथवा प्रार्थनाद्या याः सप्तेति। प्रथमद्वितीयतृतीयपञ्चमषष्ठसप्तमाष्टमश्लोकैः कृताः प्रार्थनाः। अन्ते द्विविधा पुनः। अन्ते त्रयोदशचतुर्दशाभ्यां प्रार्थनाः कृताः। एवं नव श्लोकाः प्रार्थनायास्ते कुमारिकाणाम्। चतुर्थ्यस्तु समा इति चतुर्थ्यो 'न खलु गोपिकानन्दन' इति चतुर्थश्लोकनिरूपकाः समा गुणातीता इत्यर्थः। एव दश श्लोकाः। नवमदशमैकादशद्वादशपञ्चदशषोडशसप्तदशाष्टादशैकोनविंशश्लोकाः प्रौढानाम्। इत्थमेकोनविंशतिश्लोका इति बोध्यम्।

१०-२८-१ जयति तेऽधिकमित्यस्य विवृतौ। अन्यथा क्रियामादौ न प्रयुञ्ज्यादिति। जयतीतिक्रियापदं पूर्वं न प्रयुञ्ज्यात्, किन्तु कर्तृवाचकव्रजपदमुक्त्वा जयतीति प्रयुञ्ज्यादित्यर्थः। वाक्यार्थो वा कर्मेति। 'तावकास्त्वयि धृतासवस्त्वा विचिन्वत ' इति अग्रे वक्ष्यमाणः वाक्यार्थो दृश्यतामिति क्रियायाः कर्मेत्यर्थः। दिक्षु त्वदीयास्त्वयि सतीति महद्दैन्यमिति। त्वदीया इति तु तावका इति

पदस्यार्थ उक्तः । अस्मिन्पक्षे त्वयीति सति सप्तमी ज्ञेया । तथा च त्वयि सति त्वयि व्रजे विराजमाने सति तावकास्त्वां विचिन्वते इति महद्दैन्यमित्यर्थः ।

१०-२८-२ वरद निघ्नतो नेह किं वध इत्यस्य विवृतौ । अनेन भगवद्दृष्टिः सर्वघातुकेत्यादि । यद्यपि भगवतः पुरुषोत्तमस्य दृष्टिरानन्दमयीति परमानन्दमेव प्रयच्छति, न तु हन्ति, तथापि विरहे स्मर्यमाणा परमक्लेशं जनयतीति एतस्यानन्दमय्यामेव दृष्टौ घातुकत्वभानात् । भगवतः कालादिरूपे या सर्वघातुका दृष्टिः सात्रानन्दमये निरूपितेति भावः । अशक्यचौर्यादपि पुरुषात्तदुदरवर्तिसर्वस्वनेतेति । चौरविशेषणमेतत् । अत एव नेतेति पुल्लिङ्गनिर्देशः । चौर्यं हि क्रियते बलिष्ठेन अपकीर्त्यभावायेति । ये बलिष्ठा राजादयस्ते स्वापेक्षितं परकीयं वस्तु मूल्येन न ददाति चेत्, चौर्येण गृह्णन्ति, न तु बलात्कारेण लुण्टन्ति । तथा सत्यपि अपकीर्तिर्भवेदतोऽपकीर्त्यभावाय चौर्येण गृह्णन्तीत्यर्थः । तदत्र तु न भविष्यतीत्युक्तमिति । तदपकीर्त्यभावरूपं विचारितमत्र न भविष्यति, किन्त्वपकीर्तिर्भविष्यतीत्यर्थः ।

१०-२८-३ विषजलाप्ययादित्यत्र । व्यालाः कालियसुदर्शनादय इति । इह आदिशब्देन कालियपरिकरभूताः सर्पा ग्राह्याः, कालियनिःसारणे तेषामपि निःसारणात् । ' सकलत्रसुहृत्पुत्रो द्वीपमब्जे जगाम हे'ति वाक्यात् ।

१०-२८-४ न खलु गोपिकानन्दन इत्यत्र । यशोदानन्दनत्वनिराकरणं तु लौकिकभावकृतपुत्रभावपरम् । ' जयति जननिवासो देवकीजन्मवाद ' इत्यत्र देवकीनन्दनत्वनिराकरणवत् । अत एव ' न माता न पिता तस्ये'त्यादि सङ्गच्छते । तथा च पुरुषोत्तमस्य जन्माभावेपि पुत्रभावेन प्रादुर्भावाद्यशोदानन्दनत्वं वर्तत एवेत्युपपादितं पुरस्तात् । अथवा । व्रजसुन्दरीणां शृङ्गाररसभाववत्त्वात्कटाक्षोक्त्या यशोदानन्दनत्वनिराकरणं ज्ञेयम् ।

१०-२८-६ व्रजजनार्तिहन्नित्यत्र । अत एव लोके दातारः कीर्तिमन्तो भवन्ति वीरेभ्य इति । वीरा हि मारणीयं स्वरूपतो मारयन्ति । दातारस्तु दीनगृहं समृद्ध्या पूरयित्वा दारिद्र्यं दूरीकुर्वन्ति । तद्गृहे लक्ष्म्याः पूर्त्या दारिद्र्यस्यावकाशाभावात्ततो दारिद्र्यमपसरतीति हार्दम् ।

१०-२८-७ फणिफणार्पितमित्यस्याभासे । ननु कर्कशेषु स्तनेषु कथं कोमलचरणस्थापनम्, अयुक्तमिति चेदिति । इह कथं कोमलचरणस्थापनमित्युक्त्वा अयुक्तमित्यनेन प्रश्ने उपपत्तिरुक्ता । तथा च यतः अयुक्तं अतः कथं कोमलचरणस्थापनमित्यन्वयो ज्ञेयः । अथवा । अयुक्तं यत्कोमलचरणधारणं तत्कथमिति प्रश्नाशयः । श्रीनिकेतनमित्यस्य विवरणे । अन्यासु कः सन्देह इति । सर्वासां स्त्रीणां लक्ष्म्यंशत्वाल्लक्ष्म्याः स्वर्पितायां तदंशभूतानां योग्यत्वे कः सन्देह इत्यर्थः ।

१०-२८-८ मधुरया गिरेत्यत्र । हस्तेन च स्वरूपेणेति कारिकाः । हस्तेनोपकारः, 'करसरोरुहं कान्तकामद'मित्यत्रोक्तः । स्वरूपेणोपकारः, 'व्रजजनार्तिह'-न्नित्यनेनोक्तः । पदोपकारः, 'प्रणतदेहिना' मित्यनेनोक्तः । मुखेनोपकारः, 'मधुरया गिरे'त्यनेनोक्तः । मधुरया गिरेत्यत्र । वक्तव्या द्रष्टव्याः पाययितव्या इति । 'मधुरया गिरे'त्यस्य 'वक्तव्या' इति विवरणम्, 'पुष्करेक्षणे'तिसम्बोधनस्य 'द्रष्टव्या' इति विवरणम् , 'अधरसीधुने'त्यस्य 'पाययितव्या' इति ।

१०-२८-९ तव कथामृतमित्यत्र । ज्ञानं वैराग्यं च तापनाशके भवत इति । 'तप्तजीवन'मित्यनेन वैराग्यं ज्ञानं वा ग्राह्यम् । तापनाशकत्वस्य ज्ञाने वैराग्ये च सत्त्वात् । तथा च उभयोर्मध्ये एको धर्मोऽनेन विशेषणेन सिद्धः । कविभि-रीडितमित्यस्य विवृतौ । ज्ञानं वैराग्यं चेति । अनेनापि विशेषणेन ज्ञानं वैराग्यं वा ग्राह्यम् । कवीडितत्वस्य ज्ञाने वैराग्ये च विद्यमानत्वात् । तथा च उभयोर्मध्ये एको धर्मोऽनेन सिद्धः । तत्र यदा तप्तजीवनमिति विशेषणेन ज्ञानं गृह्यते, तदा कविभिरी-डितमित्यनेन वैराग्यं ग्राह्यम् । यदि पूर्वेण वैराग्यम्, तदा कविभिरीडितमित्यनेन ज्ञानं ग्राह्यम् । एवमेकेन विशेषणेनैकं ग्राह्यम् । इत्थं द्वाभ्यां विशेषणाभ्यां ज्ञानवैराग्यसिद्धिः । 'कल्मषापह'मित्यनेन धर्माख्यो धर्मः सिध्यति । कल्मषनाशकत्वस्य धर्मे स्फुटत्वात् । ऐश्वर्यादिषु षट्सु धर्मेषु पाठान्तरेण धर्मस्य संग्रहात् । तदेतदाहुः धर्मस्येत्यपि क्वचि त्पाठ इति । 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णा भग इतीरणा' इतिवाक्ये वीर्यस्येत्यस्य स्थाने धर्मस्येति पाठ इत्यर्थः । वीर्यस्येति पाठेपि 'कल्मषापह'मित्यनेनैव विशेषणेन वीर्यमपि ग्राह्यमित्यत्रोपपत्तिमाहुः अलोकिकसाध-कत्वं च वीर्यं मत्तद्धर्मरूपमेव भवतीति । अनेन वीर्यधर्मयोरैक्यमुक्तम् । 'श्रवणम ङ्गल' मित्यनेन यशो गृह्यते । 'श्रीम'दित्यनेन श्रीर्ग्राह्या । 'आतत'मित्यनेन ऐश्वर्यम् । एव षड्गुणाः कथायामिति भगवत्कथा भगवत्तुल्येति सिद्धान्तितम् । युक्तं चैतत् । 'नाम-रूपे व्याकरवाणी'तिश्रुतौ नामरूपयोस्तौल्यनिरूपणात् । अत एव 'आच्छिद्य कीर्तिं सुश्लोकां वितन्ये'त्युक्त्वा 'तमोऽनया तरिष्यन्तीत्यगात्स्वं पदमीश्वर'इत्यनेन स्वकीर्तौ भगवता स्वभारः स्थापित इत्युक्तमेकादशस्कन्धे । 'कृष्णे स्वधामोपगते धर्मज्ञाना-दिभिः सह । कलौ नष्टदृशामेष पुराणार्कोऽधुनोदित'इत्यनेन नामात्मके श्रीभागवते कृष्णतौल्यं प्रथमस्कन्धे उक्तम् ।

१०-२८-१० प्रहसितं प्रिय प्रेमवीक्षणमित्यत्र । प्रेमवीक्षणस्य क्षोभ-कत्वं नेत्रा व्युत्पादयन्ति स्मृतं सदित्यादिना । स्वविषयक यत्प्रेमवीक्षण संयोगे, तद्वि-

प्रलम्भदशायां स्मृतं सत्क्षोभं जनयति । अन्यविषयकं वेति । अन्यनायिकाविषयक प्रेमवीक्षणं क्षोभजनकमित्यर्थः । मनस उत्तोलकं वेति । प्रेमवीक्षणमस्य मनस उत्तोलकं परीक्षकमित्यर्थः । अतोपि क्षोभजनकं सर्वथा प्रेमवता ज्ञातप्रेमकाणा परीक्षाकरणस्य क्षोभजनकत्वं स्फुटमतः सुस्थम् ।

१०-२८-११ चलसि यद्व्रजादित्यस्य विवृतौ । पाल्यानां चर्म च न परिधेयमिति । पाल्याना चर्म परिधेयं च नेत्यन्वयः । भूम्यादीनामनुग्रहार्थं चरणयोश्चर्म न परिधेयम्, चर्म परिधेयं च न भवतीति हेतुद्वयं चर्मापरिधाने, पादुकयोरधारणे तु एक एव हेतुरित्यर्थः । जल एव स्थातुं योग्यं जलपूर्णे वा । नलिनं जलजत्वाज्जले स्थातुं योग्यमित्यर्थः । उद्धृतजले स्थापितमपि तथा न शोभत इति पक्षान्तरमाहुः जलपूर्णे वेति । जलेन पूर्णे सरसि स्थातुं योग्यं सरोजत्वादित्यर्थः । अनन्यपूर्वाणां तु नित्य एव काम इति । या अनन्यपूर्वा अविवाहितास्तासां पतिकृतप्रतिबन्धाभावाद्दिवा वने गमनाद्रात्रौ भगवदन्तिके गमनादहर्निशं रमणं सम्भवतीति तद्धेतुभूतः कामोपि नित्य एव दिवा रात्रावपि इत्यर्थः ।

१०-२७-१३ प्रणतकामदमित्यस्य विवृतौ । कीर्तिरूपतामाह धरणिमण्डनमिति । धरण्या मण्डनमलंकरणरूपं श्रीरूपं वेति । धरणिमण्डनमिति विशेषणेन यशो ग्राह्यम् । श्रीर्वेत्युक्तम् । आपदि ध्येयम्, श्रीरूपं कीर्तिरूपं वेति । 'ध्येयमापदी'तिविशेषणेन श्रीर्यशो वा ग्राह्यम् । तथा च यदि 'धरणिमण्डन'मित्यनेन श्रीर्गृह्यते, तदा 'ध्येयमापदी'त्यनेन कीर्तिर्ग्राह्या । यदा तु पूर्वेण कीर्तिर्गृह्यते, तदा ध्येयमापदी'त्यनेन श्रीर्ग्राह्या । एव विशेषणद्वयेन धर्मद्वय ग्राह्यम् । 'शंतम'मितिविशेषणेन ज्ञानरूपतोक्ता । 'आर्तिह'मित्यनेन वैराग्यमुक्तम् । 'चरणपङ्कज'मितिविशेष्यनिर्देशे पङ्कजत्वोक्त्या स्वरूपस्य धर्मिण उत्कर्ष उक्तः ।

१०-२८-१४ सुरतवर्धनमित्यस्य विवरणे । पूर्वेण प्रमाणबलमिति । 'इतररागविस्मारण' मित्यस्मात्पूर्वेण 'स्वरितवेणुना सुष्ठु चुम्बित' मित्यनेन प्रमाणबलमुक्तम् । वेणुनादस्य वेदात्मकत्वात् । न च वेणोर्वेदात्मकत्वे प्रमाणाभाव इति वाच्यम् । 'वंशस्तु भगवान् रुद्र' इति कृष्णोपनिषत्सु वेणोः शिवत्वकथनात् 'वेदः शिवः शिवो वेद' इति श्रुत्या शिवस्य वेदरूपतया वेणोरपि वेदत्वात् । नृणामस्माकमनधिकारिणामिति । नृशब्देन साधारणवाचिना अनधिकारित्वं सूचितम् । अतो निःसाधनाना परमपुरुषार्थप्रदत्वादधिक उत्कर्ष उक्तः । दुर्लभपुरुषार्थानां वेति । नृशब्देन पुंजीवाः उक्ताः । अतोऽन्यैर्दुर्लभपुरुषार्थानामित्यर्थो भवति । यदिदमधरामृतमस्माक नृशब्दवाच्याप्राप्य तदस्मदितरैर्न प्राप्यत इति भावः ।

१०-२८-१६ पतिसुतान्वयभ्रातृबान्धवानित्यस्य विवरणे। कितवानां वा वयं सम्बन्धिन्य इति। अस्मिन्पक्षे 'कितवयोषित' इति समस्तमेकं पदम्। सम्बन्धिन्य इति। कितवानां सम्बधिन्यो, न तु नार्यः, भगवदेकभोग्यत्वात्। गोपानां तु भर्तृत्वाभिमानमात्रम्। 'मन्यमानाः स्वपार्श्वस्था'निति वाक्याद्रासस्मये यथा योगमायामोहितगोपैः स्वस्वस्त्रियो भगवन्निकटे स्थिता अपि स्वनिकटेस्थिता अपि स्वनिकटे ज्ञाताः, एवं सर्वदैवाभिमानमात्रम्, नतु तत्कर्तृको भोगः, योगमायामोहितत्वात्। पुत्राद्युत्पत्तिस्त्वलौकिकप्रकारेण भगवतः सकाशादेव। इदं सप्तदशाध्यायटिप्पण्यां स्फुटम्। गोपानां पतित्वाभावेपि पतित्वेनांगीकारो रसपोषार्थः। 'रसस्तु परकीयायामेवे'ति वात्स्यायनराद्धान्तात्। अतो वस्तुतो भगवदेकभोग्या इति निष्कर्षः। अत एवाग्रे आहुः अतोऽस्माकं तेषु न प्रवेश इति।

१०-२८-१७ रहसि संविदमित्यस्य विवृतौ। तत्र कारणत्रयं गुणत्रयसहितमिति। भगवद्वचनं हास्यसहिताननं भगवदुरश्चेतिकारणत्रयम्। 'हृच्छयोदयं' 'प्रेमवीक्षणं' 'श्रियो धामे'ति प्रत्येकं गुणत्रयं ज्ञेयम्। कारणत्रयं विवृण्वन्ति वाक्यं हास्यमुरश्चैवेत्यादिना। भगवद्रूपस्य वा षड्गुणत्वमुच्यत इति। 'रहसि संविद'मित्यादिषड्गुणा भगवत एवोच्यन्ते। अस्मिन् पक्षे 'रहसि संविद'मित्यादिषु चतुर्षु बहुव्रीहिसमासो ज्ञेय इत्याहुः रहसि संविदो यस्मादिति एतादृशं त्वामित्यादिना। तथा च रहसि संविदं त्वां, हृच्छयोदयं त्वां, प्रहसिताननं त्वां प्रेमवीक्षणं त्वां वीक्ष्य, ते बृहदुरः श्रियो धाम च वीक्ष्येत्यन्वयो ज्ञातव्यः। प्रमाणादिबलरूपतेत्यादिना। 'रहसि संविद'मित्यनेन वाक्यमुक्तम्। भगवद्वाक्यस्य च प्रमाणरूपता स्पष्टा। 'हृच्छयोदय'मित्यनेन प्रमेयबलम्। तादृशवाक्यैः शृङ्गाररसम्बधिभिः प्रमाणेहृच्छयोदयस्यैव प्रमेयत्वात्। 'प्रहसिताननं'मित्यनेन साधनम्। तादृशहाससहितश्रीमुखस्य सर्वफलसाधकत्वात्। प्रेमवीक्षणमित्यनेन फलम्। प्रेमपूर्वकावलोकनस्य साध्यत्वात्। वक्षसि च स्वस्थित्यर्थं यश इति। स्वशब्देन वक्त्र्यो ग्राह्याः। समयविशेषे वक्षसि स्वस्थित्यर्थं बृहत्त्वेन उरसः यशो निरूपितमित्यर्थः। पूर्वस्थित्यभाव इति। प्रहसिताननदर्शनात्पूर्वं या मानादिना स्थितिस्तस्या अभावः प्रहसिताननदर्शनाद्भवतीत्यर्थः। प्रहसितयुतश्रीमुखसुषमावलोकनजन्यपरमोत्कण्ठाप्रादुर्भावान्मानः स्थापयितुं न शक्यत इति भावः। 'ततः काम' इत्यारभ्य, 'स्वयोग्यते'त्यन्तम्। हृच्छयोदयमित्यनेन कामः। अस्मिन्पक्षे प्रहसिताननमित्यस्य हृच्छयोदयमिति विशेषणम्। अत एव ततः काम इत्युक्तम्। ततः प्रहसिताननरूपविशेष्यदर्शनानन्तरं कामो भवति। प्रहसिताननस्य

ह्रच्छयोदयत्वात्। मेमवीक्षणेन च तस्य स्थिरीकरणमिति स्पष्टम्। ततः स्वयोग्यतेति। 'वृहदुरः श्रियो धामे'त्यनेन तत्र बृहदुरसि स्वस्थितियोग्यता निरूपितेत्यर्थः। ततो भोगचातुर्यं प्रथमविशेषणेनेति। 'रहसि संविद'मिति विशेषणेन एकान्ते याः रससम्बन्धिसंविदस्ताभिर्भोगचातुर्यं भवतीति भावः।

१०–२८–१८ व्रजवनौकसां व्यक्तिरित्यस्य विवरणे। एतादृशीं मनाक् त्यजेति। त्यज स्थापयेत्यर्थः। इह स्थापनस्य त्यागपदार्थत्वात्। तथा चैतादृशीमानन्दमयीं भवद्व्यक्तिं अस्मासु स्थापयेत्यर्थो भवति।

१०–२८–१९ यत्ते सुजातमित्यत्र। पुनर्यदायाति तेन सन्देह इति। कूर्पादिभिर्व्यथायाः प्रसिद्धत्वाद्व्यथत इति ज्ञानं, पुनर्वने यद् आयाति तेन न व्यथत इति ज्ञानम्। अन्यथा यदि व्यथा स्यात्, तर्हि वनागमनं न स्यात्। एवमुभयकोट्यवगाहि ज्ञानं संशय उत्पद्यत इत्यर्थः। पूर्वं तु खेदेनेत्यादि। 'शिलतृणाङ्कुरैः सीदती'त्यनेन पूर्वं भगवच्चरणारविन्दविषयकखेदज्ञानेन स्वमनःपीडा निरूपिता। "कलिलतां मनः कान्त गच्छती'तिवाक्यादित्यर्थः। इदानीं तु मूर्च्छेति। 'यत्ते सुजाते'त्यनेन तु मूर्च्छा निरूपिता। 'भ्रमति धी'रिति वाक्यात्। उभयत्र चरणखेदस्य स्वतज्जन्यस्वदुःखतौल्येप्येतावान् विशेषः। तत्र पीडोक्ता, अत्र मूर्च्छेति। अन्तःस्थितिरिति। मूर्च्छाया नवमावस्थात्वात्तदग्रिमावस्थाया अभावान्मूर्च्छैव अन्तःस्थितिपर्यवसानमित्यर्थः। इति श्रीदशमस्कन्धाष्टाविंशाध्यायसुबोधिनीयोजना सम्पूर्णा।

१०–२९–० एकोनत्रिंशाध्यायार्थोक्तौ। प्रसादं भगवत्कृतमिति। आविर्भूय करस्पर्शदानादिरूपं प्रसादमित्यर्थः। रोदनात्प्राप्येति। रोदनं कृत्वा प्राप्येति ल्यब् लोपे पञ्चमी। रोदनं निःसाधनत्वे भवतीति निःसाधनत्वेन केवलदैन्याविर्भावे भगवान् प्रसादं कृतवानिति ज्ञेयम्। निर्णयज्ञा इति। जाता इति शेषः। 'भजतोनु भजन्त्यक' इति पृष्ट्वा 'मिथो भजन्ति ये सख्य' इत्याद्युत्तरवाक्यश्रवणे निर्णयज्ञा जाता इति हार्दम्। अतो निर्णयवाक्यानीत्यादि। यतः सन्तुष्टः सर्वदुःखानि नाशयत्यतो 'मिथो भजन्ती' त्यारभ्य 'तद्वः प्रतियातु साधुने'त्यन्तानि वाक्यान्युक्तवान्। अन्यथा अस्मानेतावत्पर्यन्तं विहाय दुःखिताः कृत्वा भगवान् गत इति दुःखं व्रजवरवधूहृदयसरसीरुहान्न गच्छेदित्यर्थः।

१०–२९–२ तासामाविरभूदित्यस्याभासे। ततो भगवान् ब्रह्मा विष्णू रुद्रश्च मूर्त्वेत्यादि। एतदर्थष्टिप्पण्यां स्फुटः। स्मयमानमुखाम्बुज इत्यस्य विवरणे। स्मयमानाभ्यां वा सहितमिति। अस्मिन्पक्षे स्मयो मानश्चेति द्वन्द्वं कृत्वा मुखाम्बुज-

पदेन समासः । अर्थस्तु टिप्पण्यां स्फुटः । भक्तानां दोपो भक्तेभ्यो निर्गत इति । एतदर्थस्तु टिप्पण्यां स्फुटः । पीताम्बरधर इत्यस्य विवृतौ । हास्यसंकोचार्थं हस्ते धृत्वा तिष्ठतीति'। अयमर्थः 'पीताम्बरधर' इत्युक्त्या लब्धः । अन्यथा पीताम्बर एतावदुक्त्या चारितार्थ्ये धर इति न वदेत् । अथवेति । पूर्वस्मिन् पक्षे मायाजवनिकां दूरीकृत्य प्रकटो जात इत्युक्तम् । तत्रागमनं नास्ति, तथा 'तं विलोक्यागतम्' इत्यनेनोक्तमागमनं बाध्येत, अतः पक्षान्तरमाहुः अथवेति । व्यापिवैकुण्ठरूपेणेत्यादि । अयमाशयः । 'तं विलोक्यागत'मित्यनेनागमनमुक्तम् । तच्च गमनं विना न सम्भवत्यतो गमनं वक्तव्यम् । कुत्र गमनमित्यपेक्षायां गमनस्थलस्यानुक्तत्वाद्विशेपानुक्तौ सामान्यं ग्राह्यमितिन्यायेन सामान्यस्थलस्य ग्राह्यत्वाद्व्यापिवैकुण्ठं च भगवतो नित्यनिवासत्वेन सामान्यं स्थलमतस्तदेव ग्राह्यमित्याशयेनाहुः व्यापिवैकुण्ठरूपेणेत्यादि । मध्ये ब्रह्मादिपूजां वेति । ब्रह्मणा कृतायां पूजायां माला समर्पिता तां परिधाय समागत इति स्रग्वीत्युक्तम् । ब्रह्मा हि यत्र यत्रावतारस्तत्र तत्र दर्शनार्थं गच्छति । अतोत्राप्यवतारादर्शनार्थं गतो भगवन्तं पूजितवान् । अत्राप्यवतारोस्ति व्यापिवैकुण्ठादवतरणात् । अवतारो नाम व्यापिवैकुण्ठाद्भगवतः प्रपञ्चे समागमनमित्यवतारलक्षणात् । अतएव 'तासामाविरभूच्छौरिः' इत्यनेनाविर्भावः उक्तः । 'पीताम्बरधरः स्रग्वी'तिविशेषणद्वयस्य तात्पर्यान्तरमाहुः यद्वेति । इदानीमनाविर्भावे तु न रसो न वा कीर्तिरिति । यदि प्रभुर्नाविर्भवेत्, तदा व्रजसुन्दरीणां तिरोभावो भवेत्, तदा रसो न स्यात्, कीर्तिश्च न स्यादित्यर्थः । भगवतस्तु रसापेक्षा । अतः प्रादुर्भाव एव कृतः रसापेक्षासूचकः, आच्छादकं पीताम्बरं हि, 'गुप्तो हि रसो रसत्वमापद्यते' इति शास्त्रात् । कीर्त्यपेक्षासूचिका वनमाला । अतो रसकीर्त्योरुभयोरपेक्षितत्वात् प्रादुर्भूतः । अतः पीताम्बरधरः स्रग्वी च । भक्तानां स्वरूपतिरोधाने उक्तोभयाभाव इति । रसकीर्त्योरुभयोरभाव इत्यर्थः । साक्षान्मन्मथमन्मथ इत्यस्याभासे । ननु कन्दर्पेणेति । एतस्यार्थष्टिप्पण्यां स्फुटः ।

१०–२९–३ तं विलोक्यागतं प्रेष्ठमित्यस्य विवृतौ । जीवस्य अन्याधीनमुत्थानमिति । लीलासहिते हृदयस्थिते भगवति जीवस्य स्थितत्वाद्भगवदुन्याधीनमुत्थानमित्यर्थः । अन्तःकरणोत्थाने भगवन्निष्ठं प्रेष्ठत्वं हेतुः । अतः 'प्रेष्ठ'मिति विशेषणम् । इन्द्रियाणामुत्थाने प्रीतिर्हेतुः । अतः 'प्रीत्युत्फुल्लदृश' इत्युक्तम् । दृष्टान्तेनैव प्राणानामुत्थानमिति । तच्च 'प्राणमिवागत'मिति दृष्टान्तेन प्राणानां [illegible] उक्तम् । शरीरोत्थाने पूर्वोक्ताभिलषितपदार्थता हेतुः । अतस्तमिति [illegible] ।

१०–२९–४ काचित्कराम्बुजमित्यत्र । [illegible] ।

एतस्यार्थष्टिप्पण्यां स्फुटः । अंसे [illegible] [illegible]नां च कृत्वं

प्रदर्शितमिति। देवोत्तमानां ब्रह्मादीनां पूजारूपं यद्भगवति कृत्यं तत्तासां व्रजसुन्दरीणां प्रदर्शितम्। व्रजसुन्दरीभ्यः प्रदर्शितमित्यर्थः। पूजायां स्थापितस्य चन्दनादेर्व्रजसुन्दरीभिर्बाहुधारणे प्रत्यक्षीकरणात्। ताम्बूलयोग्यतामाह तन्वीति। कोमलांगीति। कोमलांगीत्वाच्चर्वितताम्बूलं कण्ठे प्रतिफलत्यतः परमसौन्दर्यं सूच्यते। इयमेव ताम्बूलयोग्यता नाम। तादृशभावस्य कालनियमनार्थमित्यारभ्य लौकिकी भक्तिरित्यन्तम्। एतस्यार्थष्टिप्पण्यां स्फुटः।

१०–२९–७ अपरानिमिपदृग्भ्यामित्यत्र। प्रीतिसेवनमत्राभिप्रेतमिति। जुपाणा तन्मुखाम्बुजमित्यत्र जुषी प्रीतिसेवनयोरिति जुषधातुना यद्यपि कुत्रचित्प्रीतिरुच्यते, कुत्रचित्सेवोच्यते, तथाप्यत्र प्रीत्यर्थकधात्वन्तरं सेवनार्थकधात्वन्तरं विहाय जुषधातोः प्रयोगः कृतोऽतो ज्ञायते प्रीतिसेवनमत्राभिप्रेतमिति। मुखाम्बुजस्य प्रीतिसेवनं नाम तन्निष्ठलावण्यामृतपानम्। अत एवापीतमतः स्वाधीनं जातमिति। आपीतमित्याङः प्रयोगात् आसमन्ताद्धर्मसहितं पीतमतः स्वाधीनं जातमित्यर्थः। तस्य स्वाधीनत्वस्य स्वरूपमाहुः यद्देवेच्छतीत्यादिना।

१०–२९–८ तं काचिदित्यत्र। एतदर्थष्टिप्पण्यां स्फुटः। स्वकीयो वा भाग इति। एतदर्थष्टिप्पण्यां स्फुटः। केवलानन्देन पुलके गोपीत्वं नेति। योगिनो हि अन्तर्भगवदाविर्भावे आनन्देन पुलकिताङ्गा भवन्ति, तद्वद्ध्येयम्, किन्तु उपगूहनं कृतवतीति कामभावोऽस्या मुख्य इति गोपीत्वमेव प्रधानम्, न तु योगरीतिरितिहार्दम्।

१०–२९–९ सर्वास्ताः केशवालोकेत्यत्र। केशवपदतात्पर्यमाहुः बलिष्ठरजस्तमोभ्यामित्यादिना। बलिष्ठरजस्तमोभ्यां व्याप्तयोर्ब्रह्मशिवयोरित्यर्थः। फलसम्पादको मोक्षसम्पादक इत्यर्थः। कश्च ईशश्च केशौ केशयोर्व मोक्षात्मकं सुखं यस्मादिति केशवपदव्युत्पत्तेः। तस्य क्षुद्रगुणक्षोभयुक्तानामिति। एतदर्थष्टिप्पण्यां स्फुटः।

१०–२९–१२ शरच्चन्द्रांशुसन्दोहेत्यस्य विवृतौ। परितश्च निकृष्टाः पदार्था नोपर्यधश्चेति। परितः उपरि अधश्च निकृष्टाः पदार्था नेत्यन्वयः। सर्वत्रैवोत्कृष्टाः पदार्थाः सन्तीति भावः।

१०–२९–१३ तद्दर्शनाह्लादविधुतहृद्रुज इत्यस्य विवृतौ। तत्प्रतिपादिकाः श्रुतयो जाता इति। सर्वे च मन्यन्त इति। वेदैर्ब्रह्म प्रतिपाद्यते इति लोका मन्यन्ते इत्यर्थः। लोका वेदानां ब्रह्मप्रतिपादकत्वं मन्यन्ते तत्र किं मानमित्याकांक्षाया श्रुतिभगवद्गीतावाक्यश्रुतीरुपन्यस्यन्ति। 'तं त्वौपनिषदं पुरुषं पृच्छामि'। 'अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः' 'सर्वे वेदाः यत्पदमामनन्ति'। 'तं त्वौप-

निषद्' मित्यत्र प्रश्नकर्त्र्या औपनिषदत्वं ब्रह्मण उच्यते। अत उपदेशात्पूर्वमेव भट्टुरं-तावज्ज्ञानमस्ति यत् उपनिषत्प्रतिपाद्यं ब्रह्मेति। अतो वेदप्रतिपाद्यत्वं ब्रह्मणो लोका मन्यन्ते इति यदुक्तं तत्सत्यमेव। भगवतापि गीतासु 'वेदे च प्रथितः पुरुषोत्तम' इत्यनेन वेदप्रतिपाद्यत्वमुक्तम्। सर्वे वेदाः पदरूपं पद्यते प्राप्यत इति पदं प्राप्यं यद्ब्रह्म आमनन्ति अभ्यस्यन्तीत्यर्थात् वेदप्रतिपाद्यत्वमुक्तम्। अतो वेदैर्ब्रह्म प्रतिपादितमिति मनोरथान्तप्राप्तिः श्रुतीनाम्। सा च भगवदनुग्रहेणैव। अन्यथा 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे'ति श्रुतेर्मनोवागप्राप्यस्य प्रतिपादनं कथं स्यात्। अतो मनोरथस्यापि यत्र गतिर्नास्ति तादृशं ब्रह्म श्रुतयो निरूपयन्ति। तद्भगवतोऽनुग्रहविशेप-साध्यम्। तथा व्रजसुन्दरीणां मनोरथान्तप्राप्तिः। अत्र भौतिक्य शब्दात्मिकाः श्रुतयो दृष्टान्तरूपाः, आधिदैविक्यो व्रजसुन्दरीसंज्ञकाः श्रुतयो दार्ष्टान्तिकाः। अतो दृष्टान्त-दार्ष्टान्तिकभावः श्रुत्योरेव। व्रजवरवधूटीनामपि श्रुतिरूपत्वात्। 'न स्त्रियो व्रजसुन्दर्यः पुत्र ताः श्रुतयः किले'ति भृगुं प्रति बृहद्वामनपुराणे ब्रह्मवाक्यात्। 'गोप्यो गावस्तृण-रसस्ये'ति कृष्णोपनिषद्भिर्गोपिकानां श्रुतिरूपताकथनात्। अलौकिका वेदशब्दा इति। वेदे येऽग्निवाय्विन्द्रादिशब्दा दध्यादिशब्दास्ते सर्वे न लौकिकाः। अत एव 'वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः, तावन्ति हरिनामानि कीर्तितानि न संशयः' इत्यनेन वेदाक्षराणां हरिनामत्वमुक्तम्। यत्र हरिनामत्वेनाक्षराणामलौकि-कत्वम्, तत्र तादृशाक्षरसमुद्भूतशब्दानामलौकिकत्वं किं वाच्यमित्यर्थः। 'निःश्वसितमस्य वेदा' इति श्रुतेर्वेदस्य भगवन्निःश्वासरूपत्वमुक्तम्। वेदाश्च 'इषे त्वोर्जे त्वा वायव स्थो-पायव' इत्यादिशब्दरूपाः। अतः शब्दानामलौकिकत्वैव, 'वेदो नारायणः साक्षा'दिति वाक्याच्च'। लोके च न संकेत इति। एतेषां शब्दानामलौकिकत्वादेषां लोके संकेतो नास्ति। लौकिकशब्दसादृश्यं दृष्ट्वा लौकिकसंकेतबलेनार्थकल्पनायां तु वेदार्थो यः कल्प्यते, न स वेदार्थः। अतो वेदानां संकेताभावादर्थज्ञानं दुर्लभमिति कृष्णानुग्रहैक-लभ्यो वेदार्थ इति भावः। तथापि निरन्तरमित्यारभ्य, मन्यन्त इत्यन्तम्। वेदाः भगवद्यशो गायन्ति, अतो वेदश्रवणेन शुद्धान्तःकरणाः पुरुषाः वेदस्य स्वयमेवालौकिक-विषये भगवत्स्वरूपविषये प्रतिपादनं मन्यन्त इत्यर्थः। श्रुतिश्च तत्प्रतिपादिकेत्यारभ्य, युक्ति वेत्यन्तस्यार्थष्टिप्पण्यां स्फुटः।

स्वैरुत्तरीयैरित्यस्याभासे। आधारधर्मसम्बन्धात् रसस्य कृतार्थता न भविष्यतीनीति। यदि भगवते आसनार्थं स्वकीयवस्त्राणि न ददुः, तदा भगवान् सम्बन्धातिरिक्तवस्तुन्युपविशेत्, तदा तावन्मात्रो कृतार्थत्वाभावो भवेत्। पुष्टिमार्गे हि

कृतात्मनिवेदनानां यस्मिन्क्षणे येन वस्तुना येनेन्द्रियेण वा भगवत्सेवोपयोगो न स्यात्, तस्मिन्नेव क्षणे तस्य वस्तुनस्तदिन्द्रियस्य कृतार्थता नास्तीति सिद्धान्तो निरुद्धानाम्। तथा च निरुद्धानां भक्तानां सर्वत्र सर्वेषु पदार्थेषु भगवत्सम्बन्धोऽभिलषितः, तत्सत्त्वे कृतार्थत्वम्, तदसत्त्वे ह्यकृतार्थत्वम्, अत आधारसम्बन्धाभावेप्यकृतार्थता स्यात्, अतः आसनं ददुरित्यर्थः।

१०–२९–१६ भजतोनुभजन्त्येक इत्यस्य विवरणे। त्रयः पक्षाः सन्दिग्धाः फलतः स्वरूपतः भजनाभजनाभ्यामिति। तत्र भजनकर्तॄन् भजन्तीत्येकः पक्षः। तदाहुः तत्रैके ये यथा भजन्ति ते तथा तानपि भजन्तीति। द्वितीयं पक्षमाहुः एके पुनरभजतोपि भजन्तीति। 'एक एतद्विपर्यय'मिति मूले पठितस्यार्थ उक्तः। एवं भजने प्रकारद्वयम्। तृतीयमभजनपक्षमाहुः अन्ये तूभयानपि न भजन्तीति। उभयानपीति। भजतः अभजतश्चेत्यर्थः। एवं भजनाभजनाभ्यां त्रयः पक्षाः भवन्ति। उभयोरपि प्रतियोगिनोरिति। 'एक एतद्विपर्यय' मित्यनेनोक्तस्य अभजद्भजनकर्तुः अभजनकर्ता प्रतियोगी एकः। 'नोभयांश्च भजन्त्यन्ये' इत्यनेनोक्तस्य भजदभजनकर्तुः भजनकर्ता प्रतियोगी द्वितीयः। तस्य भजनस्यावश्यं फलं वाच्यम्। ये भजनानुसारेण भजन्ति ते किं कृतघ्ना इति। भजनरूपोपकारममत्वा भजनस्य फलं दातुमवाञ्छन्तो भजनमेव कुर्वन्ति, नतु प्रत्युपकारम्, अतः कृतघ्नत्वं सम्भाव्यते। प्रत्युपकारसामर्थ्यस्य विद्यमानत्वात्। आहोस्विद्धूर्ता इति। अयं अस्मान् भजति धनाप्तये, एतस्मै धनं तु न देयम्, एतस्यापि भजनमस्माभिः कर्तव्यमिति बुद्ध्या भजन्ते, तत्र धूर्तत्वं सम्भवति। धनार्थिने तदर्थमेव भजनं कुर्वते धने विद्यमानेपि धनादानात्। द्वितीयपक्षे अभजद्भजनरूपे कश्चिद्दोषमाहुः अभजतो भजन इत्यादिना।

१०–२९–१७ मिथो भजन्तीत्यस्य विवरणे। स्वार्थ एव एकान्तः एकं फलमुद्यमो यस्येति। स्वार्थ एकान्तो यस्येति बहुव्रीहिं कृत्वा स्वार्थैकान्त उद्यमो यस्येति पुनर्बहुव्रीहिः। तथा च स्वार्थ एव एकान्तः फलं यस्य तादृश उद्यमो यस्येति फलितम्। शास्त्रानुसारी चेदिति। मिथः स्वस्मै भोजनं दत्तवते ब्राह्मणाय भोजनं ददाति। परन्तु ब्राह्मणसेवा भोजनादिरूपातिशयपुण्यजनिका इति ज्ञात्वा ब्राह्मणभोजनादि कारयति, स धर्मभाग्भवत्येव, धर्मबुद्ध्या क्रियमाणत्वात्। तत्र न मिथो भजनमित्यर्थः। तथा च न स्वार्थैकान्तोद्यमत्वं तत्रेति ज्ञेयम्। ननु शिष्यः सेवते, तादृशाय गुरुर्विद्यां ददाति। तत्र पुण्यं गुरोर्भवतीति श्रूयते, पूर्वोक्तविचारे तु सेवाकृतावेव पाठयतीति मिथो भजनमापतत्यतः स्वार्थपरतैव भवतीत्याशंक्याहुः विद्या तु फलरूपेति। विद्या-

स्वफलाप्त्यर्थं सेवाकरणे विद्या तु देयैव, यो यदर्थं यतते, तस्मै तद्दाने धर्मो भवत्येव, न तत्र मिथो भजनमितिभावः । तथा सौहार्दमपि यद्यन्यमपेक्षेतेति । भोजनवसनादिदानेन सौहार्दमिव कुर्वन्नपि यद्ययं ममेष्टं साधयतीत्यपेक्षया कर्ता न सौहार्दवान् भवतीत्यर्थः ।

१०–२९–१८ भजन्त्यभजतो ये वा इत्यस्य विवृतौ । धर्मश्चेपक्षेदित्यस्य तदीय एव धर्म इत्यस्यार्थष्टिप्पण्यां स्फुटः । तत्र धर्मे यत्र कर्म प्रधानं, यत्र वा देवतेत्यादेरर्थष्टिप्पण्यां स्फुटः ।

१०–२९–१९ भजतोपि न वै केचिदित्यस्य विवृतौ । ये दयाधर्माधिकारिणस्ते अधमा इति । अस्यार्थष्टिप्पण्यां स्फुटः । आत्मारामा ह्याप्तकामा इत्यस्य विवरणे । एकत्राप्रवृत्तिरिति । भुक्तवन्तं प्रति भुंक्ष्वेति कथने अस्य भुक्तवतः भोजने प्रवृत्तिर्न स्यादित्यर्थः । सिद्धसाधनत्वेनानुवाद इति । भुक्तवन्तं प्रति भुंक्ष्वेत्युक्ते अनुवाद एव । तस्य कृतभोजनस्य भोजनेच्छाभावाद्भोजनं न करिष्यत्येव, अतो भोजनाभावकथनमनुवाद एवेत्यर्थः । उभयथापि वैयर्थ्यमिति । भुक्तवन्तं प्रति भुंक्ष्वेत्युक्तावपि भोजनाभावदर्शनाद्वैयर्थ्यम्, अर्थो भोजनं भोजनप्रेरयितुः अपेक्षितत्वात् । भुक्तवन्तं प्रति मा भुंक्ष्वेत्युक्तौ अनुवाद एव । तादृशस्य भोजनस्याभावाद्वैयर्थ्यमित्यर्थः । तस्य भुक्तवत्त्वाद्भोजनेच्छाया अभावादेव भोजनाभावे सिद्धे मा भुंक्ष्वेति कथनस्य वैयर्थ्यम् । एवमुभयथापि वैयर्थ्यमिति हार्दम् । तस्याप्तकामत्वात् । आप्तकामे भुंक्ष्वेति कथनं न फलसाधकम्, यतस्तस्य तृप्तत्वान्न भुंक्ते, मा भुंक्ष्वेति कथनमपि फलसाधकं न, तृप्तत्वादेव भोजनाभावस्य सिद्धत्वाद्भोजनाभावविधानमकिञ्चित्करमेवेत्युभयथा वैयर्थ्यम् । प्रवर्तमानस्य धर्म इति । यः भुंक्ष्वेति भोजनार्थं प्रेरयति कारुण्याद्यधीनस्तस्य धर्मः सेत्स्यति, परोपकारार्थं प्रवृत्तत्वात् । अज्ञानं चेति । अयं तु कृतभोजन एवं भोजनार्थं कथं प्रेरयामीत्याद्याकारकज्ञानाभाव इत्यर्थः । ननु द्वितीयपक्षे इति । 'भजतोनुभजन्त्येक एतद्विपर्यय'मिति प्रश्ने द्वितीयो यः अभजद्भजनकर्ता तत्कर्तृकभजनपक्ष इत्यर्थः । गोपिकानां भजन इति । गोपिकाकर्तृकभगवद्भजन इत्यर्थः । स्नेहाद्भजनमस्तु इति । गोपिकाकर्तृकं भजनं स्नेहभजनमस्त्वित्यर्थः । गोपिका भोग्या इत्यारभ्य उपक्षीणा इत्यन्तम् । गोपिकाभिर्भजनं यत्कृतं तद्गोपिकानां भोग्यत्वाद्भोग्यसमर्पकत्वे उपक्षीणम् । भोग्यत्वसिद्धये देहादीनां भगवदुपयोगः कृतः, कृतात्मनिवेदित्वात् । एतावतैवोपक्षीणाः । प्रतिभजनावश्यकत्वानर्हा इत्यर्थः । ईश्वरोपीत्यारभ्य न विचार्य इत्यन्तम् । फलार्थं सेव्यमानादीश्वरात् फलं प्राप्तव्यम्, नतु तत्कर्तृकभजनापेक्षेति भजनाभजनयोस्तदीययोर्न विचारः कर्तव्य इत्यर्थः । व्यवहारे दृष्टार्थश्चे-

दित्यारभ्य विचार्य एवेत्यन्तम् । भजनकर्ता दृष्टमेव पश्वादिरूपं फलं अर्थो यस्य एतादृशश्चेत्तदा दृष्टं फलं चेन्न प्राप्तं तदा भजनविषय ईश्वरः विचार्यः, किमस्माभिः कृतायां पूजायां अर्पितान् गन्धाद्युपचारानीश्वरो गृहीतवान्नवेति, यदि गन्धाद्युपचारा गृहीताः स्युस्तदास्मन्मनोभिलषितं स्यात् । तस्मान्न गृहीतवानित्येका कोटिः । शास्त्रोक्तयथावदुक्तमर्यादया कृतत्वाद्गृहीतवानेवेति द्वितीया कोटिः । एवं कोटिद्वयोपस्थितौ निर्णयसिद्ध्यर्थमीश्वरो विचार्य एव । ननु भगवानात्मारामः, तस्य प्रयोजनाभावाद्भवतीनां भजने प्रतिभजनं न कुर्यादेवेति किमर्थमत्र भजनाभजनविचार इत्याशङ्क्याहुः पूर्वं गृहीतत्वान्नात्मारामता, नापि पूर्णकामतेति । अस्मत्समर्पितस्य देहादेः पूर्वं गृहीतत्वात् अङ्गीकृतत्वान्नात्मारामता, किन्तु व्रजसुन्दरीगणविहारैकतानतेत्यर्थः । अत एव पूर्णकामतापि नास्तीतिभावः । ननु मास्त्वात्मारामता, पूर्णकामता वा, तथापि पूर्वरमणस्य कृतत्वात्तृप्तो भगवान्न रमते, किमत्र दूषणमित्याशङ्क्याहुः प्रथमप्रवृत्त्या तृप्तावपि परित्यागोऽनुचित इति । पूर्वकृतेन रमणेन तृप्तिरास्तां नाम, परन्त्वस्माकं परित्यागस्त्वनुचित एवेतिभावः ।

१०-२९-२० नाहं तु सख्य इत्यस्य विवृतौ । ननु ईश्वरोपि प्रतिभजनं फलदानादिना करोत्येवेति वयमपि प्रतिभजनं प्रतीक्षामह इत्याशङ्क्याहुः नापीश्वरभजनपक्ष इत्यादि । तत्र हेतुः । सख्य इति । यतो भवतीभिः फलमुद्दिश्य भजनं न कृतम्, किन्तु शुद्धपुष्टिरीत्या कृतम्, अतः फलदानादि मयापि न कृतम् । अपि च, भगवतीनां मयीश्वरबुद्ध्यभावात्सख्यमात्रेण रमणं कृतमिति न तत्र प्रतिभजनापेक्षेति भावः । नत्वात्मारामः, ममात्मव्यतिरिक्तपदार्थाभावान्न व्यावर्त्यमस्तीति । आत्मारामपदे आत्मशब्देनात्मन्येव रमते, नान्यत्रेत्युच्यते, तथा चात्मशब्दस्यान्यव्यावर्तकत्वमस्ति, अतः आत्मारामत्वं भगवति नास्ति । 'आत्मैवेदं सर्वं, स सर्वं भवती'त्यादिश्रुतेर्भगवतः सर्वरूपत्वेनात्मव्यतिरिक्तपदार्थाभावात् । आत्मन्येव रमते, नान्यत्रेति व्युत्पत्तेः । असम्भवादित्यर्थः । चतुर्धा हि भगवदुपयोग इति । भोग्यत्वे द्वेधा, भोक्तृत्वेन च द्वेधेत्येवं चतुर्धेत्यर्थः । तत्र भोग्यत्वे प्रकारद्वयम् । कामनापूरकत्वेन स्वातन्त्र्येण चेति । भोक्तृत्वे प्रकारद्वयम् । भक्त्या भक्तदत्तपदार्थस्वीकारेण विषयत्वेन भोगेन चेति । एवं चतुर्धा । आद्ये भजनं नश्यतेति । कामनापूरकत्वेन भोग्यत्वपक्षे इत्यर्थः । कामनापूरकत्वेन यदि भगवान् भोग्यः स्यात्तदातीवकामनायाः अल्पत्वात्तावत्कामनापूर्तौ अग्रे प्रयोजनाभावाद्भजनं न स्यादित्यर्थः । अतो भजनं नश्यतेत्यर्थः । तत्र हेतुमाहुः अल्पफलदानादिति । अल्पफलं प्राप्य कामनाया निवृत्तौ भजनानुवृत्तिर्न स्यादि-

त्वर्थः । ननु भगवतस्त्वगणितानन्दत्वात्कामनापूर्त्यर्थमपि भगवत्सम्बन्धे पूर्णानन्दानुभव
एव भविष्यतीति किं बाधकं कामनापूरकत्वेन भोग्यत्व इत्याशङ्क्याहुः **स्वरूपतो मह-
त्त्वेपि कालपरिच्छेदात्** । भगवतः स्वरूपतो महत्त्वं पूर्णानन्दत्वं यद्यप्यस्ति, तथापि
कालपरिच्छेदात् । कालेन कामनाविषयस्य रमणस्य परिच्छेदात्तावता रमणेन मनोरथ-
पूर्तौ अग्रे भजनानुवृत्तिर्न स्यादित्यर्थः । **द्वितीये त्विति** । द्वितीये पक्षे स्वतन्त्रत्वेन
भोग्यत्वपक्षे इत्यर्थः । **अतिभजनेन भवतीति** । अहर्निशं विप्रयोगसंयोगभेदेन
चेदतिभजनं कुर्युः, तदा स्वतन्त्रत्वेन फलरूपतया भोग्यत्वं भगवतो भवतीत्यर्थः ।
अतो विप्रयोगदानार्थं भगवता तिरोहितमिति भगवतः सरणिरन्यैव, नतु आत्मारा-
मादिषु चतुर्ष्वन्तर्भाव इति भावः । अतः परं विषयन्यायेन भोक्तृत्वेन उपयोगं दूषयन्ति
अपेक्षाभावादित्यादिना । **भक्त्यर्थं त्विति** । भक्त्या दत्तस्य पदार्थस्य भोक्ता भव-
तीति पक्षे तु भक्त्यर्थं निरन्तरभक्तिसिद्ध्यर्थमभजनं भगवता कृतमतो यदा निरन्तरं भक्ति-
र्भविष्यति, तदा भोक्ता भगवान् भविष्यतीतिभावः । **आद्ये त्यागोऽनिष्टहेतुरिति** ।
वृथा त्यागो विध्यभावात्त्याज्यानां दुःखसम्पादकत्वाच्चानिष्टहेतुरित्यर्थः । **द्वितीयेन
मम भार इति** । द्वितीयेन मदर्थत्यागेनेत्यर्थः । मदर्थत्यागेन हेतुना ममोपरि भवतीनां
भारः मयि ऋणित्वमित्यर्थः । तथा च ऋणित्वपरिहारार्थं परोक्षभजनं कुर्वता मया
तिरोहितमित्यर्थः । वस्तुतस्तु भवतीनामृणी भवाम्येवेत्यग्रिमश्लोके वक्ष्यते ।

१०-२९-२२ , न पारयेहमित्यस्याभासे । **भक्तिमार्गविरोधमिति** ।
एतदर्थष्टिप्पण्यां स्फुटः । **इति श्रीमद्गोवर्धनधरश्रीवल्लभाचार्यवरश्रीविट्ठलेश्वर-
चरणानुचरसेवकेन लालूभट्टोपनामदीक्षितबालकृष्णेन कृतायां दशमस्कन्धे-
कोनत्रिंशाध्यायसुबोधिनीयोजना सम्पूर्णा ॥**

१०-३०-० त्रिंशत्तमाध्यायविवरणारम्भे । **रसात्मकस्तु यः कामः
सोत्यन्तं गूढ एव हीति** । त्रिषु लोकेषु रसात्मकः कामो गूढ एव । देवादयोपि कामेन
रसमुपपाद्यानुभवन्ति, न तु तेषां रसात्मकः कामः । तत्रापि रसलेश एवानुभूयते, न तु
रसः । रसशब्देनानन्दो बोध्यः । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीव-
न्ती'ति श्रुतेः । अतो भगवता कीदृशो रसोनुभूयते इति जिज्ञासायां तादृग्रसस्य सर्व-
त्रैवाभावान्निरुपमत्वेन बोधयितुं न शक्यते, अतो भगवता भुज्यमानस्य रसस्यात्यन्तं
गूढत्वम् । 'रसो वै स' इति श्रुतेः स्वरूपाभिन्नानन्दरूपत्वात् । तद्रसस्य गूढस्य बोध-
नार्थं वात्स्यायनभरतयोः प्रवृत्तिरित्याहुः **अतः शास्त्रं प्रवृत्तं हि तृतीयं भारतं
तथेति** । तृतीयं कामशास्त्रं वात्स्यायनवर्णनम् । भारतं भरतकृतसूत्राणि । तस्यालौकि-

कस्यानन्दरूपस्य सर्वाङ्गेषु स्थितस्य गुप्तत्वात्तत्प्रकटनार्थं भगवान् नृत्यं करोति कारयति चेत्याहुः अतोत्र भगवांश्चक्रे नृत्यमित्यारभ्य व्रजेदित्यन्तम् । 'जलं वायुश्च साप-ग्नी'त्यादेः 'अत्रैव लोके प्रकट'मित्यादेरर्थष्टिप्पण्यां स्फुटः । प्रमाणेन प्रमेयेन दुःखं दूरीकृतवानिति । प्रमाणेनेति । 'नाहं तु सख्य' इत्यारभ्य 'तद्वः प्रतियातु साधुने'त्यन्तेन भगवद्वाक्येनेत्यर्थः । प्रमेयेन स्वरूपेणाविर्भूतेनेत्यर्थः ।

१०-३०-१ इत्थं भगवत इत्यत्र । भ्रमादेवास्माकं विरहो जात इतीति । ननु विरहस्य शृङ्गाररसद्वितीयदलात्मकस्य भगवद्रूपत्वाद्भ्रमजन्यत्वं कथं सम्भवतीति चेत् । सत्यम् । यस्य विरहस्य भगवदात्मकत्वं स भिन्न एव, न तस्य निवृत्तिः । स रसरूपः । यत्र तु भगवान् अस्मान् विहाय गतः । अतो नास्माकं भग-वत्सम्बन्ध इति बुद्धिः, नत्वन्तर्भगवत्स्फूर्तिः, भगवद्रमणं वा, लीलास्फूर्तिर्वा सम्भवति, किन्तु यत्कृतत्वबुद्धया प्रकटीभूतेपि भगवति सम्यक्त्वेन न सुखानुभवः, सोज्ञानजन्मा विरहः, स भगवद्वचोभिर्नाश्यते । एतासां तु विरहद्वयमप्यस्ति । तत्र भगवदात्मकस्य विरहस्य त्वाविर्भूते भगवति तिरोभावः । द्वितीयस्य तु भगवद्वाक्यैर्निवृत्तिरिति बोध्यम् । अतएव द्वितीयविरहस्याज्ञानजन्यत्वेन वास्तवत्वाभावात् 'भवतीनां वियोगो मे न हि सर्वात्मना क्वचि'दित्यनेन तदभावो भगवता बोधितः । मनस्वि विचिकित्सायामेवेति । अस्यार्थष्टिप्पण्यां स्फुटः ।

१०-३०-२ तत्रारभतेत्यस्य विवृतौ । अतोऽसाधारणो भोगश्च तस्यावश्यक इति चेति । एतासामङ्गीकारस्य कृतत्वात्फलदानार्थं रासक्रीडा कर्तव्या । गोविन्दपदेनेन्द्रत्वनिरूपणात् 'इदि परमैश्वर्ये' इति धातुना परमैश्वर्यकथनादसाधारणो भोग आवश्यक इत्यर्थः । गोविन्द इति चाभ्यधादित्यत्र चकारेण गोपेन्द्रो व्रजेन्द्रो गोकुलेन्द्र इत्यादिनामानि प्रकटीभूतान्यतो गोकुलेन्द्रत्वात्तत्सम्बन्ध्यसाधारणो भोगो भगवता कर्तव्य इति भावः । बहुनर्तकीयुक्तो नृत्यविशेषो रास इति । रूढिसिद्धमिदं लक्षणम् । 'रसानां समूहो रास' इति यौगिकी व्युत्पत्तिः । क्रीडायां मनसो रस-स्योद्गमः, नृत्ये देहस्येति । मानसिकस्यानन्दस्य क्रीडायामाविर्भावः । नृत्ये दैहिका-नन्दस्याविर्भावः । नृत्यं तु रासपदवाच्यमतो रासे दैहिकानन्दस्याविर्भाव इति क्रीडाया रासस्य च भेदो ज्ञेयः । अतएव रासे क्रीडा इति पूर्वं रासक्रीडयोर्भेदेन व्याख्यानम् । यद्यपि रसशब्दवाच्यस्यानन्दस्याविर्भावो मनस्येव, तथापि भगवत्परिकरस्यालौ-किकत्वेन सच्चिदानन्दरूपतया सर्वत्रानन्दस्य विद्यमानत्वाद्देहेप्यानन्दाविर्भावो युक्त एवेति बोध्यम् । अनुव्रतैरित्यस्य विवृतौ । अनुव्रतपदतात्पर्यमाहुः तासामपि

रसोत्पादनमावश्यकमितीति । यथा भगवतो रमणोत्कण्ठया रसोत्पादनमावश्यकम्, तया तासामपि रसोत्पादनं आवश्यकम्, रिरंसाधिक्यादतोऽनुव्रतात्वमित्यर्थः । अथवा तासां अनुव्रतानामुपरि परमानुग्रहाद्रसोत्पादनं भगवता कर्तव्यमेवेतिभावः । अनुव्रत-पदस्यार्थान्तरमाहुः **यादृशो भगवतोभिप्रेतस्तादृश एवेति चेति** । ताभिरभिव्यक्तीक्रियत इति शेषः । तासामनुव्रतात्वेन भगवदभिप्रायानुकूल एव रसोभिव्यक्तीक्रियत इति भावः । स्त्रीरत्नैरित्यत्र । स्वासाधारणधर्मैरित्यादि । असाधारणधर्मैरित्यादि । असाधारणधर्मैः कृशाङ्गीत्वमृगनयनीत्वचन्द्रमुखीत्वादिरूपैः स्त्रीरत्नत्वप्रकाशका इत्यर्थः ।

१०-३०-३ **गोपीमण्डलमण्डित इत्यत्र** । उत्तरोत्तरमण्डलैः पूर्वपूर्वरसः पोष्यत इतीति । एतदर्थष्टिप्पण्यां स्फुटः । **तासां मध्ये द्वयोर्द्वयोरित्यस्य विवृतौ । तासां द्वयं द्वयं भिन्नतया भावनीयमिति** । गोपिकाद्वयं भावयित्वा श्रीकृष्णभावना कार्या, ततः पुनः गोपिकाद्वयं भावनीयम्, पुनः श्रीकृष्णो भावनीयः। एवं सति सर्वासां एकस्मिन् पार्श्वे भगवान्, तेन सह क्रीडा, भगवतस्तु वामपार्श्वे व्रजसुन्दरी, तया सह क्रीडा, दक्षिणपार्श्वे चैका, तया सह क्रीडा इत्येकस्य भगवत्स्वरूपस्योभाभ्यां गोपिकाभ्यां क्रीडेति बोध्यम् । **द्वित्वद्वयस्य नैकाधिकरणता भाव्येति** । गोपिकाद्वित्वद्वयस्य एकाधिकरणता न भाव्या । गोपिकाचतुष्टयमेकभगवत्स्वरूपमवलम्ब्य तिष्ठतीति न भावनीयम्, किन्तु गोपिकाद्वयमेकं भगवन्तमवलम्ब्य तिष्ठतीति भावनीयम् । तत्राप्येकस्या वामभागे भगवान्, अन्यस्या दक्षिणभागे हरिरिति ज्ञेयम् । इह द्वित्वद्वयं भिन्नभिन्नतया भावनीयमिति श्रीमदाचार्यैर्भावनायां कृत्यप्रत्ययस्योक्तत्वादवश्यं जपादिसमये सर्वदैवैतादृशं रूपं स्मर्तव्यम् । एवं **षोडशगोपिकानामष्टकृष्णा भवन्तीति** । षोडश गोपिकानामेकं मण्डलम् । एवं नानामण्डलानि । तत्र षोडशगोपिका भगवतः कलारूपाः, ताभिः कलारूपाभिः सहितः श्रीवृन्दावनचन्द्रो भगवान् बोधितः । अत एव षोडशैव गोपिकाः गणिताः । तावतीनामेव मण्डलं निरूपितम् । अनेन प्रमाणप्रकरणे एकादशाध्याये वृन्दावनगमनप्रसङ्गे 'गोपवृद्धा महोत्पातानतुभूय बृहद्वने' इत्यारभ्य 'राममाधवयोर्नृपे'त्यन्तैः षोडशभिः श्लोकैः षोडशसंख्यातात्पर्येण सूचितं श्रीकृष्णस्य चन्द्रत्वं फलप्रकरणे स्फुटीकृतं षोडशगोपिकामण्डलकथनेन । **अन्यथा रसाभासः स्यादिति** । यदि एकामेकां गोपिकां प्रति एकं एकं कृष्णस्वरूपं स्यात्, तदा मण्डलमध्ये एकस्या एकस्या गोपिकायाः पार्श्वद्वये भगवान् स्यात् । तदा भगवत्स्वरूपद्वयेन एकैकस्याः सम्बन्धे रसाभासः स्यादित्यर्थः । तदेवाहुः **कृष्णद्वैविध्यप्रतीतेरिति** । **मध्ये मणीनां**

हैमानामित्यत्र त्विति । 'हैमानां मणीनां मध्ये महामारकतो यथे'त्युक्ते एको भगवान् बह्वीषु नृत्यतीति प्रतीयते, तच्च पूर्वोक्तविरुद्धम्, पूर्वं तासां मध्ये द्वयोर्द्वयोः प्रविष्टेनेत्युक्तत्वादित्याशङ्क्य समाधत्ते । 'मध्ये मणीनां हैमाना'मित्यत्र तु दर्शनार्थमुक्तत्वाद्गोपिकानां देवानां च दर्शनं तथैवेत्यनेन । पूर्वं यथा भगवान् मण्डलमध्ये रूपाणि कृत्वा प्रविष्टः, तथा वर्णितं भगवतो बहुरूपत्वं शुकेन । 'मध्ये मणीना'मित्यत्र तु यथा देवानां दर्शनं जातं बह्वीषु गोपिकास्वेको भगवानिति तथैव शुकेन वर्णितमित्यविरोधः । गोपिकानां देवानां चेति सुबोधिनीफक्किकायां गोपिकानां दर्शनं गोपिकाकर्तृकं दर्शनमित्यर्थो बोध्यः । देवानां चेति तु देवकर्तृकं दर्शनमित्यर्थो बोध्यः । तथा च देवानां भगवद्दर्शने एको भगवान् नृत्यति मध्ये इति दर्शनम्, गोपिकानां तु बह्वीनां तु दर्शनं मारकतमणेः परितो योजितानां हैममणीनामिवेत्यर्थो भवति । एवं सति गोपिकानां परितः स्थितानामेव देवैर्दर्शनं कृतम्, न तु गोपिकासम्बन्धिनी काचिदन्तरङ्गा लीला दृष्टेति फलितम् ।

१०–३०–५ जगुर्गन्धर्वपतय इत्यत्र । अन्यथा भगवद्धस्तेत्यादि । अस्यार्थष्टिप्पण्यां स्फुटः । सस्त्रीकास्तद्यशोमलमित्यस्य विवरणे । वैषयिकदोषव्यावृत्त्यर्थमाहेति । देवानां भगवल्लीलादर्शने भगवत्परिकरविषयकदोषोत्पत्त्यभावेपि स्वभोग्यस्त्रीषु कामोद्बोधः स्यात्तन्निवृत्तये यशो जगुः । तद्यशःस्वरूपमाहुः अमलं तद्यश इति । न मलं यस्मादिति पञ्चम्यन्ते अन्यपदार्थे बहुव्रीहिणा मलनिवर्तकं यश इत्यर्थः सिध्यति । तदाहुः तद्धि मलनिवर्तकमिति । अतो न तासां तेषां वेत्यादि । तासां देवस्त्रीणामित्यर्थः । तत्कालोपयोगिपदार्थादतिरिक्त इति । स्वस्वपुरुषविषयकः कामभाव इत्यर्थः । तेषां वेति । तेषां देवानां भगवत्परिकरविषयकः स्वस्वस्त्रीविषयकश्च कामभावो नोत्पद्यत इति भावः ।

१०–३०–७ तत्रातिशुशुभे इत्यस्य विवरणे । तदुक्तं शक्तिभिः सहितोधिकां शोभां प्राप्नोतीति । 'व्यरोचिताधिकं तात पुरुषः शक्तिभिर्यथे'त्यत्रोक्तमित्यर्थः ।

१०–३०–८ पादन्यासैरित्यस्य विवृतौ । एकेनावयवेनेत्यादि । चारीकरणरूपपादन्यासादिसमये सङ्गीतशास्त्रोक्तप्रकारेण यादृशी भुजविधुतिरपेक्षिता, तादृश्येव जायते, तस्मिन्नेव चारीकरणभुजकम्पनादिव्यापारे यादृशो नेत्रव्यापार उचितो, यादृशो भ्रूव्यापारस्तादृशः कर्तुं शक्यते । भगवदीयपरिकरस्य परमालौकिकत्वात् । तथा चैकेन नृत्यव्यापारितहस्ताद्यवयवेन सह शिष्टावयवा भ्रूचरणादिरूपास्तया संवि-

शनयुक्ता यथोचितविधानकरणशीला इति फक्किकार्थः। ननु पादन्यासभुजविधुत्यादिसमये यथोचिता भ्रूप्रभृतिव्यापाराः कथं जायन्त इत्याकांक्षायामाहुः तत्तद्रसे हृदयाविष्ट इत्यादि। अयमाशयः। नृत्ये हि संयोगशृङ्गाररस्याभिनयः क्रियते, स च संयोगस्फूर्तिं विना न सम्भवत्यतः स्मर्यमाणो यादृशसंयोगरसस्तस्मिन् क्षणे हृदये आविष्टो भवति, तादृगेव व्यापारो भवतीत्येतासां हृदये भगवत्संयोग आविष्टोस्ति, स च सर्वगुणयुक्त इति तस्मिन् आविष्टे सर्व एवावयवा यथोचितविधानयुक्ता भवन्तीति भावः। रस एकीभवतीति। नृत्ये सर्वेषामवयवानां भ्रमाधिक्यात्सर्वत्रावयवेषु सच्चिदानन्दरूपेषु स्थितः आनन्द एकीभवतीत्यर्थः। विद्युतामिवेति। भगवद्गण्डेषु व्रजसुन्दरीकुण्डलसम्बन्धे श्यामगौरप्रभामेलनाद्गण्डेषु विद्युच्छविरिव शोभा भवतीति भावः। गण्डलोलैरित्यस्य विवरणे। सर्वा कान्तिस्तत्रैवेति। गण्डेषु सम्बन्धं प्राप्य कुण्डलानां सौन्दर्यगर्वो गच्छति। अत एव गण्डं प्राप्य कुण्डलानां लोलत्वं भवति। युक्तं चैतत्। यो यस्माद्गुणन्यूनः स तस्याग्रे लोलतामापद्यत इति। गण्डे हि केवलो रस इति। सर्वस्नेहवद्भोग्यतात्सर्वसाधारण इत्यर्थः। न तत्र शृङ्गाररसवत्येकभोग्यताधरवत्। अत एव बाल्यभाववतीभिरपि गण्डचुम्बनं क्रियते, अतः साधारणत्वम्। तत्र गण्डे स्थित्वा कुण्डलैरधरे पेयो रसः प्रकाश्यत इत्याहुः पेयो रस इत्यारभ्य अभिव्यक्त्यर्थमित्यन्तेन। रसेन सर्वावयवस्थेनेत्यादि। रसेन आनन्देनेत्यर्थः। एतासां देहस्य सच्चिदानन्दात्मकत्वात् सर्वदेहे आनन्दोस्ति स आनन्दः एकत्रागतस्तदा तदितरत्र कार्श्यं भवति। तदा पूर्वं स्थौल्यानुसारेण कृता ग्रन्थिः पश्चात् शिथिला भवतीति भावः। उपभोक्त्र्य इति। उपभोक्तृत्वं पुंधर्मः, स च रसाधिक्यादेतास्वागतः, अत उपभोगे श्रमो भवतीति युक्तम्। एनच्च कृष्णवध्व इति मूलस्यस्य पदस्यार्थ उक्तः। उत्पन्नस्य नादस्यामृतमयत्वायेति। एतदर्थष्टिप्पण्यां स्फुटः।

१०–३०–१० काचिरसममित्यत्र। मोक्षदानार्थमिति। अयमर्थः। 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्केन कं विजानीया'दितिश्रुतेर्मोक्षे ब्रह्ममात्रैकस्फूर्तिस्तथा स्वमात्रविषयकासक्तिसम्पादनेन केवलं शृङ्गाररसात्मककृष्णाद्वैतस्फूर्तिर्व्रजसुन्दरीणां यथा भवेत्तथोपायो भगवन्श्चिकीर्षितः। स च तादृशनादो भवति। नादेन हि परमाह्लादोत्पत्त्या तदितरविस्मृतिर्लोके प्रसिद्धा। एवं सति शृङ्गाररसात्मककृष्णाद्वैतस्फूर्तिर्मोक्षपदवाच्या। ततश्च मोक्षदानार्थमित्यस्य शृङ्गाररसात्मककृष्णाद्वैतस्फूर्त्यर्थमित्यर्थो भवति। उपनिषदि स्वनादं पूरितवानिति। व्रजसीमन्तिनीकृतनादोत्रोपनिषत्पदवाच्यः। स्वामिनीनादस्य

लक्ष्मीत्वमुक्तम् । ततश्च तां प्रति मूलचर्वितं मूलस्य स्नेहरूपगण्डस्य चर्वितं पुनः पुनर्धारणं प्रादात् । यथा तया स्वगण्डं स्थापयित्वा स्नेहः प्रदर्शितः, तथा भगवतापि स्वगण्डं स्थापयित्वा तद्विषयकस्वस्नेहः प्रदर्शित इति सिद्धम् । युक्तं चैतत् । चर्विततांम्बूलदानं परमप्रेम्णैव भवतीति । अनेन 'ये यथा मां प्रपद्यन्त' इति भगवत्प्रतिज्ञापि सिद्धेति ज्ञेयम् । ताम्बूलशब्दे तामितिद्वितीयान्तं कृत्वा मूलशब्दस्य व्याख्या कृता । तत्र यद्यपि बूल इति बकारोऽस्ति, न तु मकारः, तथाप्यार्षे एतावानाग्रहो न रक्षणीय इति बकारस्थाने मकारकथनेऽप्यदोषः । किञ्च, ताम्बूलपदे वापदान्तस्येति परसवर्णेन मकारोऽप्यस्तीति मूलपदोक्तिरप्यविरुद्धा । वस्तुतस्तु नैरुक्तीयं व्युत्पत्तिरिति वर्णसाम्येन शब्दार्थौ वक्तव्य इति नात्यन्तं साधुत्वासाधुत्वविचारः । 'अप्यक्षरवर्णसाम्येन निर्ब्रूयान्न संस्कारमाद्रियेते'त्यनुशासनात् । लक्ष्मीवन्तं प्रति पुनः पुनरावर्तत इति ज्ञानताम्बूलयोस्तुल्यतेति । लक्ष्मीवन्तं भगवन्तं प्रति गोपिकागण्डं पुनः पुनरावर्तते, स्नेहेन सा गोपिका पुनः पुनर्भगवद्गण्डे गण्डं धारयति, यथा ज्ञानोपदेष्टुः सकाशाज्ज्ञानं प्राप्य यादृशं बुध्यते, तादृशं ज्ञानं पुनरुपदेष्टुरग्रे निवेद्यते, संशयशमनाय पुनः पुनरावृत्तिः क्रियते, एवं पुनः पुनर्लक्ष्मीवन्तं भगवन्तं प्रति गण्डधारणं क्रियत इति ज्ञानताम्बूलयोस्तुल्यतेत्यर्थः । यथा ज्ञानवतः सकाशादुपदेशद्वारा ज्ञानं गृह्यते, तथा लक्ष्मीवतः पुरुषोत्तमाद्भगवतः सकाशाद्गण्डस्थापनेन चर्विततांम्बूलं गृहीत्वा ज्ञानं गृह्यते, भगवान्मय्यत्यन्तमनुरक्त इति रसिकशिरोमणिरिति च । एवमस्यां ज्ञानं निरूपितम् ।

१०–३०–१४ नृत्यती गायती काचिदित्यस्याभासे । वैराग्यात्मकक्रियारूपमच्छिद्रमिति । एतस्यार्थष्टिप्पण्यां स्फुटः । नृत्यती गायतीत्यस्य विवृतौ । शाब्दं ज्ञानं तदर्थानुष्ठानं च तस्याः वर्तत इति । इहैकस्या एव गानं नृत्यं चोच्यते, तथा च गायतीत्युक्त्या शाब्दं ज्ञानं तस्या वर्णितम् । यादृशं गीयमाने प्रबन्धे नृत्यस्वरूपमुक्तं तादृशं जानातीति । अतो ज्ञात्वा गायतीत्युक्तम् । यादृशं स्वगीयमानप्रबन्धे नृत्यस्वरूपं वर्णितम्, तादृशमेव नृत्यं करोतीति नृत्यतीत्यनेनोक्तम् । तदेतदाहुः तदर्थानुष्ठानं चेत्यादिना । तदर्थस्य गीयमानप्रबन्धार्थभूतस्य नृत्यस्यानुष्ठानं करणमित्यर्थः । क्रियाशक्तेरक्षयत्वेत्यादि । नृत्यरूपक्रियाशक्तेरक्षयत्वसूचनायाच्युतपदमित्यर्थः । अग्रे सम्बन्धस्यापीति । सम्बन्धस्य मुख्यरमणस्य करिष्यमाणतया तत्र न्यूनतादिदोषपरिहारायाच्युतपदमित्यर्थः ।

१०–३०–१५ गोप्यो लब्ध्वाच्युतमित्यस्य विवरणे । कण्ठे क्रियायाः स्थापितत्वादिति । 'गृहीतकण्ठ्यस्तद्दोर्भ्यां' इति वाक्यात्कण्ठे भगवत्क्रिया स्थापिता ।

अतः कर्मेन्द्रियरूपवाग्व्यापारो गानं सम्पन्नम्, कण्ठाधीनत्वाद्गानस्य। क्रियायाः स्थापितत्वाद्विजह्रिरे इतिवाक्यसिद्धा विहाररूपा क्रिया च सम्पन्नेत्यर्थः।

१०–३०–१६ कर्णोत्पललालकेत्यस्य विवरणे। रासार्थमेवैतदपीति। उभयोर्नृत्यं रासार्थमित्यर्थः। रसानां समूहो रास इति व्युत्पत्त्या रससमूहोत्पादनार्थं प्रतियुवतिभेदेन प्रकटीभूत इति भावः। अतो भगवता सममिति। समशब्दोऽस्मिन् पक्षे तुल्यपर्यायः। तथा च भगवता समं भगवता तुल्यं ननृतुरित्यर्थः।

१०–३०–१९ कृष्णविक्रीडितमित्यस्य विवृतौ। लौकिकोपि चन्द्रो दृष्टवान् सोमात्मकत्वाद्देहस्येति। शशाङ्कपदेन लौकिकश्चन्द्र एवायातीति तेन चन्द्रेण दर्शनं कृतमित्यर्थः। ननु रासक्रीडायां समागतानां रमणीनां दर्शने सोमस्य दोष उत्पद्यते, तत्कथं दृष्टवानित्याशङ्क्य दोषाभावे कारणमाहुः सोमात्मकत्वाद्देहस्येति। 'अग्निषोमात्मकं जगदि'ति श्रुतिसम्मतत्वाद्देहस्य सोमात्मकत्वेन स्वाभिन्नत्वात्तद्दर्शनं न दोषजनकमित्यर्थः। ननु व्रजसुन्दरीणां देहस्यालौकिकत्वात्कथं सोमात्मकत्वमित्याशङ्क्य समादधते साधारण्यश्च स्त्रिय इति। चकारोपिशब्दार्थः। गोपिकाभ्यो भिन्नाः साधारण्योपि स्त्रियः रासे समागता इत्यर्थः। इह भगवदेकभोग्याः कृष्णवध्वो व्रजरमण्य एव रासे समागताः रासक्रीडारूपपूर्णफलसिद्ध्यर्थम्। रासदर्शनार्थं तु बह्वयोऽङ्गनाः साधारण्योपि समागताः। अतएव ब्रह्मवैवर्ते रासक्रीडायां बह्वीनां गोपिकेतरवधूटीनां समागमनं निरूपितमतः साधारणीनां गोपवधूनां दर्शनं चन्द्रस्य न दोपावहम्। तासां देहस्य लौकिकत्वेन सोमात्मकत्वात्। निसर्गात्सुखमितिपक्ष इति। 'सिषेवात्मन्यवरुद्धसौरत' इति वक्ष्यमाणवाक्योक्तपक्षे त्वलौकिक्येव रीतिः, न तु लोकानुसारिणी। निसर्गात्सुखमिति लोकानुसारिणि पक्षे चन्द्रस्य भगवद्नेत्ररूपत्वाच्चन्द्रस्य भगवति प्रवेशे निसर्गपक्षे उपपत्तिरुक्तेत्यर्थः।

१०–३०–२२ गोप्यः स्फुरत्पुरटकुण्डलेत्यस्य विवृतौ। उज्ज्वला गण्डश्रीः पीता वेति। व्रजसीमन्तिनीषु काश्चित्तडिद्गौर्यस्तासां गण्डश्रीः उज्ज्वला। काश्चिच्चम्पककोरकवत्पीतास्तासां गण्डश्रीः पीतेत्यर्थः। उज्ज्वला नीला चेतरे इति। कुण्डलश्रीरुज्ज्वला कुन्तलश्रीर्नीलेत्यर्थः। मूलभूत गुणकार्यमिति। सर्वस्य कार्यमात्रस्य मूलभूता मुख्यकारणभूता ये भगवद्गुणा भगवच्चातुर्यादयस्तेषां कार्यभूतमित्यर्थः। इदं कान्तित्रयं भगवता स्वचातुर्येणैव निर्मितम्, नत्वस्यान्यः कोपि कर्तेतिभावः।

१०–३०–२३ ताभिर्युत इत्यस्य विवृतौ। भगवतापि ब्रह्ममर्यादा आत्मारामत्वरूपेति। ब्रह्ममर्यादा अविकृतत्वरूपमर्यादेत्यर्थः। शृङ्गाररसात्मकानेकविकाराणां भगवत्याविर्भावाद्ब्रह्ममर्यादा निवृत्ता तिरोहितेत्यर्थः। आत्मारामत्वरूपेति। यावद्रसेत्यन्तपुष्टत्वं न जातं, तावद्भगवता व्रजवामलोचनाः स्वाभिन्नत्वेनैव ज्ञाताः, ताभिः

क्रीडा च कृतेति आत्मारामत्वमेव स्थितम् । यदा पुनरत्यन्तपोषः शृङ्गाररसस्याभूत्, तदा ज्ञानांशस्य तिरोभावात्केवलानन्दांशस्यैवाविर्भावादात्मत्वस्फूर्तिरपि व्रजसुन्दरीषु नाभूत्किन्तु नायिकाभावस्फूर्तिरेवेत्यात्मारामत्वमर्यादापि निवृत्ता तिरोहितेत्यर्थः। देशकालमर्यादा चेति । देशशब्देन स्वामिनीनामवयवाः । रसशास्त्रे सर्वत्र तत्र तत्र स्पर्शादयो वर्णिताः, तन्मर्यादा निवर्तिता, यथेच्छं स्पर्शादिविधानात् । अस्मिन् प्रहरे एवं इयं नायिका तोषणीयेति कालमर्यादापि दूरीकृता । यथेच्छं क्रीडायाः कृतत्वादित्यर्थः । ननु देवैः कथं न निषिध्यत इति । एतदाशङ्क्य सर्वे देवा अभिनन्दनमेव कुर्वन्तीति समाहितम् । एतदाशङ्कासमाधानयोरर्थष्टिप्पण्यां स्फुटः । युवत्य इत्यविचारे इति । 'सोम्भस्यलं युवतिभि'रित्यनेन युवत्य उक्तास्तत्तात्पर्यमुक्तम् । यतो युवत्यः अतः शृङ्गारकौतुकाविष्टा अविचारेण परितः सेचनं कुर्वन्तीति भावः । यथा मदच्युद्विरद इत्यस्य तात्पर्योक्तौ । ततः अविचारेण रमणमितीति । एतस्यार्थष्टिप्पण्यां स्फुटः।

१०–३०–२६ एवं शशाङ्कांशुविराजिता निशा इत्यस्य विवृतौ । यो मोक्षपर्यवसायी स कामो भगवन्तं प्रापयिष्यत्येवेति । इह मोक्षपदेन नित्यलीलाप्रवेश उच्यते । तृतीयाध्याये सूत्रभाष्ये नित्यलीला प्रवेशरूपा पुष्टिमार्गीयाणां मुक्तिरिति बहुशो व्यवस्थापितत्वात् ।

१०–३०–२८ परदाराभिमर्शनमित्यस्याभासे । ये पञ्चपदार्था उक्ता इति । 'संस्थापनाय धर्मस्य प्रशमायेतरस्य चे'त्यस्य चेत्यत्र अधर्मस्थापनार्थमधर्मप्रशमनार्थं भगवद्वतारमुक्त्वा 'प्रतीपमाचर'दित्यनेन धर्मो नष्टः अधर्मः स्थापित इति द्वयमुक्तम् । 'वक्ता कर्ताभिरक्षिते'त्युक्त्वा प्रतीपमाचरदित्यनेन अधर्मः कृतः उक्तः रक्षितश्चेति त्रयमुक्तम् । एवं पञ्च पदार्थाः निरूपिताः ।

१०–३०–२९ आप्तकामो यदुपतिरित्यस्य विवरणे । तथा गोपिकानामपीति । गोपिकानामपि मर्यादैव हितकारिणीति पूर्वेणैवान्वयः । ननु किं कर्तव्यं गोपिकानां भक्तत्वात्तासां मनोरथपूर्तिरावश्यकीति तथा करणमित्याशङ्क्याहुः अन्तर्यामिणः न किञ्चिदसाध्यमिति । अन्तर्यामित्वादन्यथैव गोपीः प्रेरयित्वा मनोरथान्तरमेव कुतो नोत्पादितवानिति भावः ।

१०–३०–३२ तेषां स्वच्छन्दचरितमित्यस्य विवरणे । तत्रैश्वर्यज्ञानवैराग्यैर्यत्करोति तत्स्वच्छन्दचरितमित्युच्यत इति । 'कुशलाचरितेनैषा'मित्यग्रिमश्लोके निरहंकारिणामित्युक्त्या ज्ञानं वैराग्यं चोक्तम् । 'किमुताखिलसत्त्वाना'मिति श्लोके ईशितुरित्युक्त्या ऐश्वर्यं निरूपितम् । तथा चैश्वर्यज्ञानवैराग्यवतां न किञ्चिद्बाधकमतो भगवता यदैश्वर्यज्ञानवैराग्यैः क्रियमाणं स्वच्छन्दचरितं बुद्धिमानन्यो नाचरेदितिभावः।

१०–३०–३५ यत्पादपङ्कजेत्यस्य विवरणे । नहि सर्वेषामेव जीवानां

समानकर्मणा समानं फलमुपलभ्यते इति। निषिद्धं कर्म कृत्वा यदि प्रायश्चित्तं कुर्यात् तस्य नानिष्टं भवति । यदि ज्ञानी योगी वा निषिद्धं कर्म कुर्याद्भगवद्भक्तो वा कुर्यात्तस्य निषिद्धेनापि कर्मणानिष्टं न भवत्यतः समानकर्मणा समानं फलं नास्तीति यदुक्तम्, तद्युक्तमेव । अन्यथेति । यदि साधारणजनानामिव प्रायश्चित्तं कुर्वतामपि ज्ञानियोगिभगवद्भक्तानामनिष्टं फलं स्यात्तदा प्रायश्चित्तशास्त्रस्य 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुने'त्यादिशास्त्रस्य 'योगेनैव दहेदंह' इति शास्त्रस्य 'नाम्नोस्ति यावती शक्तिः पापनिर्हरणे मम, तावत्कर्तुं न शक्नोति पातकं पातकी जन' इत्यादिशास्त्रस्य वैफल्यं स्यादिति भावः। तस्येच्छयात्तवपुष इत्यत्र । आत्तानि प्रकटीकृतानीत्यभिप्रायः सुबोधिन्या इति टिप्पण्यामुक्तम् । यो हि तावद्रूप इत्यारभ्य भवेदित्यन्तम् । येन रूपेण कर्म कृतवान् तद्रूपस्य कर्मणश्चाच्छादनं तिरोधानमेव, नतूत्पत्तिनाशौ, एवं सर्वेषां भगवत्कर्मणां नित्यत्वादुचितानुचितकर्मणोः सर्वदा विराजमानत्वात्केन कर्मणा बन्धो भवेत्। मोचककर्मणामपि विद्यमानत्वात् । मोचककर्मव्यधिकरणमेव बन्धकं कर्म प्राणिनं बध्नाति । मोचककर्मसमानाधिकरणेन बन्धककर्मणा न बन्धो भवत्यतो न भगवति बन्धसम्भावनेतिभावः । तदेतदाहुः यो हि तावद्रूप इत्यारभ्य आच्छादयतीत्यन्तेन । आच्छादयति तिरोभावयतीत्यर्थः। तिरोभावेन कर्मणां सर्वेषां नित्यत्वं सूचितम् । तेन सर्वेषां बन्धकमोचककर्मणां सर्वदा विद्यमानत्वान्न भगवतो बन्धो न वा मोक्ष इति भावः। कर्म हि प्रतिनियतमिति । प्रतिजीवं कर्म व्यवस्थितम् । ब्राह्मणेनेदं कर्म अस्मिन् समये कर्तव्यम् । यथा वसन्ते ब्राह्मणोऽग्नीनादधीत, राजन्येनेदं अस्मिन् काले कर्तव्यमस्मिन्काले अनेनाधिकारिणा इदं न कर्तव्यमित्यादिप्रकारेण कर्म नियतं व्यवस्थितमित्यर्थः। तत्र यदि भिन्नो भिन्नो जीवः स्यादिति । यदि ब्राह्मणक्षत्रियादिप्रकारेण जीवो भिन्नो भिन्नो भवेत्तदा तस्य तस्य जीवस्य तेन तेन कर्मणा बन्धो भवेत् । इह तु रूपबहुत्वेऽपि जीवाभावात्तस्य तस्य रूपस्यैवात्मत्वाद्ब्राह्मणक्षत्रियादिभावाभावाद्भगवतो न किञ्चित्कर्म विहितम् , न वा निषिद्धमिति न बन्ध इति भावः।

१०–३०–३६ योन्तश्चरतीत्यत्र । जीवो वेति । पूर्वस्मिन्पक्षे अपरितोषाज्जीवो वेत्युक्तम् । अतोऽयमेव पक्ष उत्तमः । अतो भगवतो गोपीजीवरूपत्वाद्गोपीदेहो भगवद्देह एवेति न कश्चिद्दोष इत्यर्थः। अतएव पूर्वमुक्तम् 'नहि स्वस्पर्शः स्वस्य क्वापि निषिद्ध' इति । अनुग्रहाय भक्तानामित्यत्र । तत्तद्धर्मप्रवेशव्यतिरेकेणेति । एतस्यार्थष्टिप्पण्यां स्फुटः ।

१०–३०–३८ नासूयन्खल्वित्यस्य विवृतौ । प्रथमप्रवृत्तिं ज्ञात्वेत्यादि । 'नन्वपर्तन्न मोहिता' इति वाक्यान्निषेधेपि भगवन्निकटे तासां प्रवृत्तिं ज्ञात्वापि नासूयन् । तत्र हेतुमाहुः भगवन्मायामोहिता नासूयन्निति । अग्रे तु स्वपार्श्वस्थानित्यादि । भगवन्निकटगमनादारभ्य पुनः स्वगृहागमनपर्यन्तं तु स्वपार्श्वस्थाभिमानादसूयासम्भावनैव नास्तीति हार्दम्। बुद्धिरेव तेषां भ्रमादित्यादि । भ्रमान्मायामोहजन्याद्या बुद्धिरेता

अस्मन्निकट एव वर्तन्ते, भगवन्निकटे सर्वथा न गता' इत्याकारिका, सा तु तेषां गोपानां सम्बन्धिनी । शिष्टं सर्वं देहेन्द्रियप्राणान्तःकरणजीवात्मगेहादिकं भगवत एव भगवदीयमेवेत्यर्थः । गोपीनां सर्वं भगवदीयमेवेति तन्मध्ये भर्तृत्वेन प्रसिद्धानां गोपानामपि निवेदितत्वादेतेषां भगवति दोषस्फूर्तिरेव महान् दोषः, स च 'मन्यमानाः स्वपार्श्वस्था'नित्यनेन दोषारोपाभावोक्तेर्गतः । अतः सर्वदोषपरिहार इत्यर्थः । अनेन तास्वपीति । गोपानां निर्दोषत्वे निर्दुष्टसङ्गादेतासामपि दोषो निवारित इत्यर्थः । अन्यथा तत्संसर्गजदोषस्य तास्वपि संक्रमः स्यात् ।

१०–३०–३९ ब्रह्मरात्र उपावृत्त इत्यस्य विवृतौ । मोक्षाधिकारिण्यो भविष्यन्तीति । मोक्षपदार्थष्टिप्पण्यां विवृतः ।

१०–३०–४० विक्रीडितमित्यस्य विवृतौ । किन्तु यः कश्चन शृणुयात् वर्णयेत् वा, स उक्तं फलं प्राप्नोतीत्यर्थः । भगवतो माहात्म्यश्रवणादेवमपि मोचयतीतीति । एवमपि श्रवणमात्रेण वर्णनमात्रेणापि गुणान्तरराहित्येपि भगवान् मोचयतीत्यर्थः । शीघ्रमेव च बाधकर्त्रेति । इह 'हृद्रोगमाश्वपहिनोती'ति वाक्ये आशु हृद्रोगमित्याशुशब्दस्य पूर्वेण हृद्रोगपदेनान्वयं कृत्वा व्याख्यातं शीघ्रमेव च बाधकर्त्रेति । तमाश्वेव दूरीकरोतीति । हृद्रोगमाश्वपहिनोतीति वाक्ये आश्वपहिनोतीत्याशुपदस्य परेणापहिनोतीति पदेनान्वयं कृत्वा व्याख्यातम् । एवमाशुपदस्य देहलीदीपन्यायेनोभयत्रान्वयः कृत इति बोद्धव्यम् ।

शृङ्गाररस्थायिभावत्वाद्बालकृष्णस्वरूपवान् ।
स एव रसतां प्राप्तो गोवर्धनधरः प्रभुः ॥ १ ॥

इतिश्रीमद्गोवर्धनधरश्रीवल्लभाचार्यवरश्रीविट्ठलेश्वरचरणानुचरसेवकेन दीक्षितलालूभट्टेन कृता दशमस्कन्धत्रिंशाध्यायसुबोधिनीयोजना सम्पूर्णा ।

१०–३१–१ श्रीगिरिधारी करोतु कुशलानि । एकत्रिंशाध्यायार्थोक्तौ । प्रमाणानन्दसिद्ध्ये इति । प्रमाणस्य वेदरूपस्य बलदेवस्य सम्बन्धी य आनन्दस्तस्य सिद्धये इदं रमणं प्रभुश्चक्र इत्यन्वयः । युक्तं चैतत् । प्रमाणप्रधानतया पुरुषोत्तमं भजन्तीभ्यः श्रुतिरूपाभ्यो गोपिकाभ्यः प्रमाणरूपबलदेवसहितपुरुषोत्तमरमणानन्दानुभव एव दातव्य इति तथैव बलदेवसहितो भगवान् रेमे इत्यर्थः । बलभद्रेण सहितो वेदरूपेणेति । 'शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू' इति वाक्यात् वेदरूपताक्षरब्रह्मरूपता च ज्ञातव्या । 'जगद्गुरुं सात्वतशास्त्रविग्रह'मितिवाक्येऽपि वेदरूपताया उक्तत्वात् । सात्वतशास्त्रस्य वेदादेर्विग्रहत्वेन कथनात् ।

१०–३१–२ गाव इत्यत्र । सोपि रुद्र इति । अग्निरपि रुद्र एवेत्यर्थः । 'यदरोदीत्तद्रुद्रस्य रुद्रत्व'मिति तैत्तिरीयाणां प्रथमाष्टके रोदनाद्धेतोरग्ने रुद्रत्वकथनात् ।

१०-३१-१६ प्रपन्नोस्मीत्यस्य विवृतौ । तत्र नैते पित्रादय इत्यस्य तात्पर्यं टिप्पण्यां स्फुटम् ।

१०-३१-२० कदाचिदथ गोविन्द इत्यत्र । इयं हि लीलेत्यादि । इह हि परोक्षवादेन शास्त्रार्थः शिक्ष्यते । अध्यात्मरीत्येति बोध्यम् । वेदात्मकबलदेवसाहित्येन कृताया लीलायाः कालप्रधानत्वम्, 'उदिते जुहोती'त्यादिविधीनां कालाधीनत्वात् । अतोत्रेत्यादि । यतो वेदलीला कालाधीना, अतः कालोपासकानां दैत्यानां तत्रागमनम्, अतः शंखचूडस्यागमनम् । अतएव दैत्यावेशसम्भावनया कर्मणि रक्षोघ्नादिमन्त्राणामुपयोगः । भगवत्सामर्थ्येनेत्यादि । वेदोक्तमन्त्रादिपठनेन स्वाज्ञारूपवेदसत्यत्वबोधनाय भगवान्दैत्यान् निवार्य वेदोक्तानि कर्माणि निर्विघ्नानि करोति, तद्दैत्यनिवारणाय प्रकटीकृतं यत्सामर्थ्यं तेन दैत्यनिवारणे कृते शब्दस्य वेदोक्तमन्त्रस्यैव माहात्म्यं लोके प्रकटीभवति । तथा च स्वसामर्थ्येन सर्वं कृत्वापि यशो वेदायैव ददातीत्यर्थः । प्रकृतेपि शंखचूडं निहत्य मणिर्नलदेवे स्थापित इति मणिं दृष्ट्वा लोका बलदेवमाहात्म्यमेव गायन्तीति वेदरूपाय बलदेवाय यशो दत्तमिति हार्दम् । लौकिकालौकिकमाहात्म्ये ज्ञात इत्यादि । वेदोक्तकर्मणा लौकिके पुत्रादिरूपे फले प्राप्ते लौकिकं माहात्म्यं वेदस्य ज्ञातं भवति । 'वेदैश्च सर्वैरहमेव वेद्य' इत्यादिवाक्यै'र्वन्दिनस्तत्पराक्रमै'रित्यादिवाक्यैश्च भगवद्गुणगानपरतां वेदस्यावगत्य परमार्थप्रापका वेदा इत्यलौकिकं माहात्म्यं ज्ञातं भवति । एवमुभयविधे माहात्म्ये ज्ञाते वेदानां स्वतःप्रामाण्यं सिध्यति । प्रामाण्यं ज्ञानविषयो भवतीत्यर्थः । अन्यथेत्यादि । आधुनिका मीमांसका वेदोक्ते प्रमेये युक्तिविरोधं यत्र पश्यन्ति, तत्रोत्प्रेक्षामात्रं मन्यमाना वेदार्थमन्यथा ब्रुवन्ति । ये तु वेदमहिमानमवगच्छन्ति, ते तु विलक्षणसामर्थ्यं स्वीकृत्य युक्त्यगोचरतां मन्यमाना यथाश्रुतं लापयन्ति । तथा यदि महिमज्ञानं न स्यात्तदा स्वतःप्रामाण्यज्ञानाभावादुत्प्रेक्षादिदोषसम्बन्धं स्वीकुर्युरित्यर्थः । अतो वेदमहिमावश्यं बोधनीयः । प्रकृतेपि अग्रजाय मणिदानेन श्रीबलदेवस्य ज्येष्ठभ्रातृत्वहेतुकपूज्यत्वरूपो लौकिको महिमा दर्शितः । श्रीबलदेवेन दैत्यं हत्वा मणिरानीत इत्ययं देवेभ्योप्यधिकबलवानित्यलौकिकोपि महिमा प्रदर्शित इति ज्ञेयम् ।

पूर्वोक्तगोपिकाव्यतिरिक्ताभिरिति । पञ्चाध्याय्यां निरूपिताभ्यो भगवदेकभोग्यगोपिकाभ्यो व्यतिरिक्ताभिरित्यर्थः । याः पूर्वं शास्त्रपरा इत्यारभ्य बलभद्रेण सह रमणार्थमिच्छा जातेत्यन्तम् । याः शास्त्रपराः शास्त्रे स्वविवाहितेतरभजनं निषिद्धमिति ज्ञात्वा भगवतोपि भजनं न कृतवत्यः, या वा लौकिकधर्मपरा लोके पतिपुत्रादिभ्यो विवाहितेतरभजने भयं भवतीति विमृश्य भगवतोपि भजनं न कुर्वन्ति, तादृश्यः स्थितास्ता अपि एतावता समयेन भगवतोनुभावं दृष्ट्वा सर्वं भगवदधीनमिति भगवद्भजने वैदिकं लौकिकं वा भयं चेद्भविष्यति, तदा भगवान् सर्वानिष्टं दूरीकरिष्यतीति निश्चयेन भग-

वता सह बलदेवेन च सह रिरंसवो जाता इति भावः। तासामपीन्द्र इति। क्रियाशक्तिप्रधान इति। एतदर्थष्टिप्पण्यां स्फुटः। अनेनेति। वेदात्मकबलदेवसहितभगवद्रमणकथनेनेत्यर्थः। मध्यमाधिकारिणां वेदपरत्वमिति। प्रमाणपुरःसरं पुरुषोत्तमपराणां वेदपरत्वं न दोषाय, किन्तूचितमेव। तेषां तथैव निरोधसिद्धेः। केवलार्थपराणामितीति। एतदर्थष्टिप्पण्यां स्फुटः। अन्यथेति। एतदर्थष्टिप्पण्यां स्फुटः। वेदे वेत्यस्याप्यर्थः।

१०-३१-२१ विरजाम्बरावित्यत्र। शुद्धा माया चेति। एतदर्थष्टिप्पण्यां विस्तृतः। कर्मणां रात्रिरेवेत्यारभ्य सन्माननमित्यन्तम्। महारात्रे बुद्ध्वा 'ब्रह्मणा सहाचान्तोध्वर्युः अग्ने नयेत्याग्नीध्रमभिमृशती'त्यादिवाक्यात् कर्मसु रात्रिरेव प्रधाना। किञ्च। अग्निहोत्रकरणानन्तरं सायं दोहं दोहयतीत्यमावस्यायां रात्रौ दोह इतोपि रात्रेः प्राधान्यम्। सन्ध्यायां चाग्निहोत्रम्, अतः सन्ध्याया अप्यादरणीयत्वम्। एवं रात्रेः सन्ध्यायाश्च प्राधान्यं वक्तुं निशामुखपदम्। तथा च निशाया निशामुखस्य च सन्माननं फलितम्। अन्यथा सन्ध्यां मानयन्तावित्येव वदेत्।

१०-३१-२२ उदितोडुपतारकमित्यस्य विवृतौ। पर्वसूचक इति। पूर्णिमासूचक इत्यर्थः। 'निशामुखं मानयन्ता'वित्युक्त्वा चन्द्रोदयकथनान्निशामुखे चन्द्रोदयस्य पूर्णिमायामेव सत्वादित्यर्थः। प्रमाणं चन्द्र इति। फलं नक्षत्राण्यपीति। एतदर्थष्टिप्पण्यां स्फुटः। अनेनाङ्गेपि फलश्रुतिरिति। 'तादृशं कालं मानयन्तौ' इत्यनेन कर्माङ्गभूतस्य कालस्य प्रशंसाबोधनेपि या पूर्वकाण्डे फलश्रुतिः, सा युक्तैवेत्यर्थः। भगवतापि कालसन्मानस्य कृतत्वात्।

१०-३१-२३ तौ कल्पयन्तावित्यत्र। द्वयोरेकमुखतेति। द्वयोर्वेदवेदप्रतिपाद्ययोर्बलदेवश्रीकृष्णचन्द्रयोरेकमुखता युगपत् स्वरसमूहमूर्च्छनाकल्पनेत्यर्थः।

१०-३१-२५ शङ्खचूड इति ख्यात इत्यस्य विवृतौ। सर्वा एव श्रुतयः लौकिकाः कर्तव्या इति पाषण्डिनां बुद्धिरिति। यथा पाषण्डिनो भगवत्परान् वेदान् लौकिकपरत्वेन व्याकुर्वन्ति, तथायं शंखचूडोपि भगवत्पराः श्रुतिरूपाः गोपिका अन्यत्र नेतुं वाञ्छतीति पाषण्डी भवतीत्यर्थः। तथा च लोभक्रोधादयो दैत्या इति कृष्णोपनिषत्सु भगवद्ध्यानां लोभादिदोषरूपता वर्णितेति तेषु दोषेषु अयं पाषण्डरूपः शंखचूड इति तात्पर्यम्। विशेषपराश्चेदित्यादि। वेदवेदार्थरूपबलदेवश्रीकृष्णचन्द्रोभयपराः, अतो दैत्येन नीता गता विशेषपराः पञ्चाध्यायीस्थगोपिकावत् पुरुषोत्तमैकपराश्चेत्स्युः, तदा न गच्छेयुरित्यर्थः। मणिग्रहणेन मणिगता देवतेत्यादेरर्थष्टिप्पण्यां स्फुटः। देवताया अप्ययं भाग इति। मणिगतदेवताया बलदेवकर्तृको भोग इत्यर्थः।

इतिश्रीमद्गोवर्धनधरश्रीवल्लभाचार्यवरश्रीविट्ठलेश्वरचरणानुचरदीक्षितलाल्लूभट्टेन कृता दशमस्कन्धैकत्रिंशाध्यायसुबोधिनी समाप्ता।

योजनायाः शोधपत्रम् ।

अशुद्धम्	शुद्धम्	पृ. पं.	अशुद्धम्	शुद्धम्	पृ. पं.
का	हि	३–१२	इत्यर्थ	इत्यर्थः	२३–२३
दष्टं	दृष्टं	५—३	अर्पितान्	ह्यर्पितान्	२४–३
प्रमाणपङ्क्ति	प्रमाणपद्धक्ति	६–१३	पूर्वें	पूर्वं	२४–८
धर्म	धर्मः	६–२२	उपपाद्य	उत्पाद्य	२५–२३
यदुतरत्र	तदुतरत्र	७–१९	चक्रै	चक्रे	२६–२
त्यनेन	इत्यनेन	११–२१	मितिति	मितीति	२७–१
साध्या–तृतीयेति	cap.	११–३०	रिरिंसा	रिरंसा	२७–२
१०–२६–२९	१०–२७-२९	१२–९	ज्ञेयम्	ध्येयम्	२७–१८
चतुर्थ्यस्तु तमा	cap.	१३–२१	कर्तृकं	कर्मकं	२८–७
सन्यपि	सति	१४–१०	दैवानां	देवानां	२८–९८
वेनि	वेति	१५–१०	भ्रूवरण	भ्रूचरण	२८–२९
स्व	स्व	१५–२१	स	स स	२९–१७
स्थिति	स्थितिः	१८–१६	क्रिया	क्रिया-	३०–२१
वाक्याच'	वाक्याच्च	२१–२०	ग्राह्यम्	ग्राह्यः	३०–३३
एतद्विपर्ययम्	एकः एतद्वि-	२३–२२			

अस्मन्मुद्रितनामफलश्रीसुबोधिनीशोधपत्रम् ।

अशुद्धं	शुद्धं	पृष्ठं	पङ्क्तिः
कुलवनी स्त्रीओने	हे कुलवधूओ	२८	२८
काङ्क्षिताः	काङ्क्षया	८२	१३
भजन्त्येक	भजन्त्यन्ये	११९	७
भजनानुवृत्त्यर्थम्	भजनानुवृत्त्यर्थम्	१२४	१२
त्यागवृत्त्यर्थम्	त्यागव्यावृत्त्यर्थम्	१२४	१५
शृङ्खल	शृङ्खला	१२५	१३
मारुत.	मारुतः	१२४	७
अदान्	प्रादान्	१४०	८
पट्टिरा	पट्टिका	१४६	१४
अत्र	आत्त	१५२	७
यन्स्वतन्त्रोयुक्तं बुद्धिमांस्तत् ।	स्वच्छन्दचरितं बुद्धिमान् ।	१५८	३
गुणगणार्णवम्	गुणगणार्णम्	१९९	१९

श्रीकृष्णाय नमः ।

निवेदनम् ।

श्रीमद्भागवत-दशम-पूर्वार्ध-तामस-फल-प्रकरण-श्रीसुबोधिनी-मुद्रणं त्वितः पूर्वमस्माभिः कृतमेव । तत्साधनेषु टिप्पणीप्रकाशलेखाश्चापि प्रकटिताः । तत्रावशिष्टा बागरोदीदीक्षितश्रीलालूभट्टकृता योजनाधुना प्रकाश्यते । श्रीभाणेजभट्टसुतेत्यनेन लालूभट्टा न गोस्वामिजामातरः, अपि तु तत्पुत्रा इति कल्याणशास्त्रिणः । दशमतामसफलश्रीसुबोधिनीयोजनापुस्तकं निजवाचनार्थं संपादितमतीवस्वच्छाक्षरैर्लिखितं मोहमयीस्थश्रीमद्गोस्वामिश्रीगोकुलनाथमहाराजचरणैर्दत्तम् । एतत्पुस्तकं ग्रन्थप्रणेतुर्मूलग्रन्थतो लिपीकृतम् । अस्माभिरपि 'प्रेसकॉपि'पुस्तकमेतत्पुस्तकत एव लिपीकृतम् । पण्डितवर्यबलभद्रशर्मकृपया च तदीयमूलपुस्तकेन पूर्वं मुद्रणावसरे च संवादितम् । एतन्मुद्रणव्ययोस्मत्सुहृद्वरेण 'वाडीलाल नगीनदास शाह बी. ए. एल् एल्. बी. वकील हाइकोर्ट' इत्यनेन दत्तः । इदं मूलपुस्तकं संवत् १८०३ श्रावणवदी नवम्यां लिखितम् । अस्यां योजनायां बहुषु स्थलेषु 'इति टिप्पण्यां स्पष्ट'मिति लिखितमिति । तत्रास्मन्मुद्रिता श्रीमती टिप्पणी द्रष्टव्या विशेषजिज्ञासुभिरिति । द्वात्रिंशाध्याययोजना तु नोपलब्धास्माभिरिति । 'प्रेसकॉपि' पुस्तकं 'द्वारकादास वल्लभदास' इत्यनेन लिखितम् । योजनापि तामसफलश्रीसुबोधिन्या अवगाहने किमपि सौकर्यं कस्यचिदपि भगवदीयस्य संपादयिष्यतीति विचारेण परमप्रेम्णा शोधितमेतत्पुस्तकं श्रीमत्प्रभुचरणकमलेषु समर्पयाम इति ।

श्रीरामजयन्ती १९८१. मुम्बई. } मूलचन्द्र तेलीवाला ।